THE
NAISHADHA-CHARITA:

OR

ADVENTURES

OF

NALA RÁJÁ OF NAISHADHA;

A Sanscrit Poem,

BY

SRÍ HARSHA OF CASHMÍR.

Harsha, ...

PART I.

WITH THE PERPETUAL COMMENTARY

OF

PRÈMA CHANDRA PANDITA,

Professor of Rhetoric in the Sanscrit College of Calcutta.

COMMENCED UNDER THE AUSPICES OF THE GENERAL COMMITTEE OF PUBLIC INSTRUCTION; TRANSFERRED TO THE ASIATIC SOCIETY WITH OTHER UNFINISHED ORIENTAL WORKS IN 1835; AND COMPLETED BY THE ASIATIC SOCIETY IN 1836.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS, CIRCULAR ROAD.

1836.

Digitized by Google

नैषधचरितं।

तत्संज्ञकस्य श्रीहर्षविरचितस्य महाकाव्यस्य।

श्रीप्रेमचन्द्रन्यायरत्नविरचितान्वयबोधिकासमाख्यटीकासहितः।

पूर्व्वभागः

साधारणविद्योत्सृष्ट्यर्थकसमितिधनव्ययेन मुद्रितुमारब्धः

किन्तु तत्परित्यागात्

गौडदेशीयाया आसियातिकाख्यसभाया अनुज्ञया

कलिकाताख्यराजधान्यां

तन्मुद्रायन्त्रालये

मुद्रितोऽभूत्

तत्सम्बन्धिपण्डितेनसंशोधितः

शकाब्दे १७५८

ई १८३६

(Indo) 2332 .169 .039 v.1
572909
Digitized by Google

॥ नैषधीयचरितं ॥

प्रथमः सर्गः ।

निपीय यस्य क्षितिरक्षिणः कथां
तथाद्रियन्ते न बुधाः सुधामपि ।
नलः सितच्छत्रितकीर्त्तिमण्डलः
स राशिरासीन्महसां महोज्ज्वलः ॥ १ ॥

वाञ्छितामलपदा नियतं जनानां शास्त्रार्थसंशयसमन्वयने च योग्या । व्यक्तीकरोति निखिलं हृदि भावजातं वाग्देवतामभिमतां महमाश्रये तां ॥ अन्यासु भावरहितासु सदर्पिकासु टीकासु चेदिह भवेद्विफलः प्रयत्नः । सद्भिस्तथापि मदुदीर्धविबोधनार्थं जातोद्यमोऽहमिह सम्प्रति नावबुध्ये ॥ अथ ग्रन्थस्य महाकाव्यतया वर्णनीयप्रसिद्धनायकत्वेन सहृदयानां झटिति साभिनिवेशप्रवृत्तिप्रवर्त्तकतया च प्रथमं सन्नायकनामकीर्त्तनरूपं वस्तु निर्दिशति । निपीयेति । बुधाः पण्डिताः यस्य क्षितिरक्षिणः क्षितिं पृथिवीं साधु रक्षितवानिति तस्य न्यायेन पृथिवीपालयितुरित्यर्थः कथां गुणानुवादं निपीय सादरं श्रुत्वा सुधामपि अमृतमपि तथा कथावत् न आद्रियन्ते न बहु मन्यन्ते सुधातोऽपि तत्कथायाः अतीवाह्लाद

रसैः कथा यस्य सुधावधीरिणी
नलः स भूजानिरभूद्गुणाद्भुतः ।
सुवर्णदण्डैकसितातपत्रित
ज्वलत्प्रतापावलिकीर्त्तिमण्डलः ॥ २ ॥

तस्मात् स नलो नलनामा आसीत् स्थितः किम्भूतः सितच्छत्त्रितं श्वेतातपत्रीकृतं कीर्त्तिमण्डलं यशःस्तोमो येन तादृशः एतेन तस्य सकलधरामण्डलैकाधिपतेः कीर्त्तिमण्डलं भूमण्डलमापूर्य्य उपरि स्वर्गादौ गतं सत् श्वेतातपत्रमिव जातमिति प्रतिपादितं तथा महसां तेजसां राशिः पुञ्जः अतितेजस्वीत्यर्थः । तथा महान् कायाश्रययो गुणवासावुज्ज्वल उद्दीप्तश्चेति महोज्ज्वलः । यद्वा क्षितिरक्षित इति क्षितिः क्षयः क्षतमिति यावत् तस्मात् रक्षितुं त्रातुं शीलः यस्य तादृशस्य क्षत्रस्येत्यर्थः देवक्षत्रयोरन्यतर एव महाकाव्ये नायको भवति । यदुक्तं सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः । सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वित इति । महोज्ज्वल इति महः उत्सवान्वितः उज्ज्वलः शृङ्गाररसो यस्य तादृशः एतेन शृङ्गारी नायकोऽस्मिन् वर्ण्यते इति ग्रन्थकृता सूचितं । महाकाव्यस्य शृङ्गारवीरशान्तरसानामन्यतमप्रधानकत्वमावश्यकं तदुक्तं महाकाव्यलक्षणमधिकृत्य । शृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यत इति ॥१॥

तस्य गुणाद्भुतत्वं प्रतिपादयितुं उक्तप्रायमेवार्थं पुनराह । रसै रिति । यस्य नलस्य कथा चरितं रसैः शृङ्गारादिभिः सुधामृतं अव धीरयितुमवज्ञातुं शीलं यस्याः तादृशी अमृततिरस्कारिणीत्यर्थः यस्य कथा रः कामस्य रसा भूमिरित्यपि क्वचित् । भूजानिर्भूस्वामी स नलः गुणाद्भुतो गुणैः अविकत्थनत्वादिभिर्धीरोदात्तनायकगुणैः

Digitized by Google

पवित्रमत्रातनुते जगद्युगे
श्रुता रसक्षालनयेव यत्कथा ।
कथं न सा मद्गिरमाविलामपि
स्वसेविनीमेव पवित्रयिष्यति ॥ ३ ॥

शोभाविलासादिभिः पौरुषगुणैः सन्ध्यादिभिः षड्गुणैर्वा प्रभावादिभिरित्यपरे अद्भुतो लोकातीतोऽभूत् किम्भूतः सुवर्णदण्डः एकमद्वितीयं सितातपत्रं श्वेतच्छत्रं स च तच ते ज्वलन्ती दीप्यमाना प्रतापानां कोपदण्डजतेजसां आवलिः श्रेणी कीर्त्तिमण्डलं यशःसमूहः सा च तच ते सुवर्णदण्डैकसितातपत्रीकृते ज्वलत्प्रतापावलिकीर्त्तिमण्डले येन स तथोक्तः अत्रान्वयः क्रमिको बोध्यः ॥ २ ॥

निर्दोषवाक्यपरिहारद्वारा तत्कथायाः पुण्यजनकत्वं प्रतिपादयन्नाह । पवित्रमिति । यत्कथा या कथा नलचरितं श्रुता श्रवणविषयीकृता सती अत्र कलौ युगे जगत् विश्वं रसक्षालनया रसैः शृङ्गारादिभिः पक्षे च जलैर्या क्षालना शुद्धिः आह्लादकत्वमित्यर्थः पक्षे मार्ज्जना च तयैव पवित्रं आतनुते करोति अन्यदप्यशुद्धं वस्तु जलक्षालनया शोध्यते इत्युत्प्रेक्षा । सा कथा आविलामपि श्रुतिकट्वादिदोषैः कलुषामपि मद्गिरं मम वाणीं कथं न पवित्रयिष्यति न स्वच्छां करिष्यति अपितु पवित्रयिष्यत्येव किम्भूतां यतः स्वसेविनीमेव आत्मोपासिकामेव एवकारस्य स्वायोगव्यवच्छेदकत्वात् सदैव सेवमानामित्यर्थः । एतेन निर्दोषयैव वाचा नलचरितं वक्ष्यत इति सूचितं ॥ ३ ॥

Digitized by Google

अधीतिबोधाचरणप्रचारणै-
र्दशाश्चतस्रः प्रणयन्नुपाधिभिः।
चतुर्दशत्वं कृतवान् कुतः स्वयं
न वेद्मि विद्यासु चतुर्दशस्वयं॥ ४॥
अमुष्य विद्या रसनाग्रनर्त्तकी
त्रयीव नीताङ्गगुणेन विस्तरं।

पूर्व्वं नलस्य गुणाद्भुतत्वमुक्तं तच्चानवद्यां विद्यां विना न सम्भवत्यतस्तामेव वर्णयति। अधीतीति। अयं नलः चतुर्दशसु विद्यासु शिक्षाकल्पादिषु अधीतिबोधाचरणैः अध्ययनमधीतिः अधीतस्यार्थावगमो बोधः अस्मिन् सति तदनुष्ठानमाचरणं शिष्येभ्यः प्रतिपादनं प्रचारणं तैश्चतुर्भिरुपाधिभिः करणैः चतस्रो दशा अवस्थाः प्रणयन् प्रतिपादयन् कुतः कस्माद्धेतोः चतुर्दशत्वं चतुरवस्थत्वं स्वयमात्मना कृतवानित्यहं न वेद्मि न जानामि अत्र चतुर्दशत्वमित्यस्य चतुर्दशसंख्यायोगित्वमित्यर्थकत्वाद्विरोधाभासः चतुर्भिरुपाधिभिः प्रत्येकं चतुर्दशसु विद्यासु दशाचतुष्टयप्रणयनेन षट्पञ्चाशत्त्वसंभवात् विरोधभञ्जनन्तु चतुर्दशत्वं चतुरवस्थत्वमित्यर्थकतयैव। चतुर्दशविद्या यथा। अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः। धर्म्मशास्त्रं पुराणञ्च विद्या ह्येताश्चतुर्दश। अङ्गानि च। शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गणः। छन्दसां विचितिश्चैव षडङ्गो वेद उच्यत इति॥ ४॥

न केवलमसौ चतुर्दशविद्या एव ज्ञातवान् किन्त्वन्या अपीति प्रतिपादयन्नाह। अमुष्येति। अमुष्य नलस्य रसनाग्रनर्त्तकी जिह्वाग्रे सदा स्फुरन्ती नासिकाश्चक्रया वा विद्या नवद्वयद्वीपेषु

अगाहताष्टादशतां जिगीषया
नवद्वयद्वीपपृथग्जयश्रियां ॥ ५ ॥
दिगीशवृन्दांशविभूतिरीशिता
दिशां स कामप्रसरावरोधिनीं ।

अष्टादशद्वीपेषु याः पृथग्जयश्रियः पृथक् पृथक् जयलक्ष्म्यस्तासां जिगीषया जेतुमिच्छयेव विद्यासु जिगीषाया अध्यवसितत्वात् प्रतीयमानोत्प्रेक्षा सरस्वतीरूपाया विद्यायाः सपत्नीलाभलक्ष्मीजिगीषेवेति भावः एतेनाष्टादशद्वीपा नलेन जिता इति सूचितं त्रयीव त्रिवेदीव अङ्गमुखेन प्रतिभादिना विस्तरं नीता प्रपञ्चं प्रापिता सती यथा त्रयी अङ्गमुखेन शिक्षाकल्पादिना विस्तारिता तथेत्यर्थः। अष्टादशतां अष्टादशसंख्यां अगाहत गता। यद्यपि सप्तद्वीपा पृथिवी प्रसिद्धा तथाप्युपद्वीपैरष्टादशद्वीपा भवति। अष्टादश विद्या यथा। षडङ्गा चतुर्व्वेदी मीमांसा न्यायविस्तरः। आयुर्व्वेदो धनुर्व्वेदो गान्धर्व्वमर्थशासनं। पुराणं धर्म्मशास्त्रञ्च विद्या ह्यष्टादश स्मृता इति॥ ५ ॥

अस्य शिवावतारत्वं शास्त्रानुसारित्वञ्चाह। दिगीशेति। दिगीशानां दिक्पालानां इन्द्रादीनां वृन्दस्य समूहस्यांशैर्भागैर्विभूतिर्जन्म यस्य सः अतएव दिशां पूर्व्वादीनां ईशिता ईश्वरः राजा हि दिक्पालानामंशैर्जायते स नलः त्रिनेत्रावतारत्वबोधिका अस्य शिवावतारताज्ञापिका तयाधिकां मोक्षाधिकात् नयनतयातिरिक्तां शास्त्रापि धर्म्मशास्त्रादिस्वरूपां इत्थं चतुर्व्वर्गभरदर्शी शास्त्रोक्तमेवानुष्ठितवानित्यर्थः किम्भूतां इमां कामप्रसरस्य यथेष्टाचरणस्य अवरोधिनीं प्रतिबन्धिकां। शिवोऽपि दिगीशवृन्दांशविभूतिः दिगीशवृन्दस्यांशे अवयवविशेषे शिरसीत्यर्थः विभूति

Digitized by Google

बभार शास्त्राणि दृशं द्वयाधिकां
निजत्रिनेत्रावतरत्वबोधिकां ॥ ६ ॥
पदैश्चतुर्भिः सुकृते स्थिरीकृते
कृतेऽमुना के न तपः प्रपेदिरे ।
भुवं यदेकाङ्घ्रिकनिष्ठया स्पृशन्
दधावधर्म्मोऽपि कृशस्तपस्वितां ॥ ७ ॥

चरणभक्त यस्य सः तथा सर्व्वदेवमयत्वात् दिव्यां ईक्षिता कामभस्म रावरोधिनीं कन्दर्पवेगस्य क्षोभिकां तद्धेतुदाहकत्वात् द्वयाधिकां तृतीयां दृशं बिभर्त्ति ॥ ६ ॥

तस्य धर्म्मसंस्थापकत्वमधर्म्मनिवारकत्वञ्चाह । पदैरिति । अमुना नलेन चतुर्भिः पदैर्ध्यानयज्ञतपोदानरूपैश्चरणैः सुकृते वृषरूपे धर्म्मे स्थिरीकृते स्थिरतां प्रापिते सति अतएव कृते त्रेतायामपि सत्ययुगे सति के जनाः तपो न प्रपेदिरे नाचरितवन्तः अपितु सर्व्व एव । कुतः सर्व्वेषां तपःकरणमित्याह यत् यस्मात् अधर्म्मोऽपि एकाङ्घ्रिकनिष्ठया एकस्यासहायस्याङ्घ्रेश्चरणस्य कनिष्ठया दुर्ब्बलयाकुत्या भुवं पृथिवीं स्पृशन् कृशः क्षीणप्रभावः सन् तपस्वितां वराकतां अथच तपश्चारित्वं दधौ धृतवान् यत्राधर्म्मस्तपस्वी तत्रान्येषां कैमुतिकन्यायेन तपस्वित्वं सुतरां सिद्धमिति भावः । यद्वा कृते इति कृतशब्दस्य सामान्ययुगवाचकत्वात् सामान्यशब्दस्य विशेषपरत्वान्नैसर्गिकमिति युक्त्या कृते त्रेतायुगे इत्ययमर्थोऽपि सम्यक् ॥ ७ ॥

Digitized by Google

यदस्य यात्रासु बलोद्धतं रजः
स्फुरत्प्रतापानलधूममञ्जिम ।
तदेव गत्वा पतितं सुधाम्बुधौ
दधाति पङ्कीभवदङ्कतां विधौ ॥ ८ ॥
स्फुरद्धनुर्निस्वनतद्घनाशुग
प्रगल्भवृष्टिव्ययितस्य सङ्गरे ।

अस्य शत्रून् प्रति प्रयाणं वर्णयति । यदस्येति । अस्य नलस्य यात्रासु रिपून् प्रति प्रयाणेषु स्फुरन् दीप्यमानो यः प्रतापरूपोऽनलस्तस्य धूमस्येव मञ्जिमा मनोज्ञत्वं यस्य तथाभूतं यत् बलोद्धतं सैन्यैरुत्थापितं रजोधूलिस्तदेव रजएव गत्वा ऊर्द्धीय सुधाम्बुधौ अमृतार्णवे पतितं सत् पङ्कीभवत् अपङ्कमपि पङ्कतां कर्दमतां प्राप्नुवत् विधौ चन्द्रे अङ्कतां कलङ्कतां दधाति धारयति कलङ्करूपेण तत्र तिष्ठतीत्यर्थः विधोः सुधाम्बुधिजत्वेन तत्र स्थितत्वाद्रजोजन्यतासम्भवः ॥ ८ ॥

न केवलं तेन शत्रून् प्रति प्रयाणं कृतं किन्तु विग्रहेण तेषां पराभवोऽपि कृत इत्याह । स्फुरदिति । परः शत्रुः प्रतापरै प्रतापिभिरित्यर्थः । परे शत्रव. सङ्गरे समरे स्फुरन्तौ धनुर्निस्वनौ चापसिंहनादौ यत्र तादृशस्य तस्य नलस्य ये घनाः सान्द्रा आशुगा बाणास्तेषां प्रगल्भया महत्या वृष्ट्या व्ययितस्य निर्व्वापितस्य यद्वा स्फुरन्तौ धनुर्निस्वनौ चापसिंहनादौ अथच इन्द्रायुधगर्ज्जिते यस्य स चासौ स नलो घनो मेघ इव तद्घनश्चेति स तथोक्तस्तस्याशुगानां बाणानां प्रगल्भया वृष्ट्या पतनेन अथ च आशुगेन वायुना प्रगल्भया प्रबलया वृष्ट्या वर्षणेन व्ययितस्य निर्व्वापितस्य निजस्य स्वकीयस्य तेजःशिखिनः प्रतापाग्ने रङ्गारमिव निर्व्वाणजातमिव अयशोऽकीर्त्तिं वितेनुर्विस्तारयामासुः

निजस्य तेजःशिखिनः परःशता
वितेनुरङ्गारमिवायशः परे ॥ ९ ॥
अनल्पदग्धारिपुरानलोज्ज्वलै-
र्निजप्रतापैर्वलयं ज्वलद्भुवः ।
प्रदक्षिणीकृत्य जयाय सृष्टया
रराज नीराजनया स राजघः ॥ १० ॥
निवारितास्तेन महीतलेऽखिले
निरीतिभावं गमितेऽतिवृष्टयः ।

यशसः शुभ्रत्वस्य कविप्रसिद्धत्वेन तद्विरुद्धस्यायशसः कृष्णवर्णत्वमतोऽङ्गारसादृश्यं ॥ ९ ॥

अथ प्रयाणं विवक्षुरादौ दिग्विजयं वर्णयति । अनल्पेति । राज्ञः प्रत्यर्थिनो हतवानिति राजघो राजश्रेष्ठो वा स नलः अनल्पानां बहूनां दग्धानां अनल्पं यथा तथा दग्धानां वा अरिपुराणां रिपुनगराणामनलेन वह्निना उज्ज्वलैरधिकं स्फुरद्भिर्निजप्रतापैः स्वतेजोभिरग्निसरूपैरित्यर्थः ज्वलत् दीप्यमानं भुवो वलयं पृथिवीमण्डलं प्रदक्षिणीकृत्य जयाय जयार्थं सृष्टया निर्मितया नीराजनया निर्मञ्छनया रराज शुशुभे अन्येषामपि राज्ञां दिग्विजये अनल्पदग्धानां अरीणां अनुदग्धानां पुराणां सुगुणानामनलेन प्रदक्षिणीकृत्य नीराजना क्रियते इति व्यवहारः ॥ १० ॥

ईतीनां प्रजापीडकत्वात्तन्निवारकत्वमपि तस्यासीदित्याह । निवारिता इति ॥ तेन नलेन निरीतिभावं ईतिशून्यत्वं गमिते प्रापितेऽखिले समस्ते महीतले निवारिताः काकाक्षिगोलकन्यायादत्रापि तेनेत्यस्यानुषङ्गः तेन दूरीकृताः अतिवृष्टयः अनवरतजलवर्षणरूप

Digitized by Google

न तत्यजुर्नूनमनन्यविश्रमाः
प्रतीपभूपालमृगीदृशां दृशः॥११॥
सितांशुवर्णैर्वयति स्म तद्गुणै
र्महासिवेम्नः सहकृत्वरी बहु।
दिगङ्गनाङ्गाभरणं रणाङ्गन
यशःपटं तद्भटचातुरीतुरी॥१२॥

इतिविशेषः विश्रम्यतेऽत्रेति विश्रमो विश्रामस्थानं नास्ति अन्यो विश्रमो यासां तथाभूताः सत्यः नूनमुत्प्रेक्षे प्रतीपाः शत्रवो ये भूपाला राजानस्तेषां मृगीदृशां स्त्रीणां दृशो नयनानि न तत्यजुर्न त्यक्तवत्यः तत्रैव विश्रामं प्राप्ता इत्यर्थः पतिविरहेण तासां सर्व्वदैव रोदनादित्यभिप्रायः॥ ईतयो यथा ॥ अतिवृष्टिरनावृष्टिः शलभा मूषिकाः खगाः। प्रत्यासन्नाश्च राजानः षडेते ईतयः स्मृता इति ॥११॥

अथ दिग्विजयमुक्त्वा यशो वर्णयति ॥ सितांश्विति ॥ तद्भटचातुरीतुरी स नलस्तस्य भटो वीरस्तेन तस्य या चातुरी निपुणता सैव तुरी तन्तुवायोपकरणविशेषः माकु इति यस्या लोकोक्तिः महासिर्महाखड्ग एव वेमा तन्तुवायोपकरणविशेषस्तस्य सहकृत्वरी सहकारिणी सती रणाङ्गने समरचत्वरे सितांशुवर्णैश्चन्द्रवर्णैः शुभ्रैरित्यर्थः तद्गुणैस्तस्य नलस्य गुणाः शौर्य्यगाम्भीर्य्यादयस्त एव गुणाः सूत्राणि स्फुटपरम्परितरूपकं तैः करणैः दिश एवाङ्गनास्तासामङ्गाभरणमलङ्कारं बहुमनेकं यश एव पटः सुचेलकस्तं वयति स्म उतवती ॥ १२ ॥

ख

प्रतीपभूपैरिव किं ततोभिया
विरुद्धधर्म्मैरपि भेत्तृतोज्झिता ।
अमित्रजिन्मित्रजिदोजसा स य
द्विचारदृक् चारदृगप्यवर्त्तत ॥ १३ ॥
तदोजसस्तद्यशसः स्थिताविमौ
वृथेति चित्ते कुरुते यदा यदा ।

अथ तेजस्वित्वं भीतिभङ्ग्याह ॥ प्रतीपेति ॥ ततो भिया तस्माद्भयेन विरुद्धधर्म्मैरपि का कथान्येषां परस्परासमानाधिकरणैरपि वस्तुभिः प्रतीपभूपैरिव प्रतिकूलभूपालैर्य्यथा भेत्तृता उपजाप उज्झिता तथा तैः किं भेत्तृता सामानाधिकरण्यभेदजनकत्वं उज्झिता त्यक्ता कुत इत्याह यत् यस्मात् स राजा ओजसा तेजसा मित्रजित् सन्नपि अमित्रजित् तथा चारदृक् सन्नपि विचारदृक् अवर्त्तत अत्र विरुद्धो ऽनर्थकः मित्रजित्त्वामित्रजित्त्वयोश्चारदृक्त्वविचारदृक्त्वयोश्च परस्परमैकाधिकरण्याभावाद्विरुद्धत्वं विरोधाभासोऽयं विरोधपरिहारस्तु अमित्रजित् शत्रुजित् स नलः ओजसा तेजसा मित्रजित् सूर्य्यजित् सूर्य्यसदृश इत्यर्थः तथा विचारदृक् सदसद्विवेकदृष्टिश्चारदृक् चारचक्षुः राजानश्चारचक्षुष इत्युक्तेः ॥ ॥ १३ ॥

अथ तेजोयशसी युगपद्वर्णयन् सूर्य्याचन्द्रमसोः परिधिमुत्प्रेक्षते । तदोजस इति ॥ विधिर्विधाता तदोजसस्तस्य नलस्य ओजसस्तेजसस्तथा तद्यशसस्तस्य यशसः कीर्त्तेः स्थितौ विद्यमानतायां इमौ सूर्य्याचन्द्रमसौ वृथा निष्फलौ इति यदा यदा यस्मिन् यस्मिन् काले चित्ते मनसि कुरुते तदा तस्मिन् तस्मिन् काले परिवेषच्छलात् परिधिच्छलात् भानोः सूर्य्यस्य विधोरपि चन्द्रस्यापि कुण्डलना निष्फ

Digitized by Google

तनोति भानोः परिवेशकैतवा
त्तदा विधिः कुण्डलनां विधोरपि ॥१४॥
अयन्दरिद्रो भवितेति वैधसीं
लिपिं ललाटेऽर्थिजनस्य जाग्रतीं।

तत्त्वबोधक वलयाकृतिचिह्नं तनोति विस्तारयति भानुविधुकार्श्यं तदोशीयश्रीभ्यामेव कार्श्यमनयोः कृतिरणुरेव पुनर्लिखितेव वा मया कृता इति विमृश्य कुण्डलनां करोतीत्यर्थः। अशुद्धलिखिते विलिखिते च कुण्डलना क्रियत इति लेखकानां व्यवहारः॥१४॥

श्लोकद्वयेनास्य दातृत्वं वर्णयति॥ अयमिति॥ नृपो नलः दारिद्र्यस्य निर्धनत्वरूपस्य दरिद्रतां बहुतरधनदानेन अभावं प्रणीय विधाय अर्थिजनस्य याचकजनस्य ललाटे जाग्रतीं तिष्ठन्तीं अयं जनो दरिद्रो भविता भविष्यति इति वैधसीं विधातृसम्बन्धिनीं लिपिं लिखिताक्षरपङ्क्तिं मृषा मिथ्या न चक्रे सत्यां कृतवानित्यर्थः किम्भूतो नृपः अल्पितो न्यूनीकृतः कल्पपादपः कल्पवृक्षो येन सः कल्पपादपस्य दातृत्वाविख्यात् कल्पपादपोहि वाञ्छितमेवार्थं ददाति नतु वाञ्छितादप्यधिकमित्यल्पीकरणबीजं। अत्र दरिद्रशब्दस्य यत्किञ्चिदभिविरहरूपदरिद्रताविशिष्टोऽर्थस्तथाहि वेधसा धनादिसम्बन्धमननुसन्धायैव दरिद्रो भवितेति सामान्यतो लिखितं नलेन पुनः प्रचुरधनवितरणद्वारा कृतेऽपि सधनत्वे धनदारिद्र्यरूपस्य सम्बन्धिनोऽन्यथाकरणाभावान्मृषा कृतं न च धनमात्राभावो दरिद्रता

मृषा न चक्रेऽल्पितकल्पपादपः
प्रणीय दारिद्र्यदरिद्रतां नृपः ॥१५॥
विभज्य मेरुर्न यदर्थिसात्कृतो
न सिन्धुरुत्सर्गजलव्ययैर्मरुः ।
अमानि तत्तेन निजायशोयुगं
द्विफालबद्धाश्चिकुराः शिरःस्थितं ॥१६॥
अजस्रमभ्यासमुपेयुषा समं
सदैव देवः कविना बुधेन च ।

निशार्द्धरिशीकृत इत्यादौ निशाद्यभाववत्यपि दरिद्रशब्दप्रयोगात् ॥१५॥

विभज्येति ॥ मेरुर्हेमाद्रिः विभज्य खण्डशः कृत्वा यत् अर्थिसात् न कृतः याचकेभ्यो न दत्तः तथा उत्सर्गजलव्ययैः उत्सर्गो दाने ये जलव्ययास्तैः करणैः सिन्धुः समुद्रो यन्मरुर्जलशून्यो न कृतः तेन नलेन द्विफालेन द्विगुच्छेन बद्धाः संयताश्चिकुराः केशाः तत् मेरुवितरणसिन्धुमरुकरणाभावरूपं शिरःस्थितं मस्तकन्यस्तं निजायशोयुगं स्वकीयाकीर्त्तिद्वयं अमानि मन्यतेस्म अप्रतिकार्य्यत्वात् अत्र स्वदेशव्यवहार्य्यतया शिरसि निहितानां द्विफालबद्धकेशानामयशोयुगत्वेन सम्भावितत्वात् प्रतीयमानोत्प्रेक्षा ॥१६॥

संसर्गजाः खलु दोषगुणा इति तस्य सत्संसर्गित्वं वर्णयति ॥ अजस्रमिति ॥ पटीयान् अतिशयेन पटुर्दक्षोऽयं देवो राजा नलः सदैव सर्व्वस्मिन्नेव काले अजस्रमनवरतमभ्यासं कवित्वानुशीलनं शास्त्रानुशीलनञ्च उपेयुषा प्राप्तवता कविना काव्यवर्णयित्रा बुधेन पण्डिते

Digitized by Google

दधौ पटीयान् समयं नयन्नयं
दिनेश्वरश्रीरुदयं दिने दिने ॥ १७ ॥
अधोविधानात्कमलप्रवालयोः
शिरःसु दानादखिलक्षमाभुजां।
पुरेदमूर्द्ध्वं भवतीति वेधसा
पदं किमस्याङ्कितमूर्द्ध्वरेखया ॥ १८ ॥

न च समं सह समयं कालं नयन् क्षेपयन् सन् दिने दिने प्रतिदिनं उदयं समुन्नतिं दधौ धृतवान् किम्भूतः दिनेश्वरस्य सूर्य्यस्येव श्रीर्यस्य अखिलादिसम्पत्तिर्यस्य सः दिनेश्वरोऽपि देवो देवता पटीयान् स्वकर्म्मणि दक्षतमः सदैव भजनं अभ्यासं सान्निध्यमुपेयुषा कविना शुक्रेण बुधेन सोमात्मजेन च समं सह समयं नयन् अहोरात्रत्वेन व्यवस्थापयन् दिने दिने उदयं ऊर्द्ध्वगतिं दधातीति एवं श्लेषमूला लुप्तोपमेयं। बुधो दैत्यगुरुश्चैव रवेः सन्निहितौ सदेति ज्योतिषं ॥ १७ ।

अस्योत्तमपुरुषलक्षणाक्रान्ततलाचरणे ऊर्द्ध्वरेखा स्थिता तन्त्रोत्प्रेक्षते । अधोविधानादिति ॥ वेधसा विधात्रा अस्य नलस्य पदं चरणं इति हेतोः किं ऊर्द्ध्वरेखया ऊर्द्ध्वगतया लेखया अङ्कितं चिह्नितं इतिपदोपस्याप्यहेतुमाह कमलप्रवालयोः पद्मनवीनपल्लवयोरधोविधानात् ततोऽप्युत्कृष्टतया न्यक्करणात् तथा अखिलक्षमाभुजां सकलराजानां शिरःसु मस्तकेषु दानात् प्रणतसमस्तराजतया निधानात् पुरा पश्चात् इदं पदं ऊर्द्ध्वं भवति भविष्यति। पुरायोगे भविष्यति लट् ॥ १८ ॥

Digitized by Google

उरःश्रिया तत्र च गोपुरस्फुरत्
कवाटदुर्धर्षतिरःप्रसारिता ॥ २२ ॥

सकेलिलेशस्मितनिन्दितेन्दुना
निजांशदृक्तर्जितपद्मसम्पदः ।
अतद्वयीजित्वरसुन्दरान्तरे
न तन्मुखस्य प्रतिमा चराचरे ॥ २३ ॥

दुर्गमस्थानस्यावयापहरणे भुवमुत्क्षेप्ते अर्गलस्य दीर्घपीनता अर्गलस्य कवाटविष्कम्भकदण्डस्य दीर्घता आयतत्वं पीनता स्थूलत्वञ्च गृहीता धृता तथा उरःश्रिया वक्षःसम्पत्त्या च तत्र परिदुर्गवृत्ते गोपुरे पुरद्वारे स्फुरत् शोभमानं यत् कवाटं तस्य दुर्धर्षतिरःप्रसारिता दुर्धर्षता दृढत्वं तिरःप्रसारिता तिर्य्यग्विस्तृतत्वञ्च गृहीता ॥ २२ ॥

अस्य मुखसौष्ठवं वर्णयति । सकेलीति ॥ चराचरे स्थावरजङ्गमात्मके जगति तन्मुखस्य नलमुखस्य प्रतिमा सादृश्यं नासीत् । ननु चन्द्रपद्मयोःप्रसिद्धोपमानतया कथं सादृश्यासम्भव इति मुखस्य हेतुगर्भविशेषणद्वयमाह सकेलीति सह केलेः क्रीडाया लेशः एकदेशो यत् स्मितमीषद्धसनं तेन निन्दित इन्दुर्येन तस्य तथा निजस्य अंशः एकदेशो या दृक् चक्षुस्तया तर्जिता भर्त्सिता पद्मानां सम्पत् सौन्दर्य्यादिसम्पत्तिर्येन तादृशस्य । ननु माभूत् चन्द्रपद्माभ्यामौपम्यं अन्यदप्युपमानं वक्त्रं दर्पणादिकमस्तीत्याशंक्याह चराचरं विशिनष्टि अतद्वयीति,सा चन्द्रपद्मरूपा द्वयी द्वितयं तद्वयी तस्या जित्वरं जयनशीलं नास्ति तद्वयीजित्वरं सुन्दरान्तरं तन्मुखातिरिक्तसुन्दरं यत्र तादृशे । न तन्मुखस्य प्रतिमा चराचरे इत्यत्र अङ्कं श्रणीयं

Digitized by Google

सरोरुहं तस्य दृशैव निर्जितं
जिताः स्मितेनैव विधोरपि श्रियः।
कुतः परं भव्यमहो महीयसी
तदाननस्योपमितौ दरिद्रता ॥ २४ ॥
स्ववालभारस्य तदुत्तमाङ्गजैः
समञ्चमर्य्येव तुलाभिलाषिणः।

द्युतिः प्रतिमा तन्मुखसम्बन्धिनी नेत्यर्थः पर्य्यवसितत्वेन तादृशप्रतिमा भावस्य न प्रतियोग्यप्रसिद्धिः अवद्वयोरत्र तु तद्वयोर्जितरत्नस्य प्रतिबिम्बितन्मुखे सत्त्वान्न तच्छङ्कापि ॥ २३ ॥

उक्तमेवार्थं भङ्ग्यन्तरेण पुनराह ॥ सरोरुहमिति ॥ तस्य नल मुखस्य नलस्य वा दृशैव चक्षुषैव नलन्यायवयवैः सरोरुहं पद्मं निर्जितं तिरस्कृतं तथा तस्य स्मितेनैव ईषद्धसनेनैव विधोरपि चन्द्रस्य वा कथा चन्द्रस्यापि श्रियः शोभा जिताः पराभूताः परं पद्मचन्द्राभ्याम न्यत् भव्यमुपमानभूतं मनोरमं वस्तु कुतः अपि तु न कुतोऽपि अत एव अहो आश्चर्यं तदाननस्य नलमुखस्य उपमितौ उपमायां मही यसी अतिशयेन महती दरिद्रता उपमानवस्त्वभावः ॥ २४ ॥

अस्य केशोत्कर्षं भङ्ग्या वर्णयति ॥ स्ववालेति ॥ चमरी तदुत्तमाङ्ग जैर्नलकेशैः समं सह तुलाभिलाषिणः सादृश्याकाङ्क्षिणः स्ववाल भारस्य निजकेशसमूहस्य अनागसे अनपराधाय मुहुः पुनर्वारंवारं यत् पुच्छविलोलनं लाङ्गूलचालनं तदेव छलं व्याजस्तस्मात् वालचापलं वालस्य केशस्य चापलं चाञ्चल्यं शंसति कथयति अथ च वालस्य शिशोः चापलं वालोऽयं शिशुरत्यन्तचपलः अतोऽस्यापराधो न मन्तव्य इति ध्वनिः अपराधस्तु नलकेशैः सह सादृश्याभिलाषः। चमरीणां पुच्छ

Digitized by Google

अनागसे शंसति बालचापलं
पुनःपुनःपुच्छविलोलनच्छलात् ॥ २५ ॥
महीभृतस्तस्य च मन्मथश्रिया
निजस्य चित्तस्य च तं प्रतीच्छया ।
द्विधा नृपे तत्र जगत्त्रयीभुवां
नतभ्रुवां मन्मथविभ्रमोऽभवत् ॥ २६ ॥
निमीलनभ्रंशजुषा दृशा भृशं
निपीय तं यस्त्रिदशीभिरर्जितः ।
अमूस्तमभ्यासभरं विवृण्वते
निमेषनिःस्वैरधुनापि लोचनैः ॥ २७ ॥

विलोलनन्तु स्वाभाविकं तदपकृत्य बालचापलशंसनस्य आपणादिय मपह्नुतिः । २५ ॥

इदानीं श्लोकत्रयेण त्रिभुवनवनितानामनुरागं वर्णयन्नस्य सान्दर्य्या तिशयं मन्त्रोति । महीभृत इति ॥ तस्य महीभृतो राज्ञो मन्मथश्रिया मन्मथस्य कन्दर्पस्येव या श्रीः शोभा तया तथा निजस्य चित्तस्य मन सस्तं महीभृतं प्रति इच्छया च असौ मत्प्रियो भवतु इत्याकाङ्क्षया च तत्र तस्मिन् नृपे राजनि नले जगत्त्रयीभुवां त्रिभुवनजातानां नत भ्रुवां स्त्रीणां द्विधा द्विप्रकारो मन्मथविभ्रमो मन्मथस्य कामस्य विभ्रमो मन्मथोऽयमिति विशिष्टा भ्रान्तिः मन्मथजनितविकारविशेषश्चाभ वत् ॥ २६ ॥

तत्र प्रथमं स्वर्गस्त्रीणामनुरागमाह । निमीलनेति । त्रिदशीभि र्देवीभिर्निमीलनभ्रंशजुषा निमेषाभावभाजा दृशा चक्षुषा तं राजानं

Digitized by Google

अदस्तदाकर्णि फलाढ्यजीवितं
दृशोर्द्वयं नस्तदवीक्षि चाफलं ।
इति स्म चक्षुःश्रवसां प्रिया नले
स्तुवन्ति निन्दन्ति हृदा तदात्मनः ॥ २८ ॥
विलोकयन्तीभिरजस्रभावना
बलादमुं नेत्रनिमीलनेष्वपि ।

अक्ष्यमविषयं विधाय सोत्कण्ठं निरीक्ष्य योऽभ्यासभरोऽर्जित उत्पादितः अधुनापि इदानीमपि अमुष्मिन्नदृश्ये निमेषे निर्जरैर्निर्निमेषैरित्यर्थः लोचनैर्नयनैस्तमभ्यासभरं पुनः पुनरनुशीलनाविषयं विरचयते प्रकाशयन्ति । अद्भुतं खलु वस्तु निमेषशून्यचक्षुषा दृश्यतेऽतः स्वाभाविकत्वापि त्रिदशानां नयननिमेषाभावस्य तदभ्यासजन्यत्वेन सम्भाव्यमानत्वादियं प्रतीयमानोत्प्रेक्षा ॥ २७ ॥

॥ पातालस्त्रीणामनुरागमाह ॥ अद इति ॥ नोऽस्माकं अदो दृशोः चक्षुषोर्द्वयं तदाकर्णि नलगुणश्रोतृ अतएव फलाढ्यजीवितं सफलजीवनं एवं तदवीक्षि नलादर्शि अतएव अफलञ्च निष्फलञ्च इत्युक्तप्रकारेण चक्षुःश्रवसां चक्षुरेव श्रवः कर्णो येषां तेषां सर्पाणां प्रियाः स्त्रियः नले नलश्रवणदर्शनविषये आत्मनो निजस्य तत् दृशोर्द्वयं हृदा मनसा पतिभयान्नतु वचसा स्तुवन्ति स्म निन्दन्ति स्म च । चक्षुःश्रवसामिति साभिप्रायकं पदं तथाहि सर्पाणां कर्णाभावेन चक्षुषैव दर्शनश्रवणोभयकार्यकरत्वादुचिते एव नलश्रवणादर्शनकारित्वात्स्तुतिनिन्दे ॥ आकर्णीति आत्मावारे श्रोतव्य इत्यत्र शुधातोरिव इह कर्णिधातोरपि शाब्दबोधवाचित्वं । प्रमितिकरणस्य चक्षुषः श्रवणदर्शनकर्तृत्वमुपचारात् ॥ २८ ॥

Digitized by Google

अलम्भि मर्त्याभिरमुष्य दर्शने
न विघ्नलेशोऽपि निमेषनिर्म्मितः ॥ २९ ॥
न का निशि स्वप्नगतं ददर्श तं
जगाद गोत्रस्खलिते च का न तं ।
तदात्मताध्यातधवा रते च का
चकार वा न स्वमनोभवोद्भवं ॥ ३० ॥
श्रियास्य योग्याहमिति स्वमीक्षितुं
करे तमालोक्य सुरूपया धृतः ।

मानुषीणामनुरागमाह ॥ विलोकयन्तीभिरिति ॥ अजस्रमनवरतं या भावना ध्यानं तत्प्रकर्षो यस्या वा तस्या बलात् सामर्थ्यात् नेत्रनिमीलनेष्वपि चक्षुर्मुद्रणदशायामपि अमुं नलं विलोकयन्तीभिर्ध्यानविषयीकुर्व्वतीभिर्मर्त्याभिर्मानुषीभिरमुष्य नलस्य दर्शने ध्याने निमेषेण निर्म्मितो जनितो विघ्नस्य लेशोऽपि कणोऽपि न अलम्भि न प्राप्तः । विलोकयन्तीभिः पश्यन्तीभिरिति केचित् तन्न दर्शनस्य चाक्षुषरूपस्य नेत्रनिमीलनेषु तदसम्भवात् ॥ २९ ॥

इदानीं सर्व्वासामनुरागं प्रपञ्चयन्नाह ॥ न केति ॥ का स्त्री निशि रात्रौ स्वप्नगतं स्वप्नप्राप्तं तं नलं न ददर्श अपितु सर्व्वैव दृष्टवती तथा गोत्रस्खलिते नामप्रमादे च का स्त्री तं नलं न जगाद नोक्तवती अपि तु सर्व्वैव स्वप्रियनाम विवक्षुः स्त्री अनवरतचिन्तया स्खलनात् नलनामोच्चारेत्यर्थः । तथा रते च निधुवनसमये च का वा स्त्री तदात्मतया नलस्वरूपतया ध्यातो धव एवाऽयमिति चिन्तितो धवः प्रियो यया तादृशी सती स्वमनोभवोद्भवं निजकामोत्पत्तिं न चकार न कृतवती अपि तु सर्व्वैव ॥ ३० ॥

विहाय भैमीमपदर्पया कया
न दर्पणः श्वासमलीमसः कृतः ॥ ३१ ॥
यथोह्यमानः खलु भोगभोजिना
प्रसह्य वैरोचनिजस्य पत्तनं ।
विदर्भजाया मदनस्तथा मनो
नलावरुद्धं वयसैव वेशितः ॥ ३२ ॥

नायिकाभूतां दमयन्तीं प्रस्तौति । श्रियेति ॥ भैमीं दमयन्तीं विहाय वर्जयित्वा त्रिभुवनरमणीनां मध्ये अपदर्पया दर्पशून्यया कया सुरूपया सुन्दर्य्या स्त्रिया तं नलं आलोक्य दृष्ट्वा श्रिया शोभया अस्य नलस्य अहं योग्या अनुरूपा किं भवामीति शेषः इति पूर्वोक्तेन सन्दिह्येति शेषः समाधानमीप्सितुं प्रष्टुं करे हस्ते धृतो दर्पण आदर्शः श्वासेन निश्वासवायुना मलीमसो मलिनो न कृतः अपितु सर्वाभिरेव कृतः निश्वासवायुना दर्पणस्य मालिन्यं भवत्येव विहाय भैमीमित्यत्र श्रियेत्यध्याहार्य्यं अन्यथा क्रिययोरेककर्तृकत्वाभावात् क्त्वा न स्यात् केचित्तु विहायेति ओहाङ्गतावित्यस्य रूपं गत्यर्थधातूनां ज्ञाना र्थकत्वात् विज्ञायेत्यर्थस्तथाच यत्र दमयन्ती वर्त्तते तत्र किमिति वराक्या मया तद्योग्यता प्राप्यत इति विमृश्य तथाकृतमित्यभिप्राय इति वदन्ति ॥ ३१ ॥

नलगतं दमयन्त्या मनोऽनुरागं वर्णयति ॥ यथोह्यमान इति ॥ बलक्षेऽके विदर्भजाया दमयन्त्या नलावरुद्धं नलेन राज्ञा अवरुद्धं आक्रान्तं पूर्वं कुसुमावलीमयबाण मनः कर्मभूतं भुव्यलोकसाविवि लोकः सुखं वहुजिना सुखोपभोगलोलेन वयसैव यौवनेनैव अभ्यासा नोऽस्फुटत्वात् सखीभिरप्रकाशितो मदनः कन्दर्पः प्रसह्य हठात् यथा

Digitized by Google

नृपेऽनुरूपे निजरूपसम्पदां
दिदेश तस्मिन् बहुशः श्रुतिं गते।
विशिष्य सा भीमनरेन्द्रनन्दना
मनोभवाज्ञैकवशंवदं मनः ॥ ३२ ॥
उपासनामेत्य पितुः स्म रज्यते
दिने दिने सावसरेषु वन्दिनाम्।

वेशितः प्रवेशितः । यथा भगवता वज्रिणा प्रबलं चतुर्दिक्षु वेष्टितं वैरोचनिजस्य बाणासुरस्य पत्तनं शोणितपुरं कस्मैभोगभोगिना सर्पे शरीरभक्षकेण वयसा पक्षिणा गरुडेन उत्समान ऊर्द्धं प्राप्यमाणो मदनः प्रद्युम्नः प्रसभं वेशितः । पुरा किल स्वप्ने अनिरुद्धं दृष्ट्वा तदर्थमुत्सुकाया बाणसुताया उषायाः सखी चित्ररेखा विद्याबलात्तमनिरुद्धमानीय तस्यै ददौ ततोऽनिरुद्धस्तया सह गूढं विहरन् बाणेन ज्ञात्वा धृतो बद्धश्च तदनन्तरं नारदमुखाद्वृत्तान्तं श्रुत्वा प्रद्युम्नो बलदेवकृष्णाभ्यां सह गरुडमारुह्य शोणितपुरं प्रविवेशेति पौराणिकी वार्त्ता ॥ उत्प्रेक्षाश्लिष्टोपमयोः संकरोऽयं ॥ ३२ ॥

मनसि प्रविष्टे मदने नलं प्रत्यस्याभ्यासक्तमाह ॥ नृप इति ॥ भीमनरेन्द्रनन्दना भीमनृपसुता सा दमयन्ती निजरूपसम्पदां निजस्यात्मनो रूपस्य सौन्दर्यस्य सम्पदां सम्पत्तीनां च यद्वा निजरूपस्य सम्पदामतिशयस्यानुरूपे योग्ये बहुशो बहुवारं श्रुतिं गते चारवन्द्यादिभ्यः अवगात् श्रवणं प्रविष्टे श्रवणेन्द्रियजन्यज्ञानविषयतां प्राप्त इति यावत् तस्मिन् नृपे राजनि नले विशिष्य अन्यापेक्षया आधिक्येन मनोभवस्य कामस्य या आज्ञा शासनं तस्य एकं मुख्यं वशंवदं आयत्तं मनो दिदेश दत्तवती अस्यार्पितवतीत्यर्थः ॥ ३२ ॥

Digitized by Google

पठत्सु तेषु प्रतिभूपतीनलं
विनिद्ररोमाऽजनि शृण्वती नलं ॥ ३४ ॥
कथाप्रसङ्गेषु मिथः सखीमुखा
त्तृणेऽपि तन्व्या नलनामनि श्रुते ।
द्रुतं विधूयान्यदभूयतानया
मुदा तदाकर्णनसज्जकर्णया ॥ ३५ ॥

अथ तस्या भवेत्तत्र दूतवन्दिसखीमुखादिति पूर्वरागस्य दूतमुखादिभ्यः श्रवणाद्गुणादिष्वपि वन्दिमुखान्नायकश्रवणमाह ॥ उपासनामिति ॥ सा दमयन्ती वन्दिनां स्तुतिपाठकानां अवसरेषु स्तवपाठसमयेषु तत्यामस्य पितुरुपासनां समीपेऽवस्थानं लभ्यते स्म लब्धवती अथ तेषु वन्दिषु प्रतिभूपतीन् सकलभूपालान् पठत्सु असावीदृशोऽयमीदृश इति वदत्सु सत्सु नलं शृण्वती सती दमयन्ती अत्यर्थं विनिद्ररोमा रोमाञ्चिताङ्गी अजनि जाता ॥ ३४ ॥

अस्या गाढानुरागं वर्णयति ॥ कथेति ॥ तन्व्या क्षीणाङ्ग्या अनया दमयन्त्या मिथः परस्परं कथाप्रसङ्गेषु आनुषङ्गिकवार्ताप्रस्तावेषु सखीमुखात् तृणेऽपि तृणविशेषेऽपि नलनामनि नलाभिधाने श्रुते सति तृणविशेषप्रतिपादके नलेतिशब्दे श्रुते सतीत्यर्थः द्रुतं शीघ्रं अन्यत् कार्य्यान्तरं विधूय परित्यज्य किमेताभिर्मत्प्रियतमनलस्य वार्त्ता उच्यत इति सन्दिह्येति शेषः मुदा हर्षेण तदाकर्णनसज्जकर्णया तस्य नलप्रवर्त्तितवाक्यस्य आकर्णने श्रवणे सज्जौ सावधानौ कर्णौ यस्यास्तया भूतया अभूयत भूतं । इत्थमनुरागस्य गाढता जाता यया प्रथममननुसन्धायैव शब्दमात्रश्रवणेऽपि प्रवर्त्तत इति भावः ॥ ३५ ॥

Digitized by Google

स्मरात्परासोरनिमेषलोचना
द्बिभेमि तद्भिन्नमुदाहरेति सा ।
अनेन यूनः स्तुवता तदास्पदे
निदर्शनं नैषधमभ्यषेचयत् ॥ ३६ ॥

नलस्य पृष्टा निषधागता गुणा
न्मिषेण दूतद्विजवन्दिचारणाः ।
निपीय तत्कीर्त्तिकथामयानया
चिराय तस्थे विमनायमानया ॥ ३७ ॥

अथ नलोत्कर्षशुश्रूषामाह ॥ स्मरादिति ॥ परासोः प्राणशून्यात् मृतादित्यर्थः अनिमेषलोचनात् निमेषरहितनयनात् स्मरात् मदनात् बिभेमि भीता भवामि अतस्तद्भिन्नं स्मरादन्यं उदाहर कथय इत्युक्तप्रकारेण सा दमयन्ती यूनस्तरुणान् स्तुवता प्रशंसता अनेन सखीजनेन तदास्पदे स्मरस्थाने निदर्शनं श्रेष्ठत्वात् दृष्टान्तभूतं नैषधं नलम् अभ्यषेचयत् अभिषिक्तं कारयामास । स्मरस्य परासुत्वं हरनयनाग्निदग्धत्वात् अनिमेषलोचनत्वञ्च देवत्वात् तादृशाद्भयमुचितमेव । अत्रायमभिप्रायः लज्जासन्नमनसा दमयन्त्या व्याजेन नलशुश्रूषार्थं कः खलु युवसमूहेषु श्लाघीयान् युवा तं कथय किन्तु परासुमनिमेषलोचनं भयजनकं स्मरं विनेति सखीजनः पृष्टस्तेन सखीजनेन नलस्यैव स्तुतिः कृतेति ॥ ३६ ॥

अथ नलगुणश्रवणं श्रुत्वा उत्कण्ठाञ्च युगपदाह ॥ नलस्येति । अनया दमयन्त्या निषधागता निषधदेशादायाता दूतद्विजवन्दिचारणाः दूताः सन्देशहराः द्विजा ब्राह्मणाः वन्दिनः स्तुतिपाठकाः चारणा नटविशेषाश्च युष्माकं देशे को राजा कीदृशो वा तस्य गुणा

Digitized by Google

प्रियं प्रियाञ्च चिजगज्जयिश्रियौ
लिखाधिलीलागृहभित्ति कावपि।
इति स्म सा कारुतरेण लेखितं
नलस्य च स्वस्य च सख्यमीक्षते ॥ ३८॥

मनोरथेन स्वपतीकृतं नलं
निशि क्व सा न स्वपती स्म पश्यति।
अदृष्टमप्यर्थमदृष्टवैभवात्
करोति सुप्तिर्जनदर्शनातिथिं ॥ ३९ ॥

इति मिषेण व्याजेन नलस्य गुणान् सौन्दर्यगाम्भीर्यादीन् एकाः अथ अनन्तरं तत्कीर्त्तिकथां नलयशोवार्त्तां निपीय सादरं श्रुत्वा दूतादिभ्य इति शेषः चिराय बहुकालं व्याप्य विमनायमानया उत्कण्ठितचित्तीभवन्त्या तस्थे स्थितं ॥ ३७ ॥

अथास्याश्चित्रदर्शनेन स्वयोग्यतानिर्णयमाह ॥ प्रियमिति ॥ लीला गृहं क्रीडागारं तस्य भित्तिः कुड्यं तामधिकृत्येत्यधिलीलागृहभित्ति प्रियं वल्लभं प्रियां वल्लभाञ्च कावपि कौचन त्रिजगज्जयिनी त्रिभुवन जयनशीला श्रीः शोभा ययोस्तादृशौ लिख चित्रय इत्यमुना प्रकारेण कारुतरेण चित्रकरश्रेष्ठेन लेखितं चित्रितं नलस्य च स्वस्य च आत्मनश्च सख्यं सादृश्यं सा दमयन्ती ईक्षते स्म दृष्टवती। अत्र त्रिभुवनातीत शोभौ कावपि लिखेति व्याजेन दमयन्त्या आदिष्टेन चित्रकरेण अन्येषु तादृशशोभानवलोकनात् सुतरां तस्या नलस्य च प्रतिमूर्त्ती लिखिते अनन्तरं सा तद्दर्शनेन स्वयोग्यतां निश्चिकायेत्यभिप्रायः ॥ ३८॥

पूर्व्वरागेऽभीष्टस्य श्रवणं दर्शनञ्च भवति तत्र श्रवणं वर्णितमधुना दर्शनं वर्णयितव्यं तत्र इन्द्रजाले च चित्रे च साक्षात् स्वप्ने च दर्शनं

Digitized by Google

निमीलितादक्षियुगाच्च निद्रया
हृदोऽपि वाह्येन्द्रियमौनमुद्रितात्।
अदर्शि सङ्गोप्य कदाप्यवीक्षितो
रहस्यमस्याः स महन्महीपतिः॥४०॥

मिति चतुर्विधेषु दर्शनेषु स्वप्नदर्शनं वर्णयति ॥ मनोरथेनेति ॥ स्वपती प्रयाता सा दमयन्ती स्वस्यात्मनः पतिः प्रियः स्वपतिः मनोरथेनाभिलाषेण स्वपतिः स्वपितः सन् इति तं नलं न निशि कस्यां रात्रौ न पश्यति स्म न प्रत्यक्षयामास अपितु सर्व्वस्यां निशि पश्यति स्म नन्वलौकिकप्रत्यक्षरूपस्य स्वप्नस्य स्वविजन्यत्वेन संस्कारप्रयोज्यत्वात्तस्य च पूर्व्वानुभवकारकत्वात् पूर्व्वानुभवं विना कथं तथाभूदित्याशंक्योपपादयति स्मृतिः स्वप्नेमेष्वात्मनःसंयोगरूप्यर्थः अदृष्टमपि अस्मिन् जन्मनि चाक्षुषाविषयमपि अर्थं वस्तु अदृष्टस्य प्राक्तनशुभाशुभकर्म्मणोर्विभवात् बलात् अदृष्टवैभवोपुत्रजन्मान्तरीयसंस्कारादिति यावत् जनानां दर्शनस्य मानसज्ञानस्य अतिथिं विषयं करोति। यद्यपि दूतादिभ्यः श्रवणादिना अस्मिन्नेव जन्मन्युत्पन्नात् संस्कारादत्र स्वप्नः सम्भवति तथापि दमयन्त्या स्वधाविधस्वप्नदर्शनस्य वास्तवप्राक्तनसंस्कारजन्यत्वात्तथोक्तं॥ ३९ ॥

स्वप्नदर्शनमेव विशिष्याह ॥ निमीलितादिति ॥ निद्रया कदापि कस्मिन्नपि समये अवीक्षितोऽदृष्टोमहत् रहस्यं अतिगोपनीयं वस्तु स महीपतिर्नलः अस्या दमयन्त्या अदर्शि दर्शितः किं कृत्वा निमीलितात् मुद्रितात् अक्षियुगात् नयनद्वयात् सङ्गोप्य सम्यक् गोपयित्वा ननु त्वगादिकमपीन्द्रियं वर्त्तते ततः किं न कृतं गोपनमित्याह वाह्यस्य बहिर्भूतार्थग्राहकस्य इन्द्रियस्य त्वगादेर्यत् मौनं स्वस्वविषयाग्राह

अहो अहोभिर्महिमा हिमागमेऽ
प्यतिप्रपेदे प्रति तां स्मरार्दितां।
तपर्त्तुपूर्त्तावपि मेदसां भरा
विभावरीभिर्बिभराम्बभूविरे ॥ ४१ ॥
स्वकान्तिकीर्त्तिव्रजमौक्तिकस्रजः
श्रयन्तमन्तर्घटनागुणश्रियं।
कदाचिदस्या युवधैर्य्यलोपिनं
नलोऽपि लोकादशृणोद्गुणोत्करं ॥ ४२ ॥

कलं तेन मुद्रितात् तत्तदिन्द्रियजन्यज्ञानसम्पादकताशून्यात् हृदोऽपि मनसोऽपि मनोयुक्तवागिन्द्रियादपीति यावत् सङ्गोप्य अविरहव्यवस्थो हि गोपनमुचितमेव वागिन्द्रियस्य मौनं मुद्रितं यत्रेति एवं विधिष्टान्मनसः सङ्गोप्येति केचित्। निद्रायां अन्येभ्यः सङ्गोप्य अतिरहस्यभूतं नायकं दर्शयन्त्याः सख्यायत्वारारोपात् समासोक्त्यलङ्कारोऽयं ॥ ४० ॥

सम्प्रदर्शनानन्तरमस्याः कामावस्थामाह ॥ अहो इति ॥ अहो आश्चर्यं हिमागमेऽपि हेमन्तेऽपि अहोभिर्दिवसैः स्मरार्दितां कामपीडितां तां दमयन्तीं प्रति महिमा महत्वं अति अतिशयं प्रपेदे प्राप्तः तथा तपर्त्तुपूर्त्तावपि ग्रीष्मपूरणेऽपि विभावरीभीरात्रिभिर्मेदसां भराः स्थौल्याधिक्यानि बिभरबभूविरे धृताः कामपीडितायाः अस्या दुःखितचित्ततया दिवारात्र्योः क्षेपणं दुष्करं भूतमिति भावः हेमन्ते दिवसस्य ग्रीष्मे रात्रेश्चातिदुर्ब्बलत्वेऽपि महत्वादाश्चर्य्यं मेदसां भरा इति गौणप्रयोगः ॥ ४१ ॥

तमेव लब्ध्वावसरं ततः स्मरः
शरीरशोभाजयजातमत्सरः ।
अमोघशक्त्या निजयेव मूर्त्तया
तया विनिर्जेतुमियेष नैषधं ॥ ४२ ॥
अकारि तेन श्रवणातिथिर्गुणः
क्षमाभुजा भीमनृपात्मजाश्रयः ।

अन्योऽन्यानुरागाय नलस्य दमयन्तीश्रवणमाह ॥ सदाम्बीति ॥ नलोऽपि कदाचित् कस्मिन्नपि काले बुधधैर्यलोपिनं का कथान्येषां बुधानां पण्डितानामपि धैर्यमवश्यं लुम्पतीति तादृशं युवधैर्यलोपिनमित्यपि क्वचित् पाठः तरुणानां धैर्यविलोपकमित्यर्थः अस्या दमयन्त्या गुणोत्करं सौन्दर्यादिगुणसमूहं लोकात् दूतादेः अशृणोत् श्रुतवान् किम्भूतं सदान्तर्निजसौन्दर्यस्य यः कीर्त्तिश्रेणी यशःसमूहः सैव मौक्तिकस्रक मुक्तामाला तस्या योऽन्यघटनाया अन्यग्रथनाया गुणः सूत्रं तस्य श्रियं शोभां अयन्तं भजमानं सयोग्यमित्यर्थः सह श्रेण हि सूत्रेण मुक्ता ग्रथ्यन्ते ॥ ४२ ॥

तस्याः श्रवणेन नलस्यापि अरदशावर्णनार्थं सम्प्रति कामकर्त्तृकजयमाह ॥ तमेवेति ॥ शरीरस्य या शोभा सौन्दर्यं तस्याजयेन जातो मत्सरो द्वेषो यस्य सः नलशरीरशोभायाः कामशरीरशोभातोऽप्युत्कृष्टत्वात् स्मरः कामस्ततस्तद्गुणश्रवणानन्तरं तमेव अवसरं जयसमयं लब्ध्वा प्राप्य मूर्त्तया मूर्त्तिमत्या निजया आत्मीयया अमोघशक्त्या इवोत्प्रेक्षे अव्यर्थास्त्रविशेषेणेव तया दमयन्त्या करणभूतया नैषधं नलं विनिर्जेतुं पराभवितुं इयेष इच्छति स्म ॥ ४२ ॥

Digitized by Google

तदुच्चधैर्य्यव्ययसंहितेषुणा
स्मरेण च स्वात्मशरासनाश्रयः ॥ ४४ ॥
अमुष्य धीरस्य जयाय साहसी
तदा खलु ज्यां विशिखैः सनाथयन् ।
निमज्जयामास यशांसि संशये
स्मरस्त्रिलोकीविजयार्ज्जितान्यपि ॥ ४५ ॥

अथेच्छानन्तरं कामेन किं कृतमित्याह ॥ अकारीति ॥ क्षमाभुजा राज्ञा तेन नलेन भीमनरेन्द्रजा दमयन्ती आत्मन आश्रयो यस्य सगुणः सौन्दर्य्यादिः श्रवणातिथिः श्रवणविषयोऽकारि कृतः तथा तस्य नलस्य यत् उच्चं महत् धैर्य्यं व्यवसायादचलनं तस्य व्ययाय विनाशाय संहितो सन्धोन्मुखीकृत इषुर्येन तादृशेन स्मरेण च कन्दर्पेण च सुशोभनं यत् आत्मनो निजस्य शरासनं धनुस्तदेव आश्रयो यस्य तथाभूतो गुणो मौर्व्वी श्रवणातिथिः कर्णसमीपवर्त्ती अकारि आकर्णमाकृष्ट इत्यर्थः ॥ ४४ ॥

न पुनरस्य जयः कामेन सुकर इत्याह ॥ अमुष्येति ॥ तदा तस्मिन् काले शरीरानपेक्षं कर्म्म साहसं तदस्यास्तीति साहसी श्लोकावसानस्थस्यापेरत्रैवानुषङ्गः साहस्यपि स्मरः साहसित्वं हरतपोभङ्गादौ सुव्यक्तं धीरस्य व्यवसायादचञ्चलस्यामुष्य नलस्य जयाय ज्यां मौर्व्वीं विशिखैर्बाणैः सनाथयन् संयोजयन् सन् खलूत्प्रेक्षे त्रिलोकीविजयेन त्रिभुवनानां विशेषेण जयेन अर्ज्जितानि जनितानि यशांसि कामो मद्दा ध्वीत्यनुरागान् संशये स्थास्यन्ति नवेति सन्देहे निमज्जयामास चिक्षेप एतेन नलस्य जितेन्द्रियत्वं सूचितं ॥ ४५ ॥

Digitized by Google

अनेन भैमीं घटयिष्यतस्तया
विधेरवन्ध्येच्छतया व्यलासि तत्।
अभेदि तत्तादृगनङ्गमार्गणै-
र्यदस्य पौष्पैरपि धैर्य्यकञ्चुकं ॥ ४६ ॥
किमन्यदद्यापि यदस्त्रतापितः
पितामहो वारिजमाश्रयत्यहो।
स्मरन्तनुच्छायतया तमात्मनः
शशाक शङ्के स न लङ्घितुं नलः ॥ ४७ ॥

तथाविधो धीरः कथं कन्दर्पेण जित इत्याह ॥ अनेनेति॥ पौष्पैः वि पुष्पमयैरपि अनङ्गमार्गणैः कामवाणैः अस्य राज्ञः तत्तादृक् अनिर्व्व चनीयमभेद्यं धैर्य्यमेव कञ्चुकं कवचं धैर्य्यकञ्चुकं यत् अभेदि भिन्नं तद नेन राज्ञा सह भैमीं दमयन्तीं तया तेन प्रकारेणान्योऽन्यानुरा गेण घटयिष्यतो योजयिष्यतो विधेर्विधातुरवन्ध्येच्छतया अमोघाभि लाषेण व्यलासि विलसितं पुष्पमयो वाणो भेत्ता अनङ्गः भेद्यञ्च तादृक् धैर्यकञ्चुकमिति यद्यपि भेदस्य सर्व्वथाऽसम्भवस्तथापि यद्भिन्नं तत् फलावश्यम्भाविकाया विधीच्छाया एव क्रीडितमितिभावः कञ्चुको वारवाणोऽस्त्रीति त्रिकाण्डे अस्त्रीत्यस्य कञ्चुक इत्यनेनाप्यन्वयादत्र कञ्चु कशब्दस्य क्लीवत्वं ॥ ४६ ॥

दुर्निवार्य्याः खलु कामवाणा इत्याह ॥ किमन्यदिति ॥ अहो आश्चर्य्यं अन्यत् किं वक्तव्यं पितामहो ब्रह्मा यस्य कामस्य अस्त्रेण तापितः सन् अद्यापि वारिजं पद्मं आश्रयति भजते शङ्के इत्युत्प्रेक्षे तं स्मरं लङ्घितुं अतिक्रमितुं स नलः आत्मनः स्वस्मात् तन्वी अल्पा छाया शोभा यस्य तस्य भावस्तया तनुच्छायतया अल्पच्छायोऽसावित्याशयेनेत्यर्थ

Digitized by Google

उरोभुवा कुम्भयुगेन जृम्भितं
नवोपहारेण वयस्कृतेन किं।
त्रपासरिद्दुर्गमपि प्रतीर्य्य सा
नलस्य तन्वी हृदयं विवेश यत्॥ ४८॥
अपह्नुवानस्य जनाय यन्निजा
मधीरतामस्य कृतं मनोभुवा।

इत्युत्प्रेक्षा अथ च आत्मनः स्वस्य तनोः शरीरस्य छाया प्रतिबिम्बं तनु च्छायं तस्य भावस्तया आत्मशरीरच्छाया हि केनापि लङ्घितुं न शक्यते यथा यथा हि तल्लङ्घने प्रयत्नः क्रियते तथा तथा सा वर्द्धत इति भावः न शशाक न शक्तो बभूव पितामह इति प्राचीनत्वप्रकटनाय प्राची नात्माप्येतादृशी दशा का कथा यूनामिति ध्वनिः वारिजमिति च शैत्य प्रकटनाय ॥ ४७ ॥

भङ्ग्या नलस्य दमयन्तीचिन्तां वर्णयति॥ उरोभुवेति॥ तन्वी क्षीणाङ्गी सा दमयन्ती त्रपा लज्जारूपा या सरिन्नदी सैव दुर्गं दुर्गमस्थानं तद पि प्रतीर्य्य सन्तीर्य्य नलस्य हृदयं यत् विवेश प्रविष्टवती तत् किं वयस्कृ तेन वयसा यौवनेन पक्षे कुशलेन कृतेन जनितेन नवोपहारेण नवानां यूनामुपहारेण उपढौकनेन पक्षे नवं नवीनश्च तत् उप समीपे हारो मुक्तावली यस्य तथोक्त तेन उरोभुवा स्तनरूपेण अथ च वक्षः स्थितेन कुम्भयुगेन कलसद्वयेन जृम्भितं विलसितं अन्या अपि स्त्रियो वक्षःस्थापितकुम्भद्वयेन नदीसन्तरणं कृत्वा संकेतस्थानं प्रविशन्तीति वाच्योत्प्रेक्षेयं किं शब्दस्य उत्प्रेक्षावाचकत्वात् रूपकमप्येकदेशस्थं ॥ ४८ ॥

Digitized by Google

अबोधि तज्जागरदुःखसाक्षिणी
निशा च शय्या च शशाङ्ककोमला ॥ ४९ ॥
स्मरोपतप्तोऽपि भृशं न स प्रभु
र्विदर्भराजन्तनयामयाचत ।
त्यजन्त्यसून् शर्म च मानिनोवरं
त्यजन्ति न त्वेकमयाचितव्रतं ॥ ५० ॥

हृदयप्रविष्टायां दमयन्त्यामवस्थाविशेषमाह ॥ अपह्नुवानस्येति ॥ जनाय लोकाय निजामधीरतामधैर्य्यं अपह्नुवानस्य गोपयतोऽस्य राज्ञोमनोभुवा कामेन यत् कृतं तत् कामकृतं जागरे निद्राच्छेदे यद्दुःखं तस्य साक्षिणी प्रमाणभूता निशा च शय्या च अबोधि अनुभतवती किम्भूता निशा शशाङ्केन चन्द्रेण कोमला मृद्वी शीतलेत्यर्थः ज्योत्स्नीति यावत् किम्भूता शय्या शशस्य शशकनाम्नोमृगविशेषस्य अङ्कवत् क्रोडवत् कोमला मृदुला। दिवसे कथञ्चिद्विकारं गोपयतस्तस्य रात्रावतिसन्तापोऽभूदित्यभिप्रायः ॥ ४९ ॥

नन्वेवञ्चेत् तत्पितरं कथं तां न याचितवानित्याह ॥ स्मर इति ॥ स प्रभुः स्वामी नलः भृशमतिशयं स्मरोपतप्तोऽपि कामपीडितोऽपि विदर्भराजं भीमं तनयां पुत्रीं दमयन्तीं न अयाचत न प्रार्थयामास कुतइत्याह यतो मानिनो जना वरं असून् प्राणान् शर्म्म च सुखञ्च त्यजन्ति तु पुनः एकं केवलमयाचितव्रतं अप्रार्थनारूपं नियमं न त्यजन्ति । अर्थान्तरन्यासोऽयं ॥ ५० ॥

अस्य छलेन कामविकारगोपनमाह ॥ मृषेति ॥ अयं नलः क्वचित् स्थाने मृषा मिथ्या यो विषादः शोपनं तस्याभिनयात् प्रकाशात् वियोगजां दमयन्तीविरहजनितां निश्वासानां ततिं विस्तारं जुगोप

Digitized by Google

मृषाविषादाभिनयादयं क्वचित्
जुगोप निःश्वासततिं वियोगजां।
विलेपनस्याधिकचन्द्रभागता
विभावनाच्चापललाप पाण्डुतां ॥ ५१ ॥
अशाकि निह्नोतुमनेन तत्प्रिया
मयं बभाषे यदशोकवीक्षितां।
समाजएवालपितासु वैणिकै
र्मुमूर्च्छ यत्पञ्चममूर्च्छनासु च ॥ ५२ ॥

संगोपितवान् तथा विलेपनस्य अङ्गरागस्य अधिकचन्द्रभागतायाश्च न्द्रस्य कर्पूरस्य भागोऽंशश्चन्द्रभागः अधिकश्चन्द्रभागो यत्र तस्य भावस्ता दस्या विभावनाच्च ध्यापनाच्च पाण्डुतां अपललाप जुगोप ॥ ५१ ॥

अथाङ्गिकविकारनिह्नवमुक्त्वा इदानीं वाचिकविकारनिह्नवमाह ॥ ॥ अशाकीति ॥ अयं नलः अशोकवीक्षितां भ्रान्त्या पुरोवर्त्तिनीमिव दृष्टां प्रियां दमयन्तीं यत् बभाषे एह्येहि प्रिये ते स्वागतमित्यादि यदुवाच तत् अनेन वक्ष्यमाणप्रकारेण निह्नोतुं सङ्गोपयितुं अशाकि शक्तो बभूव अनेन केनेत्याह वैणिकैर्वीणावादकैः पञ्चममूर्च्छनासु च पञ्चमस्य कोकिलस्वरतुल्यस्वरविशेषस्य मूर्च्छनासु च रागेषु च आलपितासु गीतासु सतीषु समाजएव समाजिकजनएव यत् मुमूर्च्छ मुमोह अतिसुश्राव्यतया तासां मनोहरत्वात्। मूर्च्छनाश्च पञ्चमाह भरतः। स्वरः संमूर्च्छितो यत्र रागतां प्रतिपद्यते। मूर्च्छनामिति तामाहुः कवयो ग्रामसम्भवामिति ॥ ५२ ॥

Digitized by Google

अवाप सापत्रपतां स भूपति-
र्जितेन्द्रियाणां धुरि कीर्त्तितस्थितिः ।
असम्भरे शम्बरवैरिविक्रमे
क्रमेण तत्र स्फुटतामुपेयुषि ॥ ५२ ॥
अलं नलं रोद्धुममी किलाभवन्
गुणा विवेकप्रमुखा न चापलं ।

इतः परमस्य कामविकाराभिव्यक्तिं वर्णयति ॥ अवापेति ॥ तत्र दमयन्त्यनुरागोत्पन्ने शम्बरवैरिणः शम्बरनामकदानवरिपोः कामस्य विक्रमे पराक्रमे पराक्रमजनितगात्रस्खलनादिविकार इत्यर्थः क्रमेण स्फुटतां व्यक्ततां उपेयुषि प्राप्तवति सति स भूपतिर्नलः सापत्रपतां अन्येभ्यः सलज्जतां अवाप प्राप्तवान् ननु तथाविधो धीरः कथं कामविक्रममपि न सम्वृतवानिति तं विशिनष्टि असम्भरे प्रबलतया असंगोप्ये तर्हि भवतु तथाविधकामविक्रमस्य सार्व्वलौकिकस्य प्रकाशः कथमन्येभ्यो लज्जितवानिति नलस्यापि हेतुगर्भविशेषणमाह जितानि वशीकृतानि इन्द्रियाणि यैस्तेषां धुरि अग्रगणनायां कीर्त्तिता प्रशंसिता स्थितिर्मर्य्यादा यस्य सः ॥ ५२ ॥

ननु सत्सु विवेकादिगुणेषु कथमयमीदृशीं कामवश्यतामापन्न इत्युपपादयति॥ अलमिति॥ अमी विवेकप्रमुखाः सारासारविचारो विवेकस्तत्प्रमुखास्तदादयः प्रमुखपदेन धैर्य्यादीनां ग्रहणं गुणाः किल निश्चितं नलं चापलं चाचल्यं रोद्धुं न अलं न समर्था अभवन् इत्येतदेकर्म्मकत्वात् चापलमिति गौणं कर्म्म कथमेवमित्याह ईदृशो ऽयं सर्गनिसर्गः सृष्टिस्वभावः यत् स प्रसिद्धप्रभावः स्मरः रत्या

स्मरः स रत्यामनिरुद्धमेव यत्
सृजत्ययं सर्गनिसर्ग ईदृशः ॥ ५४ ॥
अनङ्गचिह्नं स विना शशाक नो
यदासितुं संसदि यत्नवानपि ।
क्षणाद्थारामविहारकैतवा
न्निषेवितुं देशमियेष निर्जनं ॥ ५५ ॥
अथ श्रिया भर्त्सितमीनकेतनः
समं वयस्यैः स्वरहस्यवेदिभिः ।

मनुरागे सत्यां अनिरुद्धमेव अनर्गलमेव अनिवार्यमेवेत्यर्थः पुरुषं सृजति करोति अथ च स्मरोरत्यां सपत्न्यां अनिरुद्धं नाम सपुत्रं सृजति जनयति अयं हि वस्तुस्वभावः ॥ ५४ ॥

अथार्थे प्रकटिते कामविकारे तेन किं कृतमित्याह ॥ अनङ्गेति ॥ स नलः यत्नवानपि कामविकारगोपने कृतप्रयासोऽपि संसदि सभायां अनङ्गचिह्नं कामलक्षणं विना क्षणमपि आसितुं अवस्थातुं यदा नो शशाक तदा तस्मिन् समये आरामविहारकैतवात् उपवनवि हारव्याजात् निर्जनं देशं निषेवितुं आश्रयितुं इयेष इच्छति स्म यत्नवानपीत्युपायैः प्रयत्नेनाप्यन्वयो बोध्यः ॥ ५५ ॥

इच्छानन्तरं प्रवृत्तौ तदुद्योगमाह ॥ अथेति ॥ अथानन्तरं श्रिया शोभया भर्त्सितस्तिरस्कृतो मीनकेतनः कन्दर्पो येन तादृशः स नलः स्वरहस्यवेदिभिर्निजगोप्यविषयज्ञातृभिर्वयस्यैः मित्रैः समं सह पुरो पकण्ठं नगरसमीपं वनं किल व्याजेन ईप्सिता दर्शनलोलः सन्

पुरोपकण्ठं स वनक्षितीक्षिता
दिदेश यानाय निदेशकारिणः ॥ ५६ ॥
अमीममस्तस्य विभूषितं सितं
जवेऽपि मानेऽपि च पौरुषाधिकं ।
उपाहरन्नश्वमजस्रचञ्चलैः
खुराञ्चलैः क्षोभितमन्दुरोदरं ॥ ५७ ॥
अथान्तरेणावटुगामिनाध्वना
निशीथिनीनाथमहःसहोदरैः ।

निदेशकारिण आज्ञाकारिणो जनान् यानाय यानं वाहनमानेतुं दिदेश आज्ञापयामास ॥ ५६ ॥

यानानयनं वर्णयति ॥ अमी इति ॥ तत आदेशानन्तरं अमी निदेशकारिणस्तस्य राज्ञः निकट इति शेषः विभूषितं यथालङ्कारैः कुथादिभिरलङ्कृतं सितं शुक्लं जवेऽपि वेगेऽपि मानेऽपि च परिमाणेऽपि च पौरुषेण पराक्रमेण ऊर्ध्वविस्तृतहस्तस्य पुरुषस्य यत् परिमाणं तेन च अधिकं महान्तं अश्वं उपाहरन् उपनिन्युः किम्भूतं अजस्रचञ्चलैरनवरतचपलैः खुरस्य शफस्य अञ्चलैरेकदेशैः प्रान्तैरित्यर्थः क्षोभितं क्षुब्धं मन्दुराया अश्वशालाया उदरं अभ्यन्तरं येन तादृशं ॥ ५७ ॥

सप्तभिः श्लोकैरन्वयकुलकेनाश्वं विशिनष्टि । अथेति ॥ अथाश्वानयनानन्तरं स क्षितिपाकशासनः पृथिवीन्द्रो नलः हयमारुरोहेत्यग्रिमसप्तमश्लोकेनान्वयः । किम्भूतं हयं निशीथिनीनाथमहःसहोदरैः शुभ्रत्वाच्चन्द्रकिरणतुल्यैः केशरच्छटा ये केशास्तेषां रश्मिभिः किरणैर्विराजितं शोभितं अत्रोत्प्रेक्षा च किम्भूतैः अन्तरेण मध्यवर्तिना

निगालगाद्देवमणेरिवोत्थितै
विराजितं केसरकेशरश्मिभिः ॥ ५८ ॥
अजस्रभूमीतटकुट्टनोत्थितै
रुपास्यमानं चरणेषु रेणुभिः ।
रयप्रकर्षाध्ययनार्थमागतै
र्जनस्य चेतोभिरिवाणिमाङ्कितैः ॥ ५९ ॥

अवटुगामिना घाटापर्यन्तगतेन अध्वना पथा निगालगात् गलदेश निष्ठात् देवमणेः रोमावर्त्तविशेषात् अथ च कौस्तुभात् उत्थितैरिव उद्गतैरिव कौस्तुभतेजांसीव बहिर्भूतानीत्युत्प्रेक्षा ॥ ५८ ॥

पुनः किम्भूतमित्याह ॥ अजस्रेति ॥ अजस्रं अविरतं यत् भूमितलस्य कुट्टनं खननं तेन उद्गतैरुत्थितैः रेणुभिर्धूलिभिश्चरणेषु पादचतुष्टया वच्छेदेन उपास्यमानं सेव्यमानं युक्तमिति यावत् अन्योऽप्यध्येते रय प्रकर्षस्य वेगोत्कर्षस्य अध्ययनार्थं शिक्षार्थं आगतैर्जनस्य चेतोभि र्मनोभिरुपास्यमानमिव जनस्येति जात्याश्रयणादेकवचनं जनाना मित्यर्थः अन्यथा चेतसां बहुत्वानुपपत्तिः स्यात् । कथमेतानि चेतांसीति तया ज्ञातमिति चेतोविशेषणादुपपादयति अणिमाङ्कितैः अणिमा सूक्ष्मत्वेनाङ्कितैश्चिह्नितैः अणुत्वलिङ्गकानुमितिविषयीभूतैरित्यर्थः न्याय मते चेतसामणुत्वात् । उत्प्रेक्षास्वभावोक्त्योः सङ्करोऽयं यस्मात् यदधीयते स तस्मादधिकविधो भवतीति चेतोभिरुपास्यमानमिवेति कविप्रौढोक्तिसिद्धोत्प्रेक्षालङ्कारेण चेतसां वेगादश्वस्य वेगोऽधिक इति व्यतिरेकालङ्कारश्च व्यज्यते ॥ ५९ ॥

Digitized by Google

चलाचलप्रोथतया महीभृते
स्ववेगदर्पानिव वक्तुमुत्सुकं ।
अलं गिरा वेद किलायमाशयं
स्वयं हयस्येति च मौनमास्थितं ॥ ६० ॥
महारथस्याध्वनि चक्रवर्त्तिनः
परानपेक्षोद्वहनाद्यशःसितं ।

पुनः किम्भूतमित्याह ॥ चलाचलेति ॥ प्रोथमश्वनासिका चलाचल
प्रोथतया चञ्चलनासिकतया महीभृते राज्ञे नलाय स्वस्य निजस्य वेगे
ये दर्पा अहङ्कारास्तान् वक्तुं कथयितुं उत्सुकमिव उद्युक्तमिव यद्दि
कथं नोक्तवानित्याह अयं राजा हयस्य अश्वस्य आशयमभिप्रायं स्वय
मात्मनैव वेद जानाति अतो गिरा कथनेनालं वृथा इति हेतोः किलो
त्प्रेक्षे मौनं अभाषणं आस्थितम् आश्रितम् नलस्य अश्वाभिप्रायाभिज्ञ
त्वं भारतादिषु प्रसिद्धं । अत्रापि उत्प्रेक्षाकाव्यलिङ्गयोः सङ्करः
॥ ६० ॥

पुनः किम्भूतमित्याह ॥ महारथस्येति ॥ महारथस्य रथिकविशेषस्य
चक्रवर्त्तिनः सार्व्वभौमस्य नलस्य अध्वनि पथि परः अभिन्नोऽनपेक्ष्योऽ
नपेक्षणीयो यत्र तथाभूतादुद्वहनाद्देशान्तरप्रापणाद्धेतोर्यशसा सितं
शुक्लं अतएव रदानां दन्तानां येऽवदाताः श्वेता अंशवः किरणा
स्तेषां मिषाच्छलात् अनीदृशा न एतादृशा तेषां कुत्सितानामित्यर्थः
रवेः सूर्य्यस्य अर्व्वतां घोटकानां बलं अन्तर्मनसि हसन्तं विभातीत्यत्र
येन श्लिष्टं पूर्व्वार्द्धमपि सूर्य्याश्वानां विशेषणं कवेरभिप्रेतं तथाहि
अध्वनि आकाशगमनात् अब्दशून्यं यच्चक्रं तेन वर्त्तितुं शीलं यस्य
तथाभूतस्य महारथस्य महतः स्यन्दनस्य परान् अन्यान् अपेक्ष

Digitized by Google

रदावदातांशुमिषादनीदृशां
हसन्तमन्तर्बलमर्व्वतां रवेः ॥ ६१ ॥
सितत्विषश्चञ्चलतामुपेयुषो
मिषेण पुच्छस्य च केशरस्य च।
स्फुटं चलच्चामरयुग्मचिह्नकै
रनिह्नुवानं निजवाजिराजतां ॥ ६२ ॥
अपि द्विजिह्वाभ्यवहारपौरुषे
मुखानुषक्तायतवल्गु वल्गया।

तदानीन्तनं यस्य समाधिवाशुलात् यत् उदहनं तेन हेतुना यशसि सितानां चीवानां सोऽन्तकर्ममोयस्य क्यं । श्लेषमूलव्यतिरेकादप्रकृतिसभावोद्भीनामकाङ्क्षिभावः सङ्करोऽयं। महारथस्य लक्षणं यथा रथेनैकेन यः शत्रून् साहङ्कारो प्रजायते। महारथः स विज्ञेयो युद्धशास्त्रविशारद इति ॥ ६१ ॥

पुनःकिम्भूतमित्याह ॥ सितत्विष इति ॥ सिता शुभ्रा त्विट् कान्तिर्यस्य वाहस्य तथा चञ्चलतां चापल्यं उपेयुषः उपगतस्य पुच्छस्य लाङ्गूलस्य केशरस्य च ग्रीवास्थवालस्य च मिषेण छलेन स्फुटमुत्प्रेक्षे चलतोश्चामरयोर्यत् युग्मं द्वयं तदेव चिह्नानि चिह्नकरणानि तै र्निजवाजिराजतां स्वस्य अश्वराजतां अनिह्नुवानं प्रकाशयन्तं अन्येषामपि राज्ञामुभयपार्श्वे चामरद्वयं तिष्ठतीत्युत्प्रेक्षा चिह्नकैरिति वाजानां बहुत्वाद्बहुवचनं ॥ ६२ ॥

पुनःकिम्भूतमित्याह ॥ अपीति ॥ मुखे अनुषक्ता युक्ता आयता दीर्घा वल्गुः शोभना या वल्गा दन्तालिकानामरज्जुविशेषस्तया करणेन रय

उपेयिवांसं प्रतिमल्लतां रय
स्मये जितस्य प्रसभं गरुत्मतः ॥ ६३ ॥
स सिन्धुजं शीतमहःसहोदरं
हरन्तमुच्चैःश्रवसः श्रियं हयं ।
जिताखिलक्ष्माभृदनल्पलोचन
स्तमारुरोह क्षितिपाकशासनः ॥ ६४ ॥

स्मये वेगदर्पे प्रसभं हठात् जितस्य पराभूतस्य गरुत्मतो गरुडस्य विजितस्य सर्पस्य योऽभ्यवहारो भोजनं तद्रूपं यत् पौरुषं पुरुषकारस्तस्मिन्नपि प्रतिमल्लतां प्रतिपक्षवीरतां उपेयिवांसं उपगतं वल्गायाः सर्पतुल्यत्वात् ॥ ६३ ॥

पुनः किम्भूतमित्याह ॥ ससिन्धुजमिति ॥ सिन्धुदेशोद्भवं तथा शीतमहसश्चन्द्रस्य सहोदरं तुल्यं शुक्लत्वात् तथा उच्चैःश्रवस इन्द्रघोटकस्य श्रियं शोभां हरन्तं तत्सदृशमित्यर्थः सिन्धुजमिति शीतमहःसहोदरमिति च विभक्तिविपरिणामादुच्चैःश्रवसोऽपि विशेषणं तथाहि सिन्धुजस्य समुद्रोत्पन्नस्य शीतमहःसहोदरस्य चन्द्रसहजस्य एकसमुद्रोदरस्थितत्वात् स किम्भूतः जिता अखिला अशेषाः क्ष्माभृतो राजानो येन स तथा अनल्पे दीर्घे लोचने चक्षुषी यस्य सः इन्द्रोऽपि जिताखिलक्ष्माभृत् पराजितसकलपर्व्वतोऽनल्पलोचनः सहस्रनयनः कुलकं समाप्तं । यत् पुनः कलापकं चतुर्भिस्तु पञ्चभिः कुलकं मतमिति पञ्चभिः श्लोकैः कुलकत्वमुक्तं तन्न्यूनसङ्ख्याव्यवच्छेदार्थं तेनात्र सप्तभिः श्लोकैरपि न कुलकत्वहानिः ॥ ६४ ॥

Digitized by Google

निजा मयूखा इव तीक्ष्णदीधितिं
स्फुटारविन्दाङ्कितपाणिपल्लवं ।
तमश्ववारा जवनाश्वयायिनं
प्रकाशरूपा मनुजेशमन्वयुः ॥ ६५ ॥
चलन्नलङ्कृत्य महारयं हयं
स वाहवाहोचितवेशपेशलः ।

अश्वारोहणानन्तरं गमनं वर्णयति ॥ निजा इति ॥ मयूखा इव किरणा यथा तीक्ष्णदीधितिं खरकिरणं सूर्यं अनुयान्ति तथा अश्ववारा अश्वारोहाः तं मनुजेशं राजानं नलं अन्वयुः अनुगतवन्तः किम्भूता अश्ववारा मयूखाश्च निजा आत्मीयाः खरकरस्यवेदिन इतियावत् पक्षे स्वकीयाः तथा प्रकाशरूपाः प्रकाशं अगूढं ख्यातमिति यावत् रूपं सौन्दर्यं येषां ते पक्षे प्रकाशयतीति प्रकाशं वस्तुप्रकाशकं रूपं येषां ते किम्भूतं मनुजेशं तीक्ष्णदीधितिञ्च स्फुटं सुव्यक्तं यथा तथा अर विन्देन रेखामयपद्मेन अङ्कितं चिह्नितं पाणिपल्लवं करकमलं यस्य तं राज्ञां हि पाणौ पद्ममत्स्यादिरूपा रेखा भवतीति सामुद्रकं। पक्षे स्फुटाभ्यामरविन्दाभ्यामङ्किते युक्ते पाणिपङ्कजे यस्य तं सूर्योहि हस्ताभ्यां पद्मयुग्मं धारयन् ध्यायते रक्ताम्बुजाभयदानहस्तमित्या द्यागमात्। तथा जवनाश्वयायिनं जवनेनाधिकवेगवता अश्वेन साधु या ति गच्छतीति तं पक्षे जवनैरश्वैः सप्तभिर्यातुं शीलमस्येति तं । ॥ ६५ ॥

अथ स्मातस्य गच्छतस्तस्य पौराणां सानन्दं दर्शनमाह ॥ चल न्निति । प्रमोदेनानन्देन निस्पन्दतराभिः अतिशयेन स्पन्दरहिताभि

Digitized by Google

प्रमोदनिष्पन्दतराक्षिपक्ष्मभि
र्व्यलोकि लोकैर्नगरालयैर्नलः ॥ ६६ ॥
क्षणादथैष क्षणदापतिप्रभः
प्रभञ्जनाध्येयजवेन वाजिना ।
सहैव ताभिर्जनदृष्टिवृष्टिभि
र्बहिः पुरोऽभूत्पुरुहूतपौरुषः ॥ ६७ ॥
ततः प्रतीच्छ प्रहरेति भाषिणी
परस्परोल्लासितशल्यपल्लवे ।

निर्निमेषाक्षीत्यर्थः अक्षिपक्ष्माणि नयनरोमाणि येषां तैर्नगरमेवा लयोवासस्थलं अथवा नगरे आलयो वासोयेषां तैर्लोकैर्जनैः मन्दा रयं अतिवेगिनं हयमश्वं अलंकृत्य आत्मना शोभयित्वा तस्याल्पङ्कर णीभूयेत्यर्थः चलन् गच्छन् स नलः व्यलोकि दृष्टः किम्भूतः वाहस्या श्वस्य यो वाहो वहनं देशान्तरप्रापणमित्यर्थः तत्र उचितो योग्यो योवेषः कवचधारणादिस्तेन पेशलोमनोरमः ॥ ६६ ॥

अस्य नगराद्बहिर्गमं वर्णयति ॥ क्षणादिति ॥ अथानन्तरं क्षण दापतेश्चन्द्रस्येव प्रभा कान्तिर्यस्य स तथा पुरुहूतस्य इन्द्रस्येव पौरुषं पुरुषोचितं कर्म्म तेजोवा यस्य तादृश एष राजा ताभिः पूर्व्वश्लोकोक्ताभि र्जनदृष्टिवृष्टिभिः सहैव जनैर्दृश्यमान एवेत्यर्थः प्रभञ्जनेन वायुना आध्येयः शिक्षणीयो जवो वेगो यस्य तादृशेन वाजिना घोटकेन क्षणात् पुरो नगराद्बहिरभूत् बहिर्बभूव ॥ ६७ ॥

नगराद्बहिर्गते तस्मिन् सैन्यानां क्रीडायुद्धमाह ॥ ततइति ॥ ततोबहिर्गमानन्तरं प्रतीच्छ गृहाण प्रहर ताडय इति भाषितु

मृषामृधं सादिबले कुतूहला
न्नलस्य नासीरगते वितेनतुः ॥ ६८ ॥
प्रयातुमस्माकमियं कियत्पदं
धरा तदम्भोधिरपि स्थलायतां ।
इतीव वाहैर्निजवेगदर्पितैः
पयोधिरोधक्षममुद्धृतं रजः ॥ ६९ ॥
हरेर्यदक्रामि पदैककेन ख
पदैश्चतुर्भिः क्रमणेन तस्य नः ।

चीनं ययोस्तादृशौ तथा परस्परमन्योऽन्यं उल्लासितं उत्तोलितं शल्यं पल्लवमिवेति तत् याभ्यां ते सादिबले अश्वारोहिसैन्यभागद्वयं नलस्य नासीरगते अग्रगामिनी सती कुतूहलात् कौतुकात् मृषामृधं मिथ्या युद्धं वितेनतुः चक्रतुः शल्यपल्लवे इति हिंसलाभावात् पल्लवसादृश्यं अथवा परस्परोल्लासितानां शल्यानां पल्लवोविस्तरोययोस्तादृशे पल्लवोऽस्त्रीकिशलये विटपे, विस्तरे वन इति मेदिनी ॥ ६८ ॥

अश्वानां गमनेन रज उत्थितं तच्चोत्प्रेक्षते ॥ प्रयातुमिति ॥ अस्माकं प्रयातुं विक्रमितुं इयं धरा पृथिवी कियत्पदं किंपरिमाणं स्थानं अल्पमित्यर्थः तत्तस्मात् अम्भोधिरपि समुद्रोऽपि स्थलायतां स्थली भवतु इवोत्प्रेक्षे इति विचिन्त्य निजवेगदर्पितैः स्ववेगाज्जातगर्वैर्वाहै र्घोटकैः पयोधेः समुद्रस्य रोधे आवरणे स्थलीकरण इत्यर्थः क्षमं समर्थं यावता समुद्ररोधोभवेत्तावदित्यर्थः रजोधूलिरुद्धृतं उत्था पितं ॥ ६९ ॥

अश्वानां स्वाभाविकमूर्ध्वमाक्रम्य पुनर्निवर्त्तनं भङ्ग्या वर्णयति ॥ हरे रिति । हरेस्त्रिविक्रमरूपस्य भगवत एककेनाद्वितीयेन पदा चरणेन

चपा हरीणामिति नामितानने
र्व्यवर्त्तितरर्द्धनभःकृतक्रमैः ॥ ७० ॥
चमूचरास्तस्य नृपस्य सादिनो
जिनोक्तिषु श्राद्धतयेव सैन्धवाः ।
विहारदेशं तमवाप्य मण्डली
मकारयन्भूरि तुरङ्गमानपि ॥ ७१ ॥

यत् खमाकाशं आक्रामि आक्रान्तं तत्र खस्य हरीणां घोटकानां नोऽस्माकं चतुर्भिः पदैश्चरणैः क्रमणेन आक्रान्त्या चपा लज्जा न तु पैरिहयं इति विचिन्त्येति शेषः नभसि आकाशे कृता नभःकृत अर्द्धैः पदद्वयेनोत्तोलनादसंपूर्णैर्नभःकृतः क्रमः पादविक्षेपो येषां तथाभूतैः स्तैर्घोटकैः नामितानि नम्रीकृतानि आननानि मुखानि यैस्तादृशैः सद्भिर्व्यवर्त्ति निवृत्तं एकस्य हरेरेकचरणेन यदाक्रान्तं तस्य हरीणां चतुर्भिश्चरणैराक्रमणे लज्जा समुचितैव प्रतीयमानोत्प्रेक्षेयं इतिपदोत्तरमिवार्थस्य प्रतीयमानत्वात् आक्रमणेऽपीति क्वचित् पाठः अत्र एवकारार्थोऽपिशब्दस्तत्पेक्ष्यमनेनान्वितः । केचित्तु अर्द्धनभःकृत क्रमैरित्यत्र नभसोऽर्द्धं अर्द्धनभस्तत्र कृतः क्रमो यैरिति विग्रहं कुर्वन्ति तच्चिन्त्यं नभसोऽपरिच्छिन्नपरिमाणवत्तया अर्द्धत्वासम्भवात् ॥ ७० ॥

अथ सैनिकानां मण्डलाकारगमनमाह ॥ चमूचरा इति ॥ तस्य नृपस्य राज्ञः सैन्धवाः सिन्धुदेशजाः सादिनोऽश्वारोहाः चमूषु सेनासु चरन्तीति चमूचराः सैनिकाः तं पुराद्बहिःकल्पितं विहारदेशं

द्विषद्भिरेवास्य विलङ्घिता दिशो
यशोभिरेवाब्धिरकारि गोष्पदं।
इतीव धारामवधीर्य्य मण्डली
क्रियाश्रियामण्डि तुरङ्गमैः स्थली॥ ७२॥

भ्रमणभूमिं अवाप्य प्राप्य जिनोक्तिषु बुद्धवचनेषु आस्तयेव अद्धा वत्तयेव भूरि बहुवारं यथा तथा तुरङ्गमानपि स्वयं चक्रुरेव घोटकानपि मण्डलीं मण्डलाकारगतिं अकारयन् कारयामासुः सिन्धुदेशजाहि स्वभावतोबुद्धभक्ताः अतः स्वर्गार्थिना विहारदेशमासाद्य प्रदक्षिणं कर्त्तव्यमिति बुद्धागमप्रतिपादितं अद्धाय मण्डलीं कुर्व्वन्ति अश्वानपि कारयन्तीत्युत्प्रेक्षा विहारशब्देन बौद्धानामुपासनास्थानं चाच्यते। विहारोभ्रमणे स्कन्धे लीलायां सुगतालये इति मेदिनी ॥ ७१॥

प्रकारान्तरेणोत्प्रेक्ष्य पुनस्तमर्थमेवाह ॥ द्विषद्भिरिति ॥ अस्य राज्ञो द्विषद्भिरेव शत्रुभिरेव दिशः पूर्व्वादयोविलङ्घिता उल्लङ्घिताः तेषां नलभयेन दिगन्तपर्य्यन्तपलायनात् तथास्य यशोभिरेव कीर्त्तिभिरब्धिरेवकारोऽत्र अप्यर्थकः अब्धिः समुद्रोगोष्पदं गोखुरगर्त्तवत् स्थानविषयः समुद्रमप्युल्लङ्घ्य गमनात् गतिविषयो वा अकारि कृतः इतीव पिष्टपेषणवल्लङ्घितलङ्घनमस्माकमनुचितमिति विचिन्त्येव धारां आस्कन्दितादिगतिपञ्चकं अवधीर्य्य अवज्ञाय परित्यज्येत्यर्थः मण्डलीक्रियाश्रिया मण्डलाकारगतिकरणशोभया तुरङ्गमैरश्वैः स्थली भूमिरमण्डि भूषिता उत्प्रेक्षेयं। गोष्पदं गोष्पदप्रमे गवाञ्च गतिगोचर इति मेदिनी। आस्कन्दितं धौरितकं रेचितं वल्गितं प्लुतं। गतयोऽमूः पञ्चधारेत्यमरः ॥ ७२॥

Digitized by Google

अचीकरच्चारु हयेन या भ्रमी
र्निजातपत्रस्य तलस्थले नलः।
मरुत्किमद्यापि न तासु शिक्षते
वितत्य वात्यामयचक्रचंक्रमान्॥ ७३ ॥
विवेश गत्वा स विलासकाननं
ततः क्षणात् क्षोणिपतिर्धृतीच्छया।
प्रवालरागच्छुरितं सुषुप्सया
हरिर्घनच्छायमिवाम्भसां निधिं ॥ ७४ ॥

अथ स्वस्थलेऽस्य भ्रमणा मारोढुर्नैपुण्यमावेदयति सा नलस्याप्यासीदित्याह ॥ अचीकरदिति ॥ नलो राजा चारु हयेन श्रेष्ठघोटकेन चारु यथा स्यात्तथा या निजातपत्रस्य स्वीयच्छत्रस्य तलस्थले अधोभूमौ या भ्रमीर्मण्डलाकारगमनानि अचीकरत् कारयामास मरुद्वायुः वात्यामया वायुमण्डलिकारूपा ये चक्रवच्चंक्रमाः कुटिलगतयस्तान् वितत्य विधाय तासु भ्रमिषु अद्यापि किं न शिक्षते नाभ्यस्यति अपितु शिक्षत एव शिक्षार्थमेव तादृशीर्भ्रमीः करोतीत्यर्थः । हयेनेति हृक्रोः प्रयोगे प्रयोज्यस्य कर्मत्वविकल्पनात् कर्त्तरि तृतीया ॥ ७३ ॥

अथ केलिवनप्रवेशमाह ॥ विवेशेति ॥ ततस्तदनन्तरं स क्षोणिपतिर्नलः धृतीच्छया धैर्यवाञ्छया क्षणात् झटिति गत्वा विलासकाननं क्रीडावनं विवेश प्रविष्टवान् अत्रोपमिनोति हरिरिव नारायणो यथा सुषुप्सया शयनेच्छया अम्भसां निधिं समुद्रं प्रविशति तथा किम्भूतं वनं समुद्रञ्च प्रवालानां नवपल्लवानां पक्षे विद्रुमाणां रागेण

Digitized by Google

वनान्तपर्य्यन्तमुपेत्य सस्पृहं
क्रमेण तस्मिन्नथ तीर्णदृक्पथे।
न्यवर्त्ति दृष्टिप्रकरैः पुरौकसा
मनुव्रजद्बन्धुसमाजबन्धुभिः ॥ ७५ ॥

लोहित्येन छुरितं मिश्रितं तथा घना सान्द्रा छाया आतपाभावो यत्र तथाभूतं यद्वो घनस्येव मेघस्येव घनैर्व्वा छाया कान्तिर्यस्य तादृशं। प्रवालोऽस्त्रकीदले विद्रुमे नवपल्लव इति विश्वः। घनं स्यात् कांस्यवाद्यादिवाद्यमध्यमनृत्ययोः। ना मुस्ताब्दौघदार्ढ्येषु विस्तारे लौहमुद्गरे। त्रिषु सान्द्रे दृढे चेति। छाया स्यादातपाभावे प्रतिबिम्बार्कयोषितोः। पालनोत्कोचयोः कान्तिसच्छोभापंक्तिषु स्त्रियामिति च मेदिनी ॥ ७४ ॥

पुरवासिनां दर्शननिवृत्तिमाह। वनान्तेति। पुरौकसां पुरवासिनां दृष्टिप्रकरैश्चक्षुःसमूहैः सस्पृहं साभिलाषं यथा तथा वनान्तपर्य्यन्तं काननान्तिकावधिं अन्तशब्दोऽन्तिकवाची उपेत्य गत्वा अथानन्तरं तस्मिन् राजनि तीर्णदृक्पथे अतिक्रान्तनयनमार्गे सति न्यवर्त्ति निवृत्तं किम्भूतैः अनुव्रजन्तः पश्चाद्गच्छन्तो ये बन्धुसमाजा आत्मीयसमूहास्तेषां बन्धुभिस्तुल्यैः बान्धवा हि ओदकान्तं प्रियमनुव्रजेदिति श्रुतेर्जलसमीपावधिं प्रियजनमनुगम्य तस्मिन्नतीतदृक्पथे सति सस्पृहं निवर्त्तन्ते बन्धुशब्दश्च तुल्यार्थकलादार्यीयमुपमार्थो तुल्यसमानाद्यास्तुल्यार्थीयत्र वा वतीति दण्डिवचनात्। गहनं काननं वनमिति जीवनं भुवनं वनमितिचामरः। अन्तं स्वरूपे नाशे ना न स्त्रीशेषेऽन्तिके त्रिष्विति मेदिनी ॥ ७५ ॥

Digitized by Google

ततः प्रसूने च फले च मञ्जुले
स सम्मुखस्थाङ्गुलिना जनाधिपः ।
निवेद्यमानं वनपालपाणिना
व्यलोकयत्काननकामनीयकं ॥ ७६ ॥
फलानि पुष्पाणि च पल्लवे करे
वयोऽतिपातोद्गतवातवेपिते ।
स्थितैः समादाय महर्षिवार्द्धका
द्वने तदातिथ्यमशिक्षि शाखिभिः ॥ ७७ ॥

इतः परमस्य काननरमणीयतादर्शनमाह ॥ ततइति ॥ ततो वनप्रवेशानन्तरं स जनाधिपो नलः मञ्जुले मनोज्ञे प्रसूने पुष्पे च फले च सम्मुखस्था अभिमुखवर्त्तिनी अङ्गुलिर्यस्य तादृशेन वनपालपाणिना वनरक्षकहस्तेन निवेद्यमानं विनयेन कथ्यमानं काननस्य कामनीयकं रम्यतां व्यलोकयत् दृष्टवान् ॥ ७६ ॥

वृक्षाणां करतुल्यपल्लवस्थभूतफलकुसुमतया आतिथ्यशिक्षा उत्प्रेक्ष्यते ॥ फलानीति ॥ वयसां पक्षिणामतिपातेन मनुष्यदर्शनात् पलायनेन उद्गत उत्थितो यो वातो वायुस्तेन वेपिते चलिते पल्लवे करे किसलयरूपे हस्ते फलानि पुष्पाणि च समादाय गृहीत्वा वने स्थितैः शाखिभिर्वृक्षैर्महर्षीणां मुनिश्रेष्ठानां मध्ये यो वार्द्धको वृद्धसमूहस्तस्मात् तदातिथ्यं तस्य राज्ञ आतिथ्यं अतिथिसत्कारः अशिक्षि शिक्षितं महर्षिवार्द्धकोऽपि वयसो यौवनस्य योऽतिपातो व्यपगमस्तेनोद्गत उत्पन्नो यो वातो वातरोगस्तेन वेपिते कम्पित करे फलकुसुमान्यादाय वने विप्रस्यातिथ्यं करोतीति प्रतीयमानोत्प्रेक्षेयं इवाद्यस्य प्रतीयमानत्वात्। वयः पक्षिणि बाल्यादौ यौवने च नपुंसकमिति मेदिनी। त्रिषु स्याद्वार्द्धको हस्ते क्लीबं सद्भावसङ्घयोरिति नवः ॥ ७७ ॥

Digitized by Google

विनिद्रपत्त्रालिगतालिकैतवा
न्मृगाङ्कचूडामणिवर्जनार्जितं ।
दधानमाशासु चरिष्णु दुर्यशः
स कौतुकी तत्र ददर्श केतकं ॥ ७८ ॥
वियोगभाजां हृदि कण्टकैः कटु
र्निधीयसे कर्णिशरः स्मरेण यत् ।

अथ केतकीकुसुमदर्शनमाह ॥ विनिद्रेति ॥ स राजा कौतुकी हृष्टः सन् तत्र वने केतकं केतकीपुष्पं ददर्श दृष्टवान् किम्भूतं केतकं विनिद्रा विकासिनी या पत्त्रालिर्दलपङ्क्तिस्तत्र गता पतिता येऽलयो भ्रमरास्तेषां कैतवात् छलात् मृगाङ्कश्चन्द्रश्चूडामणिः शिरो रत्नं यस्य स मृगाङ्कचूडामणिः शिवस्तेन यद्वर्जनं परित्यागस्तेनार्जितं जनितं आशासु दिक्षु चरिष्णु गमनशीलं दुर्यशोऽकीर्तिं दधानं । पुरा खलु ब्रह्मणा सह विष्णोर्विवादे मिथ्याभाषणात् केतकी शिवेन परित्यक्तेति पौराणिकी वार्ता । अकीर्तेः श्यामवर्णत्वस्य कवि प्रसिद्धत्वेन सादृश्यहेतुकभ्रमरापह्नवनादियमपह्नुतिः ॥ ७८ ॥

केतकीपुष्पाणां कामोद्दीपकतया विरहिणां विहिंसत्वात्तद्दर्शने नलस्य भर्त्सनं त्रिभिः श्लोकैः सन्दानितकेन वर्णयति ॥ वियोगेति॥ तेन नलेन क्रुधा कोपेन इत्यनेन पूर्वोक्तप्रकारेण केतकं केतकीकुसुमं आक्रुश्यत भर्त्सितमिति वक्ष्यमाणतृतीयश्लोकेनान्वयः । इतिपदार्थकं माक्रोशप्रकारमाह यत् यस्मात् स्मरेण कामेन वियोगभाजां विर हिणां हृदि हृदये कर्णिशरो वेधनार्थविशेषत्वात्स्वरूपस्त्वं निधीयसे अर्प्यसे तदस्मात् मन्मथदेहदाहिना कामशरीरदाहकेन शिवेन विगीयसे निन्द्यसे पूजायामस्वीकारात् योहि यच्छरीरदाहकस्तेन

Digitized by Google

ततोऽदुराकर्षतया तदन्तक
द्विगीयसे मन्मथदेहदाहिना ॥ ७९ ॥
त्वदग्रसूच्या सचिवेन कामिनो
र्मनोभवः सीव्यति दुर्यशःपटौ ।
स्फुटञ्च पत्रैः करपत्रमूर्त्तिभि
र्वियोगिहृद्दारुणि दारुणायसे ॥ ८० ॥

तथात्वं निन्दनीयं भवस्येव कश्चिच्छरश्चक्षुपते हेतुगर्भविशेषणद यमाह कङ्कैलीदलाग्रावयवविशेषैः कटुदुःसहः कश्चिच्छरस्यापि पार्श्वद्वये तादृशावयवास्तिष्ठन्ति तथा दुराकर्षतया आक्रष्टुमशक्य तया तेषां विरहिणां अन्तरुत् विनाशकत् एतदपि कश्चिच्छर स्यास्येव रूपकमिदं । यद्वा दुराकर्षतया यतो हृदयात् यत् निर्ग च्छत् सत् अन्तश्छिदिनाशकृत् यदिति शत्रन्तं केतकविशेषणत्वान्न पुंसकं एवं योजनायां यतो निश्चीयसेऽतोऽविगीयस इति पूर्व्वोत्त रवाक्ययोर्हेतुहेतुमद्भावात् रूपकोत्थापितः काव्यलिङ्गालङ्कारोऽयं ॥ ७९ ॥

त्वदग्रेति ॥ मनोभवः कन्दर्पः सचिवेन सहकारिण्या त्वदग्रमेव सूची सीवनसाधनं तया करणेन कामिनोः कामी च कामिनी च तयोर्वि रहिणोरिति शेषः दुर्यशसी अकीर्त्ती एव पटौ वस्त्रे सीव्यति संश्लेष यति दुर्यशश्च विरहिणोरुन्मादादिना तथा त्वं करपत्रमूर्त्तिभिः क्रकचाकृतिभिः पत्रैः करणैः वियोगिनां विरहिणां हृत् मनोदा र्व्विव काष्ठमिव तस्मिन् दारुणायसे भयङ्करोभवसि स्फुटमित्युत्प्रेक्षा वाचकं पूर्व्वत्राप्यन्वेति यथा इतरजनेन करपत्रद्वारा दारु विदा र्य्यते तथा किं तव पत्रद्वारा कामेन विरहिहृदयं विदार्य्यत इत्यर्थः । पूर्व्वत्र रूपकेण उत्तरत्रोपमया चोत्थापितोत्प्रेक्षेयं ॥ ८० ॥

Digitized by Google

धनुर्म्मधुस्विन्नकरोऽपि भीमजा
परं परागैस्तव धूलिहस्तयन्।
प्रसूनधन्वा शरसात्करोति मा
मिति क्रुधाक्रुश्यत तेन केतकं॥ ८१॥
विदर्भसुभ्रूस्तनतुङ्गताप्तये
घटानिवापश्यदलं तपस्यतः।

धनुरिति॥ प्रसूनं पुष्पं धनुर्यस्य स कामः धनुर्म्मधुस्विन्नकरोऽपि धनुषः पुष्पमयत्वात् तन्निर्गतैर्म्मधुभिर्म्मकरन्दैः स्विन्नः स्वेदयुक्तः करो यस्य तादृशोऽपि तव परागैरजोभिः धूलियुक्तो हस्तो धूलिहस्तस्तं कुर्व्वन् सन् भीमजापरं दमयन्त्यासक्तमानसं मां शरसात् शरायत्तं करोति अन्ये हि धन्विनः स्विन्नहस्तं धूलियुक्तं कृत्वा शरान् मुञ्चन्ति। यदि तव परागा न स्युस्तदा स्विन्नकरतया कामः शरमोचनेऽसमर्थः स्यात् मुचेद्वा यदि कथञ्चित्तदा प्रहारातिशयो न स्यादित्यभिप्रायः अस्य वाक्यार्थस्यावास्तवत्वेन सम्भाव्यमानत्वादियं प्रतीयमानोत्प्रेक्षा। सन्दानितकं समाप्तं तच्च श्लोकत्रयात्मकं उक्तञ्च। द्वाभ्यान्तु युग्मकं सन्दानितकं त्रिभिरिष्यतइति॥ ८१॥

अथ दाडिमफलदर्शनमाह॥ विदर्भेति॥ स राजा दोहदस्य फलवैत्त त्यजनकधूपजन्यविशेषस्य धूपिनि सन्तापवति दाडिमे द्रुमे वृक्षे फलानि अपश्यत् दृष्टवान् फलानामधोमुखतया दोहदधूमाभिमुख त्वादुत्प्रेक्षते विदर्भसुभ्रुवो दमयन्त्याः स्तनयोर्या तुङ्गता औन्नत्यं तस्या आप्तये प्राप्तये अधोमुखान् धूमस्य धयान् धूमं पिबतः सतः अलम

फलानि धूमस्य धयानधोमुखान्
स दाडिमे दोहदधूपिनि द्रुमे ॥ ८२ ॥
वियोगिनीमैक्षत दाडिमीमसौ
प्रियस्मृतेः स्पष्टमुदीतकण्टकां।
फलस्तनस्थानविदीर्णरागिहृ
द्विशच्छुकास्यस्मरकिंशुकाशुगां ॥ ८३ ॥

त्यर्थं तपस्यतस्तपस्वी कुर्व्वतो घटानिव कलशानिव अन्योऽपि तपस्वी गुरुपदाप्तये अधोमुखो भूत्वा धूमं पिबन् तपस्यतीत्युत्प्रेक्षा ॥ ८२ ॥

अथ दाडिमीदर्शनमाह ॥ वियोगिनीमिति ॥ असौ राजा वेः पक्षिणः शुकस्य योगः सम्बन्धो विद्यते यत्र तां वियोगिनीं अथच विरहिणीं दाडिमीं वृक्षं ऐक्षत दृष्टवान् किम्भूतां स्पष्टमुत्प्रेक्षायां प्रियस्मृतेः कान्तस्मरणादिव उदीत उद्गतः कण्टकस्तीक्ष्णाग्रावयवविशेष एव कण्टको रोमाञ्चो यस्यास्तां श्लिष्टरूपकं विरहिण्या अपि प्रियस्मरणेन सत्वोदयात् रोमाञ्चो जायते तथा फलमेव स्तनस्तत्र स्थाने विदीर्णं भिन्नं यत् रागि लौहित्यवत् हृत् हृदयं अभ्यन्तरस्थानविशेषस्तत्र विशन् शुकास्यं कीरमुखं स्मरस्य कामस्य किंशुकाशुग इव पलाशकुसुमरूपवाण इवेति स यत्र तादृशीं अन्यापि विरहिणी फलमिव यत् स्तनस्थानं कुचप्रदेशस्तत्र विदीर्णे वियोगतापेन स्फुटिते रागिणि अनुरागवति हृदि विशन् शुकास्यमिव स्मरस्य किंशुकाशुगो यत्र तादृशी भवतीति कविसम्प्रदायः। विविष्किरपतत्रय इत्यमरः। कण्टकोन स्त्रियां क्षुद्रशत्रौ मत्स्यादिकीकसे। नैयागिकादिदोषोक्तौ द्रुमाङ्गे रोमाञ्चसुमाङ्कयोरिति मेदिनी ॥ ८३ ॥

स्मरार्द्धचन्द्रेषुनिभे क्रशीयसां
स्फुटं पलाशेऽध्वजुषां पलाशनात्।
स वृन्तमालोकत खण्डमन्वितं
वियोगिहृत्खण्डिनि कालखण्डजं॥ ८४॥
नवा लता गन्धवहेन चुम्बिता
करम्बिताङ्गी मकरन्दशीकरैः।

अथ पलाशकुसुमदर्शनमाह ॥ स्मरार्द्धेति॥ स राजा पलाशे पलाशपुष्पे अन्वितं सम्बद्धं वृन्तं प्रसवबन्धनं आलोकत दृष्टवान् किम्भूतं स्फुटमुत्प्रेक्षायां पलाशनात् मांसभक्षणात् क्रशीयसां अतिशयेन कृशानां अध्वजुषां पथिकानां कालखण्डजं यकृज्जातं खण्डमिव भागमिव ननु कथमीदृगुत्प्रेक्षासम्भव इति पलाशस्य विशेषणद्वयदानेनोपपादयति स्मरस्य कामस्य योऽर्द्धचन्द्रेषुरर्द्धचन्द्राकृतिवाणस्तन्निभा सादृश्यं यस्य तस्मिन् तथा वियोगिनां विरहिणां हृत्खण्डिनि हृदयविदारके तादृशे हि यकृत्खण्डसम्बन्धः सम्भवत्येव यथास्तु स्फुटं पलाशनात् विरहिणां मांसभोजनादिव पलाशे पलाशेति यौगिकनामके पुष्पे अन्वितं सम्बद्धं क्रशीयसां पथिकानां कालखण्डजं खण्डं यकृद्भागस्वरूपं वृन्तमालोकतेत्यपि योजयन्ति॥ ८४॥

अथ लतादर्शनमाह ॥ नवेति॥ दरादराभ्यां भयगौरववता रूपेण नलेन गन्धवहेन वायुना चुम्बिता संश्लिष्टा नवा नवीना लता वल्ली माधवीलता वा दृष्टा चक्षुषा करणेन पथे इष्टा किम्भूता मकरन्दशीकरैर्मधुसम्बन्धिभिः कणैर्मधुबिन्दुभिः करम्बितं व्याप्तमङ्गमवयवो यस्या स्तादृशी स्वेन वायोः शैत्यं सौगन्ध्यञ्च सूचितं तथा स्मितमिव ईषद्धास मस्मिव प्रभव इति तादृशः कुड्मलो मुकुलो यस्यास्तादृशी तथा दर

Digitized by Google

दृशा नृपेण स्मितशोभिकुड्मला
दरादराभ्यान्दरकम्पिनी पपे ॥ ८५ ॥
विचिन्वतीः पान्थपतङ्गहिंसनै
रपुण्यकर्म्माण्यलिकज्जलच्छलात् ।

कम्पिनी वायुसम्पर्कात् ईषच्चला एतेन वायोर्मान्द्यं सूचितं दरादराभ्यामिति विशेषणे तृतीया दरश्च भयं विरहित्वात् आदरश्च अवाया रम्यत्वात् अन्यापि गन्धवहेन सुगन्धद्रव्यवता केनचिन्नायकेन चुम्बिता क्षतचुम्बना अत एव सत्त्वोदयात् मकरन्दबिन्दुभिः स्वेदजलकणैः करम्बिताङ्गी स्मितेन शोभिनः कुड्मला दन्ता यस्याः स्तादृशी दरकम्पिनी ईषत्कम्पवती नवा रम्या लता स्त्री दरादराभ्यां परस्त्रीदर्शनात् कामित्वाच्च भयगौरववता केनचित् विरहिणा दृष्टा च इति वायौ नायकस्य लतायां नायिकायाश्च व्यवहारारोपाच्च श्लेषसमासोक्त्योरेकाश्रयानुप्रवेशः । लता स्त्री माधवीयोषिच्छाखा वल्लीप्रियङ्गुष्विति बलः । कुड्मलौ दन्तकोरकाविति धरणिः ॥ ८५ ॥

अथ चम्पककलिकादर्शनमाह ॥ विचिन्वतीरिति ॥ स राजा स्मरारेः कामस्य बलिदीपिकाः पूजाप्रदीपरूपाश्चम्पककोरकावलीश्चम्पककलिकाश्रेणीः अलोकयत् दृष्टवान् किम्भूताः इवोत्प्रेक्षे अलयो भ्रमरा एव कज्जलानि अञ्जनानि तेषां छलात् व्याजात् पान्थाः पथिका एव पतङ्गाः शलभास्तेषां हिंसनैर्हेतुभिः अपुण्यकर्म्माणि अधर्म्मकार्य्याणि विचिन्वतीर्विस्तारयन्तीः अपुण्यकर्म्मणां कृष्णवर्णत्वस्य कविसम्प्रदायप्रसिद्धत्वादुत्प्रेक्षा चम्पककोरकाणां हि उद्दीपकतया

Digitized by Google

व्यलोकयच्चम्पककोरकावलीः
स शम्बरारेर्बलिदीपिका इव ॥ ८६ ॥
अमन्यतासौ कुसुमेषु गर्भगं
परागमन्धंकरणं वियोगिनां ।
स्मरेण मुक्तेषु पुरा पुरारये
तदङ्गभस्मेव शरेषु सङ्गतं ॥ ८७॥
पिकाद्वने शृण्वति भृङ्गहुंकृतै
र्दशामुदञ्चत्करुणे वियोगिनां ।

पान्थानां हिंसा दीपिकानाश उड्डीय पततां शलभानां हिंसेत्यपुण्य कर्म्मोत्थेव कज्जलोद्गत्य दधाना इत्यर्थः ॥ ८६ ॥

अथ पुष्परेणुदर्शनमाह ॥ अमन्यतेति ॥ असौ राजा कुसुमेषु पुष्पेषु गर्भगं अन्तर्गतं परागं रजः पुरा पूर्व्वस्मिन् काले स्मरेण कामेन पुरारये शिवाय पुरारिमुद्दिश्येत्यर्थः मुक्तेषु त्यक्तेषु शरेषु पुष्पमयवाणेषु सङ्गतं संलग्नं तस्य पुरारेरङ्गभस्मेव अमन्यत ज्ञातवान किम्भूतं वियोगिनां विरहिणामन्धङ्करणं अनन्धाः अन्धाः क्रियन्ते ऽनेनेति तादृशं अन्धङ्करणत्वादेव भस्मत्वोत्प्रेक्षा भस्मापि नयनपतितं सत् अन्धं करोति॥ ८७॥

अथ स्थलपद्मिनीदर्शनमाह ॥ पिकादिति॥ उदञ्चन्तो विकाशं प्राप्नवन्तः करुणाः करुणसंज्ञकदला यत्र तादृशे अथ च उत्पन्न दये वने भृङ्गहुंकृतैर्भ्रमराणां हुंकारध्वनिभिः वियोगिनां विरहिणां दशामवस्थां पिकात् कोकिलात् शृण्वति सति अनास्थया अलमलं दुःखिनां कथयेत्यनादरेण सूनमेव पुष्पमेव करोद्दलत्वं प्रसारयति निवारणार्थं विस्तृतं करोतीति तादृशीं स्थलपद्मिनीं नलो राजा

Digitized by Google

अनाश्रया वृन्तकरप्रसारिणीं
ददर्श दूनः स्थलपद्मिनीं नलः ॥ ८८ ॥
रसालसालः समदृश्यतामुना
स्फुरद्द्विरेफारवरोषहुंकृतिः ।
समीरलोलैर्मुकुलैर्वियोगिने
जनाय दित्सन्निव तर्जनाभियं ॥ ८९ ॥

दूनः सन् कोकिलादीनामुद्दीपकत्वात् सन्तप्तः सन् ददर्श दृष्टवान् अन्योऽन्यमपि दयावति कस्यचिदुर्दशां पश्यति सति इतरो हस्त मुत्तोल्य निवारयति । यद्वा अनाश्रया ईदृगस्य रोऽयं संसार इत्यवि ष्यताभावनया वृन्तकरप्रसारिणीं अभिनयवशात् पुष्पहस्तविस्ता रिणीं । पश्यतीत्यत्र अनाश्रयेत्यत्र च इवार्थस्य प्रतीयमानत्वात् प्रती यमानोत्प्रेक्षा । श्रोतृभिर्हि वक्तरि स्वाभिनिवेशख्यापनार्थं हुंकारेण कथा ग्राह्यत इति हुंकृतेरित्युक्तं ॥ ८८ ॥

अथाम्रदर्शनमाह ॥ रसालेति ॥ अमुना नलेन रसालसालः आम्रवृक्षः समदृश्यत दृष्टः उत्प्रेक्षते रसालं विशिनष्टि स्फुरन्त इत स्ततो भ्रमन्तो ये द्विरेफा भ्रमरास्तेषामारव एव शब्द एव रोष हुंकृतिः क्रोधहुंकारो यत्र तादृशः सन् समीरेण वायुना लोलैश्चञ्च लैर्मुकुलैः कुड्मलैः करस्थैर्वियोगिने विरहिणे जनाय तर्जनाया भर्त्सनाया या भीर्भयं तां दित्सन्निव दातुमिच्छन्निव आम्रदर्शनस्य विरहिणं प्रति कोपः कामपरिजनत्वात् । अन्योऽपि रोषवशेन वायु भागप्रवणतया चञ्चलैर्मुकुलताङ्गुल्यादिभिरपराधकारिणं तर्ज यतीत्युत्प्रेक्षा ॥ ८ ॥

Digitized by Google

दिने दिने त्वं तनुरेधि रेऽधिकं
पुनःपुनर्मूर्च्छ च तापमृच्छ च।
इतीव पान्थं शपतः पिकान् द्विजान्
सखेदमैक्षिष्ट स लोहितेक्षणान्॥ ९० ॥
अलिस्रजा कुड्मलमुच्चशेखरं
निपीय चाम्पेयमधीरया दृशा।

अथ कोकिलावलोकनमाह ॥ दिनेदिन इति ॥ रे इत्याक्षेपसम्बोधने अरे पान्थ त्वं दिने दिने प्रतिदिनं अधिकं सातिशयं यथा तथा तनुः कृश एधि भव पुनःपुनर्मूर्च्छ च मूर्च्छां च प्राप्नुहि तापञ्च विरहज्वरञ्च ऋच्छ लभस्व इति एवंप्रकारेण पान्थं शपत इव पथिकजनाय शापं ददत इव लोहितेक्षणान् स्वभावतो रक्तनयनान् अथच क्रोधात् द्विजान् पक्षिणोऽथच ब्राह्मणान् पिकान् कोकिलान् स राजा सखेदं विरहित्वात् सोद्वेगं यथा तथा ऐक्षिष्ट दृष्टवान्। कोकिलालापं श्रुत्वा पथिकानां कृशत्वं मूर्च्छा तापश्च भवत्येव। अन्योऽपि तादृशं शपतो रक्तनयनान् ब्राह्मणान् सखेदं पश्यति तापस्तु विरहज्वर इति साधिव्यदर्शनः॥ ९० ॥

अथ नागकेशरकुड्मलालोकनमाह ॥ अलीति॥ स राजा भातङ्कितवान् सभयः सन् अलिस्रजा भ्रमरपङ्क्त्या उच्चं शेखरमग्रं यस्य तादृशं चाम्पेयं नागकेशरसम्बन्धिनं कुड्मलं मुकुलं अधीरया विरहितेन भीतत्वात् चञ्चलया दृशा चक्षुषा धियेति क्वचित्पाठः अस्थिरया बुद्ध्या निपीय आलोक्य वियोगिनां विरहिणां विपदे विपत्तये उदीतं उत्थितं धूमकेतुं उत्पातविशेषं अशङ्कत तर्कितवान्।

स धूमकेतुं विपदे वियोगिना-
मुदीतमातङ्किनदानेशङ्कत ॥ ९१ ॥
गलत्परागं भ्रमिभङ्गिभिः पतत्
प्रसक्तभृङ्गावलि नागकेशरं ।
स मारनाराचनिघर्षणस्खल-
ज्ज्वलत्कणं शाणमिव व्यलोकयत् ॥ ९२ ॥
तदङ्गमुद्दिश्य सुगन्धि पातुकाः
शिलीमुखालीः कुसुमाद्गुणस्पृशः ।

अन्योऽपि धूमकेतुः शुक्लवर्णः श्यामलाग्रभागो लोकानां विनाशाय आकाशे उदेति । धूमकेतुं अग्निं अथ च ग्रहविशेषमित्यपि केचित् । स्याद्धूमकेतुरुत्पातभेदे वैश्वानरे पुमानिति मेदिनी ॥ ९१ ॥

अथ विकसितपतन्नागकेशरकुसुमालोकनमाह । गलदिति ॥ स राजा प्रसक्ता संलग्ना भृङ्गाणां भ्रमराणामावलिः श्रेणी यत्र तादृशं अतएव भ्रमिभङ्गिभिर्भ्रमणरचनाविशेषैः पतत् भ्रमरभरेण स्ववृन्तत्यागात् वृन्तान्निर्गच्छत् तथा गलन्तो भ्रश्यन्तः परागा रजांसि यस्मात् तादृशं नागकेशरं केशरकुसुमं मारस्य कामस्य नाराचनिघर्षणेन बाणसंघर्षणेन स्खलन्तो निर्गच्छन्तो ज्वलन्तो दीप्यमानाः कणाः स्फुलिङ्गा यत्र तादृशं शाणमिव अस्त्रनिकषणयन्त्रविशेषमिव व्यलोकयत् दृष्टवान् । नागकेशरकुसुमस्य चक्राकारतया स्फुलिङ्गनाराचादिसदृशपरागभ्रमरपंक्त्यादिमत्तया च तथाविधशाणत्वेन सम्भावनं । शाणस्तु निकषः कष इत्यमरः ॥ ९२ ॥

अथ वपुषः सौगन्ध्यात् पुष्पं विहाय भ्रमराणां तत्र पतनमाह ॥ तदङ्गेति ॥ सुगन्धि स्वभावतो गन्धद्रव्यादिना वा सुगन्धशालि तस्य

Digitized by Google

स्वचापदुर्निर्गतमार्गणभ्रमात्
स्मरः स्वनन्तीरवलोक्य लज्जितः ॥ ९३ ॥
मरुल्ललत्पल्लवकण्टकैः क्षतं
समुच्चरच्चन्दनसारसौरभं ।

ववस्याङ्गं उद्दिश्य अभिलक्ष्य अथ च लक्षीकृत्य कुसुमात् पुष्पसकाशात् अथ च कुसुमलक्षणकामधनुषः पातुकाः पतन्तीः गुणस्पृशः सौरभ्यग्राहिकाः अथ च ज्यासङ्गिनीः शिलीमुखालीर्भ्रमरपङ्क्तीः अथ च बाणसमूहान् स्वनन्तीः शब्दायमाना अवलोक्य दृष्ट्वा स्मरः कामः स्वचापात् आत्मधनुषो दुर्निर्गता असम्यङ्निःसृता ये मार्गणा बाणास्तेषां भ्रमात् तद्रूपेण ज्ञानात् लज्जितः लज्जां प्राप्त इवेति प्रतीयमानोत्प्रेक्षा असम्यङ्निःसृते हि बाणे शब्दो भवत्येव तथाविधबाणनिःसरणेन च लक्ष्यस्याप्रतीकारात् स्वस्य चानैपुण्यप्रकाशात् बाणस्तेभ्युर्लज्जा जायत एव शिलीमुखता कुसुमादभिमुखपातुकता गुणस्पर्शिता च उभयोरविशिष्टाऽतो भ्रमसम्भवः । अलिबाणौ शिलीमुखावित्यमरः ॥ ९३ ॥

अथ बिल्वफलदर्शनमाह ॥ मरुदिति ॥ स राजा पचेलिमं स्वयं पक्वं वारनार्याः गणिकायाः कुचेन सचिता अर्जिता उपमा साम्यं यस्य तादृशं वेश्यास्तनसदृशमित्यर्थः मालूरफलं बिल्वफलं ददर्श दृष्टवान् स्तनसादृश्यं विशेषणाभ्यामुपपादयति किम्भूतं मरुता वायुना ललन् चञ्चलीभवन् यः पल्लवः किसलयस्तत्र वर्त्तमानैः कण्टकैस्तीक्ष्णाग्रावयवविशेषैः करजैः क्षतं सव्रणीकृतं तथा समुच्चरत् सम्यगुद्गच्छत् चन्दनवत् सारं श्रेष्ठं सौरभं सौगन्ध्यं यस्य तादृशं वारनारीकुचोऽपि मरुदिव देव इव ललन् कामोन्मेषाच्चलो

Digitized by Google

स वारनारीकुचसञ्चितोपमं
ददर्श मालूरफलं पचेलिमं ॥ ९४ ॥
युवद्वयीचित्तनिमज्जनोचित
प्रसूनशून्येतरगर्भगह्वरं ।
स्मरेषुधीकृत्य धिया भियान्धया
स पाटलायाः स्तवकं प्रकम्पितः ॥ ९५ ॥

यः पल्लवः किसलयस्तस्य कण्टकनखैः क्षतः खण्डितो भवति तथा समुच्चरतः समुल्लसतश्चन्दनस्य सारं सौरभं यत्र तादृशोऽपि भवति । मरुतौ पवनामरावित्यमरः । पल्लवः किसले वने । विटपे विस्तरेऽलक्तरागे शृङ्गारषिङ्गयोरिति हेमचन्द्रः । कण्टकोऽस्त्री द्रुमाङ्गके रोमाञ्चे करजे क्षुद्रहति वक्तः ॥ ९४ ॥

अस्य पाटलागुच्छावलोकनमाह ॥ युवद्वयीति ॥ स राजा पाटलायाः पाटलिवृक्षस्य स्तवकं गुच्छं भिया भयेन अन्धया विचारमूढया धिया बुद्ध्या स्मरेषुधीकृत्य कामतूणीकृत्य कामतूणत्वेन स्थिरीकृत्य प्रकम्पितश्चकितवान् किम्भूतं यूनोः स्त्रीपुंसयोर्द्वयी द्वयं तस्या द्वे चित्ते मनसी तत्र यन्निमज्जनं प्रवेशस्तत्रोचितानि योग्यानि यानि प्रसूनानि पुष्पाणि तैः शून्येतरं संपूर्णं गर्भगह्वरं मध्यबिलं यस्य तादृशं पुष्पाणां कामवाणत्वात् युवचित्ते निमज्जनं तत् पूर्णत्वात् पाटलास्तवकस्य कामतूणत्वेनावधारणस्योचितमेव तद्दर्शनेन नलस्यापि विरहित्वात् कम्पो युज्यत एव ॥ तूणोपासङ्गतूणीरनिषङ्गा इषुधिर्द्वयोरित्यमरः ॥ ९५ ॥

Digitized by Google

मुनिद्रुमः कोरकितः शितिद्युति
र्वनेऽमुनामन्यत सिंहिकासुतः।
तमिस्रपक्षत्रुटिकूटभक्षितं
कलाकलापं किल वैधवं वमन्॥ ९६॥
पुरोहठाक्षिप्ततुषारपाण्डुर
च्छदावृतेर्वीरुधि बद्धविभ्रमाः।

अथ वकवृक्षदर्शनमाह॥ मुनिद्रुम इति॥ अमुना राज्ञा वने कोरकितो जातकलिकः शितिः श्यामला द्युतिर्ब्बर्णो यस्य तादृशो मुनिद्रुमो वकवृक्षः सिंहिकासुतो राहुरिव अमन्यत तर्कितः किम्भूतः किलोत्प्रेक्षायां तमिस्रपक्षे कृष्णपक्षे या त्रुटिर्हानिः अर्थाच्चन्द्रकलानां तस्याः कूटेन छलेन भक्षितं कवलितं वैधवं विधुसम्बन्धिनं कलाकलापं भागसमूहं वमन् उद्गिरन्निव तमिस्रपक्षे हि चन्द्रस्य त्रुटिर्जायते चन्द्रकलानां भक्षणं वमनञ्च राहोः प्रसिद्धमेव वृक्षे च चन्द्रकलाकाराः कोरकाः सन्तीत्युत्प्रेक्षितं शितिद्युतिमत्त्वस्य चन्द्रकला वमनत्वेन सम्भाव्यमानतादृशकोरकावस्थानस्य च साधारणधर्म्मत्वात् सिंहिकासुत इति गौणप्रयोगः। मुनिद्रुम वाशुपतीवकोऽगस्त्यो वसुम्मुनिरिति वलः॥ ९६॥

अथ वायुचलितलतादर्शनमाह॥ पुर इति॥ नभस्वतो वायोः कुसुमेषु पुष्पेषु केलयः क्रीडाः चञ्चलीकरणादयः विलोकिताः अर्थान्नलेन दृष्टाः सत्यः तं नलं मिलन्ती जायमाना निमीला नेत्रमुद्रणा यस्य तादृशं सृजन्तः कृतवत्यः तादृशकेलीनां कामोद्दीपकतया वियोगिनां दुष्प्रेक्ष्यत्वात्। नभस्वतः किम्भूतस्य पुरः प्रथमं हठात्

Digitized by Google

मिलन्निमीलं सहृजुर्विलोकिता
नभस्वतस्तं कुसुमेषु केलयः ॥ ९७॥
गता यदुत्सङ्गतले विशालतां
द्रुमाः शिरोभिः फलगौरवेण तां।

झटिति आच्छिन्ना अपसारिता तुषारेण हिमेन पाण्डरस्य पाण्डुवर्णस्य छदस्य पत्रस्य आवृतिः हिमजालावरणं येन तस्य केलयः किम्भूताः वीरुधि लतायां बहुः कृतो विभ्रमो विशिष्टभ्रमणं यासु तादृश्यः। अथ च पुरः प्रथमं हठेन बलात्कारेण आच्छिन्ना अपनीता तुषारवत् पाण्डरस्य शुभ्रस्य छदस्य वस्त्रस्यावृतिर्येन तादृशस्य नभस्वतः नभो वयो विद्यते यस्य तस्य प्रशस्तवयस्कस्येत्यर्थः तरुणस्येति यावत् वीरुधि लताजातीयस्त्रियां बहुविभ्रमा बहुविलासाः कुसुमेषुकेलयः कामक्रीडाः विलोकिताः सत्यः कमपि साधुजनं मिलन्निमीलं मुद्रितचक्षुषं कुर्व्वन्ति साधोर्हि परोपभुज्यमानस्त्रीदर्शने लज्जावशात् चक्षुर्म्मुद्रितं भवति॥ नभोऽन्तरीक्षे वयसीति नभस्वान् तरुणे वाते इति च वलः ॥ ९७ ॥

अस्य फलभरनम्रद्रुमदर्शनमाह॥ गता इति॥ द्रुमा वृक्षा यस्या धात्र्या उत्सङ्गतले उपरिभागे अथ च क्रोडदेशे विशालतां वृद्धिं गताः तां धात्रीं पृथिवीं अथ च उपमातरं फलगौरवेण स्वोत्पन्नफलभरेण अथ च पुण्यातिशयार्थं अतिमात्रनामितैरतिशयं नम्रीकृतैः शिरोभिरग्रभागैः अथ च मस्तकैः वन्दमानान् स्पृशतः अथ च नमस्कुर्व्वतस्तान् द्रुमान् स राजा कथं न अभिनन्दतिस्म न प्रीत्या

Digitized by Google

कथं न धात्रीमतिमात्रमामितैः
स वन्दमानानभिनन्दति स्म तान् ॥ ९८ ॥
नृपाय तस्मै हिमितं वनानिलैः
सुधीकृतं पुष्परसैरहर्म्महः ।
विनिर्म्मितं केतकरेणुभिः सितं
वियोगिनेऽदत्त न कौमुदी मुदः ॥ ९९ ॥
वियोगभाजोऽपि नृपस्य पश्यता
तदेव साक्षादमृतांशुमाननं ।

क्षोणीत् फलभरेण नम्रा दृष्टा हि अभिनन्दनीया एव ॥ धात्री जनन्यामलकीवसुमत्युपमातृष्विति मेदिनी ॥ ९८ ॥

नलं प्रति दिनतेजसोऽपि कामोद्दीपकतामाह ॥ नृपायेति ॥ अहर्म्म होदिनतेजःस्वरूपा कौमुदी ज्योत्स्ना वियोगिने विरहिणे तस्मै नृपाय नलाय मुदो हर्षान् न अदत्त न दत्तवती दिनतेजसः कौमुदीस्वरूपत्वं विशेषणैरुपपादयति किम्भूतं वनानिलैर्वनवायुभिर्हिमितं शीतली कृतं तथा पुष्परसैर्म्मकरन्दैः सुधीकृतं अमृतीकृतं तथा केतक रेणुभिः केतकपुष्पपरागैः सितं विनिर्म्मितं श्वेतीकृतं कौमुद्यपि स्वभा वतो हिमिता सुधामयी सिता च ॥ अहर्म्महः कौमुदीति व्यस्तरूपकं ॥ ९९ ॥

अथ कोकिलालापमश्रवणमाह ॥ वियोगेति ॥ वियोगभाजोऽपि विरहिणोऽपि नृपस्य नलस्य तदेव न किञ्चिदन्यथाभूतं आननं मुखं साक्षादबाधितत्वेन अमृतांशुं चन्द्रं पश्यता पिकेन कोकिलेन कुहू रिति स्वाभाविकशब्देन अथ च अमावास्यानामग्रहणेन रौतीति

Digitized by Google

पिकेन रोषारुणचक्षुषा मुहुः
कुहूरुताह्वयत चन्द्रवैरिणी ॥ १०० ॥
अशोकमर्थान्वितनामताशया
गतान् शरण्यं गृहशोचिनोऽध्वगान् ।
अमन्यतावन्तमिवैष पल्लवैः
प्रतीष्टकामज्वलदस्त्रजालकं ॥ १०१ ॥

तादृशेन सता मुहुर्व्वारं वारं चन्द्रवैरिणी अमावस्या आहूयत आकारिता किम्भूतेन विरहिणां मुखेन आनेन भवितव्यं तव तु विरहिणस्तदभुनापि न आयातीति रोषेण कोपेन अरुणे रक्ते चक्षुषी यस्य तादृशेन। अत्रायं भावः कन्दर्पो विरहिणां शत्रुः कोकिलोऽपि कन्दर्पपरिवारत्वात्तेषां शत्रुरेव अतो विरहिणो नलस्य मुखं साक्षाच्चन्द्रं दृष्ट्वा शत्रुणा कोकिलेन चन्द्रवैरिणी आहूतेति। वाक्यार्थस्य समभावमानत्वात् प्रतीयमानोत्प्रेक्षेयं ॥ १०० ॥

अथाशोकद्रुमदर्शनमाह ॥ अशोकेति। एष राजा गृहान् शोचितुं शीलं येषां तादृशान् अतएव अर्थान्वितं नास्ति शोको यस्मादित्यर्थयुक्तं नाम यस्य तस्य भावस्तत्ता तस्या आशया विश्वासेन शरण्यं रक्षकेषु साधुं आगतान् प्राप्तान् अध्वगान पान्थान् अवन्तमिव रक्षन्तमिव अशोकं अशोकनामकवृक्षं अमन्यत सम्भावितवान् किम्भूतं पल्लवैरग्रवर्त्तिभिः पत्रैः करणैः प्रतीष्टमङ्गीकृतं कामस्य ज्वलदस्त्राणां अस्त्रजालमस्त्रसमूहः अस्त्ररूपाणि जालकानि कुसुमकलिका वा येन तादृशं। अत्र पल्लवस्य हस्तस्वरूपत्वमार्थं अन्योऽपि शरण्यो हस्तेन विपक्षास्त्रं गृहीत्वा शरणागतान् रक्षति ॥ गृहं गृहाश्च पुंभूम्नि कलत्रेऽपि च सद्मनीति मेदिनी ॥ १०१ ॥

Digitized by Google

विलासवापीतटवीचिवादनात्
पिकालिगीतेः शिखिलास्यलाघवात्।
वनेऽपि तौर्य्यत्रिकमारराध तं
क भोगमाप्नोति न भाग्यभाग्जनः॥ १०२॥
तदर्थमध्याप्य जनेन तद्वने
शुका विमुक्ताः पटवस्तमस्तुवन्।

अथ वनेऽपि वाद्यादिभिः सेव्यमानतामाह॥ विलासेति॥ तौर्य्यत्रिकं नृत्यगीतवाद्यरूपं कर्त्तृ वनेऽपि तं नलं आरराध सेवते स्म कस्मात् विलासवाप्याः क्रीडादीर्घिकायास्तटे तीरे यत् वीचीनां वादनं तर ङ्गाणामास्फालनं तस्मात् तथा पिकानां कोकिलानामलीनां भ्रम राणां कोकिलश्रेण्या वा गीतेर्गानात् तथा शिखिनां मयूराणां लास्ये नर्त्तने यत् लाघवं चातुर्य्यं तस्मात्। अत्रार्थान्तरमप्युपन्यस्यति भाग्य भाग्जनः शुभादृष्टयुक्तः पुरुषः क कुत्र भोगं सुखं सुखसाधनं वा न आप्नोति न लभते अपि तु सर्व्वत्रैव। तौर्य्यत्रिकं नृत्यगीतवाद्यं नाट्यमि त्यमरः। भाग्यं शुभाशुभकर्म्मविपाकः स्याच्छुभाशुभकर्म्मदैवमितिविश्वः॥ १०२॥

अथ शुकशारिकाभिरपि स्तूयमानतामाह॥ तदर्थमिति॥ जने नोद्यानपालादिना तदर्थं नलस्तुत्यर्थं अध्याप्य पाठयित्वा तद्वने नलो द्याने विमुक्तास्त्यक्ताः पटवः स्फुटवाचः शुकाः कीरास्तं नलं अस्तुवन् स्तुतवन्तः एवं तथैव शुकवदध्याप्य विमुक्ताः शारिकाः सूक्ष्मागमपक्षि विशेषाः स्वरोऽस्यास्तीति तेन तं उपजगुश्च तुष्टुवुश्च किम्भूताः शुकाः शारिकाश्च तस्य नलस्य पौरुषं पराक्रमस्तस्य गायनीकृत्वा गायनता

Digitized by Google

स्वरामृतेनोपजगुश्च शारिका
स्तथैव तत्पौरुषगायनीकृताः ॥ १०३ ॥
इतीष्टगन्धाढ्यमटन्नसौ वनं
पिकोपगीतोऽपि शुकस्तुतोऽपि च ।
अविन्दतामोदभरं बहिश्चरं
विदर्भसुभ्रूविरहेण नान्तरं ॥ १०४ ॥
करेण मीनं निजकेतनं दधत्
द्रुमालवालाम्बुनिवेशशङ्कया ।

शापिताः उभयोर्विशेषणमिदं शारिकाणामेवेति केचित् ॥ सूता मदनशलाका चित्राची शारिकावचण्डा चेति त्रिकाण्डशेषः ॥१०३॥

वनमागतस्याप्यस्य वनशोभावलोकनेन विरहाधिक्यमाह ॥ इतीति ॥ इति पूर्वोक्तप्रकारेण इष्टगन्धेनाढ्यं समृद्धिमद्वनं अटन् परिभ्रमन् पिकैरुपगीतोऽपि गानेन प्रशंसितोऽपि शुकैः स्तुतोऽपि च असौ राजा बहिश्चरं वाह्यं आमोदभरं गन्धातिशयं अविन्दत अलभत किन्तु विदर्भसुभ्रुवो दमयन्त्या विरहेण आन्तरं अन्तर्गतं आमोदभरं हर्षातिशयं न अविन्दत अत्रामोदभरमिति श्लिष्टं पदं । आमोदो हर्षगन्धयोरिति विश्वः ॥ १०४ ॥

एवं वने भ्रमत्यस्मिन् जनानां कन्दर्पसम्भावनामाह ॥ करेणेति ॥ सर्वैः पक्षिभिः ऋतुभिर्वसन्तादिभिर्वने सङ्कुले अत्र वने मित्रं सुहृदं मधुं वसन्तं अनुसरन् मृगयमाणः स्मरः काम इव स राजा व्यतर्कि सम्भावितः जनैरिति शेषः स्मरत्वेन तर्कणे हेतुगर्भविशेषणमाह द्रुमाणां वृक्षाणां यदालवालं मूलेषु जलदानस्थानं तस्याम्बुनि जले यो निवेशः प्रवेशस्तस्य शङ्कया करेण हस्तेन निजस्य नलरूपस्य

Digitized by Google

व्यतर्कि सर्व्वर्त्तुघने वने मधुं
स मित्रमत्रानुसरन्निव स्मरः॥ १०५॥
लतावलालास्यकलागुरुस्तरु
प्रसूनगन्धोत्करपश्यतोहरः।
असेवतामुं मधुगन्धवारिणि
प्रणीतलीलाप्लवनो वनानिलः॥ १०६॥
अथ स्वमादाय भयेन मन्थना
चिरत्नरत्नाधिकमुच्चितं चिरात्।

अथ च कन्दर्पस्वपक्ष केतनं चिह्नविशेषं अथ च ध्वजं मीनं मत्स्यं दधत् धारयन्। स्यादालवालमावालमावाप इत्यमरः॥ १०५॥

अथ वनवायुना सेव्यमानतामाह। लतेति॥ वनानिलो वनवायुः अमुं नलं असेवत उपासितवान् किम्भूतः लतारूपा या अवलाः स्त्रियस्तासां या लास्यकला नृत्यविद्या तत्र गुरुरध्यापकस्तथा तरूणां वृक्षसम्बन्धीनि वृक्षाश्रितानीत्यर्थः न तु पर्य्युषितत्वाद्भूमिष्ठानि यानि प्रसूनानि पुष्पाणि तेषां यो गन्धोत्करो गन्धसमूहस्तस्य पश्यतोहर चौरः तथा मधु पुष्परसएव गन्धवारि गन्धोदकं तत्र प्रणीतं कृतं लीलाप्लवनं क्रीडास्नानं येन तादृशः मधुगन्धाख्यं नलस्य सर इति केचित् अत्र क्रमेण त्रिभिर्विशेषणैर्वायोर्म्मान्द्यसौगन्ध्यशैत्यानि सूचितानि। पश्यतोहर इति पश्यन्तं जनं अनादृत्य हरतीत्यनादरे षष्ठी वाग्दिक्पश्यता मित्यादिना षष्ठ्या अलोपः॥१०६॥

अथ वने सरोवरदर्शनमाह॥ अथेति॥ अथानन्तरं अवनीभुजा राज्ञा नलेन वने तडागः पद्माकरः मन्थनाद्भयेन चिरात् बहुकालेन

Digitized by Google

निलीय तस्मिन्निवसन्नपांनिधि
र्वने तडागो ददृशेऽवनीभुजा ॥ १०७ ॥
पयोनिलीनाभ्रमुकामुकावली
रदाननन्तोरगपुच्छसच्छवीन्।
जलार्द्रहृदस्य तटान्तभूभिदो
मृणालजालस्य मिषाद्बभार यः ॥ १०८ ॥

उचितं दृष्टिं मापितं चिरतैश्चिरत्नैरत्नैरैरावतादिभिरधिकं मधि कपूर्व्वं स्वं धनं आदाय गृहीत्वा तस्मिन् वने निलीय तिरोहि तीभूय निवसन् तिष्ठन्नपांनिधिः समुद्र इवेति प्रतीयमानोत्प्रेक्षा स ददृशे दृष्टः तस्मिन् वने सन् विद्यमानोऽपांनिधिरिवेतियोजनायां वाच्योत्प्रेक्षा। एतेन तडागस्य जलबाहुल्यं जलस्य च देवेभ्यस्त्राणत्वं ध्वनितं अन्योऽपि कश्चिद्धनी राजोपद्रवाद्भयेन सर्व्वस्वमादाय देशा न्तरे निलीय निवसति ॥ १०७ ॥

पयोधिलक्ष्मीमुषीतिर्विशेषणस्य वक्ष्यमाणत्वात् समुद्रसादृश्यं प्रति पादयितुं नवभिः श्लोकैस्तडागं विशिनष्टि ॥ पय इति ॥ यस्तडागो मृणालजालस्य विससमूहस्य मिषाच्छलात् अनन्तोरगस्य शेषना गस्य यत् पुच्छं लाङ्गूलं तस्येव सती शोभना छविर्दीप्तिर्येषां तादृ शान् शुभ्रानित्यर्थः पयसि जले निलीना निमग्ना ये अभ्रमुकामुका ऐरावतास्तेषां या आवली समूहस्तस्या रदान् दन्तान् बभार धृतवान् किम्भूतस्य मृणालजालस्य जलेनार्द्रं हृद्रमार्द्रं यस्य तादृशस्य तथा तटस्य अन्तभुवं निकटभूमिं भिनत्तीति तादृशस्य तीरान्तिकभूमिं भित्वोत्थितस्येत्यर्थः गजदन्ता अपि तीरान्तिकभूमिं भिन्दन्ति पूर्व्वे समुद्र एक ऐरावतः स्थितः अधुना तु तस्य रत्नाकरत्वात् बहवो जाता इति भावः ॥ १०८ ॥

Digitized by Google

तटान्तविश्रान्ततुरङ्गमच्छटा
स्फुटानुबिम्बोदयचुम्बनेन यः।
बभौ चलद्वीचिकशान्तशातनैः
सहस्रमुच्चैःश्रवसामिव श्रयन्॥ १०९॥
सिताम्बुजानां निवहस्य यश्छला
द्बभावलिश्यामलितोदरश्रियाम्।
तमःसमच्छायकलङ्कसङ्कुलं
कुलं सुधांशोर्बहुलं वहन् बहु॥ ११०॥

॥ तटान्तेति ॥ यत्तडागस्तटान्ते तीरप्रान्ते विश्रान्ता कृतविश्रामा या तुरङ्गमाणां अश्वानां छटा समूहस्तस्याः स्फुटो व्यक्तो योऽनुबिम्बस्य प्रतिबिम्बस्य उदय उद्गमस्तस्य चुम्बनेन सम्बन्धेन प्रतिबिम्बच्छलेनेत्यर्थः उच्चैःश्रवसां सहस्रं श्रयन्निव धारयन्निव बभौ शोभितवान् किम्भूतं वीचयस्तरङ्गा एव कशा अश्वताडन्यस्ताभिः शातनैस्ताडनैश्चलत् चञ्चलीभवत् प्रतिबिम्बितं हि वस्तु तरङ्गवशाच्चलमिव प्रतिभातीति कशाताडितचञ्चलत्वेनोत्प्रेक्षा। अश्वादेस्ताडनी कशेत्यमरः॥ १०९॥

॥ सितेति॥ यस्तडागः अलिभिर्भ्रमरैः श्यामलिता श्यामीकृता उदरश्रीरभ्यन्तरशोभा येषां तेषां सिताम्बुजानां धवलपद्मानां निवहस्य समूहस्य छलात् व्याजात् तमसा अन्धकारेण समा सदृशी छाया शोभा यस्य तादृशो यः कलङ्कस्तेन सङ्कुलं व्याप्तं सुधांशोश्चन्द्रस्य बहुलं विस्तृतं कुलं वृन्दं वहन् धारयन् सन् बहु अतिशयेन बभौ शोभते स्म सिताम्बुजानां शुभ्रताचन्द्रसाम्यं अलीनाञ्च श्यामताकलङ्कसाम्यं ॥ ११०॥

Digitized by Google

रथाङ्गभाजा कमलानुषङ्गिणा
शिलीमुखस्तोमसखेन शार्ङ्गिणा।
सरोजिनीस्तम्बकदम्बकैतवा
न्मृणालशेषाहिभुवान्वयायि यः ॥ १११ ॥
तरङ्गिणीरङ्गजुषः स्ववल्लभा
स्तरङ्गलेखा बिभराम्बभूव यः।

॥रथाङ्गेति॥ यत्तडागः सरोजिन्याः पद्मिन्याः स्तम्बकदम्बस्य गुच्छ समूहस्य कैतवात् छलात् पद्मिनीगुच्छसमूहरूपेणेत्यर्थः शार्ङ्गिणा कृष्णेन अन्वयायि अनुगतः सेवित इत्यर्थः कृष्णोहि समुद्रे निद्राति कर्दमपदोपादानात् शार्ङ्गिणेति जातावेकवचनं पद्मिनीस्तम्बकदम्बस्य शार्ङ्गिस्वरूपत्वं श्लेषेणोपपादयति किम्भूतेन शार्ङ्गिणा रथाङ्गं चक्रं सुदर्शनाख्यं भजत इति तादृशेन तथा कमलाया लक्ष्म्या अनुषङ्गः सम्बन्धः सोऽस्यास्तीति तादृशेन तथा शिलीमुखानां वाणानां स्तोमस्य समूहस्य सखा मित्रं तेन तत्सहितेनेत्यर्थः तथा मृणाल मिव विसमिव यः शेषाहिरनन्तनागः सएव भूः शयनस्थानं यस्य तेन सरोजिनीस्तम्बकदम्बमपि रथाङ्गं चक्रवाकपक्षिणं भजते कमलस्य जलस्य पद्मस्य वा अनुषङ्गि सम्बन्धि शिलीमुखस्तोमसखं भ्रमरसमूह सहितं मृणालं शेषाहिरिवेति स भूरुत्पत्तिस्थानं यस्य तादृशमपि भवति। रथाङ्गं न द्वयोश्चक्रे ना चक्राङ्गविहङ्गम इति मेदिनी। कमला श्रीर्हरिप्रियेति कमलं जलमिति सहस्रपत्रं कमलमिति अलिवाणौ शिलीमुखाविति चामरः ॥ १११॥

॥ तरङ्गिणीरिति॥ यत्तडागःतरङ्गलेखास्तरङ्गश्रेणीरूपास्तरङ्गिणीर्नदीर्बिभराम्बभूव धृतवान् किम्भूताः रङ्गजुषः क्रीडासेविनीः

Digitized by Google

दरोद्गतैः कोकनदौघकोरकै
र्धृतप्रवालाङ्कुरसञ्चयश्च यः ॥ ११२ ॥
महीयसः पङ्कजमण्डलस्य य
श्छलेन गौरस्य च मेचकस्य च ।
नलेन मेने सलिले निलीनयो
स्त्विषं विमुञ्चन् विधुकालकूटयोः ॥ ११३ ॥
चलीकृता यत्र तरङ्गरिङ्गणै
ररालशैवाललतापरम्पराः ।

अथच नद्यस्याः तथा स्वस्यात्मनो वल्लभाः कान्ताः अथच प्रियाः नदीनां समुद्रपतिकत्वात् । एवं यश्च तडागः दरोद्गतैरीषदुत्थितैः कोकनदौघस्य रक्तोत्पलसमूहस्य कोरकैः कलिकाभिः तेषां छलेनेत्यर्थः धृतः प्रवालाङ्कुरसञ्चयो विद्रुमाङ्कुरसमूहो येन तादृशः अभूदिति शेषः समुद्रे प्रवालाङ्कुराः सन्त्येव अत्रापि तद्वत्कोरका इति साम्यं ।११२॥

॥ महीयस इति ॥ यत्तडागो महीयसो महत्तरस्य गौरस्य शुक्लस्य मेचकस्य च कृष्णस्य च पङ्कजमण्डलस्य पद्मसमूहस्य छलेन सलिले जले निलीनयोर्निमग्नयोर्विधुकालकूटयोश्चन्द्रविषविशेषयोस्त्विषं कान्तिं विमुञ्चन्निव उद्गिरन्निव नलेन मेने तर्कितः प्रतीयमानोत्प्रेक्षेयं समुद्रे हि विधुकालकूटयोरुत्पत्तिः अत्रापि निमज्ज्य वर्त्तमानयोस्तयोः कान्तिर्निर्गच्छतीत्युत्प्रेक्षितं ॥ ११३ ॥

चलीकृता इति ॥ यत्र यस्मिन् तडागे तरङ्गाणां रिङ्गणैर्गमनैश्चलीकृताश्चालिता अराला वक्रा याः शैवाललताः परस्परमिलनेन दीर्घत्वात् लतासदृशा अतनीलत्वात्तासां परम्पराः समूहाः ध्रुवमुत्प्रेक्षे

ध्रुवन्दधुर्ब्बाडवहव्यवाडव
स्थितिप्ररोहत्तमभूमधूमतां ॥ ११४ ॥
प्रकाममादित्यमवाप्य कण्टकैः
करम्बितामोदभरं विवृण्वती ।
धृतस्फुटश्रीगृहविग्रहा दिवा
सरोजिनीयत्प्रभवाप्सरायिता ॥ ११५ ॥

वाडवहव्यवाहो वाडवाग्नेरव स्थित्या प्ररोहत्तमोऽतिशयेन प्रादुर्भवन् भूमा प्राचुर्य्यं यस्य तादृशो यो धूमस्तस्य भावस्तत्तां दधुर्ध्रुवं तवल्यः नैताः शैवाललतापरम्पराः किन्त्वस्मिन् समुद्रे वर्त्तमानस्य वाडवानलस्य धूमसमूह इत्युत्प्रेक्षा । जलनीली तु शैवालं शैवल इत्यमरः ॥ ११४ ॥

॥ प्रकाममिति ॥ यस्मात् तडागात् प्रभव उत्पत्तिर्यस्यास्तादृशी सरोजिनी पद्मिनी दिवा दिवसे अप्सरायिता अप्सरा इवाचरति स्म किम्भूता कण्टकैर्म्मृणालस्थसूक्ष्मावयवविशेषैः करम्बिता युक्ता तथा आदित्यं सूर्य्यं अवाप्य प्रकाममतिशयं यथा तथा आमोदभरं सौग न्ध्यातिशयं विवृण्वती प्रकाशयन्ती सूर्य्योदये हि पद्मानां विकाशात् गन्धातिशयं दिक्षु निःसरति तथा स्फुटानि प्रफुल्लानि श्रिया लक्ष्म्या गृहाणि आश्रया आसनानीति यावत् लक्ष्म्याः पद्मासनत्वात् धृत स्तान्येव विग्रहो यया तादृशी अप्सरा अपि प्रकामं प्रकृष्टमदनं आदित्यं अदितेरपत्यं देवं अवाप्य आमोदभरं हर्षातिशयं विवृ ण्वती कण्टकैः रोमाञ्चैः करम्बिता च भवति तथा दिवा स्वर्गेण धृतः स्फुटायाः प्रकाशमानायाः श्रियाः शोभायाः गृहं स्थानं विग्रहः शरीरं यस्यास्तादृशी च भवति समुद्रे अप्सरसस्तिष्ठन्ति अत्र तु

Digitized by Google

यदम्बुपूरप्रतिबिम्बितायति
मरुत्तरङ्गैस्तरलस्तटद्रुमः।
निमज्ज्य मैनाकमहीभृतः सत
स्ततान पक्षान् धुवतः सपक्षतां ॥ ११६ ॥
पयोधिलक्ष्मीमुषि केलिपल्वले
रिरंसुहंसीकलनादसादरं।
स तत्र चित्रं विचरन्तमन्तिके
हिरण्मयं हंसमबोधि नैषधः ॥ ११७ ॥

सरोजिन्य एव ता इति भावः। आदित्यो भास्करे देव इति मेदिनी रोमाञ्चे च्युतपत्रे च पुष्पाङ्के कण्टकोऽस्त्रियामिति त्रिकाण्डशेषः आमोदो हर्षगन्धयोरिति हेमचन्द्रः ॥ ११५ ॥

यदम्बुपूरेति ॥ यस्य तडागस्य अम्बुनो जलस्य पूरे समूहे प्रतिबिम्बिता आयतिर्दैर्घ्यं यस्य तादृशः प्रतिबिम्बिताकृतिरिति पाठे आकृतिः शरीरं यस्येति विग्रहः तटद्रुमः कूलस्थवृक्षः मरुतो वातात् तज्ज नितैरित्यर्थः तरङ्गैरूर्म्मिभिस्तरलश्चञ्चलः सन् निमज्ज्य निमग्नीभूय इन्द्रभयादिति शेषः सतो विद्यमानस्य पक्षान् गमतो धुवतः कम्पयतो मैनाकमहीभृतो मैनाकपर्व्वतस्य सपक्षतां साम्यं ततान विस्तारयामास पुरा खलु पर्व्वतानां पक्षांश्छेतुमुद्यतादिन्द्राद्भयेन मैनाक महीधरः सपक्ष एव पलाय्य समुद्रं प्रविष्ट इति पौराणिकी वार्त्ता ॥ ११६ ॥

अथ तत्र सरसि नलस्य भविष्यद्दमयन्तीघटनामूलहंसदर्शनं युग्म केनाह ॥ पयोधीति ॥ स नैषधो नलः पयोधेः समुद्रस्य लक्ष्मीं सम्पत्तिं पूर्व्वोक्तरीत्या मुष्णाति अपहरतीति तादृशे तत्र केलिपल्वले

Digitized by Google

प्रियासु बालासु रतक्षमासु च
द्विपत्रितं पल्लवितञ्च बिभ्रतं ।
स्मरार्ज्जितं रागमहीरुहाङ्कुरं
मिषेण चञ्च्वोश्चरणद्वयस्य च ॥ ११८ ॥

क्रीडासरसि अन्तिके समीपे विचरन्तं भ्रमन्तं मृणालादिकं भुञ्जानं वा चर गतौ भक्षणे चेत्यस्य रूपं हिरण्मयं अत एव चित्रं विस्मयजनकं कदाचिदपि तथाविधानवलोकनात् हंसं अबोधि दृष्टवान् किम्भूतं हंसं रिरंसूरन्तुमिच्छुर्यां हंसी तस्याः कलनादे अस्फुटमधुरध्वनौ सादरं साभिलाषं। अथ च भूतावासत्वात् क्रोधद्वेषादिना भयानकत्वाच्च समुद्रसदृशे विनश्वरत्वाच्च पल्वलसदृशे शरीरे कश्चि द्योगी रिरंसुर्हंसी माया तस्याः कलनादसादरं चित्रं मायया विस्मापितं सर्व्वव्यापकत्वात् अन्तिके विचरन्तं हिरण्मयः पुरुष एव इति श्रुतेर्हिरण्मयं हंसं परमात्मानं पश्यति। पल्वलं स्यादल्पसरः सरोमात्रेऽपि पल्वलमिति वचः ॥ ११७ ॥

पुनः किम्भूतमित्याह ॥ प्रियास्विति ॥ स्मरेण कामेन अर्ज्जितं उत्पादितं रागमहीरुहस्य अनुरागरूपवृक्षस्य अङ्कुरं अभिनवोद्भिदं बिभ्रतं धारयन्तमिव प्रतीयमानोत्प्रेक्षेयं किम्भूतमङ्कुरं चञ्च्वोश्चोटेर्म्मिषेण व्याजेन बालासु मुग्धासु प्रियासु कान्तासु द्विपत्रितं संजातद्विपत्रं ईषद्विकसितमित्यर्थः हंसानां चञ्चोरङ्कुररूपत्वात् तथा चरणद्वयस्य च मिषेण रतक्षमासु प्रौढासु प्रियासु पल्लवितं संजातपल्लवं सम्यग्विकाशितमित्यर्थः तेषां चरणद्वयस्यापि पल्लवतुल्यत्वात् यथासंख्यालङ्कारोऽयं यथासंख्यमनूद्देश्य उद्दिष्टानां क्रमेण यदिति लक्षणात् ॥ ११८ ॥

Digitized by Google

महीमहेन्द्रस्तमवेक्ष्य स क्षणं
शकुन्तमेकान्तमनोविनोदिनं।
प्रियावियोगाद्विधुरोऽपि निर्भरं
कुतूहलाक्रान्तमना मनागभूत्॥ ११९॥
अवश्यभव्येष्वनवग्रहग्रहा
यया दिशा धावति वेधसः स्पृहा।
तृणेन वात्येव तयानुगम्यते
जनस्य चित्तेन भृशावशात्मना॥ १२०॥

अथ हंसदर्शनेन हर्षं वर्णयति ॥ महीमहेन्द्र इति ॥ महीमहेन्द्रः पृथिवीन्द्रो नलः निर्भरमत्यर्थं प्रियाया दमयन्त्या वियोगात् विरहात् विधुरोऽपि व्याकुलः सन्नपि एकान्तेन नियमेन मनोऽन्तःकरणं विनोदयति प्रमोदयतीति तादृशं तं शकुन्तं पक्षिणं हंसं अवेक्ष्य दृष्ट्वा क्षणमल्पकालं मनाक् किञ्चित् कुतूहलेन कौतुकेन आक्रान्तं व्याप्तं मनो यस्य तादृशोऽभूत्॥ ११९ ॥

कथं तथाविधो हंसस्तत्रागतः कथं वा तं दृष्ट्वा विरहिणोऽपि नलस्य कौतुकं जातमित्यपेक्षायामर्थान्तरमुपन्यस्यति ॥ अवश्येति ॥ अवश्यभव्येषु नियमेन भाविषु शुभादिषु न विद्यतेऽवग्रहः प्रतिबन्धो यस्य तादृशोऽग्रहो निर्बन्धो यस्यास्तादृशी अबाध्यमानप्रयत्नेत्यर्थः वेधसो ब्रह्मणः स्पृहा वाञ्छा यया दिशा येन मार्गेण धावति याति यद्विषयिणी भवतीत्यर्थः तया दिशा भृशमत्यर्थं अवशः आत्मा स्वरूपं यस्य तेन अतिपराधीनेनेत्यर्थः जनस्य लोकस्य चित्तेन मनसा अनुगम्यते अनुगता भवति वेधसः स्पृहेति शेषः मनसा इष्टसाधनता

Digitized by Google

अथावलम्ब्य क्षणमेकपादिकां
तदा निदद्रावुपपल्वलं खगः ।
स तिर्य्यगावर्त्तितकन्धरः शिरः
पिधाय पक्षेण रतक्लमालसः ॥१२१॥
सनालमात्माननिर्ज्जितप्रभं
ह्रिया नतं काञ्चनमम्बुजन्म किं ।

दिशा निश्चित्य तत्रैव जनः प्रवर्त्तत इत्यर्थः अत्रोपमिनोति तूलेन वात्येव यथा अप्रतिबन्धा वात्या वातकुण्डलिका यया दिशा धावति तथा दिशा निःसारत्वात् वात्याधीनेन तूलेन सानुगम्यते तथेत्यर्थः अथावग्रहभावी दमयन्त्या सह परिचयस्तदनुकूलया विधीच्छया प्रेरिते हंसे कौतुकं भवत्येवेति भावः । अवग्रहः प्रतिबन्धे स्यादृष्टिरोधे गजालिके इति रन्तिदेवः । ग्रहोऽनुग्रहनिर्बन्धग्रहणेषु रणोद्यमे । सूर्य्यादौ पूतनादौ च सैंहिकेयोपरागयोरिति मेदिनी ॥ १२० ॥

धारयानुकूलां हंसस्य निद्रां वर्णयति । अथेति । अथानन्तरं स खगो हंसः तदा तस्मिन् समये रतक्लमेन सुरतखेदेनालसः सन् उपपल्वलं सरःसमीपे एकपादिकां एकचरणं अवलम्ब्य पक्षेण छदेन शिरोमस्तकं पिधाय आच्छाद्य तिर्य्यक् आवर्त्तिता संस्थापिता कन्धरा ग्रीवा येन तादृशः सन् क्षणं निदद्रौ निद्रितवान् एकपादिकामिति एकपाद एवेत्येकपादिका स्वार्थे कः स्वार्थिकाः प्रत्ययाः क्वचित् प्रकृतितो लिङ्गवचनान्यतिक्रम्य वर्त्तन्त इति स्त्रीत्वं । स्वभावोक्तिरियं ॥ १२१ ॥

Digitized by Google

अबुद्ध तं विद्रुमदण्डमण्डितं
सपीतमब्धःप्रभुचामरञ्च किं॥ १२२॥
कृतावरोहस्य हयादुपानहौ
ततः पदे रेजतुरस्य बिभ्रती।
तयोःप्रवालैर्व्वनयोस्तथाम्बुजै
र्नियोद्धुकामे किमु बद्धवर्म्मणी॥ १२३॥

अथ निर्जितहंसं दृष्ट्वा वितर्कमाह ॥ सनालेति॥ स नलः तं हंसं इति अबुद्ध तर्कितवान् इति किमित्याह एतत् किं सनालं सदण्डं आत्माननेन समुखेन निर्म्मिता प्रभा शोभा यस्य तादृशं अत एव ह्रिया लज्जया नतं नम्रीभूतं काञ्चनं सौवर्णं अम्बुजन्म पद्मं तथा परस्य लौहित्यात् विद्रुमदण्डेन प्रवालदण्डेन मण्डितं भूषितं अम्भः प्रभोर्व्वरुणस्य चामरं किं इति वितर्कः अत्र एतत्पदमितिपदञ्च अध्याहर्त्तव्यं। किमुत्प्रेक्षते स नलस्तं हंसं काञ्चनमम्बुजन्म अबुद्ध सौवर्णपद्मत्वेन निश्चितवानित्याद्यपि व्याचक्षते॥ १२२॥

अथ हंसजिघृक्षायामुपक्रममाह ॥ कृतेति॥ हयादश्वात् कृतोऽवरोहोऽवतरणं येन तादृशस्यास्य नलस्य उपानहौ पादुके बिभ्रती दधती पदे चरणे रेजतुः शुशुभाते अत्रोत्प्रेक्षते तयोर्वनयोः काननसलिलयोः प्रवालैर्नवपल्लवैस्तथा पङ्कजैः पद्मैः यथाक्रममन्वयः काननस्य प्रवालैः सलिलस्य च पङ्कजैः सह नियोद्धुं संग्रामयितुं कामोऽभिलाषो ययोस्तादृशे सती किमुत्प्रेक्षते बद्धं संनद्धं वर्म्म कवचं याभ्यां तथाभूते। वने सलिलकानने इत्यमरः। नियुद्धं बाहुयुद्धे स्यादुक्तमार्थेऽपि चेष्यत इति वक्तः॥ १२३॥

Digitized by Google

विधाय मूर्त्तिं कपटेन वामनीं
स्वयं बलिध्वंसिविडम्बिनीमयं।
उपेतपार्श्वश्चरणेन मौनिना
नृपः पतङ्गं तमधत्त पाणिना॥ १२४॥
तदात्तमात्मानमवेत्य संभ्रमात्
पुनः पुनः प्रायसदुत्प्लवाय सः।
गतो विरुत्योड्डयने निराशतां
करौ निरोद्धुर्दशतिस्म केवलं॥ १२५॥

अथ हंसधारणमाह॥ विधायेति॥ अयं नृपो नलः बलिध्वंसिनं वामनदेवं विडम्बयितुं सदृशीकर्त्तुं शीलं यस्यास्तादृशीं वामनीं ह्रस्वां मूर्त्तिं तनुं कपटेन छलेन विधाय कृत्वा मौनिना निःशब्देन चरणेन उपेतपार्श्वः पार्श्वसमीपगतः सन् पाणिना हस्तेन तं पतङ्गं पक्षिणं हंसं स्वयमात्मना अधत्त धृतवान् वामनदेवोऽपि बलिच्छलनकपटेन वामनीं मूर्त्तिं विधाय तच्चरणोत्पन्नचरणेनोपेतपार्श्वः सन् पाणिना पतङ्गं सूर्य्यं स्पृष्टवान्। पतङ्गौ पक्षिसूर्य्यौ चेत्यमरः॥ १२४॥

अनेन धृतस्य हंसस्य चेष्टामाह॥ तदात्तमिति॥ स हंसः तेन नलेन आत्तं गृहीतं आत्मानं अवेत्य ज्ञात्वा सम्भ्रमात् भयात् सम्भ्रमं प्राप्येत्यर्थः उत्प्लवाय उड्डयनाय पुनः पुनः प्रायसत् प्रयत्नं कृतवान् अथ उड्डयने निराशतां सम्भावनाशून्यतां गतः सन् विरुत्य विशेषेण शब्दं कृत्वा निरोद्धुर्ग्रहीतुर्नलस्य करौ हस्तौ केवलं दशतिस्म दष्टवान् पक्षिणोऽपि अन्येन धृताः सन्तः प्रथममुड्डयने यतन्ते ततः शब्दं कुर्व्वन्ति ततो धारकस्य हस्तौ दशन्तीति स्वभावोक्तिरियं॥ १२५॥

Digitized by Google

ससम्भ्रमोत्पातिपतत्कुलाकुलं
सरः प्रपद्योत्कतयानुकम्प्रतां।
तमूर्म्मिलोलैः पतगग्रहान्नृपं
न्यवारयद्वारिरुहैः करैरिव ॥१२६॥

पतत्त्रिणा तद्रुचिरेण वञ्चितं
श्रियः प्रयान्त्याः प्रविहाय पल्वलं।
चलत्पदाम्भोरुहनूपुरोपमा
चुकूज कूले कलहंसमण्डली ॥१२७॥

गृहीते तस्मिन् अन्यपक्षिणामुड्डयनात् सरःक्षोभं वर्णयति। स सम्भ्रमेति॥ ससम्भ्रमेण सभयेन उत्पातिनां उड्डयतां पततां पक्षिणां कुलैः समूहैराकुलं व्याप्तं सरस्तडागः उत्कतया उड्डयनेन अथ च उत्सुकतया अनु पश्चात् कम्प्रतां कम्पनं अथ च कृपालुतां प्रपद्य प्राप्य ऊर्म्मिभिस्तरङ्गैः करवैर्लोलैश्चलैः अम्बुरुहैः पद्मरूपैः करैर्हस्तैः पतगग्रहात् पक्षिधारणात् तं नृपं नलं न्यवारयदिव निवारितवद्दिव अन्योऽपि उत्सुकतया कृपालुतामेत्य चपलकरेण एवं व्यवसायिनं जनं निवारयतीत्युत्प्रेक्षा। पतत्त्रिपत्त्रिपतगपतत् पत्ररथाण्डजा इति कं ध्रिरोऽम्बुनोरिति चामरः ॥१२६॥

हंसधारणात् कूलगतानामप्यन्यहंसानां रवमाह॥ पतत्त्रिणेति॥ तत् पल्वलं प्रविहाय त्यक्त्वा प्रयान्त्या गच्छन्त्याः श्रियो लक्ष्म्याश्चलन्ती स्पन्दमाने ये पदाम्भोरुहे चरणकमले तयोर्वर्त्तमानाभ्यां नूपुराभ्यामुपमा सादृश्यं यस्यास्तादृशी कलहंसानां राजहंसानां कादम्बानां वा मण्डली समूहः कूले तटे चुकूज रराव हंसानां कलध्वनिरूपसमानधर्म्मवत्त्वात् नूपुरसादृश्यं लक्ष्मीपरित्यागे कारणमाह

न वासयोग्या वसुधेयमीदृश-
स्त्वमङ्ग यस्याः पतिरुज्झितस्थितिः ।
इति प्रहाय क्षितिमाश्रिता नभः
खगास्तमाचुक्रुशुरारवैः खलु ॥ १२८ ॥
न जातरूपच्छदजातरूपता
द्विजस्य दृष्टेयमिति स्तुवन्मुहुः ।
अवादि तेनाथ स मानसौकसा
जनाधिनाथः करपञ्जरस्पृशा ॥ १२९ ॥

किम्भूतं सरः रुचिरेण मनोज्ञेन पतत्त्रिणा पक्षिणा हंसेन वर्जितं रहितं लक्ष्मीर्हि रुचिरवस्तुरहितं स्थानं परित्यजति । प्रयान्त्या इति वर्त्तमानप्रयोगात् अधुनैव श्रीः परित्यज्य गच्छतीति सूचितं । चक्र हंसो राजहंसे कादम्बे नृपसत्तम इति हेमचन्द्रः ॥ १२७ ॥

उर्द्धगतानामन्यपक्षिणामपि रवमाह ॥ नवासेति ॥ अङ्ग हे राजन् त्वं यस्या वसुधाया उज्झितस्थितिस्त्यक्तमर्यादः ईदृशोऽनपराधपक्षिधारणरूपमधर्म्मं कुर्व्वाणः पतिः पालकः इयं वसुधा वसूनि रत्नानि दधातीति तादृशी सरत्नापीत्यर्थः न वासयोग्या अवस्थानोपयुक्ता न भवति वरं शून्यमेवाश्रयणीयं न तु भवत्पतिका रत्नपूर्णापि पृथिवीति भावः । इति एवं प्रकारं खलूत्प्रेक्षायां खगाः पक्षिणः क्षितिं पृथिवीं प्रहाय परित्यज्य नभोऽन्तरीक्षं आश्रिता गताः सन्तः आरवैः शब्दैस्तं नलं आचक्रुशुः निनिन्दुरिव । १२८ ॥

अथ तथाविधं रूपं दृष्ट्वा प्रशंसन्तं राजानं प्रति हंसस्योक्तिप्रवृत्तिं वर्णयति ॥ नजातेति ॥ अथानन्तरं द्विजस्य पक्षिण इयं जातरूपस्य सुवर्णस्य छदाभ्यां पक्षाभ्यां जातमुत्पन्नं रूपं सौन्दर्य्यं यस्य तस्य भाव

धिगस्तु तृष्णातरलं भवन्मनः
समीक्ष्य पक्षान्मम हेमजन्मनः।
तवार्णवस्येव तुषारशीकरै
र्भवेदमीभिः कमलोदयः कियान्॥१३०॥

लक्ता न दृष्टा इत्येवं मुहुर्वारं वारं ब्रुवन् प्रशंसन् स जगाधिनाथो राजा करपञ्जरं हस्तरूपं पञ्जरं पक्षिबन्धनयन्त्रं स्पृशति भजति इति तादृशेन तेन मानसौकसा हंसेन अवादि वक्ष्यमाणप्रकारेणोक्तः। चामीकरं जातरूपं महारजतकाञ्चने इति हंसास्तु श्वेतगरुतश्चक्राङ्गा मानसौकस इति चामरः॥१२९॥

किमवादीत्याह॥ धिगस्त्विति॥ हे राजन् हेमजन्मनः सुवर्णसम्भवान् मम पक्षान् समीक्ष्य दृष्ट्वा तृष्णया लिप्सया तरलं चपलं भवन्मनस्त्वदन्तःकरणं धिगस्तु तन्मनो निन्दितं भवत्वित्यर्थः स्वर्णलोभेनैव त्वया धृतोऽस्मीति भावः स्वर्णैः किं लक्ष्मीवर्द्धकं न भवतीति निरस्यति अमीभिर्हेमजन्मपक्षैस्तव कियान् 'किंपरिमाणः कमलाया लक्ष्म्या उदय आधिक्यं भवेत् अपि तु नाल्पोऽपीत्यर्थः अत्रोपमिनोति तुषारशीकरैर्हिमलवैः अर्णवस्येव कमलस्य जलस्य उदयः यथा हिमलवैर्जलवैर्जलवृद्धिर्नभवेत्तथा मम पक्षैर्निखिलधरातलाधीश्वरस्य तव लक्ष्मीवृद्धिर्नभवेदित्यर्थः। कमलोदय इति श्लिष्टं पदं। कमलं सलिले ताम्रे जलजे क्लोम्नि भेषजे। मृगभेदे तु कमलः कमला श्रीवरस्त्रियोरिति मेदिनी॥१३०॥

Digitized by Google

न केवलं प्राणिवधो वधो मम
त्वदीक्षणाद्विश्वसितान्तरात्मनः ।
विगर्हितं धर्म्मधनैर्निबर्हणं
विशिष्य विश्वासजुषां द्विषामपि ॥ १३१ ॥

पदे पदे सन्ति भटा रणोद्भटा
न तेषु हिंसारस एष पूर्य्यते ।
धिगीदृशन्ते नृपते कुविक्रमं
कृपाश्रये यः कृपणे पतत्रिणि ॥ १३२ ॥

न केवलमिति ॥ त्वदीक्षणात्पुण्यश्लोकस्य राज्ञस्तव विलोकनात् विश्वसितो विश्वासं प्राप्तोऽन्तरात्मा यस्य तादृशस्य मम वधः केवलं प्राणिवधो न जन्तुहिंसामात्रं न भवति किन्तु विश्वस्तवधोऽप्ययमर्थः ननु कोविशेषो विश्वस्ताविश्वस्तवधयोरित्यपेक्षायामाह धर्म्म एव धनं येषां तैर्धार्म्मिकैर्म्मुनिभिः विश्वासजुषां विश्वासभाजां द्विषामपि वैरिणामपि निवर्हणं मारणं विशिष्य अन्यापेक्षया विशेषं कृत्वा विगर्हितं विशेषेण निन्दितं ये तु हिंसनीया एव तेषामपि विश्वस्तानां वधो विशेषेण निन्दितः का कथा निरपराधानां तथाविधानां मादृशामिति भावः ॥ १३१ ॥

क्षत्रिया हि स्वभावतो हिंस्रा इत्याशङ्क्याह ॥ पद इति ॥ पदे पदे स्थाने स्थाने रणे युद्धे उद्भटा दुर्म्मदा भटा वीराः सन्ति विद्यन्ते तेषु भटेषु एष हिंसारसो मारणानुरागो न पूर्य्यते न पूर्णो भवति अपि तु तेष्वेव पूर्णः कर्त्तव्य इति काकुः हे नृपते ते तव ईदृशं कुविक्रमं कुत्सितपौरुषं धिक् निन्दनीयस्ते कुविक्रम इत्यर्थः यः कुविक्रमः कृपणे

फलेन मूलेन च वारिभूरुहां
मुनेरिवेत्थं मम यस्य वृत्तयः।
त्वयाद्य तस्मिन्नपि दण्डधारिणा
कथं न पत्या धरणी ह्रियीयते ॥ १३३ ॥
इतीदृशैस्तं विरचय्य वाङ्मयैः
सचित्रवैलक्ष्यकृपं नृपं खगः।
दयासमुद्रे स तदाशयेऽतिथी
चकार कारुण्यरसापगा गिरः ॥ १३४ ॥

स्वभावतो दीने जन एव कृपालये दयापात्रे पतन्त्विति पक्षिणि मयि वर्त्तत इति शेषः ॥ १३२ ॥

राज्ञां स्वविषयवासिनो दण्डनीया एव न तु वहूपक्रमावत्सी थासहआह ॥ फलेनेति॥ इत्थमेवं प्रकारं सर्वजनसमक्षमित्यर्थः वारि जलमेव भूस्तत्पत्तिस्थानं तत्र रोहन्ति जायन्त इति तेषां वारिभूरुहां पद्मानां फलेन वराटकादिना मूलेन च शालूकादिना च मुनेरिव ऋषेरिव यस्य मम हंसस्य वृत्तयो जीविकाः तस्मिन्नपि मुनिवृत्ता वपि मयि अद्य दण्डधारिणा शास्तिकारिणा पत्या स्वामिना त्वया धरणी पृथिवी कथं न ह्रियीयते न लज्जते अपि तु लज्जत एवेत्यर्थः अधर्मवर्त्तिनि स्वामिनि स्त्रियो लज्जा युज्यत एव ॥ १३३ ॥

हंसोक्त्या राज्ञः सदयत्वमाह ॥ इतीति ॥ खगो हंस इत्येवं प्रकारैः ईदृशैः पूर्वोक्तैस्तत्सदृशैरन्यैश्च वाङ्मयैर्वचनैः नृपं नलं सचित्र वैलक्ष्यकृपं आश्चर्यलज्जादयाभियुक्तं विरचय्य विधाय दयासमुद्रे दयासागरे तस्य राज्ञ आशये मनसि कारुण्यं करुणालक्षणो योरस

Digitized by Google

मदेकपुत्रा जननी जरातुरा
नवप्रसूतिर्वरटा तपस्विनी।
गतिस्तयोरेष जनस्तमर्दय
न्नहो विधे त्वां करुणा रुणद्धि न॥१३५॥

चमत्कारः अथ च जलं तस्य आपगा नदीस्तरूपा गिरोवचनानि प्रतिधोचकार प्रावेशयत् बहवारसमयुक्तं वाक्यमुक्ता रात्रमाभूवं सदयं चकारेत्यर्थः समुद्रे हि नद्यो गच्छन्तीति तथोक्तं हंसोऽप्येवं वदतीत्याश्चर्यं असदृशकारिणं मां निन्दतीति तस्मा हतस्वात्मीवि निश्चित्य दीनवद्विलपतीति कृपा। आत्मनचरिते सम्यक् ज्ञातेऽन्यैर्यस्य जायते। अयत्रपातिमहती सविवक्ष इति स्मृतहति। विवक्षस्य भावोवैलक्षं॥ १३४॥

हतमेवात्मानं निश्चित्य विधिं प्रति हंसश्चास्येयमाह॥ मदेकेति। जननी मम माता जरया वार्धक्येन आतुरा पीडिता स्वतो जीवितुमसमर्थेत्यर्थः। तर्हि पुत्रान्तरेणैव तस्या जीविका भवेदिति निषेधति यतो मदेकपुत्रा अहमेव एकः पुत्रोयस्याः सा तथोक्ता अन्यपरिपोषको नास्तीत्यर्थः तथा वरटा हंसी मम स्त्री नवा नूतना प्रसूतिः प्रसवो यस्यास्तादृशी सापि स्वतोजीवितुमसमर्था तर्हि पत्यन्तरेण तस्या जीविका भवेदित्यपि निषेधति यतस्तपस्विनी पतिव्रता मम मरणानन्तरं पत्यन्तराश्रयणाभावात् तस्या जीवनं शिशूनां पोषणञ्च दुर्घटमेव भवेदिति भावः एष मल्लक्षणो जनस्तयोर्जननी वरटयोर्गतिर्वृत्तिहेतुः तं तथाविधं मां अर्दयन् पीडयन् मारयन्नित्यर्थः हे विधे ब्रह्मन् देव वा त्वां करुणा दया न रुणद्धि नावृणोति इदंप्रात् कर्मणस्त्वां न निवारयतीत्यर्थः एवंविधे जने

मुहूर्त्तमात्रं भवनिन्दया दया
सखाः सखायः स्रवदश्रवो मम।
निवृत्तिमेष्यन्ति परं दुरुत्तर
स्त्वयैव मातः सुतशोकसागरः॥१२६॥

मदर्थसन्देशमृणालमन्थरः
प्रियः कियद्दूर इति त्वयोदिते।
विलोकयन्त्या रुदतोऽथ पक्षिणः
प्रिये स कीदृग्भविता तव क्षणः॥१२७॥

करुणा कर्त्तव्यैव अतएव अहो आश्चर्य्यं। तमर्द्दयन्निति सम्बोधनार्थं विधेर्विशेषणं। हंसस्य योषिद्वरटेत्यमरः॥१२५॥

मातरं सम्बोध्य विलपति॥मुहूर्त्तेति॥ मम दयासखाः कृपालवः सखायो बन्धवः मुहूर्त्तमात्रं क्षणमात्रं भवस्य संसारस्य निन्दया असारोऽयं संसार इत्यादिप्रकारया स्रवन्ति गलन्ति अश्रूणि चक्षुर्जलानि येषां तादृशाः सन्तः निवृत्तिं शोकस्य शान्तिं एष्यन्ति प्राप्स्यन्ति हे मातः परं केवलं सुतस्य शोक एव सागरः स त्वयैव दुरुत्तरो दुःखेनोत्तरणीयः मद्वियोगशोकस्त्वयैव चिरं स्थास्यतीत्यर्थः॥१२६॥

हंसीं संबोध्य विलपति॥मदर्थेति॥ मदर्थैर्मन्निमित्तैर्मम प्रीतिजनकैरित्यर्थः सन्देशमृणालैः मदर्थं मृणालान्यानेष्यामीति सन्दिष्टविसैर्मन्थरो भारबाहुल्यान्मन्दगामी प्रियो मत्सहचरः कियद्दूरे आगच्छतीति शेषः कियद्दूरं यस्येति प्रियविशेषणमा इति त्वया उदिते पृष्टे सति अथ जिज्ञासानन्तरं हे प्रिये रुदतो मम शोकात्

कथं विधातर्मयि पाणिपङ्कजा
त्तव प्रियाशैत्यमृदुत्वशिल्पिनः।
वियोक्ष्यसे वल्लभयेति निर्गता
लिपिर्ललाटन्तपनिष्ठुराक्षरा॥ १२८॥
अयि स्वयूथ्यैरशनिक्षतोपमं
ममाद्य वृत्तान्तमिमं वतोदिता।

अन्ततः पतितो मत्तश्चराम् विलोकवत्याः मत्कान्तायाश्च स कालः समयः कीदृक् किंप्रकारो भविता भविष्यति नितरामनिर्वचनीयो भवितेति भावः। मन्दगामी तु मन्थर इत्यमरः॥ १२७॥

पुनरपि विधातारं समोध्योपालभते ॥ कथमिति॥ हे विधातः प्रियाया मम वल्लभाया यत् शैत्यं शीतलत्वं मृदुत्वं कोमलत्वञ्च तयोः शिल्पिनो निर्माणवतः पाणिः करः पङ्कजमिवेति तस्मात् वल्लभया प्रियया वियोक्ष्यसे वियुक्तोभविष्यसीति ललाटन्तपानि ललाटतापकारीणि निष्ठुराणि कठोराणि अक्षराणि यत्र तादृशी लिपिर्लिखिताक्षरसंस्थानं मयि कथं निर्गता निःसृता एतदयुक्तमेवेत्यर्थः करस्य प्रियाशैत्यादिविशेषणेन यद्यपि अदृष्टानुसारेण विधिर्लिखति तथापि शरीरार्द्धस्मृता जाया पुण्यापुण्यफले समेत्यादि स्मृत्या जायाजायतोः समानलेखैव युज्यत इति भावः पाणिः पङ्कजमिवेति लुप्तोपमया च पङ्कजतुल्यशीतलात् पाणिपङ्कजादेतादृशनिष्ठुरलिपिनिःसरणं नोचितमिति ध्वन्यते। ललाटन्तपेति ललाटपूर्वात्तपधातोर्दिवत् परस्य ललाटात्तप इति खः। लिखिताक्षरसंस्थाने लिपिर्लिबिरुभे स्त्रियावित्यमरः॥ १२८॥

Digitized by Google

मुखानि लोलाक्षि दिशामसंशयं
दशापि शून्यानि विलोकयिष्यसि ॥ १३९ ॥
ममैव शोकेन विदीर्णवक्षसा
त्वयापि चित्राङ्गि विपद्यते यदि ।
तदस्मि दैवेन हतोऽपि हा हतः
स्फुटं यतस्ते शिशवः परासवः ॥ १४० ॥

पुनरपि स्त्रियं सम्बोध्य विलपति ॥ अयीति ॥ अयि लोलाक्षि स्वभावतः शोकाद्वा चञ्चलनयने तव खेदे मद्यूथैर्म्ममात्मीयहंसवर्गैः अशनिर्घातोपमं वज्राघातसदृशं इमं मम वृत्तान्तं मरणवार्त्तां अथ उदिता उक्ता सती त्वं असंशयं निश्चितमेव दिशां दशापि मुखानि शून्यानि रिक्तानि विलोकयिष्यसि पश्यसि मां विना तव सर्व्वं शून्यमिव भविष्यतीति भावः । अयीति कातरसम्बोधने अयीति पाठे अपि सम्भावनायां ॥ १३९ ॥

स्वशोकात् प्रियामरणं सम्भाव्य विलपति ॥ ममैवेति ॥ हे चित्राङ्गि रमणीयगात्रि ममैव शोकेन दुःखेन विदीर्णवक्षसा स्फुटितहृदयया सत्या त्वयापि यदि विपद्यते म्रियते तदा तर्हि दैवेन विधात्रा अहं हतोऽपि मारितोऽपि हा खेदे पुनर्हतोऽस्मि यतो यस्मात् स्फुटं निश्चितं तेऽचिरोत्पन्नाः शिशवो बालकाः परासवो गतप्राणा मृता इति यावत् भवेयुरिति शेषः मम मरणेऽपि त्वत्तस्तेषां जीवनं भवेत् उभयोर्म्मरणे तु तेऽपि मरिष्यन्तीति पिष्टपेषणमेव विधिना कृतमिति भावः । पुत्रे जीवति सति मृतोऽपि पिता जीवत्येव तस्यैव पुत्रस्वरूपत्वात् । तथाच आत्मा वै जायते पुत्र इति श्रुतिः मनुरपि पतिर्भार्यां संप्रविश्य गर्भो भूत्वेह जायते । जायायास्तद्धि जायात्वं यदस्यां जायते पुनरिति ॥ १४० ॥

Digitized by Google

तवापि हाहा विरहात् क्षुधाकुलाः
कुलायकूलेषु विलुठ्य तेषु ते ।
चिरेण लब्धा बहुभिर्मनोरथै
र्गताः क्षणेनास्फुटितेक्षणा मम ॥ १४१ ॥

सुताः कमाहूय चिराय चूङ्कृतै
र्विधाय कम्प्राणि मुखानि कं प्रति ।
कथासु शिष्यध्वमिति प्रमील्य स
स्रुतस्य सेकाद्बुबुधे नृपाश्रुणः ॥ १४२ ॥

प्रियामरणं निश्चित्य सुतान् विलपति ॥ तवापीति ॥ हाहा अतिकष्टं हे प्रिये तवापि अपिशब्दान्ममापि विरहात् वियोगात् क्षुधया बुभुक्षया आकुला विधुराः सन्तः तेषु कुलायस्य नीडस्य कूलेषु तटेषु समीपेष्वित्यर्थः विलुठ्य अतिशयं लुठित्वा चिरेण बहुकालेन बहुभिर्मनोरथैरभिलाषैर्लब्धाः प्राप्ता मम ते शिशवः क्षणेन गता मृतप्राया इत्यर्थः अतोऽस्फुटितेक्षणा अप्रकाशितनयनाः नयनाप्रकाशात् अयमाहारादानेऽसमर्था इत्यर्थः। गता इति आशंसायां क्तः। कुलायो नीडमस्त्रियामित्यमरः ॥ १४१ ॥

सुतान् विलप्य मूर्च्छां गतस्यास्य नृपाश्रुसेकात् संज्ञामाह ॥ सुता इति ॥ हे सुताः आवयोर्मरणात् चूङ्कृतैः चूमित्यव्यक्तध्वनिभिश्चिराय बहुकालं कं आहूय आकार्य्य कं प्रति मुखानि कम्प्राणि कम्पनशीलानि विधाय कृत्वा कथासु शिष्यध्वं कथावशेषा भविष्यथ युष्माकं कथामात्रं लोके स्थास्यतीत्यर्थः मरिष्यथेति यावत् सुतानां भाविमरणस्य मरणादिशब्देन वक्तुमशक्यत्वादेवमुक्तं इत्युक्त्वा स हंसः प्रमील्य मूर्च्छां प्राप्य स्रुतस्य कारुण्योदयात् गलितस्य नृपाश्रुणो नलनयनजलस्य

Digitized by Google

इत्थममुं विलपन्तममुञ्च
दीनदयालुतयावनिपालः।
रूपमदर्शि धृतोऽसि यदर्थं
गच्छ यथेच्छमथेत्यभिधाय ॥ १४३ ॥

आनन्दजाश्रुभिरनुस्रियमाणमार्गान्
प्राक्शोकनिर्गलितनेत्रपयःप्रवाहान्।
चक्रे स चक्रनिभचङ्क्रमणच्छलेन
नीराजनां जनयतां निजबान्धवानां ॥१४४॥

सेकात् बुबुधे संज्ञां प्राप्तवान् अन्यथापि मूर्च्छा जलसेकादपगच्छति॥ प्रथमश्लोकमारभ्य एतत्पर्य्यन्तं वंशस्थच्छन्दः जतौ तु वंशस्थमुदीरितं जराविति लक्षणात्॥ १४२ ॥

राज्ञो दयया हंसपरित्यागमाह ॥ इत्थमिति ॥ अवनिपालो राजा इत्थं पूर्व्वोक्तप्रकारेण विलपन्तं विलापं कुर्व्वन्तं अमुं हंसं दीनदयालुतया दीनेषु सदयतया इत्यभिधाय इत्युक्त्वा अमुचत् तत्याज इति किं हे हंस यदर्थं यन्निमित्तं धृतोऽसि तत् रूपं अदर्शि मया दृष्टं अथ इतः परं यथेच्छं इच्छामनतिक्रम्य तव यथेच्छा वर्त्तते तत्रेत्यर्थः गच्छ याहि। दोधकं छन्द इदं। दोधकवृत्तमिदं भभभाद्गाविति लक्षणात्॥ १४३ ॥

अस्य परित्यागादन्यहंसानामानन्दमाह॥ आनन्देति। स हंसः चक्रनिभं चक्राकारं यच्चङ्क्रमणं मण्डलीभ्रमणं तस्य छलेन व्याजेन नीराजनां निर्मञ्छनां जनयतां कुर्व्वतां निजबान्धवानां स्वीयसहचरपक्षिणां प्राक् प्रथमं धारणकाले शोकेन निर्गलितानां क्षरितानां नेत्रपयसां चक्षुर्जलानां प्रवाहान् निर्झरान् आनन्दजाश्रुभिः गृहीता पुनःपरित्यागात् हर्षजातनयनजलैः अनुस्रियमाणोऽनुग

Digitized by Google

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यं।
तच्चिन्तामणिमन्त्रचिन्तनफले शृङ्गारभङ्ग्या महा
काव्ये चारुणि नैषधीयचरिते सर्गोऽयमादिर्गतः॥१४५॥

मानोमार्गः पन्था येषां तादृशान् चक्रे कृतवान् बद्धमुखं पक्षिणं वेष्टयित्वा अन्ये पक्षिणो भ्रमन्तीति पक्षिस्वभावः अन्यत्रापि कारादि बन्धनान्मुक्तस्य तद्बान्धवैर्नीराजना क्रियत इति नीराजनाभिव्यक्तं। वसन्ततिलकावृत्तमिदं । उक्तं वसन्ततिलका तभजा जगौ ग इति लक्षणात्॥ १४४॥

सम्प्रति कविः स्वस्य मातापित्रोश्च नामोत्कीर्त्तयन् ग्रन्थस्य चोत्कर्षमाविष्कुर्व्वन् सर्गसमाप्तिमाह॥ श्रीहर्षमिति॥ कविराजानां कविश्रेष्ठानां या राजिः समूहस्तस्य मुकुटालङ्कारहीरः शिरोभूषणस्य हीरकमणिस्वरूपः कवीनामतिमान्य इत्यर्थः श्रीहीरः श्रीहीरनामा मामल्लदेवी च जितेन्द्रियचयं वशीकृतेन्द्रियवर्गं यं श्रीहर्षं श्रीहर्षनामानं सुतं पुत्रं सुषुवे जनयामास तस्य श्रीहर्षस्य यत् चिन्तामणिमन्त्रस्य चिन्तामणिनामसारस्वतैकाक्षरमन्त्रस्य प्रणवमन्त्रस्य गायत्र्यादेर्वा चिन्तनं जपस्तस्य फले तज्जन्यादृष्टपरिणामभूते शृङ्गारस्य भङ्ग्या परिपाट्या शृङ्गाररसप्रधानतयेत्यर्थः चारुणि मनोज्ञे नैषधीयचरिते नलचरित्रे महाकाव्ये अयं आदिः प्रथमः सर्गो गतः समाप्तः। चिन्तामणिर्बुधमणौ भिदोः। मन्त्रभेदे प्रणवे चेति शब्दाब्धिः। शार्दूलविक्रीडितमिदं वृत्तं। सूर्य्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितमिति लक्षणात्॥ १४५॥

इति श्रीप्रेमचन्द्रन्यायरत्नविरचितायां नैषधीयटीकायामन्वयबोधिकासमाख्यायां प्रथमः सर्गः समाप्तः।

Digitized by Google

॥ २ अथ द्वितीयः सर्गः ॥

अधिगत्य जगत्यधीश्वरा
द्थ मुक्तिं पुरुषोत्तमात्ततः।
वचसामपि गोचरो न यः
स तमानन्दमविन्दत द्विजः ॥ १ ॥

हंसमुखेन काव्यनायिकाभूताया दमयन्त्या वर्णनमारिप्सुः सम्प्रति पूर्व्वसर्गेण सहैकवाक्यतार्थं राज्ञा परित्यक्तस्य हंसस्य हर्षातिशय माह॥ अधिगत्येति॥ अथानन्तरं स द्विजः पक्षी हंसः ततस्तस्मात् पुरुषेषूत्तमात् पुरुषश्रेष्ठात् जगत्याः पृथिव्या अधीश्वरात् प्रभुतायैव सामन्तजनश्रेष्ठात् नलात् मुक्तिं मोचनं अधिगत्य प्राप्य तं आनन्दं लोकोत्तरं हर्षं अविन्दत प्राप्तवान् तं कं य आनन्दो वचसामपि वाचामपि न गोचरः न विषयः वाक्यैरपि वक्तुमशक्य इत्यर्थः अपिशब्दात् मनसापि निर्देष्टुमशक्यः। अथ च अन्योऽपि द्विजो ब्राह्मणो जगतीनां भुवनानां अधीश्वरात् परमेश्वरात् पुरुषोत्तमात् नारायणात् तत्प्रसादादित्यर्थः मुक्तिं आत्यन्तिकदुःखनिवृत्तिं मोक्षसाधनं तत्त्वज्ञानं वा अधिगत्य प्राप्य वचसामगोचरं आनन्दं नित्यनिरतिशयसुखस्वरूपं ब्रह्म प्राप्नोति। यतो वाचो निवर्त्तन्त इति नित्यं विज्ञानमानन्दं ब्रह्मेति आनन्दो ब्रह्मणो रूपं तच्च मोक्षे प्रतिष्ठितमिति च

Digitized by Google

अधुनीत खगः स नैकधा
तनुमुत्फुल्लतनूरुहीकृतां ।
करयन्त्रणदन्तुरान्तरे
व्यलिखच्चञ्चुपुटेन पक्षती ॥ २ ॥

अयमेकतमेन पक्षते
रधिमध्योर्द्ध्वगजङ्घमङ्घ्रिणा ।
स्खलनक्षण एव शिश्रिये
द्रुतकण्डूयितमौलिरालयं ॥ ३ ॥

युक्तिः । जगती जगतीच्छन्दोविशेषेऽपि क्षितावपीति रामा व प्रवृत्ताप्रेवसामन्तः स्यादधीश्वरइति दन्तविमाष्ठजा क्षिजा इति चामरः । मुक्तिर्मोचनमोक्षयोरिति हेमचन्द्रः । अस्मिन् सर्गे सुन्दरी छन्दः अयुजोर्यदि सौ लगौ लगौ समयोः स्भौ रलगाश्च सुन्दरी तिलक्षणात् ॥ १ ॥

अस्य गात्रकम्पनादिकमप्याह ॥ अधुनीतेति ॥ स खगो हंसः नैकधा बहुवारं उत्फुल्लानि विकसितानि तनूरुहाणि रोमाणि यस्यां सा अनुत्फुल्लतनूरुहा उत्फुल्लतनूरुहा कृता तां तनुं शरीरम धुनीत कम्पयामास तथा चञ्चुपुटेन पुटीकृतया चञ्च्वा कराभ्यां नलस्य हस्ताभ्यां यत् यन्त्रणं धारणे नियमनं तेन दन्तुरं उन्नतानतं अन्तरं मध्यं ययोस्तादृशे पक्षती पक्षमूले व्यलिखत् परिष्कृतवान् पक्षमूलयोरुन्नतानतानि रोमाणि यथास्थानं न्यवेशयदित्यर्थः । पक्षिणो हि कृतमुक्ताः सन्तो गात्रकम्पनादिकं कुर्वन्तीति स्वभावोक्तिः । स्त्री पक्षतिः पक्षमूलं चञ्चुस्त्रोटिरुभे स्त्रियावित्यमरः ॥ २ ॥

अयमिति ॥ अयं हंसः स्खलनक्षण एव मोचनसमय एव आलयं नीडं शिश्रिये आश्रितवान् किम्भूतः पक्षतेः पक्षमूलस्य अधिमध्य

Digitized by Google

स गरुद्वनदुर्गदुर्ग्रहान्
कटुकीटान् दशतः सतः क्वचित् ।
नुनुदे तनुकण्डुपण्डितः
पटुचञ्चूपुटकोटिकुट्टनैः ॥ ४ ॥

अयमेत्य तडागनीडजै
र्लघु पर्य्यव्रियताथ वेष्टितैः ।
उदडीयत वैकृतात् कर
ग्रहजादस्य विकस्वरस्वरैः ॥ ५ ॥

मध्यमधिकृत्य मध्ये इत्यर्थः ऊरुंगा ऊरुंगामिनी ग्रीवा यत्र कर्म्मणि तद्यथा तथा एकतमेन एकेन अङ्घ्रिणा चरणेन धुतं ग्रीवं कण्डूयितो मौलिर्मस्तकं येन सः । अयमपि पक्षिस्वभावः । अधिमध्येति सप्तम्यर्थे अव्ययीभावः । एकतमेति स्वार्थे तमः ॥ ३ ॥

स इति ॥ पण्डितः कण्डूयनप्रवणः स हंसः पटोर्निपुणस्य चञ्चूपुटस्य या कोटिरग्रभागस्तया कुट्टनैश्छेदनैः खण्डखण्डीकरणैरित्यर्थः क्वचित् शरीरैकदेशे सतो वर्त्तमानान् कीटान् तनो अल्पा कण्डूः कण्डूयनं यत्र क्रियायां तद्यथा तथा नुनुदे अपनीतवान् किम्भूतान् गरुद्वनं पक्षसमूहस्तदेव दुर्गं तत्र दुर्ग्रहान् धर्तुमशक्यान् तथा कटु तीक्ष्णं दुःखदं यथा तथा दशतः दंशनं कुर्व्वतः । अयमपि पक्षिस्वभावः अन्योऽपि पर्व्वतादिदुर्गदुर्धर्षान् शत्रून् नुदते । तनुकण्डु इति क्रियाविशेषणतया क्लीवत्वाद्ध्रस्वः । केचित्तु तनोः शरीरस्य कण्ड्वां कण्डूयने पण्डितः कुशल इति विग्रहः इन्दूतोर्व्वोत्तरपद इति ह्रस्वं वदन्ति ॥ ४ ॥

अयमिति ॥ अयं हंसस्तडागस्य नीडजैः पक्षिभिर्लघु शीघ्रं एत्य आगत्य पर्य्यव्रियत वेष्टितः । अथानन्तरं अस्य हंसस्य करग्रहजात्

Digitized by Google

वहतो बहुशैवलक्ष्मतां
धृतरुद्राक्षमधुव्रतं खगः।
स नलस्य ययौ करं पुनः
सरसः कोकनदभ्रमादिव ॥ ६ ॥

नलहस्तग्रहणजनितात् वैक्लव्यात् विकारात् दन्तुरपक्षलक्षणात् उच्छ्रितैस्तत्त्वैः अतएव विकस्वराः अतिविस्तरशीलाः स्वराः शब्दा येषां तादृशैः सद्भिः उच्चस्वरैरित्यर्थः पक्षिभिः उदडीयत उड्डीनं अयमपि पक्षिणां स्वभावः। अथ च कैश्चित् तीर्थादौ करग्रहणार्थमागम्य केनचन परिहतः अथ करग्रहजात् बलिग्रहणजाताद्वैक्लव्यात् विवादादेः उच्छ्रितैः उच्चस्वरैः सद्भिस्तैर्गम्यते ॥ डीङ् विहायसा गतावस्य इति लघु क्षिप्रमरं द्रुतमिति चामरः। विकस्वरैरिति कसगतावित्यस्य रूपं ॥ ५ ॥

अथ स्वेच्छया हंसस्य नलहस्तगमनमाह ॥ वहत इति ॥ स खगो हंसः सरसः पङ्कजस्य कोकनदभ्रमादिव रक्तोत्पलभ्रान्तेरिव नलस्य करं हस्तं पुनर्ययौ गतवान् नलकरस्य रक्तवर्णत्वादियं भ्रान्तिः हंसा हि कोकनदप्रिया इत्युत्प्रेक्षा किम्भूतस्य नलस्य सरसश्च बहूनि शैवानि शिवभक्तसम्बन्धीनि लक्ष्माणि त्रिपुण्ड्रादिचिह्नानि यस्य तस्य भावस्तत्ता तां वहतो धारयतः बहूनि शैवानि मत्स्यसम्बन्धीनि मत्स्यसूचकानि लक्ष्माणि सामुद्रकोक्तपद्ममत्स्यादिचिह्नानि यस्मिन् वा पक्षे बहवः शैवाला यत्र तादृशी क्ष्मा भूमिर्यत्र तस्य भावं वहतः शैवचिह्नधारित्वं करविशेषणेनोपपादयति किम्भूतं करं धृता रुद्राक्षा मधुव्रता इव भ्रमरा इवेति ते येन तं कोकनदमपि रुद्राक्षसदृशभ्रमरैर्युक्तं भवति यद्वा रुद्रं शिवं न क्षमन्ते इति रुद्राक्षमाः शिवद्रोहिणस्तान् धुनाति कम्पयतीति रुद्राक्षमधु तच्च तत् व्रतं नियमश्चेति धृतं तद्येन

Digitized by Google

पतगश्चिरकाललालना
दतिविश्रम्भमवापितोनु सः।
अतुलं विदधे कुतूहलं
भुजमेतस्य भजन्महीभुजः ॥ ७॥
नृपमानसमिष्टमानसः
स निमज्जत्कुतुकामृतोर्मिषु।
अवलम्बितकर्णशष्कुली
कलसीकं रचयन्नवोचत ॥ ८॥

तादृशं छिन्नमोचिषां विनाशकारित्वमित्यर्थः। धृतरतः सम्बद्धा राजाः रोऽमिस्वदशोचि येषां ते पिङ्गलनयना इत्यर्थः तादृशा मधुव्रता भ्रमरा यत्र तादृशं कोकनदमित्यप्यन्ये। रक्तोत्पलं कोकनदमित्यमरः। रः स्मृतः पावके तीक्ष्णे इति मेदिनी ॥ ६ ॥

कथं गते तस्मिन् राज्ञः कौतुकातिशयमाह। पतग इति। स पतगो हंस एतस्य महीभुजो राज्ञो नलस्य भुजं हस्तं भजन् आश्रयन् सन् अतुलं अनुपमं कुतुकं कौतूहलं विदधे जनयामास स्वयं भजनादिव तर्कयति नु वितर्के चिरकालं यत् लालनं पोषणं तस्मात् अतिविश्रम्भं अत्यन्तविश्वासं अवापितः प्रापित इव अन्योऽपि बहुकालं पोषितः सन् स्वामिनं सुखेन सकौतुकं करोति महीभुज इत्यस्य भुजमित्यनेन कुतूहलमित्यनेन चान्वयः। भुजो बाहौ च पाणौ चेति विश्वः ॥ ७ ॥

अथ हंसोवक्तुमारभते ॥ नृपेति ॥ इष्टं मानसं मानसाख्यं सरो येन तादृशः स हंसः कुतुकं कुतूहलमेवामृतं सुधा तस्य ऊर्मिषु तरङ्गेषु निमज्जत् निमग्नीभवत् नृपमानसं नलान्तःकरणं अवलम्बिते आश्रिते

Digitized by Google

मृगया न विगीयते नृपै
रपि धर्म्मागममर्म्मपारगैः
स्मरसुन्दर मां यदत्यज
स्तव धर्म्मः स दयोदयोज्ज्वलः ॥ ९ ॥
अबलस्वकुलाशिनो झषा
न्निजनीडद्रुमपीडिनः खगान्
अनवद्यतृणार्दिनो मृगान्
मृगयाघाय न भूभृतां घ्नतां ॥ १० ॥

कर्णेन्दुकुल्यावेव कर्णविवरे एव कलशौ येन तादृशं रचयन् कुर्वन् सन् स्ववचनश्रवणोत्सुकं कुर्वन्नित्यर्थः अवोचत उक्तवान् अन्योऽपि अमृतरसेषु निमज्जते जनाय अवगमनार्थं कलसीद्वयं ददाति। मानसं सरसि स्वान्ते इति मेदिनी अमृतं यज्ञशेषे स्यात् पीयूषे सलिले घृत इति विश्वः। कलसीकमिति केचेति ग्रसनिषेधः अवोचतेति मूढोत्सुक॥ ८ ॥

किमवोचतेत्याह ॥ मृगयेति ॥ धर्म्मागमा धर्म्मशास्त्राणि स्मृत्यादीनि तेषां यत् मर्म्म रहस्यं तस्य पारगैः पारगामिभिरपि नृपैः राजभिर्मृगया मृगादिमारणक्रिया न विगीयते न निन्द्यते प्रत्युत तैः क्रियत इत्यर्थः हे स्मरसुन्दर कामवन्मनोहर हे सुन्दर त्वं स्मर विचारयेति वा मां यत् अत्यजः त्यक्तवानसि तव स त्यागः धर्म्मः न तु विधेयाननुष्ठानजन्यं पापं किम्भूतो धर्म्मः दयाया उदयेन उत्पत्त्या उज्ज्वलः शोभमानः ॥ ९ ॥

मृगया कथं न विगीयत इत्याह ॥ अबलेति ॥ झषान् मत्स्यान् खगान् पक्षिणः मृगान् हरिणादीन् घ्नतां मारयतां भूभृतां राज्ञां

Digitized by Google

यदवादिषमप्रियन्तव
प्रियमाधाय नुनुत्सुरस्मि तत् ।
क्षतमातपसंज्वरं तरो
रभिवृष्यामृतमंशुमानिव ॥ ११ ॥

मृगया अघाय पापाय न भवति एतेषां मारणजन्यं पापं राज्ञां न भवतीत्यर्थः कथं न भवतीति त्रयाणां विशेषणेनापराधमाह किम्भूतान् भवान् अबलं असमर्थं यत् स्वकुलं निजवंशस्तत् अत्स्यन्ति भुञ्जत इत्येवंशीलान् मृगान् किम्भूतान् निजाः स्वीया ये नीडद्रुमा वासस्थानवृक्षास्तान् पीडयन्तीत्येवंशीलान् मृगान् किम्भूतान् अन वद्यानि अनिन्दनीयानि अनपराधकारीणीत्यर्थः यानि तृणानि कुशा दीनि तान्यर्दयन्ति पीडयन्तीत्येवंशीलान् दुष्टनिग्रहो हि राज्ञां धर्म्मः अतोऽपराधकारिणामेतेषाम्मारणे राज्ञामधर्म्मो न भवतीतिभावः । पृथुरोमा झषोमत्स्य इत्यमरः ॥ १० ॥

धिगस्तु तृष्णेत्यादिना यदनुचितमुक्तं तदपहराय वक्तुं प्रस्तौति ॥ यदिति ॥ हे राजन् अहं तव यत् अप्रियं निन्दां अवादिषं उक्तवा नस्मि प्रियं इष्टं आधाय कृत्वा तत् अप्रियं नुनुत्सुरस्मि इदानीं निराकर्त्तुमिच्छुर्भवामि । अत्रोपमिनोति अंशुमानिव सूर्य्यो यथा तरो र्वृक्षस्य क्षतं स्वयमुत्पादितं आतपेन संज्वरं सम्यक्पीडां अमृतं जलं अभिवृष्य अभितो वर्षयित्वा नुदति तथेत्यर्थः अनेनोपमालङ्का रेण प्रतिपादयितं तव प्रियं करिष्यामीति ध्वन्यते । आदित्याज्जायते वृष्टिरिति मनुः । पयः कीलालममृतमित्यमरः ॥ ११ ॥

Digitized by Google

उपनम्रमयाचितं हितं
परिहर्त्तुं न तवापि साम्प्रतं
करकल्पजनान्तराद्विधेः
शुचितः प्रापि स हि प्रतिग्रहः ॥ १२ ॥
पतगेन मया जगत्पते
रुपकृत्यै तव किं प्रभूयते।
इति वेद्मि न तु त्यजन्ति मां
तदपि प्रत्युपकर्त्तुमर्त्तयः ॥ १३ ॥

उपनम्रमिति॥ उपनम्रं उपस्थितं अयाचितं अप्रार्थितं हितं प्रियं परिहर्त्तुं उपेक्षितुं तवापि सार्व्वभौमस्यापि न सांप्रतं न युक्तं हि यतः करकल्पं हस्तादीषन्न्यूनं जनान्तरं मत्सदृशोऽन्योजनो यस्य तादृशात् शुचितः शुद्धात् अनुकूलादित्यर्थः विधेर्द्दैवात् स प्रतिग्रहः प्रापि त्वया प्राप्तः सर्व्वं हि शुभाशुभं दैवात् प्राप्यते न तु इतरजनात् अतोमया यत् कर्त्तव्यं तत् विधिनैव कृतमिति ज्ञात्वा त्वया नोपेक्षणीयमिति भावः प्रापीति भूतकालप्रत्ययात् स प्रतिग्रहः पूर्व्वमेव विधिना तुभ्यं दत्त इति सूचितं ॥ १२ ॥

निर्जोद्धारं परिहरति॥ पतगेनेति॥ पतगेन पक्षिणा मया जगत्पतेर्भुवनेश्वरस्य तव उपकृत्यै उपकारं कर्त्तुं किं प्रभूयते किं समर्थेन भूयते अपि तु नैवेत्यर्थः इत्यहं वेद्मि जानामि तदपि तथापि प्रत्युपकर्त्तुं प्रत्युपकारार्थं अर्त्तयः कथमस्योपकारिणः प्रत्युपकारो मया न कर्त्तव्य इत्येवंरूपाः पीडा मां न तु नैव त्यजन्ति पीडा एव मां प्रेरयन्तीत्यर्थः ॥ १३ ॥

Digitized by Google

अचिरादुपकर्त्तुराचरे
दथवात्मौपयिकीमुपक्रियां।
पृथुरित्थमथाणुरस्तु सा
न विशेषे विदुषामिह ग्रहः॥ १४॥
भविता न विचारचारु चे
त्तदपि श्रव्यमिदं मदीरितं।
खगवागियमित्यतोऽपि किं
न मुदं धास्यति कीरगीरिव॥ १५॥

तर्हि किं पक्षिणा त्वया राज्ञो मम प्रत्युपकारो न कर्त्तव्य इत्याशङ्क्याह॥ अचिरादिति॥ अथवा पक्षान्तरे उपकर्त्तुः उपकारकस्य आत्मौपयिकीं आत्मोपायसाध्यां उपक्रियां प्रत्युपकारं अचिरात् शीघ्रमेव आचरेत् विदध्यात् जन इति शेषः प्राणानां सत्वरगत्वरत्वादचिरादित्युक्तं एतेन प्रत्युपकारकरणस्यावश्यभावः सूचितः इत्थं एवंविधे सति सा उपक्रिया पृथुर्महती अस्तु भवतु अथ अथवा अणुरल्पा अस्तु इह इति विशेषे महत्त्वाल्पत्वरूपे विदुषां पण्डितानां ग्रहो निर्बन्धो न नास्ति आत्मशक्त्यनुरूपो मया क्रियमाणः प्रत्युपकारस्त्वया अवश्यमेव स्वीकर्त्तव्य इति भावः॥ १४॥

निजवचसो श्रवणयोग्यतां प्रतिपादयन्नाह।। भवितेति॥ मदीरितं मयोक्तं सत्यमहमुपकारं ते करिष्यामीत्येवंरूपं चेत् यदि विचारे मीमांसायां चारु मनोहरं मीमांसासहमित्यर्थः न भविता न भविष्यति तदपि तथापि इदमग्रे वक्ष्यमाणं मदीरितं श्रव्यं तव श्रवणार्हं भवत्येव। कथं विचारासहं वाक्यं श्रवणार्हमित्याशङ्कायामाह इयं खगवाक् पक्षिवचनं अयं खगोऽपि मनुष्यवद्

Digitized by Google

स जयत्यरिसार्थसार्थकी
कृतनामा किल भीमभूपतिः।
यमवाप्य विदर्भभूः प्रभुं
हसति द्यामपि शक्रभर्तृकां ॥ १६ ॥

दमनाद्दमनाक्प्रसेदुष
स्तनयां तथ्यगिरस्तपोधनात्।
वरमाप सदिष्टविष्टप
त्रितयानन्यसदृग्गुणोदयां ॥ १७ ॥

प्रीत्यर्थः इत्यतोऽपि इन्दुकारेणोरपि चौरमौरिव मुखपात्रमिव मम वाक्यं किं मुदं तव हर्षेण न धास्यति न जनयिष्यति अपि तु धास्यत्येव इष्टसाधकत्वात् इष्टसाधनताज्ञानजन्या हि जनानां प्रवृत्तिरतोऽस्य वाक्यस्येष्टस्य जनकत्वात् मम वचसि तव अवश्यं प्रवृत्तिर्भविष्यत्येवेति भावः ॥ १५ ॥

तदेवाह ॥ स इति ॥ किल प्रसिद्धौ अरिसार्थेषु शत्रुसमूहेषु सार्थकीकृतं बिभ्यत्यस्माच्छत्रव इति अन्वर्थीकृतं नाम संज्ञा यस्य तादृशः स भीमभूपतिर्भीमनामा भूपालः जयति सर्वोत्कर्षेण वर्त्तते स कः विदर्भभूर्विदर्भभूमिः यं प्रभुं स्वामिनं अवाप्य प्राप्य शक्रभर्तृकामपि इन्द्रपतिकामपि द्यां अमरावतीं हसति तत्सदृशी भव प्रीत्यर्थं शक्नुवे जेतुमिति शक्रस्तद्भर्तृका द्यौः अन्यत्तु भीमभर्तृकेत्युपहासवीजं शक्नुवे वर्षशतेभ्योऽपीति शक्र इतिभावः केचित्तु शक्रोऽपि शत्रून् जेतुमित्युत्पन्नं शक्नोति इन्द्रस्य नाम न सार्थकं युद्धात् कदाचित् पलायनश्रवणादित्याहुः ॥ १६ ॥

दमनादिति ॥ स भीमभूपतिः दमनात् अत्यर्थं प्रसेदुषः प्रसन्नात्

Digitized by Google

भुवनत्रयसुभ्रुवामसौ
दमयन्ती कमनीयतामदं।
उदियाय यतस्तनुश्रिया
दमयन्तीति ततोऽभिधां दधौ॥ १८॥

श्रियमेव परं धराधिपा
द्गुणसिन्धोरुदितामवेहि तां।
व्यवधावपि या विधोः कलां
मृडचूडानिलयां न वेद कः॥ १९॥

तथाहि रः दमनवचनात् दमनात् दमनमानसयोगात् मुनेः तस्यां कन्यायां वरं अभीष्टं प्राप प्राप्तवान् त्रिभूतां त्रयां दिष्टः कालः पिष्टपं अमत् अनयोस्त्रितये भूतभविष्यद्वर्तमानरूपे सर्वमध्यमाधः रूपे च नास्ति अन्यः सदृक् समानो यस्य तादृक् गुणोदयो यस्याः तादृशीं लोकत्रये कालत्रये च तादृशसौन्दर्यादिगुणवती कापि नासीत्यर्थः यद्वा दिष्टो दमनमुनिना आदिष्टोदत्त इति यावत् पिष्टपत्रितये लोकत्रये अनन्यसदृक् गुणोदयो यस्यै तादृशीं। कालो दिष्टोऽप्यनेहापीति पिष्टपं भुवनं जगदिति चामरः॥ १७॥

विभाव्या सेत्याह॥ भुवनेति॥ असौ भीमतनया यतो यस्माद्धेतोः तनुश्रिया देहशोभया भुवनत्रये याः सुभ्रुवः सुन्दर्यस्तासां कमनीयतया सौन्दर्येण यो मदोऽहङ्कारस्तं दमयन्ती प्रशमयन्ती सती उदियाय उत्पन्ना ततस्तस्मात् दमयन्तीति अभिधां यौगिकं नाम दधौ धृतवती दमयन्ती किल रूपजं मदमिति क्वचित् पाठस्तत्र त्रिलोकस्त्रीणां रूपजं सौन्दर्यजातमित्यर्थः॥ १८॥

सर्वं त्रिलोकश्रम् भैमीमुखमेव त॥ श्रियमेवेति। हे राजन् त्वं

Digitized by Google

चिकुरप्रकरा जयन्ति ते
विदुषी मूर्द्धनि सा बिभर्त्ति यान्।
पशुनाप्यपुरस्कृतेन त
त्तुलनामिच्छतु चामरेण कः ॥ २० ॥

गुणसिन्धोर्गुणसमुद्रात् धराधिपात् पृथ्वीपतेर्भीमात् उदितां उत्पन्नां तां दमयन्तीं श्रियमेव लक्ष्मीमेव परं निश्चितं अवेहि जानीहि अन्यापि श्रीः धरां अधिपाति धारणेन रक्षतीति तस्मात् धराधिपात् मन्दरपर्व्वतात् सिन्धोरुत्पन्ना परामिति पाठे परां अन्यां श्रियोऽप्युत्कृष्टामित्यर्थः श्रीः समुद्रादुत्पन्ना इयन्तु गुणसमुद्रादित्युत्कर्षः । त्वमपि तां जानासीत्याह व्यवधावपि व्यवधाने सत्यपि मृडः शिवस्तस्य या चूडा मौलिः सैव निलय आश्रयो यस्यास्ता दृशीं विधोश्चन्द्रस्य कलां को वा जनो न वेद न जानाति अपि तु सर्व्व एव जानातीत्यर्थः यथा शिवस्याप्रत्यक्षत्वेऽपि अतिप्रसिद्धत्वात् तन्मौलिस्थां चन्द्रकलां सर्व्वे जानन्ति तथा सत्यपि व्यवधाने त्वमपि अतिप्रसिद्धां तां जानासीति भावः ॥ १९ ॥

इत्थं सामान्यतः स्तुत्वा प्रत्यङ्गमस्या वर्णयति ॥ चिकुरेति । हे राजन् ते चिकुरप्रकराः केशसमूहा जयन्ति सर्व्वोत्कृष्टतया वर्त्तन्ते के ते यान् चिकुरप्रकरान् विदुषी पण्डिता सा दमयन्ती मूर्द्धनि शिरसि आबिभर्त्ति धारयति अथ च आभरणं करोति ननु चामरेण साम्ये सति कथमेषां सर्व्वोत्कृष्टत्वमतआह पशुनापि चमरीसंज्ञकमृगेणापि अथ च मूर्खेणापि अपुरस्कृतेन पश्चात् कृतेन अथ च अपूजितेन चामरेण तत्तुलनां तेषां केशानां तुलनां साम्यं को जन इच्छतु अभिलषतु न कोऽपोत्यर्थः। अयं भावः ये पण्डितया मस्तके

खदृशोर्ज्जनयन्ति सान्त्वनां
खुरकण्डूयनकैतवान्मृगाः।
जितयोरुदयत्प्रमीलयो
स्तदखर्व्वेक्षणशोभया भयात्॥२१।
अपि लोकयुगं दृशावपि
श्रुतदृष्टा रमणीगुणा अपि।
श्रुतिगामितया दमस्वसु
र्व्यतिभाते सुतरां धरापते॥२२॥

आभरणोक्रियन्ते तेषां मूर्द्धापि अपूजितेन वस्तुना सह साम्यं काऽभिलषतीति एतेन चामरापेक्षयापि भैम्याः केशानां सौन्दर्याधिक्यं ध्वनितं॥२०॥

स्वदृशोरिति॥ हे राजन् मृगा हरिणाः खुरेण यत्कण्डूयनं तस्य कैतवात् छलात् तस्या दमयन्त्या अखर्व्वे दीर्घे ये ईक्षणे नयने तयोः शोभया सौन्दर्य्येण जितयोः पराभूतयोः अतएव भयात् त्रासादिव उदयन्ती जायमाना प्रमीला मुद्रणं ययोस्तादृशयोः स्वदृशोर्निजचक्षुषोः सान्त्वनां समाश्वासं जनयन्ति कुर्व्वन्ति। भया दिवेति प्रतीयमानोत्प्रेक्षा यो हि येन पराजीयते तस्य तस्माद्भयेन प्रमीला जायते अन्योऽपि तथाविधं भीतं करेण सान्त्वयतीति तथो त्प्रेक्षितं एतेन मृगनयनापेक्षया तस्या नयने अतिसुन्दरे इति ध्वनितं। खर्व्वोह्रस्वश्च वामनइत्यमरः॥२१॥

अपीति॥ हे धरापते महीपाल दमस्वसुर्दमयन्त्या लोकयुगमपि मातृकुलपितृकुलद्वयमपि श्रुतिगामितया लोकाकर्षनविषयतया वेदार्थानुगन्तृतया वा सुतर मतितरां व्यतिभाते परस्परं शोभते

नलिनं मलिनं विवृणवती
पृषतीमस्पृशती तदीक्षणे ।
अपि खञ्जनमञ्जनाञ्चिते
विदधाते रुचिगर्व्वदुर्व्विधं ॥ २३ ॥

यथा तस्या दृशावपि लोचने अपि श्रुतिगामितया कर्णान्तविश्रान्ततया सुतरां व्यतिभाते परस्परं शोभेते एवं तस्याः श्रुतदृष्टा आदौ श्रुताः पश्चात् दृष्टाश्च रमणीगुणा अपि सौन्दर्य्यादयः स्त्रीगुणा अपि श्रुताः पुराणादौ दृष्टाः क्वासुचित् सुन्दरीष्विति केचित् श्रुतिगामितया सर्व्वेषां श्रवणविषयतया सुतरां व्यतिभाति परस्परं शोभन्ते। व्यतिभाते इत्यत्र व्यतीहारे आत्मनेपदं वे भाते अन्ये सर्व्वेष्वेव समानरूपतारूपनश्लेषोऽयं अत्र नयनवर्णनस्य प्राकरणिकतया प्रस्तुतेन तेन सह अप्रस्तुतयोर्लोकयुगरमणीगुणयोरेकधर्म्माभिसम्बन्धाद्दीपकं ॥ २२ ॥

नलिनमिति ॥ हे राजन् नलिनं पद्मं मलिनं हीनप्रभं विदृण्वती कुर्व्वती तथा पृषतीं हरिणीं अस्पृशती अगणयन्ती तदीक्षणे तस्या दमयन्त्या ईक्षणे चक्षुषी अञ्जनेन कज्जलेन अञ्चिते पूजिते सती साञ्जने इत्यर्थः खञ्जनमपि खञ्जरीटमपि रुचौ कान्त्यां यो गर्व्वः कज्जलरेखातुल्यरेखायोगादहङ्कारस्तेन दुर्व्विधं दरिद्रं रुचिगर्व्वाभाववन्तमित्यर्थः विदधाते कुर्व्वाते रुचीति सप्तम्यन्तं पृथक् पदं वा तदीक्षणाभ्यां कमलं हरिणीनयनञ्च अक्लेशेनैव जितं खञ्जनस्य तु कज्जलरेखातुल्यरेखावत्त्वात् तज्जयः साञ्जनाभ्यां सञ्जात इति भावः यद्वा विदृण्वती आत्मानं प्रकाशयन्ती पृषतीं अञ्जनशलाकां अस्पृशती अभावे सती तदीक्षणे नलिनं पद्मं मलिनं विदधाते खञ्जनमपि अञ्जना

अधरं खलु बिम्बनामकं
फलमाभ्यामिति भव्यमन्वयं ।
लभतेऽधरबिम्ब इत्यदः
पदमस्या रदनच्छदे वदत् ॥ २४ ॥

चिते सती रुचिमर्थ्यद्बिम्बं विदधाते इत्यन्वयः एतत्पक्षे बिम्बवती इत्यनेन अवतंसीकृतं कमलं कण्ठाभावबोधकेन अवतया कान्त्या जितमिति भावः। अधरोष्ठस्तु अधरः इत्यमरः धरिण्यां एकवी प्रोक्ता धृताका बन्धजस्य चेति रन्तिदेवः ॥ २३ ॥

अधरमिति॥ हे राजन् खलु प्रेक्षायां अस्या दमयन्त्या रदनच्छदे दशनवाससी वदत् अभिदधत् अधरबिम्ब इति अदः पदं एतत् पदं इति भव्यं समीचीनं अन्वयं सम्बन्धं लभते प्राप्नोति इति किं बिम्ब नामकं फलं आभ्यां रदनच्छदाभ्यां अधरं हीनं बिम्बापेक्षया एव योरतिरक्ततादम्यतवदाधावलात् तथाहि अधरं बिम्बं याभ्या मिति यत्रान्यपदार्थो बहुव्रीहिर्न तु अधरो बिम्बमिवेति बाधार्थैक त्वस्युतत्वस्येत्यनेन कर्मधारयः अधरबिम्बेति विभक्तिरहितो भाग इतिशब्देनाहतः वृत्तिमत्त्वं पदत्वमिति मतेनास्य पदत्वं सन्ध्यभावस्तु एकपदादिभ्योऽन्यत्र सन्धेर्विभाषिततत्वस्य सर्वसम्मतत्वेनेच्छाधीनत्वात् यद्यपि ओष्ठाधरौ तु रदनच्छदौ दशनवाससी इत्यमरकोशादौ रदनच्छदशब्दस्य पुंस्त्वं दृश्यते तथापि लिङ्गमशास्यं लोकाश्रयत्वा दित्यतः क्लीवत्वं बहुवचनं अस्मादित्यत्र आभ्यामिति अधरबिम्बमित्यद इत्यत्र अधरबिम्ब इत्यद इति रदनच्छदमित्यत्र च रदनच्छदे इति पाठो लिपिकरप्रमादाज्जातः सङ्गतत्वात् तथाहि अधरो बिम्ब मिवेति कर्मधारये अधरं बिम्बं यस्मादधरोष्ठादिति बहुव्रीहौ च

Digitized by Google

हृतसारमिवेन्दुमण्डलं
दमयन्तीवदनाय वेधसा।
कृतमध्यबिलं विलोक्यते
धृतगम्भीरखनीखनीलिम ॥ २५ ॥
धृतलाञ्छनगोमयाञ्चलं
विधुमालेपनपाण्डरं विधिः।
भ्रमयत्युचितं विदर्भजा
ननीराजनवर्द्धमानकं ॥ २६ ॥

समानमेव प्रवरविम्बमिति पदं वक्रमोष्ठौ समाहृतयावरोष्ठस्य विशेषणतया कर्म्मधारयेऽन्त्यपदलिङ्गतया च क्लीवत्वं अन्यथा लिङ्गवचनभेदेन पदभिन्नत्वात् कवेरभिप्रायो नोपपद्येतेति। अध रस्तु पुमानोष्ठे हीनेऽनूर्वे च वाच्यवदिति मेदिनी। २४ ॥

हृतेति ॥ इन्दुमण्डलं चन्द्रविम्बं वेधसा विधात्रा दमयन्तीवदनाय भैमीमुखं निर्म्मातुं हृतः सारः श्रेष्ठभागो यस्य तादृशमिव अत एव कृतं विधात्रा जनितं मध्ये बिलं गर्त्ता यस्य तादृशं विलोक्यते दृश्यते सम्भाव्यत इत्यर्थः किम्भूतं धृतो गम्भीरखन्यां निम्नगर्त्ते खस्याकाशस्य नीलिमा श्यामत्वं येन तादृशं इत्यरूर्त्ता हि दूरतः श्यामवद्भाति चन्द्रमण्डले नायं कलङ्कः किन्तु गृहीतसारत्वादुत्पन्ने गभीरगर्त्ते आकाशस्य कालिमेति भावः यद्यप्याकाशस्य नीरूपत्वान्नीलिमा न सम्भवति तथापि गभीरगर्त्तस्यालोकसम्पर्काभावादालोकाभावरूपस्यान्धकारस्यैव वस्तुनीलवत्त्वं तदवच्छिन्नाकाशे उपचर्य्यते मालिन्यं वेति पाठे इत्याद्युक्तकविसमयख्यातत्वाद्वा तयोरस्तं वदनायेति तुङ्गभीत् कर्म्मण इति चतुर्थी । २५ ॥

प्रकारान्तरेणापि दमयन्तीवदनस्य चन्द्राधिक्यमाह ॥ धृतेति ॥

Digitized by Google

सुषमाविषये परीक्षणे
निखिलं पद्ममभाजि तन्मुखात्।
अधुनापि न भङ्गलक्षणं
सलिलोन्मज्जनमुज्झति स्फुटं ॥ २७॥

विधिरेषा विदर्भजाया दमयन्त्या आननस्य मुखस्य नीराजनं निर्मञ्छनासाधनं वर्द्धमानकं शरावमिव विधुं चन्द्रं उचितं योग्यं यथा स्यात्तथा भ्रमयति किम्भूतं विधुं इतं लाञ्छनमेव कलङ्क एव गोमयो यस्य गोमयांशो येन तादृशं गोमयार्चनमिति क्वचित् पाठः तत्र इतं लाञ्छनं गोमयमिवेति तेन अर्चनं पूजनं यस्येति विग्रहः तथा आलेपनं पिष्टोदकं आलिम्पना इति लोकप्रसिद्धं तेनैव पाण्डुरं शुभ्रं शरावमपि गोमययुक्तं पिष्टोदकेनालिप्तञ्च कृत्वा उपरि प्रदीप्य दृष्टिदोषनिवारणार्थं नीराजना क्रियत इति लोकाचारः प्रथमेनोत्तमस्य नीराजना क्रियत इत्यौचित्यं। शरावो वर्द्धमानक इत्यमरः॥ २६॥

सुषमेति॥ स्फुटमुत्प्रेक्षे सुषमाविषये परमशोभाविषये अधिका शोभा पद्मानां दमयन्तीमुखस्य वेत्येवंरूपे परीक्षणे परीक्षायां दिव्येन शुद्धावित्यर्थः निखिलं समस्तं पद्मं तन्मुखात् भैमीमुखात् अभाजि स्वयमेव पराजितं कुत एवं तया ज्ञातमित्याह अधुनापि इदानीमपि भङ्गलक्षणं पराजयचिह्नं सलिलोन्मज्जनं जलादुत्थानं न उज्झति न त्यजति पद्ममित्यनुषज्यते पद्मस्य स्वाभाविकमपि जलोन्मज्जनं भङ्गलक्षणत्वेनोत्प्रेक्षितं जलदिव्ये हि तोरणस्तम्भपुरुषमुक्त शरमादायान्यो वेगवान् अगच्छन्नागत्य यदि दिव्यकारिणं निमज्जन्तं पश्यति तदा तस्य शुद्धिर्भवति यद्युन्मज्जति तदा पराजयो भवति

Digitized by Google

धनुषी रतिपञ्चबाणयो
रुदिते विश्वजयाय तद्भ्रुवौ ।
नलिके न तदुच्चनासिके
त्वयि नालीकविमुक्तिकामयोः ॥ २८ ॥

सदृशी तव शूर सा परं
जलदुर्गस्थमृणालजिद्भुजा ।
अपि मित्रजुषां सरोरुहां
गृहयालुः करलीलया श्रियः ॥ २९ ॥

वदान्य यो वदान्यः सततं त्वमिषुं मुक्तमार्गीयान्योऽजवी नरः । मते दक्षिणिभिमस्माकं पक्षेऽपेक्षुत्रिमाप्नुयादिति । तन्मुञ्चादिति परात्रेः सोऽकुमत्र्वार्मिति सूत्रे परावयार्थकधातोर्ग्रहणादपादाने पञ्चमी । स्थूलक्षा परमास्त्रोभेत्यमरः ॥ २७ ॥

धनुषी इति ॥ तद्भ्रुवौ दमयन्तीभ्रुवौ रतिपञ्चबाणयोः रतिकामदेवयोर्धनुषी विश्वजयाय त्रिभुवनजयार्थं उदिते प्रादुर्भूते तद्भ्रुवौ दृष्ट्वा सर्वेऽपि कामवशा भवन्तीति भावः तथा तस्याभैम्या उच्चनासिके त्वयि नालीकस्य शरस्य विमुक्तौ परित्यागे कामोऽभिलाषो ययोस्तादृशयोरतिपञ्चबाणयोर्नलिके न शराधारनलौ न अपि तु नलिके एवेत्युत्प्रेक्षा। त्वयि नालीकेत्यादिना सा तवैव प्रिया भविष्यतीति सूचितं नलिक इति नलावेव नलिके स्वार्थे कः क्वचित् स्वार्थिक प्रत्ययान्ता लिङ्गवचनान्यतिक्रम्य वर्तन्त इति ख्यातं । नालीकोऽब्जे शरे शल्ये नालीकं पद्मखण्डयोरिति हेमचन्द्रः ॥ २८ ॥

सदृशीति ॥ हे शूर हे वीर सा दमयन्ती परं केवलं तव सदृशी

वयसी शिशुतातदुत्तरे
सुदृशि स्वाभिविधिं विधित्सुनी।
विधिनापि न रोमरेखया
कृतसीम्नि प्रविभज्य रज्यतः॥ ३०॥

योग्या अथ च वृत्ता विस्तृता अत एव दुर्गे दुर्गमस्थानं तत्र विक्रमोति यथाविधानि स्थानानि विसानि जयतइति तादृशौ भुजौ वस्त्रान्तादृशौ सुनालादपि सरलौ कोमलौ च तस्या भुजावित्यर्थः यथा करलीलया हस्तविलासेन मित्रजुषां सूर्यप्रणयिनां सूर्योदयात् प्रफुल्लानामित्यर्थः सरोरुहां पद्मानां श्रियः शोभाः लुण्ठता लुण्ठन्तौ तामपि जलदुर्गस्थशत्रुजिद्भुजः मित्रजुषां सुहृत्सेवावतामपि सन्तानां करलीलया बलिक्रियया श्रियः सम्पत्तीः लुण्ठतावुः शूरेति सम्बोधनात् सापि ईदृशत्वात् शूरा अतस्तवैव योग्येति भावः। मित्रन्तु सखौ मित्रो दिवाकर इति हेमचन्द्रः बलिहस्तांशवः कराइति लीला विलासक्रिययोरिति चामरः ॥ २९ ॥

वयसी इति ॥ विधिना विधात्रा रोमरेखया रोमावल्या प्रविभज्य समविभागं कृत्वा कृतसीम्नि कृतमर्यादायामपि सुदृशि सुलोचनायां दमयन्त्यां स्वाभिविधिं स्वाभिव्याप्तिं विधित्सुनी कर्तुकामे शिशुता शैशवं तदुत्तरं यौवनं सा च तच्च ते द्वे वयसी न रज्यतः न तुष्यतः सीमाविवादं न त्यजत इत्यर्थः उभयोरपि स्वस्थामेकाकिन्येन कातुम् भिलाषात् कन्यावपि मध्यरेखेन विभज्य सेतुवादिना कृतमर्यादायामपि भूमौ विरुद्धे सति येन वयःसन्धौ वर्तमाना सा विवाहयोग्येति सूचितं अत्र विधिनापीत्यपिशब्दः कृतसीम्नोप्येवमाप्तेति ॥ ३० ॥

Digitized by Google

अपि तद्वपुषि प्रसर्पतो-
र्गमिते कान्तिझरैरगाधताम् ।
स्मरयौवनयोः खलु द्वयोः
प्लवकुम्भौ भवतः कुचावुभौ ॥ २१ ॥
कलसे निजहेतुदण्डजः
किमु चक्रभ्रमिकारिता गुणः ।
स तदुच्चकुचौ भवन् प्रभा-
झरचक्रभ्रमिमातनोति यत् ॥ २२ ॥

अपीति॥ खलूत्प्रेक्षायां कान्तय एव झराः प्रवाहास्तैरगाधतां अतलस्पर्शतां गमितेऽपि प्रापितेऽपि तस्या दमयन्त्या वपुषि शरीरे प्रसर्पतोः सन्तरतोर्द्वयोरुभयोः स्मरयौवनयोः कामतारुण्ययोः उभौ द्वौ कुचौ स्तनौ प्लवकुम्भौ सन्तरणघटौ उडुपरूपकुम्भौ वा भवतः अत्रापिशब्दस्य गमित इत्यनेनान्वयः पूर्व्वापेक्षया समुच्चय इति केचित् अगाधजले हि सन्तरणमनुचितं तत्रापि यदि क्रियते तदा कुम्भं गृहीत्वैवेति तयोरुचितं अगाधमतलस्पर्शमिति प्रवाहे निर्झरो झर इति चामरः ॥ २१ ॥

कलस इति॥ निजस्य स्वस्य हेतुर्निमित्तकारणं यो दण्डस्तस्माज्जात इति तादृशो यश्चक्रभ्रमिकारितागुणः चक्रस्य कुम्भकारयन्त्रविशेषस्य भ्रमिकारिता भ्रमणजनकत्वरूपो धर्म्मः कलसे घटे किमु अस्तीति शेषः ननु समवायिकारणगुणानामेव कार्य्यगुणारम्भकत्वं न तु निमित्तकारणगुणानामतोऽसम्भाव्यमेवैतदिति कथमेतादृशमितर्क इत्याकाङ्क्षायां श्लेषेणोपपादयति यत् यस्मात् तस्या दमयन्त्या उच्चकुचौ उन्नतस्तनौ भवन् स कलसः प्रभाझरेण कान्तिसमूहेन

Digitized by Google

भजते खलु षण्मुखं शिखी
चिकुरैर्निर्म्मितबर्हगर्हणः ।
अपि जम्भरिपुं दमस्वसु-
र्ज्जितकुम्भः कुचशोभयेभराट् ॥ ३३ ॥

उदरं नतमध्यपृष्ठता
स्फुरदङ्गुष्ठपदेन मुष्टिना ।
चतुरङ्गुलिमध्यनिर्गत
त्रिवलिभ्राजि कृतं दमस्वसुः ॥ ३४ ॥

चक्रभ्रमिं कुलालचक्रभ्रमणं आतनोति जनयति अथ च चक्रस्य राष्ट्रस्य लोकसमूहस्य वा भ्रमिं भ्रान्तिं मोहमिति यावत् आतनोति यथा प्रभाभरे कान्तिप्रवाहे चक्रभ्रमिं चक्रवाकभ्रान्तिं आतनोति चक्रवाका हि प्रवाहे तिष्ठन्ति शब्दच्छलादेवायं वितर्कः । चक्रः कोके पुमान् क्लीवं व्रजे सैन्यरथाङ्गयोः । राष्ट्रे दम्भान्तरे कुम्भकारो पकरणास्त्रयोरिति मेदिनी ॥ ३२ ॥

भजत इति ॥ खल्वुत्प्रेक्षे शिखी मयूरः दमस्वसुर्दमयन्त्याश्चिकुरैः केशै र्निर्म्मिता कृता बर्हाणां पिच्छानां गर्हणा तिरस्कारो यस्य तादृशः सन् षण्मुखं कार्त्तिकेयं भजते सेवते तथा इभराट् ऐरावतोऽपि दमस्वसुः कुचशोभया जितौ तिरस्कृतौ कुम्भौ यस्य तादृशः सन् जम्भ रिपुं इन्द्रं भजते मयूरैरावतौ देवताराधनेन बर्हकुम्भयोर्भैमीकेश स्तनसाम्यलाभार्थं वैरनिर्यातनार्थं वा कार्त्तिकेन्द्रौ भजेते इति भावः अन्योऽपि केनचित्पराजितो भूत्वा तस्य साम्यलाभार्थं प्रतीकारार्थं वा कञ्चित् देवं सेवते अत्र कार्त्तिकेयस्य षण्मुखशब्देनाभिधानात् भय हरत्वं इन्द्रस्य च जम्भरिपुशब्देन शत्रुनिवारकत्वं सूचितं ॥ ३३ ॥

Digitized by Google

उदरं परिमाति मुष्टिना
कुतुकी कोऽपि दमस्वसुः किमु ।
धृततच्चतुरङ्गुलीव य
द्वलिभिर्भाति सहेमकाञ्चिभिः ॥ ३५ ॥

उदरमिति ॥ दमस्वसुर्दमयन्त्या उदरं मुष्टिना कृतं विधिनेति शेषः किम्भूतेन मुष्टिना नतं निम्नं मध्यं मध्यभागो यस्य तादृशं एकं यस्योदरस्य तस्य भावस्तत्ता तया स्फुरत् व्यक्तीभवत् अङ्गुष्ठपदं अङ्गुष्ठाङ्गुलिनिवेशस्थानं अङ्गुष्ठचिह्नं वा यस्य तादृशेन उदरं कीदृशं चतसृणामङ्गुलीनां मध्येन निर्गता निःसृता यास्तिस्रो वलय स्ताभिर्भ्राजते शोभते इति तादृशं एकमध्यस्य निम्नत्वमङ्गुष्ठनिवेशात् उदरस्य च वलित्रयवत्त्वं अङ्गुलिचतुष्टयपीडनात् चतसृणां चोध्ये वलित्रयाणि भवन्ति अन्यदपि कोमलं वस्तु ऊर्ध्वलताङ्गुष्ठमुष्टिना गृहीतं सत् अङ्गुष्ठनिवेशेन मध्ये नम्रं चतुरङ्गुलमध्यनिर्गतवलित्रयं च भवति ॥ ३४ ॥

प्रकारान्तरेणाप्युदरं वर्णयति ॥ उदरमिति ॥ किमु वितर्के कोऽपि कश्चिज्जनो ब्रह्मैव वा कुतुकी कौतूहलयुक्तः सन् मुष्टिना करेण दमस्वसुर्दमयन्त्या उदरं परिमाति परिमितं करोति यद्यस्मात् सहेमकाञ्चिभिः सुवर्णमेखलासहिताभिर्वलिभिस्त्रिभिर्वलिभिः करस्थैर्धृतास्तस्य परिमातुर्मुष्टेर्वा चतस्रोऽङ्गुलयो येन तादृश मिव भाति शोभते उदरमित्यर्थात् तिस्रो वलयो हेमकाञ्ची च मुष्टेर ङ्गुलिचतुष्टयमित्यर्थः । को ब्रह्मा अपि रेवार्ये । मारुते वेधसि ब्रध्ने पुंसि कः कं शिरोऽम्बुनोरित्यमरः उदरावयवे दैत्ये वलिः पूजोपचा रयोरिति विश्वः ॥ ३५ ॥

Digitized by Google

पृथुवर्त्तुलतन्नितम्बकृत्
मिहिरस्यन्दनशिल्पशिक्षया।
विधिरेककचक्रचारिणं
किमु निर्म्मित्सति मान्मथं रथं॥ ३६॥
तदमूरुयुगेण सुन्दरी
किमु रम्भां परिणाहिना परं।

पृथ्विति ॥ किमुत्प्रेक्षे विधिर्ब्रह्मा पृथुः स्थूलो वर्त्तुलो वृत्तो यस्तस्या दमयन्त्या नितम्बः कट्याः पश्चाद्भागस्तं करोतीति तादृशः सन् मिहिरस्यन्दनस्य सूर्य्यरथस्य यत् शिल्पं निर्म्माणं तस्य शिक्षया अभ्यासेन एककेनासहायेन चक्रेण चरतीत्येवंशीलं मान्मथं कन्दर्पसम्बन्धिनं रथं निर्म्मित्सति निर्म्मातुमिच्छति विधिर्हि पूर्व्वं एककचक्रचारिणं सूर्य्यरथं कृतवान् तच्छिक्षया सम्प्रति किं दमयन्तीनितम्बरूपं तथाविधं कामरथं कर्त्तुमिच्छतीति तस्या नितम्बः कामरथत्वेनोत्प्रेक्षितः एतेन भैम्यानितम्बोदर्शनमात्रेण काममाविर्भावयतीति सूचितं। मिहिरादित्यपूषण इत्यमरः पश्चान्नितम्बः स्त्रीकट्या इति च ॥ ३६॥

तदमिति॥ उ भो राजन् सुन्दरी दमयन्ती परिणाहिना विशालेन ऊरुयुगेण ऊरुद्वयेन परं केवलं तरुं वृक्षरूपां रम्भां कदलीमेव किं जिष्णुर्जेत्री अपि तु तरुणीमपि युवतीमपि तां रम्भां रम्भानाम्नीमप्सरसं जिष्णुः किम्भूतां धनदापत्यस्य कुवेरपुत्रस्य नलकूवरस्य तपसः फलं तनौ यस्यास्तादृशीं तदुपभोग्यत्वात् कदलीसाम्यापेक्षया तस्या ऊरू स्थूलौ कोमलौ च रम्भाप्सरोऽपेक्षया च सा सुन्दरीति पर्य्यवसितोऽर्थः अत्र जिष्णुरेवेत्येवकारस्य रम्भामित्यनेनान्वयः

Digitized by Google

तरुणीमपि जिष्णुरेव तां
धनदापत्यतपःफलस्तनीं ॥ २७ ॥
जलजे रविसेवयेव ये
पदमेतत्पदनामवापतुः ।
ध्रुवमेत्य रुतः सहंसकी
कुरुतस्ते विधिपत्नदम्पती ॥ २८ ॥

परिखाद्दो विशालतेत्यमरः । रम्भा स्यात्पुरोभेदे कदलीमोहिभेद योरिति वचः ॥ २७ ॥

जलजे इति ॥ ये जलजे पद्मे रविसेवयेव सूर्य्योपासनयेव एतत्पदतां दमयन्तीचरणस्वरूपं पदं उत्तमस्थानं आधिपत्यं वा अवापतुः प्रापतुः रुतः शब्दात् हंसरवतुल्यशिञ्जितात् ध्रुवमुत्प्रेक्षे शब्दादेवेत्यहमुत्प्रेक्षे इत्यर्थः ते जलजे कर्मभूते विधिपत्नदम्पती ब्रह्मवाहनहंसजायापती एत्य आगत्य सहंसकीकुरुतः हंससहिते कुरुतः अथ च पादकटकसहिते कुरुतः हंसदम्पती एव पादकटकरूपेण परिणताविव्यर्थः सूर्य्यसेवया पद्मयोर्दमयन्तीपदत्वलाभो विधिसेवया हंसयोश्च एतच्चरणवलयत्वलाभो युक्त एव अन्येऽपि कश्चिद्देवं आराध्य उत्तमपदं लभन्ते रुत इति उत्प्रेक्षाया हेतुः रुतः शब्दादित्यनुमीयते इत्यपरे रुशब्दे भावे क्विप् यद्वा यतो रुतः शब्दं कुरुतः अतो विधिपत्नदम्पती एव ते सहंसकीकुरुतः । ध्रुवं निश्चये । हंसकः पादकटक इत्यमरः ॥ २८ ॥

Digitized by Google

श्रितपुण्यसरःसरित्कथं
न समाधिक्षपिताखिलक्षपं।
जलजं गतिमेतु मञ्जुलां
दमयन्तीपदनाम्नि जन्मनि ॥ २९ ॥
सरसीः परिशीलितुं मया
गमिकर्म्मीकृतनैकनीवृता।

श्रितेति॥ जलजं पद्मं दमयन्त्याः पदमेव चरणमेव नाम यस्य तादृशे जन्मनि मञ्जुलां समीचीनां गतिं गमनं अथ च दशां कथं न एतु प्राप्नोतु उचितैव तत्प्राप्तिरिति काकुः किम्भूतं यतः श्रिता उपजीविता अथ च आश्रिताः पुण्याः श्रेयस्कारिण्यः अथ च पवित्राः सरःसरितः सरसीनद्योयेन तादृशं तथा समाधिना ध्यानेन अथ च निद्रया मुद्रणेनेत्यर्थः क्षपिता अतिवाहिता अखिलाः समस्ताः क्षपा रात्रयो येन तादृशं अन्योऽपि पुण्यसरसीं पम्पादिकां पुण्यनदीं गङ्गादिकां वा उपजीव्य समाधिना निखिलरजनीरतिवाह्य च उत्तमां गतिं प्राप्नोति अत्र सरःसरितोरुभयोरुपादानेन अखिलेति रात्रिविशेषणदानेन च पद्मं बहुषु जन्मसु बहुकालं तपस्यां कृत्वा भैमीपदनामजन्म प्राप्तं महताऽऽयासेनेति सूचितं। तस्याः पदम तीवमनोज्ञमिति पर्य्यवसितोऽर्थः। समाधिर्नियमे ध्याने निद्रायाञ्च समर्थने इति विश्वः गतिः स्त्रीमार्गदशयोर्ज्ञाने यात्राभ्युपाययोरिति मेदिनी ॥ २९ ॥

कथं भैमी एतादृशी त्वया ज्ञातेत्याह॥ सरसीरिति।सरसीः सरांसि दृहत्सरांसि वा परिशीलितुं अवगाहितुं गमिकर्म्मीकृता गता नैका

अतिथित्वमनायि सा दृशोः
सदसत्संशयगोचरोदरी ॥ ४० ॥
अवधृत्य दिवोऽपि यौवतै
र्न सहाधीतवतीमिमामहं ।

बहवो गीष्पतो जनपदा येन तादृशेन मया सा दमयन्ती दृशोश्चक्षुषो रतिथित्वं गोचरत्वं चक्षुरिन्द्रियजन्यज्ञानविषयत्वमित्यर्थः अनायि प्रापिता दृष्टेत्यर्थः किंभूता सा सदसतोः संशयो विद्यमानाविद्यमान कोटिकः सन्देहः उदरमस्ति नास्ति वेत्येवंरूपस्तस्य गोचरो विषयः उदरं यस्यास्तादृशी अतिकृशोदरीत्यर्थः एतेन न क्वापि तादृशी दृष्टेति भावः। गमिकर्म्मीकृतेति गमिर्गमनं अनुकूलतया उत्तर देशसंयोगावच्छिन्नो व्यापारस्तस्य कर्म्म तन्निष्ठधात्वर्थतावच्छेदक रूपफलाश्रयः अतादृक् तादृक् कृत इति अभूततद्भावे च्विः केचित्तु गमिर्गमधातुस्तस्य कर्म्मकारकविशेष इत्याऽऽहुस्तन्न वर्णविशेषात्मकस्य गमधातोः कारकसम्बन्धाभावात् न च परम्परया तत्सम्बन्धोऽस्तीति वाच्यं तदपेक्षया गमनार्थकत्वकरणस्यैव सम्यक्त्वात् इक्धात्वर्थने इतिसूत्रे भावेऽपीकेविधानात् ॥ सरसी सान्द्रत्वर इति तत्र काकारः सरसी सर इत्यमरः नीवृज्जनपद इति च ॥ ४० ॥

श्लोकद्वयेन तमेव दमयन्त्यायोग्यइति दर्शयति ॥ अवधृत्येति ॥ दिवोऽपि स्वर्गस्यापि यौवतैर्युवतिसमूहैर्न सहाधीतवतीं न सहाध्ययनकर्त्रीं असदृशीमित्यर्थः इमां दमयन्तीं अवधृत्य निश्चित्य तु पुनः विधातुः प्रजापतेराशये मनसि कतमः बहुषु मध्ये क उत्तमो मनोऽज्ञा दमयन्त्याः पतिः स्वामी वसति विद्यते इति अहमचिन्तयं चिन्तितवान् स्वर्गसुन्दरीभ्योऽप्यधिकसुन्दर्य्यां दमयन्त्या योग्यः पतिः

Digitized by Google

कतमस्तु विधातुराशये
पतिरस्या वसतीत्यचिन्तयं ॥ ४१ ॥
अनुरूपमिमं निरूपय
न्नथ सर्व्वेष्वपि पूर्व्वपक्षतां ।
युवसु व्यपनेतुमक्षम
स्त्वयि सिद्धान्तधियं न्यवेशयं ॥ ४२ ॥
अनया तव रूपसीमया
कृतसंस्कारविबोधनस्य मे ।

कतमो विधिना निर्म्मित इति चिन्तितवानित्यर्थः । अत्र सन्देहाध्यवसानं सादृश्यसूचकं ॥ ४१ ॥

अनुरूपेति ॥ अनुरूपं रूपसदृशं योग्यमित्यर्थः इमं भैम्याः पतिं नीरूपयन् अयमस्या योग्यो वरोऽयमिति विचारयन्नहं अथ पश्चात् सर्व्वेष्वपि युवसु तरुणेषु पूर्व्वपक्षतां अयोग्यत्वरूपां व्यपनेतुं प्रत्याख्यातुं अक्षमोऽसमर्थः सन् त्वयि सिद्धान्तधियं भैमीयोग्यत्वबुद्धिं न्यवेशयं निवेशितवान् त्वमेव तस्या योग्य इति निश्चितवानित्यर्थः भैमीरूपदर्शनेन तदन्यत्वव्यापकमयोग्यत्वमिति पूर्व्वपक्षे नैवदाक्ष्यं नलनामनि तरुणे तत्सम्भवादिति सिद्धान्तः ॥ ४२ ॥

उभयोः साम्यप्रदर्शनया राज्ञोऽनुरागं वर्द्धयति ॥ अनयेति । घुणिमिता घुणच्छाया सा दमयन्ती चिरं बहुकालं अवलोकितापि दृष्टापि अनया दृश्यमानया तव रूपसीमया सौन्दर्य्यमर्य्यादया कृतं संस्कारस्य पूर्व्वानुभवजनितभावनाख्यसंस्कारविशेषस्य विबोधनं उद्बोधो यस्य तथाविधस्य मे मम अद्य अधुना स्मृतिं आरूढवती

Digitized by Google

चिरमप्यवलोकिताद्य सा
स्मृतिमारूढवती शुचिस्मिता ॥ ४३ ॥
त्वयि वीर विराजते परं
दमयन्तीकिलकिञ्चितं किल ।
तरुणीस्तन एव दीप्यते
मणिहारावलिरामणीयकं ॥ ४४ ॥
तव रूपमिदं तया विना
विफलं पुष्पमिवावकेशिनः ।

गतवती स्मरणविषयो बभूवेत्यर्थः सदृशवस्तुदर्शनेन हि संस्कारोद्बोधात् सदृशवस्त्वन्तरस्मृतिर्भवति ॥ ४३ ॥

एवमुभयोः साम्यं प्रतिपाद्य भैमी तवैव योग्येत्याह ॥ त्वयीति ॥ किल संभावनायां हेवीर हेशूर दमयन्त्याः किलकिञ्चितं कामचेष्टाविशेषः परं केवलं त्वयि विराजते विशेषेण शोभते वीरप्रियाः खलु स्त्रिय इति सूचनार्थं वीरेति सम्बोधनं दृष्टान्तेनेदं द्रढयति मणिहारावल्या रत्नमालायष्ट्याः रामणीयकं सौन्दर्य्यं तरुणीस्तन एव युवत्या एव कुचे दीप्यते शोभते न तु वृद्धस्त्रियः योग्यं योग्येन युज्यते न त्वयोग्येनेति भावः । स्मितशुष्करुदितहसितत्रासक्रोधश्रमादीनां साङ्कर्य्यं किलकिञ्चितमभीष्टतमसङ्गमादिजाद्धर्षादिति साहित्यदर्पणः ॥ ४४ ॥

अत्यन्तमुत्कण्ठयति ॥ तवेति ॥ इदं दृश्यमानं तव रूपं सौन्दर्य्यं तया दमयन्त्या विना विफलं निरर्थकं अवकेशिनो वन्ध्यवृक्षस्य पुष्पमिव तदपि फलशून्यं भवति तया विना न केवलं रूपं विफलं किन्तु अद्य

इयमृद्धधना वृथावनी
भुवनी सम्प्रवदत्पिकापि का ॥ ४५ ॥
अनयामरकाम्यमानया
सह योगः सुलभस्तु न त्वया ।
घनसंवृतयाम्बुदागमे
कुमुदेनेव निशाकरत्विषा ॥ ४६ ॥
तदहं विदधे तथा तथा
दमयन्त्याः सविधे तव स्तवं ।

धना प्रचुरधनापि इयमवनी पृथिवी वृथा व्यर्थैव तथा संप्रवदत्पि कापि कूजत्कोकिलापि भुवनी क्रीडावनी का न कापि अकिंचित्क रीत्यर्थः तया विनेत्यस्य सर्व्वत्रैवानुषङ्गः । बन्ध्योऽफलोऽवकेशी चेत्य मरः ॥ ४५ ॥

यद्यहं तथा योग्यो वरस्तर्हि सुलभा सा कथमित्याह ॥ अनयेति ॥ तु पुनः अमरकाम्यमानया देवैरपि प्रार्थ्यमानया अनया दमयन्त्या सह योगः सम्बन्धः त्वया न सुलभः देवैरपि प्रार्थ्यमानत्वात् सा त्वया दुर्लभैवेत्यर्थः उपमिमीते अम्बुदागमे प्रावृट्काले घनसंवृतया मेघैराच्छादितया निशाकरत्विषा ज्योत्स्नया सह योगः कुमुदेनेव कैरवेणेव यथा कुमुदेन ज्योत्स्नया सह योगो दुःखेन लभ्यते तथे त्यर्थः यथा कदाचित् कुमुदेनापि दैवात् चन्द्रिका प्राप्यते तथा मम साहाय्यात् त्वयापि सा प्राप्स्यत इति भावः ॥ ४६ ॥

पूर्व्वश्लोकेन व्यञ्जितमेवार्थं व्यक्तीकुर्व्वन् निजप्रयोजकतां दर्शयति ॥ तदिति ॥ तत्तस्मात् अहं तथा तथा तेन तेन प्रकारेण दमयन्त्याः सविधे समीपे तव स्तवं प्रशंसां विदधे करिष्यामि यथा येन प्रका

Digitized by Google

हृदये निहितस्तया भवा
नपि नेन्द्रेण यथापनीयते॥४७॥
तव सम्मतिमत्र केवला
मधिगन्तुं धिगिदं निवेदितं।
ब्रुवते हि फलेन साधवो
न तु कण्ठेन निजोपयोगितां॥४८॥
तदिदं विशदं वचोऽमृतं
परिपीयाभ्युदितं द्विजाधिपात्।

देव तया दमयन्त्या हृदये चित्ते निहितो धृतोमनसा पतित्वेनाभिमत इत्यर्थः भवान् इन्द्रेणापि किं पुनर्म्मनुष्येण न अपनीयते न दूरीकर्तुं शक्यते विरहे अपनीयते इति वर्त्तमानसामीप्ये लट्॥४७॥

निजोद्धत्यं परिहरन्नाह॥ तवेति॥ अत्र दमयन्तीपरिणये केवलां तव सम्मतिं अनुमतिं अधिगन्तुं ज्ञातुं अत्र तव सम्मतिरस्ति नवेति निश्चेतुमित्यर्थः इदं निवेदितं मम निवेदनं धिक् निन्दनीयमेवास्तु हि यतः साधवो महात्मनो निजोपयोगितां स्वोपकारित्वं फलेन फलनिष्पत्त्या ब्रुवते वदन्ति न तु कण्ठेन कण्ठरवेण ब्रुवते कण्ठरवेण न ज्ञापयन्तीत्यर्थः। कण्ठो गले गलध्वाने इति बलः॥४८॥

हंसवचनं श्रुत्वा राज्ञोयदभूदित्याह॥ तदिति॥ स राजा द्विजाधिपात् हंसात् अथ च द्विजराजात् चन्द्रात् अभ्युदितं उत्पन्नं विशदं व्यक्तं स्फुटार्थमित्यर्थः अथ च शुभ्रं तदिदं वचोवचनं अत्याह्लादकत्वाद मृतमिवेति तत्परिपीय श्रुत्वा अथ च पीत्वा अतितृप्ततया अविरहकतया अथ च भोजनाधिक्येन तस्य परिपीतस्य वचोऽमृतस्य उद्गारमिव वमनमिव स्मितं शुभ्रं स्मितं ईषद्धसनं विनिर्म्ममे चकार अन्योऽपि

Digitized by Google

अतिहृष्टतया विनिर्ममे
स तदुद्गारमिव स्मितं सितं ॥ ४९ ॥
परिमृज्य भुजाग्रजन्मना
पतगं कोकनदेन नैषधः।
मृदु तस्य मुदेऽगिरद्गिरः
प्रियवादामृतकूपकण्ठजाः ॥ ५० ॥
न तुलाविषये तवाकृति
र्न वचोवर्त्मनि ते सुशीलता।

कश्चिदेवचन्द्रादुत्पन्नं अमृतं पीत्वा भोजनाधिक्यात् मुखमुद्गारं करोति। स्मितस्य मुखस्य यशसि धवलता वर्ण्यते हासकीर्त्यादिरिति कविसमयोक्तेः अमृतस्य तु स्वभावादेव। विशदः पाण्डुरे वर्णे इति हेमचन्द्रः ॥ ४९ ॥

आश्वासपूर्वकं राजवचनारम्भं वर्णयति ॥ परिमृज्येति ॥ नैषधो नलः कोकनदेन रक्तोत्पलसदृशेन भुजाग्रजन्मना करेण पतगं पक्षिणं हंसं परिमृज्य तस्य हंसस्य मुदे हर्षाय मृदु कोमलं यथा तथा गिरो वचनानि अगिरत् उच्चारितवान् किम्भूताः गिरः प्रियवादो मिष्टवचनमेवामृतं जलं तस्य कूपस्कूपोयः कण्ठस्तस्मादायता इति वाहुल्याः मनोहरं सरसच वचनमुवाचेति भावः। रक्तोत्पलं कोकनदमित्यमरः ॥ ५० ॥

गिरएवाह ॥ नतुलेति ॥ हे हंस तव आकृतिराकारोऽवयव इत्यर्थः तुलाविषये तुलाया औपम्यप्रकारस्यज्ञानस्य विषयो गोचर उपमेय इत्यर्थः तस्मिन् तन्मध्ये न गण्यत इति शेषः असाधारणधर्मवत्त्वात्

Digitized by Google

त्वदुदाहरणाकृतौ गुणा
इति सामुद्रकसारमुद्रणा ॥ ५१ ॥
न सुवर्णमयी तनुः परं
ननु किं वागपि तावकी तथा ।
न परं पथि पक्षपातिताऽ
नवलम्बे किमु मादृशेऽपि सा ॥ ५२ ॥

नान्यः सदृशोऽस्तीत्यर्थः अन्यत्तु नायिकावदनादिकं वस्तु चन्द्राद्युपममिति तुलाविषयएव तुल्यतेऽसाविति तुला उपमेयं तद्भावे विषये च उपमानाभावात् किन्तूपमानमेवेति भावः । तथा ते तव सुशीलता साधुस्वभावो वचोवर्त्मनि न वचनगोचरो न वर्णयितुं न शक्यत इत्यर्थः अत एव आकृतौ गुणा इति यत्राकृतिस्तत्र गुणा वसन्तीति सामुद्रकस्य अङ्गाङ्गलक्षणशास्त्रस्य सारो रहस्यं तस्य मुद्रणा नियमना त्वदुदाहरणा त्वमेव उदाहरणं दृष्टान्तो यस्याः सा अन्यथा सा निर्विषया स्यादिति भावः आकृतौ गुणा इति यस्य यादृशी आकृतिस्तस्य तादृशा गुणास्तिष्ठन्तीत्यर्थः । तुलाविषयइति एवं करणे सप्तमी एवमक्षरधर्मंस्तु मनोज्ञत्वादिकमूह्यं ॥ ५१ ॥

पुनः स्तुवन्नाह ॥ न सुवर्णमयीति ॥ ननु सम्बोधने ननु हे हंस परं केवलं तावकी तवेयं तनुः शरीरं न सुवर्णमयी न हेममयी किं किन्तु तावकी वागपि वाण्यपि तथा सुवर्णमयी शोभना वर्णा अक्षराणि यस्यां तत्स्वरूपा शरीरसौन्दर्यं वाक्पटुत्वञ्च उभयमेव तवास्तीत्यर्थः । तथा तव पक्षपातिता पक्षाभ्यां छदाभ्यां पततिउड्डयत इत्येवंशीलता परं केवल अनवलम्बे आलम्बनशून्ये पथि आकाश

भृशतापभृता मया भवा
न्मरुदासादि तुषारसारवान्।
धनिनामितरः सतां पुन
र्गुणवत्सन्निधिरेव सन्निधिः॥ ५३॥

ग्रतस्रः श्रुतिमागतैव सा
त्रिजगन्मोहमहौषधिर्मम।
अधुना तव शंसितेन तु
स्वदृशैवाधिगतामवैमि तां॥ ५४॥

मार्गे न किमु किन्तु सा पञ्चयातिता अनुकूलवर्त्तिलं भगवद्धन्वे निरा श्रये अनन्यगतिक इत्यर्थः मादृशेऽपि अस्त्वोतिशेषः दमयन्तीलाभे निरालम्बनस्य मम त्वमेवालम्बनमितिभावः॥ ५२॥

भृशेति॥ हे हंस भृशतापं अतिशयितविरहज्वरं बिभर्त्ति धार यतीति तादृशेन मया भवान् तुषारस्य हिमस्य सारः श्रेष्ठभागो यत्र तादृशोऽतिशीतल इत्यर्थः मरुदिव वायुरिव आसादि प्राप्तः यथा ज्वरवतो जनस्य शीतलेन वायुना तापनाशस्तथा विरहज्वरवतो मम भवत्सङ्गमेनेत्यर्थः इदमेवार्थान्तरेण समर्थयति धनिनां धनवतां कुवेरादीनां इतरः पद्मशङ्खादिरूपः सन्निधिः सम्यङ्निधिः सतां साधूनां पुनर्गुणवतां सन्निधिरेव समागम एव सन्निधिः सम्यक् निधिः नत्वितरः यथा धनिनां निधिना हर्षो जायते तथा साधूनां गुणवत्समागमेनेत्यर्थः सन्निति पृथक्पदम्वा। तापस्तु विरहज्वर इति दर्पणः॥ ५३॥

अतिमित्रतया विश्वासं व्यञ्जयन्नाह॥ ग्रतस्र इति॥ त्रिजगतां त्रिभुवनानां मोहे मूर्च्छायां वशीकरण इत्यर्थः महौषधिः सञ्जो

अखिलं विदुषामनाविलं
सुहृदा च सहृदा च पश्यतां।
सविधेऽपि न सूक्ष्मसाक्षिणी
वदनालङ्कृतिमात्रमक्षिणी ॥ ५५ ॥
अमितं मधु तत्कथा मम
श्रवणप्राघुणिकीकृता जनैः।

स्थिती विशेष्यर्थः सा दमयन्ती पूर्वमनेकवारं मम श्रुतिं श्रवण विषयतां आगतैव प्राप्तैव न तु साक्षात्कृता तु पुनः अधुना इदानीं तव शंसितेन कथनेन चक्षुषैव आत्मचक्षुषैव अधिगता दृष्टा तां दमयन्तीं अवैमि जानामि यद्यपि मया निजचक्षुषा सा न दृष्टा तथापि भवत्कर्तृकदर्शनेनैव मम दर्शनसिद्धिरित्यतिमित्रतया अतिशयोक्तिः। अधुनेत्यत्रामुनेति क्वचित् पाठः ॥ ५४ ॥

स्वनयनदर्शनादपि मित्रवचनस्याधिक्यमाह ॥ अखिलमिति ॥ सुहृदा च मित्रेण च सहृदा च समनसा च अखिलं समस्तं वस्तु अनाविलमसन्दिग्धं यथा तथा पश्यतां शब्दानुमानाभ्यां जानतां जनानां अक्षिणी चक्षुषी वदनालङ्कृतिमात्रं मुखालङ्कार एव न त्वन्यत्र तयोः प्रयोजनं यतः सविधेऽपि समीपेऽपि किं पुनर्दूरे न सूक्ष्मसाक्षिणी च परमाण्वादिसूक्ष्मवस्तुयाथार्थिके परमाण्वादिकं हि चक्षुषा न दृश्यते किन्तु मित्रेण मनसा वा शब्दानुमानादिना ज्ञायते एतेन स्वचक्षुषा दर्शनापेक्षया मित्रस्य तव वचनं ममात्यन्तं विश्वासजनकमिति सूचितं। अत्र चकारावुभयप्राधान्यार्थकौ ॥ ५५ ॥

तस्याः श्रवणेन स्वस्य पूर्वरागविप्रलम्भमपि किञ्चिदाह ॥ अमितमिति ॥ हे खग हे पक्षिन् हंस अमितं मधु अपरिमितमधुस्वरूपा

Digitized by Google

मदनानलबोधनेऽभवत्
खग धाय्या धिगधैर्य्यधारिणः ॥ ५६ ॥
विषमो मलयाहिमण्डली
विषफूत्कारमयोमयोहितः ।
बत कालकलत्वदिग्भवः
पवनस्तद्विरहानलैधसा ॥ ५७ ॥

तत्कथा तस्या दमयन्त्याः कथा जनैर्वन्द्यादिभिर्मम अवशप्राघुणिकी श्रुता श्रुतेरतिथीभूता सती आविता सतीत्यर्थः मदनानलबोधने अत्रापि ममेत्यस्यानुषङ्गः मम कामाग्निसन्दीपने धाय्यावह्निसमिन्धनमन्त्रोऽभवत् कामतापजनिका भूतवतीत्यर्थः मम धिग्भूतस्य धिगधैर्य्यधारिणः निन्दिताधैर्य्यवतः अधैर्य्यधारिणोऽस्मात् धिगिति वा अन्योऽपि अपरिमितं मधु पीत्वा पश्चात् संतप्तो भवति । अतिथिः स्यात् प्राघुणिक इति वचः ऋक्सामधेनी धाय्या च या स्यादग्निसमिन्धन इत्यमरः ॥ ५६ ॥

विषम इति ॥ बत खेदे तस्या दमयन्त्या विरह एव अनलोऽतिमात्रदाहकत्वाद्वह्निस्तस्य एधसा दाहकत्वात् काष्ठभूतेन मया कालस्य यमस्य कलत्रं अधीशत्वात् भार्य्या या दिक् दक्षिणा दिक् तद्भवस्तदुत्पन्नः पवनो वायुः मलये मलयाचले वर्त्तमाना या अहिमण्डली सर्पसमूहस्तस्या विषफूत्कारमयो विषवद्दाहकत्वात् विषयुक्तफूत्कारस्वरूपः ऊहितस्तर्कितः विषफूत्कारमयत्वेन संभावित इत्यर्थः ईदृक्तर्कहेतुगर्भविशेषणमाह यतो विषमः दुःसहः विषेण सा उपमा यस्य स विषोपम इत्यर्थ इति वा यथा फूत्कारसंधुक्षितेव वह्निना काष्ठमति

प्रतिमासमसौ निशापतिः
खग सङ्गच्छति यद्दिनाधिपं ।
किमु तीव्रतरैस्ततः करै
र्मम दाहाय स धैर्य्यतस्करैः ॥ ५८ ॥
कुसुमानि यदि स्मरेषवो
न तु वज्रं विषवल्लिजानि तत् ।
हृदयं यदमूमुहन्नमू
र्मम यच्चातितमामतीतपन् ॥ ५९ ॥

मानं दह्यते तथा अहमपि सर्पाणां विषफूत्कारमयपवनसंधुक्षितवि रहाग्निनाधिकं दह्ये इति भावः कालकलेत्यनेन सन्ध्या मरणसम्भ्रा पि सूचिता ॥ ५७ ॥

प्रतिमासमिति ॥ हे खग असौ निशापतिश्चन्द्रः प्रतिमासं मासि मासि दिनाधिपं सूर्य्यं यत्सङ्गच्छति प्राप्नोति संसर्ग पातन्यायेनो पर्य्यधोभावेन एकराशौ मिलतीत्यर्थः ततः सूर्य्यसङ्गमाद्धेतोः सचन्द्रः तीव्रतरैरतितीक्ष्णैर्धैर्य्यतस्करैर्धैर्य्यचोरैर्धैर्य्यविलोपकैरित्यर्थः करैः किरणैर्मम दाहाय किमु जाता इति शेषः अयं भावः चन्द्रो हिम किरणो न दाहकः तथापि मां यद्दहति तन्न स्वैः किरणैः किन्तु सूर्य्य सङ्गमात् तदीयकरैरेवेति ॥ ५८ ॥

कुसुमेति ॥ स्मरेषवः कामबाणा यदि कुसुमानि पुष्पाणि न तु वज्रं तत्तर्हि तानि विषवल्लिजानि विषलताजातानि कामबा णानां लोकप्रसिद्धा पुष्पत्वमेवास्तु माभूद्वज्रत्वं किन्तु विषलतोत्पन्न त्वमपि तेषां मन्तव्यं कुत एवं वदसीत्याह यद्यस्मात् अमूः स्मरे षवो मम हृदयं अमूमुहन् मोहयामासुः यच्च यस्माच्च अति

तदिह्ानवधौ निमज्जता
मम कन्दर्पशराधिनीरधौ।
भव पोत इवावलम्बन
विधिनाकस्मिकसृष्टसन्निधिः ॥ ६० ॥
अथ वा भवतः प्रवर्त्तना
न कथं पिष्टमियं पिनष्टि नः।

तमां अतिशयेन अतीतपन् तापयामासुः अयम्भावः कुसुमानां न मोहजनकत्वं न वा तापकत्वं वरं तापादिनिवारकत्वमस्ति तथापि यन्मोहयन्ति तापयन्ति च तत्र विषवह्निजलमेव कारणमन्यथाऽसम्भवादिति। पञ्चो रोप इषुर्द्वयोरित्यमरः। अमूमुहन्निति अतीतपन्निति च णिजन्ताभ्यां मुहतपाभ्यां लुङोऽन् अकर्म्मकत्वात् याभिर्ण्यादिना हृदयमिति प्रयोज्यस्य कर्म्मत्वं ॥ ५९ ॥

पूर्व्वोक्तैर्दमयन्त्यां स्वस्याप्यनुरागितां प्रकाश्य सम्प्रति तदर्थं प्रेरयति ॥ तदिति ॥ तत्तस्मात् अनवधौ सीमारहिते इह कन्दर्पशराधिनीरधौ कन्दर्पस्य कामस्य शरैर्वाणैर्य्य आधिर्मानसव्यथा तद्रूपे नीरधौ समुद्रे निमज्जतो निमग्नीभवतो मम त्वं पोत इव वहित्रमिव आलम्बनं आश्रयो भव त्वं किम्भूतः विधिना विधात्रा दैवेन वा आकस्मिकोऽकस्मात् सृष्टो विहितः सन्निधिः सान्निध्यं यस्य तादृशः अन्यस्यापि अनवधौ समुद्रे निमज्जतो जनस्याकस्मादृष्टिवशादुपस्थितपोतआश्रयो भवति। पुंस्याधिर्मानसी व्यथेत्यमरः पोतः शिशौ वहित्रे च गृहस्थाने च वाससीति मेदिनी ॥ ६० ॥

स्ववचनस्य निष्फलतां प्रतिपादयन्नत्यन्तं प्रेरयति ॥ अथवेति ॥ अथवेति पूर्व्वानादरे इयं भवतः प्रवर्त्तना भवत्कर्म्मकप्रेरणा कथं

स्वत एव सतां परार्थता
ग्रहणानां हि यथा यथार्थता ॥ ६१ ॥
तव वर्त्मनि वर्त्ततां शिवं
पुनरस्तु त्वरितं समागमः ।
अपि साधय साधयेप्सितं
स्मरणीयाः समये वयं वयः ॥ ६२ ॥

पिष्टं न पिनष्टि अपितु पिनष्ट्येव यथा पिष्टस्य पेषणं विफलं तथेयं प्रवर्त्तना विफलेत्यर्थः कुत इत्याह हि यस्मात् सतां साधूनां परार्थता परोपकारित्वं स्वत एव स्वभावत एव भवतीति शेषः न तु प्रेरणामपेक्षते यथा ग्रहणानां ज्ञानानां स्वतः परार्थता प्रामाण्यं ज्ञानानां स्वतः प्रामाण्यं न तु परत इति मीमांसकाः यद्वा गृह्यन्ते ज्ञाय न्ते अर्था एभिरिति ग्रहणानीन्द्रियाणि तेषां यथार्थता अर्थानतिक्रम्य वर्त्तिता स्वस्वार्थग्राहकतेत्यर्थः यथा चक्षुरादीन्द्रियाणि सन्निकृष्टं रूपाद्यर्थमन्यमनपेक्ष्यैव प्रत्याययन्ति तथा साधवः परस्य प्रेरणामन पेक्ष्यैव उपकुर्व्वन्तीतिभावः । उक्तञ्च नीतिशतके एते सत्पुरुषाः परार्थे घटकाः स्वार्थं परित्यज्य ये इति ॥ ६१ ॥

आशीर्व्वादादिना हंसं सन्तोषयन् प्रस्थापयति ॥ तवेति ॥ वर्त्मनि पथि तव शिवं कल्याणं वर्त्ततां जायतां पुनः स्वकार्य्यस्य तव समा गमः मया सह संमेलनं त्वरितं शीघ्रं अस्तु भवतु अपि किञ्च ईप्सितं दमयन्तीलाभरूपं ममाभीष्टं साधय साधय निष्पादय निष्पादय हे वयः हे पक्षिन् हंस वयं समये प्रतिबन्धकोपस्थितिकाले स्मर णीयाः स्मर्त्तव्याः अनुग्राह्या इत्यर्थः प्रतिबन्धकोपस्थितिचेन्ममाजी वप्रध्वंसयापि कार्य्यं साधनीयमिति भावः । साधय साधयेति त्वरायां

इति तं स विसृज्य धैर्य्यवा
नृपतिः सूनृतवाग्बृहस्पतिः।
अविशद्वनवेश्म विस्मितः
श्रुतिलग्नैः कलहंसशंसितैः॥ ६२॥
अथ भीमसुतावलोकनैः
सफलं कर्त्तुमहस्तदेव सः।

यावद्बोधमित्यनेन विरहितः केचित्तु साधय गच्छ साधय निष्पा
द्येति वदन्ति तन्न समीचीनं नाटकादावेव शिष्टस्य साधेर्गमना
र्थकतया प्रयोगात् तथाच नाट्योक्तिमधिकृत्य प्रायेण एवमादयः साधि
र्गमेः स्थाने प्रयुज्यन्त इति साहित्यदर्पणः॥ ६१॥

हंसे प्रस्थापिते राज्ञोव्यापारमाह॥ इतीति॥ सूनृतवाचि प्रिय
सत्यवचने बृहस्पतिरिवेति तादृशः स नृपतिर्नलः इति पूर्व्वोक्त
प्रकारेण तं हंसं विसृज्य प्रस्थाप्य धैर्य्यवान् सन् आकस्मिकतादृश
वृत्तान्तेन दमयन्तीलाभे सुलभत्वनिश्चयतार्द्धैर्य्ययुक्तः सन् वनवेश्म उद्या
नमध्यस्थक्रीडागृहं अविशत् प्रविष्टवान् किम्भूतः श्रुतिलग्नैः श्रवण
विषयैः श्रुतैरित्यर्थः कलहंसशंसितैः राजहंसभाषितैः कलैर्मधु
रास्फुटैर्हंसशंसितैर्व्वा विस्मितः हंसोऽप्येवं वदतीति प्राप्तविस्मयः
स्मृतिलग्नैरिति पाठे स्मृतिविषयैरित्यर्थः। सूनृतं प्रिये सत्ये इत्यमरः
ध्वनौ तु मधुरास्फुटे कल इति च कलहंसस्तु कादम्बे राजहंसे
नृपोत्तमे इतिमेदिनी॥ ६२॥

हंसप्रस्थानमाह॥ अथेति॥ अथानन्तरं सोऽण्डजो हंसः भीम
सुतावलोकनैर्दमयन्तीदर्शनैस्तदेवाहर्दिनं सफलं सार्थकं कर्तुं क्षिति
मण्डलस्य मण्डनायितं रमणीयत्वात् दमयन्त्यधिष्ठितत्वाद्वा अल

Digitized by Google

क्षितिमण्डलमण्डनायितं
नगरं कुण्डिनमण्डजो ययौ ॥ ६४ ॥
प्रथमं पथि लोचनातिथिं
पथिकप्रार्थितसिद्धिशंसिनं ।
कलसं जलसंभृतं पुरः
कलहंसः कलयाम्बभूव सः ॥ ६५ ॥
अवलम्ब्य दिदृक्षयाम्बरे
क्षणमाश्चर्य्यरसालसं गतं ।

ङ्कारभूतं कुण्डिनं नाम नगरं भीमपुरं ययौ प्रस्थितवान् सद्य इत्यनेन नलनियोगानन्तरमेव गतो न तु विलम्बः कृत इति सूचितं तेन च अतिपरोपकारकत्वमस्येति ध्वनितं मण्डनायितमिति मण्डन मिवाचरतीति कर्त्तुराय इत्यादिना क्यङ् ततः कर्त्तरि क्तः ॥ ६४ ॥

अथ हंसस्य यात्रायां मङ्गलसूचकवस्तुदर्शनं श्लोकद्वयेनाह ॥ प्रथ ममिति ॥ कलहंसो राजहंसः पथि मार्गे लोचनातिथिं नयनयो रागन्तुकं पथिकानां प्रार्थिता प्रार्थनीया या सिद्धिः कार्य्यनिष्पत्ति स्तां शंसितुं सूचयितुं शीलमस्य तादृशं जलसंभृतं जलपूर्णं कलसं पुरोऽग्रे प्रथमं कलयाम्बभूव ददर्श अत्रातिथिशब्देनाकस्मात् तादृशकलसोपस्थितिः सूचिता बुद्धिपूर्व्वस्थापितो हि न तथा फलदः यथा आकस्मिकः। कलसं लोचनातिथिं लोचनविषयं कलयाम्बभूव छलवानिति वा ॥ ६५ ॥

अवलम्ब्येति ॥ स हंसः दिदृक्षया मार्गावलोकनेच्छया दमयन्ती दर्शनेच्छया वा अम्बरे आकाशे आश्चर्य्यरसेन उद्यानदर्शनजनिताद्भु

Digitized by Google

स विलासवनेऽवनीभृतः
फलमैक्षिष्ट रसालसंगतं ॥ ६६ ॥
नभसः कलभैरुपासितं
जलदैर्भूरितरक्षुपन्नगं ।
स ददर्श पतङ्गपुङ्गवो
विटपच्छन्नतरक्षुपन्नगं ॥ ६७ ॥
स ययौ धुतपक्षतिः क्षणं
क्षणमूर्द्धायनदुर्व्विभावनः ।

तरसेन अलसं मन्दं गतं गमनं क्षणमल्पकालं अवलम्ब्य आश्रित्य अवनीभृतो राज्ञो विलासवने क्रीडाकानने रसाले आम्रद्रुमे सङ्गतं सम्बद्धं फलं ऐक्षिष्ट दृष्टवान् यात्राकाले फलमात्रस्य दर्शनं कार्य्य सिद्धिसूचकं विशेषवस्तु आमस्येति भावः । आम्रचूतो रसालोऽसा वित्यमरः ॥ ६६ ॥

नभस इति ॥ स पतङ्गपुङ्गवः पक्षिश्रेष्ठो हंसः नगं पर्व्वतं ददर्श दृष्टवान् किम्भूतं नगं नभसआकाशस्य कलभैः करिशावकरूपै र्जलदैर्मेघैरुपासितं आश्रितं तथा भूरितराः प्रचुरतराः क्षुपा ह्रस्व शाखाशिफा यस्मिन् तादृशं तथा विटपैः शाखाभिश्छन्नास्तिरोहिता स्तरक्षवो व्याघ्रविशेषाः पन्नगाः सर्पाश्च यत्र तादृशं । यात्रायां पर्व्वतस्य दर्शनमपि मङ्गलसूचकं करिशावकस्यापि तथैव मेघानां चरूप तमुक्तं तरक्षुपन्नगयोर्दर्शनन्तु अशुभसूचकमिति तयोर्विटपच्छन्न त्वमुक्तं । कलभः करिशावक इति ह्रस्वशाखाशिफः क्षुप इति तर क्षुस्तु मृगादन इति चामरः ॥ ६७ ॥

अथ पञ्चभिः श्लोकैर्विशिष्य हंसस्य गमनमेव वर्णयति ॥ स इति ॥

वितताब्जतनिस्फलच्छदः
क्षणमालोकदत्तकौतुकः ॥ ६८ ॥
तनुदीधितिधारया रया
द्गतया लोकविलोकनामसौ ।
हृदहेम कषन्निवालसत्
कषपाषाणनिभे नभस्तले ॥ ६९ ॥
विनमद्भिरधःस्थितैः खगै
र्झटिति श्येननिपातशङ्किभिः ।

स हंस एवम्भूतः सन् ययौ गतवान् किम्भूतः क्षणं व्याप्य ध्रुवा कम्पिता पक्षतिः पक्षमूलं येन तादृशः तथा क्षणं ऊर्द्धायनेन उद्धूवनेन दुर्व्वि भावनः दुर्लक्ष्यः एवं क्षणं विततौ विस्तारितौ निश्चलौ निष्कम्पौ छदौ पक्षौ येन तादृशः अतएव आलोककेभ्यः पश्यद्भ्यो दत्तं कौतुकं कुतूहलं येन तादृशः । स्त्री पक्षतिः पक्षमूलमिति गरुत्पक्षच्छदाः पत्रमिति चामरः ॥ ६८ ॥

तन्विति ॥ असौ हंसः रयात् शीघ्रं लोकानां विलोकनं दर्शनं दर्शनविषयतामित्यर्थः गतया प्राप्तया तनुदीधितिधारया शरीर कान्तिपंक्त्या वेगात् सूक्ष्मभूतया कान्तिपंक्त्या वा कषपाषाणनिभे श्यामवर्णसमानतानिकषप्रस्तरसदृशे नभस्तले गगनमण्डले हृद हेम पक्षसुवर्णं कषन्निव उत्कृष्टमपकृष्टं वेति संशय्य परीक्षार्थं घर्षन्निव अलसत् रराज अन्योऽपि उत्कर्षापकर्षसंशये स्वर्णं निकष प्रस्तरे कषतीति तथोत्प्रेक्षितं ॥ ६९ ॥

विनमद्भिरिति ॥ श्येनस्य हिंस्रपक्षिविशेषस्य निपाते पतने शङ्किभिः शङ्कायुक्तैरत एव झटिति शीघ्रं विनमद्भिर्नम्रीभूतैरधः

स निरैक्षि दृशैकयोपरि
स्यदसांकारिपतत्रपद्धतिः ॥ ७० ॥
ददृशे न जनेन यन्नसौ
भुवि तच्छायमवेक्ष्य तत्क्षणात्
दिवि दिक्षु वितीर्णचक्षुषा
पृथुवेगद्रुतमुक्तदृक्पथः ॥ ७१ ॥

स्थितैः स्वापेक्षया अधोवर्त्तिभिः जनैः पक्षिभिः एकया दृशा सम्भव त्वात् अविनीतया चक्षुषा स हंस उपरि ऊर्द्धं निरैक्षि दृष्टः किम्भूतः स्यदेन वेगेन सांकारिणी सां इति ध्वनिकारिणी पतत्राणां पक्षाणां पद्धतिः पंक्तिर्यस्य सः। उत्पक्षिणां स्वभाववर्णनात् स्वभावोक्तिः। रंहस्तरसी तु रयः स्यद इत्यमरः पद्धतिः पथि पंक्तौ चेति हेमचन्द्रः ॥ ७० ॥

ददृश इति ॥ भुवि पृथिव्यां तच्छायं तस्य हंसस्य छायां अवेक्ष्य दृष्ट्वा तत्क्षणात् दिवि आकाशे दिक्षु च वितीर्णं दत्तं चक्षुर्येन तादृशेन सता जनेन यन् गच्छन् असौ हंसो न ददृशे न दृष्टः किम्भूतः यतः पृथुवेगेन अतिशयितवेगेन द्रुतं शीघ्रं मुक्तस्त्यक्तो दृक्पथो दृष्टिमार्गो येन तादृशः पृथिव्यां छायां दृष्ट्वा किमयं पक्षी उड्डयत इति दर्शनार्थं प्रसारितनयनेनापि अनेन अतिसत्वरगामित्वादसौ वंचित इत्यर्थः एतेन कार्य्यसाधने हंसस्य सत्वरत्वं सूचितं। दिक्षु इत्यनन्तरं चकारो बोध्यः वितीर्णचक्षुषेति क्वचित्पाठः विक्षिप्त चक्षुषेत्यर्थः। तच्छायमिति सेनासुराच्छालानिशाच्छाया वेति क्लीबत्वात् ह्रस्वः दृक्पथ इति ऋगादेरत्पूर्व्वत्रेत्यत्समासान्तः ॥ ७१ ॥

Digitized by Google

न वनं पथि शिश्रियेऽमुना
क्वचिदप्युच्चतरद्रुचारुतं ।
न स गोत्रजमन्ववादि वा
गतिवेगप्रसरद्रुचा रुतं ॥ ७२ ॥
अथ भीमभुजेन पालिता
नगरी मञ्जुरसौ धराजिता ।

नवनमिति ॥ गतिवेगेन गमनवेगेन प्रसरन्ती रुक् कान्तिर्यस्य तादृशेन अमुना हंसेन पथि मार्गे क्वचिदपि प्रदेशे उच्चतराणां अत्युच्चानां द्रूणां वृक्षाणां चारुता सौष्ठवं यत्र तथाविधं वनं न शिश्रिये आश्रितं न वा सगोत्रजं सजातीयपक्षिजनितं रुतं शब्दः अन्ववादि अनूदितं पक्षिणां हि गमनसमये पथिमध्यवर्त्तिनि उच्चरुतेऽवश्यम् सजातीयरवं श्रुत्वा तत्प्रतिरवकरणस्य स्वभावः अनेन तु विलम्बभिया तदुभयमपि न कृतं एतेन हंसस्य परोपकारकरणे गाढानुरागः सूचितः । सगोत्रेति समानो दृगादाविति समानस्य सः । सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनाः समा इत्यमरः ॥ ७२ ॥

अथ हंसस्य कुण्डिनपुरदर्शनमाह ॥ अथेति ॥ भीमौ शत्रूणां भयजनकौ भुजौ बाहू यस्य तादृशेन धराजिता पृथिवीजयिना राज्ञा भीमेन पालिता रक्षिता मञ्जुर्मनोज्ञा असौ नगरी कुण्डिनाख्यपुरी प्लवगस्य हंसस्य दृक्पथं दर्शनगोचरत्वं जगाम गता हंसेन दृष्टेत्यर्थः किम्भूता हरशैलस्य कैलासस्येव उपमा सादृश्यं येषां तैः सौधैः सुधाधवलै राजभवनैराजिता शोभिता कैलासोऽपि भीमस्य शिवस्य भुजेन पालितः अत्र द्वितीयचतुर्थपादान्तयोः सौधराजितेत्युभयोः

Digitized by Google

पतगस्य जगाम दृक्पथं
हरशैलोपमसौधराजिता ॥ ७३ ॥
दयितं प्रति यत्र सन्तता
रतिहासा इव रेजिरे भुवः ।
स्फटिकोपलविग्रहा गृहाः
शशभृद्भित्तनिरङ्कभित्तयः ॥ ७४ ॥
नृपनीलमणीगृहत्विषा
मुपधेर्यत्र भयेन भास्वतः ।

साम्यायमकेन असौधराजितापि सौधराजितेति विरोधाभासस्य सङ्करः । धराजितेति धरां जितवानिति क्विप् । सौधेति सुधया संसृ ष्टमिति टक् । भीमो वृकोदरे घोरे शङ्करे ऽम्लवेतसे इति सुधास्नु क्छिकागुडूच्योर्मूर्व्वालेपाम्रतेषु चेति च हेमचन्द्रः सौधोऽस्त्री राजस दनमित्यमरः ॥ ७३ ॥

अथ द्वात्रिंशत्श्लोकैर्नगरीमेव वर्णयति ॥ दयितमिति ॥ यत्र नगर्य्यां स्फटिकोपलः स्फटिकाख्यश्वेतमस्तरनिर्म्मितो विग्रहः शरीरं येषां तादृशाः अतएव शशभृतश्चन्द्रस्य भित्तं खण्डं तद्वत् निरङ्का निष्कलङ्का भित्तयः कुड्यानि येषां तथाविधा गृहाः दयितं भूपतिं भीमं प्रति भुवः पृथिव्याः सन्तता निरन्तरा रतिहासा इव सुरत कालीनहासा इव रेजिरे शुशुभिरे अन्यस्या अपि स्त्रिया नायकं प्रति सुरतकाले हासा भवन्ति चास्य शुभ्रत्वेन कविप्रसिद्धत्वादिय मुत्प्रेक्षा । गृहाः पुंसि च भूम्न्येवेति भित्तं शकलखण्डे वा पुंसीति भित्तिः स्त्री कुड्यमेडूकमिति चामरः ॥ ७४ ॥

नृपेति ॥ यत्र नगर्य्यां नृपस्य राज्ञो नीलमणीगृहत्विषां इन्द्रनील

Digitized by Google

शरणागतमुवास वासरेऽ
प्यसदावृत्त्युदयत्तमं तमः ॥ ७५ ॥
सितदीप्रमणिप्रकल्पिते
यदगारे हसदङ्करोदसि ।
निखिलान्निशि पूर्णिमा तिथी
नुपतस्थेऽतिथिरेकिका तिथिः ॥ ७६ ॥

मणिनिर्म्मितगृहकान्तीनां उपशमभयात् तमोऽन्धकारो भानवः सूर्य्या द्भयेन शरणागतं गृहप्रविष्टं सत् रक्षकप्राप्तं वा वासरेऽपि दिवसेऽपि उवास वसतिस्म किम्भूतं तमः असती अविद्यमाना आवृत्तिः पुनःपुनरावृत्तिर्यस्य तादृशं अतएव उदयत्तमं अतिशयेन उदयत् वर्द्धमानं अन्यच्च तमो दिवसे नश्यति रात्रौ उदयति अत्र तु नाशो दयाभावादतिगाढमित्यर्थः. असती आवृत्तिः प्रतिबन्धकं सूर्य्योदयादि यस्य अतएवोदयत्तममित्यपि भावः एतेन सूर्य्यादपि भीमस्य बल वत्त्वं सूचितं अत्रापकृष्टात्याधिता भयेनेवेति प्रतीयमानोत्प्रेक्षा। उदय त्तममिति उत्पूर्व्वस्य इणगतावित्यस्य भौवादिकस्य शतृ. तमोऽध्वान्ते तमः। शरणं गृहरक्षित्रोरित्यमरः ॥ ५ ॥

सितेति ॥ यदगारे यस्या नगर्य्यां अगारे गृहे निशि रात्रौ एकिका एकाकिनी पूर्णिमा तिथिः अतिथिर्याचको भूत्वा निखिलान् सर्व्वान् तिथीन् प्रतिपदादीन् उपतस्थे प्राप्ता आगन्तुकरूपेण सङ्गतेत्यर्थः पूर्णिमैव सर्व्वदा तत्रासीदिति भावः किम्भूते सिताः शुभ्रा दीप्ता दीप्तिमन्तो ये मणयः स्फाटिकाद्यैः प्रकल्पिते निर्म्मिते तथा हसन्ती प्रकाशमाना अङ्करोदसी समीपद्यावाभूमी यस्य तादृशे यद्वा हसदङ्को मध्यं ययोस्तादृशे रोदसी द्यावाभूमी यस्य तादृशे प्रतिरात्रि

Digitized by Google

सुदतीजनमज्जनार्पितै
र्घुसृणैर्घैच कषायितान्तरा।
न निशाखिलयापि वापिका
प्रससाद ग्रथितेव मानिनी॥ ७७॥
मणिनीरवया यया निशि
श्रितवप्रावलियोगपद्दया।

पूर्णिमा।सम्बन्धाभावेऽपि तत्कथनादतिशयोक्तिः भास्तिमानिति प्राक्
तिथिरप्यतिथिरिति विरोधाभासश्च। अगार इति जातावेकवचनं
एकैवेत्येकिका स्वार्थे कः। रोदश्च रोदसीति च दिवि भूमौ पृथक् च
स्यादिति मेदिनी॥ ७६॥

सुदतीति॥ यत्र नगर्य्यां वापिका क्रीडादीर्घिका सुदतीजनानां सुन्द
रीजनानां मज्जनेन अवगाहनेन अर्पितैर्घुसृणैः कुङ्कुमैः कषायिता
रक्तीकृत आशयोऽभ्यन्तरं यस्यास्तादृशी सती अखिलयापि सकल
यापि निशा रात्र्या न प्रससाद न स्वच्छजला बभूव एतेन नगर्य्यां बहु
सुन्दरीजनाधिष्ठितत्वं सूचितं। उपमिनोति ग्रथिता निर्ब्बन्धवती
मानिनीव मानवती नायिकेव सापि सुदती सपत्नीजनेनार्पितैः
गात्रकिङ्कनादिना प्रियवक्षसि दत्तैर्घुसृणैः कषायिताशया कलुष
चित्ता सती नायकेन कृतप्रयामाद्युपायापि अखिलया निशा न
प्रसीदति घुसृणैः कलुषा आशया निशारहिता इति वा। सूर्य्यरत्न
संघन्तु कुङ्कुमं जागुडं दीपनं वरं सौरभं घुसृणञ्च वदिति त्रिकाण्ड
शेषः। आशयः स्यादभिप्राये मलिनेऽभ्यन्तरे हृदीति वचः। ग्रहोऽनु
ग्रहनिर्ब्बन्धावित्ति विश्वः॥ ७७॥

मणीति॥ निशि रात्रौ शब्दप्रकाशं नीरवया निःशब्दया सत्या
यया नगर्य्या सन्निवेशसमयं मणिनिर्म्मितप्रकृत्यं निर्म्मलं उज्ज्वलं

Digitized by Google

मणिवप्रमयं स निर्म्मलं
किमपि ज्योतिरवाप्यमीक्ष्यते॥ ७८॥
विललास जलाशयोदरे
क्वचन द्यौरनुविम्बितेव या।
परिखाकपटस्फुटस्फुरत्
प्रतिविम्बानवलम्बिताम्बुनि॥ ७९॥

किमपि वस्तुमयत्वं अवाच्यं प्राकारमध्यस्थं ज्योतिस्तेजईक्ष्यते स्म दृश्यते स्म किम्भूतया श्रितो वप्रावलिरेव प्राकारपंक्तिरेव योगपट्टो यया तया अन्ययापि योगिन्या सर्व्वनिःस्पृहया यस्यो ब्रह्मसाक्षात्कारे।स्रवः नीरमानन्दाश्रु ते वापि प्रभातीति तादृश्या वा श्रितयोगपट्टया च तया निर्म्मलं अविद्यादोषरहितं किमप्यनिर्व्वचनीयं अवाच्यं आन्तरं ज्योतिः परमात्मानं रात्रौ ईक्ष्यते। या निशा सर्व्वभूतानां तत्र जागर्त्ति संयमीति भगवद्गीतोक्तेः। इज्यतइति पाठे इज्यते प्राप्यते प्राप्त्यर्थकोऽत्र यजधातुः। वप्रः पितरि केदारे वप्रः प्राकाररोधसोरिति धरणिः॥ ७८॥

विललासेति॥ या नगरी क्वचन कस्मिंश्चित् जलाशयोदरे जलाधाराभ्यन्तरे अनुविम्बिता प्रतिविम्बिता द्यौरिव स्वर्गइव विललास शुशुभे ननु यदि स्वर्गस्य जलाशयपतितप्रतिविम्बस्वरूपेयं नगरी तदा कथं परिखाजलं दृश्यते जले जलस्य प्रतिविम्बाभावादिति जलाशयोदरविशेषणेनोपपादयति किम्भूते परिखाकपटेन खेयजलच्छलेन स्फुटस्फुरत् प्रतिविम्बानवलम्बितं प्रतिविम्बेनासम्बद्धं अम्बु जलं यत्र तादृशे अयम्भावः जलाशयः स्वर्गापेक्षयाधिकविस्तारः अतस्तन्मध्यएव स्वर्गस्य प्रतिविम्बं पतितं उभयतस्तु यत् प्रतिविम्बा

Digitized by Google

भ्रजते दिवि यद्गृहावली
चलचेलाञ्चलदण्डताडनाः ।
व्यतरन्नरुणाय विश्रमं
रजते वेल्लिहयालिकालनां ॥ ८० ॥
क्षितिगर्भधराम्बरालयै
स्तलमध्योपरिपूरिणां पृथक् ।

समग्रं जगं तत्परिखाजलमिति युज्यतएवोत्प्रेक्षा खर्गसदृशीयं नगरीति पर्य्यवसितोऽर्थः । खेयन्तु परिखेत्यमरः ॥ ७९ ॥

भ्रजतइति ॥ यद्गृहावली यस्यानगर्य्याः प्रासादश्रेणी तस्याच्च लानां चलानां चेलानां पताकावस्त्राणां यान्यञ्चलानि प्रान्तास्तान्येव दण्डाः प्रतोदास्तैस्ताडनाः आघाताः कर्त्तृः दिवि आकाशे भ्रजते गच्छते वेल्लिहयालेः सूर्य्यघोटकश्रेण्याः कालनां प्रेरणां रजते कुर्व्वते अरुणाय सूर्य्यसारथये विश्रमं प्रेरणायां विश्रान्तिं व्यतरन् ददुः पताकाप्रान्तचाञ्चल्यं अश्वप्रेरणं मत्वा सूर्य्याश्वास्त्वरितं गच्छन्ति अतोऽरुणस्य विश्रान्तिः एतेन नगरीगृहाणां अत्युच्चता पताकायुक्तता च सूचिता । उदात्तोऽयं लोकातिशयसम्पत्तिवर्णनोदात्तमुच्यतइति लक्षणात् । दिनमणिहरिवेल्लिश्नभाकोशभासुदरधिखगपतङ्गेना श्वयः सप्तसप्तिरिति त्रिकाण्डशेषः ॥ ८० ॥

क्षितिगर्भेति ॥ सन्नुत्प्रेक्षायां या नगरी तलं पातालं मध्यं पृथिवीं उपरि स्वर्गञ्च पूरयन्ति उपस्थाप्यतया व्याप्नुवन्तीत्येषां तन्नादिसंज्ञकानामित्यर्थः जगतां सारैः श्रेष्ठांशरूपैः क्षितिगर्भधराम्बरालयैः क्षितिगर्भे पाताले धरायां पृथिव्यां अम्बरे आकाशे ये आलया गृहाणि तैः करणैः अजनि निर्म्मिता किंभूतैः पृथक् प्रत्येकं निजचिह्न

जगतां खलु यास्विलाद्भुता
जनि सारैर्निजपिञ्छधारिभिः ॥ ८१ ॥
दधदम्बुदनीलकण्ठतां
वहदत्यच्छसुधोज्ज्वलं वपुः ।
कथमृच्छतु यत्र नाम न
क्षितिभृन्मन्दिरमिन्दुमौलितां ॥ ८२ ॥
वरुरूपकशालभञ्जिका
मुखचन्द्रेषु कलङ्करङ्कवः ।

धारिभिः नीलपीतचित्रयुतैः पातालचित्रं विश्वादिकं मध्यचित्रं ग्राम्यादिकं स्वर्गचित्रं चन्द्रसूर्यादिकं देवाङ्गनादिकं । किम्भूता जगत्त्रयसारैर्निर्मितत्वादखिलाद्भुता अखिलेभ्यः स्वर्गादिभ्योऽद्भुता आश्चर्य्यज्ञानविषया स्वर्गादौ हि केवलं स्वचित्रमात्रं अत्र तु सर्व्वं लोकचित्राणि एतेन नगर्य्यास्त्रयाणां लोकत्रयवत् प्रासादयुक्तता सूचिता ॥ ८१ ॥

दधदम्बुदेति ॥ यत्र नगर्य्यां क्षितिभृन्मन्दिरं राजगृहं इन्दुमौलितां अत्युच्चत्वात् चन्द्रललाटशिखरत्वं अथ च शिवत्वं कथं नाम न ऋच्छतु न प्राप्नोतु अपितु ऋच्छत्येव किम्भूतं अम्बुदेन मेघेन नीलः श्यामः कण्ठः शिखरसमीपभागो यस्य तस्य भावं दधत् धारयत् तथा अत्यच्छसुधया अतिशुभ्रलेपेन उज्ज्वलं उद्दीप्तं वपुर्भित्तिहर्म्यं शरीरं वहत् धारयत् शिवोऽपि मेघवन्नीलगलतां अतिनिर्म्मलामृतवच्छुभ्रं शरीरञ्च दधाति एतेन राजगृहस्यात्यन्तमुच्चत्वं सूचितं । कण्ठो गलसमीपयोरिति धरणिः । सुधा लेपोऽमृतं स्नुहीत्यमरः ॥ ८२ ॥

वरुरूपेति ॥ वरु रूपं सौन्दर्य्यं यासां तथाविधा याः शालभञ्जिकाः ।

Digitized by Google

यदनेकसौधकन्धरा
हरिभिः कुक्षिगतीकृता इव ॥ ८३ ॥
वलिसद्म दिवं स तथ्यवा-
गुपरि स्माह दिवोऽपि नारदः ।
अधराय कृता ययेव सा
विपरीताजनि भूर्विभूषया ॥ ८४ ॥

भित्तिषु निर्म्मिताः पुत्रिकास्तासां मुखान्येव चन्द्रास्तेषु तद्रताः यत्र हरयो वाप्यम्बरचारिणः यस्या नगर्य्या अनेककानां बहुसंख्यकानां सौधानां प्रासादानां कन्धरासु शिरोधिषु शिखराधोभागेष्वित्यर्थः निर्म्मिताः ये हरयः सिंहास्तैः कुक्षिगतीकृता इव उदरगतीकृता इव भुक्ता इवेत्यर्थः अदृश्यमानत्वात् चन्द्रतुल्यान्यपि निष्कलङ्कानि तासां मुखानीत्यर्थः एतेन प्रासादानां अतिमनोज्ञकाष्ठादिपुत्तलिकावत्त्वं अतिमानेकसिंहवत्त्वञ्च सूचितं । शालभञ्जिका स्त्रिया वेश्मस्थां काष्ठादिपुत्र्यामिति शब्दाब्धिः ॥ ८३ ॥

वलिसद्मेति ॥ स प्रसिद्धस्तथ्यवाक् सत्यवादी नारदः वलिसद्म दिवं पातालभवनं स्वर्गं दिवोऽपि स्वर्गादपि उपरि उत्कृष्टं अथ च ऊर्द्धवर्त्तिनीं आह स्म उक्तवान् विष्णुपुराणे स्वर्गलोकादतिरम्याणीत्यादिना नारदेन यत् पातालस्य स्वर्गादप्युत्कृष्टत्वमुक्तं तत् स्वर्गादुपरिवर्त्तितयैवेति भावः यद्येवं स्यात्तर्हि कथं न तथाप्रसिद्धिरित्याह अथ पश्चात् भुवः पृथिव्या विभूषया अलङ्कारभूतया भुवो विभूषा शोभा यया तादृश्येति वा यया नगर्य्या अधरा अपकृष्टा अथ च अधोदेशवर्त्तिनी कृतेव विपरीता अन्यादृशी अजनि जाता पूर्व्वं भुवः स्वर्गाधोऽर्द्धमासीदिदानीन्तु एतन्नगर्य्याऽधःकृतेति वैपरीत्यं

Digitized by Google

प्रतिहट्टपथे घरट्टजात्
पथिकाह्वानदसक्तुसौरभैः ।
कलहान् घनान् यदुत्थिता
दधुनाप्युज्झति घर्घरस्वरः ॥ ८५ ॥
वरणः कनकस्य मानिनीं
दिवमङ्काद्मराद्रिरागतां ।

स्वर्गेयातायाभ्यामप्युत्कृष्टेयं नगरीति पर्य्यवसितोऽर्थः । भूरिभूषये तिक्वचित्पाठःअर्थः सुगमः वलिसद्मरसातलमित्यमरः ॥ ८४ ॥

प्रतिहट्टेति ॥ प्रतिहट्टपथे सर्व्वेषु क्रयविक्रयस्थानमार्गेषु पथिकानां पान्थानां यत आह्वानं आकारणा तद्ददतीति तथाविधैः सक्तूनां सौरभैः सौगन्धैः हृत्ता घरट्टो गोधूमादिपेषणपाषाणस्तज्जातात् यस्यानगर्य्यांउत्थितादुदितात् कलहात् विरोधाज्जातोघर्घरः स्वरो ऽतिविवादेन स्वरभङ्गात् घर्घरेत्यव्यक्तोध्वनिरधुनापि अद्यापि घनान् मेघान् न उज्झति न त्यजति पान्थाः सक्तुसौरभमाघ्राय भोजनलालसया नगरीं परित्यक्तुं न शक्नुवन्ति मेघास्तु उद्दीपकत्वेन कामपरिवारत्वात् तान् स्वगृहान् गमयितुं त्वरयन्तीति सक्तुसौरभनिमित्तको मेघघरट्टयोः कलहः योऽतिरोषेणोच्चैःस्वरैः कलहं करोति बहुकालपर्य्यन्तं घर्घरस्वरस्तं न मुञ्चति एतेन मेघवद्गभीरस्वनवद्घरट्टवत्वं नगर्य्याः सूचितं ॥ ८५ ॥

वरणइति ॥ कनकस्य स्वर्णस्य वरणः प्राकारएव अमराद्रिः सुमेरुः मानिनीं प्रणयकोपवतीं अतएव अङ्कात् क्रोडात् आगतां यां नगरीमेव दिवं परिरभ्य आलिङ्ग्य अनुनयन् प्रसादयन् उवास वसति स्म कथमर्थं सुमेरुस्त्वया त्यक्तइति विभिनत्ति किम्भूतः घनानि निविडानि

Digitized by Google

घनरत्नकवाटपक्षतिः
परिरभ्यानुनयन्नुवास यां ॥ ८६ ॥
अनलैः परिवेशमेत्य या
ज्वलदर्कोपलवप्रजन्मभिः ।
उदयं लयमन्तरा रवे
रवहद्बाणपुरीपरार्द्ध्यतां ॥ ८७ ॥
बहुकम्बुमणिर्व्वराटिका
गणनाटत्कारकर्कटोत्करः ।

रत्नानि यत्र तादृशे ये कवाटे ते एव पक्षती पक्षमूले यस्य तादृशः वप्रः सपक्षत्वात् अन्येऽपि अन्यत्र गतां मानिनीं परिरभ्यानुनयन् तदनुरोधात्तत्रैव वसति एतेन सुमेरुवदत्युच्चसौवर्णप्राकारवत्त्वं स्वर्गसाम्यञ्च नगर्य्याः सूचितं । प्राकारो वरणः शाल इत्यमरः ॥ ८६ ॥

अनलैरिति ॥ या नगरी उदयं लयं अन्तरा उदयस्य लयस्य च मध्ये दिवस इत्यर्थः ज्वलन्तो ये अर्कोपलवप्राः सूर्य्यकान्तमणिनिर्म्मित प्राकारास्तेभ्योजन्म येषां तादृशैरनलैर्वह्निभिः परिवेशं वेष्टनं एत्य प्राप्य वाणपूर्य्याः शोणितपुरस्य परार्द्ध्यतां श्रेष्ठतां सादृश्यमित्यर्थः अवहत् दधार वाणपुर्य्यपि शिवप्रसादाच्चतुर्दिक्षु वह्निवेष्टितासी दिति प्रसिद्धिः । उदयं लयमन्तरेति अन्तरायोगे द्वादियुक्तादिति द्वितीया । वप्रः प्राकाररोधसोरिति विश्वः ॥ ८७ ॥

बह्विति ॥ यस्यानगर्य्याआपणोऽह इएव अर्णवः समुद्रः पटु अवि घ्नं यथा तथा दध्वान ध्वनितवान् किम्भूतः बहवः कम्बवः शङ्खा

Digitized by Google

हिमवालुकयाच्छवालुकः
पटु दध्मान यदापगार्णवः ॥ ८८ ॥
यदगारघटाट्टकुट्टिम
स्रवदिन्दूपलतुन्दिलापया ।

मणयो मौक्तिकादयश्च यत्र तादृशः वणिग्भिर्विक्रयार्थं नानादेशा दानीतत्वात्तत्र सन्त्वः घट्टामणयश्चास्मिन्नित्यर्थः समुद्रेऽपि रत्ना विद्रुमादिमणयश्च तिष्ठन्ति तथा वराटिकानां कपर्दानां या गणना संख्यानं तत्र घटमानसन्तो ये वराटकानां कुलीरास्त एव कर्कटाः कुलीरास्तेषामुत्करः समूहो यत्र सः समुद्रेऽपि वराटकाः कर्कटाश्च विद्यन्ते तथा हिमवालुकया कर्पूरेण अच्छाः सुधावालुकाः सिकतायत्र तथाभूतः समुद्रेऽपि सुधवालुकास्तिष्ठन्ति पटुत्वेन जनसंमर्दः सूचितः हिमवालुकयेति वाच्येन घनवानितिपदभेदे दृष्टो या । घट्टः स्यात् कनुरस्त्रियामिति स्यात्कुलीरः कर्कटक इति अथ कर्पूरमस्त्रियां घनसारश्चन्द्रसंज्ञः सिताभ्रो हिमवालुकेत्यमरः ॥ ८८ ॥

यदगारेति ॥ प्रतिचन्द्रोदयं चन्द्रोदये अभ्रगङ्गया आकाशगङ्गया मन्दाकिन्या यस्यां नगर्यामगारघटानां गृहसमूहानां ये अट्टा उपरिगृहास्तेषां कुट्टिमेषु बद्धभूमिषु स्रवन्तः क्षरन्तो ये इन्दूपलाश्चन्द्रकान्तमणयस्तैस्तुन्दिलानि वृद्धतरा आपो जलानि यस्यास्तथाभूतया सत्या पतिव्रतोचिती सपत्नीसाम्यं न मुमुचे न त्यक्ता चन्द्रोदये हि समुद्रस्य जलवृद्धिर्भवति गङ्गापि तत्पत्नी अतश्चन्द्रोदये

Digitized by Google

मुमुचे न पतिव्रतौचिती
प्रतिचन्द्रोदयमश्मगश्नया ॥ ८९ ॥
रुचयोऽस्तमितस्य भास्वतः
स्खलिता यत्र निराश्रयाः खलु ।
अभिसायमभुर्विलेपना-
पणकश्मीरजपण्यवीथयः ॥ ९० ॥
विततं वणिजापणेऽखिलं
पणितुं यत्र जनेन वीक्ष्यते ।

अश्मद्रवत्वमपि पत्युर्धर्मश्चन्द्रस्यापि चन्द्रकान्तद्रवजलेन जात इति पातिव्रत्यौचित्यं । पतिव्रतालक्षणमाह हारीतः आर्त्तार्त्ते मुदिते हृष्टा प्रोषिते मलिना कृशा । मृते म्रियेत या पत्यौ साध्वी ज्ञेया पतिव्रतेति एतेन मन्दाकिन्यामपि अट्टकुट्टिमानामधोवर्त्तित्वं सूचितं नगर्य्यां गृहाः चन्द्रकान्तमणिनिर्म्मितकुट्टिमा अत्युच्चतराश्चेति पर्य्यवसितोऽर्थः । तुन्दिलापयेति अगादेरत्सर्व्वत्रेत्यत्समासान्तः । उदात्तोऽयं ॥ ८९ ॥

रुचयइति ॥ यत्र नगर्य्यां अभिसायं सन्ध्यासमये विलेपनापणे गन्धद्रव्यविक्रयहट्टे कश्मीरजपण्यानां कुङ्कुमरूपविक्रेयद्रव्याणां वीथयो मार्गाः अभुः शोभन्ते स्म उत्प्रेक्षते खलूत्प्रेक्षायां अस्तमितस्य अस्तंगतस्य भास्वतः सूर्य्यस्य स्खलिताश्च्युताः निरालया निराश्रयारुच यइव किरणाइव । अभुरिति भादीप्तौ विदेर्झस् द्विषाद्भ्योझेस् इति झेर् उस् । वीथी वर्त्मनि पङ्क्तौ च गृहाङ्गे नाट्यरूपक इति हेमचन्द्रः ॥ ९० ॥

विततमिति ॥ यत्र नगर्य्यां आपणे हट्टे पणितुं विक्रेतुं वणिजा वणिग्जनेन विततं विस्तृतं अखिलं सर्व्वं जगतां वस्तु द्रव्यं जनेन क्रेतृ

Digitized by Google

मुनिनेव मृकण्डुसूनुना
जगतां वस्तु पुरोदरे हरेः ॥ ९१ ॥
सममेणमदैर्यदापणे
तुलयन् सौरभलोभनिश्चलं ।
पणिता न जनारवैरवै
दपि गुञ्जन्तमलिं मलीमसं ॥ ९२ ॥

अनेन पुरा पूर्वं वीक्ष्यते दृष्टं उपमिमोति यथा मृकण्डुसूनुना मार्कण्डेयेन मुनिना हरेर्बालरूपस्य भगवतउदरे जठरे जगतां वस्तु पुरा वीक्षते तथा पुरा किल एकार्णवे जगति न्यग्रोधपत्राधिकृत्वाबाला कृतिनारायणस्योदरं प्रविश्य मार्कण्डेयेन तत्र सर्वं जगत् दृष्टं । वणिजेत्यत्र आपणइत्यत्र च एकवचनेन एकस्यापि वणिजएक स्मिन्नप्यापणे सर्वं वस्तु दृष्टमिति सूचितं । वीक्ष्यतइति लायुक्त पुरायोगइत्यादिना भूते लट् ॥ ९१ ॥

सममिति ॥ यस्या नगर्यामापणे हट्टे पणिता विक्रेता एणमदैः कस्तूरीभिः समं सह सौरभलोभनिश्चलं सौरभाभिलाषेण निश्चलं मलीमसं श्यामलं गुञ्जन्तमपि शब्दायमानमपि अलिं भ्रमरं तुलयन् परिमापयन् जनारवैर्लोकानां कोलाहलैर्न अवैत् न ज्ञातवान् यद्यपि निश्चलत्वात् मलीमसत्वेन वर्णसाम्याच्च ज्ञातुं न शक्यते तथापि गु ञ्जनादपि न ज्ञेयः जनारवैर्गुञ्जनस्यान्तर्हितत्वादिति भावः । मोचि तमिदं मोचितं वस्तुनोगुम्फिः केनचित्तुल्यत्वमस्योति लक्षणात् । अवै दिति अवपूर्वादिणगतावित्यस्माल्लङोदुरुज्जिरादेरिति वृद्धिः ॥ ९२ ॥

Digitized by Google

रविकान्तमयेन सेतुना
सकलाहर्ज्वलनाहितोष्मणा।
शिशिरे निशि गच्छतां पुरा
चरणौ यत्र दुनोति नो हिमं॥ ९३॥
विधुदीधितिजेन यत्पथं
पयसा नैषधशीलशीतलं।
शशिकान्तमयं तपागमे
कलितीव्रस्तपति स्म नातपः॥ ९४॥

रवीति॥ यत्र नगर्य्यां शिशिरे शीतकाले रविकान्तमयेन सूर्य्यकान्तमणिनिर्म्मितेन अतएव सकलाहः समस्तदिनं व्याप्य यत् ज्वलनं तेनाहितोऽर्पित उष्मा यस्यां यत्र तादृशेन सेतुना निशि रात्रौ गच्छतां जनानां चरणौ हिमं कर्त्तृ पुरा नो दुनोति नो पीडयति स्म। सकलाहरिति लेखानित्या इति समासान्तनिषेधः प्राचस्तु सकलाहज्वलनेत्यादि गोरेफमेव पाठं कृत्वा व्याख्यातवन्तः यद्यपि जनानामितिबहुत्वबोधात् चरणावित्यत्र द्विवचनप्रयोगो न युज्यते तथापि प्रत्येकापेक्षया द्वित्वं बोध्यं दुनोतीति स्मादुक्तेत्यादिना पुरायोगे भूते लट्॥ ९३॥

विधिवति॥ कलितीव्रः कलियुगवद्दुःसहश्चातपः शशिकान्तमयं चन्द्रकान्तमणिनिर्म्मितं अतएव रात्रौ विधुदीधितिजेन चन्द्रकिरणसम्पर्कोद्भावेन पयसा जलेन नैषधशीलवन्नलस्वभाववत् शीतलं यत्पथं यस्या नगर्य्याः पन्थानं तपागमे ग्रीष्मसमयेऽपि न तपति स्म नोष्णीचकार रात्रौ क्षरितचन्द्रकान्तजलेन सर्व्वं दिनं शीतलत्वात्पन्थानं स्पृशतीतिभावः। यत्पथमिति ऋगादेरत् सर्व्वत्रेत्यसमासान्तः॥ ९४॥

Digitized by Google

परिखावलयच्छलेन या
न परेषां ग्रहणस्य गोचरः ।
फणिभाषितभाष्यफक्किका
विषमा कुण्डलनामवापिता ॥ ९५ ॥
मुखपाणिपदाक्षिपङ्कजै
रचिताङ्गेष्वपरेषु चम्पकैः ।

परिखेति ॥ या नगरी परिखावलयच्छलेन परिखामण्डलव्याजेन कुण्डलनां वेष्टनं अवापिता अर्थात् पराजितशत्रुभिः प्रापिता सती परेषां अन्येषां ग्रहणस्य आयत्तीकरणस्य न गोचरो न विषयः अत्र स्वर्णचिह्नभूतां कुण्डलनां दृष्ट्वा शत्रवो दूरत एव तां परित्यज्य निवर्त्तन्त इति भावः किम्भूता फणिना शेषनागेन भाषितं यद्भाष्यं तत्र या फक्किका पूर्व्वपक्षाक्षरविषमा दुर्ग्राह्या भाष्यफक्किकापि विषमा दुर्ज्ञेया अतएव ज्ञातुमशक्तैः कुण्डलनां प्रापिता सती अन्येषां ग्रहणस्य ज्ञानस्य गोचरो न भवति ॥ ९५ ॥

मुखेति ॥ यत्र नगर्य्यां भीमजा दमयन्ती स्मरस्य कामस्य पूजायै या कुसुमस्रक् पुष्पमाला तस्याः श्रियं शोभां स्वयं आदित गृहीतवती कामपूजापुष्पमालास्थाने सैव जातेत्यर्थः किम्भूता मुखपाणिपदाक्षिपङ्कजैर्वदनकरचरणनयनरूपगौररक्तनीलोत्पलैः रचिता निर्म्मिता तथा अपरेषु अन्येषु अङ्गेषु अवयवेषु चम्पकैश्चम्पककुसुमैरचिता मालापि नानाविधैः पुष्पैः क्रियते तस्या मुखाद्यङ्गानि पद्मतुल्यानि अन्यानि तु चम्पकसमानवर्णानीति भावः । आदितेति आङ्पूर्व्वाद्दाञो

Digitized by Google

स्वयमादित यत्र भीमजा
स्मरपूजाकुसुमस्रजः श्रियं ॥ ९६ ॥
जघनस्तनभारगौरवा
द्वियदालम्ब्य विहर्तुमक्षमाः ।
भुवमप्सरसोऽवतीर्य्य यां
शतमध्यासत तत्सखीजनः ॥ ९७ ॥
स्थितिशालिसमस्तवर्णतां
न कथं चित्रमयी बिभर्तु या ।

सुक्तः सक् स्वादाधावेटदोदानदेशामाक्मनेसकीति इक् सक्सुगिदा देरितिसक्लुक् इकादावित्याकारलुक् । निदर्शनेयं ॥ ९६ ॥

जघनेति ॥ भुवमुत्प्रेक्षते शतमप्सरसः जघनस्तनयोर्नितम्बकुचयो र्भारेण स्थौल्येन यद्गौरवं गुरुत्वं तस्माद्धेतोः वियदाकाशमालम्ब्य आश्रित्य विहर्तुं क्रीडितुं अक्षमा असक्ताः सत्यः अवतीर्य्य आगत्य तत्सखीजनो दमयन्तीसखीजनो भूत्वा यां नगरीं अध्यासत अधि तिष्ठन्ति स्म दमयन्त्याः सख्योऽप्सरस्तुल्या इत्यर्थः यामिति यत्रार्थो ऽधिशीङ्स्थासां कर्म्मेति आधारस्य कर्म्मत्वं ॥ ९७ ॥

स्थितीति ॥ या नगरी स्थित्या मर्य्यादया शालिनः शोभमानाः समस्तावर्णा ब्राह्मणादयो यत्र तस्या भावस्तत्तां कथं न बिभर्त्तु न धार यतु अपि तु बिभर्त्त्वेवेत्यर्थः अतएव चित्रमयी आश्चर्य्यरूपा अन्यत्र ब्राह्मणादयो न मर्य्यादावन्तोऽत्र तु सर्व्वेषां यथायथं मर्य्यादावत्त्वा दाश्चर्य्यरूपत्वं स्थितिः सीमा वा अन्यत्र ब्राह्मणादीनां राजदत्त वास्तुसीमा नास्ति अत्र तु समस्तब्राह्मणादिवर्णेभ्यो राज्ञा सीमा दत्तेति आश्चर्य्यरूपत्वं अथ च या चित्रमयी आलेख्यप्रचुरा सा

Digitized by Google

स्वरभेदमुपैतु या कथं
कलितानल्पमुखारवा न वा ॥ ९८॥
स्वरुचारुणया पताकया
दिनमर्केण समीयुषोत्तृषः।

स्थितिशालिनः समस्तवर्णाः शुक्लरक्तादयो यत्र तत्तामवर्ण्यं दक्षादि तया वा समुच्चये कलिता धृता अनल्पानां बहूनां नरकरितुरगादीनां मुखारवा मुखशब्दा यया तादृशी या नगरी स्वरभेदं सर्व्वरादिनानाशब्दवत्त्वं कथं न उपैतु न प्राप्नोतु अपितु उपैत्येवेत्यर्थः अथ च कलितोऽनल्पमुखस्य चतुर्मुखस्य ब्रह्मणो मुखारवो वेदध्वनिरूपो यत्र तादृशी या सा स्वरभेदं उदात्तादिस्वरत्रयवत्त्वं कथं नोपैतु यद्वा कलिता अनल्पमुखा बहुमुखा ब्रह्मशिवकार्त्तिकाद्या अकारोविष्णुः रोवह्निः वोवरुणश्च यया तादृशी या सा स्वरभेदं स्वर्गादभेदं कथं नोपैतु। स्थितिः स्त्रियामवस्थाने मर्य्यादायाञ्च सीमनीति मेदिनी। वर्णोद्विजादौ शुक्लादौ स्तुतौ वर्णन्तु चाक्षर इति आलेख्याश्चर्य्ययोश्चित्रमिति चामरः अकारो विष्णुरुद्दिष्ट इति रश्चीत्क्ष्णदहने इति वः पश्चिमदिगीशे स्यादिति च कोषान्तरं ॥९८॥

स्वरुचेति ॥ माणिक्यमया माणिक्याख्यरत्नविशेषनिर्म्मिता यदा तया अस्यानगर्य्याऽट्टाः दिनं व्याप्य समीयुषा सङ्गतेन अर्केण सूर्य्येण हेतुना उत्तृष उत्तृष्णाः सन्तः निशि रात्रौ स्वरुचा निज कान्त्या अरुणया आरक्तया पताकया बहुधा बहुवारं सुधाकरं चन्द्रं विलिहः अस्पृशन् पताकायां जिह्वात्वारोप आर्थः स्यापि

लिलिहुर्ब्बहुधा सुधाकरं
निशि माणिक्यमया यदालयाः ॥९९॥
लिलिहे स्वरुचा पताकया
निशि जिह्वानिभया सुधाकरं।
स्थितमर्क्ककरैः पिपासु य
न्नृपसद्मामलपद्मरागजं॥१००॥
अमृतद्युतिलक्ष्म पीतया
मिलितं यद्वलभीपताकया।

आरक्ता अन्येऽपि दिवसे सूर्य्यकिरणैरुत्तप्ताः सन्तो रात्रौ शीतलं वस्तु लिहन्ति। अत्र गृहा अत्युच्चा इति पर्य्यवसितोऽर्थः ॥९९॥

लिलिह इति ॥ पूर्व्वोक्त एवार्थः प्रकारान्तरेण वर्णितः ॥ अमलपद्मरागजं निर्म्मलपद्मरागमणिनिर्म्मितं अर्क्ककरैर्हेतुभिः पिपासु पातुमिच्छुकमिव स्थितं यस्या नगर्य्या नृपसद्म राजमन्दिरं निशि रात्रौ स्वस्यैव रुक् कान्तिर्यस्यास्तादृश्या आरक्तयेत्यर्थः अतएव जिह्वानिभया जिह्वातुल्यया पताकया सुधाकरं चन्द्रं लिलिहे आस्वादयामास। लिलिह इति स्वरितेत्त्वात् कर्तृगामिक्रियाफलविवक्षायामात्मनेपदं ॥१००॥

अमृतेति ॥ पीतया गौरवर्णया यस्या नगर्य्या वलभीपताकया उपरिस्थगृहविशेषवैजयन्त्या मिलितं सम्बद्धं अमृतद्युतेश्चन्द्रस्य लक्ष्म लाञ्छनं कलङ्कं वलयाचितो मण्डलीभूतो यः शेषोऽनन्तनागस्तस्मिन् शेत इत्येवंशीलस्य पीतवाससः कृष्णस्य सखितां सादृश्यं आदित अग्रहीत् कलङ्कमभितो वर्त्तमानस्य चन्द्रावयवस्य शेषसादृश्यं कलङ्कस्य कृष्णसादृश्यं पीतपताकायाः पीतवस्त्रसादृश्यं एतेनात्युच्च

वलयायितशेषशायिनः
सखितामादित पीतवाससः॥१०१॥

अश्रान्तश्रुतिपाठपूतरसनाविर्भूतभूरिस्तवा
जिह्मब्रह्ममुखौघविघ्नितनवस्वर्गक्रियाकेलिना।
पूर्व्वं गाधिसुतेन सामिघटिता मुक्ता नु मन्दाकिनी
यत्प्रासाददुकूलवल्लिरनिलान्दोलैरखेलद्दिवि॥१०२॥

ता मद्दाचां सूचिता पीतवासस इति तद्गुणसन्निधानमवज्ञोदिह ॥१०१॥

अश्रान्तेति॥ यस्यानगर्य्याः प्रासादानां राजभवनानां देवभवनानां वा दुकूलवल्लिर्दीर्धलात् लताकपा श्वेतक्षौमपताका अनिलान्दोलैर्वायुचालनैर्दिवि आकाशे अखेलत् क्रीडति स्म उत्प्रेक्षते किम्भूता पूर्व्वं पुरा गाधिसुतेन विश्वामित्रेण सामिघटिता अर्द्धनिर्म्मिता अनु पश्चात् ब्रह्मणः कृत्या मुक्ता परित्यक्ता मन्दाकिनी स्वर्गङ्गेव प्रतीयमानोत्प्रेक्षा मन्दाकिनी नु मन्दाकिनीव नुरिवार्थे वितर्केवेति केचित् सामिघटितत्वे गाधिसुतस्य हेतुगर्भविशेषणमाह किम्भूतेन अश्रान्तश्रुतिपाठेन निरन्तरवेदपाठेन पूताभ्यः पवित्राभ्यो रसनाभ्यो जिह्वाभ्य आविर्भूतेषु जातेषु भूरिषु बहुषु स्तवेषु स्तुतिषु जिह्मोऽनलसो यो ब्रह्मणोमुखौघोमुखचतुष्टयं तेन विघ्निता सविघ्नीकृता नवस्वर्गक्रियाकेलिः नवीनस्वर्गसृष्टिरूपक्रीडा यस्य तादृशेन पुरा किल त्रिशङ्कोः स्वर्गागमने इन्द्रेण निवारिते कुपितो विश्वामित्रो नवीनस्वर्गादिसृष्टिमारभ्य ब्रह्मादिभिरर्थितोऽर्द्धकृतां सृष्टिं तत्याजेति पौराणिकी वार्त्ता। सामिघटितेति स्वयंसामिसृष्टेनेति तत्पुरुषः। सक्तार्थे च मध्यार्थे सामि निन्दार्द्धयोरेवमिति मेदिनी शार्दूलविक्रीडितमिदं वृत्तं॥१०२॥

यदतिविमलनीलवेश्मरश्मि
भ्रमरितभाः शुचिसौधवस्त्रवल्लिः।
अलभत शमनस्वसुः शिशुत्वं
दिवसकराङ्कतले चला लुठन्ती॥ १०३॥

सप्राणेश्वरनर्म्मवर्म्मकटकातिथ्यग्रहायोत्सुकं
पाथोदं निजकेलिसौधशिखरादारुह्य यत्कामिनी।

यदतीति। यस्या नगर्य्या अतिविमलानि निर्म्मलतराणि यानि नील वेश्मानि नीलकान्तमणिविनिर्म्मितगृहाणि तेषां रश्मिभिः किरणैः भ्रमरिता भ्रमरवदाचरिता श्यामीकृतेत्यर्थः भा दीप्तिर्यस्यास्तादृशी शुचिः शुभ्रा सौधानां वस्त्रवल्लिः पताकापंक्तिः दिवसकरस्य सूर्य्यस्य अङ्कतले समीपाधोभागे चला वातसम्बन्धचञ्चला लुठन्ती क्रीडन्ती सती शमनस्वसुर्यमुनायाः शिशुत्वं शैशवं अलभत श्यामा बालिका यमुनेव शोभतेत्यर्थः सापि श्यामा बाल्यावस्था सूर्य्यस्य अङ्कतले क्रोडभागे क्रीडति स्म। पुष्पिताग्रावृत्तमिदं। तल्लक्षणमाह केदारभट्टः। अयुजि नयुगरेफतो यकारो युजि च नजौ जर गाश्च पुष्पिताग्रेति॥ १०३॥

सप्राणेश्वरेति॥ यस्या नगर्य्याः कामिनी स्त्रीविशेषः विमानेन व्योम यानेन कलितं आश्रितं नर्म्मभूमीत्वमिति भावः व्योम आकाश याभिलषाविधाः साक्षात्प्रत्यक्षदृश्यमाना अप्सरस एव उर्वश्याद्य एव अभवत् कथमित्याह यत् यस्मात् सप्राणेश्वरो निजप्रियतमस्य नर्म्मवर्म्म क्रीडागृहं तस्य कटके मध्यदेशे आतिथ्यग्रहाय उत्सुकं उत्कण्ठितं अर्थात्तदभिमुखगामिनमित्यर्थः पाथोदं मेघं निजकेलिसौ धशिखरात् स्वकीयक्रीडागृहोपरिभागात् आरुह्य अप्सरसा मेघ

Digitized by Google

साक्षादप्सरसो विमानकलितव्योमान एवाभव
द्यन्न प्राप निमेषमभ्रतरसा यान्तीरसाद्ध्वनि ॥१०४॥
वैदर्भीकेलिशैले मरकतशिखरादुत्थितैरंशुदर्भै
र्ब्रह्माण्डाघातभग्नस्यदजमदतया ह्रीधृतावाङ्मुखत्वैः ।
कस्या नोत्तानगाया दिवि सुरसुरभेरास्यदेशागताग्रै
र्यद्ग्रासप्रदानव्रतसुकृतमविश्रान्तमुज्जृम्भते स्म ॥१०५॥

वेगेन रसात् मेघवेगजनितभीतेः प्रियानुरागाद्वा अध्वनि पथि यान्ती गच्छन्ती सती निमेषं निमेषोपलक्षितमपि विलम्बं मेघ च नेत्रसङ्कोचं न प्राप न प्रापा स्वाभाविकसौन्दर्य्येण विमानस्य दृग्मेघारोपणेन आकाशगमनेन निमेषाप्राप्त्या च अप्सरस्तुल्या आसेति भावः कटकशिखरपदाभ्यां तत्र्योर्वा पर्व्वतसाम्यं प्रतिपाद्य अत्युच्चत्वं सूचितं । इत्यर्थादि धनिनां वास इति कटकोऽस्त्री नितम्बोऽद्रेरिति कूटोऽस्त्री शिखरं शृङ्गमिति साक्षात्प्रत्यक्षतुल्ययोरिति स्त्रियां बह्व्यप्सरस इति व्योमयानं विमानोऽस्त्रीति चामरः शार्दूलविक्रीडितमिदं वृत्तं ॥ १०४ ॥

वैदर्भीति ॥ वैदर्भ्या दमयन्त्याः केलिशैले वाचामर्यामयकृत्रिम क्रीडापर्व्वते मरकतशिखरात् मरकतास्यमणिनिर्म्मितशृङ्गात् उत्थितै रुद्गतैः अंशवः किरणा एव दर्भाः कुशाङ्कुरास्तैः करणैः कस्या नरः ग्रासप्रदानरूपं यत्सुकृतं दीर्घकालानुपालनीयसत्स्वविषयविशेषः सज्जन्यं सुकृतं पुण्यं अविश्रान्तं निरन्तरं उज्जृम्भते स्म वर्द्धते स्म कस्य संभृता गोग्रासत्वमिति विशेषणद्वयेनोपपादयति ब्रह्माण्डे उर्द्ध कटाहे च आघातोऽभिघातात्व्यसंयोगविशेषस्तेन भग्नः सङ्कुचितः स्यदजो वेगजातो मदो गर्व्वो येषां तेषां भावस्तत्ता तया ह्रिया

विधुकरपरिरम्भादात्मनिष्यन्दपूर्णैः
शशिदृषदुपक्लृप्तैरालवालैस्तरूणां।
विफलितजलसेकप्रक्रियागौरवेण
व्यरचि स हृतचित्तस्तत्र भैमीवनेन॥ १०६॥

लज्जयेव हृतं छत्रं अवाङ्मुखत्वं अधोमुखत्वं यैस्तादृशैः अतएव दिवि स्वर्गे उत्तानगायाः उत्तानगामिन्याः गङ्गायाः सुरसुरभेर्देवगव्या न आस्यदेशागतायै नं मुखप्रदेशप्राप्ताग्रभागैः अपि तु सर्वैरप्येव आस्यदेशागतायैः अन्योऽपि भग्नगर्वो लज्जयाधोमुखो भवति। स्रग्धरा वृत्तमिदं तल्लक्षणं यथा म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्त्तितेयं॥ १०५॥ नगरीवर्णनं समाप्तं॥

अथ हंसस्य दमयन्तीवनदर्शनेन चर्याधिक्यमाह॥ विधुकरेति॥ तत्र नगर्यां स हंसो भैमीवनेन दमयन्त्याः क्रीडावनेन रमणीयत्वात् हृतचित्तः आकृष्टमनाः व्यरचि विरचितः किम्भूतेन वनेन शशिदृषद्भिश्चन्द्रकान्तोपलैरुपक्लृप्तानि निर्मितानि तैः अतएव विधुकरपरिरम्भात् चन्द्रकिरणसम्बन्धात् य आत्मनः स्वस्य निष्यन्दः क्षरणं तेन पूर्णैस्तरूणां वृक्षाणां आलवालैर्विफलितं व्यर्थीकृतं जलसेकप्रक्रियागौरवं जलसेचनरूपव्यापारप्रयासो यस्मिन् यादृशेन वृक्षाणामालवालपूरणं चन्द्रकान्तैरेव क्रियते अतोऽत्र जलसेचनप्रयासो निष्फल इतिभावः। इतःप्रभृति श्लोकचतुष्टयं मालिनीवृत्तं तल्लक्षणं यथा। ननमयययुतेयं मालिनी भोगिलोकैरिति ॥१०६॥

अथ कनकपतत्त्रस्तत्र तां राजपुत्रीं
सदसि सदृशभासां विस्फुरन्तीं सखीनां ।
उडुपरिषदि मध्यस्थायिशीतांशुरेखा
नुकरणपटुलक्ष्मीमक्षिलक्षीचकार ॥ १०७ ॥
भ्रमणरयविकीर्णस्वर्णभासा खगेन
क्वचन पतनयोग्यं देशमन्विष्यताधः ।

तस्मिन् वने हंसस्य दमयन्तीदर्शनमाह ॥ अथेति ॥ अथानन्तरं कनकपतत्त्रः स्वर्णच्छदो हंसः तत्र क्रीडावने तां राजपुत्रीं दमयन्तीं अक्षिलक्षीचकार चक्षुरिन्द्रियजन्यज्ञानविषयीकृतवान् दृष्टवानित्यर्थः किम्भूतां सदृशभासां समानकान्तीनां सखीनां वयस्यानां सदसि सभायां विस्फुरन्तीं विशेषेण शोभमानां पुनः किम्भूतां उडुपरिषदि नक्षत्रसभायां मध्यस्थायिनी मध्यवर्त्तिनी या शीतांशुरेखा चन्द्ररेखा तस्या अनुकरणे सदृशीकरणे पटुः समर्था लक्ष्मीः शोभा यस्यास्तादृशीं यथा नक्षत्राणां मध्ये चन्द्ररेखाधिकसौन्दर्य्या तथा सखीनां दमयन्तीति भावः सदृशभासामिति विशेषणं तत्सखीना मप्यन्यसुन्दरीभ्यो विशिष्टसौन्दर्य्यज्ञापनार्थं । तारकाप्युडु वा स्त्रिया मित्यमरः ॥ १०७ ॥

तत्राथ पतनेच्छामाह ॥ भ्रमणेति ॥ भ्रमणरयेण भ्रमणवेगेन विकीर्णा विक्षिप्ता स्वर्णभासः सुवर्णकान्तयो येन तादृशेन तथा क्वचन कुत्रापि अधःप्रदेशे पतनयोग्यं अवतरणोचितं देशं अन्विष्यता पर्य्यालोचयता तेन खगेन हंसेन ऊर्ध्वं ऊर्ध्वप्रदेशे मण्डलो मण्डलाकारभ्रमणं तेने कृतः अत्रोत्प्रेक्षते अदसीयं दमयन्तीसम्

मुखविधुमदसीयं सेवितुं लम्बमानः
शशिपरिधिरिवोर्द्धं मण्डलस्तेन तेने ॥ १०८॥
अनुभवति शचीत्थं सा घृताचीमुखाभि
र्न सह सहचरीभिर्नन्दनानन्दमुच्चैः।
इतिमतिरुदयासीत्पक्षिणः प्रेक्ष्य भैमीं
विपिनभुवि सखीभिः सार्द्धमारब्धखेलां॥ १०९ ॥

न्विन्नं मुखविधुं मुखचन्द्रं सेवितुं परिवेष्टितुं लम्बमानः चन्द्रं परि त्यज्य अधःप्रदेशमागतः शशिपरिधिरिव चन्द्रपरिवेश इव इतेन चन्द्रायेणतया दमयन्तीमुखस्य मनोज्ञत्वं सूचितं । परिवेशस्तु परिधिरिति विभोऽन्तो मण्डलं त्रिष्विति चामरः॥ १०८॥

अथ दमयन्त्यां शच्या अप्याधिक्यबुद्धिमाह ॥ अनुभवतीति॥ विपिनभुवि उपवनभूमौ सखीभिः सार्द्धं सह आरब्धा खेला क्रीडा यया तादृशीं भैमीं दमयन्तीं प्रेक्ष्य दृष्ट्वा पक्षिणो हंसस्य इति एवंप्रकारा मतिर्बुद्धिरुदयासीत् उदिता बभूव इति किमित्याह सा प्रसिद्धा शची इन्द्राणी घृताचीमुखाभिर्घृताचीप्रभृतिभि रप्सरोभिः सहचरीभिः सखीभिः सह इत्थमनेन प्रकारेण दम यन्ती यथा तथेत्यर्थः उच्चैरतिशयं यथास्यात्तथा नन्दनानन्दं नन्दन नामकोपवनविहारजनितहर्षं न अनुभवति ततोऽपीयमधिकेत्यर्थः अत्र दमयन्त्यास्तदुपवनस्य तत्सखीनाञ्च क्रमात् शचीनन्दनघृता च्यादिभ्य आधिक्यरूपो व्यतिरेकः केचित्तु शचीयं नन्दनानन्दं न अनु भवतितु अपि अनुभवत्येवेति वितर्कपरतया व्याचक्षते । प्रेक्ष्येति एककर्तृकत्वाभावात् क्त्वाप्रत्ययानुपपत्तौ स्थितस्येत्यध्याहार्य्यं॥१०९॥

Digitized by Google

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यं।
द्वैतीयीकतया मितोऽयमगमत्तस्य प्रबन्धे महा
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वल,
स्तः ॥ ११० ॥

श्रीहर्षमिति ॥ तस्य प्रबन्धे द्वैतीयीकतया द्वितीयतया मितो गणितो निसर्गोज्ज्वलः स्वभावेनोज्ज्वलोऽयं सर्गोऽगमत् समाप्तः अन्यत् सर्व्वं पूर्व्ववत् ॥ ११० ॥

इति श्रीप्रेमचन्द्रन्यायरत्नविरचितायां नैषधटीकायामन्वयबोधिकासमाख्यायां द्वितीयः सर्गः समाप्तः ॥

Digitized by Google

॥ ३ अथ तृतीयसर्गः ॥

आकुञ्चिताभ्यामथ पक्षतिभ्यां
नभोविभागात्तरसावतीर्य ।
निवेशदेशाततधूतपक्षः
पपात भूमावुपभैमि हंसः ॥ १ ॥

अथ हंसमुखेन दमयन्त्याः पुरस्तान्नलगुणं वर्णयिष्यन् संप्रति श्रवणपतनयोग्यं स्थानमन्विष्यताथ इत्यादि पूर्वसर्गान्तेन सहैव वाक्यतार्थे हंसस्यावनमनं वर्णयति ॥ आकुञ्चिताभ्यामिति ॥ अथ मण्डलीकरणानन्तरं हंसः आकुञ्चिताभ्यां संकुचिताभ्यां पक्षतिभ्यां पक्षमूलाभ्यां नभोविभागादाकाशदेशात्तरसा वेगेन अवतीर्य उपनम्य उपभैमि दमयन्तीसमीपे भूमौ पपात उपविवेश किम्भूतः निवेशदेशे पतनस्थाने आततौ प्रसारितौ धूतौ कम्पितौ पक्षौ येन तादृशः। पक्षिस्वभावोऽयं। स्त्रीपक्षतिः पक्षमूलमिति रंहस्तरसी तु रयः स्यद इति चामरः। उपभैमीत्यव्ययीभावनिष्पन्नं। अस्मिन् सर्गे इन्द्रवज्रोपेन्द्रवज्रामेलोपजातिश्छन्दः यदाह केदारभट्टः। स्यादिन्द्रवज्रा यदि तौ जगौ गः। उपेन्द्रवज्रा जतजास्ततो गौ। अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ता इति ॥ १ ॥

Digitized by Google

आकस्मिकः पक्षपुटाहतायाः
क्षितेस्तदा यः स्वन उच्चचार ।
द्रागन्यविन्यस्तदृशः स तस्याः
सम्भ्रान्तमन्तःकरणं चकार ॥ २ ॥

नेत्राणि वैदर्भसुतासखीनां
विमुक्ततत्तद्विषयग्रहाणि
प्रापुस्तमेकं निरुपाख्यरूपं
ब्रह्मेव चेतांसि यतव्रतानां ॥ ३ ॥

दमयन्तीसम्भ्रममाह ॥ आकस्मिक इति ॥ तदा हंसस्य पतनकाले पक्षपुटेन पक्षद्वयेनाहतायाः कृताभिघातायाः क्षितेः पृथिव्याः सकाशात् य आकस्मिकोऽचिन्त्यनिमित्तकः स्वनः शब्द उच्चचार उद्भूतः स स्वनः द्राक् झटिति अन्यत्र विन्यस्ते विक्षिप्ते दृशौ चक्षुषी यया तथाभूतायास्तस्या दमयन्त्या अन्तःकरणं मनः सम्भ्रान्तं ससम्भ्रमं चकार शब्दस्याकस्मिकत्वादेव सम्भ्रमजनकत्वं ॥ २ ॥

भैमीसखीनामपि हंसदर्शनमाह ॥ नेत्राणीति ॥ वैदर्भसुतासखीनां दमयन्तीवयस्यानां नेत्राणि चक्षूंषि विमुक्तास्त्यक्तास्तेषु तेषु विषयेषु वनशोभादिषु ग्रहाः सन्निकर्षा यैस्तादृशानि सन्ति निरुपाख्यं उपाख्यातुं वक्तुमशक्यं रूपं सौन्दर्यं यस्य तादृशं एकं केवलं तं हंसं प्रापुः। उपमिनोति ब्रह्मेवेति यथा यतव्रतानां योगिनां चेतांसि विमुक्ततत्तद्विषयग्रहाणि परित्यक्तस्रक्चन्दनवनितादिविषयस्वीकाराणि सन्ति निरुपाख्यरूपं अनिर्वचनीयस्वरूपं एकमद्वितीयं ब्रह्म परमात्मानं प्राप्नुवन्ति तथेत्यर्थः। गृह्यतेऽनेनेति ग्रहः सन्निकर्षः पक्षे ग्रहणं ग्रहः स्वीकारः ॥ ३ ॥

Digitized by Google

हंसं तनौ सन्निहितं चरन्तं
मुनेर्मनोवृत्तिरिव स्विकायां।
ग्रहीतुकामादरिणाशयेन
यत्नादसौ निश्चलतां जगाहे॥ ४॥
तामिङ्गितैरप्यनुमाय माया
मयं न भैम्या वियदुत्पपात।

भैम्या हंसग्रहणोद्योगमाह ॥ हंसमिति ॥ असौ दमयन्ती दरिणा सभयेन सकम्पेन वा आशयेन पाणिना हंसं ग्रहीतुकामा धर्त्तुकामा सती स्विकायां स्वीयायां तनौ शरीरे यत्नात् निश्चलतां निस्पन्दतां जगाहे प्राप्ता किम्भूतं सन्निहितं निकटवर्त्तिनं अथच सतावबलेन निहितं प्रेरितं तया चरन्तं इतस्ततो गच्छन्तं किञ्चिद्भुञ्जानं वा अत्रोपमिनोति मुनेर्मनोवृत्तिरिवेति यथा मुनेर्योगिनो मनोवृत्तिर्ब्रह्माकारचित्तपरिणामः आदरिणा सत्त्वगुणोद्रेकान्निर्मलेन आशयेन चरन्तं सर्व्वव्यापकं अतएव स्विकायां तनौ सन्निहितं हंसं परमात्मानं ग्रहीतुकामा साक्षात्कर्त्तुकामा सती निश्चलतां स्थिरतां गाहते तथेत्यर्थः। हंसो विहङ्गभेदे स्यादर्के विष्णौ हयान्तरे। योगमन्त्रादिभेदेषु परमात्मनि भेषज इतिविश्वः॥ ४॥

तत् ज्ञात्वा हंसस्यापि चेष्टामाह ॥ तामिति॥ अयं हंसः भैम्याः स्वा न्युगमनरूपां मायां कपटं इङ्गितैश्चेष्टाभिरनुमायापि अनुमानेन ज्ञात्वापि वियदाकाशं न उत्पपात नोड्डयते स्म इयं विजनदेशं नेतव्येत्यभिप्रेत्येत्यर्थः किन्तु स्वतलाघवेन भवनशीघ्रतया आत्मोपरि पातुकं पतन्तं तत्पाणिं तस्या भैम्या हस्तं मोघं निष्फलं वितेने चकार

Digitized by Google

तत्पाणिमात्मोपरिपातुकन्तु
मोघं वितेने प्रुतलाघवेन ॥ ५ ॥
व्यर्थीकृतं पत्त्ररथेन तेन
तथावसाय व्यवसायमस्याः ।
परस्परामर्पितहस्ततालं
तत्कालमालीभिरहस्यतालं ॥ ६ ॥
उच्चाटनीयः करतालिकानां
दानादिदानीं भवतीभिरेषः ।

यद्यहमाकाशमुत्पतेयं तदा धारणार्थं मयतमहस्तैव गमिष्यति तेन च मम दौत्यासिद्धिर्भवेदित्यादि विचिन्त्य तथाकृतवानितिभावः ॥ ५ ॥

तद्दृष्ट्वा सखीनां हासमाह ॥ व्यर्थीकृतमिति ॥ आलीभिः सखीभिः अस्यादमयन्त्या व्यवसायं हंसधारणोद्योगं तेन पत्त्ररथेन पक्षिणा तथा तेन प्रुतलाघवप्रकारेण व्यर्थीकृतं विफलीकृतं अवसाय ज्ञात्वा परस्परामन्योऽन्यस्या अर्पितो दत्ता हस्तेषु तालस्तालिका यत्र क्रियायां तद्यथा स्यात्तथा तत्कालं तस्मिन् काले अलं अत्यर्थं अहस्यत हसितं सा हसिता वा । अत्र तालं तालमिति उत्तरार्द्धे यमकं । परस्परामिति सर्व्वनाम कर्म्मव्यतीहार इति द्विरुक्तिः निपातनात् सुट् ततःसुपोऽपुंस्त्वमेति पक्षा आम् । पतत्पत्त्ररथाण्डजा इत्यमरः ॥ ६ ॥

सखीः प्रति दमयन्त्याः सरोषं वचनमाह ॥ उच्चाटनीय इति ॥ तया दमयन्त्या आलिवर्गः सखीगण इति उपालम्भि सरोषमुक्तः

यान्वेति मां द्रुह्यति मह्यमेव
साचेत्युपालम्भि तयालिवर्गः ॥ ७ ॥
धृताल्पकोपा हसिते सखीनां
छायेव भास्वन्तमभिप्रयातुः ।
श्यामाथ हंसस्य करानवाप्तेर्
मन्दाक्षलक्ष्या लगति स्म पश्चात् ॥ ८ ॥

इति किं भवतीभिर्युष्माभिः करतालिकानां हस्ततालानां दानात् वादनात् इदानीं एव हंसः उच्चाटनीयः पलायनीकरणीयः मया एतद्ग्रहे यत्नः क्रियते युष्माभिस्तु पलायनीक्रियते इत्यर्थः अतएव अत्रास्तु भवतीषु मध्ये या मां अन्वेति अनुगमिष्यति सा मह्यमेव द्रुह्यति ममाहितमेव करिष्यति एवकारो भिन्नान्वयी । अन्वेति द्रुह्यतीति वर्त्तमानसामीप्ये लट् मह्यमिति क्रुधद्रुहेर्ष्यासूयार्थानां यम्प्रति कोप इति सम्प्रदानसंज्ञायां चतुर्थी ॥ ७ ॥

भैम्याहंसानुगमनमाह ॥ धृताल्पकोपेति ॥ अथानन्तरं सखीनां हसिते हास्यविषये धृतोऽल्पः कोपो यया तादृशी श्यामा स्त्रीविशेषो दमयन्ती हंसस्य कर्म्मभूतस्य या करानवाप्तिः कराभ्यामग्रहणं तस्या हेतोः मन्दाक्षेण लज्जावत्त्वेन लक्ष्या दृश्या सती सलज्जा सतीत्यर्थः हंसस्य पश्चात् लगति स्म हंसमनुययावित्यर्थः उपमिनोति यथा भास्वन्तं सूर्य्यं अभिप्रयातुरभिमुखीभूय गच्छतो जनस्य छाया तस्य पश्चात् लगति तथा सापि हंसस्य सूर्य्यस्य करानवाप्तेः किरणाप्राप्तेः श्यामा कृष्णा मन्दाक्षेण मन्दचक्षुषापि अनेन लक्ष्या दृश्या च भवति सूर्य्यकिरणसम्पर्कात् मन्दनयनजनानां दृष्ट्युपघातो भवति तद सम्पर्कात्तु तेद्रष्टुं शक्नुत इति तयोर्त्तां । श्यामा वयस्थं यथा ।

शस्ता न हंसाभिमुखी पुनस्ते
यातेति ताभिश्छलहस्यमाना।
साह स्म नैवाशकुनीभवेन्मे
भाविप्रियावेदक एष हंसः॥ ९॥
हंसोऽप्यसौ हंसगतेः सुदत्याः
पुरः पुरश्चारु चलन् बभासे।

शीते सुखोष्णसर्वाङ्गी ग्रीष्मे या सुखशीतला। तप्तकाञ्चनवर्णाभा सा श्यामा परिकीर्त्तितेति। मन्दाक्षं ह्रीस्त्रपा ब्रीडा लज्जेत्यमरः॥ ॥ ८॥

अथ सखीभिर्दमयन्त्याः शब्दच्छलेनोक्तिप्रत्युक्ती॥ शस्तेति॥ हे दमयन्ति ते तव हंसाभिमुखी राजहंससंमुखी अथच सूर्य्यसंमुखी यात्रा गमनं न शस्ता न प्रशस्ता अशकुनत्वेन शास्त्रनिषिद्धत्वात् इति ताभिः सखीभिः छलेन शब्दच्छलेन हस्यमाना सोपहासमुच्यमाना सा दमयन्ती इति आह स्म उवाच इति किं हे सख्यः एष हंसः मे मम नैव अशकुनीभवेत् अशकुनरूपो न भवतु प्रार्थनायां लिङ् अथ च एष शकुनः पक्षी भवेत् भवति न तु सम्मुखसूर्य्यरूपमशकुनमित्यर्थः किंभूतः भाविनो भविष्यतः प्रियस्य हितस्य आवेदकः सूचकः अथ च भाविनो नलरूपस्य प्रियस्य कान्तस्य कथकः। शकुनस्तु पुमान् पक्षिमात्रपक्षिविशेषयोः। शुभशंसिनिमित्ते च शकुनं स्यान्नपुंसकमिति मेदिनी॥ ९॥

प्रारब्धसम्भावनं हंसस्य मन्दगमनमाह॥ हंसोऽपीति॥ न केवलं सख्यस्तामुपहसन्ति स्म किन्तु असौ हंसोऽपि हंसस्येव गतिर्गमनं यस्यास्तथाविधायाः सुदत्याः शोभनदन्तायाः भैम्याः पुरःपुरोऽग्रेऽग्रे

Digitized by Google

वैलक्ष्यहेतोर्गतिमेतदीया
मग्रेऽनुकृत्योपहसन्निवोच्चैः ॥ १० ॥
पदेपदे भाविनि भाविनी तं
यथा करप्राप्यमवैति नूनं।
तथा सखेलं चलता लतासु
प्रतार्य्य तेनाचकृषे कृशाङ्गी ॥ ११ ॥
रुषा निषिद्धालिजनां यदेनां
छायाद्वितीयां कलयाञ्चकार।

चाटु यथाकुलं यथा तथा चलन् गच्छन् सन् वैलक्ष्यहेतो भैम्या लज्जो त्पादनार्थं एतदीयां भैमीसम्बन्धिनीं गतिं अग्रे ऽनुकृत्य सदृशीकृत्य उच्चैरतिशयेन उपहसन्निव उपहासं कुर्व्वन्निव बभास शुशुभे अन्यो ऽपि अन्यस्याग्रे गत्वा तद्गमनादिकमनुकृत्योपहसतीति तयोरौचित्यं ॥ १० ॥

विशिष्य हंसचेष्टामाह ॥ पद इति ॥ भावः प्रथमकामविकारः हंसग्रहणानुसन्धानमिति भावः सोऽस्याविद्यत इति तादृशी दम यन्ती भाविनि भविष्यति पदे पदे प्रतिचरणक्षेपे तं हंसं यथा नूनं निश्चयेन करप्राप्यं हस्तेन ग्राह्यं अवैति उत्तरस्मिन् पदेऽवश्यमेवैनं धारयिष्यामीति यथा जानाति तथा सखेलं सलीलं यथा तथा चलता गच्छता तेन हंसेन प्रतार्य्य वञ्चयित्वा कृशाङ्गी सा दमयन्ती लतासु लतागहनसमीपे आचकृषे नीता। निर्व्विकारात्मके चित्ते भावः प्रथमविक्रियेति साहित्यदर्पणः ॥ ११ ॥

अथ निर्जनस्थां भैमीं दृष्ट्वा हंसस्य वचनमाह ॥ रुषेति ॥ स हंसः रुषा कोपेन निषिद्धो निवारित आलिजनः सखीजनो यया तादृशीं

Digitized by Google

तदा श्रमाम्भःकणभूषिताङ्गीं
स कीरवन्मानुषवागवादीत् ॥ १२ ॥

अये कियद्यावदुपैषि दूरं
व्यर्थं परिश्राम्यसि वा किमित्थं ।
उदेति ते भीरपि किन्नु बाले
विलोकयन्त्या न घनावनालीः ॥ १३ ॥

एनां दमयन्तीं यदा छायेव समतिबिम्बमेव द्वितीया सहचरी यस्यास्तादृशीं एकाकिनीमित्यर्थः कलयाञ्चकार ज्ञातवान् तदा कीरवत् शुकपक्षीव मानुषी वाक् यस्य मानुषस्येव वाक् यस्येति वा तादृशः सन् श्रमाम्भःकणैर्घर्मजलबिन्दुभिर्भूषितमङ्गं यस्यास्तां दमयन्तीं अवादीदुक्तवान् यद्वा छायया कान्त्या अद्वितीयां असदृशीं एनां यदा यथा निषिद्धालिजनां कलयाञ्चकार तदावादीदिति योजना। श्रमाम्भ इत्यनेन आन्तेयमतो दूरमगत्वैव निवर्त्तिष्यते तदत्रैव स्थिता वक्तव्यमिति सूचितं। कीरशुकौ समावित्यमरः ॥ १२ ॥

किमवादीदित्याह ॥ अयइति ॥ अये हे बाले अल्पमतिके दमयन्ति कियद्दूरं यावत् उपैषि उपगमिष्यसि इत्यमनेन प्रकारेण व्यर्थं निरर्थकं वा किं परिश्राम्यसि परिश्रान्ता भवसि व्यर्थं पक्ष्यर्थमिति च भद्रवः किमर्थमिति पाठे तु कष्टकल्पना। नु भो घना निबिडा वना लीर्वनपंक्तीर्विलोकयन्त्याः पश्यन्त्यास्ते तव भीरपि भयमपि न उदेति नोत्पद्यते। अये इति आक्षेपसम्बोधने यावत् पर्य्यन्तार्थे वाक्यालङ्कारे वा किमाक्षेपे। उपैषीति वर्त्तमानसामीप्ये भविष्यति लट् ॥ १३ ॥

वृथार्पयन्तीमपथे पदं त्वां
मरुल्ललत्पल्लवपाणिकम्पैः ।
आलीव पश्य प्रतिषेधतीयं
कपोतहुङ्कारगिरा वनाली ॥ १४ ॥
धार्य्यः कथंकारमहं भवत्या
वियद्विहारी वसुधैकगत्या ।

वृथेति ॥ इयं वनाली वनश्रेणी आलीव सखीव मरुता वायुना ललन् पल्लवः कर इवेति तस्य कम्पैश्चालनैः तथा कपोतानां पारावतानां या हुङ्कारगीः हुमितिशब्दस्तया च अपथे मद्ग्रहणरूपे ऽसदिच्छेये अथ च अमार्गे वृथा निष्फलं यथा तथा पदं व्यवसायं अथ च चरणं अर्पयन्तीं कुर्वतीं त्वां प्रतिषेधति एतादृश्यामाराम्निवारयति इति पश्य विलोकय सख्यपि एतादृशीं सखीं करकम्पनेन हुङ्कारेण च निवारयति । हुङ्कारकिरेति पाठे हुङ्कारं किरतीति कृ विक्षेप इत्यस्मात् इगुपान्त्यप्रियादेरदित्यत् स्त्रियामाप् अपथेति नञः पथो वेत्यत् । पदं व्यवसितित्राणस्थानलक्ष्माङ्घ्रिवस्तुष्वित्यमरः ॥ १४ ॥

नाहं व्यर्थं परिश्राम्यामि किन्तु तव धारणार्थमित्याशङ्क्याह ॥ धार्य्यइति ॥ वसुधैव पृथिव्येव एका केवला गतिर्गमनाधारो यस्यास्तादृश्या भवत्या वियति आकाशे साधु विहरतीति तादृशोऽहं कथं कारं कथमिव धार्य्यः धर्तुं ग्राह्यः अहो आश्चर्ये सम्बोधने वा स्मरस्य कामस्य सख्या मित्रेण अनेन प्रत्यक्षविषयेण वयसा यौवनेनापि तव शिशुत्वं बालत्वं न खण्डितं नापसारितं अचलसत्त्वात्कथमन्यथा स्वस्य केवलं पृथिवीगामित्वं मम चाकाशविहारित्वमविचार्य्यैव

अहो शिशुत्वं तव खण्डितं न
स्मरस्य सख्या वयसाप्यनेन ॥ १५ ॥
सहस्रपत्रासनपत्रहंस
वंशस्य पत्राणि पतत्रिणः स्मः ।
अस्मादृशां चाटुरसामृतानि
स्वर्लोकलोकेतरदुर्लभानि ॥ १६ ॥

मद्ग्रहणालसा भवसीति भावः विहारीत्यनेन ममाकाशगमनं क्लेशसाध्यतया विहाररूपमिति सूचितं । अथ च स्मरस्य कन्दर्पस्य सहायस्य नलस्य सख्या उपकारकत्वान्मित्रेण वयसा पक्षिणा मया तव शिशुत्वं बाल्यत्वं न खण्डितं अपितु खण्डितप्रायमेव तव नलेन सह परिचयनायागतोऽस्मीति भावः । धार्ष्ट्ये इति पक्षे लिङ्लृत्या विति सूत्यः कथंकारमिति गताधीत् कथमित्थमेवमन्यथाभ्य इति कथंपूर्वकृञः ख्णा णम् ॥ १५ ॥

स्वपरिचयदानेनात्मनो धार्ष्ट्यत्वं ख्यापयति । सहस्रेति ॥ हे दमयन्ति वयं सहस्रपत्रं कमलमासनं यस्य तस्य ब्रह्मणः पत्राणि वाहनानि ये हंसास्तेषां कुवंशस्य तस्य पत्राणि पर्णभूतानि प्रसूतानीत्यर्थः पतत्रिणः पक्षिणः स्मः भवामः अन्यस्यापि वंशस्य वेणोः पर्णानि भवन्ति पत्राणि पक्षभूताः सहायभूता इति भावः किमेतेनेत्याह अस्मादृशां चाटूनि प्रियवचनानि तेषु ये रसाः शृङ्गारादयस्त एव अमृतानि तानि स्वर्लोकस्य स्वर्गभुवनस्य ये लोका देवास्तेभ्य इतरैर्मनुष्यादिभिर्दुर्लभानि न सुलभानि अतस्त्वया मद्धारणाय यत्नो न कर्त्तव्य इति भावः । पुंसि वंशः कुले वेणौ पृष्ठावयववर्गयोरिति मेदिनी पत्रं स्याद्वाहने पर्णे पक्षे च शरपक्षिणोरिति विश्वः लोकस्तु भुवने जन इत्यमरः ॥ १६ ॥

Digitized by Google

स्वर्गापगाहेममृणालिनीनां
नालामृणालाग्रभुजो भजामः।
अन्नानुरूपां तनुरूपऋद्धिं
कार्य्यं निदानाद्धि गुणानधीते ॥१७॥
धातुर्नियोगादिह नैषधीयं
लीलासरः सेवितुमागतेषु।

भवतु भवान् स्वर्गीयो हंसः सुवर्णशरीरत्वं कथमित्याशङ्ख्याह ॥ स्वर्गेति ॥ स्वर्गापगायाः स्वर्गङ्गाया हेममृणालिनीनां सुवर्णकमलिनीनां नाला मृणालानि च नालासम्बन्धीनि मृणालानि वा तेषामग्राणि भुञ्जत इति तादृशा वयं अन्नानुरूपां भक्षणीयवस्तुपरिणामवीर्य्ययोग्यां तनुरूपऋद्धिं शरीरसान्दर्य्यसमृद्धिं भजामः प्राप्नुमः कथमिदमित्याह हि यतः कार्य्यं घटादि कर्तृ निदानात् आदिकारणात् कपालादेः समवायिकारणात् गुणान् शौक्लादीन् अधीते प्राप्नोति कारणगुणाः कार्य्यं गुणमारभन्ते इति शास्त्रमतः अत्र कारणपदं समवायिकारणपरं आरभन्ते जनयन्ति प्रकृते तु सौवर्णमृणालादिभक्षणादस्माकं सुवर्णमयत्वं। नाला पद्मदण्डः मृणालं बिसं अथ च वयं नालाः नलसम्बन्धिन इत्यप्युद्भावितं । तनुरूपऋद्धिमित्यत्र ऋत्यकः इत्यनेन ऋतोरणो ह्रस्व इति पाक्षिकत्वात सन्ध्यभावः॥ १७॥

यदि भवान् ब्रह्मणो वाहनं तर्हि कथं पृथिव्यामागमनं आगमने वा किं कारणमित्यत्राह ॥ धातुरिति ॥ धातुर्ब्रह्मणो नियोगादादेशात् इतः परं यूयं यत्र कुत्रचित् स्थिताः श्रममपनयतेत्येवंरूपात् इह भूलोके नैषधीयं नलराजसम्बन्धि लीलासरः क्रीडातडागं सेवितुं आश्रयितुं आगतेषु हैमेषु सौवर्णेषु हंसेषु मध्ये

Digitized by Google

वैमेषु हंसेष्वहमेक एव
भ्रमामि भूलोकविलोकनोत्कः ॥ १८ ॥
विधेः कदाचिद्भ्रमणीविलासे
श्रमातुरेभ्यः स्वमहत्तरेभ्यः ।
स्कन्धस्य विश्रान्तिमदान्ततादि
श्राम्यामि नाविश्रमविश्वगोऽपि ॥ १९ ॥
बन्धाय दिव्ये न तिरश्चि कश्चित्
पाशादिरासादितपौरुषः स्यात् ।

एकोऽहमेव भूलोकस्य विलोकने दर्शने उत्कः उत्कण्ठितः सन् भ्रमामि चरामि भूलोकं विलोकयन् प्रसङ्गादत्रागतोऽस्मी त्यर्थः एकस्यैव मम ग्रहणार्थमोदृक्प्रयासं करोषि नलसरसि तु मादृशा बहवो हंसास्तिष्ठन्तीति सूचितं ॥ १८ ॥

नन्वेवमुत् भूलोकपर्यटनश्रान्तस्य तव धारणं सुकरमेव कथमुक्तं धार्य्यः कथंकारमित्यादौ त्याशङ्कायामाह ॥ विधेरिति ॥ हे दमयन्ति कदाचित् कस्मिंश्चित् समये विधेर्ब्रह्मणो भ्रमणीविलासे भ्रमणलीलायां श्रमे आतुरेभ्यो व्याकुलेभ्यः स्वमहत्तरेभ्यः निजवंशप्रधानहंसेभ्यः स्कन्धस्य विश्रान्तिं विश्रामं अदां यदवधि श्रान्तानां तेषां भारमहं गृहीतवानित्यर्थः तदादि तत्प्रभृति अविश्रमं क्वचित् विश्रान्तिमकृत्वैव विश्वगोऽपि सकलभुवनगाऽपि न श्राम्यामि न श्रान्तो भवामि अविश्रमं अविरतं विश्वगोऽपीति केचित्। भ्रमणीति कृत्यटन्त्वादल्पार्थत्वाद्वा स्त्रियामो । १९ ॥

धारणोपायपाशादिनाप्यधार्यत्वप्रतिपादनपुरःसरं प्रबन्धमनुसरन्नाह । बन्धायेति । दिव्ये स्वर्गीये तिरश्चि पक्षिविशेषे मादृशि

Digitized by Google

एकं विना मादृशि तन्नरस्य
स्वर्भोगभाग्यं विरलोदयस्य ॥ २० ॥
इष्टेन पूर्त्तेन नलस्य वश्याः
स्वर्भोगमत्रापि लभन्त्यमर्त्याः ।

मदिधे जने पाशादिः पशुबन्धनोपायस्तद्वादिः वश्याय बन्धनाय आसादितं प्राप्तं पौरुषं सामर्थ्यं येन तादृशो न स्यात् दिग्बलान्मादृशं बहुमन्यत इत्यर्थः किन्त्वयं विशेषः विरलोदयस्य विरलजन्मनः क्वापि त्यस्येत्यर्थः नरस्य मनुष्यस्य तत् प्रसिद्धं एकमसाधारणं स्वर्भोग भाग्यं स्वर्गभोगजनकमदृष्टं विना यो नरोऽपि भूत्वा स्वर्गभोगं करोति तस्यैव वयं वश्या इति भावः एतेन मादृशादिवशपरिवर्त्ता मादिजन्यसुखानुभवः पुण्यातिशयसाध्य इति सूचितं एवंविधो जनः क्वचन न सर्व्व इत्यर्थः अथ च विगतो रेफो यत्र सविरः तस्य लकारस्य उदय आविर्भावो यत्र सलोदयः विरश्चासौ लोदयश्चेति कर्म्मधारयः तादृशस्य नरस्य नलस्येत्यर्थः नलस्यैव तदेकं स्वर्भोग भाग्यमस्ति अतस्तस्यैव वयं वश्या इत्यर्थः एतेन त्वं यदि नलपत्नी भवेस्तदैव तव धार्य्या भवेयं नान्यथेति ध्वनितं विगतो रो विरस्तस्य स्थाने लस्योदयो यत्रेति भावः ॥ २० ॥

नलस्य स्वर्भोगभाग्यमेव ध्रुव इत्याह ॥ इष्टेनेति ॥ अमर्त्या देवा इष्टेन यागादिना पूर्त्तेन खातादिना च वश्या नलं विना यथाविधेष्टा दीनि न केनापि कृतानीति तस्यैव वशीभूताः सन्तः अत्रापि अस्यां भूम्यामपि अस्मिन् मानवजन्मन्यपि वा नलस्य स्वर्भोगं स्वर्गीयोपभोगं लभन्ति जनयन्ति ननु कथं मानुषस्य स्वर्गीयोपभोगसम्भव इत्याशङ्क्याह यतः महीरुहा अचेतना वृक्षा अपि दोहदसेकये धूर्याव

Digitized by Google

महीसृता दोहदसेकशक्ते
राकालिकं कोरकमुद्गिरन्ति ॥ २१ ॥
सुवर्णशैलादवतीर्य्य तूर्णं
स्वर्वाहिनीवारिकणावकीर्णैः।

शैवजलसेचनयोः शक्तैः सामर्थ्यादाकालिकं अव्यवालभवं कोरकं कलिकां उपलक्षणात् फलादिकञ्च उद्गिरन्ति कालान्तरेऽपि प्रकट यन्ति स्वर्गोद्याने हि युगपदृतुषट्कावस्थानात् सर्व्वदैव सर्व्वाणि फलपुष्पादीनि जायन्ते अत्रापि तथेत्यविशेषः तथा वृक्षा अपि दृष्टेन दोहदेन पूर्तेन खातेनालवालरूपेण नलाधीनाः सन्त आका लिकं कोरकमुद्गिरन्तीत्यपि बोध्यं। अथ क्रतुकर्म्मेष्टं पूर्तं खातादि कर्म्मचेत्यमरः ॥ २१ ॥

वयमपि स्वर्गीयजनमिव तं सेवामहे इत्याह ॥ सुवर्णेति ॥ वयं सुवर्णशैलात् सुमेरोस्तूर्णं शीघ्रं अवतीर्य्य उपनम्य स्वर्व्वाहिन्या मन्दाकिन्या वारिकणैर्जलकणैरवकीर्णाः सिक्ताः पक्षैः करसैः स्मरकेलिकाले सुरतसमये तं नृपं नलं वीजयामः पक्षवातेन तस्य सुरतश्रममपनयाम इत्यर्थः किम्भूतैः पक्षैः चामरैश्च सह वरं स्रतं सख्यं यैः तादृशैः सुरभवयायुदारा श्रमापनयनरूपसमानधर्म्मेण लाभामरसदृशैरित्यर्थः। यद्यपीदं सर्व्वं मिथ्यैव तथाप्येतदकुर्व्वं तस्य न कश्चिद्दोषः तदानीमस्य विवाहार्थमुद्यतत्वात्। उक्तञ्च महा भारते। न नर्म्मयुक्तं वचनं हिनस्ति न स्त्रीषु राजन्न विवाहकाले।

तं बीजयामः स्मरकेलिकाले
पक्षैर्नृपं चामरबद्धसख्यैः ॥ २२ ॥
क्रियेत चेत्साधुविभक्तिचिन्ता
व्यक्तिस्तदा सा प्रथमाभिधेया।

प्रायात्यये सर्व्वधर्मापहारे यथान्तान्याद्धरपावकानीति एवमन्य त्रापि ज्ञेयं॥ २२॥

अथ दमयन्तीं विलोभयितुमष्टादशभिः श्लोकैर्नलं प्रशंसन् सम्प्रति तस्य साधूनामग्रगण्यत्वमाह॥ क्रियेतेति॥ अत्र के के साधवः सन्तीति साधूनां विभक्त्या विभागेन चिन्ता विचारणा विभक्तेः चिन्ता जिज्ञासा वा चेद्यदि क्रियेत जनैरिति शेषः तदा सा नल रूपा व्यक्तिर्जनः प्रथमाभिधेया आदावुल्लेख्या सर्व्वसाधुभ्योऽभ्यर्हि ततात् साधुविचारणायां हि प्रथममुत्कृष्टतममुल्लिखन्ति यथा दुत्कृष्टतरं तत उत्कृष्टमेवं क्रमः सा का या व्यक्तिः सौजसां निज तेजसां विलासैः प्रभावैः तावद्बहु समस्तं पदं अर्थात् शत्रूणां स्थानं वस्तु वा साधयितुं आयत्तीकर्त्तुं क्षमा समर्था स्यात् भवेत् नाम सम्भावनायां। यद्वा नमनं नामः स न विद्यते येषां ते अनमास्तेषाम प्रणतानां शत्रूणां बहु असंख्यातं पदं स्थानं तावत् साकल्येन साध यितुं क्षमा भवेत एतेन नले सामाख्यमुपायं विना उपायान्तरं नास्तीति सूचितं। बहुरिति सविसर्गपाठे तु तावत् सकलं क्षमा नामपदं पृथिवीसंज्ञकपदं साधयितुं एकापि बहुरनेकधा स्यादि त्यर्थः। अथ च साधुविभक्तीनां चिन्ता सम्यक् विभक्तिषु मध्ये का साध्वी विभक्तिरिति विचारणा चेद्यदि क्रियेत तदा सा व्यक्तिः प्रथ माभिधेया प्रथमेति अभिधेयं नाम यस्याः सा प्रथमा विभक्तिरेव

Digitized by Google

या सौजसां साधयितुं विलास
स्तावत् क्षमा नामपदं बहु स्यात् ॥ २३ ॥
राजा स यज्वा विबुधव्रजत्रा
कृत्वाध्वराज्योपमयैव राज्यं ।

साध्वीत्यर्थः साधुले हेतुमाह या प्रथमा विभक्तिः सौजसां स्वघट
कीभूतानां सुपौजस् इति प्रत्ययानां विलासैः विसर्गादिरूपेण
परिणामैः तावद्बहु अनेकं नाम प्रातिपदिकं पदं सुबन्तं साधयितुं
कर्त्तुं क्षमा समर्था स्यात् स बुधौ सर्व्वस्मिन्नुच्चारके सर्व्वस्मिन्नामनि
च प्रथमाया एव विधानात् अन्यविभक्तिभ्योऽस्याः समकत्वं यथा च
सूत्रं सम्बुद्ध्युक्तात् नु सौ अम इति षष्ठिरिति यच्यते सोप्यते एक
वादि प्रातिपदिकार्थोऽनर्थेति षष्ठिः बदुक्तं महत्यर्थः प्रत्ययेनाभूयते
केवलाप्रयोगित्वादिति । अथ वा यदि साधुविभक्तीनां चिन्त्या
विचारः क्रियेत तदा या षष्ठिः सौजसां मध्ये प्रथमा सुलक्षणा
विभक्तिः सैव अभिधेया सम्यक्तया वक्तव्या यतो विलासैः एक
त्वादिनिमित्तमनपेक्ष्यापि सर्व्वत्र सद्भावैस्तावद्बहु नाम पदं साध
यितुं क्षमा स्यात् सोप्रथमविविभक्तयो हि तत्तन्निमित्तीभूतमर्थं
विना न विधीयन्ते सुस्तु पदत्वनिष्पादनार्थमपि क्रियते । उक्तञ्च
लिङ्गसंख्याविनिर्म्मुक्तात् सुः पदत्वार्थमव्ययादिति ॥ २३ ॥

अथ यागशीलत्वं सार्व्वभौमत्वञ्चाह ॥ राजेति ॥ धियश्चोन्नियतत्वात्
साश्रितद्धान्तस्वजनाधीनदेया हता भोः सम्यक्त्वेन ताद्दृशः स
यज्वा विधिनेष्टवान् राजा नलः अध्वरे यज्ञे यदाज्यं घृतं तदुपम
यैव साम्येनैव राज्यं विबुधव्रजत्रा कृत्वा विबुधानां पण्डितानां अथ
च देवानां व्रजः समूहस्तदधीनं देयं सम्यक् भुङ्क्ते उपभुङ्क्ते यथा

Digitized by Google

भुङ्क्तेऽश्रितश्रोत्रियसात्कृतश्रीः
पूर्व्वं त्वहो शेषमशेषमन्त्यं ॥ २४ ॥
दारिद्र्यदारिद्रविशेषघवर्षै
रमोघमेघव्रतमर्थिसार्थे ।

घृतं अग्रे देवेभ्यो दत्वा पश्चाद्भुङ्क्ते तथा राज्यमपि आदौ श्रोत्रियेभ्यो दत्वा भुङ्क्ते इत्यर्थः किन्त्वयं विशेषः पूर्व्वश्लोकोक्तक्रमापेक्षया प्रथमं आज्यं शेषं यागादवशिष्टं भुङ्क्ते अन्त्यं राज्यं अशेषं सकलं भुङ्क्ते अत एव अहो आश्चर्य्यमिदं यदादौ भुज्यते तदशेषं शेषेतिसंज्ञकं न भवति यत्तु अन्ते भुज्यते तत शेषमित्युच्यते लोकैः अत्र तु तद्विपरीतमित्याश्चर्य्यं । यज्वा तु विधिनेष्टवानित्यमरः विबुधः पण्डिते देवे इति विश्वः ॥ २४ ॥

अस्य दातृत्वातिशयमाह ॥ दारिद्र्येति ॥ के नाम जनाः तं लोकनाथं राजानं नलं इष्टानि ईप्सितानि धनादीनि न नाथन्ति न याचन्ते अपि तु सर्व्वे एव याच्ञायां कारणभूतानि विशेषणान्याह किम्भूतं दारिद्र्यदारी दरिद्रत्वविनाशको यो अविशेषो धनसमूहस्तस्य वर्षैस्त्यागैः करणैः अर्थिसार्थे याचकसमूहे अमोघं सफलं मेघस्येव व्रतं नियमः स्वभावो वा यस्य तादृशं यथा मेघा जलवर्षैः सर्व्वान् जनान् सुखयन्ति तथा धनवर्षैरयमपि सर्व्वानर्थिनः सुखयति न तु विद्वत्तादिगुणविचारं करोति तथा सन्तुष्टं सर्व्वदा सन्तोषयुक्तं न तु इतरवदान्यवदविरतयाचकयाचनेन विरक्तं तथा इष्टाः पूजिता देवा येन इष्टाः प्रिया देवा यस्येति वा तादृशं इष्टः प्रजानां हितो

सन्तुष्टमिष्टानि तमिष्टदेवं
नाथन्ति के नाम न लोकनाथं॥ २५ ॥
अस्मात् किल श्रोत्रसुधां विधाय
रम्भा चिरम्भामतुलां नलस्य।
तत्रानुरक्ता तमनाप्य भेजे
तन्नामगन्धान्नलकूवरं सा॥ २६॥

देवो राजा चेति वा अथ च सन्तुष्टं इष्टदेवं लोकनाथं नारायणं के जना इष्टान् वरान् न याचन्ते। अत्र नाथेर्याचनार्थकत्वेन दुहादित्वाद्विकर्म्मकत्वं॥ २५॥

अथ रूपवत्त्वातिशयमाह॥ अस्मादिति। सा प्रसिद्धा देवाङ्गनाविशेषो या रम्भा नलस्य अतुलां लोकत्रयेऽप्यनुपमां भां कान्तिं अस्मात्त्वत्तः चिरं श्रोत्रसुधां विधाय कर्णामृतं कृत्वा बहुकालं सादरं श्रुत्वेत्यर्थः तत्र नले अनुरक्ता जातानुरागा सती तं नलं अनाप्य किल अप्राप्यैव तन्नामगन्धान्नलनामसम्बन्धात् नलकूवरं कुबेरपुत्रं भेजे प्राप अन्योऽपि ईप्सितं वस्त्वप्राप्य किञ्चित् साधर्म्येण तत्सदृशमन्यदपि वस्तु अगत्या गृह्णाति नारीषु रम्भा पुरुषेषु विष्णुरिति सर्व्वेषामेषां उत्तमत्वेन रम्भा प्रसिद्धा सापि नलं न प्राप्ता अतो नलः कीदृक् सुन्दर इति विवेचनीयमिति भावः। अस्मादिति पञ्चमी बहुवचनान्तं। रम्भा त्रिदशभामिन्यां कदल्यां चेति हेमचन्द्रः गन्धो गन्धक आमोदे लेशे सम्बन्धगर्व्वयोरिति विश्वः॥ २६॥

Digitized by Google

स्वर्लोकमस्माभिरितः प्रयातैः
केलीषु तद्गानगुणान्निपीय।
हाहेति गायन् यदशोचि तेन
नाम्नैव हाहा हरिगायनोऽभूत्॥ २७॥
शृण्वन् सदारस्तदुदारभावं
हृष्यन्मुहुर्लोम पुलोमजायाः।

अस्य गानलक्षणगुणवत्त्वमाह ॥ स्वर्लोकमिति ॥ केलीषु क्रीडासु अस्य नलस्य गानलक्षणान् गुणान् गानस्य गुणान् माधुर्य्यादीन् वा निपीय श्रुत्वा इतो मर्त्यलोकात् स्वर्लोकं प्रयातैर्गतैरस्माभिः कर्तृभिः गायन् गानं कुर्व्वन् हरिगायन इन्द्रस्य गायको गन्धर्व्वविशेषो हाहेति यदशोचि हाकष्टमिति यन्निन्दितः तेनैव हेतुना स हरिगायनो नाम्ना हाहा अभूत् ततः प्रभृति हाहेति नाम्ना स जने हृष्यतइत्यर्थः। हाहाहूहूश्चैवमाद्या गन्धर्व्वास्त्रिदिवौकसामित्यमरः॥ २७॥

का कथा मर्त्ययोषितां देवीनामपि तद्गुणान् श्रुत्वा विकारो जायत इति श्लोकचतुष्टयेनाह ॥ शृण्वन्निति ॥ लोकपाल इन्द्रः सदारः सस्त्रीको भूत्वा तस्य नलस्य उदारभावं औदार्य्यं शत्रुमित्रसमतारूप नायकगुणं शृण्वन् आकर्णयन् सन् पुलोमजायाः शच्याः मुहुर्व्वारं वारं हृष्यत् उद्गच्छत् रोम पुलकेन अर्थात्तस्याः शुभादृष्टेन नालोकत न दृष्टवान् अदर्शने हेतुगर्भविशेषणमाह किम्भूतः प्रमोदवाष्पैरानन्दाश्रुभिराहृता परिपूर्णा नेत्राणां चक्षुषां माला समूहो यस्य सः यदि परपुरुषगुणं श्रुत्वा शच्याजातं रोमाञ्चमिन्द्रोऽजानत्तदा मान

Digitized by Google

पुण्येन नालोकत लोकपालः
प्रमोदवाष्पावृतनेत्रमालः ॥ १८ ॥
सापीश्वरे शृण्वति तद्गुणौघान्
प्रसह्य चेतोहरतोऽर्द्धशम्भुः ।

सिकथभिचारेणाग्नि प्रसवीलात् परित्यागमकरिष्यत् अतोयदद
र्शनं तत्र श्रद्धा एव पुण्यं बलवदिति भावः । उदारभावं दातृत्वमिति
बहवः उदारभावं दाक्षिण्यमित्यपि केचित् । शोभा विलासो माधुर्य्यं
गाम्भीर्य्यं धैर्य्यतेजसी । ललितौदार्य्यमित्यष्टौ सत्वजाः पौरुषागुणा
इति औदार्य्यं शत्रुमित्रयोः समतेति च साहित्यदर्पणः उदारो
दातृमहतोर्दक्षिणेऽप्यभिधेयवदिति मेदिनी ॥ १८ ॥

सापीति ॥ ईश्वरे शिवे प्रसह्य बलात्कारेण चेतोहरतो मना
हारिणस्तस्य नलस्य गुणौघान् शोभाविलासादिसात्विकनायकगुण
समूहान् शृण्वति आकर्णयति सति सापि पातिव्रत्येन प्रसिद्धा
अपर्णापि पार्वत्यपि कण्डूयनकैतवेन कण्डूतिव्याजेन अङ्गुल्या रुद्धः
कर्णो यया तादृशी कदा न अभूत् अपि तु सर्व्वदैव तथाविधगुण
श्रवणेन मानसव्यभिचारं सम्भाव्य पातिव्रत्यभङ्गभिया तदश्रवणार्थं
मङ्गुलिरुद्धकर्णा कदा नाभूदित्यर्थः ननु नलगुणवर्णनप्रस्तावे कथ
मन्यत्र न गच्छतीत्याशङ्क्य हेतुगर्भविशेषणमाह किम्भूता अर्द्धं
शरीरार्द्धं शम्भुर्यस्याः सा शम्भुं विहायान्यत्र गमनाभावात् सुतरां
पातिव्रत्यरक्षणाय कर्णरोधमेव चकारेति भावः अपर्णेति सार्थकं
पदं यया शम्भुप्राप्त्यर्थं तपसि गलितपर्णभोजनमपि परित्यक्तं सापि
एवं करोतीति । अथ च कर्णकण्डूयनरूपं मोट्टायितं चकार ।

Digitized by Google

अभूदपर्णाङ्गुलिरुद्धकर्णा
कदा न कण्डूयनकैतवेन॥ २९॥

अलं सजन् धर्मविधौ विधाता
रुणद्धि मौनस्य मिषेण वाणीं।
तत्कण्ठमालिङ्ग्य रसस्य तृप्तां
न वेद तां वेदजडः स वक्रां॥ ३०॥

श्रियस्तदालिङ्गनभूर्न भूता
व्रतक्षतिः कापि पतिव्रतायाः।

तद्भावभाविते चित्ते वल्लभस्य कथादिषु। मोट्टायितमिति प्राहुः कर्णकण्डूयनादिकमिति साहित्यदर्पणः॥ २९॥

अलमिति॥ विधाता ब्रह्मा धर्मविधौ समाध्यादिधर्मकर्मणि सजन् आसक्तः सन् मौनस्य मिषेण व्याजेन वाणीं अलं अर्थं रुणद्धि आवृणोति वाणी बहिर्गता सती पुरुषान्तरं भजेदित्याशङ्कया तस्या बहिर्गमननिवारणमेव मौनव्याजेन करोति न तु धर्ममेवेत्यर्थः वैयर्थ्य मेवाह वेदजडो वेदपाठेष्वेवाकुलीकृतहृदयः अत एव अनवरतवेद पाठेन वैषयिकव्यापारानभिज्ञः स विधिः तत्कण्ठं नलकण्ठं आलिङ्ग्य आश्लिष्य रसस्य तृप्तां शृङ्गारादिरसेन पूर्णां अत एव शृङ्गारेण ग्रीवां वक्रां वक्रोक्तिरूपां अत एव परनायकाश्रयणात् कुटिलां तां वाणीं न वेद न जानाति निरुद्धापि कदा स्वकण्ठाभिगम्य नलकण्ठ मालिङ्गितवतीति न जानातीति भावः। अत्र उपनायकस्य विधा तरि स्वनायकस्य वाण्याश्च परमात्मिन्या व्यवहारारोपात् समासोक्ति रियं। रसस्येति तृप्त्यर्थस्य चेति कर्मणि षष्ठी॥ ३०॥

श्रिय इति॥ पतिव्रताया मनोवाक्कायकर्मभिः पत्यव्यभिचारिण्याः श्रियो लक्ष्म्याः शोभारूपत्वेन राज्यलक्ष्मीरूपत्वेन वा तदालिङ्गनात्

Digitized by Google

समस्तभूतात्मतया न भूत
तद्भर्त्तुरीर्ष्याकलुषाणुनापि ॥ २१ ॥
धिक् तं विधेः पाणिमजातलज्जं
निर्म्माति यः पर्व्वणि पूर्णमिन्दुं ।

नलालिङ्गनाद्युत्पत्तिर्यस्यास्तादृशी कापि व्रतच्युतिः पातिव्रत्यहानिर्न भूता न जाता तथा तस्या लक्ष्म्या भर्त्तुर्विष्णोः ईर्ष्यया स्वपत्न्याः परनायकालिङ्गनदर्शनासहिष्णुत्वरूपया यत् कलुषं कालुष्यं तस्य अणुनापि लेशेनापि न भूतं न जातं उभयत्र हेतुमाह समस्तभूतात्मतया विष्णोः सर्व्वभूतस्वरूपत्वेन नलोऽपि विष्णुरेव अतस्तदालिङ्गनेन लक्ष्म्याः पतिव्रतात्वभङ्गो विष्णोर्व्वा ईर्ष्याकालुष्यं नाभूदित्यर्थः । भूतेति भौतिकाद्युपलक्षणं न तु वियदादिभूतपञ्चकमात्रपरं तथा च सर्व्वं विष्णुमयं जगदिति श्रुतिः यद्वा समस्तभूतानां आत्मा समस्तभूतात्मा तस्य भावस्तत्ता तया तथा च श्रूयते । एक एव हि भूतात्मा भूते भूते व्यवस्थित इति ॥ २१ ॥

अथ नलस्य मुखादिवर्णनेन भैमीं विलोभयति ॥ धिगिति ॥ विधेर्ब्रह्मणो यः पाणिर्हस्तः कृता तस्य नलस्य मुखश्रीर्मुखशोभा येन तादृशः सन्नपि पर्व्वणि पूर्णिमायां इन्दुं चन्द्रं पूर्णं निर्म्माति रचयति अतएव अजातलज्जं निर्लज्जं तं पाणिं धिक् नलानने सत्यपि यः पर्व्वणि चन्द्रं पूर्णं करोति स निर्लज्जत्वान्निन्द्य एवेत्यर्थः स तु विधेः पाणिर्विज्ञः कर्त्तव्याकर्त्तव्यविवेचकः स कः यः स्मृततन्मुखश्रीः सन् कृतं निर्म्मितं अर्द्धं यस्य तथाविधमपि तं चन्द्रं भवमूर्द्ध्नि हरमस्तके औज्झत् त्यक्तवान् इत्यहं मन्ये यः प्रारब्धमपि

मन्ये सविघ्नः स्मृतनम्मुखश्रीः
स्नातार्द्धमौञ्जरन्त्रमूर्द्धि यस्तं ॥ ३२ ॥
निलीयते ह्रीविधुरः स्वजैत्रं
श्रुत्वा विधुस्तस्य मुखं मुखान्नः ।
सूरे समुद्रस्य कदापि पूरे
कदाचिदभ्रभ्रमदभ्रगर्भे ॥ ३३ ॥

तत उत्तमस्याव्ययस्य अरत्वात् व्यजति स विघ्न एवेति भावः युक्तञ्च हरमूर्द्धनि त्यागस्तस्य जटिलत्वेन पिधानयोग्यत्वात् चन्द्रादप्यतिरमणीयं तस्य मुखमिति पर्य्यवसितोऽर्थः। अतथाकर्त्रोरीश्वरयोस्तथा कर्त्तृत्वेन सम्भाव्यमानत्वान्मन्ये इत्यस्य योगाच्च वाच्योत्प्रेक्षेयं । स्मृत तन्मुखश्रीरिति वाक्यार्थहेतुकत्वाद्येनोभयञ्च सम्भवति ॥ ३२ ॥

निलीयत इति ॥ विधुश्चन्द्रः नोऽस्माकं मुखात् तस्य नलस्य मुखं स्वजैत्रं स्वस्य जेतृ श्रुत्वा शब्दबोधविषयीकृत्य ह्रीविधुरो लज्जया विकलः सन् कदाचित् अमावस्यायां सूरे सूर्य्ये कदापि अस्तसमये समुद्रस्य पूरे जलौघे कदाचित् प्रावृट्काल अभ्रे आकाशे भ्रमन्ति यानि अभ्राणि मेघास्तेषां गर्भे अभ्यन्तरे च निलीयते अन्तर्हितो भवति अन्योऽपि स्वजेतारं श्रुत्वा लज्जाविकलः सन् गुप्तस्थानेषु अन्तर्हितो भवति। कदाप्यदभ्रभ्रमदभ्रगर्भे इति पाठे तु अदभ्राणि बहूनि यानि भ्रमदभ्राणि भ्रमणकर्तृमेघास्तेषां गर्भे इत्यर्थः। पूरोऽम्बुसमूहे खाद्यसंशुद्धिखाद्ययोरिति अभ्रं मेघे च गगने धातुभेदे च काञ्चन इति च मेदिनी प्रभूतं प्रचुरं प्राज्यमदभ्रं बहुलं बहुलमित्यमरः॥ ३३ ॥

Digitized by Google

संभाव्य मः सख्यजभृत्यवगान्
दैत्यारिरत्यजनवास्यनुत्यै ।
तत्पृष्ठकुमलाभिसरोजपीता
द्धातुर्भियाज्यं रमते रमायां ॥ २४ ॥
रेखाभिरासे गणनादिवास्य
द्वात्रिंशता दन्तमयीभिरन्तः ।

संभाव्येति ॥ दैत्यारिर्विष्णुः सध्वजस्य निजवाहनस्य गरुडस्य भृत्यवर्गान् तस्य पक्षीजलाद्दासभूतानिऽस्मान् सख्यस्य निजकम लस्य नलास्यस्य नलमुखस्य नुत्यै स्तोत्राय संभाव्य यूयं कमलवदनं स्तुते त्यादिश्य धातुर्भयात् सकाशाद्विभयं भयगतमयं यथा तथा रमायां लक्ष्म्यां रमते क्रीडति विभूतावारुः यथा नलास्यमुखा संकु चत् मुकुलीभवद्यन्नाभिसरोजं नाभिपद्मं तेन पीतात् आच्छादितात् ब्रह्मा हि नाभिसरोजे सर्व्वदा वसति सुतरां क्रीडायां लज्जा भवेत् यतोऽस्माभिः स्तोत्रे नलवदनप्रशंसया सरोजे सङ्कोचिते तद् च्छन्नात् ब्रह्मणोऽपश्यतो विलज्जितो रमत इत्यर्थः अन्यस्यापि स्वप्रेम नामश्रवणेन सङ्कोचो भवति यथा वाच्यत्वं पद्मसदृशं यन्नलास्यं तस्य नुत्यै पद्मसदृशप्रशंसया पद्मानां मुकुला युक्तैव चन्द्रस्य विरोधित्वेन तत्सदृशस्यविरोधित्वात् । सतोधन्वन्तरौ चन्द्रे शङ्खेऽब्जं पद्मसद्वयो रिति हेमचन्द्रः स्तवः स्तोत्रं नुतिस्तुतिरित्यमरः ॥ २४ ॥

रेखाभिरिति ॥ अत्र नले चतुर्दश च अष्टादश च रेखापि त्रिप्रकारा अपि विद्याः सन्ति विद्यन्ते केचिद्विद्यानां चतुर्दशत्वं वदन्ति केचिदष्टादशत्वं तदुभयरूपा अपि सन्तीत्यर्थः इति अथ

Digitized by Google

चतुर्दशाष्टादश चात्र विद्या
द्वेधापि सन्तीति शशंस रेखाः ॥ २५ ॥
श्रियौ नरेन्द्रस्य निरीक्ष्य तस्य
स्मरामरेन्द्रावपि न स्मरामः ।
वासेन सम्यक् क्षमयोश्च तस्मिन्
बुद्धौ न दध्मः खलु शेषबुद्धौ ॥ २६ ॥

नलस्य अन्तराले मुखमध्ये द्वात्रिंशता द्वात्रिंशत्संख्याभिर्दन्तमयीभिर्दन्तरूपाभी रेखाभिर्गणनात् संख्यानात् शशंसेव कथयतीमेव दन्तानां रेखात्मोत्कीर्तनं सूचनेव सामुद्रिकशास्त्रवचनबोधनार्थं । विद्यानां चतुर्दशत्वमष्टादशत्वञ्चोक्तं प्रथमसर्गे ॥ २५ ॥

श्रियाविति ॥ तस्य नरेन्द्रस्य नलस्य श्रियौ कान्तिसम्पत्ती निरीक्ष्य दृष्ट्वा स्मरामरेन्द्रावपि का कथान्येषां कामेन्द्रावपि न स्मरामः न तत्तुल्यत्वेन चिन्तयामः स्मरे कान्तिरेव इन्द्रे सम्पत्तिरेव नले तु द्वे अपीत्यस्य ताभ्यामाधिक्यं तथा तस्मिन्नले क्षमयोश्च पृथिवी शान्त्योश्च सम्यग्वासेन निरपायमवस्थित्या खलु निश्चयेन शेषबुद्धौ अनन्तसुगतावपि बुद्धिं मत्या न दध्मः न धारयामः न स्मरणविषयी कुर्म इत्यर्थः शेषे केवलं पृथिवी सुगते केवलं शान्तिः नले तु तदुभयमित्याधिक्यं उत्कृष्टप्रस्तावे ततोन्यूनस्यान्यस्य स्मरणं जुगुप्सितमिति तत्र कृतमस्माभिरिति भावः । श्रियाविति क्षमयोरिति च सरूपेषु यदिष्टमित्येकशेषः । श्रीः सम्पत् कान्तिश्चेति ख्यातः क्षितिक्षान्त्योः क्षमायुक्ते क्षमं शक्ते हिते त्रिष्वित्यमरः ॥ २६ ॥

Digitized by Google

विना पतत्रं विनतातनूजैः
समीरणैरीक्षणलक्षणीयैः ।
मनाभिरासीदनणुप्रमाणै
र्न निर्जिता दिक्कतमा तदश्वैः ॥ ३७ ॥
संग्रामभूमीषु भवत्यरीणा
मस्त्रैर्नदीमातृकतां गतासु ।

विनेति ॥ तदश्वैर्नलघोटकैः कतमा दिक् निर्ज्जिता वशीकृता न आसीत् अपि तु सर्व्वैव किम्भूतैः पतत्रं पक्षं विना विनतातनूजैर्गरुडरूपैः तथा ईक्षणलक्षणीयैर्नयनगोचरैः समीरणैर्वायुभिः तथा अनणुप्रमाणैर्महापरिमाणैर्मनोभिश्चित्तैः गरुडो हि पक्षसहायो गच्छति वायुरचाक्षुषस्तद्वेगे प्रत्यक्षमानप्रमाणवादिनो न विश्वसन्ति मनसस्त्वणुपरिमाणमतस्तस्य गौरवाभावाद्वेगो युज्यते अश्वास्तु तद्विपरीता अपि तद्रूपा इत्युपमानादुपमेयस्याधिकधर्म्मवत्त्वादधिकारूढवैशिष्ट्यरूपकमिदं एतेन नलः सर्व्वदिग्विजेता इति वस्तुध्वनिः ॥३७॥

संग्रामेति ॥ हे दमयन्ति अरीणां शत्रूणां अस्त्रैः रुधिरैर्नदीमातृकतां नदीजलपाल्यत्वं गतासु प्राप्तासु संग्रामभूमीषु रणभूमीषु तस्य नलस्य बाणधाराः शरपरम्परा एव पवनाशनाः सर्पास्तेषां राजन्नीर्यैर्विपक्षराजसमूहसम्बन्धिभिरसुभिः प्राणवायुभिः सुभिक्षं आहाररसौलभ्यं भवति संग्रामे नलबाणैः सर्व्वे शत्रवो विनाशिता इति भावः । नदीमातृकभूमिषु अवग्रहादिसद्भावेऽपि सुभिक्षं भवति अत्र पवनाशनेति सार्थकं पदं वायुभुजां वायुबाहुल्यएव सुभिक्षं भवति । सुभिक्षमिति भिक्षाणां समृद्धिरित्यव्ययीभावः देशोनद्यम्बुवृष्ट्यम्बु

Digitized by Google

तडागधारापवनाशनानां
राजश्रजीयैरसुभिः सुभिक्षं॥ ३८ ॥
यशोयदस्याजनि संयुगेषु
कण्डूलभावं भजता भुजेन।
हेतोर्गुणादेव दिगापगाली
कूलङ्कषत्वं व्यसनं तदीयं॥ ३९ ॥
यदि त्रिलोकी गणनापरा स्या
त्तस्याः समाप्तिर्यदि नायुषः स्यात्।

सर्प्यश्रशीहियालिवः। स्याप्रदीमातृकोदेवमातृकश्च यथाक्रममित्य मरः॥ ३८ ॥

यश इति॥ संयुगेषु युद्धेषु कण्डूलभावं रणकण्डूमत्त्वं भजता प्राप्नुवता अस्य नलस्य भुजेन हस्तेन यत् यशोऽजनि उत्पादितं दिक्शब्दा पगानदस्तासामाली समूहस्तस्याः कूलङ्कषत्वं तटवर्षकत्वं तदीयं तद्यशःसम्बन्धि व्यसनं व्यवसायः हेतोः कारणस्य गुणादेव न तु स्वभावात् किं जातमिति विशेष तद्यशो दिगन्तगामीत्यर्थः यशः कारणे हस्ते यः कण्डूलभावो गुणस्तस्मादेव दिगापगालीकूलङ्कषत्वं किं यशस्यागतमिति भावः कारणगुणाः कार्य्यगुणमारभन्त इति नियमो यत्र समवायेन कार्य्यकारणभावस्तत्रैव अतोऽत्रातथाभूतस्य तथाभूतत्वेनोत्प्रेक्षा॥ ३९ ॥

गुणवर्णने निजासामर्थ्यद्योतनया असंख्येयगुणत्वमस्य व्यञ्जयति॥ यदीति॥ त्रिलोकी त्रिभुवनं यदि गणनापरा तद्गुणगणनमात्रा सक्ता स्यात् तस्यास्त्रिलोक्या आयुषः समाप्तिर्यदि न स्यात् यदि च

Digitized by Google

पारेपरार्धं गणितं यदि स्यात्
गणेयनिःशेषगुणोऽपि स स्यात्॥ ४०॥
अवारितद्वारतया तिरश्चा
मन्तःपुरे तस्य निविश्य राज्ञः।
गतेषु रम्येष्वधिकं विशेष
मध्यापयामः परमाणुमध्याः॥ ४१॥

गणितं संख्या पारेपरार्धं परार्धसंख्यातोऽप्यधिकं स्यात्तदा स नलः गणेया गणयितुं शक्या निःशेषाः समस्ता गुणा यस्य तादृशोऽपि स्यादन्यथा नेत्यर्थः असंख्येयास्तस्य गुणा इति भावः। अपिः सम्भावनायां पारेपरार्धमिति पारेमध्ये षष्ठ्या वेत्यव्ययीभावः निपातनादेत्वं गणेयमिति गणेर्ण्यन्तादचो यत् णिलोपश्च। संख्या तु परार्धादधिका नास्ति यथा लीलावत्यां भास्कराचार्यैः। एकदशशतसहस्रायुतलक्षप्रयुतकोटयः क्रमशः। अर्बुदमब्जं खर्वनिखर्वमहापद्मशङ्कवस्तस्मात्। जलधिश्चान्त्यं मध्यं परार्धमिति दशगुणोत्तराः संज्ञाः। संख्यायाः स्थानानां व्यवहारार्थं कृताः पूर्वैरिति॥ ४०॥

अधिकविश्वासात् तदन्तःपुरेऽपि मया गम्यते इत्याशयेनाह॥ अवारितेति॥ हे भैमि वयं तिरश्चां पक्षिणां अवारितद्वारतया अप्रतिषिद्धद्वारप्रवेशत्वेन तस्य राज्ञो नलस्य अन्तःपुरे निविश्य प्रविश्य परमाणुवत् मध्यं यासां तादृश्यः अतिकृशोदर्य इत्यर्थः नार्यः रम्येषु मनोरमेष्वपि गतेषु गमनेषु अधिकं लोकोत्तरं विशेषमुत्कर्षं अध्यापयामः शिक्षयामः एतेन त्वञ्चेत् नलपत्नी स्यास्तदा त्वामपि तथा गमनोत्कर्षं शिक्षयिष्यामीति सूचितं। परमाणुमध्या इति याभिरित्यादिना प्रयोज्यस्य कर्मत्वं॥ ४१॥

Digitized by Google

पीयूषधारानधराभिरन्त-
स्तासां रसोदन्वति मज्जयामः ।
रम्भादिसौभाग्यरहःकथाभिः
काव्येन काव्यं सृजताहताभिः ॥ ४२ ॥
काभिर्न तत्राभिनवस्मराज्ञा
विश्वासनिक्षेपवणिक्क्रियेऽहं ।

तत्र कथाप्रसङ्गमप्याह ॥ पीयूषेति ॥ वयं रम्भादीनामप्सरसां यत् सौभाग्यं वशीभूतपुरुषत्वादि रहश्च सुरतं गोपनीयावस्थानं वा तयोः कथाभिः करणैस्तासां नलस्त्रीणां अन्तर्हृदयं रसोदन्वति शृङ्गाररससमुद्रे मज्जयामः निमग्नीकुर्मः किम्भूताभिः पीयूषस्य अमृतस्य धारातोऽनधराभिरन्यूनाभिरत्याह्लादकत्वात् तथा काव्यं प्रबन्धविशेषं सृजता कुर्वता काव्येन शुक्रेणाहताभिः सम्मताभिः । रहःसुरतगोप्ययोरिति धरणिः काव्य उशना भार्गवः कविरित्यमरः ॥ ४२ ॥

तस्यापि तासां विश्वास्यत्वं द्योतयन्नाह ॥ काभिरिति ॥ तत्र तस्यां पुरि अहं काभिर्मुग्धाभिर्भूतिभिः स्त्रीभिः अभिनवा नवीना या स्मराज्ञा कामोपदेशस्तस्या विश्वासेन निक्षेपवणिक् स्थापनिकवणिक् न क्रिये अपि तु सर्वाभिरेव अतिगोपनीयमपि कामरहस्यं विश्वासात् सर्वाभिरेव मयि कथ्यते इत्यर्थः अन्योऽप्यतिगोपनीयं वस्तु कस्मिंश्चित् वणिजि निक्षिपति । नन्वेतादृशो तासां विश्वासः कथमित्याशङ्क्याह यत् यस्मात् तिर्यक् पक्षी कुतोऽपि कस्मादपि प्रदेशे वा नैव जिह्रेति नैव लज्जते तेन हेतुना कश्चित् प्राणी तिरश्च-

जिघ्रेति यत्रैव कुतोऽपि तिर्य्यक्
कश्चित्तिरश्चस्त्रपते न तेन ॥४३॥
वार्त्ता च सा सत्यपि नान्यमेति
योगादरन्ध्रे हृदि यां निरुन्धे ।
विरिञ्चिनानाननवादधौत
समाधिशास्त्रश्रुतिपूर्णकर्णः ॥ ४४ ॥

पक्षिश्रेष्ठो न त्रपते न लज्जते । अतस्त्वयापि मन्त्वर्गतं किञ्चिन्नश्वरत्वे वक्तव्यं मा लज्जस्वेति ध्वनितं ॥ ४३ ॥

अहमपि त्वाभिहतं रहस्यं नान्यत्र प्रकाशयामीत्याह ॥ वार्त्तेति ॥ अहं योगादुपायात् प्रयत्नादिति-यावत् ध्यानधारणादेरिति केचित् अरन्ध्रे निश्छिद्रे बहुविषयवृत्तिशून्य इत्यर्थः हृदि चेतसि यां वार्त्तां निरुन्धे नितरामावृणोमि सा च वार्त्ता वृत्तान्तः असत्यपि का कथा सत्यायाः प्रकाशशङ्कायां परिहाससमयोक्ता अलीकापि अन्यं जनं न एति न प्राप्नोति तामन्यस्मै न कथयामीत्यर्थः सा सत्यपि हृदि वर्त्तमानापि अविस्मृतापि अन्यं जनं न एतीति केचित् । योगव त्त्वमेवाह अहं किम्भूतः विरिञ्चेर्ब्रह्मणो यानि नाना चत्वारि आननानि मुखानि तैर्यो वाद उच्चारणं तेन धौतं शुद्धं यत् समाधिशास्त्रं योगशास्त्रं तस्य या श्रुतिः श्रवणं तया पूर्णौ कर्णौ यस्य तादृशः एतेन त्वया हृदयगतं रहस्यं किञ्चिच्चेत् वक्तव्यं नाहं कदापि तत प्रकाशयिष्यामीति सूचितं । निरुन्ध इति रुधेः स्वरितेत्त्वादात्मनेपदं एकम् । योगः सन्नहनोपायध्यानसङ्गतियुक्तिष्वित्यमरः ॥ ४४ ।

Digitized by Google

नलाश्रयेण त्रिदिवोपभोग्यं
नवानवाप्यं लभते वतान्या ।
कुमुद्वतीवेन्दुपरिग्रहेण
ज्योत्स्नोत्सवं दुर्लभमम्बुजिन्याः ॥ ४५ ॥
तन्नैषधानूढतया दुरापं
शर्म्म त्वयास्मत्कृतचाटुजन्म ।

अत्यन्तमुत्कण्ठयन्नाह ॥ नलाश्रयेणेति ॥ हे दमयन्ति तव त्वया अनवाप्यं अप्राप्यं नलाश्रयेण हेतुना त्रिदिवोपभोग्यं अस्मत्कर्तृक पक्षवीजनादिरूपस्वर्गोपभोग्यं वत कष्टं अन्या त्वदितरा काचिद् महानायिका लभते प्राप्नोति अनर्हायास्तल्लाभेऽस्माकं खेद इत्यर्थः उपमिनोति यथा अम्बुजिन्याः पद्मिन्या दुर्लभं दुष्प्रापं ज्योत्स्नोत्सवं ज्योत्स्नाजन्यं प्रकाशलक्षणमुत्सवं इन्दुपरिग्रहेण चन्द्रस्वीकारेण कुमुद्वती लभते तथेत्यर्थः । अतस्त्वया स्वभोगभोगाय नलस्यैव परि ग्रहार्थं यतस्वेति भावः । तवेति कर्तुः ईप्स्येति कर्त्तरि षष्ठी ॥ ४५ ॥

प्रकृतमुपसंहरन्नाह ॥ तन्नैषधेति ॥ तत्तस्मात् अस्माभिः कृता चाटुनः प्रियवचनाज्जन्म उत्पत्तिर्यस्य तादृशं शर्म्म सुखं नैषधानूढत या नलेनापरिणीततया हेतुना त्वया दुरापं दुर्लभं अस्मत्प्रियवचन श्रवणादिजनितसुखं नलपरिणयेनैव प्राप्स्यसि नान्यथेति भावः । उपमिनोति यथा अप्राप्तो वसन्त ऋतुविशेषो यया तादृश्या सख्या रसालवल्ल्या आम्रलतया मधुपानुविद्धं भ्रमरैः कृतं सौभाग्यं भङ्गा

रसालवल्ल्या मधुपानुविद्धं
सौभाग्यमप्राप्तवसन्तयेव ॥ ४६ ॥
तस्यैव वा यास्यसि किम्न हस्तं
दृष्टं मनः केन विधेः प्रविश्य।
अजातपाणिग्रहणासि तावद्
रूपस्वरूपातिशयाश्रयश्च ॥ ४७ ॥
निशा शशाङ्कं शिवया गिरीशं
श्रिया हरिं योजयतः प्रतीतः।

हादि दुरापं तथेत्यर्थः अत्र रसालवल्ल्या दृष्टान्तत्वेन कालान्तर भावी नलसंयोगः सूचितः ॥ ४६ ॥

अथ नलप्राप्तिसम्भावनाख्यापनया पूर्व्वोक्तोत्पन्नं अस्याः दौर्मनस्यमप हरन्नाह ॥ तस्यैवेति ॥ वा पूर्व्वापेक्षायां अथवा तस्यैव नलस्यैव हस्तं त्वं किं न यास्यसि न प्राप्स्यसि इति निश्चेतुं केन ज्ञायत इति शेषः निश्चयाभावः कथमत आह केन अनेन विधेर्ब्रह्मणो मनोऽन्तःकरणं प्रविश्य दृष्टं भैम्या नलो न प्राप्स्यत इति विधिमनःस्थं केन ज्ञातं न केनापीत्यर्थः यतस्तावदादौ त्वं अजातं पाणिग्रहणं विवाहो यस्या स्तादृशी असि वर्त्तसे तथा रूपस्य लावण्यस्य यत् स्वरूपं भूषण मन्तरेणापि शोभाजनकत्वं तेन योऽतिशय उत्कर्षस्तस्याश्रयः स्थानं। रूपं सौन्दर्य्यं स्वरूपं राजसुतात्वादि तयोर्योऽतिशय इति केचित् अतः प्रथममेव औदास्यं मा गच्छ तव सौन्दर्य्येण नलप्राप्तिः सम्भा व्यत इति भावः ।४७ ॥

विधेर्योग्यवस्तुद्वयमेलनतात्पर्य्येण तस्या नलप्राप्तिं द्रढयति ॥ निशेति ॥ निशा रात्र्या सह शशाङ्कं चन्द्रं शिवया गौर्य्या सह

Digitized by Google

विधेरपि स्वारसिकप्रयासः
परस्परं योग्यसमागमाय ॥ ४८ ॥
वेलातिगस्त्रैणगुणाब्धिवेणी
न योगयोग्यासि नलेतरेण ।
सन्दीयते दर्भगुणेन मल्ली
माला न मृद्वी भृशकर्कशेन ॥ ४९ ॥

गिरीशं शिवं शिवया लक्ष्म्या सह हरिं विष्णुं योजयतो घटयतो विधेरपि परस्परं योग्यसमागमाय योग्ययोर्मेलनाय स्वारसिकः स्वेच्छाचारी स्वाभाविक इति यावत् प्रयासः प्रयत्नः प्रतीतः ख्यातः अतस्तथाभूतो विधिरवश्यमेव नलेन सह तत्सदृशीं भवतीं योजयिष्यतीति भावः ॥ ४८ ॥

नलाद्भिन्नं तत्सदृशं सुन्दरान्तरमपि नास्ति यस्य पत्नी भविष्यसीति प्रतिपादयन्नाह ॥ वेलातिगेति ॥ वेलां तीरमतिक्रम्य गच्छतीति वाहुलकात् स्त्रैणगुणाब्धिः स्त्रीसम्बन्धिसौन्दर्यादिगुणसमुद्रस्तस्य वेणी प्रवाहरूपा अशेषरमणीगुणभाजनमित्यर्थः त्वं नलेतरेण नलाद्भिन्नेन पुरुषेण न योगयोग्यासि न सम्बन्धार्हा भवसि नलेनैव योगयोग्यासीत्यर्थः यतः मृद्वी कोमला मल्लीमाला भृशकर्कशेनाति कठोरेण दर्भगुणेन कुशलतासूत्रेण न सन्दीयते न बध्यते यथा कुशरज्ज्वा मल्लीमालागुम्फनमनुचितं तथा नलेतरेण तव योग इत्युभयोर्बिम्बप्रतिबिम्बभावपर्यवसानाद्दृष्टान्तालङ्कारोऽयं ॥ ४९ ॥

Digitized by Google

विधिं वधूसृष्टिमपृच्छमेव
तद्यानयुग्यो नलकेलियोग्यां ।
त्वन्नामवर्णा इव कर्णपीता
मयास्य संक्रीडति चक्रचक्रे ॥ ५० ॥
अन्येन पत्या त्वयि योजितायां
विज्ञत्वकीर्त्या गतजन्मनो वा ।

न केवलमेवं युक्त्या तव नलप्राप्तिर्निश्चीयते किन्तु प्रमाणान्तरेणा-पीति तदेव दर्शयन्नाह ॥ विधिमिति ॥ तस्य विधेर्यानस्य रथस्य युग्यो वाहकोऽहं नलस्य केलियोग्यां क्रीडायामुचितां वधूसृष्टिं तदभिहितभावत्वात् सृष्टां वधूं नलक्रीडायोग्या कतमा वधूस्त्वया सृष्टेत्येवं विधिं प्रश्नाक्षमपृच्छमेव पृष्टवानेव ततस्तेन किमुक्त-मित्याह ततो मया त्वन्नामवर्णा इव नलकेलियोग्या भैमी मया निर्मितेति तव नामाक्षराणीव कर्णपीताः श्रुताः इवशब्दात् प्रस्फुटं त्वन्नामवर्णाः श्रुता इत्यर्थः स्फुटमेव किमिति न श्रुता इत्याह अस्य विधेः चक्रचक्रे रथचक्रसमूहे संक्रीडति अव्यक्तं शब्दायमाने सति । चक्रचक्रे हंससमूहे भीमोभीमसेनइतिवत् हंसवाचकस्य चक्राङ्गशब्दस्य एकदेशेन चक्रशब्देन हंस उच्यते इति केचित् ॥ ५० ॥

गमकान्तरमाह ॥ अन्येनेति ॥ वा अथवार्थे आक्षेपे निश्चये वा अन्येन नलादितरेण पत्या स्वामिना त्वयि योजितायां विवाहितायां सत्यां विज्ञत्वकीर्त्या चिरकालं सदृशवस्तूनां परस्परमेलनात् विवेचकत्वयशसा गतमतिक्रान्तं जन्म येन तथा

Digitized by Google

अनापवादार्णवमुत्तरीतु
विधा विधातुः कतमा तरिः स्यात्॥ ५१॥
आस्तां तदप्रस्तुतचिन्तयालं
मयासि तन्वि श्रमितातिवेलं।
सोऽहं तदागः परिमार्ष्टुकाम
स्तवेप्सितं किं विदधेऽभिधेहि॥ ५२॥

विधस्य विधातुर्ब्रह्मणः अनापवादरव धिगिममयोग्ययोजकमिति अनेकेच्यमानां निन्दैव अर्णवः कठलात् समुद्रस्तं उत्तरीतुं उत्तीर्णो भवितुं कतमा विधा किंप्रकारा तरिर्नौका स्यात् अपि तु न काप्ये त्यर्थः तथात्वे विधातुर्निन्दा चिरं स्थास्यतीत्यर्थः अतो अनाप वादायाद्दिङ्गन विधात्रा त्वमवश्यमेव नलेन योजिता भविष्यसीति भावः अन्योऽपि तर्ण्यार्णवमुत्तरतीति तथा रूपितं। उत्तरीतुमिति दृङ्क्रम्तामलिङ् सङ्गिट्खीङ्वेति इंङ्। स्त्रियां नौस्तरणि स्तरिरित्यमरः॥ ५१॥

प्रस्तुतानुसरणच्छलेन भैम्या अभिप्रायं जिज्ञासुराह॥ आस्ता मिति॥ हे भैमि तत्प्रसक्तिकं नलगुणविवरणं आस्तां तिष्ठतु अन्यप्र वक्तव्यमित्यर्थः यतोऽप्रस्तुतचिन्तया अप्राकरणिकार्थानुशीलनेन अलं प्रयोजनाभावः। प्रस्तुतमाह हे तन्वि क्षीणाङ्गि मया अतिवेल मत्यर्थं असि त्वं श्रमिता अतिदूराकर्षणात् परिश्रमं नीता अतः स तथाविधश्रमप्रदोऽहं तदागस्तदपराधं परिमार्ष्टुमपनेतुं कामो यस्य तादृशः सन् तव किं ईप्सितं अभीष्टं विदधे करिष्यामि अभिधेहि कथां कथय। तन्वीत्यनेन परिश्रमासहिष्णुत्वं सूचितं। परिमार्ष्टुकाम इति तुम्समोः काममनसोरिति मकारलुक् विदधे इति वर्त्तमानसामीप्ये भविष्यति लट्॥ ५२॥

Digitized by Google

इतीरयित्वा विरराम पत्री
स राजपुत्रीहृदयं बुभुत्सुः ।
ह्रदे गभीरे हृदि चावगाढे
शंसन्ति कार्य्यावतरं हि सन्तः ॥ ५३ ॥
किञ्चित्तिरश्चीनविलोलमौलि
र्विचिन्त्य वाच्यं मनसा मुहूर्त्तं ।

हंसवचनमुपसंहरति ॥ इतीति ॥ स पत्री हंसो राजपुत्र्या दमयन्त्या हृदयं मनोबुभुत्सुर्नलेऽनुरक्तं विरक्तं वेति जिज्ञासुः सन् इति पूर्व्वोक्तं ईरयित्वा उक्त्वा विरराम तूष्णीमभूत्। ननु नले तवानुरागो वर्त्तते न वेति किमिति स्फुटं नोक्तवानित्यत आह ह्रद इति हि यतः स्वभावतो गभीरे गाम्भीर्य्यवति ह्रदे जलाशये गूढा भिप्राये हृदि मनसि च अवगाढे आलोडिते नक्रादिशून्यत्वेन ज्ञाते स्वादरत्वेन निश्चिते च सत्येव सन्तः पण्डिताः कार्य्यावतरं स्नानादि कार्य्यार्थमन्तर्गमनं कार्य्यस्य प्रस्तावञ्च शंसन्ति कथयन्ति अन्यथा न शंसन्तीत्यर्थः प्रकृते तद्धृदयस्याज्ञाताभिप्रायत्वात् हठादनुराग जिज्ञासा नोचिता अतो नलानुरागमप्रकाश्यैव तूष्णीं बभूवेतिभावः अत्राप्रस्तुतप्रस्तुतयोर्ह्रदहृदययोरेकधर्म्माभिसम्बन्धाद्दीपकालङ्कारः ॥ ५३ ॥

अथ हंसं प्रति दमयन्त्या वचनोपक्रममाह ॥ किञ्चिदिति ॥ एषि वीन्द्रपुत्री भीमसुता सा दमयन्ती हंसवचनविचारार्थे किञ्चिदीष त्तिरश्चीनो वक्रो विलोलश्चलो मौलिर्मस्तकं यस्यास्तादृशी सती मुहूर्त्तं क्षणमात्रं मनसा बुद्ध्या वाच्यं वक्तव्यं विचिन्त्य निश्चित्य यत

Digitized by Google

पतत्त्रिणं सा पृथिवीन्द्रपुत्री
जगाद वक्त्रेण तृणीकृतेन्दुः ॥५४॥
धिक् चापले वत्सिमवत्सलत्वं
यत्प्रेरणादुत्तरलीभवन्त्या ।
समीरसङ्गादिव नीरभङ्ग्या
मया तटस्थस्त्वमुपद्रुतोऽसि ॥५५॥

पत्त्रिणं हंसं जगाद उक्तवती सा किम्भूता सहजसौन्दर्य्येणाभिलाष सिद्ध्याश्रयाविप्रसन्नत्वेन च वक्त्रेण मुखेन तृणीकृतोऽवज्ञात इन्दुश्च न्द्रो यया तादृशी ॥५४॥

किं जगादित्याह ॥ धिगिति ॥ हे हंस मम चापले चपलत्वविषये वत्सिमा बालत्वेन वत्सलत्वं स्नेहवत्त्वं धिक् निन्द्यं चपलताप्रतिपादकं बालत्वनिबन्धनं यत्किञ्चित्कत्वमभिलाषित्वमनुचितमित्यर्थः कथमेवमात्मानमाक्षिपसीत्याह यत्‌ यस्य वत्सिमवत्सलत्वस्य प्रेरणात् नियोगात् यदधीनत्वादित्यर्थः उत्तरलीभवन्त्या चञ्चलीभवन्त्या मया तटस्थः पूर्व्वपरिचयाभावादुदासीनस्त्वमुपद्रुतोऽसि ग्रहणार्थं व्याकुलीकृतोऽसि यथा समीरसङ्गात् वायुसम्पर्कात् उत्तरलीभवन्त्या नीरभङ्ग्या स्वल्पजलतरङ्गेण तटस्थस्तीरस्थस्त्वं उपद्रूयसे तथेत्यर्थः कूलस्थो वृक्षादिरुपद्रूयत इति वा । तटस्थः स्यादुदासीने तीरस्थ निकटस्थयोरिति कोषः ॥५५॥

Digitized by Google

आदर्शतां स्वच्छतया प्रयासि
सतां स्वतावत्खलु दर्शनीयः।
आगः पुरस्कुर्वति सागसं मां
यस्यात्मनीदं प्रतिबिम्बितं ते॥ ५६॥
अनार्य्यमप्याचरितं कुमार्य्या
भवान्मम क्षाम्यतु सौम्य तावत्।

सोऽहं सदागइत्यनेन हंसेन स्वस्य यस्वापराधत्वमुक्तं तद्भैमी स्वीय त्वेन स्वीकृत्य हंसं स्तौति॥ आदर्शतामिति॥ खल्वुत्प्रेक्षायां निश्चये वा हे हंस दर्शनीयोऽतिरम्यदर्शनः स त्वं स्वच्छतया शुद्धान्तःकरण तया सतां साधुजनानां तावत् प्रथमं आदर्शतां दृष्टान्ततां प्रयासि गच्छसि शुद्धान्तःकरणजनविवेचनायां त्वमेव प्रथमं तेषां दृष्टान्त स्थानं भवसीत्यर्थः यतः सागसं सापराधां मां पुरस्कुर्वति बहु मन्य माने यस्य ते तव आत्मनि स्वरूपे इदं मदीयमागोऽपराधः प्रति बिम्बितं सङ्क्रान्तं अयं हि सतां स्वभावः यदन्यापराधं स्वीयत्वेनाङ्गी कृत्य तं बहु मन्यतइति जिघृक्षया पक्षलोकरणात्मयैव तवाप राधः कृतः स तु त्वयात्मीयत्वेन गृहीतोऽतएव त्वं स्वच्छतया सतां दृष्टान्तभूतोऽसीति भावः अथ च स्वच्छतया निर्म्मलतया आदर्शतां दर्पणतां प्रयासि दर्पणोऽपि सतां शोभादिदर्शकानां श्रीमतां दर्शनीयः एवं अग्रस्थितस्य कालिमादियुतवस्तुनः प्रतिबिम्बग्राही भवति॥ ५६॥

स्वापराधं निश्चित्य तत्क्षमार्थं प्रार्थयते॥ अनार्य्यमिति॥ हे साम्य सुन्दर सोमयाजिवत् क्षमाशील वा हंस कुमार्य्या बालिकायाः

हंसोऽपि देवांशतयाभिवन्द्यः
श्रीवत्सलक्ष्मेव हि मत्स्यमूर्त्तिः ॥ ५७ ॥
मत्प्रीतिमाधित्ससि कां त्वदीक्षा
मुदं मदक्ष्णोरपि यातिशेतां ।

कुमारीत्वादप्राप्तसमतिकायाइत्यर्थः मम अनार्य्यमप्यनुचितमपि आचरितं आचरणं उपप्लवरूपं भवान् तावत् प्रथमं क्षाम्यतु सहतां ममेप्सितकरणं दूरे तिष्ठतु अपराधएव प्रथमं क्षन्तव्य इत्यर्थः । राजपुत्री भूत्वा किमेवं पक्षिणि मयि प्रार्थयस इत्यत आह असि त्वं हंसोऽपि पक्षिविशेषोऽपि देवांशतया ब्रह्मवाहनत्वात् देव भागवत्तया वन्द्यः पूजनीयः यथा श्रीवत्सलक्ष्मा विष्णुर्मत्स्यमूर्त्तिरपि हि निश्चितं लोकैर्वन्द्यते कुमार्य्या इत्यनेन स्त्रियोममापराधग्रहणं नोचितमिति स क्षन्तव्यएवेतिसूचितं ॥ ५७ ॥

तवेप्सितं किं विदधेऽभिधेहीत्यस्योत्तरमाह ॥ मत्प्रीति मिति ॥ त्वं कां मत्प्रीतिं मम हर्षं आधित्ससि करिष्यसि या प्रीति र्मदक्ष्णोर्मम नयनयोस्त्वदीक्षामुदं त्वद्दर्शनजनितहर्षं मन्नयनद्वय कर्तृकत्वद्दर्शनजनितहर्षमित्यर्थः अतिशेतां अतिक्रम्य वर्त्ततां ततोऽप्यधिका भवत्वित्यर्थः अर्थात्त्वद्दृष्टौ प्रीतिर्मास्त्वेवेतिभावः दृष्टान्ते नेदं स्फुटयति इन्दुखण्डः निजामृतैः स्वीयपीयूषैः प्रजानां लोचन सेचनात् नेत्रसेकात्पृथगन्यत् किं वा सृजति अनयति न किमपीत्यर्थः एतेन चन्द्रोयथा निजामृतकरणकनयनसेचनद्वारा लोकानामा ह्लादकस्तथा त्वमपि नयनदर्शनद्वारा मम भवः सम्मुखीभूय सुचिरं

Digitized by Google

निशामृतैर्लोचनसेचनाद्वा
पृथक्किमिन्दुः सृजति प्रजानां॥ ५८॥
मनस्तु यं नोज्झति जातु यातु
मनोरथः कण्ठपथं कथं सः।

कालं नलमेवानुवर्णयेय न तस्माद्विरमेति सूचितं। लोचनसेचनादि त्यत्र पृथग्विनानानेत्यादिना पृथक्शब्दयोगे पञ्चमी॥ ५८॥

नलाभिलाषं व्यञ्जयन्ती ब्रूते।, मनस्त्विति॥ तुरेवार्थे भिन्नक्रमे हे हंस मम मनो जातु कदाचित् यं मनोरथं न तु उज्झति नैव त्यजति स मनोरथो वाञ्छाविषयः कथं केन प्रकारेण कण्ठपथं कण्ठ मार्गं यातु गच्छतु ।योऽभिलाषविषयो मया मनसैव चिरं ध्रियते स वचनगोचरत्वं कथं प्राप्नोतित्यर्थः। यद्यपि भवादृशे सुहृज्जने मनोऽभिलषितस्योक्तौ दोषाभावस्तथापि वक्तुं न शक्नोमीत्याह नाम सम्भावनायां का बाला स्त्री अलज्जा निर्लज्जा सती द्विजराजस्य चन्द्रस्य पाणिना हस्तेन यो ग्रहो ग्रहणं तस्याभिलाषं कथयेत् हस्तेन चन्द्रग्रहणे मम वाञ्छा वर्त्तत इति वदेत् न कापीत्यर्थः यथा हस्तेन चन्द्रग्रहणेच्छाकथनमत्यन्तासम्भवतया वक्तुर्निर्लज्जत्वं ख्यापयति तथा मदीय मानसविषयाभिलाषकथनमपि एतेन मदभिलाषसिद्धिर्दुर्घटैवेति सूचितं अथ च द्विजानां राजा सम्राट् नलस्तद्विवाहाभिलाषं का बाला मुग्धा स्त्री अलज्जा सती कथयेदपि तु न कापि तत् कथने मम मातृव्याल्लज्जा जायत इति भावः एतेन नलेन सह विवाहमिच्छामीति सूचितं । हे द्विज पक्षिन् राजपाणिग्रहाभिलाषमिति हे द्विजराज पक्षिश्रेष्ठ पाणिग्रहाभिलाषमिति च बहवः। यद्वा आम

Digitized by Google

का नाम बाला द्विजराजपाणि
ग्रहाभिलाषं कथयेदलज्जा॥ ५९ ॥
वाचन्तदीयां परिपीय मृद्वीं
मृद्वीकया तुल्यरसां स हंसः।
तत्याज तोषं परपुष्टघोषे
घृणाञ्च वीणाक्वणिते वितेने॥ ६०॥

बाला अपक्वयौवना नवयौवनेत्यर्थः का स्त्री द्विजराजपाणिग्रहाभिलाषं नलेन सह विवाहाभिलाषं अलज्जा सती न कथयेत् अपि तु सर्व्वैव नवयौवना स्त्री लज्जां विहाय कथयेदित्यपि सूचितमित्यलं प्रपञ्चेन। आमोदक्तद्विदोः पुंसि स्यादण्यकोऽन्यलिङ्गक इति मेदिनी। पूर्व्वार्द्धे मनसोऽधोदेशत्वात् कण्ठस्य चोर्द्धदेशत्वादिति प्राचां हेतूपन्यासश्चिन्त्यः मनसोभूमध्यस्थितत्वेन कण्ठतोऽप्यूर्द्धदेशवर्त्तित्वात् तथा च मनोऽपि भ्रूमध्ये सकलमपि भित्त्वा कुलपथमित्यानन्दलहरी ॥ ५९ ॥

भैमीवचनस्य हंसमनोहारित्वमाह ॥ वाचमिति ॥ स हंसः मृद्वीं कोमलाक्षरां अत एव सुखजनकत्वात् मृद्वीकया द्राक्षया तुल्यरसां समानास्वादां तदीयां भैमीसम्बन्धिनीं वाचं परिपीय सादरमाकर्ण्य परपुष्टानां कोकिलानां घोषे रवे तोषं हर्षं तत्याज त्यक्तवान् तथा वीणाक्वणिते च वीणाशब्दे च घृणां जुगुप्सां वितेने कृतवान् ताभ्यां मधुरतरा तस्या वाणीति वस्तुध्वनिः ताभ्यामुपमेयभूतायास्तस्या वाण्या उत्कर्षद्योतनाद्व्यतिरेकध्वनिश्च। मृद्वीका गोस्तनी द्राक्षेत्यमरः ॥ ६० ॥

Digitized by Google

मन्दाक्षमन्दाक्षरमुद्रमुक्त्वा
तस्यां समाकुञ्चितवाचि हंसः ।
तच्छंसिते किञ्चन संशयालु
र्गिरा मुखाम्भोजमयं युयोज ॥ ६१ ॥
करेण वाञ्छेव विधुं विधर्त्तुं
यमित्थमात्थादरिणी तमर्थं ।

तूष्णींभूतायां तस्यां हंसस्य वचनोपक्रममाह ॥ मन्दाक्षेति ॥ तस्यां दमयन्त्यां मन्दाक्षेण लज्जया मन्दा स्वल्पा अक्षराणां वर्णानां मुद्रा विन्यासो यत्र क्रियायां तथथा स्यात्तथा उक्त्वा कथयित्वा समाकुञ्चिता उपसंहृता वाग्यया तथाविधायां सत्यां तूष्णींभूतायां सत्यामित्यर्थः अयं हंसस्तस्याः शंसिते भाषिते किञ्चन संशयालुः सन् स्वल्पत्वादस्फुटत्वाच्च अर्थावधारणे किंचित् संदिहानः सन् गिरा वाचा मुखाम्भोजं मुखकमलं युयोज युक्तं कृतवान् उवाचेत्यर्थः मन्दाक्षं ह्रीस्त्रपा व्रीडा लज्जेत्यमरः ॥ ६१ ॥

किमुवाचेत्याह ॥ करेणेति ॥ विधुं चन्द्रं करेण हस्तेन विधर्त्तुं ग्रहीतुं वाञ्छेव स्पृहेव इवशब्दान्न तात्त्विकी इत्थमनेन प्रकारेण आदरिणी समादरयुक्ता न तु विरक्ता सती यं आत्थ अवोचि तमर्थं प्रयोजनं श्रुतिभ्यां कर्णाभ्यां पातुमपि श्रोतुमपि अहं किं नाधिकुर्व्वे नाधिकारी भवामि अनिमक्षरमेवार्थः शूद्रो यथा श्रुतेर्वेदस्य वर्णमक्षरं श्रोतुमपि नाधिकुरुते यद्यप्यहं कर्तुमसमर्थस्तथापि किं श्रोतुमप्यसमर्थः अतः श्रवणे का बाधा उच्यतामित्यपि शब्दार्थः अयं च तमर्थं

पातुं श्रुतिभ्यामपि नाधिकुर्व्वे
वर्णं श्रुतेर्व्वर्ण इवान्तिमः किं॥ ६१॥
अर्थाप्यते वा किमियन्नवत्या
चित्तैकपद्यामपि विद्यते यः।
यत्रान्धकारः किल चेतसोऽपि
जिह्मेतरैर्ब्रह्म तदप्यवाप्यं॥ ६२॥

पातुमप्यधिकारी भवामि किं पुनः श्रोतुमिति स्फुटतया सोऽर्थो वक्तव्यः अहं तं साधयिष्यामीति सूचितं ॥ ६१ ॥

दुर्लभः सुलभो वा मनोरथविषयः प्रकाश्यतां न तन्मयि गोपन मुचितमित्याह ॥ अर्थाप्यत इति ॥ हे भैमि चित्तैकपद्यामपि मनोमार्गेऽपि मनोजन्यज्ञानेऽपीत्यर्थः यो विषयतामापन्नो विद्यते भवति वा स्वार्थे स भवत्या इयत् एवं किमा किमर्थमेव अर्थाप्यते अर्थो नवत् क्रियते सङ्गोप्यत इत्ययं इत्नेन वज्रपञ्जरकथनभङ्ग्यैव मया चतुरेण त्वद्धृदयस्थं सर्व्वं ज्ञातं अतो मयि तद्गोपनं न कर्त्तव्य मिति भावः चतुरजनैश्चित्तगोचरस्तु ज्ञायत एव चित्ताऽगोचरोऽपि वेदितुं शक्यत इति दृष्टान्तेनाह किल निश्चये यत्र ब्रह्मणि चेत सोऽपि अन्धकारः मनसोऽप्यग्राह्यत्वं यतोवाचो निवर्त्तन्ते अप्राप्य मनसा सहेति श्रुतेः तदपि ब्रह्म परमात्मा जिह्मेतरैरनलसै र्जनैरवाप्यं प्राप्यं भवति किं पुनर्मनोग्राह्यं एतेन सूक्ष्मार्थदर्शिना मया त्वन्मनोगतं ज्ञातमेव अतः प्रकाश्य वक्तव्यं अहमपि तत्साधन योग्य इति सूचितं। अर्थाप्यत इति अर्थः क्रियत इत्यर्थे णिजि कृते वेदार्थसत्यादापुरित्यनेनापुः॥ ६२ ॥

ईशाणिमैश्वर्य्यविवर्त्तमध्ये
लोकेशलोकेशयलोकमध्ये ।

ननु मनोगतं विश्वस्तेषु वक्तव्यं त्वयि तु पक्षिणि कथं मे विश्वासो भवेदित्याशङ्क्य स्वस्य विश्वसनीयत्वं ख्यापयति ॥ ईशेति ॥ हे ईशाणिमैश्वर्य्यविवर्त्तमध्ये हे अतिक्षीणमध्ये दमयन्ति अज्ञं अनभिज्ञं तिर्य्यञ्चमपि पक्षिणमपि मां लोकेशस्य ब्रह्मणो यो लोको भुवनं तत्र शेरते ऽवतिष्ठन्ते ये लोकाजनास्तेषां मध्ये प्रथमाभिख्यः सत्यवादी सभ्यश्चासौ रसज्ञः सामाजिकश्चेति कर्मधारयः तस्य भावस्तत्ता सत्यवादिता सामाजिकता चेत्यर्थः तया या उपज्ञा तद्रूपत्वेन यत् आदिकथनं के केऽत्र सत्यवादिनः सामाजिकाश्चेति प्रश्ने प्रथमं तद्रूपत्वेन यशस्सम कीर्त्तनमित्यर्थः तेन समज्ञा कीर्त्तिर्यस्य तादृशं अव जानीहि बुध्यस्व वा यद्यप्यहं पक्षियोनित्वात् कार्य्याकार्य्यानभिज्ञस्तथापि सत्यवादिनां सामाजिकानाञ्च प्रथमगण्योऽस्मि अतो विश्वसिहीति भावः। ईशेति वैपरीत्येन वर्त्तत इति विवर्त्तः प्रतिपक्षः ईशस्य ईश्वरस्य अणिमैश्वर्य्ये अणुत्वलक्षणैश्वर्य्यविषये विवर्त्तः प्रतिपक्षो मध्यो यस्याः हे तादृशि अणिमैश्वर्य्यशालीश्वरसदृशातिक्षीणमध्ये इत्यर्थः। ईश्वरस्य योऽणिमा अणुत्वलक्षणमैश्वर्य्यं तस्माद्विवर्त्तस्य विषमसत्ताकत्वेन उत्पादो यस्य तादृशं मध्यं यस्या हे तादृशि इति वा उपादानविषमसत्ताककार्य्योत्पादो विवर्त्त इति वेदान्तिनः। लोकेशयेति शेतेरधिकरणादित्यच् अकालवाचिनः शयवासवासिष्विति सप्तम्या अलुक् अवेहीति अवपूर्व्वगतिपूजनयोः कोटौ हि सर्व्वे गत्यर्था ज्ञानार्थाः स्युरिति ज्ञानार्थकत्वं। उपज्ञेति उपज्ञोपक्रमाद्याचि

तिर्य्यञ्चमप्यञ्च मृषानभिज्ञ
रसज्ञतोपज्ञसमज्ञमज्ञं ॥ ६४ ॥
मध्ये श्रुतीनां प्रतिवेशिनीनां
सरस्वती वासवती मुखे नः ।

घन इति तुमरनम्री उपमादि कीर्तिमिति वतुबचे कीर्तताञ्चसे। न्तःकीर्त इति पृष्ठः। यद्यः कीर्त्तिः समज्ञा चव्यमरः। मृषानभिज्ञ सत्यवादिनो रसज्ञा जिह्वा यस्य स तथा तस्य भावस्तत्ता तया उपज्ञा आद्यज्ञानं यत्तया तेन समज्ञा कीर्त्तिर्यस्य तादृशं अच आनीहि मद्यलोकवासिनां मध्ये अहमेव सत्यवचनत्वेन प्रथमज्ञान विषयतया प्रसिद्ध इत्यर्थइति चहवः व्याख्यानान्तराणि तु बाढ़ ह्यभिज्ञा नोक्तानि ॥ ६४ ॥

सत्यवादित्वमेव स्वस्य प्रकटयति ॥ मध्यइति ॥ हे भैमि सर स्वती वाणी प्रतिवेशिनीनां एकपक्षीवासिनीनां ब्रह्ममुखोच्चरितत्वेन अतिनिकटस्थितानामित्यर्थः श्रुतीनां वेदानां मध्ये नोऽस्माकं मुखे वा सवती स्थितिमती अत इयं ताभ्यः श्रुतिभ्यो ह्रियेव लज्जयेव अद्धा मघात् याथार्थ्यमार्गात् न स्खलति न च्यवते हेतुगर्भविशेषणमाह सा किम्भूता संसर्ग एव सतां सङ्ग एव उत्कर्षकलाङ्गुणः अथ च रज्जुः तेन नद्धा सम्बद्धा अन्यदपि रज्ज्वा सम्बद्धं सत् न स्खलति अन वरतब्रह्ममुखोच्चरितवेदध्वनिश्रवणेन पवित्रान्तःकरणतया मृषा भाषणदोषश्रवणेन वा न कदाचिदपि मिथ्या वदामीति भावः अतो मया यदुक्तं तन्मिथ्यात्वेन नोपेक्षणीयमिति सूचितं । अद्धा तत्त्वं यथा तथा अपथात् कुमार्गात अपथं प्राप्येत्यर्थः यज्गर्भत्वात

ह्रियेव ताभ्यः स्खलतीयमङ्घ्रा
पद्मासंसर्गगुणेन नद्धा ॥ ६५ ॥
पर्य्यङ्कतापन्नसरस्वदङ्कां
लङ्कापुरीमप्यभिलाषि चित्तं ।
कुत्रापि तद्वस्तुनि ते प्रयाति
तदप्यवेहि स्वगये प्रयातु ॥ ६६ ॥
इतीरिता पत्त्ररथेन तेन
ह्रीणा च हृष्टा च बभाण भैमी ।

पद्मसी न स्खलति नद्यभिचरतीति वा । तत्त्वे नद्धाऽस्तावयमित्य मरः ॥ ६५ ॥

स्वाप्तानिकसामर्थ्यद्योतनेन भैमीं प्ररोचयति ॥ पर्य्यङ्केति ॥ हे भैमि ते तव मनश्चित्तं लङ्कापुरीमपि राक्षसनगरीमपि पर्य्यङ्कुं गन्तुं वा अभिलाषि अभिलाषुकं सत् कुत्रापि कस्मिंश्चित् लङ्काया इतरत्र दुष्प्रापे वस्तुनि विषये चेद्यदि प्रयाति साभिलाषं भवति तदपि का कथान्येषां एतादृशं दुष्प्रापमपि वस्तु स्वगये निजहस्त मध्ये प्रयातु विद्यमानं अवेहि जानीहि। कुत्रापि वस्तुनि अभिलाषि तव चित्तं लङ्कापुरीमपि ईप्सितवस्तुलाभार्थं चेद्यदि प्रयाति तदपीति वा योजना किम्भूतां लङ्कां पर्य्यङ्कतापन्नः लङ्काख्पतां प्राप्तः सरस्वतः समुद्रस्य अङ्कः क्रोडो मध्यमित्यर्थः यस्यास्तां समु द्रस्य मध्यवर्त्तिनीमित्यर्थः एतेन दुष्करमपि कर्त्तुं क्षमोऽस्मि अतो मनोगतं कथयेति भवः ॥ ६६ ॥

अथ भैमी हंसं प्रत्याह ॥ इतीति ॥ तेन पत्त्ररथेन पक्षिणा हंसेन इत्युक्तप्रकारमीरिता उक्ता भैमी दमयन्ती ह्रीणा नलाभिलाष

चेतो नलं कामयते मदीयं
नान्यत्र कुत्रापि च साभिलाषं ॥ ६७ ।
विचिन्त्य बालाजनशीलशैलं
लज्जानदीमज्जदनङ्गनागं ।
आचष्ट विस्पष्टमभाषमाणा
मेतां स चक्राङ्गपतङ्गशक्रः ॥ ६८ ॥

अथ नलप्रस्तावेन लज्जिता दृष्टा हंसस्य साभिलाषसाधनोन्मुखत्वज्ञानात् मुदिता च सती बभाषे प्रत्युवाच किं बभाषे इत्याह मदीयं चेतः लङ्कां राक्षसपुरीं न अयते न गच्छति अन्यत्र कुत्रापि वस्तुनि न च नैव साभिलाषं सस्पृहं भवतीति श्लेषः अथ च मदीयं चेतो नलं कामयते नलनामानं राजानं प्रार्थयते अन्यत्र कुत्रापि राजनि न साभिलाषमिति श्लेषेणोवाच । पतत्पत्ररथाण्डजा इत्यमरः ॥ ६७ ॥

अभिप्रायं बुद्ध्वापि तद्वचनस्य दार्ढ्यं जिज्ञासुर्हंसः पुनस्तामाह ॥ विचिन्त्येति ॥ चक्राङ्गाख्यानां पतङ्गानां पक्षिणां शक्र इन्द्र इव स राजहंसः बालाजनानां मुग्धाङ्गनानां शीलं स्वभाव एव दुर्लङ्घ्यत्वेनातिगहनत्वात् शैलः पर्वतस्तं लज्जैव नदी तस्यां मज्जन् क्रीडन् अनङ्गः काम एव नागो हस्ती यत्र तं विचिन्त्य विचार्य कामपीडितापि बाला लज्जावशात् साभिलाषं न कथयन्तीति विचार्येत्यर्थः विस्पष्टं स्फुटार्थं यथा तथा अभाषमाणामकथयन्तीं एतां दमयन्तीं आचष्ट उवाच। अन्यत्रापि शैलनद्यां हस्ती मज्जतीति तथोक्तं। चक्राङ्गा मानसौकस इत्यमरः ॥ ६८ ॥

Digitized by Google

नृपेण पाणिग्रहणस्पृहेति
नलं मनः कामयते ममेति ।
आश्लेषि न श्लेषकवेर्भवत्याः
श्लोकद्वयार्थः सुधिया मया किं ॥ ६९ ॥
त्वच्चेतसः स्थैर्य्यविपर्य्ययन्तु
सम्भाव्य भाव्यस्मि तदज्ञ एव ।

किमाचष्टेत्याह ॥ नृपेणेति ॥ हे दमयन्ति श्लेषकवेः श्लिष्टकाव्यकारिकायाः भवत्यास्तव का नाम वाञ्छा विद्यतेति चेतोनलं कामयते मदीयमिति श्लोकद्वयस्यार्थोऽभिधेयः क्रमेण नृपेण नवेन सह पाणिग्रहणस्पृहा विवाहवाञ्छेति मम मनो नलं कामयत इति एवंरूपः सुधिया पण्डितेनापि नाश्लेषि नाज्ञायि किं मया अज्ञेन नैव ज्ञातो मया इत्यर्थः यद्य च सुधिया मया किं नाज्ञायि अपि तु ज्ञात एवेत्यर्थः अतः किमर्थं गोपायसीति भावः सुधियेति पाठे तु निजबुद्ध्येत्यर्थः ॥ ६९ ॥

ममाभिप्रायो ज्ञातश्चेत् तर्हि किमिति नाथो त्याजयिता पुनर्वाद्यसीत्याशङ्क्याह ॥ त्वच्चेतस इति ॥ तु किन्तु त्वच्चेतसस्तव चित्तस्य स्थैर्य्यविपर्य्ययं स्थैर्य्यस्यान्यथाभावं चाञ्चल्यमित्यर्थः सम्भाव्य संदिह्य तदज्ञ इव एवकार इवार्थे तस्य श्लोकद्वयार्थस्यानभिज्ञ इव भावी अस्मि भवामि कथं ते स्थैर्य्यविपर्य्ययसम्भावनेत्याकाङ्क्षायामाह हि यस्मात् लोकरीत्या बालभावादेव चपलस्वभावे अपक्वानुरागतया एकत्रानवस्थायिनीत्यर्थः बालाहृदि मुग्धाहृदये लघ्वे वेध्ये स्मरेऽपि का कथान्येषां स्वभनोभवः कामोऽपि दरेण कुलिशहृद्वया भवेन

लज्जेपि बालाहृदि लोलशील
दरापराद्धेषुरपि स्मरः स्यात् ॥ ७० ॥
महीमहेन्द्रः खलु नैषधेन्द्र
स्तद्बोधनीयः कथमित्थमेव ।

अपराद्धेषुः लक्ष्यच्युतसायकः स्यात् भवेत् बालानां चित्तचापल्यादेव तव न लाभिलाषनिश्चयाभावादत्र स्वास्मीति भावः अतो निश्चयार्थं पुनर्ब्रो दयामीति भावः । भावीति ग्रहादेराकृतिगणत्वात् स्वार्थे च ग्रहादे रिति स्वार्थे भुवो णिन् यद्वा भावो भावना चिन्तेति यावत् सोऽस्या स्तीति तथा भावी चास्मि चिन्तयामीत्यर्थः अथवा भावोऽभिप्रायः सोऽस्यास्तीति तथा एवकारोऽप्यर्थे भिन्नक्रमे तवाभिप्रायाभिज्ञोऽ पि तद्विपर्य्ययं सम्भाव्य वदन्नोऽस्मीत्यर्थः । दरोऽस्त्री साध्वसे गर्त्ते कन्दरे तु दरी स्मृतेति मेदिनी अपराद्धपृषत्कोऽसौ लक्ष्याच्च्यु तसायक इत्यमरः ॥ ७० ॥

अनिश्चितोऽर्थो मादृशेन राजनि विज्ञापयितुं न शक्यते इत्याह ॥ महीमहेन्द्र इति ॥ नैषधेन्द्रो नलः खलु यस्मात् मह्याः पृथिव्या महेन्द्र इव सम्राडित्यर्थः तत्तस्मात् स नैषधेन्द्रः पृथग्जनेनेव नीचजनेनेव मूर्खजनेनेव वा मद्विधेन विश्वास्येन इत्थमेव अनेनैव बालाजनहृदय चापल्यसमर्थनप्रकारेणैव संशयकम्पं संशयविषयत्वादस्थिरं ईदृक विवाहाभिलाषं प्रयोजनं कार्य्यं कथं केन प्रकारेण बोधनीयः ज्ञाप नीयः यथा पृथग्जनेन नीचतया मूर्खतया वा लज्जाभयादिकं परि त्यज्य राज्ञोऽग्रे अनिश्चितोऽप्यर्थः कथ्यते तथा मया कथयितुं न शक्यत इत्यर्थः इत्थमेव बालया त्वया यथाहं बोधितस्तथा मया स

Digitized by Google

प्रयोजनं संशयकं प्रमीढक्,
पृथग्जनेनेव स मद्विधेन ॥ ७१ ॥
पितुर् नियोगेन निजेच्छया वा
युवानमन्यं यदि वा वृणीष ।
त्वदर्थमर्थित्वकृति प्रतीतिः
कीदृङ्मयि स्यान्निषधेश्वरस्य ॥ ७२ ॥
त्वयापि किं शङ्कितविक्रियेऽस्मि
न्नधिक्रिये वा विषये निधातुं ।

कथं बोध्य इति वा इत्यमेव निर्णयं विनैवेति केचित् । मूर्खनीचौ पृथग्जनावित्यमरः ॥ ७१ ॥

अनिश्चितार्थविज्ञापने दोषं दर्शयति ॥ पितुरिति ॥ हे भैमि पितुर्नियोगेनानुमत्या निजेच्छया वा स्वेच्छया वा यदि अन्यं नला द्भिन्नं युवानं तरुणं वृणीषे वरयिष्यसि तदा त्वदर्थं त्वन्निमित्तं अर्थित्वकृति भवता दमयन्ती परिणेतव्येति प्रार्थनाकारिणि मयि निषधेश्वरस्य नलस्य प्रतीतिः प्रत्ययः विश्वस्तोऽयमिति निश्चयः कीदृक् स्यात् कथं तिष्ठेत् नैव स्यादित्यर्थः कीदृक्स्यात् भयफल दायिनी न स्यादित्यर्थः इति केचित् । अर्थित्वकृतीति कृञः क्विप् ततः सप्तम्येकवचनं ॥ ७२ ॥

सन्दिग्धविषये त्वयापि नाहं नियोज्य इत्याह ॥ त्वयापीति ॥ हे उर्व्वीपतिपुत्रि हे राजसुते दमयन्ति त्वयापि शङ्कितविक्रिये सम्भावितनलेतरवरवरणलक्षणविकारेऽस्मिन् विषये विवाहकृत्ये निधातुं नियोजयितुं किं किमिति अहं अधिक्रियेऽधिकारी क्रिये

Digitized by Google

इतः पृथक् प्रार्थयसे तु यद्यत्
कुर्व्वे तदुर्व्वीपतिपुत्रि सर्व्वं ॥ ७३ ॥
श्रवःप्रविष्टा इव तद्गिरस्ता
विधूय वैमत्यधुतेन मूर्द्ध्ना ।
ऊचे ह्रियोऽपि स्थपितानुरोधा
पुनर्धरित्रीपुरुहूतपुत्री ॥ ७४ ॥

तु किन्तु इतो नलविवाहलक्षणविषयात् पृथगन्यत् यद्यत्प्रार्थयसे तत्सर्व्वमहं कुर्व्वे करोमि नलान्यदित्यर्थः । केचित्तु प्रार्थितमिति च इति पाठं कृत्वा प्रार्थिता चिकीर्षिता कृत्वा यत्र तथाभूत इति व्याचक्षते ॥ ७३ ॥

अथ लज्जापरित्यागपूर्व्वकं भैमीवचनमाह ॥ श्रव इति ॥ धरित्री पुरुहूतपुत्री पृथिवीन्द्रसुता दमयन्ती वैमत्येनासम्मत्या धुतेन कम्पितेन मूर्द्ध्ना मस्तकेन श्रवःप्रविष्टा इव कर्णान्तर्गतजलादय इव ताः पूर्व्वोक्तास्तद्गिरो हंसवचनानि विधूय अग्राह्यत्वेन विज्ञाप्य अथ च निःसार्य्य ह्रियोऽपि लज्जाया अपि स्थपितोऽमन्दीकृतोऽनुरोधोऽधीनत्वं यया तादृशी निर्लज्जा सतीत्यर्थः पुनरूचे उक्तवती इवोपमितौ यथा कर्णान्तर्गता जलादयः कम्पितमूर्द्ध्ना निःसार्य्यन्ते तथेत्यर्थः । श्रवःप्रविष्टाः श्रुता अथच कर्णमध्ये कुहरिं प्रविष्टास्तास्तद्गिरो वैमत्यधुतेन मूर्द्ध्ना विधुत्येव निरस्यैवेत्युत्प्रेक्षा वा कर्णमध्यगतिः श्रोत्रं श्रुतिः स्त्री श्रवणं श्रव इत्यमरः ॥ ७४ ॥

Digitized by Google

मदन्यदानं प्रति कल्पनाभूत्
वेदस्त्वदीये हृदि तावदेषा।
निशोऽपि सोमेतरकान्तशङ्का
मोङ्कारमग्रेसरमस्य कुर्य्याः ॥ ७५ ॥
सरोजिनीमानसरागवृत्ते
रनर्कसम्पर्कमतर्कयित्वा।

यदूचे तदाह ॥ मदन्येति ॥ हे हंस मदन्यदानं मम अन्यस्मै नलाद्भिन्नाय वराय यद्दानं पितृकर्तृकमागतमपि तदुद्दिश्य एषा तावत्कल्पना पितुर्नियोगमेनेत्यादिवितर्कोऽयदि त्वदीये हृदि तव म नसि वेदो वेदवत्प्रमाणभूतः स्थिर इति यावत् अभूत् तदा नि शोऽपि रात्रेरपि सोमेतरचन्द्रादितरो यः कान्तः प्रियस्तस्य शङ्कां तद्रूपमोङ्कारमस्य वेदस्य अग्रेसरं पुरोवर्त्तिनं कुर्य्याः कुरु वेदोहि प्रथममोङ्कारसहित उच्चार्य्यते यथा रात्रेश्चन्द्रातिरिक्तः कान्तो न तथा ममापि नलातिरिक्तः कान्तो नेत्यर्थः एतेन पितुर्नियोगेनैत्य नेन नलातिरिक्तवराय यत्पितृनियोगकल्पकारस्तस्सम्भावनं तत्तवानुचि तमेवेति सूचितं ॥ ७५ ॥

पुनरपि पूर्ववदाक्षिपति ॥ सरोजिनीति ॥ सरोजिन्याः कम लिन्या मानसरागोऽन्तःकरणानुरागस्तस्य वृत्तिरुद्भवः स्थितिर्वा तस्या अनर्केण सूर्य्येतरेण सम्पर्कं सम्बन्धं अतर्कयित्वा अविचार्य्य इयं मम अन्येन नलादितरेण सह पाणिग्रहणरूपिता विवाहशङ्का भवतस्तव अहो आश्चर्य्यं भवदीयोऽतिप्रयेम महत् साहसिकं साहस

मदन्यपाणिग्रहशङ्कितेयं
मनो मदीयस्तव साहसिक्यं ॥ ७६ ॥
साधु त्वया तर्कितमेतदेव
स्वेनानलं यत्किल संश्रयिष्ये ।
विनामुना स्वात्मनि तु प्रहर्तुं
मृषागिरं त्वां नृपतौ न कर्तुं ॥ ७७ ॥
मद्विप्रलभ्यं पुनराह यस्त्वां
तर्कः स किं तत्फलवाचि मूकः ।

कर्म यदि सूर्यातिरिक्तः कान्तः कमलिन्याः स्यात्तदा ममापि नलातिरिक्तस्तथा स्यादिति भावः ॥ ७६ ॥

निजेच्छया वा युवानमन्यं यदि वृणीषे इति यदुक्तं तत्रोत्तरमाह ॥ साध्विति ॥ किलोपहासे विस्मये सम्भावनायां वा हे हंस त्वया एतत् साध्वेव समीचीनमेव तर्कितं आशङ्कितं यत् किल स्वेन आत्मना अनलं नलातिरिक्तं युवानं संश्रयिष्ये आश्रयिष्यामि तु किन्तु अमुना नलेन विना नलाभावे प्रहर्तुं विनाशयितुं स्वात्मनि स्वशरीरे अनलं अग्निं संश्रयिष्ये न तु त्वां नृपतौ नले मृषागिरं मिथ्यावादिनं कर्तुं अनलं नलाद्भिन्नं संश्रयिष्ये नलं विना आत्मघातिनी भविष्यामीति भावः। स्वात्मनीति कर्माविवक्षायां सप्तमीति ध्येयः । आत्मा पुंसि स्वभावेऽपि प्रयत्नमनसोरपि । धृतावपि मनीषायां शरीरब्रह्मणोरपीति मेदिनी॥ ७७ ॥

नलमुपयच्छे मया न तु भवान् प्रतार्यत इत्याह ॥ मद्विप्रलभ्यमिति ॥ हे हंस यः पुनस्तर्कः त्वां मद्विप्रलभ्यं मया प्रतार्यं आह वदति

Digitized by Google

अशक्यशङ्काव्यभिचारहेतु
र्वाणी न वेदा यदि सन्तु के तु ॥ ७८ ॥
अनैषधायैव जुहोति तातः
किं मां कृशानौ न शरीरशेषां ।

स तर्कः तस्य प्रतारकस्य फलवाचि प्रयोजनकथने किं मूको निर्व्वाक् येन तर्कैव तमाश्रयं प्रतार्य्यं मन्यसे नैव तर्कैव तत्प्रतारकस्य प्रयोजनं किमिति न ज्ञानासीत्यर्थः प्रतारणं हि किञ्चित् प्रयोज नमुद्दिश्यैव क्रियते अतः प्रयोजनमज्ञात्वैव मम प्रतार्य्यत्वज्ञानं तव नोचितमिति भावः । ननु तथापि कथं त्वद्वचनप्रामाण्यमित्याश ङ्क्याह । अशक्या शङ्का संशयोऽपि येषां तादृशा व्यभिचारहेतवो भ्रान्तोर्पारतत्वादयो यत्र तादृशी वाणी यदि न वेदा न वेदवत् प्रमाणभूता भवेत् तदा के तु के पुनर्वेदाः सन्तु भवन्तु यत व्यभि चारदोषहेतूनां शङ्कापि नास्ति तथाविधाया वाण्या अप्रामाण्ये वेद स्याप्यप्रामाण्यं स्यादित्यर्थः अतो व्यभिचारशून्यं मम वचनं विश्वसि हीति भावः ॥ ७८ ॥

पुनरपि पितुर्नियोगेनेति कथ्यं युक्ता निराकरोति ॥ अनैष धायैवेति ॥ एवं यद्यर्थे तातः पिता यदि मां अनैषधाय नलव्यतिरिक्त वराय जुहोति ददाति तदा शरीरशेषां देहमात्रावशिष्टां मत् प्राणामित्यर्थः मां कृशानौ वह्नौ किं न जुहोति न प्रक्षिपति अपितु जुहोत्येव नलेतरेण सह विवाहात् प्रागेव मरिष्यामि ततः पिता केवलं मच्छरीरमेव नलेतरस्मिन् वह्नौ त्यक्ष्यतीत्यर्थः एवञ्च पिता मम मरणव्यवसायमवधार्य्य नलायैव मां दास्यतीति भावः । नन्वेवं पितुरभिप्रेतं विफलीकृत्य कथं प्रागलभ्यमाश्र यिष्यसीत्याशङ्क्य तदङ्गीकृत्याह कथमि कथञ्चित् मां दास्यति

Digitized by Google

ईष्टे तनूजन्मतनोः स नून
मत्प्राणनाथस्तु नलस्तथापि ॥ ७९ ॥
तदेकदासीत्वपदादुदग्रे
मदीप्सिते साधु विधित्सुता ते ।

तथापि मम प्राणानां नाथो नलस्तु नल एव तुरेवार्थे स पिता नूनं निश्चितं तनूजन्म अपत्यं तस्य तनोः शरीरस्य ईष्टे प्रभुर्भवति तदधीनस्य शरीरस्य यत् किञ्चित् करोतु प्राणास्तु नलाधीना अतो ददातु पिता मामन्यस्मै अथवा जन्मान्तरेऽपि प्राप्तव्यं नलमुद्दिश्य वह्नौ प्राणांस्त्यक्ष्यामीति भावः । अपत्यशरीरस्य पित्रधीनत्वमाह वशिष्ठः शुक्रशोणितसम्भवः पुरुषो मातापितृनिमित्तकस्तस्य प्रदानविक्रयपरित्यागेषु मातापितरौ प्रभवत इति ॥ ७९ ॥

इतः पृथक् प्रार्थयसे इति यदुक्तं तत्रासम्मतिं ख्यापयति ॥ तदेकेति ॥ तस्य नलस्य यत् एकं केवलं दासीत्वं तल्लक्षणं यत् पदं वस्तु तस्मादुदग्रे उत्कृष्टे मदीप्सिते मम लिप्साविषये वस्तुनि ते तव विधित्सुता तद्विधानेच्छा भवतीति शेषः इदं साधु भद्रं सोल्लुण्ठनोक्तिरियं इदमसाध्वेवेत्यर्थः नलदासीत्वमेव ममाभिलषितं अतस्तदेव विधीयतां न त्वन्यदिति भावः गुणवदपि निष्प्रयोजनं वस्तु अकिञ्चित्करमेवेत्याह नलिनी कमलिनी अहेलिना हेलिः सूर्यस्तद्भिन्नेन सुधया अमृतस्य आकरेणापि उत्पत्तिस्थानेनापि सुधाकरेण चन्द्रेण किं विधत्ते किं कुरुते अपि तु न किमपि यथा सूर्यानुरक्तायाः कमलिन्याः सुधाधारत्वादुत्तमोऽपि चन्द्रोऽनुरागाभावान्न रोचते तथा ममेत्यर्थः । अथ च नलिनी इच्छासम्बन्धेन नल

Digitized by Google

अहेलिना किं नलिनी विधत्ते
सुधाकरेणापि सुधाकरेण ॥ ८० ॥
तदेकलुब्धे हृदि मेऽस्ति लब्धुं
चिन्ता न चिन्तामणिमप्यनर्घ्यं ।
चित्ते ममैकः सकलत्रिलोकी
सारोनिधिः पद्ममुखः स एव ॥ ८१ ॥

यती अर्थ अहेलिना हेला कामविकारविशेषः अनलतया सोऽस्या स्तीति यथा तद्विहीनेन किं विधास्यामीति ध्वनिः ॥ ८० ॥

इदमेव प्रकटयति ॥ तदेकलुब्धइति ॥ तस्मिन् नले एकं केवलं लुब्धं अभिलाषुकं तथाविधे हृदि अन्तःकरणे अनर्घं अभिलषित प्रदातृत्वादमूल्यं चिन्तामणिमपि तदाख्यं रत्नविशेषमपि लब्धुं प्राप्तुं मे मम चिन्ता मनोरथो नास्ति किं पुनः पुरुषान्तरमित्यर्थः । चिन्ता भावना नास्तीति केचित् । तर्हि किं ते हृदीत्याह एकः केवलः स एव नलएव मम चित्ते निधिः शेवधिरूपः किं चिन्तामणिनेत्यर्थः । यद्वा निधीयत इति निधिर्निहितः कर्मणि इक् किम्भूतः सकलत्रिलोक्याः सारः श्रेष्ठः सकलचतुःषष्टिकलासहितः त्रिलोक्याः श्रेष्ठोपि वा तथा पद्मं कमलमिव मुखं वदनं यस्य सः अथ च स एवैको सकलत्रि लोक्याः सारो धनं पद्मादिर्निधिः शेवधिः एको नल एव मम पद्मा दयोऽष्टौ निधय इत्यर्थः पद्मोमुखमादिर्यस्येति विग्रहः यस्याष्टौ निधयः सन्ति किं तस्य चिन्तामणिना । पद्मस्तथा महापद्मः शङ्खो मकरकच्छपौ मुकुन्दकुन्दौ नीलश्च निधयोऽष्टौ प्रकीर्त्तिताइत्यि व्यासः । सारो बले स्थिरांशे च मज्ज्ञि पुंसि जले धने । न्याय्ये क्लीबं त्रिषु वर इति मेदिनी ॥ ८१ ॥

श्रुतः स दृष्टः स हरित्सु मोहा
द्ध्यातः स नीरन्ध्रितबुद्धिधारं ।
ममाद्य तत्प्राप्तिरसुव्ययो वा
हस्ते तवास्ते द्वयमेव शेषः ॥ ८२ ॥

न केवलमधुनैव भवन्मुखात्तद्गुणराशिं श्रुत्वा बालभावात् स्पृहयामि किन्तु पूर्व्वमपि तस्मिन् जातानुरागास्मीत्याह ॥ श्रुत इति । स प्रसिद्धरूपो नलः श्रुतः पूर्व्वं द्विजवन्द्यादिमुखादाकर्णितः ततो हरित्सु दिक्षु मोहात् उन्मादवशात् स दृष्टः आलोकितः उन्मादात् सर्व्वं जगत्तन्मयत्वेन दृष्टमित्यर्थः तथा नीरन्ध्रिता वस्त्वन्तरध्यानेनाव्यवहिता बुद्धिधारा बुद्धिप्रवाहो धारावाहिकबुद्धिरित्यर्थः यत्र क्रियायां तद्यथा तथा स ध्यातश्चिन्तितः अथ इदानीं मम तत्प्राप्तिर्नलस्य लाभः असूनां प्राणानां व्ययोऽपगमो वा शेषोऽवशिष्टं एतद्द्वयं तवैव हस्ते आस्ते त्वदधीनं भूत्वा विद्यते एकशेष इति पाठे एकश्चासौ शेषश्चेति कर्म्मधारयः एकशेषरूपेण द्वयं तिष्ठतीत्यर्थः एतेन पूर्व्वरागे येऽभिलाषादयो मरणान्तादश कामदशा विरहिणां जायन्ते तेषां नव दशा मयानुभूता इति सूचितं । अथ च श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः । मत्वा च सततं ध्येय एते दर्शनहेतव इति वचनात् श्रवणादिना पूर्व्वं विषयीकृतस्य तत्त्वमसीति श्रुतौ तच्छब्दवाच्यब्रह्मणः प्राप्तिः कस्यचिदेव सुकृतिनो भवति बहवस्तु तदप्राप्य म्रियन्ते तद्वन्ममापि नलप्राप्तिर्मरणं वा भविष्यतीति ध्वनिः ॥ ८२ ॥

Digitized by Google

सञ्चीयतामाश्रितपालनोत्थं
मत्प्राणविश्राणनजञ्च पुण्यं ।
निवार्य्यतामार्य्य वृथा विशङ्का
भद्रेऽपि मुद्रेयमये भृशं का ॥ ८३ ॥
अलं विलङ्घ्य प्रियविज्ञ याच्ञाः
कृत्वापि वाम्यं विविधं विधेये ।

तत्र प्रवर्त्तनाय प्ररोचनया हंसं विलोभयति ॥ सञ्चीयतामिति ॥ आश्रितस्य शरणं प्राप्तस्य जनस्य पालनोत्थं रक्षणजनितं तथा मम प्राणानां विश्राणनात् वितरणात् जायत इति तादृशञ्च पुण्यं सञ्चीयतां त्वया सञ्चितं क्रियतां निषेधाभावे कथं कार्य्यमित्यत आह अये कोमलसम्बोधने हे आर्य्य साधो वृथा निष्प्रयोजना विशङ्का पितुर्नियोगेनेत्यादिरूपा आशङ्का निवार्य्यतां परित्यज्यतां भद्रेऽपि साधावपि त्वयि शुभकर्म्मण्यपि वा भृशमत्यर्थं इयं मुद्रा मूकीभावः का अपितु नैवेयमङ्गीकार्य्येत्यर्थः । मुद्रा सङ्कोचरूपा भङ्गीति केचित् । विश्राणनं वितरणमित्यमरः ॥ ८३ ॥

तदर्थं नानाविधमाह ॥ अलमिति हे प्रियविज्ञ हंस याच्ञा मम प्रार्थनाः विलङ्घ्यातिक्रम्य अलं मम याच्ञा नातिक्रमणीया इत्यर्थः तथा विधेये करणीयवस्तुविषये विविधं नानाप्रकारं वाम्यं प्रातिकूल्यं कृत्वापि अलं तन्न करणीयमित्यर्थः तथा आश्रवो वचनकारित्वाख्यं यत्पदं व्यवसायस्तदेव पदं शरणं तस्मादुत्थादुत्पन्नात् यशःपथात् कीर्त्तिमार्गात् स्खलित्वा प्रभ्रश्य खलु तस्मात् स्खलनं न कर्त्तव्यमित्यर्थः किम्भूतात् अन्या द्विमा खद्योतानां खञ्जनदुर्वच

यशः पयोराशिवतापदोत्थात्
खलु स्खलित्वाऽस्तखलोक्तिखेलात् ॥ ८४ ॥
स्वजीवमप्यर्थिमुदे ददस्य
स्तव त्रपा नेदमवद्यमुष्टेः ।

नानां खेला विलासो यस्मिन् तथाभूतात् हंससदृशः परोपकारको ऽन्यो नास्तीति दुर्जना अपि यथा त्वां प्रशंसन्ति तथा कुर्वित्यर्थः प्रियवित्त्वेति प्रियं नलं विशेषेण जानातीति समुदितावेतद् अथवा प्रियो नलप्रस्तावकत्वात् प्रीतिविधायकः विष्णो वीनां पक्षिणां मध्ये ऽष्टः श्रेष्ठस्य हे तादृश यद्वा प्रियस्य सतो विष्णस्य नलस्य यात्रा इति योजना हे प्रिय हे विष्ण इति सम्बोधनद्वयमिति बहवः आश्रवतापदोत्थादिति श्लिष्टरूपकं अन्योऽपि पथ्या अनवरतगमना गमनेन पदादुत्थितो भवति । नलं विलङ्घेयति अलापीति खलु स्खलित्वेति च निषेधार्थालंखलुयुक्तावेति क्त्वा । वचने स्थित आश्रव इत्यमरः ॥ ८४ ॥

सान्त्वेयं ब्रूते ॥ स्वजीवमपीति ॥ हे हंस मदीयान् मत्सम्बन्धिना ऽसून् नलरूपान् प्राणान् मह्यमेव नलप्रयस्ये अदित्सोर्दातुमनिच्छोरो दृश्यवस्मुष्टेरेतादृशपश्यमिरोमस्तव अर्थिनां याचकानां मुदे आर्तमुदे इतिपाठे आर्तानां दीनानां मुदे हर्षाय स्वजीवमपि निज जीवनमपि ददस्योदधीचिजीमूतवाहनादिभ्यो यत् यस्मात्त्रपा लज्जा न भवति तस्मात् तव कीर्त्तिधौतो यशसा शुद्धो धर्म्मः करात् हस्तात् भ्रश्यति पतति धर्म्मयशसी हेतस्य न वर्त्तेते इति भावः योऽन्यदीयं गृहीत्वा पुनस्तस्य ददाति तस्य स्वजीवदातृभ्यो लज्जा जायत एव

मह्यं मदीयान् यदरुन्नदित्था
द्धर्म्मः कराद्भ्रश्यति कीर्त्तिधौतः ॥ ८५ ॥
दत्त्वा स्वजीवं त्वयि जीवदेऽपि
गृह्णामि जीवाधिकदे तु केन ।
विधेहि तन्मां त्वदृणेषु मोक्तु-
ममुद्रदारिद्र्यसमुद्रमग्नां ॥ ८६ ॥
क्रीणीष्व मज्जीवितमेव पण्य-
मन्यन्न चेदस्ति तदस्तु पुण्यं ।

तव तु तां न पश्यामि अतः कीर्त्तिधर्म्मौ तव गतावेवेत्यर्थः बद्धमुष्टेः करात्पततीति विरोधाभासोऽयं । बद्धमुष्टिर्दृढमुष्टौ कृपणे कृपणेऽपिचेति विश्वः ॥ ८५ ॥

पुनः सानुनयं ब्रूते ॥ दत्त्वेति ॥ हे हंस जीवदे प्राणदे त्वयि स्वजीवं निजप्राणान् दत्त्वापि मुच्यामि ऋणरहितोभवामि उभयोः समत्वात् तु पुनः जीवाधिकं प्राणाधिकं नलं ददातीति तथाविधे त्वयि केन प्रकारेण मुच्यामि अपि तु न केनापि प्राणाधिकस्य वस्तुनोऽभावात् । तत्तस्मात् त्वं मां त्वदृणेषु तव ऋणेषु विषयेषु मोक्तुं मुक्ता भवितुं अमुद्रोऽसीमो यो दारिद्र्यसमुद्रस्तत्र मग्नां अतिदरिद्रत्वादसमर्थामित्यर्थः विधेहि कुरु तवाधमर्णा यथा स्यां तथा कुर्वित्यर्थः प्राणाधिकनलदो भवेति भावः । अत्र ऋणशब्द उपकारपरः अधमर्णत्वं प्रत्युपकाराकरणं ॥ ८६ ॥

पुनस्तथैव प्ररोचयति ॥ क्रीणीष्वेति ॥ हे हंस मम जीवितमेव पण्यं विक्रेयं वस्तु क्रीणीष्व मियदानमूल्येनेति शेषः तत् क्रीत्वा मम

Digitized by Google

जीवेन्महानर्थ्यदि ते न दातुं
यशोऽपि तावत्प्रभवामि गातुं ॥ ८७ ॥
वराटिकोपक्रिययापि लभ्या
लेभ्याः कृतज्ञानधनाद्रियन्ते ।
प्राणैः पणैः स्वं निपुणं भणन्तः
क्रीणन्ति तानेव तु हन्त सन्तः ॥ ८८ ॥

मेव प्रयच्छेत्यर्थः नत्वं दत्वा मां जीवयेति भावः एवं करणे को मे लाभ इत्यत्राह चेत् यदि अन्यत् तत्प्रतिदानोपयुक्तं धनादिकं नास्ति तत्तदा पुण्यं अस्तु भवतु ननु पुण्यं परत्र फलदं अत्रैहिकं किमपि प्रार्थय इत्यत्राह हे जीवेशदातः मातृनाथप्रद प्रत्युपकारो पयुक्तवस्त्वभावात् ते तुभ्यं यदि दातुं न प्रभवामि न शक्नोमि तर्हापि तव यशस्तावत् साकल्येन गातुं प्रभवामि हंसेनैवास्मि जीविते ति को र्त्तिगानं कर्त्तुं समर्थः कीर्त्यर्थः अतः कीर्त्तिमात्रमप्युद्दिश्य त्वयेदं कर्त्तव्य मिति भावः ॥ ८७ ॥

स्वाभीष्टलाभमनपेक्ष्यैव साधव उपकुर्वन्तीत्याह ॥ वराटिकेति ॥ अथवा पूर्वोक्तेपि इत्यादर्विनो धनलुब्धा इत्यर्थः वराटिकोपक्रिययापि एककपर्दकमात्रदानोपकारेणापि लभ्यान् प्राप्यान् कृतज्ञान् उपका रकारिणः साधून् नाद्रियन्ते न बहु मन्यन्ते तु किन्तु सन्तः साधवः स्वमात्मानं निपुणं सम्यक्कारिणं भणन्तः कथयन्तः सन्तः हन्त हर्षे प्राणैः पणैः प्राणदानरूपमूल्यैरपि तान् कृतज्ञान् क्रीणन्त्येव अतः प्रयोजनाभावेऽपि साधुना त्वया नलप्रदानेन चिरकालमुपकार प्राप्तं कर्त्तव्येति भावः । इभ्य आढ्यो धनीत्यमरः ॥ ८८ ॥

Digitized by Google

स भूभृदष्टावपि लोकपाला-
स्तैर्मे तदेकाग्रधियः प्रसेदे ।
न चेतरस्मादृघटते यदेत्य
स्वयं तदाप्तिप्रतिभूर्ममाभूः ॥ ८९ ॥

अकाण्डमेवात्मभुवार्जितस्य
भूत्वापि मूलं मयि वीरणस्य ।

त्वयेदं कर्तव्यमेवेत्युक्तिविशेषेण ख्यापयति ॥ स इति ॥ यतः स भूभृन्नलोऽष्टावपि लोकपालाः राजत्वेन तदंशोत्पन्नत्वादिन्द्रादिलोकपालस्वरूप इत्यर्थः अतस्तस्मिन् इन्द्रादिरूपे नले एकाग्रा तन्मात्रविषया निश्चिता वा धीर्बुद्धिर्यस्यास्तथाभूताया मे मम तैर्लोकपालैः प्रसेदे प्रसन्नं भावे लिट् नलस्य लोकपालांशत्वात् तद्ध्यानवत्या मम ते प्रसन्ना इत्यर्थः देवता हि अनवरतध्यानेन प्रसन्ना भवन्ति प्रसन्नत्वेऽन्यथानुपपत्तिं प्रमाणयति हि यस्मात् हे हंस त्वं यत् स्वयं एत्य आगत्य मम तदाप्तौ नलप्राप्तौ प्रतिभूर्लग्नकोऽभूर्भूतोऽसि इदं इतरस्मात् लोकपालप्रसादभिन्नात् कारणात् न घटते न सङ्गच्छते मम विश्वासाय लोकपालैस्त्वं लग्नकः कृत इत्यर्थः लोके हि ऋणदानादिविषये लग्नक आगत्याधमर्णयमत्यावो भूत्वा मा शङ्कस्वामहमेवेदं दास्यामीति विश्वासाय वदति तथा त्वमपि आगत्य तदप्यवेहि स्वयमेव मयात्मिलग्नका नलप्रदाने प्रतिभूर्भूतः अतो लोकपालान् परित्यज्य त्वामेव नलं याचे त्वयैव स दातव्य इति भावः । प्रतिभूरिति भुवः संज्ञालग्नकयोरिति क्विप् ॥ ८९ ॥

त्वयैव मह्यं नलो दातव्य इत्याह ॥ अकाण्डमेवेति ॥ अकाण्डं अनवसरं कन्यावस्थायामनुचितत्वादयुक्तकालमित्यर्थः यथा स्यात्तथा

Digitized by Google

भवान्न मे किं नलदत्वमेत्य
कर्त्ता हृदश्चन्दनलेपकृत्यं ॥ ९० ॥
अलं विलम्ब्य त्वरितुं हि वेला
कार्य्ये किल स्थैर्य्यसहे विचारः ।

आत्मभुवेव कामेनैव मयि अर्जितस्य जनितस्य रहस्य शब्दस्य रहस्यकथनस्येत्यर्थः मूलं कारणं भूत्वा अपिभिन्नक्रमे विरपि पद्यपि भवान् नलदत्वं नलदातृत्वं एत्य प्राप्य नलं दत्ते इत्यर्थः मे मम हृदो हृदयस्य चन्दनलेपस्य कृत्यं कार्य्यं शीतलत्वं किं न कर्त्ता न करिष्यति अवश्यमेव करिष्यतीत्यर्थः कौमारावस्थायां निन्दितमपि कामरहस्यकथनं त्वयैव कारितं अतस्त्वमेव नलदो भवेति भावः अकाण्डं वाक्यशून्यं यथा स्यात्तथा कामेनार्जितस्य रहस्य सुरतसंग्रामस्य मूलं निदानं भूत्वेत्यादि वा । अथ च अकाण्डं स्कन्धरहितं यथा स्यात्तथा आत्मभुवा ब्रह्मणा अर्जितस्य कृतस्य वीरणस्य तृणविशेषस्य मूलमिव अथ इव मयि भूत्वा नल दलं एत्य उशीररूपतां प्राप्य त्वं हृदो मम सचन्दनलेपकृत्यमङ्गरागं करिष्यसि । काण्डः स्त्रम्बे तरुस्कन्धे वाक्येऽवसरनीरयोः । कुत्सिते दृत्यभिन्नाडीहन्दे रहसि न स्त्रियामिति मेदिनी स्याद्वीरणं वीर तरं मूलेऽस्योशीरमस्त्रियां । अभयं नलदं सेव्यमित्यमरः । कर्त्तेति लुटा रूपं ॥ ९० ॥

शीघ्रमेवैतत्कर्त्तव्यं मा विरयेत्याह ॥ अलमिति ॥ हे हंस हि यस्मादियं त्वरितुं सत्वरीभवितुं वेला समयस्तस्माद्विलम्ब्य अलं

Digitized by Google

गुरूपदेशं प्रतिभेव तीक्ष्णा
प्रतीक्षते जातु न कालमर्त्तिः ॥ ९१ ॥
अभ्यर्थनीयः स गतेन राजा
त्वया न शुद्धान्तगतो मदर्थे ।

विलम्बो न कर्त्तव्य इत्यर्थः तदर्थमस्मिन् क्षण एव त्वरा कर्त्तव्या विलम्बे विघ्नोपस्थितिश्चेत् तद्दुर्घटं भवेदिति भावः कथमिदं समयम विचार्य्य करिष्यामीत्याशङ्क्याह किल यतः स्थैर्य्यसहे विलम्बसहे कार्य्ये विचारो वारवेलादिविवेचनं क्रियत इति शेषः इदन्तु विलम्ब सहं न भवतीत्यत्र विचारो न युज्यत इति भावः अत्र हेतुमाह अर्त्तिः पीडा प्रकृते विरहयातना जातु कदाचिदपि कालं काल विचारं न प्रतीक्षते नापेक्षते इव यथा तीक्ष्णा सूक्ष्मार्थग्राहिणी प्रतिभा शिष्यप्रज्ञा गुरूपदेशं न प्रतीक्षते गुरूपदेशात् पूर्व्वमेव शास्त्रार्थं विषयीकरोति तथेत्यर्थः । त्वरितुमिति ञ्यादिभिर्युक्तादि त्यादिना तुमन् ॥ ९१ ॥

एवं पूर्व्वोक्तैर् समनुकूल चतुर्भिः श्लोकैर्विज्ञापनाप्रकारमुपदि शति ॥ अभ्यर्थनीय इति ॥ हे हंस गतेन इतोनलसान्निध्यं प्राप्तेन त्वया शुद्धान्तगतोऽन्तःपुरमध्यस्थः स राजा नलः मदर्थे त्वया दम यन्ती उद्वाढव्येति मन्निमित्तं नाभ्यर्थनीयो न याचनीयः कथं नेत्याह हि यस्मात्तदा तस्मिन् समये प्रियाया आस्यस्य मुखस्य दाक्षिण्येन अनुरोधेन बलात्कारेण हठाद्र्जनितोऽन्यवधूविषयः एतत्समाना काचित् स्त्री नास्तीत्येवंरूपउदयेदाविर्भवेत् यद्यपि अन्यरमण्या

Digitized by Google

प्रियास्यदाक्षिण्यबलात्कृतोपि
तदोदयेदन्यवधूनिषेधः ॥ ९२ ॥
शुद्धान्तसम्भोगनितान्ततुष्टे
न नैषधे कार्य्यमिदं निगाद्यं।
अपां हि तृप्ताय न वारिधारा
स्वादुः सुगन्धिः स्वदते तुषारा ॥ ९३ ॥
त्वया निधेया न गिरो मदर्थाः
क्रुधा कदुष्णे हृदि नैषधस्य।

मम्य वासना ग्रात्तयापि प्रियानुरोधात् वामप्रकाश्य अन्यस्त्रीविवाहं निषिध्येदिति भावः ॥ ९२ ॥

शुद्धान्तेति ॥ हे हंस शुद्धान्तसम्भोगेन अन्तःपुरस्त्रीयभोगेन नितान्ततुष्टे अतिशयेन सन्तुष्टे निवृत्तकामाभिलाष इति यावत् नैषधे नले इदं पूर्वोक्तं कार्य्यं न निगाद्यं न वक्तव्यं अर्थान्तरेणेदं सम र्थयति हि यस्मात् सुगन्धिः कर्पूरादिगन्धद्रव्यवती तुषारा शीतला अत एव स्वादुः सुरसा वारिधारा जलधारा अपां तृप्ताय जलैः प्रीताय जनाय न स्वदते न रोचते पिपासाभावात् यथा पिपासार हितस्य सुरसापि वारिधारा नादरणीया तथा सम्भोगबाहुल्यात कामाभिलाषरहितस्य तस्य मदर्थप्रार्थनेत्यर्थः। अपामिति तृप्त्यर्थं स्य येति करणे षष्ठी तृप्तायेति यत्प्रीतिश्च रुच्यर्थकर्त्तेति संप्रदान संज्ञायां चतुर्थी। शुद्धान्तोऽन्तःपुरे कक्षाभेदे योषिति भूपतेरित्य मरः ॥ ९३ ॥

त्वयेति ॥ नैषधस्य नलस्य हृदि मनसि क्रुधा कोपेन कदुष्णे ईषद् उष्णे सति कलुषिते सतीत्यर्थः त्वया मदर्था मत्प्रयोजना गिरो वच

पित्तेन दूने रसने सितापि
तिक्तायते हंसकुलावतंस ॥ ९४ ॥
धरातुरासाहि मदर्थयाच्ञा
कार्य्या न कार्य्यान्तरचुम्बिचित्ते।
तदार्थितस्यानवबोधनिद्रा
बिभर्त्यवज्ञाचरणस्य मुद्रां ॥ ९५ ॥
विज्ञेन विज्ञाप्यमिदं नरेन्द्रे
तस्मात्त्वयास्मिन् समयं समीक्ष्य।

ज्ञानि न निषेधा नायंबीया न वक्तव्या इत्यर्थः अर्थान्तरेण सम र्थयति हे हंसकुलावतंस हंसकुलालङ्कारभूत पित्तेन दूने अभि भूते रसने जिह्वायां सितापि शर्करापि तिक्तायते निम्बादिवदा चरति उत्तमानां नाधिकं कोपकालुष्यं भवतीति कटुक्त्योक्तं। रसनं ध्वनिते स्वादे रसज्ञारावयोरपीति हेमचन्द्रः ॥ ९४ ॥

धरेति ॥ हे हंस कार्य्यान्तरचुम्बिचित्ते अन्यकार्य्यासक्तमनसि धरा तुरासाहि पृथिवीन्द्रे नले मदर्थयाच्ञा मत्प्रयोजनप्रार्थना त्वया न कार्य्या न कर्त्तव्या यतस्तदा कार्य्यान्तरचिन्ताकाले अर्थितस्य प्रार्थितस्य कार्य्यस्य अनवबोध एव अज्ञानमेव निद्रा कर्त्री अवज्ञाया अवहेलाया आचरणस्य करणस्य मुद्रां चिह्नं बिभर्त्ति धारयति कार्य्यान्तरासक्त चित्तत्वाद्यदि भवत्प्रार्थनं स न शृणुयात्तदा इदं कार्य्यमस्मै न रो चत इति विविच्य पुनः कथने भवतः प्रवृत्तिर्न स्यादिति भावः ॥ ९५ ॥

किं मयाधिकं वक्तव्यं त्वया पुनः सुसमयं प्राप्यैव विज्ञापनीय मित्याह ॥ विज्ञेनेति ॥ हे हंस विज्ञेन पण्डितेन त्वया तत्तस्माद्धेतोः समयं अवसरं समीक्ष्य प्रतीक्ष्य तस्मिन् नरेन्द्रे इदं मत्प्रयोजनं

Digitized by Google

आत्यन्तिकासिद्धिविलम्बिसिद्ध्योः
कार्य्यस्य कार्य्यस्य शुभा विभाति ॥ ९६ ॥
इत्युक्तवत्या यदलोपि लज्जा
सानौचिती चेतसि नश्चकास्तु ।
स्मरस्तु साक्षी तददोषतायाम्
उन्माद्य यस्तत्तदवीवदत्तां ॥ ९७ ॥

विज्ञाप्यं निवेदनीयं ननु समयप्रतीक्षायां तव प्रयोजनसिद्धिर्झटिति न भविष्यतीत्याशङ्क्याह कार्य्यस्य आत्यन्तिकी सदातनी या असिद्धिः सिद्ध्यत्यन्ताभाव इत्यर्थः या च विलम्बिनी कालान्तरभाविनी सिद्धिः सिद्धिप्रागभाव इत्यर्थः तयोर्द्वयोर्मध्ये आर्य्यस्य बुद्धिमतस्तव का अन्यतरा शुभा समीचीना विभाति प्रतिभाति त्वां कथयेति शेषः असमयविज्ञापने कार्य्यस्य सर्व्वथाऽसिद्धिरेव समयं प्रतीक्ष्य विज्ञापने तु तस्य विलम्बेन सिद्धिः मम तु सैव समीचीना अतः समयं प्रतीक्ष्यैव वक्तव्यं भवति चेत् भवतु विलम्ब इति भावः ॥ ९६ ॥

एवंकथनेन जातं दमयन्त्या औद्धत्यं कविरपहरति ॥ इत्युक्तवत्येति ॥ इत्येवमुक्तवत्या कथयन्त्या दमयन्त्या यत् लज्जा अलोपि परित्यक्ता सा लज्जापरित्यागरूपा अनौचिती अनौचित्यं नाऽस्माकं चेतसि चकास्तु प्रकाशतां बालया सलज्जया भवितव्यमित्यस्यातिक्रमात् आपाततो भैम्या अनुचितत्वं अस्माभिर्ज्ञायतामित्यर्थः तु किन्तु तस्या दमयन्त्या अदोषतायां निर्दोषतायां स्मरः कामः साक्षी द्रष्टा कथमत्र कामस्य साक्ष्यमित्यत आह यः स्मरस्तां दमयन्तीं उन्माद्य उन्मत्तां कृत्वा तत्तत् पूर्व्वोक्तं अवीवदत् वादयति स्म कामवशगा सती तत्तदुवाच न तु सा स्वभावतः प्रगल्भेति भावः ॥ ९७ ॥

Digitized by Google

उन्मत्तमासाद्य हरः स्मरश्च
द्वावप्यसीमां मुदमुद्वहेते ।
पूर्व्वः परस्पर्द्धितया प्रसूनं
जनं द्वितीयो विरहाधिदूनं ॥ ९८ ॥
तथाभिधात्रीमथ राजपुत्रीं
निर्णीय तां नैषधबद्धरागां ।

कामो वा कथमेवं वादयतीत्याह ॥ उन्मत्तमिति ॥ हरः शिवः स्मरः कामश्च द्वावपि उभावपि उन्मत्तं वस्त्वासाद्य प्राप्य असीमां सावधियां मुदं हर्षं उद्वहेते धारयतः किन्तु तयोर्मध्ये पूर्व्वः शिवः प्रसूनं उन्मत्तं धुस्तूरपुष्पं आसाद्य मुदमुद्वहते द्वितीयः स्मरस्तु विरहाग्निना वियोगजनितमानसव्यथया दूनं उत्तप्तं उन्मत्तं उन्मादाख्यकामदशाविशेषवन्तं जनं आसाद्य मुदमुद्वहते उभयत्र हेतुमाह परस्पर्द्धितया शत्रुं प्रति स्पर्द्धावत्तया अन्योऽन्यस्पर्द्धितयेति यावत् नूनमुत्प्रेक्षायां अयं भावः स्मरवैरी शिवः स्मरस्य उन्मत्ते विरहिजने हर्षं दृष्ट्वा किं मयापि नोन्मत्ते हर्षणीयमिति स्पर्द्धां कृत्वा उन्मत्ताख्यधुस्तूरकुसुमं प्राप्य हृष्यति एवं स्मरोऽपि स्वशत्रुं शिवं उन्मत्ताख्यकुसुमप्रणयिनं दृष्ट्वा उन्मत्तविरहिजनं प्राप्य हृष्यतीति । उभयोः शत्रुभूतयोरेकवस्तुग्रहणन्तु श्लेषग्रहीतुल्यमाकारं भवतीत्येकनामकं पृथक् पृथक् वस्तुद्वयं ताभ्यां गृहीतं । उद्वहेते इति वहेः स्वरितेत्त्वादात्मनेपदं उन्मत्तउन्मादवति धुस्तूरमुचुकुन्दयोरिति मेदिनी ॥ ९८ ॥

अथ हंसो दमयन्तीं प्रति पुनर्वक्तुमारभते ॥ तथेति ॥ अथानन्तरं तथा पर्व्वोक्तप्रकारमभिधात्रीं कथयन्तीं तां राजपुत्रीं भैमीं नैषधे

अमोचि चञ्चूपुटमौनमुद्रा
विहायसा तेन विहस्य भूयः ॥ ९९ ॥
इदं यदि क्ष्मापतिपुत्त्रि तत्त्वं
पश्यामि तन्न स्वविधेयमस्मिन् ।
त्वामुच्चकैस्तापयता नृपञ्च
पञ्चेषुणैवाजनि योजनेयं ॥ १०० ॥
त्वद्बद्धबुद्धेर्ब्बहिरिन्द्रियाणां
तस्योपवासव्रतिनां तपोभिः ।

गते बद्धः स्थापितो रागः प्रीतिर्यया तादृशीं निर्णीय निश्चित्य तेन विहायसा पक्षिणा हंसेन विहस्य हास्यं कृत्वा भूयः पुनरपि चञ्चुपुटस्य चोष्ठयुगलस्य मौनमुद्रा तूष्णीम्भावभङ्गी अमोचि त्यक्ता वक्तुमारब्धमित्यर्थः । खगे विहङ्गविहगविहङ्गमविहायसः इत्यमरः ॥ ९९ ॥

यदवक्तुमारब्धं तदाह ॥ इदमिति ॥ हे क्ष्मापतिपुत्त्रि राजसुते दमयन्ति इदं पूर्व्वोक्तं सर्व्वं यदि तत्त्वं सत्यं तर्हि अस्मिन् कार्य्ये स्वविधेयं मम निजकरणीयं किमपि न पश्यामि मया यत्कर्त्तव्यं तन्नाव शिष्यत इत्यर्थः कुतः यतस्त्वां नृपञ्च नलञ्च उच्चैः सातिशयं तापयता उभयोरपि परस्परानुरागाद्विरहव्यथां जनयता पञ्चेषुणैव कामेनैव इयं योजना घटना अजनि जनिता उभयोः परस्परजातानुरागत्वाद्योजना सुकरेति भावः उत्तप्तयोर्हि सन्धिर्लोहादौ दृष्टः ॥ १०० ॥

न केवलं त्वमेव विरहदुःखिनी किन्तु नलोऽपि त्वद्विरहदुःखमनुभवतीति चतुर्द्दशभिः श्लोकैराह ॥ त्वद्बद्धेति ॥ हे दमयन्ति तपोभि

Digitized by Google

त्वामद्य लब्ध्वामृतवृत्तिभाजां
स्वदेवभूयं चरितार्थमस्तु ॥ १०१ ॥

तपश्यासञ्चितपुण्यैरद्य त्वां लब्ध्वा प्राप्य सन्निकृष्टां कृत्वेत्यर्थः अमृत वृत्तिभाजां अमृतजनितवृत्तिसदृशवृत्तिं भजतां तस्य नलस्य बहि रिन्द्रियाणां चक्षुरादीनां स्वदेवभूयं निजदेवत्वं चरितार्थमस्तु सार्थकं भवतु पूर्वं तेषां अमृतवृत्तप्रभावाच्छब्दमात्रेणैव देवत्वमासी दिदानीन्तु त्वत्प्राप्त्या अमृतवृत्तिमत्त्वात्सार्थकत्वं भविष्यतीत्यर्थः देवा हि अमृतं भुञ्जते कथं तेषां तथ इति इन्द्रियाणि विशिनष्टि किम्भू तानां उपवासोऽनशनं स्वस्वविषयाग्राहकत्वरूपं व्रतं नियमो विद्यते येषां तथाविधानां उपवास एव तेषां कथमिति मनं विशि नष्टि किम्भूतस्य तस्य त्वयि बद्धा लीना अनवरतत्वच्चिन्तनासक्तेत्यर्थः बुद्धिर्मनोयस्य ज्ञानस्य ज्ञानसामान्यं प्रति मनसः कारणतया चिन्तनसाधनतापन्ने च तस्मिन् ज्ञानद्वयायौगपद्यानङ्गीकाराद्व हिरिन्द्रियाणां स्वस्वार्थग्राहिता न भवतीति तयोक्तं अन्येऽपि उप वासव्रतिनोभूत्वा तपस्यया पीयूषवृत्तिप्राप्त्या चरितार्था भवन्ति अत्रेत्यनेन शीघ्रभावो नलसङ्गमः सूचितः त्वामित्यत्र युष्मच्छब्दस्य उपादानलक्षणया त्वं तव च मधुरालापमलयजाङ्गलेपकोमलाङ्ग बिम्बाधररसा यथायथं चक्षुरादीनां विषया बोध्याः चक्षुरादी न्द्रियाणां आदित्यादिदेवस्वरूपत्वं आगमेषु प्रसिद्धं केचित्तु देव भूयमिन्द्रियत्वमिति वदन्ति । देवभूयमिति भुवोभावेसुप्यप्रादावि ति क्यः । देवः सुरे वने राज्ञि देवमाख्यातमिन्द्रिये इति विश्वः ॥ १०१ ॥

Digitized by Google

तुल्यावयोर्मूर्त्तिरभून्मदीया
दग्धा परं सास्य न ताप्यतेऽपि ।
इत्यभ्यसूयन्निव देहतापं
तस्यातनुस्त्वद्विरहाद्विधत्ते ॥ १०२ ॥
लिपिं दृशा भित्तिविभूषणं त्वां
नृपः पिबन्नादरनिर्निमेषः ।
चक्षुर्भरैरर्पितमात्मचक्षू
रागं स धत्ते रचितं त्वया च ॥ १०३ ॥

तुल्येति । हे दमयन्ति अतनुरनङ्गः त्वद्विरहात् तव वियोगात्तस्य नलस्य देहतापं शरीरसन्तापरूपं विरहव्याधिं विधत्ते करोति अत्रोत्प्रेक्षते किम्भूतः आवयोर्मम नलस्य च मूर्त्तिः शरीरं तुल्या पूर्वं समाना अभूत् परं केवलं ततः परं वा मदीया मत्सम्बन्धिनी मूर्त्ति र्दग्धा भस्मीकृता शिवेनेति शेषः अस्य नलस्य तु सा मूर्त्तिर्न ताप्यतेऽपि मया तापयुक्तोऽपि न क्रियते माभूदस्य दाहः तापस्तु कथं न क्रियत इत्यर्थः इत्येवं अभ्यसूयन्निव ईर्षां कुर्वन्निव ॥ १०२ ॥

अधुना नलस्य पूर्व्वरागित्वात् नयनप्रीत्यादिकामदशा आह ॥ लिपिमिति ॥ हे दमयन्ति स नृपो नलः आदरेण आवेशोत्कण्ठेन निर्निमेषो नेत्रसङ्कोचरहितः सन् भित्तेः कुड्यस्य विभूषणं विशेषेणालङ्कारभूतां लिपिं लिखितां त्वां दृशा चक्षुषा पिबन् पश्यन् चक्षुर्भरैरनिमिषावलोकनजातैर्नयनजलप्रवाहैः अर्पितं जनितं आत्मचक्षूरागं निजनयनयोर्लौहित्यं एवं त्वया च चिन्तितया रचितं जनितं आत्मचक्षुषो रागमनुरागं धत्ते धारयति । अत्र नयनप्रीतिरूपा कामदशा सूचिता । प्रवाहे निर्झरो झर इत्यमरः ॥ १०३ ॥

Digitized by Google

पातुर्दृशालेख्यमयीं नृपस्य
त्वामादरादस्तनिमीलयास्ति ।
ममेदमित्यश्रुणि नेत्रवृत्तेः
प्रीतेर्निमेषच्छिदया विवादः ॥ १०४ ॥
त्वं हृद्गता भैमि बहिर्गतापि
प्राणायिता नासिकयास्यगत्या ।

पुनरपि तामेव दशामाह ॥ पातुरिति ॥ आदरादनुरागा दस्तनिमीलया अपगतनिमेषया दृशा चक्षुषा लेख्यमयीं भित्तौ चित्रितां त्वां पातुः सादरं पश्यतो नृपस्य नलस्य अश्रुणि लोचनजले विषये नेत्रवृत्तेश्चक्षुर्वर्त्तिन्याः प्रीतेरनुरागस्य निमेषच्छिदया निमेषविच्छेदेन सह ममेदमिति विवादः इदमश्रु मज्जनितमिति परस्परकलहः अस्ति भवति अश्रु हि अनुरागान्निमेषशून्यदर्शनाच भवति तदत्र कस्माज्जातमिति सम्भवति विवादः इतरेऽपि एकस्मिन् विषये ममेदमिति कृत्वा परस्परं विवदन्ते । भिदादित्वाच्छिदा साधुः ॥ १०४ ॥

चित्तासक्तरूपां दशामाह ॥ त्वमिति ॥ हे भैमि बहिर्गतापि दूरस्थापि हृद्गता अन्तःकरणवर्त्तिनी चिन्ताविषयतापन्नेत्यर्थः तादृशी त्वं कया गत्या केन प्रकारेण अस्य नलस्य प्राणायिता नासि प्राणतुल्या न भवसि अपि तु सर्व्वप्रकारेणैव प्राणवत् प्रियतमा भवसीत्यर्थः अथ च बहिर्गता त्वं नासिकया प्राणेन आस्यगत्या मुखभङ्ग्या च अर्थाद्दूतादिभ्यः श्रुतया हृद्गता मनोज्ञा अत एव प्राणायिता प्राणवत्प्रिया । प्राणा अपि नासिकया मुखमार्गेण च बहिर्गत्य हृद्गता

न चित्तमाक्रामति तत्र चित्र-
मेतन्मनोयद्भवदेकवृत्ति ॥ १०५ ॥
अजस्रमारोहसि दूरदीर्घां
संकल्पसोपानततिं तदीयां ।

भवन्ति अतएव एतन्मनो नलान्तःकरणं यत् भवती त्वमेव एका मुख्या वृत्तिर्जीवनोपाय आश्रयणीयेति यावत् यस्य अथ च भवत्यां एका केवला वृत्तिः परिणामोयस्य तादृशं भवतीति शेषः तत्र विषये चित्तं अस्माकं मनः कर्तृ चित्रं आश्चर्यं ना क्रामति नप्राप्नोति इन्द्रियाणां प्राणावलम्बनत्वात् प्राणस्तु न चित्रमिति पाठं कृत्वा भवदेकवृत्ति एतन्मनोनलमनः चित्रं सम्मुखस्थमप्यालेख्यं यन्नाक्रमति न गृह्णाति तत्र चित्रं आश्चर्यं विरहव्यथया हि चपलेन भवितव्यं तत्रापि यदस्यैकायत्तं तदाश्चर्यविषयमित्यर्थ इति व्याख्यातवन्तः । वहिर्गतापि हृद्गतेति विरोधाभासः । भवदेकवृत्तोपि समासे भवत्याः पुंवद्भावः ॥ १०५ ॥

संकल्परूपां दशामाह ॥ अजस्रमिति ॥ हे भैमि त्वं दूरदीर्घां अतिमहतीं तदीयां नलसम्बन्धिनीं संकल्पाख्यमेव सोपानं आरोहणं तस्य ततिं परम्परां अजस्रमनवरतमारोहसि अजस्रं चिन्ता विषयो भवसीत्यर्थः कथमेवं त्वया ज्ञातमित्याह यद्यस्मात् स नलः तव ध्यानाच्चिन्तनात् तन्मयतां तद्रूपतां अवाप्य पुनर्वारंवारं अधिकं दीर्घं यथा तथा श्वासान् वर्षति मुञ्चति अतिदीर्घसोपानारोहणे हि परिश्रमान्निश्वासा जायन्ते तेषां नलसम्बन्धित्वे च अनवरतचिन्तनज निता तस्य तद्रूपताप्राप्तिः कारणं योऽपि यमजस्रं चिन्तयति स तद्रू-

Digitized by Google

आसान् सवर्षत्यधिकं पुनर्य

ध्यानात्तव त्वन्मयतामवाप्य ॥१०६ ॥

हृत्तस्य यां मन्त्रयते रहस्त्वां

तां व्यक्तमामन्त्रयते मुखं यत् ।

तद्वैरिपुष्पायुधमित्रचन्द्र

सख्यौचिती सा खलु तन्मुखस्य॥१०७॥

स्थितस्य रात्रावधिशय्य शय्यां

मोहे मनस्तस्य निमज्जयन्ती

यतां भजते अत्र पुनःशब्दस्य पुनःपुनरर्थे वृत्तत्वा। आरोहणं स्यात् सोपानमित्यमरः ॥ १०६ ॥

पुनरपि तामेव दशामाह॥ हृदिति॥ हे भैमि तस्य नलस्य हृत् हृदयं रहः एकान्ते यां त्वां मन्त्रयते त्वामुद्दिश्य यत्किंचिद्गोपनीयं भाषते हे प्रिये दीयतां मह्यमालिङ्गनमित्यादि यन्मनसा संकल्पय तीत्यर्थः तां त्वां मुखं नलस्य वदनं कर्तृ यत्तत् अतिस्फुटं यथा तथा यत् आमन्त्रयते गुप्तं विषयं भाषते खलूत्प्रेक्षायां सा तन्मुखस्य नलमु खस्य तद्वैरी नलशत्रुर्यः पुष्पायुधः कन्दर्पस्तस्य मित्रं सखा यश्चन्द्रस्तेन यत् सख्यं मैत्री तस्य औचिती औचित्यं चन्द्रतुल्यत्वान्नलमुखं चन्द्र मित्रं नलः कामस्य शत्रुः पीड्यमानत्वात् चन्द्रोऽपि कन्दर्पमित्रं तत् पीड्यविरहिपीडकत्वात् मित्रञ्च मित्रस्य कार्य्यं करोतीति तयो रौचित्यं॥ १०७ ॥

निद्राच्छेदविषयविरक्ती कामदशे युगपदाह॥ स्थितस्येति॥ रात्रौ शय्यां शयनमधिशय्य अधिष्ठाय स्थितस्य तस्य नलस्य मनोऽन्तःकरणं मोहे वैचित्त्ये अथ च मोहनं मोहः शृङ्गारस्तत्र च निमज्जयन्ती

Digitized by Google

आलिङ्ग्य या चुम्बति लोचने सा
निद्राधुना न त्वहतेऽङ्गना वा ॥ १०८ ॥
स्मरेण निस्तक्ष्य वृथैव बाणै
र्लावण्यशेषां कृशतामनायि ।

तदधीनं कुर्व्वती सती आलिङ्ग्य अङ्गानि श्लथयित्वा अथ च आश्लिष्य या लोचने चक्षुषी चुम्बति निमीलयति अथ च वक्त्रसंयुक्ते करोति सा निद्रा मिथ्यामनःसंयोगरूपा अङ्गना वा नायिका वा त्वहते त्वां विना तव वियोगे इत्यर्थः अधुना इदानीं न चुम्बतीत्यनुषञ्ज नीयं । विद्यत इति शेष इति बहवः । तव विरहे तस्य निद्रा न भवति इतराङ्गना च तस्मै न रोचत इति भावः अत्र श्लेषादेकप्रयत्नेन निद्रा च्छेदरूपा विषयनिवृत्तिरूपा च दशावस्थमुक्तमतः क्रमोल्लङ्घनं न दोषायेति बोध्यं । शय्यामिति यत्रार्थोऽधिष्ठादेरित्यनेनाधिकरणस्य कर्म्मत्वं अधिशय्येति अधिपूर्व्वात् शीङः क्त्वा यप् क्त्वयपोरेति शीङः शेभावः शोङोऽङिन्ये इत्ययादेशः ॥ १०८ ॥

तनुताख्यां दशामाह ॥ स्मरेणेति '। स नलः स्मरेण कामेन बाणैर्नि स्तक्ष्य तनूकृत्य निर्भिद्य लावण्यस्य सौन्दर्य्यस्य शेषोऽल्पता यस्यां तादृशीं कृशतां वृथैव मिथ्यैव अनायि प्रापितः यतोऽयं नलोऽनङ्गतां अतिक्षीणशरीरतां अथ च शरीरशून्यतां प्राप्यमानोऽपि नीय मानोऽपि तेन स्मरेण सार्द्धं सह स्पर्द्धां साम्याभिमानं न विजहाति न त्यजति पूर्व्वं लावण्यसाम्यात् स्पर्द्धां स्थिता अधुना तु तादृशलावण्या भावेऽपि अनङ्गतासाम्यात् स्पर्द्धा विद्यत एवेति भावः अनङ्गतेत्यत्र

Digitized by Google

अनङ्गतामप्ययमाप्यमानः
स्पर्द्धां न सार्द्धं विजहाति तेन ॥ १०९ ॥
त्वत्प्रापकात्त्रस्यति नैनसोऽपि
त्वय्येकदास्येऽपि न लज्जते यत् ।
स्मरेण बाणैरभितक्ष्य तीक्ष्णै
र्लूनः स्वभावोऽपि कियान् किमस्य ॥ ११० ॥
स्मारं ज्वरं घोरमपत्रपिष्णोः
सिद्धागदङ्कारचये चिकित्सौ ।

नञ्पक्षे नञ ईषदर्थकत्वं कामपक्षे अभावार्थकत्वं । तावच्छयोर्वा साम्यमात्रावधिष्ठामिति बहवः । निस्त्रपेति वक्ष्यमाणानुकरणे ॥ १०९ ॥

अपायात्मरूपां दशामाह ॥ त्वत्प्रापकादिति ॥ हे भैमि एष नलः त्वां प्रापयतीति तादृशात् एनसोऽपि पापादपि गुरुदारत्वादि पापकर्मणोऽपीत्यर्थः न त्रस्यति न बिभेति किञ्च त्वयि एकदास्येऽपि केवलदासत्वेऽपि यद्यस्मात् न लज्जते न सलज्जो भवति तत्किं स्मरेण बाणैरभितक्ष्य शरीरमतितक्ष्णीकृत्य अस्य नलस्य कियान् किञ्चित् स्वभावोऽपि प्रकृतिरपि लूनश्छिन्नः न केवलं शरीरस्य कृशता जाता किन्तु स्वभावस्याप्यल्पता जातेत्यर्थः पूर्वं धर्मशीलत्वाद्भयशीलत्वाच्च पापाद्भयं दास्ये च लज्जा आसीदधुना तु त्वत्प्राप्तिलोभेन तत सर्वं परित्यक्तमिति भावः । कलुषं वृजिनैनोऽघमंहोदुरितदुष्कृतमित्यमरः ॥ ११० ॥

पूर्वरागेऽपि केचित् ज्वररूपां कामदशां वर्णयन्तीति तामप्याह ॥ स्मारमिति ॥ अपत्रपिष्णोर्लज्जाशीलस्य तस्य नलस्य विधाता अति महती लज्जा सांक्रामिकी संसर्गेण संक्रमणशीला रुजेव रोग इव

Digitized by Google

निदानमौनादविशद्विशाला
सांक्रामिकी तस्य रुजेव लज्जा ॥ १११ ॥
बिभेति रुष्टासि किलेत्यकस्मात्
स त्वां किलोपैति हसत्यकाण्डे।

सिद्धागदङ्कारचये चिकित्साख्यातवैद्यसमूहे निदानस्य आदिकारणस्य यत् मौनं सालापि लज्जयाऽकथनं तस्मादविशत् प्रविष्टा किम्भूते घोरं दारुणं स्मारं ज्वरं विरहज्वरं चिकित्सौ प्रतिकुर्वाणे इवोत्प्रेक्षायां उपमायां वा ज्वरस्यादिकारणं विप्रलम्भं सालापि किमिदमेतस्याप्येतादृशो भावस्तत्कथमिदं जनसमक्षमुच्यतामिति लज्जैव चिकित्सकानां निदानाकथनहेतुः रोगा हि सांक्रामिका भवन्ति। तथा च वैद्यकं। सर्व्वे सञ्चारिणो रोगा वर्ज्जयित्वा विसूचिकामिति। अक्षिरोगो ज्वरः कुष्ठं तथापस्मार एव च। सह भुक्तादिसम्बन्धात् संक्रामन्ति नरान्तरमिति च। रोगहार्य्यगदङ्कारो भिषग्वैद्यो चिकित्सक इत्यमरः ॥ १११ ॥

उन्मादरूपां दशामाह ॥ बिभेतीति ॥ स नलः हे दमयन्ति रुष्टासि कुपितासि किलेति सम्भाव्य अकस्मात् निष्कारणमेव बिभेति सभयो भवति तथा किल मिथ्याभूतां त्वां उपैति उपगच्छति एवं अकाण्डे अनवसर एव हसति त्वत्प्राप्तिं विनापि सुखातिशयात् हास्यं करोति यान्तीमिव गच्छन्तीमिव त्वां अनु लक्षीकृत्य अहेतोरकारणात् याति तया उक्त इव सम्भाषित इव मोघं वृथा प्रतिवक्ति प्रत्युत्तरं ददाति

Digitized by Google

यान्तीमिव त्वामनुयात्यहे तो
रुक्तास्त्वयैव प्रतिवक्ति मोघं ॥ ११२ ॥
भवद्वियोगाच्छिदुरार्त्तिधारा
यमस्वसुर्मज्जति निःशरण्यः ।
मूर्च्छामयद्वीपमहान्धपङ्के
हाहा महीभृद्भटकुञ्जरोऽयं ॥ ११३ ॥

एतानि उन्मादचेष्टितान्येव । यथाहुः अनर्थवाक् प्रलापः स्यादित्युक्त लक्षणप्रलापरूपामप्यत्र कामदशां वदन्ति ॥ ११२ ॥

मूर्च्छारूपां दशामाह । भवदिति ॥ भवत्यास्तव वियोगेन विरहेण जनिता अच्छिदुरा निविडा या आर्त्तिधारा पीडापरम्परा सैव यमस्वसा यमुना तस्या मूर्च्छामयो मूर्च्छारूपो यो द्वीपोऽन्तस्तटं तत्र महान्धं महाऽज्ञानरूपं यत् पङ्कं कर्दमस्तस्मिन् अयं महीभृत् नलराज एव भटकुञ्जरः सैन्यहस्ती महीभृत्सु राजसु मध्ये भटो वीरो नल एव कुञ्जर इति वा तथाभूतो हाहा अतिकष्टं निःशरण्यो रक्षकरहितः सन् मज्जति मग्नो भवति अन्योऽपि हस्ती नद्या द्वीपपङ्के मग्नो भवति पीडायाः श्यामत्वेन वर्णनात् यमुनात्वं रूपकं निःशरण्य इत्यनेन त्वां विना अस्य शरणान्तरं नास्ति अतस्त्वमेव शरणं भवेति सूचितं । केचित्तु महीभृद्भटकुञ्जरो राजयोधश्रेष्ठ इति व्याचक्षते तन्न समीचीनं अस्य साङ्गरूपकविषयतया सति कुञ्जरशब्दे समस्तवस्तु विषयमेव वक्तुं युक्तत्वात् ॥ ११३ ॥

Digitized by Google

सव्यापसव्यत्यजनाद्विरुक्तैः
पञ्चेषुबाणैः पृथगर्ज्जितासु।
दशासु शेषः खलु तद्दशा या
तया नभः पुष्प्यतु कोरकेण ॥ ११४ ॥

व्यतिरेकमुखेन मरणरूपां दशामाह ॥ सव्यापसव्येति ॥ सव्यापसव्ययोर्वामदक्षिणयोर्यत् त्यजनं मोचनं तस्मात् द्विरुक्तैर्द्विगुणैर्दशभिरित्यर्थः पञ्चेषुबाणैः कामशरैः पृथक् प्रत्येकं अर्जितासु उत्पादितासु दशासु दशसु कामावस्थासु मध्ये शेषो ऽवशिष्टा या तस्य नलस्य दशा मरणलक्षणा तया कोरकेण कलिकया नभः आकाशमेव खलु निश्चितं पुष्प्यतु पुष्पितं भवतु सा गगणकुसुमरूपा भवत्वित्यर्थः सा नैव भवत्विति यावत् एकैकेन कामबाणेनान्येषां दश दशा भवन्ति अनेन तु नवमीपर्य्यन्तमनुभूतं दशम्या अयमवसरः अतोऽधुना नव लाभश्चेत् सा न भविष्यतीति भावः दशम्या दशाया अमङ्गलतया नामग्रहणानर्हत्वात् यच्छब्दप्रयोगः। तथाचोक्तं रसविच्छेदहेतुत्वान्मरणं नैव वर्ण्यते। जातप्रायन्तु तद्वाच्यं चेतसा काङ्क्षितं तथा। वर्ण्यतेऽपि यदि प्रत्युज्जीवनं स्याददूरत इति। अत्र मरणस्य जातप्रायत्वमुक्तं। शेषशब्दस्यानङ्गीकृतत्वाच्च दशया सामानाधिकरण्यविरोधश्च दश दशा यथा। नयनप्रीतिः प्रथमं चित्तासङ्गस्ततोऽथ सङ्कल्पः। निद्राच्छेदस्तनुता विषयनिवृत्तिस्त्रपानाशः। उन्मादो मूर्छा मृतिरित्येताः स्मरदशा दशैव स्युरिति। यथा च। अभिलाषश्चिन्ता स्मृतिगुणकथनोद्वेगसंप्रलापाश्च उन्मादोऽथ व्याधिर्जडता मृतिरिति दशात्र कामदशा इत्यभिलाषादिका एव पूर्वरागे दशावदन्ति ॥ ११४ ॥

त्वयि स्मराधेः सततास्मितेन
प्रस्थापितो भूमिभृतास्मि तेन।
आगत्य भूतः सफलो भवत्या
भावप्रतीत्या गुणलोभवत्याः ॥ ११५ ॥
धन्यासि वैदर्भि गुणैरुदारै
र्यया समाकृष्यत नैषधोऽपि।
इतः स्तुतिः का खलु चन्द्रिकाया
यदब्धिमप्युत्तरलीकरोति ॥ ११६ ॥

प्रकृतमनुसरन्नाह ॥ त्वयीति ॥ स्मराधेः कामजनितमानसपीडातः सततं सर्व्वदा नास्ति स्मितं हास्यं यस्य तादृशेन तेन भूमिभृता राज्ञा नलेन त्वयि विषये प्रस्थापितोऽस्मि सोऽहमागत्य गुणेषु लोभवत्या अनुरागिण्या भवत्यास्तव भावप्रतीत्या त्वं प्रति चित्तविकारज्ञानेन अभिप्रायज्ञानेन वा सफलो भूतः कृतकार्य्यो जातः ॥ ११५ ॥

प्ररोचयन्नाह ॥ धन्यासीति ॥ हे वैदर्भि दमयन्ति त्वं धन्यासि प्रशंसनीया भवसि यया त्वया उदारैरतिरमणीयैर्गुणैः सौन्दर्य्या दिभिर्नैषधोऽपि अतिधीरो नलोऽपि समाकृष्यत सम्यगाकृष्टः। धन्यत्वं प्रकटयति खलु चन्द्रिकाया इतः परा का स्तुतिः यदब्धिमपि अतिगाम्भीर्य्यवन्तं समुद्रमपि उत्तरलीकरोति चञ्चली करोति। प्रतिवस्तूपमेयं ॥ ११६ ॥

Digitized by Google

नलेन भायाः शशिना निशेव
त्वया स भायान्निशया शशीव।
पुनःपुनस्तद्युगयुग्विधाता
योग्यामुपास्ते नु युवां युयुक्षुः॥ ११७॥
स्तनद्वये तन्वि परं तवैव
पृथौ यदि प्राप्स्यति नैषधस्य।
अनल्पवैदग्ध्यविवर्द्धिनीनां
पत्रावलीनां रचना समाप्तिं॥ ११८॥

आशीर्व्वादेन सन्तोषयति ॥ नलेनेति॥ हे भैमि त्वं नलेन भायाः शोभस्व यथा शशिना चन्द्रेण निशा रात्रिः शोभते स नलस्त्वया भायात् शोभतां यथा शशी चन्द्रो निशया रात्र्या शोभते उभाभ्यामेव उभावपि अविभातामित्यर्थः उत्प्रेक्षते नूत्प्रेक्षायां युवां त्वां च नलं च युयुक्षुर्योक्तुमिच्छुर्विधाता ब्रह्मा पुनः पुनर्वारं वारं तयोर्निशाचन्द्रयोर्युगं युग्मं युनक्तीति तादृशः सन् योग्यां अभ्यासं उपास्ते करोति अन्योऽपि शिल्पी रमणीयं वस्तु घटयितुं अभ्यासं करोति। योग्याभ्यासार्कयोषितोरिति विश्वः॥ ११७॥

त्वां विना तस्य शिल्पनैपुण्यं व्यर्थमित्याह ॥ स्तनद्वय इति॥ हे तन्वि कृशाङ्गि दमयन्ति नैषधस्य नलस्य अनल्पं बहुतरं यत् वैदग्ध्यं नैपुण्यं तस्य विवर्द्धिनीनां सूचिकानां पत्रावलीनां चित्रपङ्क्तीनां रचना करणं यदि समाप्तिं संपूर्णतां प्राप्स्यति तर्हि परं केवलं तवैव पृथौ अतिमहति स्तनद्वये न त्वन्यासां तासां एतादृक्स्तनप्राशस्त्याभावात्॥ ११८॥

एकः सुधांशुर्न कथञ्चन स्या
त्तृप्तिक्षमस्त्वन्नयनद्वयस्य ।
त्वल्लोचनासेचनकस्तदस्तु
नलास्यशीतद्युतिसद्द्वितीयः ॥ ११९ ॥
अहो तपःकल्पतरुर्नलीय
स्त्वत्पाणिजाग्रस्फुरदङ्कुरश्रीः ।

नलस्ते नयनप्रीतिकरो भविष्यतीत्याह ॥ एक इति ॥ हे दमयन्ति एकः सजातीयशून्यः सुधांशुश्चन्द्रः कथञ्चन केनापि प्रकारेण त्वन्नयनद्वयस्य तव चक्षुर्द्वयस्य तृप्तिक्षमोऽनस्मात् प्रीतिजननसमर्थोन भवेत् ततस्मात् स चन्द्रः नलास्यं नलमुखलक्षणो यः शीतद्युतिश्चन्द्रस्तेन स द्वितीयः सजातीयसहितः सन् त्वल्लोचनासेचनकं तव चक्षुषोरत्यन्तप्रीतिजनकोऽस्तु भवतु चन्द्र इव नलमुखं तव नयनप्रीतिं जनयिष्यतीति भावः । तदसेचनकं तृप्तेर्नास्त्यन्तो यस्य दर्शनादित्यमरः ॥ ११९ ॥

नलपुण्याविष्क्रियेनैव त्वमेतादृशी जातेति युग्मकेनाह ॥ अहो इति ॥ नलीयो नलसम्बन्धी तपएव कल्पतरुः कल्पवृक्षः अहो आश्चर्यरूपः आश्चर्यरूपत्वं दर्शयति कीदृशः कल्पतरुः त्वत्पाणिजाग्रेषु तव नखाग्रेषु स्फुरन्ती प्रकाशमाना अङ्कुरश्रीरङ्कुरशोभा यस्य त्वत्पाणिजाग्रमेव स्फुरन्ती अङ्कुरश्रीर्यस्येति वा तादृशः तथा खलु निश्चये त्वद्भ्रूयुगं तव भ्रूद्वयमेव यस्य तपःकल्पतरोर्द्विपत्री पत्रद्वयं तव अधर

Digitized by Google

त्वद्भ्रूयुगं यस्य खलु द्विपत्री
तवाधरो रज्यति यत्प्रवालः ॥ १२० ॥
यस्ते नवः पल्लवितः कराभ्यां
स्मितेन यः कोरकितस्तवास्ते ।
अङ्गम्रदिम्ना तव पुष्पितो यः
स्तनश्रिया यः फलितस्तवैव ॥ १२१ ॥
कांसीकृतासीत् खलु मण्डलीन्दोः
संसक्तरश्मिप्रकरा स्मरेण ।

तव यस्य प्रवालः पल्लवाङ्कुरो गात्रमित्यर्थः रज्यति रक्तमेवारक्तो भवति शोभते वा । रज्यतीति कुषिरञ्जोरित्यादिना कर्मकर्तरि परस्मैपदं यक्च दैवादिकोऽपि रञ्जधातुरस्ति । प्रवालः साधवे बीजे बाले शाखे प्रवालस्त्रयपीति विश्वः ॥ १२० ॥

यस्ते इति ॥ यो मदीयस्तपःकल्पतरुस्ते तव कराभ्यां नवो नवीनः पल्लवितः जातपल्लवः कोमलत्वारक्तत्वाच्च तव करावेव पल्लवस्थाने जातावित्यर्थः । यश्च तव स्मितेन ईषद्धसनेन कोरकितो जातकलिक आस्ते स्मितस्य शुभ्रत्वात् कोरकत्वं । यश्च तव अङ्गम्रदिम्ना शरीरमार्दवेन पुष्पितः जातकुसुमः । यस्तवैव स्तनश्रिया कुचशोभया फलितः संजातफलः अन्यस्य कल्पतरोरङ्कुरादीनि क्रमेण जायन्ते मम तु सर्वं युगपदुत्पन्नमित्याश्चर्यं स्फुटं । नवः पल्लवित इति पुनरुक्तिर्विशेष्यास्त्रवतस्य पल्लवेऽन्वयः ॥ युग्मकं ॥ १२१ ॥

तयोरनुरागसाम्यमाह ॥ कांसीकृतेति ॥ हे दमयन्ति अस्तुते वा युवयोर्मिथोऽनुरागस्य परस्परानुरागस्य समीकृतौ तुलनेन साम्यकरणे स्मरेण कामेन इन्दोश्चन्द्रस्य मण्डली बिम्बं कां

तुला च नाराचलता निजैव
मिथोऽनुरागस्य समीकृतौ वां ॥ १२२ ॥
सत्त्वच्युतस्वेदमधूत्थसान्द्रे
तत्पाणिपद्मे मदनोत्सवेषु ।
लग्नोत्थितास्त्वत्कुचपत्ररेखा
स्तन्निर्गतास्तं प्रविशन्तु भूयः ॥ १२३ ॥

सीव्यतासीत् कांस्यनिर्मितपरिमेयवस्तुयाथात्म्यता बभूव परिमाण या चोक्तासीद्वा किम्भूता संसक्तचतुर्दिक्षु तुलादण्डसम्बद्धा रश्मयो रज्जुसमूहरूपाः प्रकराः प्रचक्रकिरणा यस्याः सा तुलादण्डं विना परिमाणं न भवतीति तमपि घटयति निजैव स्त्रीयैव नाराचलता शरलतात् वाणलता तुला च तलादण्डस्य कृतासीदित्यनुषङ्गः । कांसी कृतेति कंसविकारा कांसी मानार्थकत्वे तु कंस एव कांसः स्वार्थे टच् प्रभूतवद्भावविवक्षायां ङीप् । कंसोऽस्त्री तैजसद्रव्ये कांस्ये मानेऽसुरे तु नेति मेदिनी । किरणप्रग्रहौ रश्मी इत्यमरः ॥ १२२ ॥

पद्यद्वयेन नलेन सार्द्धं भाविरतिकेलिवर्णनया भैमीमाह्लादयन्नाह ॥ सत्त्वेति ॥ हे दमयन्ति मदनोत्सवेषु सुरतेषु सत्त्वेन सत्त्वभावेन च्युतः परिस्रावः स्वेदो घर्मजलं स एव मधूत्थं सिक्थकं तेन सान्द्रे निविडे तत्पाणिपद्मे नलकरकमले लग्नोत्थिताः आदौ लग्नाः सम्बद्धाः पश्चादुत्थिता विमर्दनेन अयथास्थानं प्रापिता त्वत्कुचपत्ररेखास्तव स्तनोपरिरचितपत्रावल्यः तन्निर्गतास्ततः कुचादपि निर्गताः सत्यः भूयः पुनरपि तं कुचमेव प्रविशन्तु कुचलग्ना भवन्तु । केचित्तु तमित्यस्य स्थाने तदिति पाठं प्रकल्प्य तत्पाणिपद्मं प्रविशन्त्विति व्याचक्षते । मधूत्थं सिक्थकं सममिवि क्तः ॥ १२३ ॥

Digitized by Google

बन्धाढ्यनानारतमल्लयुद्ध
प्रमोदितैः केलिवने मरुद्भिः।
प्रसूनवृष्टिं पुनरुक्तमुक्तां
प्रतीच्छतं भैमि युवां युवानौ ॥१२४॥
अन्योऽन्यसङ्गमवशादधुना विभातां
तस्यापि तेऽपि मनसी विकसद्विलासे।

बन्धाढ्येति ॥ हे भैमि युवानौ तरुणौ युवां केलिवने क्रीडाकानने मरुद्भिर्वायुभिः पुनरुक्तमुक्तां पुनःपुनर्मुक्तां प्रसूनवृष्टिं पुष्पवृष्टिं प्रतीच्छतं गृह्णीतं किम्भूतैर्वायुभिः बन्धाढ्यं अरचक्रविपरीतादिनाना रतिप्रभेदात्मकं यत् नानारतमनेकप्रकारसुरतं तदेव मल्लयुद्धं तेन प्रमोदितैः पुष्पाणां विमर्दनात् प्रमोदं प्रकृष्टसौरभं प्रापितैः अथ च प्रहृष्टैः अन्यावपि मल्लौ मल्लयुद्धहृष्टैर्मरुद्भिर्देवैर्मुक्तां पुष्पवृष्टिं प्रतीतः। युवानाविति युवतिश्च युवा चेत्येकशेषः। मरुतौ पवनामरा वित्यमरः॥१२४॥

पुनराशिषा सन्तोषयन्नाह॥ अन्योऽन्येति॥ अधुना इदानीं अन्यो ऽन्यसङ्गमवशात् परस्परसम्बन्धवशात् विकसन् आविर्भवन् विलासः कामविकारविशेषो ययोस्तादृशे तस्यापि नलस्यापि तेऽपि तवापि मनसी उभे चित्ते विभातां शोभेतां अत्रोत्प्रेक्षते मनसिजस्य कामस्य तनुं शरीरं पुनः कर्तुं निर्म्मातुं प्रवृत्तं जातश्रियं अतएवादौ द्व्यणुकं करोतीति तादृशं परमाणुयुग्ममिव द्वौ परमाणू इव परमाणुद्वयेन हि प्रथमं द्व्यणुकमारभ्यते एवं क्रमेण महत् कार्य्यं जन्यते प्रवृत्तेऽपि भगवच्छिवकोपेन दग्धशरीरस्य कामस्य मनसिजत्वात् पुनः शरीरा

स्रष्टुं पुनर्म्मनसिजस्य तनुं प्रवृत्त
मादाविव द्व्यणुककृत्परमाणुयुग्मं ॥१२५॥

कामः कौसुमचापदुर्ज्जयममुं जेतुं नृपं त्वां धनु
र्व्वल्लीमव्रणवंशजामधिगुणामासाद्य माद्यत्यसौ।
ग्रीवालङ्कृतिपट्टसूत्रलतया पृष्ठे कियल्लम्बया
भ्राजिष्णुं कषलेखयेव विलसत्सिन्दूरसौन्दर्य्यया॥१२६॥

शरीरोत्पत्तौ परमाणुद्वयं युवयोर्म्मनोद्वयमेव द्व्यणुकं भविता कार्य्यं भविष्यतीत्युत्प्रेक्षा युवयोः कामोऽनुरागबाहुल्यात् मूर्त्तिमानिव भविष्यतीति भावः॥ वसन्ततिलकंवृत्तमिदं ॥१२५॥

श्लोकद्वयेन त्वमेव नलं वशीकरिष्यसीति वक्ष्यमाह॥ काम इति॥ असौ कामः कौसुमचापेन पुष्पमयधनुषा दुर्जयं अपराजेयं अमुं नृपं नलराजं जेतुं त्वां तन्वीं धनुर्वल्लीं धनुर्लतां आसाद्य प्राप्य माद्यति सन्तुष्यति किंभूतां अव्रणवंशजां निर्दोषभीमकुलजां अथ च घुणादिजन्यव्रणरहितवेणुजातां अधिगुणां अतिशयितसौन्दर्य्यादिगुणयुक्तां अथच आरोपितमौर्व्वीकां तथा विलसता विद्यमानेन सिन्दूरेण सौन्दर्य्यं लौहित्यं यस्यां तथाभूतया पृष्ठे पृष्ठभागे कियल्लम्बया किञ्चिल्लम्बमानया कषलेखयेव सारपरीक्षार्थंतद्घर्षजन्यरेखातुल्यया ग्रीवायाः कण्ठस्य अलङ्कृतिरलङ्कारभूता या पट्टसूत्रलता तया भ्राजिष्णुं शोभमानां कामस्य नलवशीकरणहेतुत्वां वर्ज्जमन्यो नाप्नोति तथैव स वशो भविष्यतीति भावः॥ शार्दूलविक्रीडितमिदं वृत्तं॥१२६॥

Digitized by Google

त्वद्गुच्छावलिमौक्तिकानि गुलिकास्तं राजहंसं विभो
र्वेध्यं विद्धि मनोभुवः स्वमपि तां मञ्जुं धनुर्मञ्जरीं।
यन्नित्याङ्कनिवासलालितनमज्याभज्यमानं स्वस
न्नाभीमध्यबिला विलासमखिलं रोमालिरालम्बते
॥ १२७ ॥

त्वद्गुच्छावलीति ॥ हे दमयन्ति त्वद्गुच्छावलेस्तव हारविशेषस्य मौक्तिकानि मुक्ताफलानि विभोः प्रभोर्मनोभुवः कामस्य गुलिका पेषणमृत्तोलकान् विद्धि जानीहि तथा राजहंसं राजश्रेष्ठं त्वं नलं मनोभुवो वेध्यं लक्ष्यं विद्धि अथ च तं नलं मनोभुवो वेध्यं राजहंसं पक्षिविशेषं विद्धि तथा स्वमपि आत्मानमपि तां तव मायप्रकारां मञ्जुं मनोज्ञां मनोभुवो धनुर्मञ्जरीं धनुर्लतां विद्धि तां कां तव रोमालिर्लोमावलिर्यस्यास्त्वद्रूपधनुर्मञ्जर्या नित्यं सर्वदा योऽङ्कनिवासो मध्यावस्थानं तेन लालिततमा अतिशयेन शोभमाना या ज्या मौर्वी तया भज्यमानं सेव्यमानमुत्पाद्यमानमित्यर्थः अखिलं समस्तं विलासं शोभां आलम्बते आश्रयति मौर्व्याः स्थाने रोमावलिरेव जातेत्यर्थः किम्भूता लसत् शोभमानं नाभिमध्यमेव बिलं गुलिकाधारस्थानं यस्याः साऽदृष्टा गुलिकाक्षेपणधनुषि गुलिकास्थापनार्थं छिद्रं क्रियते तत्तव नाभिरेवेत्यर्थः त्वद्रूपेणैव धनुषा नलः कामस्य वश्यो भविष्यति नान्येनेति भावः । हारभेदा यष्टिभेदाद्गुच्छगुच्छार्द्धगोस्तना इत्यमरः। राजहंसस्तु कादम्बे कलहंसे नृपोत्तम इति मेदिनी ॥ १२७ ॥

Digitized by Google

पुष्पेषुश्चिकुरेषु ते शरचयं त्वद्भालमूले धनू
रौद्रे चक्षुषि तज्जितस्तनुमनुभ्राङ्क्ष्व यश्चिक्षिपे ।
निर्व्विद्याश्रयदाश्रमं स वितनुस्त्वां तज्जयायाधुना
पञ्चालिस्तदुरोजशैलनिलया तत्पर्णशालायते ॥ १२८ ॥

पुष्पेषुरिति ॥ यः पुष्पेषुः कामस्तज्जितः तेन नलेन सौन्दर्य्यादिना पराभूतः सन् निर्व्विद्य ईर्ष्यया आत्मानमवज्ञाय ते तव चिकुरेषु केशेषु शरचयं पुष्पमयबाणसमूहं चिक्षिपे क्षिपति स्म तथा त्वद्भालमूले तव ललाटमूले भुवि धनुश्चिक्षिपे अनुभ्राङ्कं भ्रर्व्व भ्रूसदृशे रौद्रे रुद्रसम्बन्धिनि चक्षुषि तृतीयनयने तनुञ्च शरीरञ्च चिक्षिपे अधुना इदानीं स कामः वितनुरनङ्गः सन् अत एव विशेषेण तनुः सन् तस्य नलस्य जयाय त्वामेवाश्रमं तपोवनं आश्रयत् आश्रितवान् तपस्यार्थमित्यर्थात् तथा तव उरोजौ स्तनावेव शैलौ पर्व्वतौ तावेव निलयः स्थानं यस्याःसादृशी पञ्चालिः पत्त्रा वलिस्तस्य कामस्य पर्णशालायते उटजवदाचरति । दमयन्त्याः केशस्य पुष्पाणामुद्दीपकत्वात् कामबाणत्वेन रूपकं भ्रुवोरपि वक्रत्वात् धनुष्टेन रूपकं स्तनलिखितपत्त्रावलीनां वक्रत्वात् कामकुटत्वेन रूपकं अन्योऽपि कश्चिद्वीरः केनचिज्जितः सन् आत्मानमवज्ञाय शस्त्रादिकं स्थानान्तरे निक्षिप्य शरीरञ्च वल्कलादिसेवया कृशीकृत्य कस्मिंश्चित् पर्व्वते पर्णशालामास्थाय शत्रुपराभवार्थं तपस्यति कामस्त्वेव नलजयं करिष्यति नान्यथेति भावः । अनुभ्राङ्कमिति सादृश्यार्थेऽव्ययीभावः चिक्षिप इति स्वरितेत्त्वादात्मनेपदं । तत्त्र ग्लानापदीर्ष्यादेर्निर्व्वेदः स्वावमाननं । दैन्यचिन्ताश्रुनिश्वासवैवर्ण्योच्छ्वसितादिकृदिति साहित्यदर्पणः । चिकुरः कुन्तलो वाल इति मुनीनान्तु पर्णशालोटजोऽस्त्रियामिति चामरः ॥ १२८ ॥

Digitized by Google

इत्यालपत्यथ पतत्त्रिणि तत्र भैमीं
सख्यश्चिरात्तदनुसन्धिपराः समीयुः।
शर्म्मास्तु ते विसृज मामिति सोऽप्युदीर्य्य
वेगाज्जगाम निषधाधिपराजधानीं ॥१२९॥
चेतोजन्मशरप्रसूनमधुभिर्व्यामिश्रतामाश्रयत्
प्रेयोदूतपतङ्गपुङ्गवगवीहैयङ्गवीनं रसात्।

अथ तत्र भैमीसखीनामागमनं हंसस्य प्रस्थानञ्च युगपदाह॥
इत्यालपतीति॥ अथानन्तरं तत्र पतत्त्रिणि हंसे इत्येवं पूर्वोक्तं आलपति कथयति सति चिरात् बहुकालं तदनुसन्धिपराः दमयन्त्या अन्वेषणे तत्पराः सख्यो वयस्याः भैमीं समीयुः प्रापुः सोऽपि हंसोऽपि हे भैमि ते तुभ्यं शर्म्मास्तु मङ्गलं भवतु मां विसृज प्रेषय इति उदीर्य्य उक्त्वा वेगात् निषधाधिपस्य नलस्य राजधानीं नगरीं जगाम गतवान्॥१२९॥

हंसान्नलगुणं श्रुत्वा तस्मिन् प्रस्थिते भैम्या दौर्म्मनस्यमाह॥
चेत इति॥ सा भैमी प्रेयसो नलस्य दूतो यः पतङ्गपुङ्गवो हंसश्रेष्ठस्तस्य या गीर्वाणी सैव हैयङ्गवीनं ह्योगोदोहोद्भवघृतं तत् रसादनुरागात् स्वादं स्वादं आस्वाद्यास्वाद्य सादरमाकर्ण्येत्यर्थः तृप्तिं न प्राप्तापि सुखमलभमानापि अन्तर्मनसि नितान्तमत्यर्थं तापं प्राप सन्तापं प्राप्तवती अतुलां निःसीमां मूर्च्छां मयि मोहमयि आनर्च्छ लेभे। किंभूतं हैयङ्गवीनं चेतोजन्मनो मनसिजस्य शरप्रसूनानां बाणभूतपुष्पाणां मधुभीरसैः अथच माध्वीकैर्व्यामिश्रतां मेलनं आश्रयत्

Digitized by Google

स्वादं स्वादमसीममिष्टसुरभि प्राप्नापि तृप्तिं न सा
तापं प्राप नितान्तमन्तरतुलामानर्च्छ मूर्च्छामपि
॥ १३० ॥

तस्या दृशोवियति बन्धुमनुव्रजन्त्या
स्तं वाष्पवारि नचिरादवधीबभव ।

प्राप्नुवत् तथा असीमं बहुलं इष्टसुरभि प्रसिद्धं मधु च अति सुगन्धि नलगुणानामुद्दीपकत्वात् विरहव्यथया तापोमूर्च्छा च तया प्राप्तेत्यर्थः अन्येऽपि मधुमिश्रितं घृतमास्वाद्य तापं मूर्च्छाञ्च लभन्ते घृतं हि मधुमिश्रितं सत् विषं भवति अतएव ज्योतिषं वह्निवत्तु भवे द्दुष्टं मधुसर्पिर्विषं यथेति । सुश्रुतेऽपि मधुसर्पिषी मानतस्तुल्ये नाश्नीयादिति । पुरूरवगवीति गौरवक्षितलुकीतिः राजादित्वाट्टि त्वादी । स्वर्गेषु पशुवाग्वज्रदिङ्नेत्रघृणिभूजले । लक्ष्यदृष्ट्या स्त्रियां पुंसि गौरिति । नतु हैयङ्गवीनं यत् स्रोगोदोहोद्भवं घृतमिति चामरः ॥ १३० ॥

अथ हंसगमनखिन्नाया भैम्या अश्रुपतनं हंसचिन्तनञ्चाह ॥ तस्या इति ॥ तस्या भैम्यावियति आकाशमार्गे तं बन्धुं हंसं अनुव्रजन्त्या अनुयान्त्या दृशोदृक्चैवाष्पवारि अश्रुजलं नचिरात् क्षेत्रं तस्मात् अवधीबभुव अनुगमनप्रतिबन्धकमभूत् तत्तस्मात् मार्गेऽपि समीपस्थेनापि अनेन हंसेन विप्रकृष्टे दूरस्थीभूतं भैमी अश्रुजलाविलनेत्रत्वात् समीपस्थमपि हंसं द्रष्टुमशक्तासीदित्यर्थः नु किन्तु आरादपि दूरस्थेनापि तेन हंसेन चित्तवृत्तेर्व्यवदधे न व्यवहितीभूतं दूरमेवापि तस्याश्चिन्ताविषयेण भूतमित्यर्थः । श्रोदकार्थं प्रियं पान्थमनुव्रजेदिति वचनात् मान्यानुगमने जलमुपस्थि

प्रार्थ्येऽपि विप्रचकृषे तदनेन दृष्टे
रारादपि व्यवदधे न तु चित्तवृत्तेः ॥१३१॥

अस्तित्वं कार्य्यसिद्धेः स्फुटमनुकथयन् पक्षयोः कम्पभेदै
राख्यातुं वृत्तमेतन्निषधनरपतौ सर्व्वमेकः प्रतस्थे ।
कान्तारे निर्गतासि प्रियसखि पदवी विस्मृता किन्नु मुग्धे
मारोदीरेहि यामेत्युपहृतवचसो निन्युरन्यां वयस्याः
॥१३२॥

भूतं अत्रापि नेत्रवारिणोऽनुगमनप्रतिबन्धकत्वादवधित्वमुक्तं। विप्रच कृषे यवदधे इति भावे लिट्। आराद्दूरसमीपयोरित्यमरः ॥१३१॥

अथ हंसस्य नलसन्निधिगमनं भैम्याश्च स्वगृहप्रापणमाह ॥ अस्ति त्वमिति ॥ तयोर्मध्ये एको हंसः पक्षयोश्छदयोः कम्पभेदैश्चालन विशेषैः कार्य्यसिद्धेर्नलप्राप्तिरूपाया अस्तित्वं अवश्यम्भावं स्फुटं यथा तथा अनुकथयन् भैम्यां सूचयन्निव निषधनरपतौ नले एतत्सर्व्वं वृत्तं भैमीदर्शनालापादिवृत्तान्तं आख्यातुं कथयितुं प्रतस्थे जगाम तथा वयस्याः सख्यः इत्येवं उपहृतं उच्चरितं वचो याभिस्तथा विधाः सत्यः अन्यां दमयन्तीं निन्युः तस्मात् स्थानात् स्वालयं प्रापयामासुः इति किं हे प्रियसखि कान्तारे दुर्गमवर्त्मनि निर्गतासि प्रस्थितासि नु भो मुग्धे भ्रान्तचित्ते भैमि किं त्वया पदवी पन्थाः विस्मृता मा रोदीः अधुना रोदनं माकार्षीः एहि अस्माभिः सार्द्धमागच्छ याम वयं सर्व्वा मिलित्वा गृहं गच्छाम इति। अन्योऽपि हस्तकम्पभङ्ग्या कार्य्यसिद्धिं सूचयति । कान्तारो वर्त्म दुर्गममिति। अयनं वर्त्म मार्गाध्वपन्थानः पदवी सृतिरिति चामरः। स्रग्धरावृत्तमिदं ॥१३२॥

Digitized by Google

सरसि नृपमपश्यद्यत्र तत्तीरभाजः
स्मरतरलमशोकानोकहस्योपमूलं ।
किसलयदलतल्पस्थापिनं प्राप तं स
ज्वलदसमशरेषुस्पर्द्धिपुष्पर्द्धिमौलेः ॥ १३२ ॥
परवति दमयन्ति त्वां न किञ्चिद्वदामि
द्रुतमुपनम किं मामाह सा शंस हंस ।

अथ हंसस्य नलदर्शनमाह ॥ सरसीति ॥ स हंसः यत्र सरसि उद्यानतडागे नृपं नलराजं अपश्यत् पूर्वं दृष्टवान् तस्य सरसस्ती रभाजः कूलस्थितस्य अशोकानोकहस्य अशोकवृक्षस्य उपमूलं मूल समीपे तं नलं प्राप प्राप्तवान् किम्भूतं स्मरेण कामपीडया तरलं चञ्चलं अतएव किसलयदलानां नवपल्लवखण्डानां कोमलाङ्गभेद शङ्कया शिरारहितीकृतपल्लवानामित्यर्थः तल्पं शय्यां स्थापयति विरहतापाभिव्याप्तमलिनं करोतीति तादृशं किंभूतस्याशोकानोक हस्य ज्वलन्तो दीप्यमाना ये असमशरस्य कामस्य इषवो वाणास्तैः सह स्पर्द्धितुं शीलं येषां तथाविधानां पुष्पाणां ऋद्धिः प्राचुर्य्यं यत्र तादृशो मौलिरग्रभागो यस्य तादृशस्य । अशोकपुष्पाणामारक्तत्वात् ज्वलत्कामवाणसाम्यं । अनोकहः कुठः सालः पलाशी द्रुद्रुमागमा इत्यमरः ॥ मालिनीवृत्तमिदं ॥ १३२ ॥

तत्रागत्य हंसो भैमीवृत्तान्तजातमुक्तवानित्याह ॥ परवतीति ॥ हे परवति पित्राद्यधीनत्वात् परतन्त्रे दमयन्ति त्वां किञ्चिदपि न वदामि अद्यापि नागच्छसीत्यादि नानुयुञ्जे हे हंस त्वं द्रुतं शीघ्रं उपनम मत्समीपमागच्छ सा दमयन्ती मां प्रति किं आह वदति

Digitized by Google

इति वदति नलेऽसौ तच्छशंसोपनम्रः
प्रियमनु सुकृतां हि स्वस्पृहाया विलम्बः ॥ १३४ ॥
कथितमपि नरेन्द्रः शंसयामास हंसं
किमिति किमिति पृच्छन् भाषितं स प्रियायाः ।

तच्छंस कथय इत्येवं नले वदति भाषमाणे सति असौ हंसः उप नम्रः सन् नलसमीपमागतः सन् तत् भैमीवचनं शशंस उवाच नलकथनसमकालमेव कथमयमागत्य तदुक्तवानित्याशङ्क्य समर्थयति हि यस्मात् सुकृतां भाग्यवतां जनानां प्रियं स्वाभीष्टं अनु लक्षी कृत्य स्वस्पृहायाः स्वेच्छाया विलम्बः कालक्षेपः इच्छाकरणे यावान् विलम्बो भवतु इच्छायां सत्यान्तु विलम्बो न भवतीत्यर्थः ॥ परतन्त्रः पराधीनः परवान्नाथवानपीत्यमरः ॥ १३४ ॥

भैमीवृत्तान्तश्रवणेन नलस्यानुरागातिशयं वर्णयति ॥ कथित मपीति ॥ स नरेन्द्रो नलः कथितमपि उक्तमपि प्रियाया दमयन्त्या भाषितं वचनं किमिति किमिति पृच्छन् कीदृक् कीदृगिति जिज्ञा समानः सन् हंसं शंसयामास पुनरपि वादयति स्म अथानन्तरं सान्द्रो निविडो य आनन्दः सएव मादकत्वात् माध्वीकं मधु तेन मत्तो हृष्टः सन् अधिगतं हंसमुखाच्छ्रवणात् ज्ञातमपि तत्प्रियाया भाषितं स्वयमपि प्रत्यक्षतोऽनेकवारं हंसो यथोक्तवान् तथैव अन्वाचचक्षे अनुवदति स्म अन्तरिति पाठे तु सान्द्रानन्दजनकं यन्मा ध्वीकं तद्रूपं प्रियाया भाषितं अन्तर्मनसि तथा हंसोक्तप्रकारेण

Digitized by Google

अधिगतमथ सान्द्रानन्दमाध्वीकमत्तः
स्वयमपि शतकृत्वस्तत्तथान्वाचचक्षे ॥१२५॥

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यं।
तार्त्तीयीकतया मितोऽयमगमत्तस्य प्रबन्धे महा
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः
॥१२६॥

अन्वाचचक्षे आलोचयामासेत्यन्वयः। इत्थेनानुरागातिशयो ध्वनितः ॥१२५॥

श्रीहर्षमिति ॥ तृतीय एव तार्त्तीयीकस्तस्य भावस्तत्ता तया तृतीयत्वेनेत्यर्थः मितः संख्यातोऽयं सर्गोऽगमत् समाप्तिमिति शेषः ॥१२६॥

इति श्रीप्रेमचन्द्रन्यायरत्नविरचितायामन्वयबोधिकासमाख्यायां नैषधटीकायां तृतीयः सर्गः समाप्तः ॥३॥

Digitized by Google

॥ अथ चतुर्थः सर्गः ॥

अथ नलस्य गुणं गुणमात्मभूः
सुरभि तस्य यशः कुसुमं धनुः ।

पूर्वं स्वप्नदर्शनादिना नलेऽनुरक्तायाः अपि विशिष्य हंसमुखात्तद्गुणश्रवणेन भैम्या जातमनुरागातिशयं वर्णयितुं विरहवर्णनरूपं चतुर्थसर्गमारभमाणः कविर्विप्रलम्भशृङ्गारोचितया विरहप्रकारमाह ॥ अथेति ॥ अथ हंसप्रस्थानानन्तरं आत्मभूः कामः तस्य नलस्य गुणं सौन्दर्यादिकं गुणं मौर्वीं विधाय कृत्वा तथा तस्य सुरभि विख्यातं यशः कर्म्म कुसुमं पुष्पमयं धनुर्विधाय सुमनस्तया धीरतया श्रुतिपथोपगतं भैम्याः शब्दबोधविषयीभूतं हंसमुखादित्यर्थात् तं नलं इषुं वाणं विधाय आशु शीघ्रं तां दमयन्तीं जिगाय जितवान् हंसमुखात्तद्गुणं श्रुत्वा तत्क्षणादेव सा मदनपीडिता जातेति भावः। कामस्य धनुरपि पुष्पमयत्वात् सुरभि सुगन्धि एवं वाणोऽपि श्रुतिपथोपगतः कर्णान्तमाकृष्टः सुमनस्तया पुष्पमयश्च भवति। गुणो मौर्व्यामप्रधाने रूपादौ सूद इन्द्रिय इति। सुरभिः स्वर्णजातीमालाभिन्सुरामोदेषु योषिति। चम्पके च वसन्ते च तथा जाति

श्रुतिपथोपगतं सुमनस्तया
तमिषुमाशु विधाय जिगाय तां ॥ १ ॥
यदतनुज्वरभाक् तनुते स्म सा
प्रियकथासरसीरसमज्जनं ।

फले पुमान् । स्वर्णे गन्धोत्पले क्लीवं सुगन्धिका त्रयोस्त्रिषु । विख्याते सचिवे धीरे चैत्रेऽपि च पुमानयमिति सुमनाः पुष्पमालत्योः स्त्रियां ना धीरदेवयोरिति च मेदिनी । अस्मिन् सर्गे द्रुतविलम्बितं वृत्तं द्रुतविलम्बितमाह नभौ भराविति लक्षणात् ॥ १ ॥

यदिति ॥ सा दमयन्ती अतनुज्वरभाक् कामजनितसन्तापवती सती प्रियस्य नलस्य कथैव सरसी कासारस्तस्यां यो रसो विप्रलम्भाख्यः शृङ्गारः तत्र मज्जनं चित्तावधानं यत् तनुते स्म कृतवती सपदि तल्लक्षणात् हंसगमनानन्तरमेवेत्यर्थः तस्य मज्जनस्य चिरचिरकालं अन्तरं मनस्तापयितुं शीलमस्यास्तादृशी परिणतिः परिपाकः विषमा दुःसहा समपद्यत जाता पूर्व्वं जातानुरागतया कामपीडितापि हंसमुखाद्गुणान् श्रुत्वा तेषामुद्दीपकतया सातिशयां कामव्यथां प्राप्नोति भावः अन्योऽपि महाज्वरभाक् सन् सरसीजले मज्जनं कृत्वा चिरान्तरतापकं वैषम्यं प्राप्नोति तदुक्तं भैषज्यरत्नाकरे । परिषेकान् प्रदेहांश्च स्नानं संशोधनानि च दिवास्वप्नं व्यवायञ्च व्यायामं शिशिरं जलं । क्रोधप्रवातभोज्यानि वर्ज्जयेत्तरुणज्वरी । शोषच्छर्द्दिमदान् मूर्च्छाभ्रमतृष्णारोचकान् । प्राप्नोत्युपजवाले

सपदि तस्य चिरान्तरतापिनी
परिणतिर्विषमा समपद्यत ॥ २ ॥
ध्रुवमधीतवतीयमधीरतां
दयितदूतपतङ्गतवेगतः ।
स्थितिविरोधकरीं ह्यणुकोदरी
तदुदितः स हि यो यदनन्तरः ॥ ३ ॥
अतितरां समपादि जडाशयं
स्मितलवस्मरणेऽपि तदाननं ।

तान् परिषेकादिसेवनादिवि । रसो गन्धरसे जले शृङ्गारादौ विषे वीर्य्ये तिक्तादौ द्रवरागयोरिति मेदिनी ॥ २ ॥

ध्रुवमिति ॥ ध्रुवमुत्प्रेक्षे ह्यणुकोदरी अतिक्षमोदरी इयं दमयन्ती दयितस्य प्रियस्य नलस्य दूतो यः पतन् पक्षी हंसस्तस्य गते गमने यो वेगः गमनजन्यवेगाख्यसंस्कारविशेष इत्यर्थः तस्मात् स्थितिविरोधकरीं मर्य्यादाविरोधिनीं हंसपक्षे अवस्थानविरोधिनीं अधीरतां धैर्य्याभावं अधीतवती पपाठ अत्र प्रमाणमुपन्यस्यति हि यतः यो वेगादिको यदनन्तरो यस्याव्यवधानेन भवति स तदुदित स्तस्मादुत्पन्नः कार्य्याव्यवहितप्राक्क्षणावच्छिन्नस्यैव कारणताभ्युपगमात् हंसगमनानन्तरमेवास्या अधैर्य्यं जातमिति भावः ॥ ३ ॥

अतितरामिति ॥ तदाननं तस्या दमयन्त्या मुखं स्मितलवस्य हास्यलेशस्य स्मरणेऽपि का कथा करणे स्मृतावपि अतितरां सातिशयं यथा तथा जडाशयं जडमति समपादि जातं विरहव्यथया भैम्यामुखे हास्यलेशोऽपि नाभूदित्यर्थः अन्योऽपि जडाशयः पूर्व्वानुभूतं किमपि न स्मरति । तथा तस्या इच्चरणं नयनमेव अतिचापल्यात् खञ्जनः खञ्ज

Digitized by Google

अजनि पङ्कजपाङ्गनिजाङ्गन
भ्रमिकणोऽपि तदीयवशखञ्जनः ॥ ४ ॥
किमु तदन्तरुभौ भिषजौ दिवः
स्मरनलौ विशतः स्म विगाहितुं ।
तदभिकेन चिकित्सितुमाशु तां
मखभुजामधिपेन नियोजितौ ॥ ५ ॥
कुसुमचापजतापसमाकुलं
कमलकोमलमैक्ष्यत तन्मुखं ।

टीट॥ सः अपाङ्गो नेत्रप्रान्त इव निजाङ्गनं तत्र भ्रमिकणोऽपि भ्रमण लेशोऽपि पङ्गुः खञ्जोऽजनि जातः विरहव्यथया तस्याः कटाक्षो नाभू दित्यर्थः अन्योऽपि खञ्जो निजाङ्गणेऽपि भ्रमितुं न शक्नोति ॥ ४ ॥

किमिति ॥ स्मरनलौ कन्दर्पनलराजौ तस्या दमयन्त्या अन्तर्हृदयं विगाहितुं आलोडयितुं विशतः स्म प्रविष्टौ नलो नलविषयकः कामश्च तौ तस्याः सदा चिन्तागोचरौ भावाविति अत्रोत्प्रेक्षते तस्या दमयन्त्या अभिकेन कामुकेन मखभुजां देवानामधिपेन इन्द्रेण आशु शीघ्रं तां दमयन्तीं चिकित्सितुं प्रतिकर्त्तुं नियोजितौ प्रेरितौ दिवः स्वर्गस्य उभौ भिषजौ चिकित्सकौ अश्विनीकुमारौ किमु तयोः सौन्दर्यातिशयादियमुत्प्रेक्षा इन्द्रोऽपि बाहरमुखात् सौन्दर्यादिकं श्रुत्वा भैमीमभिलषितवानिति बोध्यं ॥ ५ ॥

कुसुमेति ॥ कमलं पद्ममिव कोमलं अतिमृदुलं तन्मुखं दमयन्त्या मुखं कुसुमचापजतापेन कामजनितविरहज्वरेण समाकुलं अतिम्लानं ऐक्ष्यत दृष्टं सखीभिरित्यर्थात् मुखस्य कोमलत्वादेव ग्लानिर्जातेति भावः कोमलं पद्ममपि तापेन समाकुलं भवति । किम्भूतं रविरश्मिभिः

Digitized by Google

अहरहर्व्वहदभ्यधिकाधिकां
रविरुचिम्लपितस्य विधोर्व्विधां॥ ६॥
तरुणतातरणिद्युतिनिर्म्मित
द्रढिम तत्कुचकुम्भयुगं तदा।
अनलसङ्गतितापमुपैतु नो
कुसुमचापकुलालविलासजं॥ ७॥

सूर्य्यकिरणैर्म्लपितस्य आच्छादितस्य विधोश्चन्द्रस्य अहरहः प्रतिदिनं अभ्यधिकाधिकां उत्तरोत्तरवर्द्धतां विधां अवस्थां वहत् धारयत् यथा कृष्णपक्षेऽधःस्थितसूर्य्यकिरणैश्चन्द्रस्य प्रतिदिनमधिकाधिक तिरोधानं भवति तथा भैम्यामुखस्य विरहतापेन प्रतिदिनमधिकाधिका म्लानता जातेत्यर्थः॥ म्लपितस्य म्लानिं प्रापितस्येति तु बहवः॥ ६॥

तरुणतेति॥ तदा तस्मिन् समये तस्या दमयन्त्याः कुचौ स्तनावेव कुम्भयुगं घटयुग्मं तरुणता यौवनमेव तरणिद्युतिः सूर्य्यकिरणस्तया निर्म्मितो जनितो द्रढिमा काठिन्यं अथ च नीरसत्वं यस्य तादृशं सत् अनलसङ्गत्या नलसङ्गमाभावेन अथ च वह्निसम्बन्धेन जनितं तापं विरहज्वरं अथ च शोषणं नो उपैतु न प्राप्नोतु अपि तु प्राप्नोत्येव किम्भूतं तापं कुसुमचापः कन्दर्प एव कुलालः कुम्भकारस्तस्य विलासात्प्रादुर्भावात् अथ च उद्योगाज्जायत इति तादृशं कुलालोऽपि घटं कृत्वा सूर्य्यकिरणैः परिशोष्य वह्नौ प्रक्षिपति। कुम्भकारक्रियिभिः इति कुम्भकारः कुलालः स्यादिति चामरः॥ ७॥

Digitized by Google

अधृत यद्विरहोष्मणि मज्जितं
मनसिजेन तदूरुयुगं तदा।
स्पृशति तत्कदनं कदलीतरु
र्यदि मरुज्ज्वलदूषरदूषितः॥ ८॥
स्मरशराहतिनिर्म्मितसंज्वरं
करयुगं हसति स्म दमस्वसुः।

अधृतेति॥ तदा तस्मिन् समये मनसिजेन कामेन विरहोष्मणि विरहदाहे मज्जितं ममीकृतं तदूरुयुगं तस्या दमयन्त्या ऊरुद्वयं यत् कदनं अवसादं अधृत धृतवत् तत्कदं कदलीतरू रम्भा वृक्षस्तदा स्पृशति लभेत यदि मरौ निर्ज्जलप्रदेशे ज्वलता अति तीक्ष्णतापादिकं दहता ऊषरेण क्षारमृत्तिकया दूषितः पीडितः स्यात् अन्यथा तस्योपमानभूतोऽपि तथाविधं कदनं न प्राप्नुयादि त्यर्थः तस्या ऊरुद्वयं विरहदाहेन मरुदेशक्षारमृत्तिकादग्धकदली तरुसदृशं जातमिति भावः। कदनं सादने पाप इति विश्वः समा वौ मरुधन्वानाविति यादवः क्षारमृत्तिका ऊषवानूषरो द्वावपीति चामरः॥ ८॥

स्मरेति॥ दमस्वसुर्दमयन्त्याः करयुगं स्मरशराणां कामवाणाना माहत्या प्रहारेण निर्म्मितो जनितः संज्वरः सन्तापो यत्र तादृशं सत् अनपिधानं अनावरणं यथा स्यात्तथा पतन् तपनस्य सूर्य्यस्य आतपो यत्र तथाभूतं तपेन निदाघेन निपीतस्य शोषितस्य सरसः सरोवरस्य सरसीरुहं पद्मं हसति स्म तत्तुल्यं जातमित्यर्थः। विलस ति संरम्भे हसनमित्यसूयकीत्युपक्रम्य तस्य चानुकरोतीति चाब्दाः

अनघि धामपतत्तपनातपं
तपनिपीतसरःसरसीरुहं ॥ ९ ॥
मदनतापभरेण विदीर्य्य नो
यदुदपाति हृदा दमनस्वसुः।
निविडपीनकुचद्वययन्त्रणा
तमपराधमधात् प्रतिबध्नती ॥ १० ॥
निविशते यदि शूकशिखा पदे
सृजति सा कियतीमिव न व्यथां।

तादृक्षयाविव इति दृष्टी। निदाघ उष्णोपगम उष्ण उष्णागमश्च इत्यमरः १९ ॥

मदनेति ॥ दमस्वसुर्दमयन्त्या हृदा हृदयेन कर्त्रा मदनतापभरेण कामजनितसन्तापबाहुल्येन हेतुना विदीर्य्य स्फुटित्वा यत नो उदपाति नोत्पतितं तं विदीर्य्यानुत्पतनलक्षणं अपराधं निविडेन निरन्तरेण पीनेन पीवरेण कुचद्वयेन कृता या यन्त्रणा रोधः सा प्रतिबध्नती प्रतिबन्धकतामाचरन्ती सती अधात् दधार विरहव्यथा बाहुल्येन भैमीहृदयं स्फुटितमभविष्यदेव तर्हि यन्न स्फुटितं सोऽपराधो निविडत्वात्पीनत्वाच उपरिस्थितस्तनद्वयस्यैवेत्यर्थः अन्यदपि निविडं स्थूलञ्च पाषाणादिकमुपरिस्थितं सत् तापातिशयेन स्फटितावतनोन्मुखं किमपि वस्तु रुणद्धीति ॥ १० ॥

निविशत इति ॥ शूकशिखा धान्यकण्टकाग्रमपि यदि पदे चरणे निविशते प्रविशति तदा सा चरणप्रविष्टा शूकशिखा कियतीमिव व्यथां पीडां न सृजति न जनयति अपि तु महतीमेव पीडां जनयतीत्यर्थः मृदु

Digitized by Google

मृदुतनोर्वितनोतु कथन्नु तां
मवनिभृत्तु निविश्य हृदि स्थितः ॥ ११ ॥
मनसि सन्तमिव प्रियमीक्षितुं
नयनयोः स्पृहयान्तरुपेतयोः ।
ग्रहणशक्तिरभूदिदमीययो
रपि न संमुखवास्तुनि वस्तुनि ॥ १२ ॥

तनोः सुकुमाराङ्ग्या न तु काठिन्यादमयन्त्या हृदि निविश्य स्थितः न तु बहिर्गतः अवनिभृत्पर्वतः अथच नलः तु पुनस्तां यथां कथं न वितनोतु न जनयतु अपितु ततोऽप्यधिकां पीडां जनयत्वेवेत्यर्थः अनवरतं नलं चिन्तयन्त्या दमयन्त्या महती व्यथा प्राप्तेति भावः । अव निभृदिति अवनिं पृथिवीं बिभर्ति धारयति पुष्णाति चेति डुभृञ् धारणपोषणयोरित्यस्मात् क्विप् । मत्वर्थे तु तद्विशेषः । भूभृतोऽचलो महीभृत्पृथ्वी त्वणापे इत्यमरः । इवशब्दोवाक्यालङ्कारे ॥ ११ ॥

मनसीति ॥ इदमीययोर्दमयन्तीसम्बन्धिनोर्नयनयोः संमुखे वास्तु स्थानं यस्य तादृशेऽपि वस्तुनि घटादौ विषये न ग्रहणशक्तिरभूत् न ज्ञानजननसामर्थ्यं बभूव निरन्तरनलचिन्तनेन मनसाऽसंयुक्तत्वात् अथोत्प्रेक्षते मनसि सन्तं चिन्ताविषयत्वात् वर्त्तमानं प्रियं नलं ईक्षितुं द्रष्टुं स्पृहया वाञ्छया अन्तर्हृदयं उपेतयोरिव प्रविष्टयोरिव अतएव सान्निध्याभावात् तथाविधविषयग्रहं न जनयतीत्यर्थः ॥ १२ ॥

Digitized by Google

हृदि दमस्वसुरश्रुभरप्लुत
प्रतिफलद्विरहात्तमुखानतेः ।
हृदयभाजमराजत चुम्बितुं
नलमुपेत्य किलागमि तन्मुखं ॥ २२ ॥
सुहृदमग्निमुदञ्चयितुं स्मरं
मनसि गन्धवहेन मृगीदृशः ।

हृदीति ॥ विरहेण आत्ता गृहीता मुखस्य आनतिरीषन्नमनता यया तथाभूताया दमस्वसुर्दमयन्त्या अश्रुभरप्लुते बाष्पजलप्रवाहव्याप्ते हृदि वक्षसि प्रतिफलत् प्रतिबिम्बतां गच्छत् तत् तादृक् सुन्दरं मुखं कर्तृ अराजत शुशुभे उत्प्रेक्षते किमुतं मुखं हृदयभाजं हृदयमध्यवर्त्तिनं नलं चुम्बितुं उपेत्य समीपं गत्वा आगमि किल आगच्छदिव मुखमानमय्य नलं चिन्तयामासेति भावः । विरहेणात्ता या मुखानतिस्तया हेतोः प्रतिफलदिति मध्यमपन्नं वा । आगमीति आगम आगमनमस्यास्तीति अत्यर्थे इन् ॥ २२ ॥

सुहृदमिति ॥ मृगीदृशो दमयन्त्या निश्वसितेन निश्वासरूपेण गन्धवहेन वायुना मनसि वर्त्तमानं सुहृदं मित्रं स्मरं कामलक्षणमग्निं उदञ्चयितुमुत्तेजयितुं विनिर्गमेण बहिर्गमनेन अनुमिता सखीभिरनुमानविषयीकृता या निभृतवेशने गुप्तप्रवेशे मायिता मायावित्वं सा अबलि अवीकृता वायोरन्तःप्रवेशं विना बहिर्गमनमनुपपद्यमानं सत् तमनुमापयतीत्यनुमीयमानो वायोर्गुप्तप्रवेशः स्वमित्रस्मराग्नेरुद्दीपने

अकलि निश्वसितेन विनिर्गमा
नुमितनिह्नुतवेश्मनमायिता ॥ १४ ॥
विरहपाण्डिमरागतमोमषी
शितिमतन्निजपीतिमवर्णकैः ।
दश दिशः खलु तद्दृगकल्पय
ल्लिपिकरी नलरूपकचित्रिताः ॥ १५ ॥
स्मरहुतां हृदयस्य दशां मुहु
र्व्यञ्ज वदन्निव निश्वसितानिलः ।

मनार्थं हवेवि भवीयमानोत्प्रेक्षेयं विरहेण तस्या नयनो विषाद्य मातात्यतिभावः तस्याः पद्मिनीनाम्निषादस्य गन्धवहनं ॥ १४ ॥

विरहेति ॥ खलूत्प्रेक्षे तद्दृक् दमयन्त्या नयनरूपा लिपिकरी चित्रकारिणी विरहेण जनितो यः पाण्डिमा मुखादेः पाण्डुत्वं तथा रागो रोदनान्नयनयोर्लौहित्यं तमो मूर्च्छारूपा या मषी तस्याः शितिमा कृष्णत्वं एवं तस्या भैम्या निजः सहजो यः पीतिमा गौरत्वं एतन्नामकै र्वर्णकैः कृत्वा दश दिशः नलरूपकैर्नलप्रतिच्छन्दकैश्चित्रिता जात चित्रा अकल्पयत्कृतवती विरहवशात्तस्या मुखपाण्डिमादयस्तन्म यतां च जाता इति भावः विरहः पाण्डिमादिचये हेतुः अन्यापि चित्र कारिणी नानावर्णैः केनचिद्प्रति रूपकेन भित्त्यादिकं चित्रयति । लिपिकरीति दिवादेः कृञ इति टङ् टिड्ढादौ ॥ १५ ॥

स्मरहुतामिति ॥ निश्वसितानिलो निश्वासवायुः स्मरहुतां काम जनितां दमयन्त्या हृदयस्य मनसो दशां पीडां मुहुर्वारं वारं व्यञ्ज व्यक्तमित्यर्थं यथा तथा वदन्निव कथयन्निव अदःश्रिते दमयन्त्याश्रिते

व्यथित वाससि कम्पमदःश्रिते
वसति कः सति नाश्रयबाधने ॥ १६ ॥
करपदाननलोचननामभिः
शतदलैः सुतनोर्विरहज्वरे।
रविमहोबहु पीतचरं चिरा
दनिशतापमिषादुदवम्यत ॥ १७ ॥

वाससि वस्त्रे कम्पं व्यथित जनयामास दीर्घनिश्वाससम्पर्केण वस्त्रस्य चाञ्चल्यं जातमित्यर्थः युक्तमेवैतत् यतः आश्रयस्य बाधके पीडायां सत्यां क आश्रितो न त्रसति न बिभेति अपितु सर्व्व एव त्रसति आश्रयभूतायाः दमयन्त्या मनःपीडायां सत्यां तदाश्रितस्य वस्त्रस्यापि कम्पो युज्यत एव। अन्योऽपि कस्यचिन्महतो मनःपीडां कुर्व्वन् तदाश्रितं जनं कम्पयति। अदो हृदयं श्रिते आश्रिते वाससोऽपि आश्रयमनस्त्वेयमेव अदःशब्देन पूर्व्वोक्तहृदयशब्दोक्तस्याप्यमनसः प्रतिपाद्यतया तस्य तत्सम्बन्धाभावेनासङ्गतत्वात् तदेकत्र हृदयस्य मनोवाचकत्वमपरत्र वक्षोवाचकत्वमित्युन्नेतव्यमपि प्रयतते वक्तुं। वर्धितेति विपूर्व्वधातोर्लुङ् तङ् स्यादेशाद्विनाशक् तङ्कुमिमादेरिति तङ्लुक् ॥ १६ ॥

करपदेति ॥ सुतनोर्दमयन्त्या विरहज्वरे वियोगजनितज्वरे करपदाननलोचनानि नामानि संज्ञा येषां तथाभूतैः शतदलैः पद्मैः करपद्मादिभिरित्यर्थः चिरात् बहुकालं अनिशतापमिषात् निरन्तरसन्तापच्छलात् पीतचरं पूर्व्वं पीतं बहु अनेकं रविमहः सूर्य्यतेज उदवम्यत वान्तं विरहज्वरेण तस्याः करादिषु सन्तापो जात इति भावः पद्मस्यैव सूर्य्यतेजसि सति प्रफुल्लतया स्थितत्वात्तत्त्वेन करादीनां रूपणं। पीतचरेति भूतपूर्व्वे चरट् ॥ १७ ॥

Digitized by Google

उदयति स्म तदद्भुतमालिभि
र्धरणिभृद्भुवि तत्र विमृश्य यत् ।
अनुमितोऽपि च बाष्पनिरीक्षणा
द्व्यभिचचार न तापकरोऽनलः ॥ १८ ॥
हृदि विदर्भभुवः प्रहरन्करै
रतिपतिर्निषधाधिपतेः कृते ।

उदयतीति ॥ यत् अद्भुतं आश्चर्यं उदयति स्म उदितं किं तद द्भुतमित्याह यत् आलिभिः सखीभिः तत्र तस्यां धरणिभृद्भीमराज स्तस्माद्भूतउत्पत्तिर्यस्याः सा तथा तस्यां दमयन्त्यां अपिभिन्नक्रमे बाष्प निरीक्षणादपि अश्रुजलदर्शनादपि विमृश्य विवेच्य अनुमितोऽनुमान विषयीकृतस्तापकरः सन्तापकारी नलो राजा न व्यभिचचार न व्यभि चरति स्म अश्रुचितोऽपि केवलमश्रुजलदर्शनात् चिन्ताविषयतयाऽ नुमितो नलराजो यत्र व्यभिचरति स्म तदेवाश्चर्यमित्यर्थः अन्यत्र धरणिभृतः पर्वतस्य भुवि भूम्यां बाष्पनिरीक्षणात् धूमायमानो ष्मोदर्शनात् विमृश्यापि परामर्शं कृत्वापि अनुमितस्तापकरो न तु धर्मविषयतया भासमानोऽनलोऽग्निर्व्यभिचरत्येव अत्र तु यत्र व्यभि चचार तदाश्चर्यमेवेति शब्दच्छलमूलेयं वाक्यभङ्गी उभयत्रापि व्यभि चारो हेतुसमानाधिकरणाभावप्रतियोगित्वरूपो बोध्यः समानाका रज्ञानप्रतिबन्धकतायामेवमेव दीधितिकारादिभिस्तस्य स्वीकृतत्वात् अबलानलसंसर्गाभावो न व्यभिचचारेत्यपि व्याचक्षते तत्र क्वचिद्द्वयो भावस्यापि क्लीवत्वं व्यभिचरतीत्यनलस्य पुंस्त्वं । बाष्पावूष्माश्रु इत्य मरः ॥ १८ ॥

हृदीति ॥ रतिपतिः कामो निषधाधिपतेर्नलस्य कृते नलवेधार्थं

Digitized by Google

कृततदन्तरगस्मरदृढव्यधः
स्फुटदनीतिरमूर्च्छदलं खलु ॥ १९ ॥
विधुरमानि तया यदि भानुमान्
कथमसौ स तु तद्धृदयं तथा ।

विदर्भभुवो दमयन्त्या हृदि मनसि शरैर्बाणैः प्रहरन् प्रहारं कुर्व्वन् सन् अलमत्यर्थं अमूर्च्छत् मूर्च्छां प्राप्तवान् किम्भूतः कृततदन्तरगस्य दमयन्तीहृदयमध्यवर्त्तिनः स्मरस्यात्मनो दृढोऽत्यर्थस्ताडनं येन तादृशः खलु एवम्भूत इव अतएव स्फुटन्ती प्रतिफलन्ती अनीतिर्यस्य तादृशः दमयन्तीहृदये नलोवर्त्तते इति बुद्ध्या तत् शरैः प्रहृतवान् ततश्च तत्र स्थितमात्मानमपि प्रहृतवान् योद्धुमुद्यतोहि आत्मानं रक्षित्वा शत्रुं प्रहरन्ति अनेन तु आत्मानमरक्षित्वैव केवलं नलपराभवव्याकुलितमनसा प्रहृतं सुतरां वीरनयानभिज्ञस्य तस्य युज्यत एव मूर्च्छा । कामप्राबल्येन सातिवरां पीडां प्राप्नोति भावः । अमूर्च्छदिति मूर्च्छा मोहसमुच्छ्राययोः धातोरूपादेवेयमुत्प्रेक्षा ॥ १८ ॥

विधुरिति ॥ तया दमयन्त्या यदि विधुश्चन्द्रो भानुमान् अमानि दाहकत्वात् सूर्य्यत्वेनारोपितस्तदा सतु सूर्य्यत्वेनारोपितो विधुः पुनः वियोगभरेण विरहबाहुल्येन यदस्फुटनं अविदारणं तेन स्फुटीकृतं यत्नीकृतं दृषत्त्वं सूर्य्यकान्तपाषाणत्वं यस्य तथाविधं तस्या दमयन्त्या हृदयं कथं अंशुभिः किरणैः तथा तात्त्विकसूर्य्यवत् अजिज्वलत् ज्वलयतिस्म आरोपितस्य तत्कार्य्यकारित्वाभावात् अतएवाद्भो आश्चर्य्यं सूर्य्यकान्तं तात्त्विकः सूर्य्यएव ज्वलयति न त्वारोपितः विधुस्तु सूर्य्यत्वेनारोपितोऽपि तापास्फुटनलक्षणसाधर्म्येण प्रकटीकृत

अपि वियोगभरास्फुटनस्फुटी
कृतदृषत्त्वमजिज्वलदंशुभिः ॥ २० ॥
हृदयदत्तसरोरुहया तया
क सदृगस्तु वियोगनिमग्नया ।
प्रियधनुः परिरभ्य हृदा रतिः
किमनुमर्तुमघ्नेत चितार्चिषि ॥ २१ ॥
अनलभावमियं स्वनिवासिनो
न विरहस्य रहस्यमबुध्यत ।

सूर्यकान्तत्वं तद्धृदयं यत् ज्वलयति स्म तदाश्चर्य्यमेवेत्यर्थः विरहेण तया चन्द्रकिरणाः सोढुमशक्या इति भावः ॥ २० ॥

हृदयेति ॥ वियोगनिमग्नया विरहाग्निपीडितया अतएव हृदये दत्तं सन्तापशान्त्यै न्यस्तं सरोरुहं पद्मं यया तथाभूतया तया दमयन्त्या सदृक् सदृशी क कस्मिन् देशे अस्तु वर्त्ततां अपि तु न क्वापि तत् सदृशीत्यर्थः नन्वेतत्सदृशी रतिर्भवेदित्याशङ्क्याह रतिः प्रियस्य कन्दर्पस्य धनुः हृदा वक्षसा परिरभ्य आलिङ्ग्य अनुमर्त्तुं कन्दर्पस्य पश्चा मरणार्थं चितार्चिषि चिताग्निज्वालायां किमघ्नेत प्रयत्नं कृतवती अपि तु नैव प्रियाभिलषितं वस्तु हृदयेन परिरभ्य स्त्रियोऽग्निप्रवेशं कुर्वन्तीत्याचारः दमयन्ती स्वमुखादिसाम्यान्नलाभिलषितं पद्मं हृदा परिरभ्य विरहाग्नौ मर्त्तुमुद्यता रतिस्तु स्वप्रियाभिलषितं धनुर्वक्षसि निधाय नैव मृतेति कथमेतत्सदृशी भवेदित्यर्थः एतेनास्या विरहेण मरणप्रायत्वं सूचितं ॥ २१ ॥

अनलेति ॥ इयं भैमी स्वनिवासिनः आत्मनि स्थितस्य विरहस्य रहस्यं तात्त्विकं अनलभावं अग्नित्वं नाबुध्यत न जानाति स्म कुतः यस्य

Digitized by Google

प्रशमनाय विधाय तृणान्यसून्
ज्वलति तत्र यदुज्झितुमैहत ॥ २२ ॥
प्रकृतिरेतु गुणः स न योषितां
कथमिमां हृदयं मृदु नाम यत् ।

भाज्ज्वलति दीप्यमाने तत्र विरहानले प्रशमनाय शान्त्यर्थं असून् प्राणान् तृणानि विधाय तृणत्वेनारोप्य उज्झितुं त्यक्तुं ऐहत चिचेष्ट यदि तस्याः मितं आनीयात्तदा कथं शान्त्यर्थं तत्र तृणानि क्षिपेत् अभिहिं तृणैः सानिध्ययं ज्वलति न तु निर्व्वाति अथ च इयं वह्निरहस्य अनलभावं नलप्राप्त्यभावरूपं रहस्यं मूलकारणं न अबुध्यत अपि तु अबुध्यतैव यस्मात् तत्र विरहे ज्वलति अतितरां तापयति सति प्राणान् तृणानि विधाय तृणवत्तुच्छत्वेन परिगण्य उज्झितुं ऐहत वरं मरणमेव ज्यायोन नेतादृग्दुःसहविरहसहनसाधनं प्राणधारण मिति मत्वा प्राणांस्त्यक्तुमैच्छदित्यर्थः । अनेनापि तस्या विरहेण नव प्राबल्यं सूचितं ॥ २२ ॥

प्रकृतिरिति ॥ नाम प्रसिद्धौ योषितां स्त्रीणां हृदयं अन्तःकरणं मृदु कोमलं इति यत्प्रकृतिः स्वाभाविको गुणः स कथं कुतः इमां दमयन्तीं योषितं न एतु न गच्छतु अपि तु गच्छत्वेव कुतस्तस्या हृदय मार्द्दवं त्यक्तमित्यपेक्षायां प्रमाणमाह विबुधेन देवेन अथच पण्डितेन मनोभुवा कामेन कुसुमैरपि पुष्पमयैरपि इषुभिर्वाणै दुर्भिदा तस्या हृदयं पीडयता सता तत् हृदयमार्द्दवं सुविवृतं सुष्ठु सप्रीकृतं यदि मृदुलं तस्या हृदयस्य न स्यात् तदा कुसुमैः पीडा

Digitized by Google

तदिषुभिः कुसुमैरपि दुन्वता
सुविवृतं विबुधेन मनोभुवा ॥ २३ ॥
रिपुतरा भवनाद्विनिर्य्यतीं
विधुरुचिर्गृहजालविलैर्नु तां।
इतरयात्मनिवारणशङ्कया
ज्वलयितुं विसवेशधराविशत् ॥ २४ ॥
हृदि विदर्भभुवोऽसुमृति स्फुटं
विनमदास्यतया प्रतिविम्बितं।

न शक्तिर्यथापत्तिरथ प्रमाणमित्यर्थः अन्यदपि दुर्ज्ञेयं वस्तु पण्डितेन स्फुटीक्रियते सा कामवाणैरत्यन्तं पीडितेति भावः ॥ २३ ॥

रिपुतरेति ॥ रिपुतरा उद्दीपकतया विरहिपीडकत्वादतिवैरिणी विधुरुचिश्चन्द्रकान्तिर्भवनात् गृहात् अविनिर्यतीं अवहिर्गच्छन्तीं तां दमयन्तीं ज्वलयितुं उत्तापयितुं गृहजालविलैर्गवाक्षच्छिद्रैरविश प्रविष्टा किम्नु तान्गुरिवार्थे इतरथा अन्यथा स्वरूपं प्रकटीकृत्य प्रवेशेन या आत्मनोनिवारणस्य निरोधस्य शङ्का भयं तयैव विसवेशधरा मृणालरूपधारिणी अतिवैरिणोहि स्वरूपं प्रकटीकृत्य गृहं प्रवि शन्तो गृहस्थैरवश्यमेव निवार्य्यन्तेऽतो गृहस्थितस्य कस्यचिद्रूपं गृही त्वा प्रविशन्ति विधुरुचिरपि तदाश्रव तथाल्वायोपशान्त्यै सखीभिरानीतस्य मृणालस्य रूपमाश्राय प्रविष्टेति युक्तमुत्प्रेक्षितं ॥ २४ ॥

हृदीति ॥ असुभृति नवनजलधारे विदर्भभुवोदमयन्त्या हृदि वक्षसि विनमदास्यतया नम्रमुखत्वेन हेतुना प्रतिविम्बितं आत्मप्रति

Digitized by Google

मुखदृगोष्ठमरोपि मनोभुवा
तदुपमाकुसुमान्यखिलाः शराः ॥ २५ ॥
विरहपाण्डुकपोलतले विधु
र्व्यधित भीमभुवः प्रतिबिम्बितः ।

बिम्बं मुखदृगोष्ठं वदननयनदन्तोष्ठाधरं स्फुटमुत्प्रेक्षे मनोभुवा कामेन तदुपमाकुसुमानि तेषां मुखादीनां उपमायोग्यानि कुसुमानि कमलनीलोत्पलबन्धूकपुष्पाणि अखिलाः शराः स्फुटं पूर्वोक्तकुसुमरूपबाणपञ्चकमिव अरोपि आरोपितं तस्या यथार्थं कामेन यथापि शरास्तदसि आरोपिता इत्यर्थः तस्या विरहेण नलमुखत्वं रोदनञ्च जातमिति भावः मुखदृगोष्ठं शरा इति व्यस्तरूपकं प्रागुक्तमिति गवाक्षादित्वादेकवद्भावः अरोपीति प्रभुतायेच्छया एकवचनं ॥२५॥

विरहेति॥ विधुश्चन्द्रो भीमभुवो दमयन्त्या विरहेण पाण्डुनि कपोलतले प्रतिबिम्बितो जातप्रतिबिम्बः सन् अनुपलक्ष्यः समानवर्णत्वात् प्रणिधानेनापि ज्ञातुमशक्यः सितांशः शुक्लभागो यस्य चन्द्रस्य तस्य भावस्तत्ता तया सिताम्बुतयेति पाठे अज्ञेयसितकिरणतयेत्यर्थः कलङ्कमृगस्य केवलं लाञ्छनहरिणस्य अर्पणादङ्के मुखमध्ये मृगस्य अर्पणाद्वा सुखमनायासेन मुखं भैम्या वदनं निजसखं निजमित्रं आत्मतुल्यं व्यधित अकरोत् चन्द्रस्येव कपोलस्यापि पाण्डुत्वात् तत्र समग्रतया प्रतिबिम्बितस्यापि चन्द्रस्य शुक्लभागो नोपलब्धः कलङ्कस्तु श्यामत्वादुपलब्धः विरहात् पूर्वं मुखस्य गौरत्वात् प्रतिबिम्बितश्चन्द्रः पृथग्लक्ष्यते स्म अतस्तदानीं मुखं निष्कलङ्कतया चन्द्रा

Digitized by Google

अनुपलक्ष्यसितांशुनया मुखं
निजसखं सुखमङ्कमृगार्पणात्॥ २६ ॥
विरहतापिनि चन्दनपांशुभि
र्वपुषि सार्पितपाण्डिममण्डना ।
विषधराभविसाभरणा दधे
रतिपतिं प्रति शम्भुविभीषिकां ॥ २७ ॥
विनिहितं परितापिनि चन्दनं
हृदि तया धृतबुद्बुदमाबभौ ।

दधिकमासीत् अधुना तु चन्द्रतुल्यं जातमिति भावः अन्योऽपि कश्चित् जनं स्वकीयं किञ्चिद्दत्वा सखायं करोति ॥ २६ ॥

विरहेति ॥ सा दमयन्ती रतिपतिं कन्दर्पं प्रति शम्भुविभीषिकां शम्भुरहमिति भयप्रदानं दधे कृतवती किम्भूता यतो विरहतापिनि वियोगजन्यसंतापवति वपुषि शरीरे चन्दनपांशुभिर्विरहिता येन शुभ्रत्वात् चन्दनरजोभिरर्पितं जनितं पाण्डिमा पाण्डुत्वमेव मण्डनं भूषणं यस्याः सा तथा शुभ्रत्वात् दीर्घत्वाच्च विषधरस्य वासुक्यादिसर्पस्येव आभा शोभा यस्य तादृशं यद्विसं मृणालं तदेव आभरणमलङ्कारो यस्याः सा शम्भुरपि भस्मपाण्डुरः सितसर्पाभरणश्च शम्भुदग्धः कामो मां शम्भुभ्रान्त्या न प्रहरिष्यतीति बुद्ध्येव सा मृणालादि धृतवतीति प्रतीयमानोत्प्रेक्षेयं ॥ २७ ॥

विनिहितमिति ॥ तया भैम्या परितापिनि विरहसन्तापवति हृदि वक्षसि विनिहितं अर्पितं चन्दनं धृतबुद्बुदाः फेणविकारविशेषा येन तादृशं सत् आबभौ शुशुभे उत्प्रेक्षते अङ्गजता अन्तिकप्राप्ता उद्वोढव्यावाच्येव परिग्रहाः परिजना यस्य तादृशः सन् हृदयेशयं

उपनमन् सुहृदं हृदये ऽग्रयं
विधुरिवाङ्कगतोडुपरिग्रहः ॥ २८ ॥
स्मरहुताशनदीपितया तया
बहु मुहुः सरसं सरसीरुहं ।
श्रयितुमर्द्धपथं कृतमन्तरा
श्वसितनिर्म्मितमर्म्मरमुज्झितं ॥ २९ ॥

भैम्या हृदि वर्त्तमानं सुहृदं मित्रं कामं उपनमन् उपगच्छन् विधुरिव चन्द्र इव चन्द्रस्य चन्द्रसाम्यं बुद्बुदानां नक्षत्रसाम्यं एतेन तापाधिक्यं सूचितं अन्योऽपि परिजनसहितो मित्रमुपगच्छति । हृदयेऽग्रयमिति अकालवाचिनः ग्रयवासवासिष्विति सप्तम्या अलुक् । अङ्को भूषारूपकलक्ष्मसु । चिह्नाजौ नाटिकाद्य‍ङ्के स्थाने क्रोडे ऽन्तिकागसोरिति हेमचन्द्रः । परिग्रहः परिजने पत्न्यां स्वीकारमूलयोरिति मेदिनी ॥ २८ ॥

॥ स्मरेति ॥ स्मरः काम एव दाहकत्वाद्धुताशनो वह्निस्तेन दीपितया उत्तापितया तया भैम्या मुहुरनेकवारं श्रयितुं शरीरसन्तापनिवारणाय आश्रयितुं अर्द्धपथं कृतं अर्द्धवर्त्म प्रापितं बहु अनेकं सरसं स्निग्धं सरसीरुहं पद्मं अन्तरा मध्ये श्वसितेन अत्युष्णनिश्वासवायुना निर्म्मितो जनितो मर्म्मरः शब्दो यस्य एवं भूतं उज्झितं अनुपयोगित्वात् परित्यक्तं एतेन सन्तापाधिक्यं सूचितं अर्द्धपथमिति ऋगादेरक्षव्वेत्यत्समासान्तः । अथ मर्म्मरः स्वनिते वस्त्रपर्णानामित्यमरः ॥ २९ ॥

Digitized by Google

प्रियकरग्रहमेवमवाप्स्यति
स्तनयुगं तव ताम्यति किम्बिति ।
जगदतुर्निहिते हृदि नीरजे
द्वययुकुट्मलनेन पृथुस्तनौ ॥ ३० ॥
त्वदितरो न हृदापि मया धृतः
पतिरितीवनलं हृदयस्थितं ।
स्मरहविर्भुजि बोधयति स्म सा
विरहपाण्डुतया निजशुद्धतां ॥ ३१ ॥

॥ प्रियकरेति ॥ हृदि वक्षसि निहिते भन्या अर्पिते नीरजे पद्मे कर्तृणी द्वययुकुट्मलनेन उत्तापजनितसङ्कोचेन पृथुस्तनौ पीनस्तनीं दमयन्तीं इति जगदतुः जगदतुरिव इवि किं नु भो भैमि तवस्तन युगं कर्तृ एवमनेन प्रकारेण अस्मत्सङ्कोचवत्तत्प्रकारेण प्रकारेण अव योर्यथा सङ्कोचस्तदाकारेण वा प्रियस्य नलस्य करमहं कराभ्यां ग्रहणं अवाप्स्यति प्राप्स्यति किं कथं ताम्यति ग्लायति यतः भवती किं ग्लायति भावि सुखं मनसि कृत्वा भवत्या ग्लानिनं कार्य्येत्यर्थः इति जगदतुरिवेति प्रतीयमानोत्प्रेक्षा अनेनापि तापाधिक्यं सूचितं ॥ ३० ॥

त्वदितर इति ॥ हे प्रिय मया त्वदितरस्त्वद्भिन्नः पतिः स्वामी हृदापि मनसापि न धृतः किं पुनर्वचसादिना इति प्रकारेण सा दमयन्ती विरहेण या पाण्डुता तया स्मरहविर्भुजि कामाग्नौ निज शुद्धतां स्वीयपातिव्रात्यं हृदयस्थितं चिन्ताविषयत्वान्मनोवर्त्तिनं नलं बोधयति स्मेव ज्ञापयति स्मेव विरहेण तस्याः पाण्डुताधिक्यं जात मिति भावः अन्यापि सती स्वामिनं वह्निपरीक्षया निजपातिव्रात्यं बोधयति ॥ ३१ ॥

Digitized by Google

विरहतप्ततदङ्गनिवेशिता
कमलिनी निमिषद्दलमुष्टिभिः ।
किमपनेतुमचेष्टत किं परा
भवितुमैहत तद्दवथुं पृथुं ॥ १२ ॥
इयमनङ्गशरावलिपन्नग
क्षतविसारिवियोगविषावशा ।

विरहेति ॥ विरहेण तप्ते तस्या दमयन्त्या अङ्गे शरीरे निवेशिता तापोपशमनाय सखीभिः स्थापिता कमलिनी पद्मिनी कर्त्री निमिषन्ति सन्तापवशात् संकुचन्ति यानि दलानि तान्येव मुष्टयस्ताभिः करणैः पृथुं महान्तं तस्या दमयन्त्या दवथुं सन्तापं किं अपनेतुं दूरीकर्त्तुं अचेष्टत उद्योगं चक्रे किं वा पराभवितुं प्रहर्त्तुं ऐहत चेष्टते स्म द्वयोरपि मुष्टौ सम्भाव्यमानत्वात् अत्युत्तापवशात् पद्मिनीदलानि संकुचितानि जातानीति भावः ॥ १२ ॥

इयमिति ॥ इयं दमयन्ती खरांशोस्तीक्ष्णांशोः सूर्यस्य करैः किरणैरर्दिता पीडिता शशिकला इव चन्द्रलेखेव कं जनं करुणानीरनिधौ करुणासमुद्रे न निदधौ न निमज्जयामास अपि तु सर्वमेव निदधौ । किम्भूता अनङ्गस्य कामस्य शरावलिर्बाणपङ्क्तिरेव पन्नगाः सर्पास्तेषां यत्क्षतं दंशनं तेन विसारि प्रसरणशीलं यत् वियोगो विरह एव विषं तेनावशा व्याकुला यथा सूर्यकिरणव्यथिता चन्द्रकला दृष्टा सर्वेषां करुणा जायते तथा तथाभूता दमयन्ती

शशिकलेव खरांशुकराहिता
करुणनीरनिधौ निदधौ न कं ॥ ३३ ॥
ज्वलति मन्मथवेदनया निजे
हृदि तयार्द्रमृणाललतार्पिता।
स्वजयिनोस्तपया सविधस्थयो
र्मलिनतामभजद्भुजयोर्भृशं ॥ ३४ ॥
पिकरवश्रुतिकम्पिनि शैवलं
हृदि तया निहितं विचलद्बभौ।

दृष्ट्वा सर्व्वेषां करुणा जातेत्यर्थः अन्यः सर्पदष्टोऽपि विषज्वालाविकल
तया सर्व्वं सकरुणं करोति॥ ३३॥

ज्वलतीति ॥ तया भैम्या मन्मथवेदनया कामजनितपीडया
ज्वलति सन्तप्ते निजे स्वकीये हृदि वक्षसि अर्पिता तापोपशमनाय
निहिता आर्द्रा स्निग्धा मृणाललता स्वजयिनोः स्वपराभवित्रोः
सविधस्थयोः समीपवर्त्तिनोर्भुजयोरतिसरलबाह्वोस्त्रपया लज्जयेव
भृशमत्यन्तं मलिनतां मालिन्यं अभजत्प्राप्ता अन्योऽपि स्वजयिना सह
एकत्र स्थितो मलिनमुखो भवति सरसापि मृणाललता तस्या हृदय
सम्पर्कान्मलिना जातेति तापाधिक्यं सूचितं प्रतीयमानोत्प्रेक्षेयं ॥३४॥

पिकरवेति ॥ पिकरवश्रुत्या विरहित्वात् कोकिलरवश्रवणेन
कम्पिनि कम्पमाने हृदि वक्षसि तया भैम्या निहितं तापोपशान्त्यर्थं
अर्पितं शैवलं शैवालं विचलत् विशेषेण कम्पमानं सत् बभौ शुशुभे
उत्प्रेक्ष्यते किम्भूतं सततं निरन्तरं तद्गतस्य तत्र वर्त्तमानस्य हृच्छयस्य
कामस्य केतुना ध्वजेन मत्स्येन स्वतनूं स्वशरीरं घनमत्यन्तं यथा

Digitized by Google

सततमङ्गमहस्त्वयकोतुना
हर्तामिव स्वतनूघनघर्षिणा ॥ ३५ ॥
न खलु मोहवशेन तदाननं
नलमनः शशिकान्तमबोधि तत् ।
इतरथा शशिनोऽभ्युदये ततः
कथमसुस्रवदसुमयं पयः ॥ ३६ ॥

यथा घर्षतीत्येवंभूतेन सता हतमिव ताडितमिव मत्स्यो हि शैवाले शरीरघर्षणं करोतीति स्वभावः घर्षणस्य घनत्वं कम्पाधिक्यसूचनार्थं तापोपशमनाय हृदि निक्षिप्तेऽपि शैवले कोकिलरवं श्रुत्वातितरां विकला जातेति भावः । शैवलशब्दः क्लीबलिङ्गोऽपि तथा च हेमचन्द्रः । नील्यां शैवालशैवले । शेवालं शैवलमिति ॥ ३५ ॥

नखल्विति ॥ नलमनो नलान्तःकरणं कर्तृ तत् अतिसुन्दरं तदाननं भैम्या मुखं न खलु नैव मोहवशेन उन्मादवशेन शशिकान्तं चन्द्रवत् कमनीयं अथ च चन्द्रकान्तमणिविशेषं अबोधि जानाति स्म किन्तु तत्त्वत एव चन्द्रकान्तत्वेनाबोधीत्यर्थः इतरथा अन्यथा यदि तन्मुखस्य चन्द्रकान्तता तात्त्विकी न स्यात्तर्हि शशिनश्चन्द्रस्य अभ्युदये उदये ततो भैमीमुखात्कथं अश्रुमयं बाष्परूपं पयोजलं असुस्रवत् क्षरति स्म चन्द्रकान्तमणेर्हि चन्द्रोदये जलक्षरणं भवति । सा दिवसे कथचित् स्वस्थतया स्थातुं शक्ता रात्रौ तु अत्यन्तोद्दीपकं चन्द्रं दृष्ट्वा सातिशयं रुरोदेति भावः ॥ ३६ ॥

Digitized by Google

रतिपतेर्विजयास्त्रमिषुर्यथा
जयति भीमसुतापि तथैव सा।
स्वविशिखानिव पञ्चतया ततो
नियतमैहत योजयितुं स तां ॥ ३७ ॥
शशिमयं दहनास्त्रमुदित्वरं
मनसिजस्य विमृश्य वियोगिनी।

रतिपतेरिति ॥ रतिपतेः कामस्य इषुर्वाणो यथा विजयास्त्रं विजयसाधनमस्त्रं जयति तथैव इषुवदेव सा भीमसुतापि दमयन्त्यपि जयति सर्वोत्कर्षेण वर्त्तते ततस्तस्माद्धेतोरेव स कामस्तां दमयन्तीं स्वविशिखानिव आत्मवाणानिव नियतं नियमेन पञ्चतया पञ्चत्व संख्यया अथ च मरणेन योजयितुं ऐहत चेष्टते स्म विरहेण मृतप्राया जातेति भावः पञ्चतापदे श्लेषात् शब्दच्छलमूलेयं प्रतीयमानोत्प्रेक्षा नियतशब्द उत्प्रेक्षावाचकइति केचित् । पञ्चता पञ्चभावः स्यात् पञ्चता मरणेऽपि चेतिविश्वः ॥ ३७ ॥

शशिमयमिति ॥ वियोगिनी विरहिणी असौ दमयन्ती मनसिजस्य कामस्य शशिमयं चन्द्ररूपं दहनास्त्रं अग्निवाणं उदित्वरं उद्गतं विमृश्य तर्कयित्वा झटिति शीघ्रं अश्रुमिषात् नयनजलच्छलात् तदुचितं दहनास्त्रनिवारणयोग्यं वारुणं वरुणदैवतं अस्त्रं प्रतिशस्त्रं उपाददे जग्राह चन्द्रोदये सा विरहवेदनया रुरोदेत्यर्थः अन्योऽपि योद्धा प्रतिपक्षक्षिप्तमाग्नेयास्त्रं वारुणा

स्फटिति वारुणमस्त्रमिषाद्सौ
तदुचितं प्रतिशस्त्रमुपाददे ॥ ३८ ॥
अतनुना नवमम्बुदमाम्बुदं
सुतनुरस्त्रमुदस्तमवेक्ष्य सा।
उचितमायतनिश्वसितच्छलात्
श्वसनमस्त्रममुञ्चदमुं प्रति ॥ ३९ ॥
रतिपतिप्रहितानिलहेतितां
प्रतियती सुदती मलयानिले।

स्त्रेण निवारयति। उदित्वरमिति उत्पूर्वादिणगताविवत्यस्माद्वरः। ह्रस्वात्तु मरादाविति तुक् ॥ ३८ ॥

अतनुनेति। अतनुना कामेन नवं अम्बुदं नवमेघलक्षणं आम्बुदं अस्त्रं उदस्तमुत्क्षिप्तं अवेक्ष्य दृष्ट्वा सा सुतनुर्दमयन्ती आयतस्य दीर्घस्य निश्वसितस्य निश्वासस्य च्छलाद्व्याजात् उचितं आम्बुदास्त्रनिवारणयोग्यं श्वसनं अस्त्रं वायव्यमस्त्रं अमुं कामं प्रति अमुचत् व्यसृजत्। आम्बुदास्त्रं हि वायव्यास्त्रेण निवार्य्यते मेघानामुच्चाटकत्वात् तान् दृष्ट्वा तस्याः दीर्घनिश्वासा जाता इत्यर्थः अन्यत्रापि संग्रामे अतनुना क्षीणशरीरेण क्षिप्तमस्त्रं सुतनुः स्थूलशरीरोऽनायासेनैव निजक्षिप्तेनास्त्रेण निवारयति ॥ ३९ ।

रतिपतीति ॥ इयं सुदती शोभनदन्ता दमयन्ती मलयानिले दक्षिणवायौ रतिपतिना कामेन प्रहिता प्रेरिता या अनिलहेति वायव्यास्त्रं तस्य भावस्तत्ता तां प्रतियती अवगच्छन्ती सती नायं मलयानिलः किन्तु कामप्रहितं वायव्यास्त्रमेवेति अवगच्छन्ती सती इत्यर्थः तस्मात् कामात् य उद्धर्मदात् तापस्तस्माद्भयेन आत्ता गृही

Digitized by Google

तदुरुतापभयात्तन्मृणालिका-
मयमियं भुजगास्त्रमिवादित ॥ ४० ॥
न्यधित तद्धृदि शल्यमिव द्वयं
विरहिताञ्च तथापि च जीवितं ।
किमथ तत्र निहत्य निखातवा-
न्रतिपतिः स्तनबिल्वयुगेन तत् ॥ ४१ ॥

सा या मृणालिका बिसानि तन्मयं भुजगास्त्रं सर्पास्त्रमिव आदित गृहीतवती वायव्यास्त्रं हि भुजगास्त्रेण निवार्य्यते मलयानिले वहति सति तस्योद्दीपकत्वात् संजाततापवाउल्यनिवारणाय तया मृणालानि धृतानीत्यर्थः। प्रतियतीति प्रतिपूर्व्वादिण्धातोः शतृः। रवेर्र्चिश्च शस्त्रञ्च वह्निज्वाला च हेतय इत्यमरः ॥ ४० ॥

न्यधितेति ॥ रतिपतिः कामस्तद्धृदि भैमीहृदये विरहितां वियोगित्वं तथापि वियोगित्वे सत्यपि तथापि तथैव तत्प्रकारेणैव वा जीवितञ्च जीवनञ्च द्वयं शल्यमिव शङ्कुद्वयमिव न्यधित आरोपितवान् विरहस्यातिदुःसहत्वात् तदनुभवप्रधानहेतोर्जीवितस्य चाप्रार्थ्यत्वात् शल्यसाम्यं अथ हृदयोपरि शङ्कुद्वयस्थापनानन्तरं तत् शङ्कुद्वयं स्तनावेव बिल्वयुगं लोहमयबिल्वयुग्मं तेन हत्वा निहत्य निःशेषेण आहत्य तत्र हृदये किं निखातवान् शैथिल्यनिरासाय गाढं प्रवेशितवान् विरहवशात्तस्या जीवनं दुःखेन धार्य्यं जातमिति भावः अन्योऽपि कश्चित् स्थपतिः कुत्रचित् शङ्कुमारोप्य शैथिल्यनिरासाय तदुपरि लोहमयबिल्वं संस्थाप्य मुद्गरेणाहत्य गाढं प्रवेशयति किं वितर्के स्तनयोरत्यन्तकाठिन्यादेवं वितर्कः चद्वयं समुच्चये ॥ ४१ ॥

Digitized by Google

अतिशरव्ययता मदनेन तां
निखिलपुष्पमयस्वशरव्ययात् ।
स्फुटमकारि फलान्यपि मुञ्चता
तदुरसि स्तनतालयुगार्पणा ॥ ४२ ॥
अथ मुहुर्बहुनिन्दितचन्द्रया
स्तुतविधुन्तुदया च तया पुनः ।

अतीति ॥ स्फुटमुत्प्रेक्षे तां भैमीं अतिशरव्ययता अतिवह्वीं शरव्यां वेध्यां कुर्वता मदनेन कामेन अत एव निखिलानां सर्वेषां पुष्पमयाणां स्वशराणां निजवाणानां व्ययात् नाशात् तां प्रति फलान्यपि मुञ्चता पुष्पाणां सकलकुसुमव्ययात् तत्स्थानिहितफलान्यपि प्रक्षिपता सता तदुरसि तस्या भैम्या वक्षसि स्तनावेव तालयुगं ताल फलद्वयं तस्यार्पणा आरोपणं अकारि कृता नेदं स्तनद्वयं किन्तु कामेनारोपितं तालफलद्वयमिति स्तनयोः पीनत्वादियमुत्प्रेक्षा अन्योऽपि धानुष्को वाणव्ययेन सम्मुखवर्त्तिलोष्टादिनापि वैरिणं हन्ति । अतिशरव्ययतेति नामस्वात्करोत्यादावित्यादिना णिङ् ततः शतः । लक्षं लक्ष्यं शरव्यमित्यमरः ॥ ४२ ॥

एवं विरहप्रकारमुक्त्वा संप्रति तत्समयोपयुक्तं सखीं प्रति तस्या वचनोपक्रममाह ॥ अथेति ॥ अथानन्तरं स्मरतापमये गदे काम जनितसन्तापरूपे रोगे पतितया निमग्नया अतएव मुहुर्वारं वारं बहु सातिशयं यथा तथा निन्दितो विरहिपीडकश्चन्द्रो यया तादृश्या तथा पुनःस्तुतः प्रशंसितो विधुन्तुदो विरहिणश्चन्द्र पीडको राहुर्यया तथाभूतया च तया दमयन्त्या अश्रुविमिश्रं

Digitized by Google

पतितया स्मरतापमये गदे
निजगदेऽश्रुविमिश्रमुखी सखी ॥ ४२ ॥
नरसुराब्जभुवामिव यावता
भवति यस्य युगं यदनेहसा ।

सन्तापदर्शनेन रोदनान्नयनजलव्याप्तं मुखं यस्यास्तादृशी सखी निजगदे वक्ष्यमाणमुक्ता अन्योऽपि रोगी असाधुं निन्दति साधुश्च स्तौति विधुन्तुद इति युक्तं पदं विधुं तुदतीति व्युत्पत्तेः तुदोविधुतिलात्व इति खः । तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुन्तुद इत्यमरः ॥ ४२ ॥

श्लोकद्वयेन विरहस्यातिदुःसहत्वमाह ॥ नरेति ॥ हे सखि नरसुराब्जभुवां नराणां मनुष्याणां सुराणां देवानां अब्जभुवो ब्रह्मणश्च मध्ये यस्य यावता यत्परिमाणेन अनेहसा कालेन यत् युगं भवति तद्वत् विरहिणामपि वियोगिस्त्रीपुंससम्बन्ध्यपि तत् युगं रतवन्तो रतियुक्ता ये युवानो युवतयो युवानश्च तेषां यः क्षणस्तेन मितं परिमितं सत् गणितागमे ज्योतिःशास्त्रे कथं किमिति न भवति यथा ब्रह्मणः कतिचित्कल्पपरिमितं देवानां युगं एवं देवानां कतिचिद्वत्सरपरिमितं मनुष्याणां युगं गणितशास्त्रे उक्तं तथा सम्भोगिनां क्षणेन परिमितं विरहिणां युगं कथं किमिति नोक्तमित्यर्थः सुखिभिर्यावान् कालः क्षणत्वेन ज्ञायते तावान् कालो दुःखिभिर्युगत्वेन ज्ञायते दुःखदत्वेनानुभूयमानतया गणयितुमिष्टत्वात् । यथा

विरहिणामपि तद्गतवत्युव
क्षणमितं न कथं गणितागमे॥४४॥
जनुरधत्त सती स्मरतापिता
हिमवतो न तु तन्महिमादृता।
ज्वलति भालतले लिखितः सती
विरह एव हरस्य न लोचनं॥४५॥
दहनजा न पृथुर्दवथुव्यथा
विरहजैव पृथुर्यदि नेदृशं।

सम्भोगिनां कालः शीघ्रं याति तथा विरहिणामपि शीघ्रं यात्विति भावः॥४४॥

जनुरिति॥ सती दाक्षायणी स्मरतापिता सती हिमवतो हिमालयात् जनुर्जन्म अधत्त गृहीतवती न तु न पुनस्तस्य हिमालयस्य महिम्नि देवतत्वयोऽयमिति महत्त्वे आदृता जातादरा सती जनुरधत्त तस्य हिममयत्वादेव कामतापोपशमनार्थं तया जन्मात्रो कृतं न तु देवत्वादिति भावः। तथा हरस्य शिवस्य भालतले ललाटे विधात्रा लिखितः सतीविरह एव मूर्त्तिमान् ज्वलति न लोचनं तृतीयनयनं न ज्वलति शिवमौर्य्यौरप्येतादृशी विरहज्वाला का कथा मादृशामिति भावः। सती पुनः कात्यायन्यां च साध्व्यामिति हेमचन्द्रः॥४५॥

दहनजेति॥ दहनजा वह्निजनिता दवथुव्यथा तापपीडा न पृथुर्न गुर्वी किन्तु विरहजैव वियोगजनितैव दवथुव्यथा पृथुः अत्यन्तमसह्येत्यर्थः यदि नेदृशं यदीदं न स्यात्तर्हि स्त्रियः साध्व्योऽग्निं

Digitized by Google

दहनमाशु विशन्ति कथं स्त्रियः
प्रियमपासुमुपासितुमुत्सुकाः ॥ ४६ ॥
हृदि लुठन्ति कला नितरामम्
र्विरहिणीवधपङ्ककलङ्किताः ।
कुमुदसख्यकृतस्तु बहिष्कृताः
सखि विलोकय दुर्विनयं विधोः ॥ ४७ ॥
अयि विधुं परिपृच्छ गुरोः कुतः
स्फुटमशिक्ष्यत दाहवदान्यता ।

कथं उत्सुका उत्कण्ठिताः सत्यः अपगताः असवः प्राणा यस्य तादृशं मृतं प्रियं स्वामिनं उपासितुं सेवितुं आशु शीघ्रं विलम्बमकृत्वैव दहनं वह्निं विशन्ति विरहव्यथाया असह्यत्वं विविच्य दहनव्यथा मङ्गीकुर्वन्ति तस्माद्वह्निव्यथातोऽतिदुःसहा विरहव्यथेति सिद्धमिति भावः ॥ ४६ ॥

अथ सप्तविंशतिश्लोकैश्चन्द्रमाक्षिपति ॥ हृदीति ॥ हे सखि विधोः चन्द्रस्य दुर्विनयं अविनीतत्वं विलोकय पश्य दुर्विनयमाह विरहिणीनां वधेन यत्पङ्कं पापं तेन कलङ्किता जातकलङ्काः अमूर्दृश्यमानाः कला नितरामत्यर्थं हृदि लुठन्ति क्रीडन्ति तु पुनः कुमुदैः सार्द्धं यत् सख्यं प्रकाशकत्वात् मैत्री तत्कुर्वन्तीति तादृश्यः कला बहिष्कृता दूरतः परित्यक्ताः पापिनां रक्षणं परोपकारकाणाच परित्यागो महान् दुर्विनयः । अन्यो यः पुमान् पापी पापमित्र मरः ॥ ४७ ॥

अयीति ॥ अयि हे सखि विधुं चन्द्रं परिपृच्छ विधुं प्रति प्रश्नं कुरु

Digitized by Google

स्नपितशम्भुगलाद्गरलात्त्वया
किमुदधौ जड वा वडवानलात् ॥ ४८ ॥
अयमयोगिवधूबधपातकै-
र्भ्रमिमवाप्य दिवः खलु पात्यते ।

किं एष्वामीत्याह हे विधो त्वया ध्रुवः कस्माद्गुरोरुपदेशकात् दाह वदान्यता दाहदातृत्वं स्फुटं शुद्धं यथा तथा अभ्यस्त अभ्यस्ता हे जड अनुचिताभ्यासकारिन् मन्दबुद्धे स्नपितोऽम्भसि गमितो मलिनीकृतः शम्भुगलः शिवस्य कण्ठोऽयेन ताद्दशात् गरलात् काल कूटात् किं अभ्यस्त किं वा उदधौ समुद्रे वडवानलात् वाडवाग्ने रभ्यस्त हरमस्तके स्थितत्वात् तत्कण्ठदेशस्थगरलात् किमिद मभ्यस्तं किं वा समुद्रे जातत्वात् तत्रत्यवडवानलादभ्यस्तं अन्यस्माद्गुरो रीदृग्दाहाभ्यासासम्भवादित्यर्थः अतितीव्रदाहकत्वादीदृशोऽवितर्कः केचित्तु उदधावित्युभयत्र योजयन्ति । स्युर्वदान्यस्थूललक्ष्यदानशौण्डा बहुप्रदे इत्यमरः ॥ ४८ ॥

अयमिति ॥ हे सखि खलूत्प्रेक्षे अयोगिन्यो विरहिण्यो या वध्व स्तासां बधेन मारणेन जनितैः पातकैः पापैः कर्तृभिः अयं चन्द्रः भ्रमिं भ्रमणं अवाप्य प्राप्य दिवः स्वर्गात् क्षितिनिपातादृषदि कृष्ण रात्रिलक्षणायां शिलायां पात्यते प्रक्षिप्यते कुतस्तवेयं सम्भाव नेति विशेषणेनोपपादयति किम्भूतः स्फुटन्तः शिलायां पातनादेव विदीर्य्यमाणा उत्पतन्त उड्डीयन्तश्च ये कपालखण्डास्तेषां गणेन समूहेन अधिकं सातिशयं यथा तथा तारकितं जाततारकं अम्बर मालम्ब्य यस्मात्ताद्दशः शुक्लपक्षे परिपूर्णत्वाच्चन्द्रेण विरहिण्यः

Digitized by Google

शितिनिशादृषदि स्फुटमुत्पतन्
कणगणाधिकतारकिताम्बरः ॥४९॥

त्वमभिधेहि विधुं सखि मद्गिरा
किमिदमीदृगधिक्रियते त्वया।
न गणितं यदि जन्म पयोनिधौ
हरशिरःस्थितिभूरपि विस्मृता॥ ५०॥

पीड्यन्ते तारकाश्च परिभूयन्ते छायापक्षे चन्द्रतिरोधानात् विरहिणीनां तादृशपीडा न भवति तारकाश्च स्फुटतरा भवन्ति मलय वृष्टिं वा अपि स्वभावं न त्यजन्तीत्युत्प्रेक्षा अन्योऽपि पातकी पातकं भ्रामयित्वा स्वर्गात् शिलायां पात्यते कणशश्चौर्णं गच्छन्ति॥ ४९ ॥

त्वमिति॥ हे सखि त्वं मद्गिरा मम वचसा विधुं चन्द्रं अभिधेहि कथय किमभिधास्यामीत्याह हे चन्द्र त्वया ईदृक् एवंविधं इदं विरहिवधलक्षणं कर्म किं कथं अधिक्रियते अङ्गीक्रियते विशिष्टेन त्वया इदं कर्तुं न युज्यत इत्यर्थः यदि पयोनिधौ रत्नाकरे जन्म उत्पत्तिर्न गणितं न विचारितं तर्हि हरस्य शिवस्य शिरोमस्तकरूपा स्थितिभूरपि वसतिस्थानमपि उत्तमसंसर्ग इत्यर्थः विस्मृता न स्मृतिविषयीकृता यद्यपि जना बाल्यावस्थापरिचितस्य जन्मस्थानस्य गुणं विस्मरन्ति तथापि शिष्टसमाजवासगुणं स्मरन्त्येव तस्य ज्ञानावस्थापरिचितत्वात् त्वया तु तदुभयमपि परित्यक्तमिति भावः।
॥ ५० ॥

Digitized by Google

निपततापि न मन्दरभूभृता
त्वमुदधौ शशलाञ्छन चूर्णितः।
अपि मुनेर्जठरार्च्चिषि जीर्णतां
बत गतोऽसि न पीतपयोनिधेः॥ ५१ ॥
किमसुभिर्गलितैर्जड मन्यसे
मयि निमज्जतु भीमसुतामनः।

निपततेति॥ हे शशलाञ्छन कलङ्किन् चन्द्र उदधौ समुद्रे निपतता पि विलोडयतापि मन्दरभूभृता मन्दरपर्वतेन तत्र स्थितस्त्वं न चूर्णितः न चूर्णीकृतः तथा पीतः पयोनिधिः समुद्रो येन तादृशस्य मुनेरगस्त्यस्य जठरार्चिष्यपि उदराग्निज्वालायामपि जीर्णतां नाशं न गतोऽसि न प्राप्तोऽसि बतेत्युभयत्रापि खेदे अस्माकं दौर्भाग्येणैव तव ताभ्यामपि विनाशकारकाभ्यां विनाशो न जातइति भावः ॥ ५१ ॥

किमसुभिरिति॥ हे जड हे मूर्ख चन्द्र गलितैर्गतैरसुभिः प्राणैर्हेतुभिः भीमसुताया दमयन्त्या मनो मयि निमज्जतु निलीयतां मम चन्द्रे निलीयते इतिश्रुतेः इति किं मन्यसे मनसि निश्चिनोषि प्राणेषु गतेषु दमयन्त्या मनो मयि निलीनं भविष्यतीत्येवं मनसि निश्चयं माकार्षीरित्यर्थः श्रुतिप्रतिपाद्यं न मन्यसे कथमित्याह किंच यस्मात् विबुधो देवः स्मरः अथ च पण्डितो वेदव्याख्यानकर्त्ता तदर्थिका मृतानां चन्द्रे मनोलीयते इत्येतत्प्रतिपादिका श्रुतिं नतमुखेन्दुपरां नतवदनरूपचन्द्रविषयिकां मम प्राह कथयति साभा

मम किल श्रुतिमाह तदर्थिकां
नलमुखेन्दुपरां विबुधः स्मरः ॥ ५२ ॥
मुखरय स्वयशोनवडिण्डिमं
जलनिधेः कुलमुज्ज्वलयाधुना।
अपि गृहाण वधूवधपौरुषं
हरिणलाञ्छन मुञ्च कदर्थनां ॥ ५३ ॥

कापि श्रुतिर्विशेषपरतया पण्डितेन कामेन व्याख्याता अतएव तादृशममुष्या वास्तविकमर्थमविचार्य केवलं यथाश्रुतार्थमादाय विवदमानस्य मतमेव युक्तमिति तथा सम्बोधनं कृतं अतिपीडायां कृतायामपि अहं न त्वदधीना भविष्यामि किन्तु नलाधीनैव भविष्यामीति भावः। स्मरः स्मृतौ स्मरः कामे वेदव्याख्यातरि स्मर इति वचः ॥ ५२ ॥

मुखरयेति ॥ हे हरिणलाञ्छन मृगाङ्क त्वमधुना इदानीं स्वयशसो निजकीर्त्तेर्नवं नूतनं डिण्डिमं वाद्यविशेषं मुखरय अतितरां वादय मादृशीस्त्रीवधरूपवैरप्रकटनेन जगति महतीं कीर्त्तिं विस्तारयेत्यर्थः तथा स्वपितुर्जलनिधेः समुद्रस्य कुलं उज्ज्वलय उद्दीपय एतादृशमनपराधजनपीडनजनितपुण्यवता पुत्रेण त्वया पितुः कुलमुज्ज्वलं क्रियतामित्यर्थः वधूनां स्त्रीणां वधे मारणे पौरुषमपि प्रकाशय लोकमुखेनोक्तिरियं महद्येन तव अकीर्त्तिः कुलनिन्दा अपौरुषं च भविष्यतीति भावः अतएव कदर्थनां यातनादानं मुञ्च त्यज। वाद्यप्रभेदा डमरुमड्डुडिण्डिमझर्झरा इत्यमरः ॥ ५३ ॥

Digitized by Google

निशि शशिन् भज कैतवभानुता
मसति भास्वति तापय पाप मां।
अहमहन्यवलोकयितास्मि ते
पुनरहर्पतिनिर्धुतदर्पतां ॥५४॥
शशकलङ्क भयङ्कर मादृशां
ज्वलसि यन्निशि भूतपतिं श्रितः।

निशीति॥ हे शशिन् शशकलङ्किन् चन्द्र निशि रात्रौ कैतवेन छलेन भानुता सूर्य्यत्वं भज प्राप्नुहि तद्दाहकत्वात् तथा हे पाप दुरात्मन् असति अविद्यमाने भास्वति मां तापय ज्वलय अहनि दिवसे पुनस्त्वं तव अहर्पतिना सूर्य्येण निर्धुतो निराकृतो दर्पो गर्वो यस्य तस्य भावं अहं अवलोकयितास्मि द्रक्ष्यामि असति भास्वतीति उभयत्र वा योजनीयं रात्रावविद्यमाने सूर्य्ये तदीयदाहकतामवलम्ब्य मयि यथेच्छं तापादिकं कुरु इदानीं न किञ्चिदपि वदामि किन्तु दिवसे सूर्य्यप्रकाशात्तवैवाहङ्कारात्म्यं न स्थास्यतीति लौकिकोक्तिः लोके हि भाविदुःखोद्घाटनेन शत्रुं भापयति। अवलोकयितास्मीति लुट्उत्तमपुरुषैकवचनं ॥५४॥

शशकलङ्केति॥ हे शशकलङ्क शशाङ्क हे मादृशां विरहिणीनां भयङ्कर सन्त्रासजनक निशि रात्रौ भूतानां पृथिव्यादीनां पतिं विभुत्वात् श्रेष्ठं आकाशं शिवः आश्रितः सन् यत् ज्वलसि अन्तर्भाविण्यर्थत्वाद्विरहिजनान् ज्वलयसीत्यर्थः तत्तस्मात् अमृतस्य पीयूषमयस्य तव इदंरूपभूतता एतादृग्रूपता विरहिजनदाहकस्वरूपतेत्यर्थः अद्भुतकरी चमत्कारजनिका किम्भूता परस्य मूर्द्धानं मस्तकं

Digitized by Google

तदन्तकस्य तवेदृग्भूतता
ऽद्भुतकरी परमूर्द्धविधूनती ॥ ५५ ॥
श्रवणपूरतमालदलाङ्कुरं
शशिकुरङ्गमुखे सखि निक्षिप ।
किमपि तुन्दिलितः स्थगयत्यमुं
स यदि तेन समुच्छसिमि क्षणं ॥ ५६ ॥

विधूनयति कम्पयतीति तादृशी अन्तकस्य दारकत्वमाश्चर्य्यमेवेत्यर्थः दग्धस्यापि पीडातिशयात्मूर्द्धा कम्पते अद्य च भूतपतिं पिशाचाध्यक्षं आश्रितः सन् राज्ञो यत् ज्वलसि ज्वलद्रूपो भवसि तस्मात् अन्तकस्य जीवतएव तव परमूर्द्धविधूननी ईदृग्भूतता एता दृक्पिशाचता अद्भुतकरी आश्चर्य्यजनिका सत्यमेव भूतत्वं मृतं न तु जीवतस्तव तु जीवतोऽपि तद्भूतत्वमत्याश्चर्य्यं पिशाचोऽपि यमाद्बिभेति तस्य मूर्द्धा कम्पते ॥ ५५ ॥

श्रवणेति । हे सखि त्वं श्रवणपूरः कर्णपूरीकृतो यस्तमालदला ङ्कुरस्तमालदलपत्राङ्कुरस्तं शशिकुरङ्गमुखे चन्द्रहरिणस्य मुखे निक्षिप अर्पय किमर्थं तत्राह स कुरङ्गस्तेन तमालपत्राङ्कुरेण तुन्दिलितः स्थूलीकृतः सन् यदि किमपि स्वल्पमपि अमुं चन्द्रं स्थगयति आच्छादयेत्तर्हि क्षणं अल्पकालमपि समुच्छसिमि जीवामि तमालपत्राङ्कुरभोजनपुष्टेन हरिणेन यदि चन्द्रस्तिरोहितः स्यात्तदा तद्दर्शनाभावात् क्षणमात्रमपि जीवेयमित्यर्थः । स्थगयति उच्छसिमीति प्राशंसायां लट् तुन्दिलित इति तुन्दिलः स्त्र इति नाम इत्यादि ना सिद्ध ॥ ५६ ॥

Digitized by Google

असमये मतिरुन्मिषति ध्रुवं
करगतैव गता यदियं कुहूः ।
पुनरुपैति निरुध्य निवास्यते
सखि मुखं न विधोः पुनरीक्ष्यते ॥ ५७ ॥
अपि ममैष चकोरशिशुर्मुने
र्व्रजति सिन्धुपिबस्य न शिष्यतां ।

असमयइति । ध्रुवं निश्चितं मतिर्बुद्धिः असमये अकालएव उन्मिषति स्फुरति यस्मात् इयं कुहूरमावास्या करगतैव हस्तगतैव हस्तप्राप्तैव गता अचिरमेव गतेत्यर्थः यदि समये मतिस्फूर्त्तिर्भवेत्तर्हि तदैव कुहूर्निरुद्धा भवेत् येन दुरात्मनश्चन्द्रस्य दर्शनं न भवेदित्यर्थः पुनरागमने पराम्टश्यति सा कुहूर्यदि पुनरुपैति आगमिष्यति तर्हि निरुध्य निरोधं कृत्वा त्वया इतः कदापि न गन्तव्यमिति बलात्कृत्येत्यर्थः निवास्यते स्थापयिष्यते हे सखि न पुनर्विधोश्चन्द्रस्य मुखं ईक्ष्यते अक्ष्यते अमावास्यायां तद्दर्शनासम्भवात् । उपैति निवास्यते ईक्ष्यत इति वर्त्तमानसामीप्ये लट् ॥ ५७ ॥

अपीति ॥ हे सखि मम एष चकोरस्य पक्षिविशेषस्य शिशुर्बालः सिन्धुपिबस्य जलधिपानकर्त्तुर्मुनेरगस्त्यस्य शिष्यतां छात्रतां न व्रजति न गच्छेत् एतत् पृच्छामीति शेषः अपि सम्भावानायां किमेतादृक् सम्भावनायाः फलमित्याह अब्धिं समुद्रं अपितुं पातुं अधीतवतो ऽध्ययनं कुर्व्वतः समुद्रपानसमर्थस्येत्यर्थः पिबतश्चन्द्रकरपानं कुर्व्वतोऽस्य चकोरशिशोः शशिकराश्चन्द्रकिरणाः कतिशीकरा वा कियद्विन्दवोवा भविष्यन्ति अपि तु स्वल्पा एव भविष्यन्ति यस्य समुद्र

Digitized by Google

अमितमब्धिमधीतवतोऽस्य वा
शमिकराः पिबतः कति शीकराः ॥ ५८ ॥
कुरु करे गुरुमेकमयोघनं
बहिरितो मुकुरञ्च कुरुष्व मे ।
विशति तत्र यदैव विधुस्तदा
सखि सुखादहितं जहि तं द्रुतं ॥ ५९ ॥
उदर एव धृतः किमुदन्वता
न विषमो वडवानलवद्विधुः ।

पानसामर्थ्ये यस्य चन्द्रकिरणपानं सुकरमित्यर्थः एवं सति कदापि चन्द्रदर्शनं न स्यादिति भावः । सिन्धुपिबस्येति प्रमादेर्वोध्येव इति पिबतेः शक् सिन्धोः पिबः सिन्धुपिब इति षष्ठीतत्पुरुषः ॥ ५८ ॥

कुर्विति ॥ हे सखि एकं गुरुं महान्तं अयोघनं लोहमुद्गरं करे हस्ते कुरु स्थापय एवं इतो गृहात् मे मम मुकुरञ्च दर्पणञ्च बहिः कुरुष्व बहिः स्थापय एवंकरणे किं प्रयोजनमित्याह यत्र मुकुरे विधुश्चन्द्रो यदैव यस्मिन्नेव क्षणे विशति तदा तस्मिन् क्षणे सुखा दनायासेन तं अहितं शत्रुं चन्द्रं द्रुतं शीघ्रं जहि चूर्णीकुरु तेन मम पीडाशान्तिर्भविष्यतीति भावः । दर्पणे मुकुरादर्शौ इत्यमरः ॥ ५९ ॥

उदर इति ॥ उदन्वता समुद्रेण विषमोऽतिदुःसहो यतः विषेण मीयते उपमीयतेऽसाविति तादृशो विधुश्चन्द्रो वडवानलवत् वाडवा ग्निवत् उदरएव अभ्यन्तरएव किं किमिति न धृतः न स्थापितः यथा लोकानां सन्तापकारी वडवानलः समुद्रेण दयां प्रकाश्य निजा

Digitized by Google

विषवदुज्झितमप्यमुना न स
स्मरहरः किममुं बुभुजे विभुः ॥ ६० ॥
असितमेकसुराशितमप्यभू
न पुनरेष विधुर्विषदं विषं ।
अपि निपीय सुरैर्जनितक्षयं
स्वयमुदेति पुनर्नवमार्णवं ॥ ६१ ॥

अन्वरस्व स्थापितस्त्रथायमपि विरहितापकः किमिति तत्र न स्थापि तइत्यर्थः किञ्च विभुः प्रभुः लोकोपकरणसमर्थ इत्यर्थः स्मरहरः विरहिजनुकन्दर्पविनाशकः शिवः अमुना उदन्वता उज्झितमपि त्यक्त मपि अमुं विधुं विषवत् गरलवत् किं कथं न बुभुजे न भक्षितवान् यथा समुद्रेण त्यक्तमपि लोकानां विनाशकं मत्वा गरलं शिवो दयां प्रकाश्य भुक्तवान् तथामुमपि किमिति न भुक्तवानित्युभयत्रापि व्यतिरेकेण दृष्टान्तः तथा सत्यस्माकमेतादृक् दुःखं न स्यादिति भावः ॥ ६० ॥

असितमिति ॥ एकेन न तु बहुभिः सुरेण देवेन शिवेन अशितमपि भुक्तमपि असितं कृष्णं आर्णवं सामुद्रं विषं कालकूटाख्यं न पुनरभूत् पुनर्नोत्पन्नं किन्तु एष विधुरेतच्चन्द्रलक्षणं विषदं शुभ्रं आर्णवं विषं सुरैः सर्वैर्देवैर्न स्वेकेन ताभ्यां वा निपीय निःशेषेण पीत्वा जनित उत्पादितः क्षयो विनाशो यस्य तथाभूतमपि पुनर्नवं नवीनं सत् स्वयमुदेति उदयभाग्भवति चन्द्रलक्षणविषस्याश्चर्य्यमेवेदं सामर्थ्य मित्यर्थः । आर्णवमित्युभयत्रापि सम्बध्यते ॥ ६१ ॥

Digitized by Google

विरहिवर्गवधव्यसनाकुलं
कलय पापमशेषकलं विधुं ।
सुरनिपीतसुधाकमपापकं
ग्रहविदो विपरीतकथाः कथं॥ ६२ ॥
विरहिभिर्बहुमानमवापि यः
स बहुलः खलु पक्ष इहाजनि ।

विरहीति ॥ हे सखि विरहिणां वियोगिस्त्रीपुंसानां वर्गस्य समूहस्य वधो मारणरूपं यद्व्यसनं अशुभकर्म्म तत्राकुलं आसक्तं अशेषकलं संपूर्णमण्डलं विधुं चन्द्रं पापं न तु शुभं कलय जानीहि अकारणविरहिजनमारणेन पापित्वात् । सुरैर्देवैर्निपीता सुधा अमृतं यस्य तादृशं क्षीणमित्यर्थः विधुं अपापकं पापशून्यं शुभमित्यर्थः कलय विरहिमारणरूपपापकर्म्मणोविरतत्वादपापकत्वं ग्रहविदो ज्योतिर्वेत्तारोऽत्र विपरीता अन्यथाभूता कथा येषां तादृशाः कथं विपरीतं कथयन्तीति तादृशा वा ते हि पूर्णचन्द्रं शुभग्रहं क्षीणचन्द्रं पापग्रहं वदन्ति तथा च वराहमिहिरः। क्षीणेन्द्वर्कयमाररांहुशिखिनः पापाबुधस्तैर्युत इति । विरहिवर्गवधजन्यं यद्व्यसनं पापं तेनाकुलं युक्तं अतएव पापं पापिनं कलयेति वा संपूर्णचन्द्रमण्डलस्यैवोद्दीपकत्वादेवमुक्तं । व्यसनं त्वशुभे सक्तौ पान स्त्रीमृगयादिषु । दैवानिष्टफले पापे विपत्तौ निष्फलोद्यम इति मेदिनी॥ ६२ ॥

विरहिभिरिति ॥ खलूत्प्रेक्षे यः पक्षोविरहिभिर्वियोगिभिर्बहु सातिशयं मानं सम्मानं अवापि प्रापितः तत्र चन्द्रस्य क्षीणत्वात्

Digitized by Google

तदमितिः सकलैरपि यत्र तै
र्व्यरचि सा च तिथिः किममीकृता ॥ ६३ ॥
स्वरिपुतीक्ष्णसुदर्शनविभ्रमात्
किमु विधुं ग्रसते स विधुन्तुदः।

स पक्षः कृष्णपक्ष इह लोके बहुलोऽपि बहुलैरिति नामा ख्यातः विरहिभ्यो बहुमानग्राहित्वात् बहु अर्थान्मानं लाति आदत्ते इति व्युत्पत्त्या बहुलेति यौगिकं कृष्णपक्षस्य नाम ख्यातमित्यर्थः यत्र यस्यां तिथौ सकलैरपि समस्तैरपि तैर्विरहिभिस्तस्य बहुमानस्य अमितिरपरिमितता यदपि रचिता किमुत्प्रेक्षे सा च सैव तिथिरमावास्या अमीकृता अमेतिसंज्ञीकृता पण्डितैरिति शेषः अमावास्यायां चन्द्रस्यात्यन्तादर्शनात्। विरहिणां कृष्णपक्षः सुखदस्तत्राप्यतिशयेनामावास्या तथेति भावः। अमावास्या त्वमावस्या तथैवामावसीति च। अमावासी च दर्शः स्यादमा सूर्येन्दुसङ्गम इति शब्दरत्नावली। बहुलः कृष्णपक्षेऽमाविति शब्दार्णवः ॥६३॥

स्वरिपुरिति ॥ स प्रसिद्धोविधुन्तुदोराहुः स्वरिपोर्निजशत्रोर्नारायणस्य यत्तीक्ष्णं शितधारः सुदर्शनचक्रं तस्य विभ्रमात् वर्तुलत्वसाम्येन भ्रान्त्या विधुं चन्द्रं ग्रसते कवलयति किम्वित्युत्प्रेक्षे अन्यथा यदि चन्द्रबुद्ध्या ग्रसेत् तदा वदने मुखे निपतितं निजं स्वीय भक्षणीयं वलये पूजायै करम्भो दधिमिश्रितशक्तावक्त्रनिभं तत्सदृशं विधुं कथमुज्झति त्यजेत् चन्द्रत्वप्रकारकबुद्ध्या ग्रासे तु नैव त्यजेदित्यर्थः पूर्वानुभूतपराक्रमात् भगवत्सुदर्शनात् पुनर्वदनभेदशङ्कया चन्द्रस्य परित्यागः कृत इति भावः। करम्भं राहवे दद्या

Digitized by Google

निपतितं वदने कथमन्यथा
बलिकरम्बनिभं निजमुज्झति ॥ ६४॥
वदनगर्भगतं न निजेच्छया
शशिनमुज्झति राहुरसंशयं।
अशित एव गलत्ययमत्ययं
सखि विना गलनालविलाध्वना ॥ ६५॥
ऋजुदृशः कथयन्ति पुराविदो
मधुभिदं किल राहुशिरश्छिदं ।

दिति ज्योतिषं। बलिः पूजोपहारयोरिति विश्वः करम्भोदधिशक्तव इत्यमरः॥ ६४॥

वदनेति॥ हे सखि राहुः वदनगर्भगतं मुखमध्यमाप्तं शशिनं चन्द्रं असंशयं निःसन्देहं निजेच्छया स्वेच्छया न उज्झति न त्यजति किन्तु राहुणा अशित एव भक्षित एव अयं शशी अत्ययं नाशं विना गलस्य कण्ठस्य यन्नालविलं नाडीरन्ध्रं तद्रूपो योऽध्वा पन्था स्तेन करणेन गलति निःसरति राहोश्छिन्नमस्तकस्वरूपत्वेन उदराग्नेरभावाभाशाभावः॥ ६५॥

ऋजुदृश इति॥ ऋजुदृशो यथादृष्टयाथार्थ्याः पुराविदः पुराणज्ञाः किल निश्चये प्रसिद्धौ वा मधुभिदं मधुसूदनं राहुशिरश्छिदं राहुमस्तकच्छेत्तारं कथयन्ति न तु विरहिमूर्द्धभिदं वियोगिशिरश्छिदं निगदन्ति कथयन्ति तथाविधोक्तौ हेतुमाह नु भो यदि तस्य राहो र्जठरानल उदराग्निः स्यात्तदा शशी चन्द्रः क्व कुत्र अपि तु न स्यादेव तस्योदराग्निना जीर्णीभूय विनाशमेव गच्छेदित्यर्थः राहोः शिरश्छेदादेव जठराग्नेरभावात् चन्द्रस्य विद्यमानता तथा च कश्चेन

Digitized by Google

विरचिमूर्द्धभिदं निगदन्ति न
क नु शशी यदि तज्जठरानलः ॥ ६६ ॥
स्मरसखौ रुचिभिः स्मरवैरिणा
मखमृगस्य यथा दलितं शिरः।
सपदि संदधतुर्भिषजौ दिवः
सखि तथा तमसोऽपि करोतु कः ॥ ६७ ॥

विरञ्चिशिरांसि मस्तकानि छिन्नानीति भावः। राहुशिरश्छिदमिति राहोः शिरोराहुशिरस्तच्छिनत्तीति क्विप् न चात्र दैत्यविशेषीयशिरो भागस्यैव राहुत्वादभेदे षष्ठीसमसनमनुशासनविरुद्धमिति वाच्यं राहुपदेनावयविलक्षणया दैत्यविशेषस्यैव बोधात् दार्शनिकास्तु राहोः शिरो वसन्तस्य समय इत्यादौ तादात्म्यं षष्ठ्यर्थं इति वदन्ति वस्तुतस्तु राहुरूपं शिर इति कर्मधारयेणात्र न कापि विप्रतिपत्ति रिति ध्येयं ॥ ६६ ॥

स्मरेति ॥ रुचिभिः कान्तिभिः स्मरसखौ कन्दर्पस्य सखायौ दिवः स्वर्गस्य भिषजौ चिकित्सकौ अश्विनीकुमारौ यथा स्मरवैरिणा कन्दर्पस्य शत्रुणा महादेवेन दलितं छिन्नं मख एव मृगस्तस्य मृगरूपधारिणो यज्ञस्येत्यर्थः शिरो मस्तकं सपदि तत्क्षणमेव संदधतुर्घटयामासतुः तथा तमसोऽपि राहोरपि कः करोतु तथाविधः कोऽपि नास्तीत्यर्थः यथा कामशत्रुणा छिन्नं मखमृगमस्तकं काममित्राभ्यामश्विनीकुमाराभ्यां संघटितं तथा विरञ्चिशत्रुणा विधुना छिन्नं राहुमस्तकं कः सन्दधातु विरञ्चिशत्रौ मित्राभावादितिभावः पुरा किल शिवेन छिन्नं यज्ञमृगमस्तकं दस्राभ्यां संयोजितमिति पुराणवार्ता। तमस्तु राहुः स्वर्भानुः सैंहिकेयोविधुन्तुद इत्यमरः ॥ ६७ ॥

Digitized by Google

नलविमस्तकितस्य रणे रिपो
र्मिलति किन्न कबन्धगलेन वा ।
मृतिभिया भृशमुत्पततस्तमो
ग्रहशिरस्तदहर्दृढबन्धनं ॥ ६८ ॥
सखि जरां परिपृच्छ तमःशिरः
सममसौ दधतापि कबन्धतां ।

नलेति ॥ वा अथवा रणे युद्धे नलेन विमस्तकितस्य छिन्नमस्तकी कृतस्य रिपोः शत्रोः कबन्धगलेन मस्तकशून्यक्रियायुक्तकण्ठेन सह तमोग्रहस्य राहुग्रहस्य शिरो मस्तकं किं न मिलति न संयुक्तं भवति अपि तु भवितुमर्हत्येव कथं भूमिष्ठेन कबन्धगलेन सह आकाशस्थराहुशिरसो मेलनसम्भावनेति रिपुं विशिनष्टि किंभूतस्य मृतिभिया मरणशङ्कया भृशमत्यर्थं उत्पतत ऊर्द्धं गच्छतः आयतां कथञ्चित् संयोगः कथं गाढता भवेदिति शिरो विशिनष्टि किम्भूतं तस्य कबन्धगलस्य असृजा रक्तेन दृढं गाढं बन्धनं संयोगो यस्य तादृशं तेन मेलने हि राहुवदनपतितचन्द्रो गिलितो जठरानलेन जीर्णतां गमिष्यति तेन चास्माकमेतादृक् दुःखं न भविष्यतीति भावः । विगतं मस्तकं यस्य तथाभूतः कृत इति नाम इत्यादिना णिङ् ततः कर्म्मणि क्तः । कबन्धोऽस्त्री क्रियायुक्तमपमूर्द्धकलेवरमित्यमरः ॥ ६८ ॥

सखीति ॥ हे सखि त्वं जरां जरानाम्नीं राक्षसीं इति पृच्छ असौ जरा कबन्धतां अपमूर्द्धकलेवरतां दधता धारयता केतुनापि केतुग्रहेणापि समं सह तमःशिरो राहुमस्तकं मगधराजस्य जरासन्धस्य वपुषो दलयुग्मवत् खण्डद्वयवत् किमिति कुतो हेतोर्न घटि

मगधराजवपुर्दलयुग्मवत्
किमिति न व्यतिसीव्यति केतुना ॥ ६९ ॥
वद विधुन्तुदमालि मदीरितै
स्त्यजसि किं द्विजराजधिया विधुं ।

सीव्यति न संयोजयति यथा त्वया मगधराजस्य वपुषो दलद्वय संयुक्तं यथा राहोः कथं न संयुज्यत इति त्वया जरां प्रति वक्तव्यमित्यर्थः। व्यतिसीव्यतीत्यत्र सेवनक्रिययोर्विभिन्नकर्तृकत्वात् कर्म व्यतीहारे आत्मनेपदमिति केचित् वस्तुतस्तु निर्भ्रातान्यसम्बन्धायाः क्रियायाविपर्य्ययोऽव्यत्र दर्शनं कर्म्मव्यतीहार इति गुमरनन्दुक्तेः क्रिययोर्भिन्नकर्तृकत्व एव व्यतीहारे आत्मनेपदमभवति अत्र तु द्वयोरपि सेवनयोर्जरया एव कर्तृत्वादिति ध्येयं ॥ ६९ ॥

वदेति ॥ हे आलि सखि त्वं मदीरितैर्मम वचनैर्विधुन्तुदं राहुं वद किं वक्ष्यामीत्याह हे राहो त्वं विधुं चन्द्रं द्विजराजधिया ब्राह्मणश्रेष्ठोऽयमिति मुधा किं त्यजसि उपेक्षसे चन्द्रो नाम नामैव द्विजराजो न तु ब्राह्मणश्रेष्ठत्वेन तस्मादेनं निःशङ्कं नाशये त्यर्थः। अस्य ब्राह्मणश्रेष्ठत्वाभावं प्रदर्शयति। यदि एव चन्द्र ईदृशोऽन्य तोऽपि द्विजराजः स्यात्तर्हि वारुणीं मदिरां अथ च पश्चिमां दिशं निषेव्य पीत्वा अथ च प्राप्य पतितः पातित्ययुक्तोऽपि अथ च अस्तं गतोऽपि त्रिषु दिवं स्वर्गं अथ च अन्तरीक्षं पुनरेति आगच्छति पतितस्योर्ध्वगमनस्य स्वर्गगमनानधिकारात् तस्मात् संज्ञामात्रेण द्विज

Digitized by Google

किमु दिवं पुनरेति यदीदृशः
पतित एष निषेव्य हि वारुणीं ॥ ७० ॥
दहति कण्ठमयं खलु तेन किं
गरलवह्निजवासनयोज्झितः ।
प्रकृतिरस्य विधुन्तुद दाहिका
मयि निरागसि का वद विप्रता ॥ ७१ ॥

राज्ञोऽयं हन्तव्य इत्यर्थः । वारुणी गण्डदूर्वायां प्रतीचीसुरयोरपीति मेदिनी ॥ ७० ॥

ननु वारुणीसेवनाद्ब्राह्मणत्वस्य तारतम्यमेव भवति न तु तदपगच्छतीति ब्राह्मणमात्रोऽपि न हन्तव्य इति चेत्सत्यं तत् कथमेनं हन्मीत्याशंक्याह ॥ दहतीति ॥ खलु यस्मादयं चन्द्रः कण्ठं गलं दहति ज्वलयति तेन हेतुना गरलवत् गरलेनेव तया द्विजवासनया ब्राह्मणबुद्ध्या किं गिलितोऽपि चन्द्र उज्झितस्त्यक्तः यथा निषादपुरं भक्षयता गरुडेन गिलितो निषादीसंसर्गी कश्चिद्ब्राह्मणः कण्ठं दहन् परित्यक्तस्तथा त्वयाऽपि किं कण्ठदाहकत्वाद्ब्राह्मणत्वमनुमाय चन्द्रः परित्यक्तः ब्राह्मणत्वाभावात् तदर्थमेव परित्याज्य इत्यर्थः एवं चेत् कण्ठदाहः कथमित्याह हे विधुन्तुद राहो अस्य चन्द्रस्य प्रकृतिः स्वभावो दाहिका दाहकर्त्री न तु ब्राह्मण्याद्दाहकतेत्यर्थः कथमेवं ज्ञातमित्याह यतो निरागसि निरपराधायां मयि का कीदृक् विप्रता ब्राह्मण्यं वद कथय ब्राह्मण्यमपराधकारिणमेव दहति अतोऽयं ब्राह्मणो न भवति तयाऽवश्यमेव हन्तव्य इति भावः । अथ वासनं धूपनेऽपि च । वारिधान्याय वस्त्रे च प्रत्याशाज्ञानयोः स्त्रियामिति मेदिनी ॥ ७१ ॥

Digitized by Google

सकलया कलया किल दंष्ट्रया
समवधाय यमाय विनिर्म्मितः ।
विरहिणीगणचर्व्वणसाधनं
विधुरतो द्विजराज इति स्मृतः ॥ ७२ ॥
स्मरमुखं हरनेत्रकृशानुना
ज्वलदिदं चकृषे विधिना विधुः ।

एवञ्चेत्तर्हि द्विजराजसंज्ञाऽस्य कथमित्याह ॥ सकलयेति ॥ सकलया समस्तया कलया दंष्ट्रया दन्तेन आत्माश्रयत्वादेकत्वं षोडशसंख्यककलारूपैर्दन्तैरित्यर्थः समवधाय संयोज्य विरहिणीनां गणस्य समूहस्य चर्व्वणसाधनं चर्व्वणनिष्पत्तौ कारणं विधुश्चन्द्रो यमाय यमार्थं किल यस्माद्विनिर्म्मितः अर्थात् विधात्रा अनेनैव यमो विरहिणीर्भक्षयत्विति विधात्रा रचितः अतो हेतोर्द्विजैर्दन्तैराजत इति व्युत्पत्त्या द्विजराज इति स्मृत द्विजराजसंज्ञत्वेन लोके ख्यातः न त्वसौ ब्राह्मणश्रेष्ठत्वात् द्विजराजनामेत्यर्थः इति विधुन्तुद वदेति प्राक्तन तृतीयश्लोकेनान्वयः । दन्तविप्राण्डजा द्विजा इत्यमरः ॥ ७२ ॥

स्मरमुखमिति ॥ विधिना ब्रह्मणा हरनेत्रकृशानुना हरनयनानलात् ज्वलत् दह्यमानं इदं दृश्यमानं स्मरमुखं विधुः कन्दर्पमुखं चन्द्रः चकृषे आकृष्टं नायं चन्द्रनामा कश्चिदतिरिक्तः पदार्थः किन्तु विधात्रा निजनिर्म्मितसमीचीनवस्तुक्षयव्यथाकुलितमनसा हरनयनानलादाकृष्टं दह्यमानं कन्दर्पस्य मुखमेवेत्यर्थः तर्हि अस्य कलङ्कः कथमित्याह अथानन्तरं बहुविधेन नानाप्रकारेण वियोगिवधागसा विरहिस्त्रीपुंसमारणापराधेन हेतुना ध्यममिषात् अस्य

Digitized by Google

वकुविधेन वियोगिवधागसा
ग्रहमिषाद्य कालिकयाङ्कितः ॥ ७३ ॥
इति विधोर्विविधोक्तिविगर्हणं
व्यवसितस्य वृथेति विमृश्य सा ।
अतितरां दधती विरहज्वरं
हृदयभाजमुपालभत स्मरं ॥ ७४ ॥
हृदयमाश्रयसे यदि मामकं
ज्वलयसीत्थमनङ्ग तदेव किं ।

कलङ्कच्छलात् कालिकया ग्रामिकया अङ्कितश्चिह्नितः अन्यथाप्य
पराधिनोमुखे कालिका युज्यते ॥ ७३ ॥

एवं चन्द्रं विनिन्द्य कन्दर्पं निन्दयितुमुपक्रमते ॥ इतीति ॥
अतितरामत्यर्थं विरहज्वरं सन्तापं दधती धारयन्ती सा दमयन्ती
व्यवसितस्य दूरस्थस्य विधोश्चन्द्रस्य इत्येवंप्रकारेण विविधोक्तिभि
र्नानाविधाभिः कथाभिर्विगर्हणं विशेषेण गर्हणं निन्दा वृथा
निष्फलं इति विमृश्य विचार्य्य हृदयभाजं हृदस्थितत्वादतिसन्नि
हितं स्मरं कामं उपालभत निनिन्द निन्दा हि निन्द्यमानश्रूयमा
णैव निन्दकस्य हिताय भवतीति सा दूरस्थं चन्द्रं त्यक्त्वा समीपवर्तिनं
स्मरं निन्दयितुमारब्धवतीति भावः ॥ ७४ ॥

पर्यवियतिश्लोकैः काममाक्षिपति ॥ हृदयमिति ॥ हे अनङ्ग
काम यदि मामकं मदीयं हृदयं आश्रयसे आश्रित्य तिष्ठसि तदा
तदेव आश्रयभूतं हृदयमेव इत्थमेवंप्रकारं किं किमर्थं ज्वलयसि
दहसि किमिति न ज्वलयिष्यामीत्याह हे हताश विपक्षमध्यात्

स्वयमपि श्रयदग्धनिजेन्धनः
क्व भवितासि हताश कृशाश्रवत्॥ ७५ ॥
पुरभिदा गमितस्त्वमदृश्यतां
त्रिनयनत्वपरिप्लुतिशङ्कया ।

अथालोचितभाविक्लेशः श्रयेणाल्पकालेनैव दग्धं निजेन्धनं स्वाश्रयभूतहृदयलक्षणं दारु येन तादृशः सन् त्वं कृशाश्रवत् वह्निरिव स्वयमपि क्व भवितासि कुत्र स्थास्यसि अपि तु विनङ्क्ष्यसीत्यर्थः यथा वह्निः श्रयदग्धनिजेन्धनः सन् विनश्यति तथा त्वमपि श्रयदग्धमद्धृदयलक्षणाश्रयः सन विनङ्क्ष्यसि अतोदाहमदत्त्वैव स्वाश्रयभूतं मम हृदयं रक्षेति भावः ॥ ७५ ॥

पुरभिदेति ॥ पुरभिदा महादेवेन त्रिनयनत्वस्य त्रिनेत्रत्वस्य परिप्लुतिसङ्क्रान्तिस्तस्याः शङ्कया ममासाधारणो धर्मस्त्रिनयनत्वं यदि मत्तोऽन्येषां स्यादित्येवमाशङ्कया त्वं अदृश्यतां अप्रत्यक्षविषयत्वं गमितः प्रापितः अन्यथा सशरीरस्यैव तव नयनानलेन दाहादिकं विदध्यात्तु मारणमितिभावः। कथं मयि प्रत्यक्षे सति त्रिनयनत्वस्यातिप्रसक्तिरित्याह हे स्मर त्वयि अभिगते सति अकारणपराधकारिणि त्वयि दृष्टे सति कस्य च नापि कस्यचिदपि जनस्य त्रिभिर्नयनैः किं न निरैक्ष्यत निर्गतैर्नाभविष्यत अपि तु सर्वेषामेव निरैक्ष्यत सर्वेऽपि अतिदुर्विनीतस्य तव प्रतीकाराय तपस्यादिना त्रिनयना भविष्यन्तीत्यर्थः योहि दुर्विनीतः पूर्वं केनापि येनोपायेन प्रतिकृत स्तेनैवोपायेनापरोऽपि तं प्रतिकुर्वन्ति नयनाग्निनैव शिवेनास्य प्रतिकृतत्वात्। तव दौरात्म्यं भगवता शिवेनाप्यनुभूतमिति भावः। प्राय

Digitized by Google

स्मर निरीक्ष्यत कश्चनापि न
त्वयि किमक्षिगते नयनैस्त्रिभिः ॥ ७६ ॥
सहचरोऽसि रतेरिति विश्रुति
स्त्वयि वसत्यपि मे न रतिः कुतः ।

तु लौकिकोक्तिरियमिति वदन्ति तथाच लोके हि शत्रुं प्रति जात क्रोधं जनं दृष्ट्वा असौ इमं प्रति त्रिनेत्रोजात इति वदन्ति अत्र त्रिनेत्रशब्देन कोपयुक्तत्वं लक्ष्यते तथाचापि सर्व्वेऽपि सक्रोधाभवे युरित्यर्थः हलात् सर्व्वेऽपि त्रिनेत्राभवेयुरिति। केचित्तु योऽमुं नश्यति तस्य ललाटेऽग्निर्ज्वलिष्यति ज्वालया ललाटे भिन्ने यदि अग्नि र्दृश्यतां याति तदाहमिव सोऽपि त्रिनयनः स्यात् मम ललाटचक्षु षोऽग्निरूपत्वादित्यतस्तवाद्दश्यता कर्त्तव्येत्यर्थमित्याहुः। निरैक्ष्यतेति निर् पूर्व्वादिक्षो लङ्त्त ॥ ७६ ॥

सहचरइति ॥ हे काम त्वं रतेः स्वप्रियायाः अथ च प्रीतेः सह चरोऽसि तया विना एकाकी न कुत्रापि तिष्ठसि इति विश्रुति र्विख्याता ख्यातिः रतिं विनापि त्वं तिष्ठसीत्यर्थः यतस्त्वयि वसत्यपि मयि वर्त्तमाने सत्यपि मे मम रतिः प्रीतिः कुतो न कस्मान्न जायते स्वयं रतिसहचरस्तदा त्वयि सति मम रतिरपि तिष्ठेदित्यतो विरुद्धैव सा प्रसिद्धिः अथ किम्वा संप्रति अनङ्गत्वावस्थायां वां युवयोः सङ्गतिर्नास्ति एकत्रावस्थितिर्न विद्यते किल यस्मात् इयं रति र्भवन्तं अनु लक्षीकृत्य न मृता अन्वारोहणं न चकार प्रव्रज्या

अथ न संप्रति सङ्गतिरस्ति वा
मनुमृता न भवन्तमियं किल ॥ ७७ ॥
रतिवियुक्तमनात्मपरज्ञ किं
स्वमपि मामिव तापितवानसि ।
कथमतापभृतस्तव सङ्गमा
दितरथा हृदयं मम दह्यते ॥ ७८ ॥
अनुममार न मार कथं नु सा
रतिरतिप्रथितापि पतिव्रता ।

मूलेयमुक्तिः । रतिः स्मरप्रियायाञ्च रागे च सुरते रतिरिति विश्वः ॥ ७७ ॥

रतिवियुक्तमिति ॥ हे अनात्मपरज्ञ आत्मा असन्ताप्यः परस्तु सन्ताप्य एवं न जानातीति हे तादृश वैषयिकबुद्धिशून्येत्यर्थः त्वं रतिवियुक्तां मामिव रतिवियुक्तं स्वमपि आत्मानमपि किं तापितवानसि उत्तप्तीकृतवानसि कुत एवं ज्ञातमित्याह इतरथा अन्यथा यद्यात्मानं न तापितवांस्तर्हि अतापभृतः सन्तापरहितस्य तव सङ्गमात् सम्बन्धात् मम हृदयं कथं दह्यते स्वयमेव दह्यमानं भवति दाहो हि सन्तप्तसङ्गादपि जायते परतापार्थं स्वमात्मानमपि तापितवान् अतस्त्वत्सदृशः परापकारकोऽन्यो नास्तीति भावः । दह्यत इति कर्म्मकर्त्तरि रूपं ॥ ७८ ॥

अनुममारेति ॥ नु सम्बोधने हे मार काम अतिप्रथिता अति प्रथितापि पतिव्रतात्वेनातिविख्यातापि सा तव प्रिया रतिः मृतं त्वां अनुलक्षीकृत्य कथं न ममार न म्रियते स्म पतिव्रतानां पत्यनु

विरहिणीगतघातनपातकी
दयितयापि तयासि किमुज्झितः ॥ ७९ ॥
सुगत एव विजित्य जितेन्द्रिय
स्त्वदुरुकीर्त्तितनुं यदनाशयत् ।
तव तनूमवशिष्टवतीं ततः
समिति भूतमयीमहरद्धरः ॥ ८० ॥

मरणमात्रफलं तद्वधा यस्य स तं तत्र हेतुमाह दयितयापि रतिप्रिययापि तया रत्या विरहिणीनां वियोगिस्त्रीणां घातनजात-मेव मारणेन पातकी विहितपातित्यजनकपापाश्रयस्त्वं किमुज्झि-तोऽसि परित्यक्तोऽसि किं वितर्के विहितैवंरूपपातकस्य पत्युर्दोषानि-षेधादेव स्त्रियस्तेन न सह गच्छन्ति । स्वस्त्रिया अपि परित्यक्तो-ऽसीति त्वत्तुल्योऽन्यो दुरात्मा नास्तीति भावः । मदनो मन्मथो मार इत्यमरः ॥ ७९ ॥

सुगत इति ॥ जितेन्द्रियो वशीकृतेन्द्रियः सुगत एव बुद्ध एव विजित्य पराभूय तव तां उर्व्वीं महतीं कीर्त्तिं तनुं शरीरं यदनाशयत् नाशितवान् ततो नाशानन्तरं जितेन्द्रियो हरः शिवः समिति युद्धे अवशिष्टवतीं कीर्त्तितनोरवशिष्टां भूतमयीं पाञ्चभौतिकीं तनूं शरीरं अहरत् नाशितवान् त्वं जितेन्द्रियाभ्यामभिभूतोऽसीति भावः अवशिष्टेति भावे क्तः ॥ ८० ॥

Digitized by Google

फलमलभ्यत यत् कुसुमैस्त्वया
विषमनेत्रमनङ्ग विगृह्णता ।
अहह नीतिरवाप्तभया ततो
न कुसुमैरपि विग्रहमिच्छति ॥ ८१ ॥
अपि धयन्नितरामरवत् सुधां
त्रिनयनात् कथमापिथ तां दशां ।

फलमिति ॥ हे अनङ्ग काम कुसुमैः पुष्पैः शरैः विषमनेत्रं शिवं विगृह्णता प्रहरता त्वया यत् फलं अशरीरत्वाख्यं कुफलं अलभ्यत प्राप्तं अहह विस्मये ततः फलाद्वाप्तं प्राप्तं भयं यया ताद्दृश्येव नीतिर्नीतिशास्त्रं कुसुमैरपि किं पुनरस्त्रादिभिः पुष्पैरपि विग्रहं युद्धं न इच्छति नोपदिशति । पुष्पैरपि न योद्धव्यं किं पुनर्निशितैः शरै रिति नीतिशास्त्रं अथ च युद्धं हि अङ्गसहितेन क्रियते त्वं पुनः स्वय मनङ्गः योद्धयः शिवस्तु विषमनेत्रः विषमोऽजेयोनेत्रोनायकः अत स्तथाविधेन सह विग्रहवतस्तव महन्नौर्ख्यमिति ध्वनिः । नेत्रं पथि गुणे वस्त्रभेदे मूले द्रुमस्य च । रथे चक्षुषि नयान्तु नेत्री नेतरि वाच्य वदिति मेदिनी ॥ ८१ ॥

अपीति ॥ इतरामरवत् अन्यदेव इव सुधाममृतं धयन्नपि पिबन्नपि पीतसुधोऽपि त्वं त्रिनयनान्महादेवात् कथं तां दशां अनङ्गताख्यामवस्थां आपिथ प्राप्तवानसि अमृतपानेन इन्द्रादिव दमरः कथं नाभूरित्यर्थः एवं प्रश्नपूर्वकं स्वयमप्युत्तरमुपदिशति रतेः स्वप्रियाया अधरस्य रसे आस्वादे आदरात् गाढानुरागात्

Digitized by Google

भव रतेरधरस्य रसादरा
दमृतमात्तघृणः खलु नापिवं ॥ ८२ ॥
भुवनमोहनजेन किमेनसा
तव परेत बभूव पिशाचता।
यदधुना विरहाधिमलीमसा
मभिभवन् भ्रमसि स्मर मद्विधां ॥ ८३ ॥
बत ददासि न मृत्युमपि स्मर
स्खलति ते कृपया न धनुः करात्।

आत्ता गृहीता घृणा जुगुप्सा येन् तादृशः सन् खलु प्रायेण अमृतं नापिवं न पीतवानस्मीति भव कथय ओष्ठमाधुर्य्यलम्पटेन त्वया अमरत्वसाधनं अमृतपानमप्यनङ्गीकृत्य अनङ्गत्वा प्राप्तेति भावः। आपिवेति आपोलिटभ्यस्तु ॥ ८२ ॥

भुवनेति ॥ हे परेत मृत भुवनानां जगतां मोहनाज्जातेन एन सा पापेन किं तव पिशाचता प्रेतत्वं बभूव जाता यद्यस्मात् अधुना अस्मिन् समये विरहाधिना वियोगजन्यमानसव्यथया मलीमसां मलिनां मद्विधां मादृशीं अभिभवन् पीडयन् त्वं भ्रमसि अन्योऽपि भुवनापकारजनितपातकेन पिशाचतां प्राप्य मलिनां स्त्रियं बला दभिभवति भुवनापकारी त्वन्तादृशः कोऽप्यन्योनास्तीति भावः ॥ ८३ ॥

बतेति। हे स्मर बत कष्टं त्वं कृपया कारुण्येन मृत्युमपि न ददासि मारणरूपोपकारं किन्तु झटिति मरणमपि मादृशां व

Digitized by Google

अथ मृतोऽसि मृतेन च मुच्यते
न किल मुष्टिवरीकृतबन्धनः ॥ ८४ ॥
दृगुपहत्यपमृत्युविरूपताः
शमयतेऽपरनिर्जरसेविता ।
अतिशयान्ध्यवपुःक्षतिपाण्डुताः
स्मर भवन्ति भवन्तमुपासितुः ॥ ८५ ॥

मनयसीत्यर्थः तथा ते तव करात्स्खलात् धनुरपि न स्खलति न पतति तथाचेदेवाहृशी पीडा न स्यादित्यर्थः धनुःपतनाभावे कारणमाह अथ अथवा त्वं मृतोऽसि मरणं प्राप्तोऽसि तथात्वे वा कथं धनुषः पतनाभाव इत्याह किल यस्मात् मृतेन अनेन उरोऽयमकीकृतं बन्धनं कुचनं येन तादृशोमुष्टिर्न च नैव मुच्यते त्यज्यते अतएव धनु र्न स्खलतीत्यर्थः । मुष्टिशब्दः पुंलिङ्गोऽपि ॥ ८४ ॥

दृगिति ॥ हे स्मर अपरान् त्वद्भिन्नान् निर्जरान् देवान् सेवितुं शीलं यस्य तादृशोजनः दृशोर्नयनयोरुपहतिं अन्धतां अपमृत्युं रोगादीन् विना आकस्मिकमरणं विरूपतां कुष्ठादिना शरीर वैरूप्यं शमयते नाशयति परन्तु भवन्तं उपासितुः सेवितुर्जनस्य अतिशयेनान्ध्यं प्रतिपत्तिराहित्यं नेत्रराहित्यञ्च वपुःक्षतिः शरीर कार्श्यं आकस्मिकमरणञ्च पाण्डुता पाण्डुरोगश्च एता भवन्ति इतर देवोपासकानामनर्था नैवोत्पद्यन्ते उत्पन्नाश्च विनश्यन्ति तवोपासक स्य तु दूरे विफलनर्थनिवारणं किन्तु उपासनायामाहात्म्यादनर्थाः क्षिप्रमुत्पद्यन्तेऽतस्त्वमेतादृशोदेव इत्युपहासोऽत्र ध्वन्यते । अपरनिर्ज राणां सेविता सेवकत्वमिति वा ॥ ८५ ॥

Digitized by Google

स्मर नृशंसतमस्त्वमतोविधिः
सुमनसः कृतवान् भवदायुधं।
यदि धनुर्दृढमाशुगमायसं
तव सृजेत् प्रलयन्त्रिजगद्व्रजेत् ॥ ८६ ॥
स्मररिपोरिव रोपशिखी पुरां
दहतु ते जगतामपि मा त्रयं।
इति विधिस्त्वदिषून् कुसुमानि किं
मधुभिरन्तरसिञ्चदनिर्वृतः ॥ ८७ ॥

स्मरेति ॥ हे स्मर त्वं नृशंसतमः अत्यन्तहिंस्रः अतोहेतोर्विधि र्ब्रह्मा सुमनसः पुष्पाणि भवत आयुधं अस्त्रं कृतवान् यदि तव धनुर्दृढं कठिनं एवं आशुगं वाणं आयसं लोहमयं सृजेत् कुर्य्यात् तर्हि त्रिजगत् भुवनत्रयं प्रलयं नाशं व्रजेत् गच्छेत् दुष्टमनसस्तव आयुधस्य विधिना सुमनस्त्वं कृतमिति ध्वनिः ॥ ८६ ॥

स्मररिपोरिति ॥ इव यथा स्मररिपोः शिवस्य रोषशिखी पुरां त्रयं ददाह तथा तव रोषशिखी वाणाग्निः जगतां त्रयं मा दहतु दग्धं माकार्षीत् इति कृत्वा विधिर्ब्रह्मा अनिर्वृतोव्याकुलचित्तः सन् कुसुमानि पुष्पमयान् त्वदिषून् तव वाणान् अन्तर्मध्ये मधुभिर्मकरन्दैः किं असिञ्चत् सिक्तवान्। मधुसिक्तस्यापि तद्वाणस्येदृक् प्राखर्य्यं केवलस्य कीदृग्भवेदिति भावः। कलम्बमार्गणशराः पत्री रोपइषुर्द्वयोरित्यमरः ॥ ८७ ॥

Digitized by Google

विधिरनङ्गमभेद्यमवेक्ष्य ते
जनमनः खलु लक्ष्यमकल्पयत् ।
अपि स वज्रमदास्यत चेत्तदा
त्वदिषुभिर्व्यदलिष्यदसावपि ॥ ८८ ॥
अपि विधिः कुसुमानि तवाशुगान्
स्मर विधाय न निर्वृतिमाप्तवान् ।

विधिरिति ॥ हे काम विधिर्ब्रह्मा जनानां मनोऽन्तःकरणं अनङ्गं निरवयवं अतएव अभेद्यं भेत्तुमशक्यं अवेक्ष्य निरीक्ष्य खलु निश्चितं उत्प्रेक्षे वा ते तव लक्ष्यं वेध्यं अकल्पयत् कृतवान् । अपि सम्भावनायां स विधिर्यदि वज्रं अदास्यत तव लक्ष्यं यदि वज्रं अकल्पयिष्यत तदा असावपि अतिकठिनो वज्रोऽपि त्वदिषुभिस्तव बाणैर्व्यदलिष्यत् विदीर्णोऽभविष्यत् अतः पूर्वं ब्रह्मणा तव त्वदीयबाणानाञ्च क्रूरत्वं विचार्य्यैव अभेद्यं लक्ष्यं निर्दिष्टमित्यर्थः । ह्लादिनी वज्रमस्त्री स्यादित्यमरः ॥ ८८ ॥

अपीति । हे स्मर विधिर्ब्रह्मा तव कुसुमान्यपि अतिकोमलानि पुष्पाण्यपि आशुगान् बाणान् विधाय कृत्वा निर्वृतिं सुखतां नाप्तवान् न लब्धवान् अविविक्तोऽसौ पुष्पमयबाणेनापि जगदस्थिरं करिष्यतीति बुद्ध्वा निर्वृतिं न प्राप्तवानित्यर्थः कुतएवं त्वया ज्ञातमित्याह हि यतः स विधिस्तान् पञ्च आशुगान् नियम्य पञ्चसंख्यत्वेन गणयित्वा ते तुभ्यं अदित दत्तवान् न लब्धवान् अदित बत कष्टं तदपि तथापि तैः पञ्चभि

Digitized by Google

अदित पञ्च हि ते स नियम्य तां
स्तदपि तैर्व्वत जर्ज्जरितं जगत् ॥ ८९ ॥
उपहरन्ति न कस्य सुपर्व्वणः
सुमनसः कति पञ्च सुरद्रुमाः ।
तव तु हीनतया पृथगेकिकां
धिगियतापि न तेऽङ्गविधारणा ॥ ९० ॥

रपि आशुगैर्जगत् भुवनं जर्ज्जरितं जर्ज्जरीकृतं हिंस्रतमोऽसीति भावः ॥ ८९ ॥

उपहरन्तीति ॥ पञ्च सुरद्रुमाः पञ्चसंख्यका देवतरवो मन्दारादयः कस्य सुपर्व्वणः कस्यापि देवस्य कति सुमनसः पुष्पाणि नोपहरन्ति नोपायनीकुर्व्वन्ति अपि तु असंख्याताः सुमनस उपहरन्तीत्यर्थः तव तु देवस्यापि हीनतया अपकृष्टतया पृथक् प्रत्येकं एकिकां एकां एकां सुमनसं उपहरन्ति अतएव पञ्चवाणत्वं इयतापि एतावताप्यप मानेन ते तव अङ्गविधारणा शरीरधारणं न धिक् निन्दनीया न अपि तु धिगेव अनङ्गस्यापि तव एतादृक्तिरस्कारेणाप्यङ्गान्तर धारणं निन्दनीयमेवेत्यर्थः न तेऽङ्गविदारणमिति पाठे अङ्ग सोप हाससम्बोधने इयतापि तव विदारणं न हृदयस्फोटनं न किन्तु एतादृगपमानेन तव हृदयविदारणं युक्तमासीदित्यर्थः अतएव त्वां धिगित्यन्वयः । सुमनःशब्दस्य सुमनोऽप्सरोवत्सजार्द्देवेति पाणिनि सूत्र उत्र पनान्सतादेषिकामित्यत्र न विप्रतिपत्तिः अतएव वेश्या श्मशान सुमनाइव वर्ज्जनीया इति मृच्छकटिकं । पञ्चैते देवतरवो मन्दारः पारिजातकः । सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनमिति स्त्रियः सुमनसः पुष्पमिति चामरः । ९० ॥

Digitized by Google

कुसुममप्यतिदुर्नयकारि ते
किमु वितीर्य्य विधिर्द्धनुरग्रहीत्।
किमकृतैष तवैकतदास्पदे
द्वयमभूदधुना हि नलभ्रुवौ ॥ ९१ ॥
षड्तवः कृपया स्वकमेककं
कुसुममक्रममर्न्दितनन्दनाः।

कुसुममिति॥ किमुत्प्रेक्षायां प्रश्ने वा विधिर्ब्रह्मा ते तुभ्यं कुसुममपि पुष्पमयमपि धनुर्वितीर्य्य दत्वा किमु अग्रहीत् पुनर्गृहीतवान् किम्भूतं अतिदुर्नयकारि अकारणविरहिजनमारणसाधनत्वादत्यन्तविसदृशकर्तृ अतिदुर्नयकारीति मत्वा दत्तमपि पुनर्गृहीतवानित्यर्थः तथा सत्यपि एषविधिः किं अकृत अपि तु किञ्चिदपि न कृतवानित्यर्थः हि यतस्तव अधुना इदानीं एकस्य तस्य धनुष आस्पदे स्थाने नलस्य राज्ञो भ्रुवौ धनुषोर्द्वयमभूत् नलभ्रुवावेव द्वे धनुषी जाते इत्यर्थः जगतामुपकाराय पुष्पमयैकधनुःपुनर्ग्रहण प्रवृत्तेन विधिना विलक्षणनलभ्रूनिर्म्माणेन धनुर्द्वयकरणादत्यन्तापकारएव कृतइति भावः अत्रारम्भवैफल्यपूर्व्वकानर्थसम्भवरूपो विषमालङ्कारः ॥ ९१ ॥

षडिति॥ अक्रमं क्रममुल्लङ्घ्यैव नर्न्दितं शोभितं नन्दनं इन्द्रोद्यानं यैस्ताद्दशा युगपन्नन्दनवनस्थितिका इत्यर्थः षट्संख्यका ऋतवो हेमन्तादयः कृपया न तु देवत्वानुरोधेन स्वकं स्वीयं एककं एकं एकं यत् कुसुमं पुष्पं भवते तुभ्यं ददति इत्युत्प्रेक्षायां भवान् तैःषड्भिः कुसुमैर्विशिखैः सन् एकं कुसमं धनुरिव कुरुते पञ्चकुसुमानि इषून वाणानिव कुरुते त्वं देवेष्वतिदरिद्रोऽसि यतस्तुभ्योभिक्षया

ददति यद्भवते कुसुमं भवान्
धनुरिवैकमिषूनिव पञ्च तैः ॥ ९२ ॥
यदतनुस्त्वमिदं जगते हितं
क्व स मुनिस्तव यः सहते हतीः ।
विशिखमाश्रवणं परिपूर्य्य चे
दविषमभुजमुज्झितुमीशिषे ॥ ९३ ॥

कुसुमषट्कमेव लब्ध्वा अनुपभोज्य धनुर्बाणांश्च कृतवान् अतिदरिद्रोऽपि यत् किञ्चित् स्वल्पमपि वस्तु लब्ध्वा विभज्य नानाविधं करोति यदि ऋतवः कृपया कुसुमषट्कं न दद्यात् तदा तव धनुर्बाणाः कथं भवेयुः तथा सति तवैतादृशं दौरात्म्यं न भवेदिति ध्वनिः । तैरिति विशेषणे तृतीया ॥ ९२ ॥

यदिति ॥ हे काम त्वं यत् अतनुरनङ्गः अथ च सद्योजातः इदं अतनुत्वं जगते हितं भुवनस्योपकारकं चेदि आश्रवणं कर्णपर्य्यन्तं परिपूर्य्य आकृष्य विशिखं बाणं अविषमौ स्थिरीभवन्तौ भुजौ यस्यां क्रियायां तद्यथा तथा उज्झितुं त्यक्तुं ईशिषे समर्थो भवसि तदा यस्तव हतीर्बाणप्रहारान् सहते स मुनिर्वशीकृतेन्द्रियः क्व अपि तु न कुत्रापि अधुना अनङ्गस्यापि तव बाणप्रहारोऽतिदुःसहः अङ्गवतस्तु मुनिना जितेन्द्रियेणापि सोढुं न शक्यते का कथाऽस्मदादीनामित्यर्थः अतोऽस्माकं भाग्यादेव भगवता शिवेन त्वमनङ्गः कृतोऽसीति भावः । जगत इति हितयोगे चतुर्थी ॥ ९३ ॥

Digitized by Google

सह तया स्मर भस्म झगित्यभूः
पशुपतिं प्रति यामिषुमग्रहीः।
ध्रुवमभूदधुना वितनोः शर
स्तव पिकस्वर एव स पञ्चमः॥ ९४॥
स्मर स मद्दुरितैर्विफलीकृतो
भगवतोऽपि भवद्दहनश्रमः।
सुरहिताय हुतात्मतनुः पुन
र्ननु जनुर्दिवि तत्क्षणमापिथ॥ ९५॥

सहेति॥ हे स्मर पशुपतिं शिवं प्रति यां इषुं बाणं अग्रहीः गृहीतवानसि तया इष्वा सह त्वं झगिति कृत्वा भस्म अभूर्भूतवानसि झगित्य व्यक्तशब्दानुकरणं भाषायां व्याख्यानात् झटितीति वा पाठः ध्रुवमुत्प्रेक्षे अधुना इदानीं वितनोरनङ्गस्यापि तव पिकस्वरएव कोकिलालाप एव स प्रसिद्धः पञ्चमः पञ्चानां पूरकः शरो बाणोऽभूत् तव शरीरं गतं बाणस्तु न गत इति भावः पञ्च च पञ्चमः कोकिलास्वर इति शब्दच्छलं। पत्री रोपइषुर्द्वयोरित्यमरः॥ ९४॥

स्मरेति॥ हे स्मर भगवतोऽपि शिवस्यापि स प्रसिद्धो भवद्दहनश्रमस्तव दाहपरिश्रमो मद्दुरितैर्मम पातकैर्विफलीकृतः निष्फलीकृतः ननु यस्मात् सुराणां देवानां हिताय हुता व्यक्ता आत्मतनुः स्वशरीरं येन तादृशः सन् तत्क्षणं तस्मिन्नेव क्षणे दिवि स्वर्गे पुनर्जनुर्जन्म आपिथ प्राप्तवानसि तव जन्मान्तरप्राप्तौ परोपकारित्वं मदीयदौर्भाग्यञ्च हेतुः अन्यथा शिवकोपानलदग्धः सन् गतएवासीदिति भावः॥ ९५॥

विरहिणो विमुखस्य विधूदये
शमनदिक्पवनः स न दक्षिणः ।
सुमनसो नमयन्नटनौ धनु
स्तव तु बाहुरसौ यदि दक्षिणः ॥ ९६ ॥
किमु भवन्तमुमापतिरेककं
मदमुदान्धमयोगिजनान्तकं ।

विरहिण इति ॥ विधूदये चन्द्रोदये विमुखस्य पराङ्मुखस्य दुःखित स्येत्यर्थः विरहिणोजनस्य शमनस्य यमस्य दिग्भवः पवनोमलयानिलो न दक्षिणोनानुकूलः शमनदिग्भवत्वादेव दुःखद इत्यर्थः प्रथमं चन्द्रो दयएव विरहिणामसह्यः मलयानिलस्तु तदपेक्षयाप्यसह्य इति भावः अथ च संपूर्णमण्डलविधूदये विमुखस्य विपरीतमुखस्य पश्चि माभिमुखस्य विरहिणोमलयानिलो न दक्षिणो न दक्षिणदिग्वर्त्ती अपि तु वामएव। मलयानिलस्य प्रसिद्धदक्षिणत्वं कथमपह्नूयतेत्याह असौ मलयानिलोयदि दक्षिणः दक्षिणत्वेनाऽभिमतस्तर्हि सुमनसो धनुः पुष्पमयचापं अटनौ अग्रे नमयन् नम्रीकुर्वन् असौ तव बाहु रेव तुर्वार्थे यद्यस्य दक्षिणत्वमवश्यमभ्युपेयं तर्हि दक्षिणत्वं दक्षि णबाहुत्वमिति वक्तव्यं न त्वनुकूलत्वमित्यर्थः तव दक्षिणबाहुरपि पौरु षत्वाद्विरहिणां प्रतिकूलएव मलयानिलोऽपि पुष्पायाममयं नम यति दक्षिणशब्दे श्लेषादीदृशोक्तिः। अटनिर्धनुषः कोटिरिति वचः ॥ ९६ ॥

किमिति ॥ उमापतिः शिवोमदमुदा गर्वहर्षेण अन्धं विमोहकं अयोगिजनानां वियोगिजनानां अन्तकं विनाशकं एककं एकमेव

यदजयस्तत एव न गीयते
स भगवान् मदनान्धकमृत्युजित्॥ ८७॥
त्वमिव कोऽपि परापकृतौ कृती
न ददृशे न च मन्मथ शुश्रुवे।

भवन्तं त्वां यदजयत् जितवान् तत एव एकस्य तव जयादेव स भगवान् उमापतिः किमु मदनान्धकमृत्युजित् न गीयते मदनजित् अन्धकजित् मृत्युजिदिति नाम्ना न कथ्यते अपि तु एकस्य तव जयादपि गीयते न तु मदनान्धकाख्यासुरविशेषमृत्यूनां जयाख्यामेव जयाद्भगवतोनामत्रयं एकस्मिन्नेव त्वयि मदजनकत्वं अन्धकारित्वं मृत्युकारित्वञ्चेति धर्म्मत्रयं विद्यतेऽतस्त्वमतिदुर्जयैइति भावः। अन्धमिति अन्धं करोतीति नामत्र्यादिना णिच् इगन्तइति इष्ठा दित्वात् ख्वुः एवमन्तकमित्यत्र अन्तं करोतीति णिजन्तात्ख्वुः॥ ८७॥

त्वमिवेति॥ हे मन्मथ काम त्वमिव त्वत्सदृशः कोऽपि परापकृतौ परेषामपकारविषये कृती कुशलो न ददृशे न दृष्टः न च शुश्रुवे नापि श्रुतः कथमित्यत आह यस्त्वं ज्वलता आत्मना जगन्ति भुवनानि परिरभ्य आलिङ्ग्य ज्वलयितुं दहनात् हरनयनानलं प्राप्य समात्मानं अदहः दग्धवानसि ईदृशः कोऽपि न दृष्टो न च श्रुतः अन्येऽपकारका हि स्वं रक्षित्वैव परेषामपकाराय प्रवर्त्तन्ते त्वन्तु परेषां ज्वलनाय स्वस्यापि ज्वलनमङ्गीकृतवानिति परापकारे कुश

स्वमदृशोद्दहनाज्ज्वलतात्मना
ज्वलयितुं परिरभ्य जगन्ति यः ॥ ९८ ॥

त्वमुचितं नयनार्चिषि शम्भुना
भुवनशान्तिकहोमहविः कृतः ।
तव वयस्यमपास्य मधुं मधुं
हतवता हरिणा बत किं कृतं ॥ ९९ ॥

सोऽसौ मधुमासः जगन्तीयस्य परिरम्भेणैव ज्वलयितुमिच्छयेव च त्वत्सखः । दहनादिति ल्यब्लोपादेरिति पञ्चमी ॥ ९८ ॥

त्वमिति ॥ हे काम शम्भुना शिवेन नयनार्चिषि ललाटनेत्राग्निज्वालायां त्वं उचितं योग्यं भुवनशान्तिकहोमहविर्भुवनानां शान्तिप्रयोजनकहोमे हविर्हवनीयः कृतः त्वं बहुभुवनशान्तिकहोमहविः कृतस्तदुचितमिति वा शम्भुना त्वां दग्ध्वा भुवनानां शान्तिः कृता अन्यथा त्वं चेच्छरीरी स्यास्तदा भुवनत्रयं न तिष्ठेदिति भावः किन्तु बत कष्टं तव वयस्यं सखायं मधुं वसन्तं अपास्य त्यक्त्वा मधुं दैत्यविशेषं हतवता विनाशितवता हरिणा विष्णुना किं कृतं अपि तु न किमपि कृतं भुवनानां शान्त्यर्थेऽवतीर्णेन भगवता विष्णुना मधुदैत्यविनाशनात् यादृशी शान्तिः कृता तदपेक्षयापि वसन्तविनाशे ह्यतितरां शान्तिरासीत्तत्तु न तेन समीचीनं कृतमित्यर्थः किं कृतं कुत्सितं कृतमिति वा । मधु पुष्परसे क्षौद्रे मद्ये ना तु मधुद्रुमे । वसन्ते दैत्यभिच्चैत्रे स्याज्जीवन्त्यां तु योषितीति मेदिनी ॥ ९९ ॥

Digitized by Google

इति क्रियद्वचसैव भृशं प्रिया
धरपिपासु तदाननमाशु तत्।
अजनि पांशुलमप्रियवाग्ज्वल
न्मदनशोषणबाणहतेरिव ॥ १०० ॥
प्रियसखीनिवहेन सहाथ सा
व्यरचयद्गिरमर्द्धसमस्यया।

एवं कथयन्त्यास्तस्या मुखशोषमाह ॥ इतीति ॥ प्रियस्य नलस्य अधरपिपासु अधरपानेच्छु तत् सुकुमारतया प्रसिद्धं विरह पाण्डुरं वा तदाननं तस्या भैम्या मुखं इति पूर्वोक्तप्रकारेण क्रियद्वचसैव अल्पवचनेनैव भृशं सातिशयं आशु शीघ्रं पांशुलं शुष्कं अजनि जातं सा साकल्येन वक्तुमसमर्था जातेत्यर्थः अत्र हेतुमुत्प्रेक्षते अप्रियवाग्भिः परुषोक्तिभिर्ज्वलतोऽत्यन्तं क्रुध्यतो मदनस्य कामस्य यः शोषणबाणः शोषणाख्यः शरस्तस्य हतेरिव प्रहारादिव पांशुलमजनि आशु यदिति पाठे यत्पांशुलं अजनि तत् शोषणबाणहतेरिवेति यत्पदमाक्षिप्यान्वयः कार्य्यः ॥ १०० ॥

तस्या वक्तोक्तिर्योग्यतां वक्तुमुपक्रमते ॥ प्रियसखीति ॥ अथा नन्तरं सा दमयन्ती प्रियसखीनिवहेन स्निग्धसखीजनसमूहेन सह अर्द्धेन सखीभाषितस्य पूर्वार्द्धस्य समस्यया प्रत्युत्तरेण उत्तरार्द्ध परिपूरणरूपेण गिरं वचनं व्यरचयत् रचयति स्म पूर्वं सख्योऽर्द्धमू चुरनन्तरं दमयन्त्यर्द्धं पूरयामासेत्यर्थः कुतइत्याह मन्मथमार्गणैः कामबाणैः हृदयमर्म्मणि हृदयरूपे मर्म्मस्थाने दवथुना अविवरां निरवकाशा

हृदयमर्म्मणि मन्मथसायकैः
क्षततमा बत भाषितुमक्षमा ॥ १०१ ॥
अकरुणादव सूनशरादसून्
सहजयापदि धीरतयात्मनः ।
असवएव ममाद्य विरोधिनः
कथमरीन् सखि रक्षितुमात्थ मां ॥ १०२ ॥

क्षतो बत सममं भाषितुं कथयितुमक्षमा असमर्था । समस्या तु समा सार्थेत्यमरः । समस्यते संपूर्य्यतेऽनयेति अकर्त्तृकारके च संज्ञायामिति क्षः ॥ १०१ ॥

अष्टाभिः श्लोकैः पूर्व्वश्लोकमतिसमाधानमाह ॥ अकरुणादिति ॥ हे भैमि अकरुणात् निर्दयात् सूनशरात् कुसुमवाणात् कामात् आपदि एतादृशे आपत्काले सहजया स्वाभाविक्या आत्मनोधीरतया धैर्य्येण असून् प्राणान् अव रक्ष विपदि धैर्य्यावलम्बनमुचितमिति धैर्य्यमेवावलम्ब्य प्राणान् रक्षेत्यर्थः इति पूर्व्वार्द्धं सखीवचनं भैमीवचनन्तु हे सखि मम असवएव प्राणा एव अद्य अधुना विरोधिनः शत्रवः दुःखानुभवप्रधानहेतुत्वात् अतएव कथं अरीन् शत्रून् रक्षितुं मां आत्थ ब्रवीषि अरयोहि विनाशनीया एव यदि प्राणा न स्युस्तदा दुःखमप्यनुभवनीयं न स्यादतो हितं न वदसीति भावः । आत्थेति ब्रूञः सिङ् पञ्चानामादित आहो ब्रुवइति ब्रूञ आह सिङस्थल् हस्य थस्झलीति हस्य थः ॥ १०२ ।

Digitized by Google

हितगिरं न शृणोषि किमाश्रवे
प्रसभमप्यव जीवनमात्मनः।
सखि हिता यदि मे भवसीदृशी
मदरिमिच्छसि या मम जीवितं॥ १०३॥
अमृतदीधितिरेष विदर्भजे
भजसि तापममुष्य किमंशुभिः।

हितगिरमिति॥ हे आश्रवे वचनकारिणि भैमि किं किमिति हितगिरं हितकरं वचनं न शृणोषि तस्य आश्रवत्वात् वचनस्य च हितकरत्वात् अस्माभिर्यदुच्यते तत् त्वयावश्यमेवाङ्गीकर्त्तव्यमित्यर्थः का वै हितगीरित्याह प्रसभमपि सर्व्वथाप्यात्मानं गोपायेदिति श्रुते र्बलेनापि आत्मनोजीवनं अव रक्ष इयं सख्याउक्तिः भैम्यास्तु हे सखि त्वं यदि मे मम हिता अनुकूला भवसि तर्हि ईदृशी एतादृशी कथमित्यर्थात् या त्वं मदरिं विरहदुःखानुभवहेतुत्वात् ममैव शत्रुं मम जीवितं इच्छसि चिरं जीवत्वियमिति प्रार्थयसे अतस्त्वं न हिता भवसीत्यर्थः। वचने स्थित आश्रव इत्यमरः॥ १०३॥

अमृतेति॥ हे विदर्भजे दमयन्ति एष पुरोवर्त्ती अमृतदीधिति चन्द्रः न तु तीक्ष्णदीधितिः अतोऽमुष्य अंशुभिः सुधामयैः किरणैः किं कथं तापं दाहं भजसि अङ्गीकरोषि एतच्चोद्यात् वरं ताप शान्तिरुचिता न तु तापस्वीकारः इति सख्याउक्तिः भैम्यास्तु हे सखि यदि मृगभृतः मृगकलङ्किनश्चन्द्रस्य चन्द्रिका मृता भवन्ति तदा का कस्मिन् जने परिताप्यते चन्द्रेण परितापयितुं शक्यते अपि तु न कुत्रापि साधनाभावात् अमृतपदे श्लेषादिदं छलोत्तरं अमृताः

Digitized by Google

यदि भवन्ति मृताः सखि चन्द्रिकाः
शशभृतः क तदा परितास्यते ॥ १०४ ॥
भज धृतिं त्यज भीतिमहेतुका-
मयमचण्डमरीचिरुदञ्चति ।
ज्वलयति स्फुटमातपमुर्मुरै-
रनुभवं वचसा सखि लुम्पसि ॥ १०५ ॥
अयि शपे हृदयाय तवैव त-
द्यदि विधोर्न रुचेरसि गोचरः ।

सुधामयाः अय च मरणप्रतियोगिवाचकत्वा दोषिवचोक्तेवि समासः ॥ १०४ ॥

भजेति ॥ हे भैमि त्वं धृतिं धैर्य्यं भज अभय अहेतुकां निष्कारणां भीतिं भयं त्यज यतोऽयं दृश्यमानोऽचण्डमरीचिः शीतकिरण उदञ्चति उदेति सूर्य्यभ्रान्त्या भयं माकार्षीरित्यर्थः इयं सख्या उक्तिः भैम्यास्तु हे सखि आतपाएव मुर्म्मुराः तुषानलकणाः तैः त्वं स्फुटमत्यन्तं मां ज्वलयति दहति अतोवचसा वचनमात्रेण अनुभवं प्रत्यक्षं ज्वलनहेतुत्वचण्डमरीचित्वानुमानं वा लुम्पसि अपहरसि न मन्यसे इत्यर्थः कथमित्यर्थात् अतएवायं चण्डमरीचिरेवेत्यर्थः । ज्वलयतीत्यस्य अनुसन्धितेनायमितिकर्तृपदेनान्वयः ज्वलयति तपमित्यपि क्वचित् पुस्तकेषु पाठः । मुर्म्मुरस्तुषवह्नौ स्यादिति विश्वः ॥ १०५ ॥

अयीति ॥ अयीति कोमलसम्बोधने अयि हे भैमि त्वं यदि विधोश्चन्द्रस्य रुचेः किरणस्य गोचरो विषयो नासि न भवसि तत्तर्हि तवैव हृदयाय

Digitized by Google

रुचिफलं सखि दृश्यत एव य
ज्ज्वलयति त्वचमुल्लवयत्यसून्॥ १०६ ॥
विधुविरोधितिथेरभिधायिनी
मपि न किं पुनरिच्छसि कोकिलां।

अये अयथेन तवैव हृदयं तोषयितुमिच्छामि अपीति पाठे तव विश्वासार्थं अयेऽपीत्यन्वयः चन्द्र एवायमुदेतीति मया सत्यमेवो क्तं विश्वसिहीत्यर्थः इयं सख्या उक्तिः दमयन्ती तु रुचिशब्दस्य प्रीत्यर्थकत्वमादायच्छलेनोत्तरमाह। हे सखि रुचिफलं प्रीतिफलं दृश्यत एव यत् त्वचं ज्वलयति दहति यच्च असून् प्राणान् उल्लवयति व्याकुलयति अयमित्यर्थात् शरीरज्वलनं प्राणानां व्याकुलीकरणञ्च प्रीतिफलमेवेति त्वया सत्यमुक्तं किं प्रणयिना एवं क्रियते इत्यर्थः। हृदयायेति श्लाघादेर्यन्त्र्प्रीप्येति संप्रदानसंज्ञायां चतुर्थी अये इति अयः अयथइत्यात्मनेपदं। रुचिर्मयूखे शोभायामभिष्वङ्गा भिलाषयोरिति विश्वः ॥ १०६ ॥

विधुवेति॥ हे सखि विधुविरोधितिथेश्चन्द्रविरोधिन्यास्तिथेर मावास्याया अभिधायिनीमपि कुहु इतिशब्देनामावास्यावक्त्रीमपि कोकिलां किं किमिति न पुनरिच्छसि अपि तु तथाविधां कोकिलां इच्छेत्यर्थः चन्द्रोदयादेव लब्धवेदनासि अतः कोकिलामुखात् चन्द्र विरोध्यमावास्योपस्थापकं कुहिति शब्दं श्रुत्वा स्वस्थमाप्स्यसीति भावः इयं सख्या उक्तिः भैम्याह हे सखि अर्थस्य चन्द्रविरोध्यमावा स्यालक्षणस्य गवेषणया अनुसन्धानेन किं अलं अनुसन्धानेनापि

Digitized by Google

सखि किमर्थगवेषणया गिरं
किरति सेयमनर्थमयीं मयि ॥ १०७ ॥
हृदय एव तवास्ति स वल्लभ
स्तदपि किं दमयन्ति विषीदसि ।
हृदि परं न बहिः खलु वर्त्तते
मम यतस्तत एव विषद्यते ॥ १०८ ॥
स्फुटति हारमणौ मदनोष्मणा
हृदयमप्यनलङ्कृतमद्य ते ।

तावानर्थो नोपलभ्यत इत्यर्थः यतः सेयं कोकिलापि मयि मद्विषये अनर्थमयीं असमावाक्यालङ्कार्थशून्यां गिरं वाचं किरति क्षिपति अर्थोऽपि वक्तृतात्पर्य्यविषय एव शाब्दबोधे भासते कोकिलाया उद्दीपकतया कामपरिजनत्वात्समावाक्यज्ञाने तात्पर्य्यमित्यर्थशून्यं वचन मित्यर्थः अथ च अनर्थमयीं अतिदुःसहां गिरं किरति अर्थग्रहो दूरे तिष्ठतु प्रथमं शब्दश्रवणमेवोद्दीपकत्वादतिदुःसहमित्यर्थः ॥ १०७ ॥

हृदय इति ॥ हे दमयन्ति स वल्लभः प्रियो नलस्तव हृदय एव मनस्येव अस्ति तदपि तथापि किं किमर्थं विषीदसि खेदं कुरुष इति सख्या उक्तिः भैम्यास्तु हे सखि यतः स परं केवलं हृदि वर्त्तते न खलु बहिर्वर्त्तते तत एव तस्माद्धेतोरेव विषद्यते खिद्यते बन्धुजनः सन्निहितबहिःस्थितिरेवात्यन्तं सुखयतीतिभावः ॥ १०८ ॥

स्फुटतीति ॥ हे भैमि मदनोष्मणा मदनजनितवियोगानलेन हेतुना हारमणौ हारस्थितनायकमणौ नायकसहिते हारे इत्यर्थः

Digitized by Google

सखि हतास्मि तदा यदि हृद्यपि
प्रियतमः स मम व्यवधापितः ॥ १०९ ॥
इदमुदीर्य्य तदैव मुमूर्च्छ सा
मनसि मूर्च्छितमन्मथपावका ।
क्व सहतामवलम्बलवच्छिदा
मनुपपत्तिमतीमतिदुःखिता ॥ ११० ॥

स्फुटति विदीर्य्यमाणे सति अथ ते तव हृदयमपि मुखादिकन्तु प्रागेवानलक्लृप्तं जातं वक्षोऽपि अनलक्लृप्तं भवेदिति शेषः अतो धैर्य्यं धारित्वा मदनोष्मा निर्व्वापयितव्य इति भावः इति सख्याउक्तिः भैमी तु हृदयशब्दस्य मनःपरत्वं अनलक्लृप्तमित्यस्य च नलशून्यपरत्वमादाय उत्तरयति हे सखि हृद्यपि मनस्यपि मम स प्रियतमो नलो यदि व्यवधापितोऽन्तर्धापितः विधिनेत्यर्थात् तदा हतास्मि मृतास्मि हृदये तत्स्फूर्तिरेवाधुना मम जीवनकारणमिति भावः ॥ १०९ ॥

एवं कथयन्त्या भैम्या मोहमाह ॥ इदमिति ॥ सा भैमी मनसि मूर्च्छितः प्रवृद्धो मन्मथपावकः कामानलो यस्यास्तादृशी सती इदं पूर्व्वश्लोकोत्तरार्द्धरूपं उदीर्य्य उक्त्वा तदैव तत्कालमेव मुमूर्च्छ मोहं प्राप्ता नन्वनलक्लृप्तमित्यस्यानालिकं नलशून्यं कृतमित्यर्थं बुद्ध्वा कथं सा मोहं प्राप्तेत्याह अतिदुःखिता सा अनुपपत्तिमतीं अनुपपद्यमानामपि पर्य्यालोचनया बाधितस्वरूपामपीत्यर्थः अवलम्बस्य हृदयस्फूर्त्तिरूपावस्थानलक्षणजीवनधारणकारणस्य यो लवो लेशस्तन्मात्र इत्यर्थः तस्य छिदां खण्डनां क कुत्र सहतां सोढुं शक्ता स्यात् अपि तु न कुत्रापि अतिदुःखिनो हि अलीकमप्यप्रियवचनं श्रुत्वा अविचार्य्यैव विमुह्यन्ति ॥ ११० ॥

Digitized by Google

अधित कापि मुखे सलिलं सखी
प्यधित कापि सरोजदलैः स्तनौ ।
व्यधित कापि हृदि व्यजनानिलं
न्यधित कापि हिमं सुतनोस्तनौ ॥ १११ ॥

उपचचार चिरं मृदुशीतलै-
र्जलजनालमृणालजलादिभिः ।
प्रियसखीनिवहः स तथा क्रमा-
दियमवाप यथा लघुचेतनां ॥ ११२ ॥

एवं मूर्छितायास्तस्याः सखीनामुपचारान्मूर्छापनयनं श्लोकद्वये नाह अधितेति । कापि सखी सुतनोः कृशाङ्ग्या भैम्या मुखे सलिलं जलं अधित चिक्षेप कापि सखी सरोजदलैः पद्मपत्रैः स्तनौ प्यधित आच्छादितवती कापि सखी हृदि व्यजनानिलं तालवृन्तवातं व्यधित कृतवती कापि सखी तनौ शरीरे हिमं कर्पूरादिशीतलं वस्तु न्यधित स्थापितवती । हिमं चन्दनमिति प्राचः चन्दने च हिमं विदुरिति विश्वः । प्यधितेति अपेरलुग्धादौ वेत्यपेरकारलोपः ॥ १११ ॥

उपचचारेति ॥ स प्रियो हितः सखीनां निवहः समूहः मृदुभिः कोमलैः शीतलैर्हिमैश्च जलजैः पद्मैर्नालैः पद्मदण्डैर्मृणालैर्बिसैर्जलैः आदिना चन्दनादिभिश्च क्रमात् परिपाटीं प्राप्य पूर्वोक्तरीत्या वा तथा चिरं भैमीं उपचचार सेवितवान् यथा इयं भैमी लघु अल्पां लघु शीघ्रं वा चेतनां अवाप प्राप्तवती ॥ ११२ ॥

Digitized by Google

अथ कले कलय श्वसिति स्फुटं
चलति पक्ष्म चले परिभावय।
अधरकम्पनमुन्नय मेनके
किमपि जल्पति कल्पलते शृणु॥११३॥
रचय चारुमति स्तनयोर्वृतिं
कलय केशिनि केशमसंयतं।
अवगृहाण तरङ्गिणि नेत्रयो
र्जलभरानिति शुश्रुविरे गिरः॥११४॥
युग्मकं॥

अथ तदार्त्तौ सखीनामुपचाराद्यैपरस्पराह्वानकोलाहलं युग्मके नाह॥ अथेति॥ अथानन्तरं इति गिरः सखीनां परस्परभाषणानि शुश्रुविरे श्रुताः समीपस्थितैर्जनैरित्यर्थात् इति वक्ष्यमाणेनान्वयः इति किं हे कले सखि इयं भैमी स्फुटं प्रकटं श्वसिति प्राणिति जीवतीति कलय जानीहि हे चले सखि अस्याः पक्ष्म नेत्रलोम चलति स्पन्दते इति परिभावय पश्य पक्ष्मचलनमपि जीवनचिह्नं हे मेनके सखि अधरकम्पनं अधरस्फुरणं उन्नय तर्कय हे कल्पलते सखि इयं कि मपि अस्फुटं जल्पति वदति तत् शृणु॥११३॥

रचयेति॥ हे चारुमति सखि स्तनयोर्वृतिमावरणं रचय कुरु हे केशिनि सखि असंयतं मुक्तबन्धनं केशं केशसमूहं कलय बधान हे तरङ्गिणि सखि नेत्रयोश्चक्षुषोर्जलभरान् वाष्पप्रवाहान् अवगृहाण अपाकुरु इति गिरः श्रुताः कलादीनि सखीनां नामानि॥११५॥

Digitized by Google

कलकलः स तदालिजनानना
दुदलसद्विपुलस्त्वरितैरितैः
यमधिगम्य सुतालयमीयिवान्
धृतदरः स विदर्भपुरन्दरः ॥११५ ॥

कन्यान्तःपुरबाधनाय यदधीकारान्न दोषा नृपं
द्वौ मन्त्रिप्रवरश्च तुल्यमगदङ्कारश्च तावूचतुः ।

ताः श्रुत्वा राज्ञः कन्यान्तःपुरप्रवेशमाह ॥ कलकल इति ॥ तस्या भैम्या आलिजनाननात् सखीजनमुखात् त्वरितैरितैः शीघ्रभावैर्विपुलो महत्तरः स कलकलः कोलाहलः उदलसत् उद्भूतवान् यं कलकलं अधिगम्य श्रुत्वा स विदर्भपुरन्दरो विदर्भराज्येन्द्रो भीमो धृतदरो गृहीतत्रासः सन् सुतालयं कन्यान्तःपुरं ईयिवान् प्रविवेश । कोलाहलः कलकल इत्यमरः । ईयिवानिति इण गतौ क्वसुः अत्र क्वसोरपि समापकत्वं । त्वरितानां धावकानां ईरितैर्भीषणैरिति प्राचां पक्षान्तरव्याख्यानमालिजनाननस्यापादानत्वानुपपत्तेरुपेक्षणीयं ॥ ११५ ॥

अथ छन्दोऽन्तरेण सर्गशेषं सूचयन् राज्ञो मन्त्रिवैद्याभ्यां तद्वृत्तान्तजिज्ञासामाह ॥ कन्यान्तःपुरेति ॥ ययोरधीकारादध्यक्षत्वात् वियोगाद्वा कन्यान्तःपुरस्य बाधनाय पीडायै दोषा व्यभिचाराद्यो वातपित्तादिवैषम्यजनितरोगाश्च न भवन्तीति शेषः तौ मन्त्रिप्रवरश्च मन्त्रिमुख्यश्च अगदङ्कारश्च वैद्यश्च द्वौ तुल्यं समकालं शब्दसाम्यात् समानञ्च ऊचतुः कथयामासतुः किमूचतुरित्याह हे देव राजन्

Digitized by Google

देवाकर्णय सुश्रुतेन चरकस्योक्तेन जानेऽखिलं
स्यादस्यानलदं विना न दलने तापस्य कोऽपि क्षमः
॥११६॥

आकर्णय शृणु अहं सुश्रुतेन सुष्ठु आकर्णितेन चर एव चरकस्तस्य मत्प्रेरितस्य चरस्य उक्तेन कथितेन अखिलं समस्तं गूढवृत्तान्तं जाने किं जानासीत्याह अस्याभैम्यास्तापस्य दलने नाशे नलदं नलनामक राजप्रदं पुरुषं विना कोऽपि जनः क्षमः समर्थो न स्यात् न भवति इति चरमुखान्मया श्रुतं नले जातानुरागाया अस्याः पूर्वरागो जात इति जानीहि देवेति मन्त्रिवाक्यार्थः। वैद्यवाक्यार्थस्तु हे देव अहं सुश्रुतेन वैद्यकग्रन्थविशेषेण चरकस्य चरकाचार्यस्य उक्तेन भाषितेन ग्रन्थविशेषेण अखिलं निदानं उपशमकारणञ्च जाने नलदं उशीरं विना अस्यास्तापस्य दलने नाशे कोऽपि क्वाथादिः क्षमो न स्यात् तद स्याः शरीरमुशीरेण लिप्यतां तेनाशु सन्तापशान्तिर्भविष्यतीति। च द्वयमुभयोः प्राधान्यसूचकं। अषीकारादिति शादेर्घञि बहुल मिति दीर्घः अगदङ्कार इति अस्तसत्यागदेभ्यः कार इति मकारा गमः। रोगहार्य्यगदङ्कारो भिषग्वैद्यौ चिकित्सके इति शाश्वतः। वीरतरं मूलेऽस्योशीरमस्त्रियां अभयं नलदं सेव्यमिति चामरः। सारिवामधुकचन्दनकुचन्दनपद्मककाश्मरीफलमधूकपुष्पाण्युशीरञ्चेत्यु क्ता शारिवादिः पिपासाघ्नो रक्तपित्तहरोगणः। पित्तज्वरप्रशमनो विशेषाद्दाहनाशन इति सुश्रुतः। लाजाचन्दनकाश्मर्य्यफलमधुक शर्करानीलोत्पलोशीरसारिवागुडूचीह्रीवेराणीति दशेमानि दाह प्रशमनानीति, चरकः॥ शार्दूलविक्रीडितमिदं वृत्तं अस्य लक्षण मुक्तं प्राक्॥ ११६॥

ताभ्यामभूद्युगपदप्यभिधीयमानं
भेदव्यपाकृतमिथःप्रतिघातमेव।
श्रोत्रे तु तस्य पपतुर्नृपतेर्न किञ्चित्
भैम्यामनिष्टशतशङ्कितयाकुलस्य ॥ ११७॥

द्रुतविगमितविप्रयोगचिह्ना
मपि तनयां नृपतिः पदावनम्रां।

ताभ्यामेवमुक्तमपि राज्ञा चौत्कण्ठ्यान्न श्रुतमित्याह ॥ ताभ्यामिति ॥ ताभ्यां मन्त्रिवैद्याभ्यां युगपदेकदा अभिधीयमानमपि कथ्यमानमपि एकरूपतया उभाभ्यामाख्यातमपीत्यर्थः भेदेन अर्थभेदाद्भिन्नत्वेन व्यपाकृतोऽपनीतो मिथः प्रतिघातः शाब्दबोधप्रतिबन्धकीभूतपरस्परै कताऽऽरूपविरोधो यत्र तादृशमेवाभूत् विभिन्नमतयोर्मन्त्रिवैद्ययोर्हि वाक्ययोर्भिन्नत्वमेव युक्तं एकरूपत्वे उन्मत्तवचनवत् तस्मात् श्रोतुर्बोधो न जायते अत्र तु अर्थभेदादेव भेदाङ्गीकारात् एकरूपमपि शाब्दबोधजननयोग्यमेवाभूदित्यर्थः। ननु तर्हि कथं राज्ञा तयोरर्थो न गृहीतावित्यत्राह तु किन्तु भैम्यां दमयन्तीविषये अनिष्टशतशङ्कितया अमङ्गलशतशङ्कया आकुलस्य अस्थिरचित्तस्य तस्य नृपतेर्भीमस्य श्रोत्रे कर्णौ तत्कथे किञ्चित् किमपि एकांशमपि न पपतुः न सन्निचकृषतुः कामिनीजिघ्रासादिवत् चिन्ताजनानिष्टशङ्कात्र बोधप्रतिबन्धिकेति भावः। वसन्ततिलकावृत्तं ॥ ११७ ॥

अथ राज्ञा भैमीदर्शनमाह ॥ द्रुतेति ॥ नृपतिर्भीमो द्रुतं शीघ्रं विगमितं राजागमनवार्त्तां श्रुत्वा सखीभिरपसारितं विप्रयोगचिह्नं विरहानुमापकं शय्यास्थादिकं यस्यास्तादृशीमपि पदावनम्रां अभि

Digitized by Google

अकलयदसमाशुगाधिमग्नां
झटिति पराशयवेदिनो हि विज्ञाः ॥११८॥
व्यतरदथ पिताशिषं सुतायै
नतशिरसे सहसोन्नमय्य मौलिं ।

वन्दनाय पादयोः पतितां तनयां सुतां भैमीं असमाशुगस्य विषम शरस्य कामस्य च आधिः तज्जनिता मानसी व्यथा तत्र मग्नां अकलयत ज्ञातवान् चिह्नाभावे कथं ज्ञातवानित्यर्थान्तरन्यासेनोपपादयति हि यतो विज्ञाः सुधियो जनाः झटिति शीघ्रं हेतुमनपेक्ष्यैवेत्यर्थः पराशयवेदिनः पराभिप्रेतज्ञा भवन्ति। पुष्पिताग्रा वृत्तमिदं अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा इति लक्षणात् ॥ ११८ ॥

राजा तां यथाविधि आशिषाशीर्व्वादेन तदभिप्रेतसिद्धिं सूचयन् सान्त्वयति ॥ व्यतरदिति ॥ अथानन्तरं पिता भीमो नतशिरसे लज्जया नम्रमस्तकायै सुतायै दमयन्त्यै सहसा शीघ्रं मौलिं तस्या मस्तकं उन्नमय्य उत्तोल्य आशिषं व्यतरत् ददौ का आशीरित्याह हे भैमि कियद्भिः कतिपयैः स्वल्पैरेव वासरैर्दिवसैः स्वयम्वरे स्वयं व्रियतेऽस्मिन्निति स्वयम्वरसमाजे स्वयं व्रियतेऽसाविति स्वयम्वरे राजसमूहमध्ये वा गुणमयं बहुगुणयुक्तं अभिमतं ईप्सितं दयितं स्वामिनं आप्नुहि लभस्व इति स्वयम्वरद्वयेन पितृपरतन्त्रास्मि न खलु स्वाभिमतं वरं प्राप्स्यामीति मनसि कृत्वा

Digitized by Google

दयितमभिमतं स्वयम्बरे त्वं
गुणमयमाप्स्यसि वासरैः कियद्भिः ॥ ११९ ॥
तदनु स तनुजासखीरवादी
त्तुहिनऋतौ गत एव हीदृशीनां ।
कुसुममपि शरायते शरीरे
तदुचितमाचरतोपचारमस्यां ॥ १२० ॥
कतिपयदिवसैर्वयस्यया वः
स्वयमभिलष्य वरिष्यते वरीयान् ।

दुःखं माचार्षीरिति सूचितं । वासरैरिति फलसिद्धौ क्रियापरमे तृतीयेति तृतीया । स्वयम्बरे इति समीपसम्बन्धमिति प्राञ्चः ॥ ११९ ॥

तस्याः सखीः प्रत्युपदिशति ॥ तदन्विति ॥ तदनु आशीर्वादात् परं स राजा तनुजाया दुहितुः सखीरवादीत् उक्तवान् किमवादीदित्याह हे भैमीसख्यः तुहिने ऋतौ हिमऋतौ गत एव गतमात्र एव सति वसन्तप्रारम्भेऽपीत्यर्थः ईदृशीनां एवम्विधानां कोमलाङ्गीनां अथ च नवानुरक्तानां शरीरे कुसुममपि अतिमृदुलं पुष्पमपि शरायते शरवत् पीडाकरं भवति अथ च कामबाणायते अतो यूयं अस्यां भैम्यां तदुचितं वसन्तसमयोपयुक्तं उपचारं शुश्रूषां आचरत कुरुत ॥ १२० ॥

किन्तर्हि चिरकालमेवं कर्त्तव्यमित्याशङ्क्याह ॥ कतिपयेति ॥ वो युष्माकं वयस्यया सख्या भैम्या कतिपयदिवसैरल्पैरेव दिनैः स्वयं अभिलष्य इच्छाविषयीकृत्य वरीयान् अतिशयेन श्रेष्ठो वरो वरिष्यते तस्मात् अथ इतः परं अनया युष्माकं वयस्यया भैम्या

क्लमिमश्रमनयानया मदाप्तु
रुचिरुचितमाथ भवद्विधाभिधाभिः ॥ १२१ ॥

एवं यद्वदता नृपेण तनया नाप्रच्छि लज्जास्पदं
यन्मोहः स्मरभूरकल्पि वपुषः पाण्डुत्वतापादिभिः ।
यच्चाशीःकपटादवादि सदृशी स्यात्तत्र या सान्त्वना
तन्मत्वालिजनीमनोऽभिमतनोदानन्दमन्दाक्षयोः
॥ १२२ ॥

भवद्विधानां युष्मादृशीनां अभिधाभिः सान्त्वनवाग्भिः क्लमिमानं कार्श्यं श्रमं ग्लानिं चाप्तुं नयति प्रापयतीति तादृशी रुचिस्तुष्टिराप्तुं प्राप्तुं उचिता युक्ता । अथरुचिः समया शोभेति प्राहुः ॥ १२१ ॥

राज्ञा सर्वं ज्ञातमिति निश्चित्य सख्योऽहृष्टा लज्जिताश्चेत्याह ॥ एवमिति ॥ एवं पूर्वोक्तं वदता कथयता नृपेण भीमेन लज्जास्पदं सलज्जा तनया भैमी यत् नाप्रच्छि किमिति ते तापादिकं जात मिति न पृष्टा तथा वपुषः शरीरस्य पाण्डुततापादिभिर्हेतुभिः स्मरभूः कामजनितो मोहो मूर्च्छा अकल्पि अनुमितः तत्र मोहे या सान्त्वना सदृशी योग्या स्याद्भवेत् सा आशीःकपटादाशीर्वादच्छलात् यच्च अवादि उक्ता तत् सर्वं मत्वा ज्ञात्वा आलिजनः सखीजनो मन श्चित्तं आनन्दमन्दाक्षयोराह्लादलज्जयोरभिं समुद्रं अतनोत्प्राप्त वान् शीघ्रमेव भैम्याः स्वयंवरो भविष्यतीत्यानन्दः राज्ञाप्यस्याः कामविकारो ज्ञात इति लज्जा । मन्दाक्षं ह्रीस्त्रपा व्रीडेत्यमरः । शार्दूलविक्रीडितमिदं वृत्तं ॥ १२२ ॥

Digitized by Google

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यं।
तुर्य्यः स्थैर्य्यविचारणप्रकरणभ्रातर्य्ययं तन्महा
काव्ये चारुणि नैषधीयचरिते सर्गोनिसर्गोज्ज्वलः॥
१२३ ॥

श्रीहर्षमिति ॥ स्थैर्य्यस्य स्थिरत्वस्य विचारणा क्षणभङ्गवादनिराकरणेन विचारो यत्र तादृशस्य प्रकरणस्य ग्रन्थविशेषस्य भ्रातरि एकजनकत्वात् सोदरे तदप्यनेन कृतमिति भावः नैषधीयचरितेऽयं तुर्य्यश्चतुर्थः सर्गः समाप्त इति अन्यत् पूर्व्ववत् ॥ १२३ ॥

इति श्रीप्रेमचन्द्रन्यायरत्नविरचितायामन्वयबोधिकासमाख्यायां नैषधटीकायां चतुर्थः सर्गः समाप्तः ॥

Digitized by Google

॥ पञ्चमः सर्गः ॥

यावदागमयतेऽथ नरेन्द्रान्
स स्वयम्बरमहाय महीन्द्रः ।
तावदेव ऋषिरिन्द्रदिदृक्षु
र्नारदस्त्रिदशधाम जगाम ॥ १ ॥

पूर्वसर्गसूचितस्वयम्बरोपक्रममुद्दिश्य अनवरतकलहविलोकनकुतूहलस्य भगवतो नारदमुनेः पुरन्दरप्रोत्साहनार्थममरपुरप्रयाणमाह यावदिति ॥ अथ दमयन्तीसान्त्वनानन्तरं स महीन्द्रो भीमः स्वयम्बरमहाय स्वयम्बरोत्सवाय यावत् नरेन्द्रान् राज्ञ आगमयते स्वयम्बरायाहूतान् राज्ञः प्रतीक्षते तावदेव तस्मिन्नेव काले न तु किञ्चिद्विलम्ब्य इन्द्रदिदृक्षुरिन्द्रं द्रष्टुमिच्छुर्नारदऋषिस्त्रिदशधाम स्वर्गं जगाम गतवान् अत्र कलहो जायतामिति कृत्वा स्वयम्बरागमने इन्द्रं प्रवर्त्तयितुं गतवानित्यर्थः। आगमयत इति आगमयतेः कालहरण इत्यात्मनेपदं तावदेव ऋषिरिति ऋदुतोरकोऽन्य वेति सन्ध्यभावः इन्द्रस्य दिदृक्षुरिन्द्रदिदृक्षुरिति सम्बन्धषष्ठ्या तत्पुरुषः ॥ महउद्धव उत्सव इत्यमरः। अस्मिन् सर्गे स्वागतावृत्तं स्वागतेति रनभाद्गुरुयुग्ममिति लक्षणात् ॥ १ ॥

Digitized by Google

नात्र चित्रमनु तं प्रययौ यत्
पर्व्वतः स खलु तस्य सपक्षः ।
नारदस्तु जगतो गुरुरुच्चै-
र्व्विस्मयाय गगनं विललङ्घे ॥ २ ॥
गच्छता पथि विनैव विमानं
व्योम तेन मुनिना विजगाहे ।

सप्तभिः श्लोकैस्तस्य गमनप्रकारमेवाह ॥ नात्रेति ॥ पर्व्वतः पर्व्वतनामा मुनिः तं नारदं अनु पश्चात् यत् प्रययौ प्रयातवान् अत्र प्रयाणविषये न चित्रं नाश्चर्य्यं खलु यस्मात् स पर्व्वतस्तस्य नारदस्य सपक्षो मित्रं मित्रं हि सत्यपि स्वकार्य्यानुरोधे मित्रमनुगच्छत्येवेति नाश्चर्य्यमित्यर्थः अथ च सपक्षः पक्षसहितः पर्व्वतः शैलो यद्गच्छति तत्र नाश्चर्य्यं । तर्हि कुत्राश्चर्य्यमित्याह जगतो विश्वस्य उपदेष्टृत्वात् पूज्यत्वाच्च गुरुर्नारदस्तु नारदः पुनः उच्चैर्विस्मयाय अत्याश्चर्य्याय गगनं आकाशं विललङ्घे लङ्घितवान् विमानादिकं विना यदाकाशं लङ्घितवान् तदाश्चर्य्यमित्यर्थः जगतोगमनशीलस्य उच्चैर्विस्मयायेति वा वीनां पक्षिणामपि अपायेति प्राञ्चः अथ च गुरुर्गुरुत्वगुणवान् जगतः पृथिव्याः सकाशात् यदाकाशं लङ्घयति तदतितरामाश्चर्य्याय भवति गुरुत्वात् पतनमेव युक्तं न तूर्द्धगमनमिति भावः । गच्छतीति जगदिति वोपदेवः विस्मयायेति तादर्थ्ये चतुर्थी । गुरुस्त्रिलिङ्गी महति दुर्जरालघुनोरपि । पुमान्निषेकादिकारे पित्रादौ सुरमन्त्रिणीति मेदिनी ॥ २ ॥

गच्छतेति ॥ पथि विमानं व्योमयानं विनैव गच्छता तेन मुनिना नारदेन व्योम आकाशं विजगाहे विलोडितं विनैव पक्षिणेव

Digitized by Google

साधने हि नियमोऽन्यजनानां
योगिनान्तु तपसाखिलसिद्धिः ॥ ३ ॥
खण्डितेन्द्रभवनाद्यभिमाना
लङ्घते स्म मुनिरेष विमानान्।
अर्थितोऽप्यतिथितामनमेने
नैव तत्पतिभिरर्घ्यविनम्रैः ॥ ४ ॥
तस्य तापनभिया तपनः स्वं
तावदेव समकोचयदर्चिः।

एवशब्द इवार्थकः विमानं परिमाणशून्यं व्योम गच्छतेति वा कथमेव मित्यर्थान्तरन्यासेनोपपादयति हि यतः अन्यजनानां योगिव्यति रिक्तानां साध्यतेऽनेनेति साधने वाहनादौ नियमो गमनाद्यवधारणं वाहनादावेव गमनादिकं भवतीत्येवंरूप इत्यर्थः योगिनां तु पुनः तपसा तपस्यैव अखिलसिद्धिः समस्तकार्यनिर्वाहः अतस्तपो बलेनैव तेनाकाशमाक्रान्तमित्यर्थः। व्योमयानं विमानोऽस्त्रीत्यमरः ॥ ३ ॥

खण्डितेन्द्रिति ॥ एष मुनिर्नारदः खण्डितो दूरीकृत इन्द्रभवना दीनां यमलोकादीनां अभिमानो रमणीयत्वगर्वोऽनतिक्रमणीय त्वगर्वो वा यैस्तादृशानपि विमानान् व्योमयानानि लङ्घते स्म अति क्रामति स्म तथा तत्पतिभिस्तेषां विमानानां स्वामिभिः अर्घ्यविनम्रै रर्घ्यानतैः सद्भिः अर्थितोऽपि भगवन् मदीयं विमानमारुह्य स्थयं स्थीयतामिति याचितोऽपि अतिथितां आतिथ्यं नैव अनुमेने नैवाङ्गीचकार विलम्बभियेति भावः ॥ ४ ॥

तस्येति ॥ तपनः सूर्यस्तस्य नारदस्य तापनभिया तत्कर्मक

यावदेष दिवसेन मणीव
द्रागतप्यत न तन्महसैव ॥ ५ ॥
पर्य्यभूद्दिनमणिर्द्विजराजं
यत्करैरहह तेन तदा तं ।

सन्तापनाद्भयेनेत्यर्थः तावदेव तावत्परिमाणमेव स्वं स्वीयं अर्चिस्तेजः समकोचयत् सङ्कोचितवान् मत्समीपमागतोऽयं महानुभावो मुनिर्मदीयतेजसा सन्तप्तो माभूदिति मत्वा तेजः सङ्कोचितवानित्यर्थः तावदेवेत्यस्याकाङ्क्षां निवारयति यावत् यावत्परिमाणसङ्कोचेनैव एष सूर्य्यः स्वयं तन्महसैव मुनितेजसैव द्राक् झटिति न अतप्यत सन्तप्तो नाभूत् यथा दिवसेन दिनतेजसा मणी सन्तप्यते अल्पस्य सङ्कोचे स्वतेजसा मुनेरभिभवः स्यात् अधिकस्य सङ्कोचे मुनितेजसा स्वस्याभिभवः स्यादतो यथोभयं न भवति तथा तेजः संकोचितवानित्यर्थः नारदः सूर्य्य इव तेजस्वीति भावः यावत्तावदित्यव्ययं ॥ ५ ॥

पर्य्यभूदिति ॥ दिनमणिः सूर्य्यः करैः स्वतेजोभिः करस्थैर्द्विजराजं चन्द्रं यत्पर्य्यभूत् परिभवति स्म अहह खेदे तदा तस्मिन् काले तेन अवतारस्थद्विजराजपरिभवस्य हेतुना अहहाश्चर्य्ये द्विजराजो ब्राह्मणश्रेष्ठो नारदः करैः स्वकिरणैः करस्थैस्तं अवतारस्थद्विजराजपरितापिनं सूर्य्यं खलु निश्चितं पर्य्यभूत् परिभूतवान् युक्तमेतत् यतः अत्र लोके स्वकृतं स्वेन जनितं कर्म्म शुभाशुभात्मकं कोजनो न भुङ्क्ते अपि तु सर्व्व एव भुङ्क्ते। अत्युत्कटैः पुण्यपापैरिहैव फलमश्नुते इतिस्मृतेः एवं द्विजराजं परिभवन् सूर्य्योऽपरेण द्विजराजेन परिभूत इत्यर्थः। सूर्य्यः स्वतेजसा द्विजराजं नारदं पूर्व्वं परिभूतवान् अनन्तरं द्विजराजो

Digitized by Google

पर्य्यभुत्खलु करैर्द्विजराजः
कर्म्मकः स्वकृतमद्य न भुङ्क्ते ॥ ६ ॥
विष्टरं तटकुशालिभिरद्भिः
पाद्यमर्घ्यमथ कच्छरुहाभिः।
पद्मवृन्दमधुभिर्मधुपर्कं
स्वर्गसिन्धुरदितातिथयेऽस्मै ॥ ७ ॥
स व्यतीत्य वियदन्तरगाधं
नाकनायकनिकेतनमाप।

नारदोऽपि क्रुद्धः सन् स्वतेजसा सूर्य्यं परिभूतवानिति वेति भावः ॥ ६ ॥

विष्टरमिति ॥ अथानन्तरं स्वर्गसिन्धुर्मन्दाकिनी अतिथये अभ्यागतायास्मै नारदाय तटकुशालिभिस्तीरजातकुशश्रेणीभि विष्टरं आसनं अदित दत्तवती तथा अद्भिर्जलैः पाद्यं अदित कच्छरुहाभिर्जलप्रायदेशजातदूर्व्वाभिरर्घ्यं अदित पद्मवृन्दस्य पद्मसमूहस्य मधुभिर्मकरन्दैर्मधुपर्कं अदित। अन्योऽपि अभ्यागताय आसनादिकं दत्वा तोषयति कुशश्रेण्यादियुता मन्दाकिनी दृष्टा स तु तोषेति भावः। दृष्यासनयोर्विष्टरइति आसनार्थे विष्टरोऽनियमितः। अदितेति दाञोलुङ्। जलप्रायमनूपं स्यात्पुंसि कच्छस्तथाविधइति दूर्व्वा तु शतपर्व्विका। सहस्रवीर्य्याभार्गव्यौ रुहानन्तेति चामरः ॥ ७ ॥

सइति ॥ स नारदः अगाधं अपरिमाणं वियदन्तरमाकाशान्तरालं व्यतीत्य अतिक्रम्य नाकस्य स्वर्गस्य नायकः पतिरिन्द्रस्तस्य निकेतनं गृहं

सम्प्रतीर्य्य भवसिन्धुमनादिं
ब्रह्म शर्म्मभरचारु यतीव ॥ ८ ॥
अर्घ्यनाभिरुचितोच्चतराभि
स्तं सदक्षतातिथिमिन्द्रः ।
यावदर्घ्यकर किल साधोः
प्रत्यवायधृतये न गुणाय ॥ ९ ॥

आप प्राप्तवान् यतीव यथा संयमी अनादिं प्रवाहरूपत्वात् अवधिशून्यं भवसिन्धुं संसाररूपसमुद्रं संप्रतीर्य्य उत्तीर्य्य शर्म्मणः सुखस्य भरेण समूहेन चारु रमणीयं ब्रह्म परमात्मानं प्राप्नोति यथा । आनन्दो ब्रह्मणो रूपमित्यादिश्रुतेः दुःखमपि सुखसमूहेन चारु यत्र दुःखेन सम्भिन्नमित्यादिवचनात् ॥ ८ ॥

तत्रोपस्थितं नारदमिन्द्रोऽधिकं पूजितवानित्याह ॥ अर्घ्यनाभिरिति ॥ इन्द्रोऽतिथिमभ्यागतं तं नारदं उचिताभिर्योग्याभिरर्घ्यनाभिरुच्चतराभिरत्यधिकाभिरर्घ्यनाभिः पूजाभिश्चारु सम्यक् विधिपूर्व्वकं यथा तथा सदक्षत पूजितवान् । अधिकपूजायाः कारणमाह किल यतः साधोर्यावदर्घ्यकरणं यथोचितविधानं तावती यदि पूजा अतिथ्यागमने उक्ता तत्करणं वा प्रत्यवायधृतये अकरणजन्यदुरितपरिहारमात्राय भवति न गुणाय न विशेषफलाय भवति अतोविशेषफलमनुसन्धायैव नारदमधिकं पूजयामासेति भावः योभूयसारभवेत्तस्य फले विशेष इति न्यायात् ॥ ९ ॥

Digitized by Google

नामधेयसमतासखमद्रे
रद्रिभिन्मुनिमथाद्रियत द्राक् ।
पर्व्वतोऽपि लभतां कथमर्च्चां
न द्विजः स विबुधप्रभुलम्भी ॥ १० ॥
तद्भुजादतिवितीर्णसपर्य्यात्
घोङ्गुमानपि विवेद मुनीन्द्रः ।

पर्व्वतमुनिमपि पूजितवानित्याह ॥ नामधेयेति ॥ अथ नारदसत्का रानन्तरं अद्रिभित्पर्व्वतभेदो इन्द्रः नामधेयसमतया पर्व्वतेतिसंज्ञा साम्येन सखा मित्रं तादृशं मुनिं पर्व्वतं द्राक् झटिति आद्रियत पूजितवान् कथं पर्व्वतभिदा पर्व्वतस्य पूजा कृतेति नामद्वयच्छले नाध्याह सद्विजोब्राह्मणः पर्व्वतोऽपि विबुधप्रभुलम्भी सन् इन्द्रं प्राप्तः सन् अर्घां पूजां कथं न लभतां न प्राप्नोतु अपि तु प्राप्नुमर्हत्येव सन्तोऽप्यागतं शत्रुमपि पूजयन्तीत्युक्तं अयं हि ब्राह्मणो नाममात्रेण पर्व्वतः न तु वास्तविकपर्व्वतत्ववानिति युक्तमेवास्य पूजनमित्यर्थः अथ च पर्व्वतः पाषाणतुल्यो मूर्खोऽपि द्विजो विबुधप्रभुलम्भी पण्डित श्रेष्ठं प्राप्तः सन् अर्घां कथं न लभतां जातिमात्रेणापि ब्राह्मणः पण्डितेनापि पूज्यतएव । सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे इति स्मृतेः । समतासखमिति राजादित्वाट्टः ॥ १० ॥

इन्द्रस्य दातृत्वातिशयं वर्णयति ॥ तद्भुजादिति ॥ मुनीन्द्रोनारदः तान् दातृत्वेन प्रसिद्धान् घोङ्गुमान् कल्पवृक्षानपि अति अत्यन्तं वितीर्णा विहिता सपर्य्या पूजा येन तादृशात् तस्य इन्द्रस्य भुजाद्धस्तात् उपदेष्टुः सःसहस्थित्या एकस्मिन् स्वर्गे सहवासेन सुशिक्षितया सुबुभ्यसया दानपारमिवक्षा दानस्य पारमं परमत्वं विषवे बाध

स्वःसहस्थितिसुखस्थिततया ता
न्दानपारमितयैव वदान्यान् ॥ ११ ॥
मुद्रितान्यजनसंकथनः सन्
नारदं बलरिपुः समवादीत् ।
आकरः स्वपरभूरिकथानां
प्रायशो हि सुहृदोः सहवासः ॥ १२ ॥
तं कथानुकथनप्रसृतायां
दूरमालपनकौतुकितायां ।

दानपारमी तस्य भावस्तत्ता तयैव अतिदातृतयैवेत्यर्थः हेतुना वदान्यान् दानशौण्डान् विवेद जानाति स्म कल्पवृक्षाणां न स्वाभाविकं वदान्यत्वं किन्तु इन्द्रभुजाच्छिक्षितमित्यर्थः । दानपारमितया दानविधिबोधकग्रन्थविशेषेणेति केचित् । तद्भुजादिति गुर्व्वादौ ऊर्ध्वादेरित्यपादानसंज्ञायां पञ्चमी । पूजा नमस्यापचितिः सपर्य्यार्च्चार्हणाः समा इत्यमरः । वदान्योदानशौण्डे स्यादवदान्य स्वाद्भाषिणीति वलः ॥ ११ ॥

अथ नारदं प्रतीन्द्रस्य वचनमुपक्रमते द्वाभ्यां ॥ मुद्रितेति ॥ बलरिपुरिन्द्रो मुद्रितं परित्यक्तं अन्यजनैः सह सङ्कथनं सम्भाषणं येन तादृशः सन् भवन् नारदं समवादीत् सादरमुवाच अर्थान्तरमुपन्यस्यति हि यतः सुहृदोर्मित्त्रयोः सहवास एकत्रावस्थानं प्रायशो बाहुल्येन स्वस्य परेषाञ्च भूरिकथानां नानाविधालापानां आकर उत्पादको भवति ॥ १२ ॥

तमिति ॥ आलपने परस्परसम्भाषणे या कौतुकिता कुतूहलित्वं तस्यां दूरमत्यन्तं कथानुकथनेन वचनानुवचनेन प्रसृतायां प्रवृद्धायां सत्यां शतमन्युरिन्द्रः भूभृतां राज्ञां चिरं बहुकालं याध्वा या अभा

Digitized by Google

भूभृतां चिरमनागतिहेतुं
ज्ञातुमिच्छुरवदच्छतमन्युः ॥ १३ ॥
प्रागिव प्रसुवते नृपवंशाः
किन्नु सम्प्रति न वीरकरीरान् ।
ये परप्रहरणैः परिणामे
विक्षताः क्षितितले निपतन्ति ॥ १४ ॥
पार्थिवं हि निजमाजिषु वीरा
दूरमूर्द्धगमनस्य विरोधि ॥

गतिः स्वर्गे अनागमनं तस्या हेतुं कारणं ज्ञातुमिच्छुः सन् तं नारदं अवदत् किमिति बहुकालं राजानो मृताः सन्तः स्वर्गे नागच्छन्तीति ज्ञातुमिच्छया उवाचेत्यर्थः । शतमन्युर्दिवस्पतिरित्यमरः ॥ १३ ॥

पञ्चभिरिन्द्रवाक्यमनुवदति ॥ प्रागिवेति ॥ किं प्रश्ने नु सम्बोधने हे मुने नृपा राजानस्त एव वंशा वेणवस्ते प्रागिव पूर्वमिव संप्रति इदानीं वीरा एव करीरा वंशाङ्कुरास्तान् किं न प्रसुवते न जनयन्ति यथा ते पूर्वं वीरानजनयन् तथाधुना किमिति न जनयन्तीत्यर्थः ये वीर करीराः परिणामे आयुःशेषे वेणुपक्षे पक्वतादशायां परेषां शत्रूणां प्रहरणैर्खड्गादिभिरस्त्रैर्विक्षता क्षताः सन्तः पक्षे अन्येषां कुठारादि भिश्छिन्नाः सन्तः क्षितितले पृथिवीपृष्ठे निपतन्ति । करीरः कलसे वृक्षभेदे वंशाङ्कुरेऽपि चेति विश्वः ॥ १४ ॥

तृपाणां तथात्वे तव किं फलमित्यत आह ॥ पार्थिवमिति ॥ हि यतो वीराः शूराः पार्थिवं सत्यपि पाञ्चभौतिकत्वे पृथिव्यंशबाहुल्यात्तदि क्षतं अतएव गौरवात्पतनकारणबाहुल्यात् दूरमत्यन्तं ऊर्द्धगमनस्य

Digitized by Google

गौरवाद्यदपुरपास्य भजन्ते
मत्कृतामतिथिगौरवऋद्धिं ॥ १५ ॥
साभिशापमिव नातिथयस्ते
मां यदद्य भगवन्नुपयन्ति ।
तेन न श्रियमिमां बहु मन्ये
स्वोदरैकभृतिकार्य्यकदर्य्यां ॥ १६ ॥

स्वर्गप्राप्तेर्विरोधि प्रतिबन्धकं निजं स्वीयं वपुः शरीरं आत्मावयवत्वा देकतं आजिषु संग्रामेषु अपास्य परित्यज्य मत्कृतां मया सम्पादितां अतिथिगौरवऋद्धिं अभ्यागतार्थसत्कारसमृद्धिं भजन्ते प्राप्नुवन्ति संग्रामनिहतैराजभिर्दिव्यशरीरैः सद्भिः स्वर्गमागत्य यन्ममातिथिभिर्भूयते तदेव मदीयसम्पत्तिफलमित्यर्थः । गौरवऋद्धिमित्यत्र ऋत्यकः इत्यादिना सन्धिनिषेधः ॥ १५ ॥

तन्वतिथिवैमुख्यमेव गृहिणां दोषाय भवति न तु तेषामनागमन मित्याशङ्क्याह ॥ साभिशापमिति ॥ हे भगवन् ऐश्वर्य्यादिसमग्र शालिन् नारद ते वीरा अतिथयः अद्य इदानीं साभिशापमिव मद्दा पातकाद्यभिशंसनमिव मां यत् उपयन्ति न प्राप्नुवन्ति तेन हेतुना इमां श्रियं सम्पत्तिं न बहु मन्ये नात्यन्तं सम्मानयामि किम्भूतां यतः स्वोदरस्य निजजठरस्य एका केवला या भृतिर्भरणं सैव कार्य्यं यस्याः सा चासौ अत एव कदर्य्या कुत्सिता चेति तादृशीं सम्पत्तेर्हि अतिथिसत्काराय नियोगेनैव साफल्यं न तु स्वोदरपरि पूरणमात्रं तेषामनागमने खिद्यामीत्यर्थः । ऐश्वर्य्यस्य समग्रस्य वीर्य्यस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षसां भग इति स्मृतं इति ॥ १६ ॥

Digitized by Google

पूर्व्वपुण्यविभवव्ययबद्धाः
श्रीभरा विपद एव विमृष्टाः।
पात्रपाणिकमलार्पणमेषां
तासु शान्तिकविधिर्व्विधिदृष्टः॥१७॥
तद्विमृज्य मम संशयशिल्पि
स्फीतमत्र विषये सहसार्घं।

किञ्च पूर्व्वेति॥ हे भगवन् पूर्व्वपुण्यानां पूर्व्वजन्मकृतसत्कृत्यानां यज्ञादिजन्यपुण्यादृष्टानां यो विभवो माहात्म्यं तस्य यथेन परिपाके न नाशेन वा बद्धाः सम्बद्धाः प्राप्ताः श्रीभराः सम्पत्तिसमूहा विमृष्टा तत्त्वतो विचारिताः सन्तः विपद एव क्लेशसञ्चितपुण्यक्षयकारित्वात् भोगेनायुर्विनाशित्वया पर्य्यवसाने दुःखदायित्वाच। किन्तु तासु सम्पत्स्वत्यन्तविपत्सु एषां श्रीभराणां पात्रस्य विहितसम्प्रदानस्य पाणिकमले करपद्मे अर्पणं त्यागः शान्तिकविधिः शान्तिप्रयोजनक कर्म्म विधीयतेऽनेनेति विधिना वेदेन शास्त्रेण वा दृष्ट उक्तः पात्रे ति सत्पात्रार्पणार्थमुक्तं। उक्तञ्च सर्व्वत्र गुणवद्दानं अपात्रादिष्वपि स्मृतं। देशे काले विधानेन पात्रे दत्तं विशेषत इति। अन्यासामपि विपत्सु शान्तिककर्म्म क्रियते तस्याः पश्चाधिकारं युक्तमिति पाणिकमल रूपकेऽभिप्रायः॥ १७॥

तदिति॥ तत्तस्मात् भगवतस्तव श्रुतिसारैः श्रवणसुखावहै र्वाग्भिर्वचनैः अत्र इदानीं मम अत्र विषये अतिथ्यागमकारण जिज्ञासायां संशयस्य दुःखस्य मर्म्मैव विनाशने शल्पिभिर्मन्त्रकल्पैः अथ च सन्ध्याविधियुक्तमन्त्रविशेषैर्भूयतां किं कृत्वा मम साभिप्रायस्थानात्

श्रूयतां भगवतः श्रुतिसारै-
रद्य वाग्भिरघमर्षणदक्षाभिः ॥ १८ ॥
इत्युदीर्य मघवा विनयर्द्धिं
वर्द्धयन्नवहितत्वभरेण ।
चक्षुषां दशशतीमनिमेषां
तस्थिवान् मुनिमुखे प्रणिधाय ॥ १९ ॥
वीक्ष्य तस्य विनये परिपाकं
पाकशासनपदं स्पृशतोऽपि ।

वारवासारश्च किमर्त्तयो नागच्छन्तीति संशयः सन्देह एव शिल्पी निर्म्माता हेतुर्य्यस्य तादृशं यथाविधं संशयजन्यमित्यर्थः स्फीतमविप्रहतं बहुं दुःखं झटिति शीघ्रं विसृज्य अपनीय संशयच्छेदकं तव वचनं श्रुत्वा मम दुःखं यास्यति तत् तादृशं कथयेत्यर्थः । अन्यस्यापि मन्त्रविशेषश्रवणात् दुःखमपगच्छति । अघमर्षणदक्षो ऽपि श्रुतिभ्यो वेदेभ्यः साराः श्रेष्ठभूता झटिति च अघं पापं अपनयन्ति । श्रूयतामिति भावे लोट् ॥ १८ ॥

इतीति ॥ मघवा इन्द्र इति पूर्व्वोक्तं उदीर्य्य उक्त्वा अवहितत्वस्य अवधानस्य चित्तैकाग्रताया भरेण आधिक्येन विनयर्द्धिं सम्यातिविनीतत्वं वर्द्धयन् सन् अनिमेषां निमेषरहितां चक्षुषां दशशतीं सहस्रं मुनिमुखे प्रणिधाय संस्थाप्य तस्थिवान् स्थितः ॥ १९ ॥

अथ नारदोवक्तुमुपक्रमते ॥ वीक्ष्येति ॥ नारदः पाकशासनपदं इन्द्रपदं स्पृशतोऽपि अधिकुर्व्वतोऽपि तस्य इन्द्रस्य विनये परिपाकं परिणतिं प्रकर्षं वीक्ष्य अनुभूय विस्मितः सन् ईदृशैश्वर्य्यशालिनोऽप्येता

Digitized by Google

नारदः प्रमदगद्गदयोक्त्या
विस्मितः स्मितपुरःसरमाख्यत् ॥ २० ॥
भिक्षिता शतमखी सुकृतं य
त्तत्परिश्रमविदः खविभूतौ ।
तत्फले तव परं यदि चेला
क्रोशलब्धमधिकादरदन्तु ॥ २१ ॥

तान् विस्मय इति प्राप्तविस्मयः सन् स्मितमीषद्धसनं पुरःसरमग्रवर्त्ति यत्र क्रियायां तद्यथा तथा प्रमदेन हर्षेण गद्गदया स्खलन्त्या उक्त्या वाचा आख्यदुक्तवान् स्मितपूर्व्वाभिभाषिणो हि महान्त इति स्मित पुरःसरमित्युक्तं। आख्यदिति ख्यातेर्लुङोऽदङ् ख्यातेराक्त्ये चेत्यङ् विवक्षिते चावित्यादिनाकारलोपः ॥ २० ॥

यदाख्यत्तदाह योडशभिः श्लोकैः ॥ भिक्षितेति ॥ हे इन्द्र त्वया यत् सुकृतं पुण्यं शतमखी यज्ञशतं भिक्षिता याचिता यज्ञशतं कृत्वा यत् सुकृतं सञ्चितमित्यर्थः तत्फले तस्य सुकृतस्य फलभूतायां खविभूतौ इन्द्रत्वलक्षणे निजैश्वर्य्ये हेला तेन न प्रियमिमां वहुमन्य इत्यादिनोक्ता अवज्ञा परं केवलं तव नान्यस्य यदि सम्भावनायां किम्भूतस्य तव तत्प रिश्रमविदः तस्याः शतमखीभिक्षायाः परिश्रममायासं वेत्तीति तादृशस्य आयासाधिगतस्वैश्वर्य्ये केवलं तवैव अवज्ञा दृश्यत इत्यर्थः इतरेषामेवं न भवतीत्याह तु यस्मात् क्लेशलब्धं आयासप्राप्तं वस्तु अधिकमधिकमादरं ददातीति तादृशं । भिक्षिर्द्विकर्म्मकः शतमखी ति गौणत्वात्तस्यां कर्म्मं दुहादेरित्युक्तत्वे प्रथमा । हेलाऽवज्ञाविलास योरिति विश्वः ॥ २१ ॥

२ म

सम्पदस्तव गिरामपि दूरा
यन्न नाम विनयं विनयन्ते।
श्रद्दधाति क इवेह न साक्षा
दाह चेदनुभवः परमाप्तः॥२२॥
श्रीभरानतिथिसात्करवाणि
स्वोपभोगपरता न हितेति।

सम्पद इति॥ नाम सम्भावनायां हे इन्द्र गिरां वाचां दूरा अपि दूरवर्त्तिन्योऽपि इयत्तया वक्तुमशक्या अपीत्यर्थः तव सम्पदः सम्पत्तयो यत् विनयं विनयित्वं न विनयन्ते नापनयन्ति न दूरी कुर्वन्ति इह अस्मिन् विषये परमाप्तोऽतिसुहृत् परं केवलं आप्तः सुहृद्भूतो वा साक्षादनुभवः प्रत्यक्षं यदि नाह न ब्रूते सतोऽपि अतिसम्पत्तु नमतिक्रमयीति यदि प्रत्यक्षविषयो न स्यादित्यर्थः तदा क इव श्रद्दधाति विश्वसिति अपि तु न कोऽपि संपत्सु हि विनयच्युतिरेव नियतेति तव विनये परमुखेभ्यः शृखतां विश्वासो न जायत इत्यर्थः यद्वा अनुभवतीत्यनुभवः साक्षादनुभवः कृतप्रत्यक्षः परमाप्तः परमप्रत्ययितोजनो यदि नाह तर्हि क इव श्रद्दधाति असम्भाव्यमाने हि विषये कथञ्चिदाप्तवाक्यादिश्वासो जायते॥ २२॥

श्रीति॥ श्रीभरान् सम्पत्तिसमूहान् अतिथिसात्करवाणि अतिथिभ्यो देयान् कुर्य्यां स्वोपभोगपरता आत्मोपभोगासक्तता न हिता नोचिता इति पश्यतः पर्य्यालोचयतस्तव वचोभिरिव अन्त रपि अन्तःकरणेऽपि इयमनुभूयमाना कापि वक्तुमशक्या अधिका

पश्यतो बहिरिवान्तरपीयं
दृष्टिसृष्टिरधिका तव कापि ॥ २३ ॥
स्वाः स्वभावमधुरैरनुभावै
स्तावकैरतितरां तरलाः स्मः ।
यां प्रशाधि गलितावधिकालं
साधु साधु विजयस्व बिडौजः ॥ २४ ॥

भूयसी दृष्टिसृष्टिर्ज्ञानसृष्टिः चक्षुश्च चक्षुःसृष्टिः यथा तव बहिः शरीरे अधिका चक्षुःसृष्टिस्तथा अन्तरपि अधिका ज्ञानसृष्टिरित्यर्थः त्वमेवातिविवेचको नान्य इति भावः। दृष्टिर्ज्ञानेऽक्ष्णि दर्शने इत्यमरः ॥ २३ ॥

स्वा इति ॥ हे बिडौजः इन्द्र तावकैस्त्वदीयैः स्वभावमधुरैः प्रकृतिसुन्दरैरनुभावैः स्वभावैर्भावबोधकव्यापारैर्वा हेतुभिर्वयं अतितरामत्यर्थं तरलाः स्मः चपला भवामः त्वदनुभावान् दृष्ट्वा वयम् धैर्य्याभवाम इत्यर्थः आश्रितानामस्माकं तारल्यमनुचितमिति स्वाः पीडायां पर्वे वा अतएव गलितोऽवधिर्मर्य्यादा यस्य तादृशः कालो यस्य क्रियायां तद्यथा स्यात्तथा अत्यन्तकालमित्यर्थः गलितावधिकालं याप्येति वा यां स्वर्गं प्रशाधि पालय साधु साधु भद्रं भद्रं विजयस्व सर्वोत्कर्षेण वर्त्तस्व। प्रशाधीति शास्तेर्हि हुझल्भ्यो हेर्धिरिति हेर्धि शासस्तोर्धौ लुगिति सकारलुक् विजयस्वेति विपराभ्यां जेरित्यात्मनेपदं। अनुभावः स्वभावे स्यान्निश्चये भावसूचक इति विश्वः तरलश्चञ्चले सिक्ते हारमध्यमणावपीति च। बिडौजाः पाकशासन इत्यमरः बिड्व्यापकं ओजोऽस्येति व्युत्पत्तिः ॥ २४ ॥

Digitized by Google

सख्युविश्रुततनुश्रवदृश्र
श्राविताखिलनिजाश्रवधूनां ।
यस्त्विहानुपगमः श्रृणु राज्ञां
तज्जगद्युवमुदन्तमुदन्तं ॥ २५ ॥
सा भुवः किमपि रत्नमनर्घं
भूषणं जयति तत्र कुमारी ।

एवमिन्द्रं प्रश्नस्य तदनन्तरोत्तरयितुमुपक्रमते ॥ सख्येति ॥ हे इन्द्र सख्ये युधे विश्रुताभ्यां बाणादिभिर्भिन्नाभ्यस्तनुभ्यः शरीरेभ्य स्रवता क्षरता स्रवेण रुधिरेण क्षालितानि धौतानि अखिलानि सर्व्वाणि निजाश्रवाणि स्वकीयपापानि तैर्व्वधूनां स्वर्गगमनप्रतिबन्धक गौरवरहितानां राज्ञां यत्तस्मात् इह अनुपगम आगमनाभावः तं प्रसिद्धं तं उदन्तं वृत्तान्तं श्रृणु त्रिभुवमुदन्तं जगतां त्रिलोकानां यूनां तरुणानां मुत् हर्षो यस्मात् तादृशं एतद्वृत्तान्तश्रवणे सर्व्वेषां यूनां कौतुकं भवतीत्यर्थः एतेन यूनस्तवाप्यावश्यकमस्तीति सूचितं जगद्यूनां या मुत् हर्षस्तया अन्तोऽवधिर्यस्य तादृशं एतत्पर्य्यन्तमित्यर्थे इत्याहुः केचित् । वार्त्ताप्रवृत्तिर्वृत्तान्त उदन्तः स्यादित्यमरः ॥ २५ ॥

सेति ॥ तत्र मनुष्यलोके भुवः पृथिव्याः किमपि लोकोत्तरं अनर्घं अमूल्यं रत्नं भूषणं अलङ्करणभूता कुमारी अजातपाणिग्रहा दमयन्ती नाम सा भीमभूपतनया भीमनृपतिसुता जयति सर्व्वोत्कृष्टा सती वर्त्तते सा का या अमोघं अव्यर्थं मदनशस्त्रं कामशस्त्ररूपया

Digitized by Google

भीमभूपतनया दमयन्ती
नाम या मदनशस्त्रममोघं ॥ २६ ॥
संप्रति प्रतिमुहूर्त्तमपूर्व्वा
कापि यौवनजवेन भवन्ती।
आश्रिर्खं सुकृतसारभृते सा
कापि यूनि भजते किल भावं ॥ २७ ॥
कथ्यते न कतमः स इति त्वं
मां विवक्षुरसि किं चलदोष्ठः।

अतिसुन्दरीत्यर्थः। कुमारीत्यनेन नेयमधुना परवधूरतस्त्वां लिप्सुर्वेदु योगं कुर्व्विति सूचितं॥ २६॥

सम्प्रतीति॥ किल प्रसिद्धौ सा दमयन्ती संप्रति इदानीं कापि लोकोत्तरे अथ च मयाप्यज्ञातनामनि यूनि तरुणे भावं अनुरागं भजते किम्भूता यौवनस्य जवेन वेगेन यौवनप्रिज्ञातां शैघ्र्येत्यर्थः प्रतिमुहूर्त्तं प्रतिक्षणं कापि अनिर्व्वचनीया अपूर्व्वा अतिमनोज्ञा भवन्ती जायमाना किम्भूते यूनि आश्रिखं नखादिशिखापर्य्यन्तं सुकृतसारेण उत्कृष्टपुण्येन भृते पूर्णे एतेन पुण्यातिशयलभ्या सा त्वमपि देवराजत्वादतिपुण्यवानेव अतस्तव तत्रोपयोगोऽस्तीति सूचितं। यौवनभरेणेति क्वचित् पाठः ॥ २७॥

कथ्यतइति। यस्मिन् सा भावं भजते स युवा कतमः बहुषु मध्ये कः श्रेष्ठस्त्वया न कथ्यते कामीत्यनेन गोप्यते इति त्वं किं किमर्थं मां विवक्षुरसि वक्तुमिच्छसि कथं मे विवक्षा भवता ज्ञातेत्याह यवन्तं भवन् स्पन्दमानओष्ठोयस्य तादृशः ओष्ठस्पन्दात्तव वक्तु

Digitized by Google

अर्द्धवर्त्मनि रुणत्सि न पृच्छां
निर्गमेण न परिश्रमयैनां ॥ २८ ॥
यत्पथावधिरणुः परमः सा
योगिधीरपि न पश्यति यस्मात्।

मिच्छा मयानुमितेत्यर्थः हे इन्द्र एच्छां तावत्प्रश्नं अर्द्धवर्त्मनि अर्द्ध
पथे मुखमध्यएव न रुणत्सि निरुद्धां न करोषि अपि तु निरुद्धामेव
कुर्विति काकुः एनां एच्छां निर्गमेण मुखाद्वहिर्निःसरणेन न परिश्रमय
मा परिश्रमं प्रापय मम उत्तरदानसामर्थ्याभावात्तवेयं एच्छा विफला
भविष्यति तस्मान्न त्वया प्रष्टव्यमित्यर्थः। तव यद्विषयकः प्रश्नो भवि
ष्यति तमहं न ज्ञास्यामीति भावः। प्रश्नोऽनुयोगः एच्छा इत्यमरः
॥ २८ ॥

ननु योगिनापि त्वया कथं न ज्ञायत इत्यत्राह ॥ यदिति ॥
परमोऽणुः परमाणुर्यस्या योगिधियः पथोविषयस्य अवधिर्मर्यादा
भूतः परमाणुपर्य्यन्तमेव या विषयीकरोतीत्यर्थः सा योगिनां
युक्तानां युञ्जानानां वा मादृशां धीरपि योगजसन्निकर्षजन्यप्रत्य
क्षात्मिका बुद्धिरपि यस्माद्धेतोः एवं भैम्या अभिलषितं युवानं न
पश्यति न विषयीकरोति अतोयोगिना सतापि मया स कथं ज्ञायता
मित्यर्थः कथं योगिबुद्धेरप्यविषयत्वमित्याह किम्भूतं एवं तादृग्।
अप्रगल्भया भैम्या निजमनःपरमाणौ परमाणुरूपे अल्पीयमनसि
वर्त्तमाना या श्रीलेश्या सैव दरी कन्दरा तत्र शेते योऽहरिः सिंहस्त
द्रूपीभूतं योगिबुद्धा परमाणुर्विषयीकर्त्तुं शक्यते न तु तदन्तर्गतः
कश्चित् पदार्थः साऽत्यन्तजलावस्यात् कस्याऽप्यं मनोगतं न कथयती

वासया निजमनःपरमाणौ
ह्रीदरीशयदरीकृतमेतं ॥ २९ ॥
सा शरस्य कुसुमस्य शरव्या
सूचिता विरहवाधिभिरङ्गैः।
तातचित्तमपि धातुरधत्त
स्वस्वयम्बरमहाय सहायं ॥ ३० ॥
मन्मथाय यदयादित राज्ञां
इतिदूत्यविषये विधिराज्ञां।

र्थः। अन्यस्यां कन्दरायामपि शयानः सिंहः केनापि न चाल्यते तथा
येति लज्जाधिक्यसूचनाय सिंहरूपकेण तस्य श्रेष्ठत्वं सूचितं
॥ २९ ॥

सेति ॥ सा भैमी विरहवाधिभिः पाण्डुत्वकृशत्वादिना पूर्व्वराग
विप्रलम्भसूचकैरङ्गैः करादिभिः कुसुमस्य पुष्परूपस्य शरस्य वाणस्य
कामवाणस्येत्यर्थः शरव्या वेध्या सूचिता पितरि ज्ञापिता सती स्वस्य
यम्बरमहाय स्वकीयस्वयम्बरोत्सवाय तातचित्तमपि स्वपितुर्भीम
नृपतेरन्तःकरणमपि धातुः प्रजापतेः सहायं अधत्त कृतवती प्रजा
पतीच्छया अवश्यम्भाविनि वैवाहिकविधौ पिता अङ्गकार्श्यादिना
विरहमनुमाय अधुना विवाहयोग्येयमिति निश्चित्य उद्योगं करो
तीत्यर्थः हे तात इत्थं धातुर्जनयितुश्चित्तमिति वा स्वयम्बरमहायेत्य
नेन नेयं विवाहविधौ पितृपरतन्त्रेति सूचितं ॥ ३० ॥

मन्मथायेति ॥ अथानन्तरं विधिः राज्ञां इतौ आह्वाने यत् दूत्यं
दूतकर्म्म तस्य विषये विधानाय यत् मन्मथाय कामाय आज्ञां अदित

Digitized by Google

तेन तत्परवशाः पृथिवीशाः
सङ्गरं गरमिवाकलयन्ति ॥ २१ ॥

येषु येषु सरसा दमयन्ती
भूषणेषु यदि वापि गुणेषु ।
तत्र तत्र कलयापि विशेषो
यः स हि क्षितिभृतां पुरुषार्थः ॥ २२ ॥

शैशवव्ययदिनावधि तस्या
यौवनोदयिनि राजसमाजे ।

इत्यवान् तेन हेतुना पृथिवीशा राजानस्तत्परवशाः कामाद्यधीनाः सन्तः सङ्गरं युद्धं गरमिव विषमिव आकलयन्ति अनुभवन्ति यथा अनिष्टसाधनत्वाद्विषं परित्यज्यते तथा भैम्येकत्वाभकामैराजभि युद्ध परित्यज्यत इत्यर्थः अतएव पृथिव्यां युद्धाभावात् राजानोऽत्र नागच्छन्ति । क्षविराकारसाक्षानमित्यमरः ॥ २१ ॥

येष्विति ॥ दमयन्ती येषु येषु भूषणेषु अलङ्कारेषु यदि वा अथ वा येषु येष्वपि गुणेषु शोभाविलासादिनायकगुणेषु शिल्प गीतादिविषयेषु वा सरसा सानुरागा भवति तत्र तत्र तेषु तेषु भूषणेषु गुणेषु च कलयाऽपि लेशेनापि यो विशेषः अन्याऽपेक्षया आधिक्यं स हि स एव क्षितिभृतां राज्ञां पुरुषार्थः पौरुषं धर्मादि रूपो वा दमयन्तीसन्तोषाय तेऽपि भूषणादिषु यासक्ता न तु संग्रामे इत्यर्थः ॥ २२ ॥

शैशवेति ॥ राजसमाजे नृपसमूहे कुसुमेषोः कामस्य आदरात् अनुरागात् भैमयायामभिनिवेशमासक्तिः तथा भैम्याः शैशवस्य

आदरादृदरदः कुसुमेषो
रुल्ललास मृगयाभिनिवेशः ॥ ३३ ॥
इत्यमी वसुमतीं कमितारः
सादरास्तदतिथीभवितुं न ।

आ अस्य वयोऽपगमो यत्र दिने तदेव अवधिर्यत्र क्रियायां सादर्शं यथा स्यात्तथा बाल्यापगमदिनमारभ्येत्यर्थः अहरहर्दिनंदिनं उल्लास वहधे वयःसन्धौ वर्त्तमानाया दमयन्त्याः अवस्थावधि राजानः कामव शगा जाता इत्यर्थः किम्भूते यौवनं तारुण्यं उदयो धनसमृद्धिः तौ विद्येते यस्येति तादृशे किम्वा यौवनस्य उदयआरम्भोविद्यते यत्रेति तस्मिन् नवयौवनशालिनीत्यर्थः नवीनानामेव कामानुरागाधिक्या त्तथा विशेषितं ॥ ३३ ॥

प्रकृतमुपसंहरति ॥ इतीति ॥ वसुमतीं पृथिवीं कमितारः काम यमाना अमी राजानः इत्यस्मात् पूर्वोक्तात् कारणात् तदतिथी भवितुं तव अभ्यागता भवितुं संग्राममरणेन स्वर्गमागन्तुमित्यर्थः सादराः साभिलाषा न भवन्तीति शेषः यतो नृपतीनां राज्ञां अभि लाषे लिप्साविषये भीमभूसुरभुवोर्भैमीस्वर्गयोर्दूरमतितरां अन्तरं तारतम्यं अहो किमर्थं दमयन्त्यालिङ्गनादिजन्यसुखमपेक्ष्य स्वर्गसुखं तुच्छतरं ते मन्यन्तइत्यहं वितर्कयामीत्यर्थः अहो विस्मये वा दुःखासम्भि न्नसुखकम्पस्वर्गमपेक्ष्य भैमीमेव बहु मन्यन्ते इत्याश्चर्यं यद्वा भीमभू सुरभुवोर्भीमकन्यादेवकन्ययोरभिलाषे नृपतीनां दूरमन्तरं महान् विशेषः स्वर्गगमनपूर्वकं देवकन्योपभोगमुपेक्ष्य भैम्याउपभोगमि च्छन्तीत्यर्थः किम्वा भीमस्य भुवो भीमनृपतेः स्थानस्य कुण्डिनस्य

Digitized by Google

भीमभूसुरभुवोरभिलाषे
दूरमन्तरमहो नृपतीनां ॥ २४ ॥
तेन जाग्रदधृतिर्दिवमागां
सङ्गसौख्यमनुसर्तुमनु त्वां ।
यन्मृधं क्षितिभुजां न विलोके
त्वन्निमग्नमनसां भुवि लोके ॥ २५ ॥
वेद यद्यपि न कोऽपि भवन्तं
हन्त हन्तकरणं विरहार्द्धि ।

सुराणां भुवोर्देवानां ब्राह्मणस्य च अभिलाषे महान् विशेषः कुण्डिन पुरस्य दमयन्त्यालङ्कृतत्वादित्यास्तां विस्तरः। अमितान्तरमिति पाठे वा पारेत्यादि वा तर्कः ताद्रिलात्तत्रयोगे वसुमतीमित्यत्र न षष्ठी ॥ २४ ॥

तदेव तस्य स्वर्गागमनहेतुत्वेन गमयन्नाह ॥ तेनेति ॥ त्वयां दमयन्त्यां निमग्नमनुरक्तं मनो येषां तथाभूतानां क्षितिभुजां राज्ञां भुवि लोके मर्त्ये भुवने मृधं युद्धं यत् यस्मात् न विलोके न पश्यामि तेन हेतुना जाग्रती स्फुरन्ती अधृतिरसन्तोषो यस्य तादृशः सन् त्वां अनु लक्षीकृत्य उद्दिश्य संख्यसौख्यं संग्रामदर्शनसुखं अनुसर्तुं अनुभवितुं अहं दिवं स्वर्गं आगां आगतवानस्मि भवत्सया केनचित् सार्द्धं योद्धव्यं तत् दृष्ट्वा सुखी भवेयमिति भावः। सुखमेव सौख्यं स्वार्थे ष्यञ् ॥ २५ ॥

वेदेति । कोऽपि कश्चन वीरः हन्तृषु घातकेषु अकरणं निर्दयं भवन्तं न विदधाति भवता सह विरोधं न करोति इत्यर्थं यद्यपि वेद

पृच्छसे तदपि येन विवेक
प्रोञ्छनाय विषये रससेकः ॥ २६ ॥
एवमुक्तवति देवऋषीन्द्रे
द्रागभेदि मघवाननमुद्रा ।
उत्तरोत्तरशुभो हि विभूनां
कोऽपि मञ्जुलतमः क्रमवादः ॥ २७ ॥

जानामि तदपि तथापि मया त्वं पृच्छसे युद्धं न वेत्यर्थात् । मां तथा-विधं ज्ञात्वापि कथमेवं पृच्छसीत्याह येन हेतुना विषये अभिलषणी-ये युद्धदर्शनादौ रसस्य अनुरागस्य सेकः सम्बन्धोऽत्युक्तं वा विवेकस्य विवेचनायाः प्रोञ्छनाय नाशाय भवति विषयासक्तिः किं किं न करोतीति भावः हन्ताश्चर्य्ये । तथाविधं भवन्तं ज्ञात्वापि यदेवं पृच्छामि तदाश्चर्य्यमेवेत्यर्थः । हन्तेति खेदसम्बोधने विरोधाभावात् युद्धाभावः तत्र खेदोभवत्येवेति केचित् । अथ च रससेकोजलसेचनं प्रोञ्छनाय मार्जनाय भवत्येव ॥ २६ ॥

एवमिति ॥ देवऋषीन्द्रे देवर्षिश्रेष्ठे नारदे एवं पूर्वोक्तं उक्त-वति सति मघोन इन्द्रस्य आननमुद्रा मुखमुद्रणं मौनं द्राक् झटिति अभेदि स्वयमेव भिन्ना इन्द्र उवाचेत्यर्थः पुनः किमित्युवाचेत्याह हि यतः विभूनां प्रभूणां मञ्जुलतमोऽतिरमणीयः कोऽपि लोको-त्तरः क्रमेण वादो भाषणं उत्तरस्य उत्तरेण अग्रे अग्रे वा शुभः सुश्राव्योभवति । देवऋषीन्द्र इति ऋत्यकोरित्यादिना सन्धिनिषेधः यद्वा देव इति पृथक् सम्बुध्यन्तं पदं दीव्यति युद्धादिविवादप्रदर्शनेन हृष्यतीति नारदे । अभेदीति कर्मकर्त्तरि रूपं ॥ २७ ॥

Digitized by Google

कानुजे मम निजे दनुजारौ
जाग्रति स्वशरणे रणचर्चा ।
यद्भुजाङ्कमुपधाय जयाङ्कं
शर्म्मणा स्वपिमि वीतविशङ्कः ॥ ३८ ॥
विश्वरूपकलनादुपपन्नं
तस्य जैमिनिमुनित्वमुदीये ।

किमुवाचेत्याह ॥ केति ॥ स्वशरणे स्वेषामात्मीयानां मादृशां शरणे रक्षितरि दनुजारौ असुरशत्रौ निजे आत्मीये सकलजनसाधारणरक्षाकारणत्वाश्रयेऽपि मत्पक्षपातिनि अनुजे कनिष्ठभ्रातरि उपेन्द्रे जाग्रति सावधाने सति मम रणचर्चा युद्धचिन्ता का अपि तु न कापि रक्षचिन्ता मया क्रियत इत्यर्थः तर्हि अधुना किं करोमीत्याह जयाङ्कं जयचिह्नं यस्य उपेन्द्रस्य भुजाङ्कं भुजक्रोडं उपधाय उपधानं कृत्वा वीतविशङ्को विगतभयः सन् शर्म्मणा सुखेन स्वपिमि शये स्वशरणे स्वगृहे जाग्रतीति वा योजना । अनुज इत्यनेन आज्ञावश्यवर्त्तित्वं सूचितं एवं निज इत्यनेन स्वतः प्रवृत्तत्वं दनुजारावित्यनेन सामर्थ्यातिशयः जाग्रतीत्यनेन अनुपेक्षकत्वं स्वशरण इत्यनेन अन्यान् परित्यज्यैव मदुपकारित्वं सूचितं ॥ ३८ ॥

विश्वेति ॥ हे मुने तस्य उपेन्द्रस्य विश्वरूपकलनात् सर्व्वं विष्णुमयं जगदिति श्रुतेर्विश्वप्रपञ्चभूतत्वात् उपपन्नं घटमानं जैमिनिमुनित्वं उदीये अनुमितं जैमिनेर्विश्वान्तर्गतत्वात् भगवतश्च विश्वमूर्त्तित्वात् जैमिनिमुनित्वं युक्तमेवेत्यर्थः अतएव स प्रसिद्धजैमिनिरूप उपेन्द्रो मखभुजां यज्ञभुजां देवानां विग्रहं युद्धं अथ च शरीरं असहिष्णुरसहमानः सन् मदशनिं मम वज्रं व्यर्थतां निष्प्रयोजनतां अथच पावपू

Digitized by Google

विग्रहं मखभुजामसहिष्णु
व्यर्थतां मदशनिं स निनाय ॥ ३९ ॥

व्यर्थतां निनाय प्रापयामास असुरनिकरविनाशात् वज्रसाध्यं मदीय कार्यं तेन स्वयमेव कृतमित्यर्थः जैमिनिमुनिरपि मखभुजां यागोद्देश्यानां देवानां विग्रहं शरीरं न मन्यते उच्चार्य्यमाणश्च वज्रपतनं निवारयति आद्यं यथा कौमुद्यां ननु देवताप्रीतिरेव यागव्यापारोऽस्तु किमपूर्व्वेणेति पूर्व्वपक्षे जैमिनिसूत्रं देवताचैतन्यासम्भवादिति शरीरासम्भवादेव चैतन्यासम्भव इति तत्परमार्थः अन्यत्र च। युक्तञ्चैतत् इतरथा चेतनस्य सन्निधानादेर्देवताले आवाहनेन ऐरावतारूढस्येन्द्रस्य आदेरधिष्ठाने घटकुड्यभङ्गप्रसङ्ग इत्यादि। देशनादेशितत्वच तुर्थ्यन्तपदनिर्दिष्टत्वं देवतात्वमिति मीमांसकमते मणिकारः। निर्द्दिश्यत्वं त्रिविधत्वं यथाच देशनादेशितं वेदबोधितं यच्चतुर्थ्यन्तत्वं तद्विशिष्टपदत्वं देवतात्वमिति तदर्थः। किच देवतानां विग्रहेऽप्य कर्म्मसमवायेऽङ्गीक्रियमाणे युगपन्नानादेशेष्वनुष्ठीयमानेषु एकजातीयकर्म्मसु एकयागगतस्येन्द्रशरीरस्य तस्मिन्नेव क्षणे भिन्नदेशयागान्तरहविर्ग्रहणे शक्त्यभावात् यागान्तरलोपप्रसङ्ग एव स्यात् न चैश्वर्य्यवशादनेकशरीराङ्गीकारेणैकोऽपि युगपत् कृष्णवत् सर्व्वत्र प्रयास्यतीति वाच्यं तस्यैवंविधैश्वर्य्यवत्त्वे प्रमाणाभावात् अधुनातनानामपि देवतात्वाङ्गीकारात् तेष्वैश्वर्य्यसम्भावनाया अभावाच्चेत्यलमप्रस्तुतप्रपञ्चेन। जैमिनेर्वज्रनिवारकत्वं यथा जैमिनिश्च सुमन्तुश्च वैशम्पायनएव च। पुलस्त्यः पुलहोजिष्णुः षडेते वज्रवारका इति तथा मुनेः कल्याणमित्रस्य जैमिनेश्चापि कीर्त्तनात्। विद्युदग्निभयं नास्ति लिखिते च गृहोदर इति। उदीय इति उत्पूर्व्वादिनगतावित्यस्मात् कर्म्मणि लिट्॥ ३९॥

इङ्गितानि मुनये विनयाब्धि
स्तस्थिवान् स वचनान्युपहृत्य।
प्रांशुनिश्वसितपृष्ठचरी वाक्
नारदस्य निरियाय निरोजाः॥ ४०॥
स्वारसातलभवाहवपश्यी
निर्वृणोमि न वसन् वसुमत्यां।

इङ्गितानीति॥ विनयस्य विनीततस्य अब्धिः समुद्रोऽतिविनीतः स इन्द्र इङ्गितानि एवंप्रकाराणि वचनानि मुनये नारदाय उपहृत्य उपहारीकृत्य मुनिमुद्दिश्य उक्त्वेत्यर्थः तस्थिवान् स्थितः तूष्णीम्बभूवेत्यर्थः अनन्तरं नारदस्य निरोजा दुर्ब्बला अभिलाषा सिद्धेः क्षीणोच्चारणा प्रांशुनिश्वसितस्य दीर्घनिश्वासस्य पृष्ठचरी पश्चात् सञ्चारिणी वाक् वचनं निरियाय निर्गता बभूव दीर्घं निश्वस्य मुनिरिन्द्रं प्रत्युवाचेत्यर्थः॥ ४०॥

वाचमेवाह॥ स्वारसेति॥ हे इन्द्र वसुमत्यां पृथिव्यां वसन् अव तिष्ठन्नहं स्वारसातलयोः स्वर्गपातालयोर्भवतूत्पत्तिर्यस्य तादृशमा हवं युद्धं पश्यितुं शीलं यस्य तादृशः सन् न निर्वृणोमि न सुखी भवामि तथा त्वां गतस्य स्वर्गमागतस्यापि मे मम हृदि मनसि क्ष्मायाः पृथिव्या ये तले स्वरूपाधोभागौ तयोर्द्वयं तत्रस्थानां पृथिवीस्थानां पातालस्थानाञ्चेत्यर्थः भटानां सैन्यानां आजेर्युद्धस्य वितर्कः सम्भा वना दुरुदर्कः दुरविद्यमान उदर्कं उत्तरफलं यस्य तादृशः निष्फल इत्यर्थः स्वर्गेऽपि युद्धस्यादर्शनादितिभावः दुष्टोमन्दः अममाञ्च उद र्कोऽयस्येति वा भुवि स्थित्वा स्वर्गयुद्धं स्वर्गे च स्थित्वा तत्रत्ययुद्धं सम्भा

Digitized by Google

व्याकृतस्य हृदि मे द्दृदर्कः
श्व्यातयुद्वयभटाजिवितर्कः ॥ ४१ ॥
वीक्षितस्त्वमसि मामथ गन्तुं
तन्मनुष्यजगतेऽनुमनुष्व ।
किं भुवः परिवृढा न विवोढुं
तच्च तामुपनता विवदन्ते ॥ ४२ ॥
इत्युदीर्य्य स ययौ मुनिरुर्व्वीं
स्वर्पतिं प्रतिनिवर्त्य बलेन ।

वयतो मम कुत्रापि तद्दर्शनात् नैव सुखमस्तीत्यर्थः । उदर्कः फल मुत्तरमित्यमरः तर्कं स्वरूपेऽनूर्देऽस्त्री क्लीवं व्याघावकाश्च(?) कानने कार्य्यवीजे च पुंसि वाक्यमहीरुहे इति मेदिनी ॥ ४१ ॥

वीक्षितइति ॥ हे इन्द्र मया त्वं वीक्षितोऽसि दृष्टो भवसि यद्यप्य त्रागत्य युद्धदर्शनं न कृतं तथापि त्वद्दर्शनमपि मम सुखकरमिति तत्तावमेवेत्यर्थः तत्तस्मात् स्वर्गे युद्धाभावात् अथ इतः परं मनुष्यजगते मर्त्यलोकाय गन्तुं मां अनुमनुष्व अनुजानीहि तत्रापि युद्धे किं प्रमाणमत आह तत्र विदर्भदेशे पृथिव्यां वा तां भैमीं विवोढुं उद्वो ढुं उपनताः समागताभुवः परिवृढाः प्रभवो राजानः न विवदन्ते परस्परं विवादं न कुर्व्वन्ति अपि तु विवदन्तएव अनन्यसदृशीं भैमीं लिप्सूनां राज्ञां सौन्दर्य्यशौर्य्यादिगुणेषु परस्परमहमहमिकया वि वादो भवितुमर्हत्येवेत्यर्थः । मनुष्यजगत इति गत्यर्थस्यापथ्यर्थाद्वा क्रिति चेति कर्म्मणि षष्ठी विवदन्त इति विप्रतिपत्ताविव्यात्मनेपदं ॥ ४२ ॥

इतीति ॥ स मुनिर्नारद इति पूर्व्वोक्तं उदीर्य्य उक्त्वा बलेन बलात्कारेण स्वर्पतिं इन्द्रं प्रतिनिवर्त्य परावर्त्य अनुगमने निषिध्य

Digitized by Google

वारितोऽप्यनुजगाम स यत्नं
तं कियन्त्यपि पदान्यपराणि ॥ ४३ ॥
पर्व्वतेन परिपीय गभीरं
नारदीयमुदितं प्रतिनेदे ।
स्वस्य कश्चिदपि पर्व्वतपक्ष-
च्छेदिनि स्वयदर्शि न पक्षः ॥ ४४ ॥

उर्व्वीं पृथिवीं ययौ गतवान् किन्तु स इन्द्रः वारितोऽपि तिष्ठ मा मामनुगच्छेति नारदेन निषिद्धोऽपि सयत्नं यथा तथा कियन्ति अपराण्यपि पदानि तं नारदं अनुजगाम अनुगच्छति स्म अनुगमा येति क्वचित् पाठः स तु न मनोरमोऽर्थसौष्ठवविरहात् । अपरा णीति वारवार् पूर्व्वं कानिचिदनुजगामैव वारितोऽपि वदितराण्य पीत्यर्थः । स्वर्गैविमिति अद्दरादेः पथ्यादेर्वेतिरेफः पदानीति अध्वार्थ त्वात् कालाध्वभ्यामित्यादिना द्वितीया ॥ ४३ ॥

पर्व्वतेनेति ॥ पर्व्वतेन मुनिना गभीरं अर्थगौरववत् नारदीयं नारदसम्बन्धि उदितं वचनं परिपीय श्रुत्वा प्रतिनेदे अनूद्यते स्म न तु स्वतन्त्रतया किञ्चिदुक्तं नारदेन यदुक्तं तदेव सत्यमयं कथयन्नो अभिनन्दनं कृतमित्यर्थः अथच आपो नारा इति प्रोक्ता इति वच नात् नारदो मेघस्तदीयं गर्ज्जितं शैलेन प्रतिध्वन्यत एव । पर्व्वतानां पक्षान्छेत्तुं शीलं यस्य तादृशे इन्द्रे स्वयं पर्व्वतमुनिना स्वस्य कश्चि दपि पक्षोमतं वादर्शि न दर्शितः अथच पर्व्वतपक्षच्छेदनशीले पर्व्वतेन यत् पक्षो न दर्शितस्तत् साधुकृतमिति ध्वनिः ॥ ४४ ॥

Digitized by Google

पाणये बलरिपोरथ भैमी
शीतकोमलकरग्रहमर्हं ।
भेषजं चिरचिताशनिवास
व्यापदामुपदिदेश रतीशः ॥ ४५ ॥
नाकलोकभिषजोः सुषमा या
पुष्पचापमपि चुम्बति सैव ।

नारदमुखाद्भैमीं श्रुत्वा इन्द्रस्य तद्विवाहेच्छा जातेत्याह ॥ पाणय इति ॥ अथ नारदगमनानन्तरं रतीशः कामः चिरचितानां बहुकालसञ्चितानां अशनिवासव्यापदां वज्रावस्थानजन्यरोगाणां अर्हं योग्यं तदपनयनसमर्थं भैम्याः शीतः शीतलः कोमलो मृदुलो यः करात् हस्तस्य ग्रहो ग्रहणं विवाहरूपं भेषजं औषधं बलरिपोरिन्द्रस्य पाणये हस्ताय उपदिदेश आदिष्टवान् इन्द्रं भैमीविवाहेच्छुं चकारेत्यर्थः अन्योऽपि वज्राग्निदग्धस्य तापशान्त्यै शीतलं कोमलञ्च वस्तूपदिशति ॥ ४५ ॥

ननु भेषजं वैद्येनोपदिश्यते कामस्य कथं वैद्यत्वमित्याशङ्क्याह ॥ नाकेति ॥ वैद्योत्प्रेक्षते नाकलोकभिषजोः स्वर्गवैद्ययोरश्विनीकुमारयोर्या सुषमा परमा शोभा सैव पुष्पचापमपि कन्दर्पमपि चुम्बति सङ्क्रामति यतः सव परमा शोभैव द्वारं तेन कर्तृभूतेन संक्रमिता संक्रान्तिं प्रापिता वैद्यकविद्या आयुर्वेदः वद्या यत्र तादृशोऽसौ रतीशः तादृक् अश्विनीकुमारवत् अभिषज्यत् चिकित्सितवान् अश्विनीकुमारयोः सुषमासंक्रमणेन वैद्यकविद्यासंक्रमणात्

Digitized by Google

वेद्मि नादृगभिषज्यदसौ न
द्वारसंक्रमितवैद्यकविद्यः ॥ ४६ ॥
मानुषीमनुसरत्यथ पत्यौ
खर्व्वभावमवलम्ब्य मघोनी ।
खण्डितं निजमसूचयदुच्चै-
र्मानमानसरोरुहनत्या ॥ ४७ ॥

तामस्य चौषधोपदेशोऽयुक्त एवेति भावः । अभिषज्यदिति कण्ड्वादि
त्वाद्यक् ॥ ४६ ॥

एवं भैमीमभिलष्य इन्द्रे मर्त्यलोकं जिगमिषति दौर्मनस्यात्
शच्यादीनामवस्थामाह षड्भिः श्लोकैः ॥ मानुषीमिति ॥ अथ नारद
गमनानन्तरं पत्यौ इन्द्रे खर्व्वभावं लघुत्वं नीचत्वं अवलम्ब्य अङ्गीकृत्य
मानुषीं भैमीं अनुलक्षीकृत्य सरति मर्त्यलोकं जिगमिषति सति
मघोनी इन्द्राणी शची आननसरोरुहस्य मुखपद्मस्य नत्या चिन्तावे
शात् नमनतया निजं स्वीयं उच्चैरत्यन्तं मानं अहङ्कारं चित्तसमुन्नतिं
वा खण्डितं अपनीतं असूचयत् विज्ञापयामास मानापगमनसूचकं
मुखनमनं स्तनवतीनामित्यर्थः यद्वा पत्यौ मानुषीमनुसरति मघोनी खर्व्व
भावं वामनत्वं अवलम्ब्य आननसरोरुहनत्या निजं उच्चैर्मानं
खण्डितं असूचयदिति योजना इन्द्रं मानुषीमनुसरन्तं दृष्ट्वा अङ्गानि
खर्व्वीकृत्य मुखञ्च नमयित्वा चिन्तयामासेत्यर्थः अथ च वामनताङ्गी
करणेन मानस्य परिमाणस्य खण्डनमप्युक्तं भवत्येव ॥ ४७ ॥

यो मघोनि दिवमुच्चरमाणे
रम्भया मलिनिमालमलम्भि ।
वर्ण एव स खलूज्ज्वलमस्याः
शान्तमान्तरमभाषत भङ्ग्या ॥ ४८ ॥
जीवितेन कृतमप्सरसां तत्
प्राणमुक्तिरिह युक्तिमती नः ।

यइति ॥ मघोनि इन्द्रे दिवं स्वर्गं उच्चरमाणे परित्यज्य गच्छति सति रम्भया सर्व्वेश्याविशेषेण यो मलिनिमा मालिन्यं अलमत्यर्थं अलम्भि प्राप्तः खलु निश्चितं स मलिनिमरूपो वर्ण एव भङ्ग्या आकारविशेषेण अस्या रम्भाया आन्तरं अन्तःकरणवृत्तिकं उज्ज्वलं शृङ्गारं शान्तं अपगतं अभाषत सूचयति स्म इतः परमिन्द्रेण सार्द्धं अस्याः शृङ्गारावेशो न भविष्यतीति सूचयामासेत्यर्थः यद्वा उज्ज्वलं हर्षयुक्तं अस्या आन्तरं हृदयं शान्तं निर्व्विषं दुःखयुक्तं अभाषत किम्वा उज्ज्वलं शृङ्गाररसप्रधानं अस्या आन्तरं मनः शान्तं शान्तरसप्रधानं अभाषत अथ वा शान्तं कोपरहितं अस्या मन उत् अत्यन्तं ज्वलतीति तादृशं कोपयुक्तं अभाषत। उच्चरमाणे इति उच्चरः सकर्म्मकादित्यात्मनेपदं ॥ ४८ ॥

जीवितेनेति ॥ घृताच्या अप्सरोविशेषेण दीर्घनिश्वसितस्य दीर्घनिश्वासस्य निर्गमनेन निःसरणेन अनक्षरं वर्णशून्यं यथा तथा इति अवाचि उक्तं अथ च अनक्षरं अवाच्यं अमङ्गलरूपत्वात्कुमप्रर्व्वं अवाचि सूचितं इति किं नोऽस्माकं अप्सरसां इह अस्मिन् स्वर्गे समये वा जीवितेन जीवनेन कृतं अलं इन्द्रो यदि मानुष्यामनुरक्त

Digitized by Google

इत्यनन्तरमवाचि घृताच्या
दीर्घनिश्वसितनिर्गमणीन ॥ ४९ ॥
साधु नः पतनमेवमितः स्या
दित्यभण्यत तिलोत्तमयापि ।
चामरस्य पतनेन कराब्जा
त्तद्विलोलनचलद्भुजनालात् ॥ ५० ॥
मेनका मनसि तापमुदीर्णं
यत्पिधित्सुरकरोदवहित्थां ।

तदा अस्माकं जीवनं निष्फलमित्यर्थः तत्तस्मात् जीवनस्याभावस्थक त्वात् प्राणमुक्तिः प्राणत्यागो युक्तिमती उचिता इति यथा प्राणा निर्गच्छन्ति तथा दीर्घनिश्वासोमुक्त इत्यर्थः । प्राणानां निश्वासरूप त्वात् युज्यत एव तथा सूचनं । अनन्तरमवाच्यं स्यादित्यमरः ॥ ४९ ॥

साध्विति ॥ तिलोत्तमयापि सर्व्वैश्वर्यविशेषेणापि तस्य चामरस्य विलोलने चालने चलन् चपलो भुजोबाहुरेव नालं यस्य तथा तादृ शात् कराब्जमिव तस्मात् पाणिकमलात् चामरस्य पतनेन इति अभण्यत प्रतिपादितं इति किं नोऽस्माकं इतः स्वर्गात् एवं चामर वत् पतनं साधु युक्तं स्यात् इति इन्द्रं मानुष्यामनुरक्तं पश्यन्त्या तिलो त्तमायाः कोपावेगेन हस्तशैथिल्याच्चामरः पतित इत्यर्थः अन्यं सवात मेव भवतीति तथाकल्पितं ॥ ५० ॥

मेनकेति ॥ मेनकानाम काचित्स्वर्वेश्या मनसि उदीर्णं उद्भवं तापं पिधित्सुः पिधातुमिच्छुः सती यत् अवहित्थां आकारगुप्तिं

Digitized by Google

तत् स्फुटं निजहृदः पुटपाके
पङ्क्तिभित्तिमसृजद् बहिरुत्थां ॥ ५१ ॥
उर्व्वशीगुणवशीकृतविश्वा
तत्क्षणस्तिमितभावनिभेन ।
शक्रसौहृदसमापनसीम
स्तम्भकार्य्यमपुषद्वपुषैव ॥ ५२ ॥

अकरोत् स्फुटमुत्प्रेक्षे तत् अवहित्थाकरणं कर्तृ निजहृदः स्वहृदयस्य पुटमध्ये यः पाकस्तस्मिन् विषये बहिरुत्थां बहिःस्थितां पङ्क्तिभित्तिं पङ्क्तेयं असृजत् अकरोत् इन्द्रं यथाविधं दृष्ट्वा अत्यन्तसन्तप्तहृदया जातेत्यर्थः अन्यदपि वस्तु सन्तापार्थित्वाय पुटमध्ये पच्यते । अव हित्थाकारगुप्तिरित्यमरः ॥ ५१ ॥

उर्व्वशीति ॥ गुणैः सौन्दर्य्यादिभिर्व्वशीकृतं विश्वं यया तादृशी उर्व्वशी अप्सरोविशेषः तत्क्षणं तस्मिन्नेव क्षणे स्तिमितभावस्य नि श्चलत्वस्य निभेन व्याजेन स्ववपुषैव निजशरीरेणैव करणेन शक्रेण इन्द्रेण सह यत्सौहृदं मित्रता तस्य समापनं समाप्तिस्तस्य या सीमा एतावत्कालपर्य्यन्तं इन्द्रेण सह मम प्रेम स्थितं इतः परं नेत्येवं मर्य्यादा तत्र स्तम्भस्य कार्य्यं कर्त्तव्यं अपुषत् ख्यापयामास निश्चलं निजशरीरमेव प्रेममर्य्यादाख्यापकं स्तम्भं चकारेत्यर्थः । अन्य स्यापि भूम्यादिसीमाबोधकं स्तम्भं स्थापयति । सौहृदमित्यत्र सुहृ च्छब्दस्य मित्रवाचित्वात् हृद्भगसिन्ध्वन्ते पूर्व्वपदस्य चेत्युभयपदवृद्धिः ॥ ५२ ॥

Digitized by Google

कापि कामपि बभाण बुभुत्सुं
पृच्छति त्रिदशभर्तरि किञ्चित् ।
एष कश्यपसुतामभिगन्ता
पश्य कश्यपसुतः शतमन्युः ॥ ५३ ॥
आत्मनात्मसुभगत्वसगर्वा
कापि पृच्छति मघोनि बभाषे ।

मर्त्यगमननिवारणाय स्वर्गस्त्रीणामिन्द्रं प्रत्युपहासमाह द्वाभ्यां ॥ कापीति ॥ त्रिदशभर्तरि इन्द्रे किञ्चित् पृच्छति सति कापि इन्द्रगतौ बुभुत्सुं इन्द्रः कुत्र गमिष्यतीत्येवं ज्ञातुमिच्छुं कामपि देवाङ्गनां बभाण उवाच किं बभाणेत्याह एष शतमन्युः शतमखः कश्यपसुतः काश्यप इन्द्रः कश्यपसुतां काश्यपीं पृथिवीं अभिगन्ता गमिष्यति त्वं पश्य यज्ञशतं कृत्वा प्राप्तेन्द्रपदोऽपि अधो गन्तुमिच्छतीत्यहो पश्येति यथाश्रुतोऽर्थः उपहासपक्षे तु एष कश्यपस्य सुतोऽयं कश्यपस्य सुतां अर्थात् भगिनीं अभिगन्ता तत्रापि शतमन्युः अनेकयज्ञकारीति पश्य धार्मिकोभूत्वापि अयं भगिनीं गच्छतीत्युपहासः अथच एष कश्यपस्य मुनेः सुतोविदितवेदशास्त्रश्च भूत्वापि कश्यं मद्यं पिबतीति तादृशस्य मद्यपस्य सुतां कन्यां गच्छतीति पश्य। कश्यं त्रिषु कश्या र्हे स्यात् क्लीवं मद्याश्वयोरिति मेदिनी मन्युः क्रोधे क्रतौ दैन्य इति विश्वः ॥ ५३ ॥

आत्मेति ॥ आत्मनः सुभगत्वेन सौन्दर्येण सगर्वा गर्विता कापि स्वर्वेश्या मघोनि इन्द्रे पृच्छति सति आलिं सखीं बभाषे उवाच भाषितमाह हे सखि कृतां मनुष्याणां वीक्षणेऽपि मा स्त्रि

Digitized by Google

वीक्षणेऽपि सघृणासि नृणां किं
यासि न त्वमपि सार्थगुणेन ॥ ५४ ॥
अन्वयुर्युतिपयःपितनाथा
स्तं मुदाथ हरितामधिपतारः ।
वर्त्म कर्षति पुरः परमेक
स्तद्गतानुगतिको न महार्घः ॥ ५५ ॥

यतो तैः सार्द्धमालापादिकं दर्शनेऽपि किं सघृणासि प्राप्तजुगुप्सा भवसि यतस्त्वमपि सार्थस्य इन्द्रलक्षणस्य सङ्गिनो गुणेन गुणानुरोधेन न यासि न गच्छसि मनुष्याणां दर्शने सघृणापि त्वं इन्द्रानुरोधात्कुर्वेत्यर्थः येषां दर्शनेऽपि तव घृणा जायते तज्जातीयां कन्या मुद्वोढुमिन्द्रो मर्त्यलोकं गच्छति अतः कीदृगस्य रुचिरित्युपहासः ॥ ५४ ॥

न केवलमिन्द्रो जगाम किन्तु वरुणादयोऽपि तेन सह जग्मुरित्याह ॥ अन्वयुरिति ॥ अथ हरितां दिशां अधिपतारः पतयो युतिपयःपितॄणां नाथा वह्निवरुणयमा मुदा भविष्यद्दमीदर्शनादिजनितहर्षेण तं इन्द्रं अन्वयुरनुजग्मुः तेषामिन्द्रानुगमनेऽर्थान्तरमुपन्यस्यति परं केवलं एकोजनः पुरः प्रथमं वर्त्म पन्थानं कर्षति करोति किन्तु तद्गतानुगतिकस्तस्य प्रथमगन्तुर्गतं गमनमनुलक्षीकृत्य गतिर्यस्य तादृशस्तत्पश्चाद्गामी न महार्घेण दुर्लभः प्राचीनैरपरिशीलितं विषयं प्रथममेक एव करोति अनन्तरं अन्ये बहवोऽपि तमनुवर्तन्त इत्यर्थः ॥ ५५ ॥

Digitized by Google

प्रेषिताः पृथगथो दमयन्त्यै
चित्तचौर्य्यचतुरा निजदूत्यः।
तद्गुरुं प्रति च तैरुपहाराः
सख्यसौख्यकपटेन निगूढाः ॥ ५६ ॥
चित्रमत्र विबुधैरपि यत्तैः
स्वर्विहाय बत भूरनुसस्रे।

प्रेषिता इति ॥ अथोऽनन्तरं तैरिन्द्रादिभिः चित्तस्य चौर्य्यं वशी करणे चतुरा निपुणाः निजदूत्यः स्वीयस्वीयदूत्यः पृथक् प्रत्येकं दमयन्त्यै भैम्यर्थं प्रेषिताः प्रेरिताः पृथक् भिन्नाभिन्नादूत्यो वा तथा तस्या दमयन्त्या गुरुं पितरं भीमं प्रति उद्दिश्य संख्यसौख्यकपटेन सम्यक्संग्रामजनितसन्तोषव्याजेन निगूढाः परस्परं सङ्गोपिताः तिरस्करिण्या विद्यया भूपतीनामदृश्या वा उपहारा मणिमुक्ताद्युप ढौकनानि च प्रेषिताः संग्रामे त्वया बहवोऽसुरा हतास्तेन वयं त्वयि सन्तुष्टाः सन्त इमान्युपायनानि प्रेषयामः स्वीकर्त्तव्यानीति छलेन यदि च प्रीतेन तेन भैमी देया भवेदिति मनसि कृत्वा तैरुपहाराः प्रेषिता इत्यर्थः सख्यसौख्यकपटेनेति पाठे मित्रतासुखच्छलेनेत्यर्थः महानुभावेन त्वया सह सख्यसुखं वयमनुभवितुमिच्छामः संप्रति च एतान्युपायनानि प्रेष्यन्ते गृह्यन्तामिति छलं। सौख्येति स्वार्थे ष्यञ् ॥ ५६ ॥

चित्रमिति ॥ विबुधैः सुरैः अथच पण्डितैरपि तैरिन्द्रादिभिः स्वः स्वर्गं विहाय त्यक्त्वा यत् भूः पृथिवी अनुसस्रे अनुगता अत्र विषये चित्रं आश्चर्य्यं वर्त्तते खेदे मूढा अपि भुवं त्यक्त्वा स्वर्गमेव

Digitized by Google

द्यौर्न काचिदथ वास्ति निरूढा
सैव सा चलति यत्र हि चित्तं ॥ ५७ ॥
शीघ्रलङ्घितपथैरथ वाहै-
र्लम्भिताः भुवममी सुरसाराः ।

गन्तुमिच्छन्ति एते तु विबुधा अपि यत्स्वर्गमनादृत्य भुवमनुसरन्ति तदाश्चर्य्यमेवेत्यर्थः। अथ वा किम्वा काचित् द्यौः स्वर्गो निरूढा प्रसिद्धा इयमेव द्यौरिति निश्चिता नास्ति किन्तु सैव सा द्यौर्यत्र हि चित्तं मनोवलति गच्छति अनुरक्तं भवतीत्यर्थः ततश्च तेषां भूमावनुरागात् सैव स्वर्गं इति तदनुसरणं युक्तमिति भावः ॥ ५७ ॥

अथ नलेन सार्द्धं पथि परिचयोऽभविष्यतीति सूचयन् तत्र एव शब्दश्रवणं वर्णयति ॥ शीघ्रेति ॥ अथानन्तरं शीघ्रं लङ्घितोऽतिक्रान्त पन्था यैस्तादृशैर्वाहैर्यानैर्भुवं पृथिवीं लम्भिताः प्रापिता अमी सुर साराः देवश्रेष्ठा इन्द्रादयः आदौ वक्रिता तिर्य्यक्कृता पश्चादुन्न मिता ऊर्द्धीकृता कन्धरा शिरोधिर्यत्र तादृशो बन्धो देहसङ्कोच विशेषो येषां तादृशाः सन्तः अध्वनि पथि दूरं दूरदेशोत्पन्नं ध्वनितं शब्दं शुश्रुवुराकर्णितवन्तः अध्वनि ध्वनिरहितं यथा तथा शब्दान्तरं निवार्य्य शुश्रुवुरिति वा दूरवर्त्तिनं शब्दं हि श्रवणप्रतिबन्धकमितर शब्दं निवार्य्य वक्रितोन्नमितकन्धरबन्धोभूत्वा शृणोति ते नलरथ शब्दं शुश्रुवुरित्यर्थः । वक्रित उन्नमितश्च कन्धरायां ग्रीवायां बन्धः सन्निवेशो येषां तादृशाः इत्यन्वियादादित्वादेरित्यञ्च गवादयस्तादृशाः

वल्गितोन्नमितकन्धरबन्धाः
शुश्रुवुर्ध्वनितमध्वनि दूरं ॥ ५८ ॥
किं घनस्य जलधेरथवैवं
नैव संशयितुमप्यलभन्त ।
स्यन्दनं परमदूरमपश्य-
न्निस्वनश्रुतिसहोपगतं ते ॥ ५९ ॥
सूतविस्मयदकौतुकिभावं
भावबोधचतुरं तुरगाणां ।

पद्यबन्धस्तु कन्धराशब्दवदन्धराशब्दो वा बन्धरशब्दोऽस्तीति वृद्धाः ॥ ५८ ॥

अथैषां नवरथदर्शनमाह ॥ किमिति ॥ ते इन्द्रादयः इदं किं घनस्य मेघस्य अथ वा जलधेः समुद्रस्य एवं संशयितुमपि का कथा निश्चये सन्देहं कर्तुमपि अर्थात् कालं न अलभन्त न प्राप्तवन्तः लब्ध्वेत्यपि क्वचित् पाठः तत् ध्वनितं घनस्य अथ वा किम्वा जलधेरिति संशयः । कथं संशयोऽपि न जात इत्यत आह यतो निस्वनस्य ध्वनेर्या श्रुतिः श्रवणं तया सह तत्समकालमित्यर्थः उपगतं आगतं अदूरं निकटवर्त्ति स्यन्दनं नलस्य रथं परं केवलं अपश्यन् दृष्टवन्तः संशयप्रागेव स्यन्दनोपस्थित्या ध्वनौ तदीयत्वानुमानान्नात्र संशयावकाश इत्यर्थः शब्दाकर्णनसमय एव रथोवेगादागत इतिभावः एतेन नलस्याश्वप्रेरणनैपुण्यं रथस्य च गम्भीरशब्दत्वं द्रुतगामित्वञ्च सूचितं ॥ ५९ ॥

अथैषां नलदर्शनमाह ॥ सूतेति ॥ एते विबुधेन्द्रा देवश्रेष्ठा इन्द्रादयस्तत्र स्यन्दने नैषधनृपेण समं नयनधारणयोर्यः फलं

Digitized by Google

तच नेत्रजमुषः फलमेते
नैषधं बुबुधिरे विबुधेन्द्राः॥ ६०॥
वीक्ष्य तस्य वरयस्त तदानीं
यत्तदाप निविडं जडभूयं।

अतिसौन्दर्य्यात्मनयनप्रीतिजनकं नैषधं नलं बुबुधिरे ददृशुः किम्भूतं सूताय सारथये विस्मयं विश्रान्तिं ददातीति तादृशः कौतुकिभावः कौतुकं यस्य तादृशं कौतुकात् स्वयमश्वचालनेन सारथिं विस्मयन्त मित्यर्थः तथा तुरगाणामश्वानां भावस्य स्वभावस्य चेष्टाया अभिप्राय स्य वा बोधे ज्ञाने चतुरं निपुणं नलस्य अश्वभावाभिज्ञत्वं भारतादौ प्रसिद्धं॥ ६०॥

अथातिसुन्दरं नलं दृष्ट्वा इममेव भैमी वरिष्यतीति निश्चित्य ते विषण्णा जाता इति क्रमेण सूचयति॥ वीक्ष्येति॥ तदा तस्मिन् समये वरयस्य नलस्य तरुणत्वं यौवनं वीक्ष्य विशेषेण दृष्ट्वा यत् निविडमत्यन्तं जडभूयं जडमयत्वं आप प्राप्तवान् युवानं नलं दृष्ट्वा इममेव भैमी वरिष्यतीति निश्चित्य यथोऽयमस्माकमाडम्बर इत्येवंनिर्वेदात् यत् खेदयुक्तोऽभूदित्यर्थः अथ च यत् जडभूयं जाड्यं प्रतिपत्तिशून्यत्वं आप सा अस्य जलपतेर्जलाधिपस्य वरुणस्य किमु नो चिती न औचित्यं न अपितु औचित्यमेव किम्भूतस्य प्राच्यः प्रभूतो योविस्मयरसोऽद्भुतरसस्तेन स्तिमितस्य स्तब्धस्य जलपतेर्जलमयत्व मुचितमेव अथ च योषित् अङ्गनानां मूर्खाणां पतिस्तस्य जडत्वं यु क्तं ते अतिसुन्दरं नलं दृष्ट्वा चिन्तितोऽभूदितिभावः। डलयो रैक्यस्मरणादेवमुक्तं। अप्रतिपत्तिर्जडता आदिष्टानिष्टदर्शनश्रुतिभिः

Digitized by Google

नीचकैर्जलपतेः किमु सास्य
प्राज्यविस्मयरसस्तिमितस्य ॥ ६१ ॥
रूपमस्य विनिरूप्य तथाति
ग्लानिमाप रविवंशवतंसः।
कीर्त्यते यदधुनापि स देवः
काल एव सकलेन जनेन ॥ ६२ ॥
यं बभार दहनः खलु तापं
रूपधेयभरमस्य विमृश्य।

अनिमिषनयननिरीक्षणतूष्णीभावादयश्चेति द्रष्टव्यः । प्रभूतं प्रचुरं प्राज्यमित्यमरः ॥ ६१ ॥

रूपमिति ॥ रविवंशस्य सूर्यकुलस्य वतंसः शिरोभूषणभूतः श्रेष्ठोयमः अस्य नलस्य रूपं सौन्दर्यं विनिरूप्य विशेषेणावलोक्य अतिग्लानिं अत्यन्तकालिमानं तथा आप प्राप्तवान् यत् यथा सकलेन जनेन न पुनरेकेन द्वाभ्यां वा स देवोयमः अधुनापि अद्यापि काल एव श्यामवर्ण एव अथ च कालेतिसंज्ञकः कीर्त्यते कथ्यते नलसौन्दर्यावलोकनेन कालिमोत्पन्नादेव यमस्य काल इति नाम जातं न तु भूतानां कलनात् क्षयकरणात्तद्यैत्यर्थः। कालोदण्डधरः श्राद्धदेवो वैवस्वतोऽन्तक इत्यमरः ॥ ६२ ॥

यमिति ॥ दहनोऽग्निः अस्य नलस्य रूपधेयस्य सौन्दर्यस्य भरस्य शिशयं विमृश्य विशेषेणावलोक्य खलु निश्चितं यं तापं बभार धारयति स्म तत्र तापे अद्यापि वर्द्धितं जनिकर्त्री अनवतापच्छेदिका सा

Digitized by Google

तत्र भूदननुता जनिकर्त्री
सा तदप्यनलतैव तु हेतुः ॥ ६३ ॥
कामनीयकमधःकृतकामं
काममक्षिभिरवेक्ष्य तदीयं ।
कौशिकः स्वमखिलं परिपश्यन्
मन्यते स्म खलु कौशिकमेव ॥ ६४ ॥
रामणीयकगुणाद्वयवादं
मूर्त्तमुत्थितममुं परिभाव्य ।

भूत् यत्तापं प्रत्येव शङ्कितावच्छिन्नस्य कारणत्वाभ्युपगमेन सतापि तस्यास्तथात्वायोगात् तर्हि कथं ताप इत्याह तु किन्तु तदपि तथापि अनलतैव नलान्यत्वमेव हेतुः कारणं अहं नलो न भवः कथं दमयन्तीं प्राप्स्यामीति दुःखवशात् सन्तापोऽभूदिति भावः। रूपधेयेति स्वार्थे धेयप्रत्ययः ॥ ६३ ॥

कामनीयकमिति ॥ कौशिक इन्द्रः अधःकृतोऽवसादीकृतः कामः कन्दर्पो येन तादृशं तदीयं नलसम्बन्धि कामनीयकं रमणीय तां काममत्यर्थं अक्षिभिः सहस्रेणापि चक्षुर्भिरवेक्ष्य दृष्ट्वा अखिलं सकलं स्वं आत्मानं परिपश्यन् कौशिकमेव पेचकमेव मन्यते स्म खलु निश्चये उत्प्रेक्षायां वा नलस्याग्रे पेचकतुल्योऽस्मीति निश्चिनोति स्मेत्यर्थः। महेन्द्रगुग्गुलूलूकव्यालग्राहिषु कौशिक इत्यमरः ॥ ६४ ॥

सर्वेषां युगपद्विस्मयमाह ॥ रामणीयकमिति ॥ सुरा इन्द्रादयः अमुं नलं उत्थितं उद्भूतं मूर्त्तं साकारं रामणीयकगुणस्य रमणीयता

विस्मयाय हृदयानि वितेरु
स्तेषु तेन न सुराः प्रबभूवुः ॥ ६५ ॥
प्रेयरूपकविशेषनिवेशैः
सम्बदद्भिरमराः श्रुतपूर्व्वैः ।
एष एव स नलः किमितीदं
मन्दमन्दमितरेतरमूचुः ॥ ६६ ॥

गुणस्य अवयवाद् वद्वितीयात्मकं परिभाय विचार्य्य नलोऽद्वितीय सौन्दर्य्यगुणवानीति विचार्य्येत्यर्थः विस्मयाय आश्चर्य्याय हृदयानि मनांसि वितेरुर्दत्तवन्तः लोकातीतं सौन्दर्य्यं दृष्ट्वा किमिदमित्यद्भुत रसे मनांसि मग्नोचक्रुरित्यर्थः तेन हेतुना तेषु हृदयेषु न प्रबभूवुः समर्था नाभूवन् आश्चर्य्यवशात् किं करणीयमधुनेति न स्फुरितमिति भावः दानस्य सततंअसपूर्व्वकपरस्वत्वजनकत्वात् विस्मयाय दत्तेषु हृदयेषु यत्प्रभवः स्वामित्वेन भूतास्त्वयुक्तमिति ध्वनिः ॥ ६५ ॥

प्रेयेति ॥ अमरा इन्द्रादयः श्रुतपर्व्वैः पूर्व्वं लोकमुखाच्छ्रुतैः सम्ब दद्भिः पूर्व्वं यादृशा गुणाः श्रुतास्तादृशा एवात्र दृश्यन्त इति संगच्छ मानः प्रेयरूपकस्य प्रियरूपत्वस्य विशेषोऽतिशयः निवेशा अङ्गवि न्यासाः स च ते च तथा तैः प्रेयरूपकविशेषस्य निवर्शैर्व्वा हेतुभिः स पूर्व्वं श्रुतो नल एव एव किं इत्येवं इदं इतरेतरं परस्परं मन्दंमन्दं ऊचुः कथयामासुः पूर्व्वश्रुतनलसौन्दर्य्यादीनां दर्शनात् किमयं नल आगच्छतीत्यन्योऽन्यं कथयामासुरित्यर्थः ॥ ६६ ॥

Digitized by Google

तेषु तद्विधवधूवरणार्हं
भूषणं स समयः स रथाध्वा ।
तस्य कुण्डिनपुरं प्रतिसर्पन्
भूपतेर्व्यवसितानि शशंसुः ॥६७॥
धर्म्मराजसलिलेशहुताशैः
प्राणतां श्रितममुं जगतस्तैः ।

तेष्विति ॥ तद्विधा तादृशी अतिसुन्दरी या वधूर्भैमी तस्या वरणार्हं वरणयोग्यं यद्भूषणमलङ्कारः एवं स समयः स्वयम्बरकालः तथा कुण्डिनपुरं भीमनगरं प्रतिसर्पन् अभिगच्छन् भीमनगरप्रापक इत्यर्थः स रथाध्वा रथमार्गः एते कर्त्तारस्तस्य भूपतेर्नलस्य व्यवसितानि चेष्टास्तेषु इन्द्रादिषु शशंसुः सूचयामासुः भैमीविवाहार्थमयं कुण्डिनपुरं गच्छतीति तेभ्यः कथयामासुरित्यर्थः वयमिव नलोऽपि भैमीलाभाय स्वयम्बरे यातीति ते ज्ञातवन्त इतिभावः ॥ ६७ ॥

एवं नलोऽर्थमिति निश्चित्य भैमीविवाहार्थञ्च तद्व्यवसायं ज्ञात्वा ते चिन्तिता जाता इत्याह ॥ धर्म्मराजेति ॥ तैर्धर्म्मराजसलिलेशहुताशैर्यमवरुणाग्निभिः जगतो विश्वस्य प्राणतां सुहृत्त्वादुपकारित्वाच्च प्राणवत् प्रियतां श्रितं आश्रितं अमुं नलं प्राप्य दृष्ट्वा दृष्टच विस्मृततापैः प्रथमं सौन्दर्य्यातिशयदर्शनात् हृष्टैः प्रमुदितैः ततो भैमीस्वयम्बराय तस्य गमनं निश्चित्य चलैश्चपलैः अस्थिरचित्तैः अयम्वरं एतादृशमतिसुन्दरं विहाय कथमस्मान् सा वरिष्यतीति निश्चित्य विस्मृततापैः प्रवृद्धखेदैरेवंभूतैः सद्भिः चेतसा चिन्तेन

Digitized by Google

प्राप्य हृष्टपवनविस्तृततापे
चेतसा निभृतमेतदचिन्ति ॥ ९८ ॥
नैव नः प्रियतमोभयथासौ
यद्यमुं न वृणुते वृणुते वा ।
एकतस्तु धिगमूमगुणज्ञा-
मन्यतः कथमदःप्रतिलम्भः ॥ ९९ ॥
मामुपैष्यति तदा यदि मत्तो
वेद नेयमिदमस्य महत्त्वं ।

चिन्तितं गूढं यथा तथा एतत् वक्ष्यमाणं अचिन्ति चिन्तितं यत्र च यमोऽनुगतः प्राणान् असून् प्राप्य बोधकानां प्राणापहारित्वात् हृष्यति पवनोऽपि भगवत्प्राप्तं वायुं प्राप्य यशोबलेन अवसन्नत्वात् ... भवति यथा अग्निरपि वायुसम्बन्धाद्विस्तृततापः प्रदीप्तोभवति ॥ ९८ ॥

धर्मराजस्य चिन्तामाह ॥ नैवेति ॥ असौ दमयन्ती यदि अमुं नलं न वृणुते वा अथवा वृणुते उभयथापि वरणावरणपक्षद्वयेऽपि असौ नोऽस्माकं नैव प्रियतमा प्राणेश्वरी भवेदिति शेषः। कथमित्याह तु यस्मात् एकतोऽवरणपक्षे अगुणज्ञां अमूं दमयन्तीं धिक् मत्तोऽधिकगुणाश्रयं नलं परित्यज्य यदि मां वरिष्यति तदेयं गुणानभिज्ञा कथं प्रियतमा भवेदित्यर्थः अन्यतो वरणपक्षे कथं अदःप्रतिलम्भः अमुष्या लाभः लाभाभावादेव नैव सा प्रियतमा भविष्यतीत्यर्थः यमेन स्वस्य धर्मप्रधानताद्धर्मप्रधाना चिन्ता कृता ॥ ९९ ॥

वरुणस्य चिन्तामाह ॥ मामिति ॥ इयं दमयन्ती तदा मां उपैष्यति वरीष्यति यदि मत्तोऽस्य नलस्य इयत् ईदृक् माहात्म्यं महत्त्वं

ईदृशी च कथमाकलयित्री
मद्विशेषमपरान्नृपपुत्री॥ ७०॥
नैषधे वत वृते दमयन्त्या
व्रीडितो न हि वहिर्भवितास्मि।

माहात्म्यं न वेद न जानाति नलमन्यथा एतमेव भविष्यतीत्याह ईदृशी अतिसुन्दरी च नृपपुत्री नृपपुत्रीत्वादतिचतुरा भैमी अपरात् इतरस्मात् नलात् मद्विशेषं ममैवोत्कर्षं कथं आकलयित्री कथं ज्ञास्यति अतोऽतिसुन्दरं नलं दृष्ट्वा अयमेवातिरमणीयोवरो वरणीय इति निश्चित्य तमेव वरिष्यतीत्यर्थः। बहूनां मध्ये सर्व्वोत्कृष्ट तया निश्चित एव व्रियते मम तु इतरानपेक्ष्य सत्यप्युत्कर्षे मदपेक्षया पि नलस्योत्कर्षात्तं विहाय मां कथं वरिष्यतीति सर्व्वथा ममालभ्यैव सा इति भावः चञ्चलप्रकृतित्वात् भवितव्यतामनपेक्ष्यैव वरुणेन चिन्ता कृता॥ ७०॥

वह्निश्चिन्तामाह॥ नैषधइति॥ वत खेदे दमयन्त्या नैषधे नले वृते सति अहं व्रीडितोलज्जितः सन् न हि नैव वहिर्भवितास्मि न वहिर्निर्गन्तुं शक्ष्यामि तर्हि गृहएव स्थातव्यमित्यत आह गृहेऽपि स्वां निजां वनितां स्त्रियं कथं आस्यं मुखं दर्शयिताहे दर्शयिष्ये किम्भूतं आस्यं खलु यतोह्रिया लज्जया या निमीला चक्षुर्मुद्रणा सा विद्यते यत्र तादृशं वहिर्लोकभयं गृहेऽपि वनिताभयमतोमम महद्वैवश्यमुपस्थितमिति भावः। रजःप्रकृतित्वादग्निना लज्जाम् धाना चिन्ता कृता। भवितास्मि दर्शयिताहे इति लुटउत्तमपुरुषैक

Digitized by Google

त्वां गृहेऽपि वनितां कथमास्यं
ह्रीनिमीलि खलु दर्शयिताहे ॥ ७१ ॥
इत्यवेत्य मनसात्मविधेयं
किञ्चन त्रिविबुधी बुबुधे न ।
नाकनायकमपास्य तमेकं
सा स्म पश्यति परस्परमास्यं ॥ ७२ ॥
किं विधेयमधुनेति विमुग्धं
स्वानुगव्रजमवेक्ष्य ऋभुक्षाः ।

वचनं । वनितामिति दृश्यभिवादोरात्मनेपदइति प्रयोज्यस्य कर्मत्वं ॥ ७१ ॥

युगपत्त्रयाणामवस्थामाह ॥ इतीति ॥ त्रिविबुधी यमवरुणाग्निरूपा देवत्रयी मनसा इति पूर्वोक्तं अवेत्य विचार्य्य किञ्चन किमपि आत्मविधेयं स्वकर्त्तव्यं न बुबुधे न निश्चिकाय किन्तु सा त्रिविबुधी तं एकं नाकनायकं इन्द्रं अपास्य त्यक्त्वा परस्परमन्योऽन्यं आस्यं मुखं पश्यति स्म कर्त्तव्यतामूढाभूदित्यर्थः । इन्द्रस्तु विषयत्वानुर्योगत्वान्न तथा भावः ॥ ७२ ॥

तदानीमिन्द्रेण यत्कृतं तदाह ॥ किमिति ॥ ऋभुक्षा इन्द्रः स्वानुगानां स्वस्यानुगच्छतां यमवरुणाग्नीनां व्रजं अधुना इदानीं किं विधेयं करणीयं इति विमुग्धं कर्त्तव्यताविषयाभावात् विशेषेण मूढं अवेक्ष्य निरीक्ष्य तमस्य वचनं प्रकारस्य समभिव्याहारविषयो कृत्य ध्वंसति स्म नलं प्रति वक्ष्यमाणं कथयामास तद्वेक्षायां

भ्रंसति स्म कपटे पटुरस्थै
व्यञ्जनं समभिलष्य नलस्य॥ ७३॥
सर्व्वतः कुशलभागसि कच्चित्
त्वं स नैषध इति प्रतिभा नः।
शासनार्द्धसुहृदस्त्वयि रेखा
वीरसेननृपतेरिव विद्मः॥ ७४॥
क्व प्रयास्यसि नलेत्यलमुक्ता
यात्रयात्र शुभयाजनि यन्नः।

हेतुगर्भविशेषणमाह किंभूतः उच्चैरतिवरा कपटे कापट्ये प्रतार
णायां पटुः कुशलः। कापट्यलः सहचात्स्य भुप्ता इत्यमरः॥७३॥

यदुवाच तदाह॥ सर्व्वेति॥ त्वं सर्व्वतः सर्व्वस्मिन् स्वाङ्गे
राज्याङ्गे च कुशलभागसि कुशलं भजसे कच्चित् कथय नन्वपरि
चितस्य कुशलजिज्ञासा नोचितेत्यत्राह त्वं स प्रसिद्धो नैषधो वीर
सेनसुतो नल इति नोऽस्माकं प्रतिभा अनुमितिः कुत इत्याह स्वस्य
मम शासनार्द्धे विषये सुहृदो मित्रस्य मदीयासनार्द्धभागिनो मित्रस्य
वीरसेननृपतेर्व्वीरसेननाम्नो राज्ञ इव रेखा शरीरचिह्नं शोभा वा
त्वयि विद्मः पश्यामः वीरसेनसमानशरीरत्वात्त्वं तत्सुतो नल इत्यस्मा
भिरनुमितं पुत्रोऽपि हि प्रायेण पितृसमानशरीरो जायते अथच
त्वमस्माकं मित्रपुत्रोऽतोऽस्माभिर्य्यद्वक्तव्यं तत्त्वयावश्यमेवानुष्ठेयं भवि
ष्यतीति सूचितं। कच्चित् कामप्रवेदने इत्यमरः। स्वाभिप्रायकथनं
कामप्रवेदनं॥ ७४॥

क्वेति॥ हे नल त्वं क्व कस्मिन् देशे प्रयास्यसि गमिष्यसि इति
उक्ता एका अलं व्यर्थैवायं प्रश्न इत्यर्थः यत् यस्मात् नोऽस्माकं

Digitized by Google

तत्तयैव फलसत्वरया त्वं
नाध्वनोऽर्द्धमिदमागमितः किं ॥ ७५ ॥
एष नैषध स दण्डभृदेष
ज्वालजालजटिलः स हुताशः ।
यादसां स पतिरेष च शेषं
शासितारमवगच्छ सुराणां ॥ ७६ ॥
अर्थिनो वयममी समुपेम
त्वां किलेति फलितार्थमवेहि ।

अत्र पृथिव्यां याच्ञया शुभया फलावश्यम्भावात् कुशलया भवितव्यं यतस्तस्मात् फलसत्वरया शीघ्रफलितया तयैव याच्ञयैव किं त्वं इदं अध्वनोऽर्द्धं अर्द्धपथं नागमितोऽसि प्रापितः अपि तु याच्ञयैवास्मत्कार्य्यार्थं प्रापितः न तु त्वं स्वकार्य्यवशादत्रागतवानित्यर्थः । उक्तेति निषेधार्थालंखलुयुक्तावेति क्त्वा ॥ ७५ ॥

के यूयं न जानामीत्यत्राह ॥ एष इति ॥ हे नैषध एषोऽग्रे दृश्यमानः स प्रसिद्धो दण्डभृत् यमः तथा एषज्वालजालेन शिखासमूहेन जटिलो जटावान् स हुताशोऽग्निः एष च स यादसां जलजन्तूनां पतिर्वरुणः शेषमवशिष्टं मां सुराणां देवानां शासितारं शासनकर्त्तारं इन्द्रं अवगच्छ जानीहि । दण्डभृदादिविशेषणं भयप्रदर्शनार्थं तेन सति सामर्थ्येऽस्मन्नियोगाकरणे यथोचितशास्तिर्भविष्यतीति सूचितं । वह्नेर्द्वयोर्ज्वालकीलावर्चिर्हेतिः शिखा स्त्रियामित्यमरः ॥ ७६ ॥

अर्थिन इति ॥ हे नल अमी वयं देवाः किल निश्चितं अर्थिनो याचकाभूत्वा त्वां समुपेमः प्राप्ताः स्मः इति फलितार्थं निष्कृष्टार्थं

अध्वनः क्षणमपास्य च खेदं
कुर्म्महे भवति कार्य्यनिवेदं ॥ ७७ ॥
ईदृशीं गिरमुदीर्य्य विडौजा
जोषमाप न विशिष्य बभाषे।
नात्र चित्रमभिधाकुशलत्वे
शैशवावधि गुरुर्गुरुरस्य ॥ ७८ ॥

अवेहि जानीहि वयं शीघ्रं कथं न याचत इत्यत्राह क्षणमल्पकालं व्याप्य अध्वनः पथः खेदं गमनायासं अपास्य अपनीय किञ्चिद्विलम्ब्य भवति त्वयि कार्य्यस्य प्रयोजनस्य निवेदं ज्ञापनञ्च कुर्म्महे करिष्यामः आगत्यैव प्रार्थनं न दातुरायहकरं भवतीति तथोक्तमिति भावः। कुर्म्महे इति वर्त्तमानसामीप्ये लट् ॥ ७७ ॥

ईदृशीमिति ॥ विडौजा इन्द्र ईदृशीं पूर्व्वोक्तां गिरं वाचं उदीर्य्य उक्त्वा जोषं तूष्णीम्भावं आप प्राप्तवान् आसेति पाठे जगामेत्यर्थः न तु विशिष्य विशेषं कृत्वा बभाषे उवाच भैमीलाभार्थमागतानाम स्माकं त्वं दौत्यं कुर्व्विति विशेषं नोवाचेत्यर्थः। हठादुक्तौ कार्य्यस्यागौरवं मत्वा यदि निषेधमेवाश्रयेतेति भयेन विशिष्य नोक्तमिति भावः। कथमेतादृग्वाक्चातुर्य्यमस्येत्युपपादयति अत्र ईदृशे अभिधाकुशलत्वे वाक्चातुर्य्ये न चित्रं नाश्चर्य्यं यतः शैशवावधि बाल्यमारभ्य गुरुर्बृहस्पतिरस्य इन्द्रस्य गुरुरुपदेष्टा बृहस्पतिशिष्टितो यदेवं वदति तत्र नाश्चर्य्यमित्यर्थः। तूष्णीमर्थे सुखे जोषमित्यमरः ॥ ७८ ॥

Digitized by Google

अर्थिनामहृषिताखिलरोमा
स्वं नृपः स्फुटकदम्बकदम्बं ।
अर्चनार्थमिव तच्चरणानां
स प्रणामकरणादुपनिन्ये ॥ ७९ ॥
दुर्लभं दिगधिपैः किममीभि
स्तादृशं कथमदो मदधीनं ।
ईदृशं मनसिकृत्य विरोधं
नैषधेन समशायि चिराय ॥ ८० ॥

एवमुक्त्वा इन्द्रे विरते नलस्यावस्थामाह ॥ अर्थीति ॥ अर्थिनाम्ना अर्थीतिनामश्रवणेन हर्षितानि उद्गतानि अखिलानि समस्तानि रोमाणि यस्य तादृशः स नृपो नलः प्रणामकरणात् भक्तिश्रद्धादिना प्रह्वस्य नमस्कारकरणाद्धेतोः अर्चनार्थं पूजार्थं स्वमात्मानं तच्चरणानामिन्द्रादिपदानां उपनिन्ये समीपं प्रापयामास कमिव स्फुटानां विकसितानां कदम्बानां नीपानां कदम्बमिव समूहमिव कदम्बकुसुमसमूहमपि भक्तेन पूजार्थं देवानां चरणसमीपं प्राप्यते । कदम्बं निकुरम्बे स्यान्नीपसिद्धार्थयोः पुमानिति मेदिनी ॥ ७९ ॥

दुर्लभमिति ॥ अमीभिर्दिगधिपैर्दिक्पतिभिरिन्द्रादिभिः किं वस्तु दुर्लभं दुष्प्रापं अपि तु न किमपि तादृशं इन्द्रादिदुर्लभं वा अदोवस्तु मदधीनं ममायत्तं कथं ईदृशं विरोधं मनसिकृत्य आखिबलेन विचार्य्य नैषधेन नलेन चिराय बहुकालं व्याप्य समशायि वक्ष्यमाणप्रकारेण संशयितं । मनसिकृत्येति अनुपसर्गेऽपि उरसि मनसि मध्ये पदे निवचने चेति प्रादुरादित्वात् ल्यप् ॥ ८० ॥

Digitized by Google

जीविताबधि वनीयकमात्रै-
र्याच्यमानमखिलं सुलभं यत् ।
अर्थिने परिवृढाय सुराणां
किं वितीर्य्य मम तुष्यतु चेतः ॥ ८९ ॥
भीमजा च हृदि मे परमास्ते
जीवनादपि धनादपि गुर्व्वी ।

संशयप्रकारमेवाह ॥ जीवितेति ॥ जीविताबधि जीवनपर्य्यन्तं अखिलं समस्तं याच्यमानं वनीयकमात्रैः सामान्ययाचकैर्विशिष्टपात्रवाह्यैरपि यत् वस्तु सुलभं अनायासेन प्राप्यं अतोऽर्थिने याचकाय सुराणां देवानां न तु केषाञ्चिन्मनुष्यादीनां परिवृढाय प्रभवे न तु दूतादिरूपाय इन्द्राय किं वस्तु वितीर्य्य दत्वा मम चेतो ऽन्तःकरणं तुष्यतु सन्तुष्टं भवतु जीवितपर्य्यन्तं यस्मै कस्मै चिद्याचकाय दीयते जीविताद्धिकन्तु वस्तु नास्त्येव यत् देवेन्द्राय दत्वा तुष्यामीत्यर्थः पात्रविशेषे हि दानस्य विशेष एव युज्यते । वनीयको याचनको मार्गणो याचकार्थिनावित्यमरः ॥ ८९ ॥

ननु तव जीविताधिका दमयन्ती वर्त्तते सैवास्मै दीयतामित्याशङ्क्याह ॥ भीमजेति ॥ उर्व्वी वसुन्धरा पृथिव्यपि यस्याः भैम्याः षोडशीमपि कलां षोडशभागं किल निश्चितं नार्हति पृथिव्यपि सूक्ष्मविचारे यस्याः षोडशभागयोग्या न भवति सा जीवनादपि धनादपि गुर्व्वी गौरववती भीमजा च भैमी तु परं केवलं मे मम हृदि मनसि आस्ते वर्त्तते न तु सा मम स्वमेव नैव मत्स्वामिका केवलं

Digitized by Google

न स्वमेव मम सार्हति यस्याः
षोडशीमपि कलां किल नोर्व्वी ॥ ८२ ॥
मीयतां कथमभीप्सितमेषां
दीयतां द्रुतमयाचितमेव ।
तं धिगस्तु कलयन्नपि वाञ्छा
मर्थिवागवसरं सहते यः ॥ ८३ ॥

तामहं मनसाभिलष्यामि न तु सा मदधीना यत्र हि स्वत्वं नास्ति तत्कथं दातुं शक्यते अस्वामिकस्य दानासम्भवात् ॥ ८२ ॥

मीयतामिति ॥ एषां इन्द्रादीनां अभीप्सितं इष्टं वस्तु कथं मया मीयतां ज्ञायतां येन अयाचितमेव तैरप्रार्थितमेव प्रार्थनायाः प्रागेवेत्यर्थः अभीप्सितं द्रुतं शीघ्रं दीयतां प्रार्थनामप्रतीक्ष्यैव तेषां वाञ्छितं दीयतामित्यर्थः ननु प्रार्थनानन्तरमेव अभिलषितं ज्ञात्वा दातव्यं कथमधुना व्याकुलोभवसीत्याह तं दातारं अन्तं धिगस्तु सनिन्दनीयो भवतु योदाता याचकानां वाञ्छां अभिलाषं कलयन्नपि कथञ्चित् प्रकारादिना जानन्नपि अर्थिनां याचकानां वाचोमत्स्य मेतद्वस्तु दातव्यमिति प्रार्थनवचनस्य अवसरं अवकाशं सहते प्रतीक्षते यो याचकानां वाञ्छितं ज्ञात्वापि भवतु प्रथमं याचतां ततोऽहं दास्यामीति चिरयति सोऽधमोदाता इत्यर्थः तस्मादयाचितमेव देयमिति भावः । अभीप्सितमिति पूजेच्छेत्यादिना वर्त्तमाने क्तः तद्योगे च एषामित्यत्र वर्त्तमानवाचिना क्तेनेति कर्त्तरि षष्ठी ॥ ८३ ॥

Digitized by Google

प्रापितेन चटुकाकुविलम्बं
लम्भितेन बहुयाचनलज्जां ।
अर्थिना यदघमर्जति दाता
तन्न लुम्पति विलम्ब्य ददानः ॥ ८४ ॥
यत्प्रदेयमुपनीय वदान्यै-
र्दीयते सलिलमर्थिजनाय ।

तदेव स्पष्टयन्नाह ॥ प्रापितेनेति ॥ दाता विलम्ब्य विलम्बं कृत्वा ददा नोददत्सन् अर्थिना याचकेन करणेन हेतुना वा यत् अघं पापं अर्जति उपार्जयति तत् अघं दानात् न लुम्पति दानं कृत्वा परिमार्ष्टुं न शक्नोति वा कथाधिकपुण्यस्येत्यर्थः किम्भूतेनार्थिना चटुः त्वमेवैको जगति महानुभावोनान्य इत्यादिप्रियोक्तिः काकुः दीनपालक दीने मयि विधेयानुकम्पेत्यादिदैन्योक्तिस्ताभ्यां विलम्बं कालात्ययं विडम्ब पराभवम्वा प्रापितेन तथा बहुयाचनेन अनेकवारप्रार्थनेन कृत्वा ल ज्जां लम्भितेन प्रापितेन प्रियवचनाद्यवादयित्वा शीघ्रमेव याच काय देयमन्यथा पातकं स्यादिति भावः । अर्जतीति अर्ज अर्जने भ्वादिः ॥ ८० ॥

किच । यदिति ॥ वदान्यैर्बहुप्रदैर्जनैः प्रदेयं प्रदातव्यं वस्तु उप नीय समीपमानीय अर्थिजनाय याचकजनाय यत्सलिलं जलं दीय ते उत्सर्गार्थं यदर्थिजनहस्ते क्षिप्यते सा जलप्रक्षेपरूपा क्रिया अर्थिनोक्तयाचनस्य या विफलत्वविशङ्का वैफल्याशङ्का तया ज निताय्वासोभयं तेन मूर्च्छन् वर्तमानोयोऽयमनुपुरागिनकमरं

Digitized by Google

सार्थनोक्तिविफलत्वविशङ्का
त्रासमूर्च्छदपमृत्युचिकित्सा ॥ ८५ ॥
अर्थिने न तृणवद्धनमात्रं
किन्तु जीवनमपि प्रतिपाद्यं ।
एवमाह कुशवज्जलदायी
द्रव्यदानविधिरुक्तिविदग्धः ॥ ८६ ॥

तस्य चिकित्सा प्रतिक्रिया सलिलप्रक्षेपेण याञ्चासाफल्यनिश्चयात् । आशङ्कात्रासजनितोमूर्च्छनापमृत्युरपि अवप्रक्षेपात् शाम्यति शीघ्र मेवार्थिभ्योदातव्यं न तु विलम्बः कर्त्तव्य इति भावः ॥ ८५ ॥

न केवलं धनमात्रमेव झटिति देयं किन्तु याचकानां हिताय प्राणा अपि परित्याज्या इत्याह ॥ अर्थिनइति ॥ कुशवज्जलदायी सकुशजलकरणकदानप्रतिपादक उक्तिविदग्धः श्लेषोक्तिचतुरो द्रव्य दानविधिर्द्रव्याणां दानविधायकं शास्त्रं । कुशवत् सलिलोपेतं दानं सङ्कल्पपूर्व्वकमित्यादिकर्म्म एवमाह भङ्ग्या एवं प्रतिपादयति एवं किं अर्थिने याचकाय तृणवत् तृणमिव तृणवतुच्छत्वेन परित्यज्य दाता धनमात्रं केवलं धनं न प्रतिपाद्यं न देयं किन्तु जीवन मपि अर्थिनामुपकाराय जीवितमपि प्रतिपाद्यं परित्याज्यं अय म्भावः सकुशजलेन दातव्यमिति विधौ सत्यपि पवित्रवत्तु विधि त्य कुशजलयोर्ग्रहणं कुशस्य तृणत्वात् दातृभिर्धनं तृणमिव मत्वा त्यक्तव्यं जलस्य च जीवनसंज्ञत्वात् जीवितमिव स्वजीवितमपि याचकोपकाराय त्यक्तव्यमित्येतत्सूचकमिति अतएव विधेरुक्ति विदग्धता ॥ ८६ ॥

पङ्कसङ्करविगर्हितमर्थं
न श्रियः कमलमाश्रयणाय।
अर्थिपाणिकमलं विमलन्त
द्वासवेश्म विदधीत सुधीस्तत् ॥ ८७ ॥
याचमानजनमानसवृत्तेः
पूरणाय बत जन्म न यस्य।

धनामर्थिसात्करणमेव श्रेय इत्याह ॥ पङ्केति ॥ पङ्कस्य कर्दमस्य सङ्करेण संसर्गेण विगर्हितं विशेषेण निन्दितं कमलं पङ्कजं श्रियः सम्पदः अथ च लक्ष्म्या आश्रयणाय अवस्थानाय अर्थं योग्यं न भवेदिति शेषः पङ्कस्थितत्वादेव श्रियोऽवस्थाने न युज्यत इत्यर्थः अन्यदपि पङ्किलस्थानमवस्थानाय न भवति अथ च पङ्कसङ्करेण पापसाङ्कर्येण विगर्हितं अवस्थानाय योग्यं न भवति तत्तस्मात् सुधीः पण्डितः विमलं पङ्करहितं अर्थिपाणिकमलं याचकहस्तपद्मं तस्याः श्रियो वासवेश्म वासगृहं विदधीत कुर्वीत सम्पत्तेरर्थिभ्यः प्रतिपादनमेव श्रेयस्करमितिभावः ॥ ८७ ॥

अदातुर्निन्दामाह ॥ याचमानेति । यस्य पुरुषस्य जन्म उत्पत्तिर्याचमानजनानां याचकजनानां मानसवृत्तेर्मनोरथस्य पूरणाय धनवितरणद्वारा निवृत्तये न भवति तेन पुरुषेणैव इयं भूमिः पृथिवी अतिभारवती अतितरां सभारा भवति न द्रुमैर्न तु वृक्षैर्न गिरिभिर्न पर्वतैर्न समुद्रैर्भारवती वृक्षादीनां पुष्पादिना औषधादिना

Digitized by Google

तेन भूमिरतिभारवतीयं
न द्रुमैर्न गिरिभिर्न समुद्रैः ॥ ८८ ॥
मा धनानि कृपणः खलु जीवन्
तृष्णयार्पयतु जातु परस्मै ।
अत्र चैष कुरुते मम चित्रं
यत्तु नार्पयति तानि मृतोऽपि ॥ ८९ ॥
माममीभिरिह याचितवद्भि
र्दातृजातमवमत्य जगत्यां ।

रत्नादिना च जनानामुपकारकत्वात् । अर्थीभूत्वामाविर्भूय याचकम
नोरथपूरणमवश्यं करणीयमिति भावः ॥ ८८ ॥

किंच ॥ मेति ॥ कृपणोऽत्यन्तकुण्ठजनो जीवन् सन् परस्मै अन्यस्मै
तृष्णया मदीयमिदं चिरं तिष्ठत्विति दुराशया धनानि जातु कदाचि
दपि खलु निश्चितं मा अर्पयतु न ददातु तृष्णाधिक्याज्जीवितो यन्न
ददाति तत्र नाश्चर्यमित्यर्थः अत्र च अस्मिन् विषये एष कृपणः मम
चित्रं आश्चर्यं कुरुते यत्तु यत्पुनरेष मृतोऽपि तानि धनानि नार्पयति
न प्रयच्छति मृतेन तृष्णासम्भवाभावात् यन्न प्रयच्छति तदाश्चर्यमे
वेत्यर्थः अथ च मृतः सन्नेव कृपणो धनानि नार्पयति नार्थीति नृपस
न्धीनि करोति प्रायेण कृपणानां सन्निहिताधिकार्यन्तराभावेन
बलेन वा राजा धनानि गृह्णातीत्यर्थः तत्राश्चर्यं येन जीवता किञ्चिन्न
दीयते तस्य मृतस्य सर्वं राजा गृह्णातीत्याश्चर्यं तस्माद्यावज्जीवति वा
वदातव्यं मृते तु सर्वं राजा नेष्यतीति भावः ॥ ८९ ॥

देवानां दुर्लभं कथमं वस्तु मदधीनं यद्दत्तैते तोषणीया इति म
नसि कृत्वा चिन्तयति ॥ मामिति ॥ इह जगत्यां भूलोके दातृजातं

Digitized by Google

यद्यशोमयि निवेशितमेत
न्निष्क्रयोऽस्तु कतमस्तु तदीयः ॥ ९० ॥
लोकएष परलोकमुपेता
हा विहाय निधने धनमेकः।
इत्यमुं खलु तदस्य निनीष
त्यर्थिबन्धुरुदयद्दयचित्तः ॥ ९१ ॥

वदान्यसमूहं अवमत्य अनादृत्य मां याचितवद्भिः प्रार्थितवद्भिरमीभि रिन्द्रादिभिर्मयि यद्यशोनिवेशितं स्थापितं इन्द्रादयोऽपि नलस्य याचका जाता इति या कीर्त्तिरर्पितेत्यर्थः एतस्य यशसो निष्क्रयोवि निमयस्तदीय इन्द्रादिसम्बन्धी कतमस्तु कतमः पुनरस्तु भवतु यशो निवेशनप्रतिदेयं कतमं वस्तु इन्द्रादिभ्योदत्त्वा यशोरक्षणीयमि त्यर्थः। यदेतद्यशोनिवेशितं तदीयोयशःसम्बन्धी निष्क्रय इति वा ॥ ९० ॥

तर्हि किं यशोरक्षणार्थमेवं चिन्तयसीत्याशङ्क्याह ॥ लोक इति ॥ हा विषादे एष लोकोनिधने मरणे सति धनं विहाय परित्यज्य एकोऽसहायः सन् परलोकं लोकान्तरं उपेता गमिष्यति इति हेतोः खलु निश्चितं उदयन्ती जायमाना दया यत्र तादृशं चित्तं मनोयस्य तादृशः सन् अर्थिबन्धुर्याचकरूपः सुहृत् अस्य दातुस्तद्धनं अमुं पर लोकं निनीषति नेतुमिच्छति न दत्तं नोपतिष्ठत इति स्मरणात् ब हुप्रेच्छायां वा न केवलं यशोऽर्थमेव लोकैर्याचकेभ्यो धनानि दीयन्ते किन्तु परलोके स्वेषामप्युपयोगायेति भावः। उपेतेति लुटोरूपं ॥ ९१ ॥

Digitized by Google

दानपात्रमधमर्णमिहैक-
ग्राहि कोटिगुणितं दिवि दायि।
साधुरेति सुकृतैर्यदि कर्तुं
पारलौकिककुसीदमसीदत् ॥ ९२ ॥
एवमादि स विचिन्त्य मुहूर्त्तं
तानवोचत पतिर्निषधानाम्।

इह याचकाय यावद्दीयते परलोके तावन्मात्रमेव न प्राप्यते किन्तु तत्कोटिगुणितं तत्र भवतीत्याह ॥ दानपात्रमिति । यदि वार्थे साधुर्यदि सज्जन एव पारलौकिकं परलोकभवं कुसीदं वृद्धिजीविकाम् असीदत् अविनश्वरं कर्तुं सुकृतैः पुण्यैर्दानपात्रं वेदपारगत्वादिगुणयुक्तसंप्रदानलक्षणम् अधमर्णम् ऋणग्रहीतारम् एति प्राप्नोति जानाति वा किम्भूतम् इह लोके एकम् एकगुणं ग्रहीतुं शीलमस्य तादृशं दिवि स्वर्गे कोटिगुणितं कोटिसंख्यकं ददाति दास्यति वा तादृशम् आनन्त्यं वेदपारग इत्यादिस्मरणात् अन्योऽधमर्ण एकगुणं गृहीत्वा द्विगुणादधिकं न ददाति कुसीदवृद्धिर्द्वैगुण्यं नात्येति सकृदाहृतेति मनुस्मरणात् दानपात्राधमर्णस्तु एकगुणं गृहीत्वा कोटिगुणं ददातीति व्यतिरेकालङ्कारः तस्मादेतादृशमधमर्णं पुण्यैः करणैः साधुरेव प्राप्नोति नान्य इत्यर्थः। कुसीदं वृद्धिजीविकेत्यमरः। दायीति अधमर्ण इत्यनेन भविष्यति गमादेरित्यनेन वा णिन् अस्य भविष्यदधमर्णयोरिनिति त्वादित्वात् कोटिगुणितमित्यत्र न षष्ठी ॥ ९२ ॥

एवमिति ॥ स निषधानां पतिर्नलः मुहूर्त्तं क्षणमात्रं व्याप्य एवमादि एवंप्रभृति विचिन्त्य विभाव्य तान् इन्द्रादीनवोचत उक्त

अर्थिदुर्लभमवाप्य सहर्षान्
याच्यमानमुखमुल्लसितश्रि ॥ ९३ ॥
नास्ति जन्यजनकव्यतिभेदः
सत्यमन्नजनितोजनदेहः ।

तान् तान् किम्भूतान् अर्थिभिर्याचकैर्दुर्लभं दुष्प्रापं उल्लसिता उदिता श्रीः शोभा यत्र तादृशं याच्यमानस्य प्रार्थ्यमानस्य मम तं नलस्य मुखं प्राप्य सहर्षान् हृष्टान् दाता हि प्रायेण याच्यमानः सन् मुखं मलिनमेव करोति नलन्तु याच्यमानं प्रसन्नमुखं दृष्ट्वा कार्य्यसिद्धिं निश्चित्य इन्द्रादयः सहर्षा जाता इत्यर्थः ॥ ९३ ॥

यदुक्तवांस्तदाह ॥ नास्तीति ॥ जन्यजनकयोः कार्य्यकारणयो र्व्यतिभेदः परस्परं भेदो यति अत्यन्तं भेदोविलक्षण्यं वा नास्ति यथा जनानां देहः शरीरं अद्यते भुज्यते यत् तदन्नं भक्तं तत्तु तेन जनित उत्पादित इत्युभयं सत्यं खलु यस्मात् वो युष्माकं अमृतादं सुधाभ क्षिणां सुधाभक्षणोपचितामित्यर्थः तनूं शरीरं वीक्ष्य विशेषेण दृष्ट्वा मम दृक् चक्षुः सुधायाममृते निमज्जनं उपैति सुधानिमज्जनजन्य सुखमनुभवति उपैमीति पाठे अहं सुधायां दृशोश्चक्षुषोर्निमज्जनं उपैमि सुधाकरणकचक्षुःसेचनजन्यसुखमनुभवामीत्यर्थः सुधाभो जिनां युष्माकं शरीरं यत् निमज्जतः सुधावत्सुखं जनयति तत्र सां ख्योक्तः कार्य्यकारणाभेद एव हेतुरित्यर्थः युष्मान् दृष्ट्वा अहमतितरां सुखी जातो नलितरदातृजनवदयाचकदर्शनाद्दुःखी तस्मादभिल षितं याच्यतामिति भावः । यद्यप्योदन एव वाच्येऽन्नेति निपातितं

Digitized by Google

वीक्ष्य यः खलु तनूममृताद्र्
दृष्टिमज्जनमुपैति सुधायां ॥ ९४ ॥
मत्तपः क नु तनु क फलम्वा
यूयमीक्षणपथं व्रजथेति ।
दृष्टान्यपि ददन्ति पुनर्नः
पूर्व्वपूरुषतपांसि जयन्ति ॥ ९५ ॥
प्रत्यतिष्ठिपदिमां खलु देवीं
कर्म्म सर्व्वसहनव्रतजन्म ।

तथाप्यत्र गोबीजसतया अदनीयवस्तुमात्रपरमिति बोध्यं । अमृतादमिति अदोऽनन्नद्गति क्विप् ॥ ९४ ॥

मत्तपइति ॥ नु भो देवास्तनु अल्पं मत्तपो मदीया तपस्या क कुत्र अदृष्टा अपि यूयं ईक्षणपथं दृष्टिगोचरतां व्रजथ गच्छथ इति फलं वा क अपि तु अत्यन्तासम्भावितमेतत् पुष्यपुञ्जलभ्यं भवतां दर्शनमदृष्टफलस्यास्यपुण्येन ताभासम्भवात् । तर्हि तत्कथं लब्धमित्याह दृष्टान्यपि असंघटमानान्यपि गुणदृष्टफलकानि नोऽस्मभ्यं ददति ददानानि पूर्व्वपूरुषाणां पत्रादीनां तपांसि पुनर्जयन्ति उत्कर्षेण वर्त्तन्ते पूर्व्वपूरुषतपोबलादेव यूयं दृष्टा इत्यर्थः ॥ ९५ ।

प्रत्यतिष्ठिपदिति ॥ सर्व्वसहनव्रतात्सर्व्वभारसहिष्णुत्वधर्मनियमात् जन्म उत्पत्तिर्यस्य तादृशं कर्म्म पुण्यं कर्तृ खलु निश्चितं इमां भूमिं देवीं प्रत्यतिष्ठिपत्प्रतिष्ठापयामास देवाति प्रतिष्ठां प्रापयामासेत्यर्थः खलूत्प्रेक्षायां वा सर्व्वभारसहनव्रतजनितपुण्येनेव भूम्यादेवीत्वं प्राप्तमित्यर्थः तत्र प्रमाणमाह अङ्गाश्चर्य्ये इत् यस्मात् यूयमपि देवे

यूयमप्यखिल पूजनमस्या
यन्निजैः सृजय पादपयोजैः ॥ ९६ ॥
जीवितावधि किमप्यधिकम्बा
यन्मनीषितमितो नरडिम्भात् ।
तेन वस्सरणमस्त्वथवा तु सोऽयं
ब्रूत वस्तु पुनरस्तु किमीदृक् ॥ ९७ ॥
एवमुक्तवति वीतविशङ्के
वीरसेनतनये विनयेन ।

भ्रादयोऽपि निजैः स्वीयैः पादपयोजैश्वरणपङ्कजैः करणैः अस्या भूम्याः पूजनं सृजथ कुरुथ युष्माभिः पूजनमेवास्या देवीत्वे प्रमाणमित्यर्थः अन्यापि देवीप्रतिमा प्रतिष्ठिता सती पद्मैः पूज्यते पृथिवीभाग्यादेव यूयमत्रागतवन्तो न तु मदधीनविधेयत्वादितिभावः । प्रतिष्ठिय इदिति इदावः मुहव्यारमायाः ॥ ९६ ॥

जीवितेति ॥ जीवितं अवधिर्मर्यादा यस्य तादृशं प्राणपर्यन्तं वा किंवा प्राणेभ्योऽप्यधिकं वत् किं वस्तु यत्तु इतोऽमत्सकाशात् नरडिम्भान्मानुषार्भकात् युष्माभिर्मनीषितं अभिलषितं सोऽयं नरडिम्भस्तेन वस्तुना वायुमाकं भरणं मरणंतु पूजयतु ईदृगवस्तु किं पुनरस्तु भवतु ब्रूत यूयं कथयत प्रज्ञां परित्यज्य यावनोयं कालोऽत्यर्थं मा वाचिकमपि दातुं प्रभोमीतिभावः परस्परपूजने सामर्थ्याभावात् परस्मिन्ये कथनेन सख्य विनीतत्वं सूचितं ॥ ९७ ॥

एवं नलकथानन्तरं इन्द्रः प्रत्युवाचेत्याह ॥ एवमिति ॥ वीता गता विशङ्का विलक्षा प्रज्ञा अभिप्रायांप्रायांशङ्का येन तादृश वीरसेन

वक्रभावविषमामथ शक्रः
कार्य्यकैतवगुरुर्गिरमूचे ॥ ९८ ॥
पाणिपीडनमहं दमयन्त्याः
कामयेमहि महीमिहिकांशो ।

अथ राजसमये गुणे सर्वे विनयेन विनीततया सर्वं पूर्वोक्तं उक्तवति कथयति सति अथानन्तरं शक्र इन्द्रो वक्रभावेन वक्रत्वेन वक्रोक्त्या कुटिलाभिप्रायेण च विषमां दुर्बोधां कार्य्य च विषये मोघवे उपनीयमानेऽपि तादृशीं दुष्टां गिरं वाचं उवाच कथयति स्म किम्भूतः कार्य्ये यत् कैतवं कापट्यं तत्र गुरुर्देवसमितिसमः ॥ ९८ ॥

तदूचे तदाह ॥ पाणीति ॥ हे महीमिहिकांशो पृथिवीहिमकिरणे पृथिवीचन्द्र नल वयं दमयन्त्याः पाणिपीडनमहं विवाहोत्सवं कामये महि इच्छामः तर्हि तमेव गच्छत किमर्थं मामनुप्राप्ता इत्यत्राह हे निर्जितस्मर निःशेषेण जितः सौन्दर्य्येण पराभूतः स्मरः कामो येन हे तादृश निरस्य निरकाशीनां स्मरभीतिं कामाद्भवं विरहभय मिवियावत् निरस्य दूरीकृत्य तव विवाहविधौ नोऽस्माकं दूतं दूतकर्म्म कुरु तस्य विरहभयमन्तरेणैव यथा दमयन्ती अस्माकमत्र मर्थं दमयन्त्यां तत्र गता सा तया सर्वोऽभिनीयेव्यथेः योऽहि काम येता स कामभयं निरस्यैव नय च त्वं निर्जितस्मरो जितेन्द्रियो ऽसि सुतरां विवाहावश्यकताभावादस्मदर्थमेव यतस्वेति भावः । भीतिं यथा अस्माकमरवे दक्षभयं अभिशापभयं वा स्मर नश्यति कु

दूत्यमत्र कुरु नः स्मरभीतिं
निर्जितस्मर निरस्य चिरस्य ॥ ९९ ॥
आसते शतमधिक्षिति भूपा
स्तोयराशिरसि ते खलु कूपाः ।
किं ग्रहा दिवि न जाग्रति ते ते
भास्करस्य कतमस्तु तुलायाम् ॥ १०० ॥

क्षिति वां अस्माकं स्मरभीतिं निरस्य निवारयेत्यपि वा । कामयेन
जौवि चिरकालमचिरकालं ॥ ९९ ॥

नन्वन्येऽपि राजानः पृथिव्यां सन्ति कथं तान् विहाय मामेव प्रार्थयध्व
इत्याशङ्कायामाह ॥ आसत इति ॥ हे नल अधिक्षिति क्षितौ शतं
असंख्याभूपा राजान आसते वर्तन्ते किन्तु त्वं गाम्भीर्य्यादिगुणवत्त्वात्
तोयराशिरसि समुद्रोऽसि ते तद्भिन्ना राजानः खलु निश्चितं क्षोभ
णीयत्वात् तुच्छाशयत्वाच्च कूपाः यथा समुद्रापेक्षया कूपा हीनास्तथा
त्वदपेक्षया अन्ये राजानो हीना अतस्ते न याचिता इत्यर्थः वरं प्राञ्च
त्यागेन पुनरधमानामनुगम इति शिष्टोक्तेः । अर्थान्तरेणेदं द्रढ
यति ते ते प्रसिद्धाः सूर्य्यभिन्ना ग्रहा दिवि स्वर्गे किं न जाग्रति न स्फु
रन्ति अपि तु स्फुरन्त्येव किन्तु तेषां मध्ये कतमस्तु कः पुनर्ग्रहो भास्क
रस्य सूर्य्यस्य तुला सादृश्योऽस्तु भवतु नापि तु सूर्य्य इव कोऽपि प्रकाश
केऽन्यो नास्तीत्यर्थः । अधिक्षितीति सप्तम्यर्थेऽव्ययीभावः तुलेति
कर्मण्यात्प्रत्ययः कतमस्तु भास्करस्य कतमस्तुलयापि इत्येव पाठः
भास्करस्य तुलया साम्येन तदितिपाठ इत्यर्थः कतमोऽपक्षे अपरे इत्यन्यः
समानमेव प्राचीनव्याख्यानं ॥ १०० ॥

विश्वदृश्वनयना वयमेव
त्वद्गुणाम्बुधिमगाधमवेमः ।
त्वामिहैवमनिवेश्य रहस्ये
निर्वृतिं न हि लभेमहि सर्व्वे ॥ १९ ॥
शुद्धवंशजनितोऽपि गुणस्य
स्थानतामनुभवन्नपि शक्रः ।

विश्वेति ॥ हे नल विश्वदृश्वानि विश्वावलोकनसमर्थानि नयनानि येषां तादृशा वयमेव अगाधं असीमं त्वद्गुणाम्बुधिं तव गुणसमुद्रं अवेमः जानीमः नतन्ये सर्व्वज्ञत्वाद्वयमेव तव असंख्येयं समुद्रतुल्यं गुणं जानीमइत्यर्थः अतएव इह अस्मिन् रहस्ये भैमीप्रार्थनविषयक गुप्तके गोप्येऽर्थे एवं दूतत्वप्रकारेण त्वां असंख्यगुणाश्रयं अनिवेश्य अनियोज्य सर्व्वे वयं निर्वृतिं सुखं न हि नैव लभेमहि प्राप्नुमः अस्मिन् विषये गुणवन्तं त्वामेव नियोज्य सुखं लप्स्याम इत्यर्थः विश्वदृश्वनयना इत्यनेन सर्व्वज्ञत्वात् वयं तवान्तर्गतमपि ज्ञातुं समर्था अतो मनसान्यत् वचसि चान्यन्न कर्त्तव्यमिति सूचितं । विश्वदृश्वेति कर्म्मणोऽश्च इति वन् ॥ १९ ॥

शुद्धेति ॥ शुद्धवंशजनितोऽपि अतिपवित्रकाश्यपान्वयाज्जातोऽपि तथा गुणस्य विद्याया विवेकधैर्य्यादेर्व्वा स्थानतां आश्रयतां अनुभवन्नपि अयमपि नलस्य गुणवत्ताः आनमपि वा शक्र इन्द्रः सपदं लोकपालत्वप्रभुत्वात् यद्वे हविर्दानादा मित्रं शत्रु हरत्वासयं एनं नलं आशु शीघ्रं छलं प्रतारयितुं वक्रः कुटिलोमायावी भवति जातः

चेष्टुमेनमृजुमाशु सपक्षं
सायकं धनुरिवाजनि वक्रः ॥ १०२ ॥
तेन तेन वचसैव मघोनः
स स्म वेद कपटं पटुरुच्चैः ।
आचरत्तदुचितामथ वाणी
मार्ज्जवं हि कुटिलेषु न नीतिः ॥ १०३ ॥

उपमिनोति सायकं धनुरिव यथा धनुः सायकं वाणं क्षेप्तुं त्यक्तुं वक्रीनतकोटिर्जायते तथा धनुरपि शुद्धवंशजनितः शुद्धाधनुपहत वेणुजातः गुणस्य मौर्व्याश्च व्यानतां अधिष्ठानतां अनुभवति सायकमपि सपक्षं पक्षसहितं । अथास्त्रियां धनुश्चापावित्यमरोक्त्या धनुःशब्दः पुंलिङ्गोऽपि ॥ १०२ ॥

एवमिन्द्रस्य चापल्यं निश्चित्य नलस्तदुचितं वक्तुमारभते ॥ तेनेति ॥ उच्चैरतिशयं पटुर्वक्रोक्तिबोधचतुरः स नलः मघोन इन्द्रस्य तेन तेन पूर्व्वोक्तेन पाणिपीडनमहं दमयन्त्या इत्यादिना वचसैव वाक्येनैव कपटं प्रतारकतां वेद स्म जानाति स्म अथानन्तरं नलस्तदुचितां प्रतारकताभिप्राययुक्तां वाणीं वाचं आचरत् उक्तवान् ननु देवेष्वपि कथं तथाचरितमित्यत आह हि यतः कुटिलेषु खलेषु आर्जवं सारल्यं न नीतिर्न्यायो न भवति किन्तु कौटिल्यमेव नीतिरित्यर्थः तथाच भारविः व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिन इति ॥ १०३ ॥

Digitized by Google

सेयमुच्चतरता दुरितानां
मन्यजन्मनि मयैव कृतानां।
युष्मदीयमपि या महिमानं
जेतुमिच्छति कथापथपारं ॥१०४॥
वित्त चित्तमखिलस्य न कुर्यां
धुर्य्यकार्य्यपरिपन्थि तु मौनं।

यदुक्तवांस्तदाह ॥ सेयमिति ॥ हे शक्रादयः सा इयं अन्यजन्मनि जन्मान्तरे मयैव न तु मत्पूर्वपुरुषैः कृतानां जनितानां दुरितानां पापानां उच्चतरता अत्याधिक्यं या उच्चतरता युष्मदीयमपि महिमानं महत्त्वं जेतुमिच्छति उत्कर्षयितुं वाञ्छति असम्भाव्यमानवचः युष्माकं नियोगस्याकरणात् माहात्म्यं विनाशयितुमिच्छतीत्यर्थः किम्भूतं कथापथपारं वचनमार्गातीतं वक्तुमशक्यं युष्माकं नियोगं दुःखेन क्रियाऽनुष्ठातुं न शक्यते वस्तु मम नाप्नोति भावः अथच या युष्मदीयं मही उत्सववांश्चासौ मानोभिमोप्राप्य चकारयेति वाहर्ष जेतुमिच्छति खण्डयितुं वाञ्छति सेयं मम पूर्वजन्मकृतानामशुभ कर्मणामुच्चतरता युष्माकमङ्गीकारखण्डने समर्थोऽस्मि तस्माद्धैर्यमौज्जित्य न कर्त्तव्यमुचितं इत्थं मयि कृपकोत्तरं ॥ १०४ ॥

विरुद्धमनसश्च इत्यनेन सूचितमुत्तरमाह ॥ वित्तेति ॥ अहं करोमीत्याशयं हे देवा यदि यूयं सर्व्वज्ञत्वात् अखिलस्य सकल स्य चित्तं मनोवृत्तिं वित्थ जानीथ तथापि धुर्य्यकार्य्यस्य प्रधानकार्य्यस्य कृतस्वीकारस्य परिपन्थि विरोधि तु पुनर्मौनं तूष्णीम्भावं न कुर्य्यां न करोमि यद्यपि सर्व्वं ज्ञातायुष्माभिर्मदीया मद्वैरमाकर्णनं

व्रीडितास्तु वरमस्तु पुनर्नौ
स्वीकृतैव परवागपरास्ता ॥ १०५ ॥
यन्मतौ विमलदर्पणिकायां
संमुखस्थमखिलं खलु तत्त्वं।
तेऽपि किं वितरथेदृशमाज्ञां
या न यस्य सदृशी वितरीतुं ॥ १०६ ॥

मिति मनोवृत्तिर्मौनैव तथाप्यत्र मौनावलम्बनं नोचितमित्युत्तरं ब्रुवतामित्यर्थः वरं गिरा नैवलब्धुं शक्नोमीति विकुर्वचनेन व्रीडिता अस्तु भवतु परन्तु अमराणां अप्रतिविधेया मुक्तः परवाक् सर्वमि मतं परस्य वचनं स्वीकृतैव अप्रतिविधेयमनुमतं भवतीतिन्यायात् अस्मा कमेव माभूत् सतोयुष्माभिमदभिप्राये विदितेऽपि दाक्षार्थं युष्मद्व चनेन प्रतिविधेयानोतिभावः। प्रत्यर्थिपरिपन्थिन इत्यमरः। चितेऽभि मीप्टेत्यधमपुरुषवहुवचनरूपं ॥ १०५ ॥

यन्मताविति॥ येषां युष्माकं मतौ बुद्धावेव विमलदर्पणिकायां निर्मलादर्शे अखिलं सकलं तत्त्वं प्रमेयं खलु निश्चितं सम्मुखस्थं विषयी भूतं यद्य च मयवर्ति तेऽपि सर्वसाक्षिणोऽपि यूयं मह्यं मह्यं ईदृशं स्वराहर्षी आज्ञां किं कथं वितरथ दत्य या आज्ञा यस्य यस्मै वितरीतुं दातुं न सदृशी न योग्या सर्वसाक्षिणां युष्माकं भैमीकामु काय मत्सदृशं भैमीदौत्यं कुत्सिताज्ञावितरणं नोचितमितिभावः दर्पणएव दर्पणिका कचित् स्वार्थिकप्रत्ययः प्रकृतितो लिङ्गवचना न्यतिक्रम्य वर्तन्त इति वचनं ईदृशमिति त्यवन्तं यस्येति संप्रदानत्वा विवक्षायां सम्बन्धविवक्षया षष्ठी। वितरीतुमिति वृहत्तुमुन् कृत्वा ग्रहादिना ईडू॥ १०६ ॥

Digitized by Google

यामि यामिह वरीतुमहो तं
दूततां तु करवाणि कथं वः ।
ईदृशां न महतां बत जातु
वञ्चने मम तृषस्य घृणापि ॥ १०७ ॥
उद्भ्रमामि विरहान्मुहुरस्या
मोहमेमि च मुहुस्तमहं वः ।

यामीति ॥ हे देवा अहं इह अस्मिन् समये यस्यां वा यां भैमीं वरीतुं यामि गच्छामि अहो आश्चर्ये सोपहाससम्बोधने वा तेषु युष्माकं तद्दूततां तस्या दौत्यं तु पुनः कथं करवाणि कुर्यां बत कष्टं महतां माहात्म्यवतां ईदृशां लोकपालानां युष्माकं तृषस्य तृषवदतिस्तुमस्य मम वञ्चने प्रतारणायां घृणापि करुणापि जुगुप्सापि वा न जाता अपि तु घृणैव वक्तुमुचिता महद्भिर्हि महानेव प्रतार्यो न तु लघीयान् अथवा युष्माकं कारुण्यास्पदमपि नास्ति न युज्यते वा इत्थं प्रतारणेत्यर्थः । घृणा जुगुप्साकृपयोरिति मेदिनी ॥ १०७ ॥

तामिहैकमनिवेश्य रहस्यद्रुत्यनेन कर्मयोरहस्यत्वादत्र त्वमेव नियोज्य इति यत्प्रतिपादितं तस्योत्तरमाह ॥ उद्भ्रमामीति ॥ योऽहं अस्या भैम्या विरहाद्वियोगान्मुहुः प्रतिक्षणं उद्भ्रमामि सोन्मादो भवामि मुहुर्न्ते व्याप्य क्षणे क्षणे मोहं मूर्च्छां च एमि प्राप्नोमि सोऽहं ईदृगवस्य एताहक्मूर्च्छोन्मादरूपकामदशाद्वययुक्तः सन् वो युष्माकं रहस्यं गोप्यमर्थं रक्षितुं गोपयितुं कथं प्रभविताक्षि प्रभुर्भविष्यामि ब्रूत यूयं कथयत युष्माकं रहस्यं उन्मादवशाद्प्रकाशकरिष्यामि

Digitized by Google

मूत वः प्रभविताक्षि रक्षणं
रक्षितुं स कथमीदृगवस्थः॥ १०८ ॥
यां मनोरथमयीं हृदि कृत्वा
यः श्वसिम्यथ कथं स तदग्रे।
भावगुप्तिमवलम्बितुमीशे
दुर्ज्जया हि विषया विदुषापि॥ १०९ ॥
यामिकाननुपमृद्य च मादृक्
तां निरीक्षितुमपि क्षमते कः।

मूर्च्छावशाद्वा विस्मरिष्यामि तत्कथमत्र नियोज्योऽस्मीत्यर्थः॥ १०८ ॥

अपि च॥ यामिति॥ योऽहं मनोरथमयीं संकल्परूपां यां भैमीं हृदि मनसि कृत्वा निधाय श्वसिमि जीवामि सोऽहं अथ दौत्य स्वीकारानन्तरं तस्या भैम्या अग्रे भावानां स्तम्भस्वेदादिसात्विक भावानां गुप्तिं गोपनं अवलम्बितुं आश्रयितुं कथं ईशे समर्थो भवामि अपि तु तस्या दर्शनमात्रेणैव मम कामविकारा भविष्यन्ती त्यर्थः ननु विदुषस्तव कथमेवं भविष्यतीत्याशंक्यार्थान्तरमाह हि यतो विदुषापि पण्डितेनापि विषया इन्द्रियार्था रूपादयोदुर्जया जेतुमशक्याः यस्याः संकल्पेनापि जीवामि तस्याः साक्षात्कारे सात्वि कभावाभविष्यन्त्येव ततः कुतोयुष्मत्कार्यचिन्ता तस्मादेतादृशविषये नाहं नियोज्य इति भावः॥ १०९ ॥

किंच प्रथमं तत्र गमनमेव दुर्घटं कथंचित्सति वा तस्मिन् उद्देश्य मेव संपन्नव स्यात्॥ यामिकानिति॥ चकारः पूर्वसमुच्चये मादृक्

Digitized by Google

रक्षिलक्षजयचण्डचरित्रे
पुंसि विश्वसिति कुत्र कुमारी ॥ ११० ॥
आदधीचि किल दातृकृतार्घ्यं
प्राणमात्रपणसीम यशो यत् ।

मद्विधोऽतिसुन्दरः को युवा यामिकान् प्रहरिकान् द्वारपालान् अनुपमथ्य अनिहत्यैव अविनाश्यैव वा अन्तःपुरस्थायिनीं भैमीं निरीक्षितुमपि का कथा सम्भाषितुं गन्तुमपि क्षमेत समर्थो भवेत् अपि तु न कोऽपीत्यर्थः अतिसुन्दरपुरुषाणामन्तःपुरगमनानुज्ञाभावात् दौवारिकैर्निषेधे कृते तान् अविनाश्य तत्र मम प्रवेशो दुर्घट इत्यर्थः तर्हि यामिकान् विनाश्यैव प्रवेक्ष्यामीत्यत्राह रक्षिणां रक्षकाणां यामिकानां लक्षस्य जयेन चण्डं भीषणं चरित्रं चेष्टा यस्य तादृशे कुत्र कस्मिन् पुंसि पुरुषे कुमारी अप्रगल्भा स्त्री विश्वसिति विश्वासं प्राप्नोति अपि तु न अप्रागल्भ्यात् रक्षिलक्षसंमर्दकोलाहलं श्रुत्वा मामपि क्रूरकर्माणं मत्वा सा पलायिष्यत इति भावः ॥ ११० ॥

ननु दधीच्यादिभिर्यशसे प्राणादयोऽपि दत्तास्त्वं कथमेकां स्त्रियं दातुं नेच्छसीत्याशङ्क्याह ॥ आदधीचीति ॥ प्राणमात्रे प्राणा एव पणसीमा मूल्यावधिर्यस्य तादृशं यत् यशः कीर्त्तिः आदधीचि दधीचिमुनिपर्य्यन्तं दातृभिः कृतार्घ्यं व्यवस्थितमूल्यं किलेति श्रूयते यशः प्राणेभ्योऽधिकं मूल्यं नार्हतीति दधीच्यादिभिरपि यशोऽर्थे प्राणा एव परित्यक्ता न तु तेभ्योऽधिका इत्यर्थः अहं तद्यशः प्राणतः प्राणेभ्यः शतगुणेनाभ्यधिकेन प्रियया भैमीलक्षणेन पणेन कथं आददे अङ्गी

आदद्दे कथमहं प्रियया तत्
प्राणतः शतगुणेन पणेन ॥ १११ ॥
अर्थना मयि भवद्भिरिवास्यै
कर्त्तुमर्हति मयापि भवत्सु ।
भीमजार्थपरयाचनवाचे
यूयमेव गुरवः करणीयाः ॥ ११२ ॥

करिष्यामि अपि तु न कथंचित् यदल्पमूल्येन लभ्यते तदधिकमूल्येन केनापि न क्रीयते मया वरं प्राणा अपि त्यक्तुं शक्यन्ते न तु भैमी दातुं तत्किमर्थमत्र यत्नः क्रियत इति भावः ॥ १११ ॥

अर्थनेति ॥ भवद्भिरिव युष्माभिर्यथा अस्यै भैम्यर्थं मयि अर्थना याञ्चा कर्त्तुमर्हति तथा मयापि भवत्सु युष्मासु भैम्यर्थं अर्थना कर्त्तुमर्हति उचिता यथा सा मां वरिष्यति तथा कर्त्तव्यमिति भवन्तो याच्यन्त इत्यर्थः ननु त्वया कदाचिदपि कुत्रचिद्याचनं न कृतं तत्कथमद्य करिष्यत इत्याशङ्क्याह भीमजा दमयन्त्येव अर्थः प्रयोजनं तत्परा तत्फलिका या याचनवाक् मम भीमजा दातव्येति याचन वचनं तस्यै भीमजार्थपरयाचनवचनशिक्षायै यूयमेव भवन्त एव गुरव उपदेशकाः करणीयाः कार्य्याः यद्यपि मया पूर्वं कदापि न याचितं तथापीदानीं भवतां याचनवचनं श्रुत्वा भवद्भ्य एव तच्छिक्षणीयमित्यर्थः लोकपालानामपि याचन युष्माकमपि तद्युक्तं भविष्यतीतिभावः । कर्त्तुमर्हतीति श्रादिभिर्युक्तादक्रियायार्थोपपदेति तुमन् ॥ ११२ ॥

Digitized by Google

अर्थिताः प्रथमतोऽद्भ्ममयन्तीं
यूयमन्वहमुपास्य मया यत्।
ह्रीर्न चेद्युतियतामपि तद्वः
सा ममापि सुतरां न तदस्तु ॥ ११३ ॥
कुण्डिनेन्द्रसुतया किल पूर्व्वं
मां वरीतुमुररीकृतमास्ते।
ब्रीडमेष्यति परं मयि दृष्टे
स्वीकरिष्यति न सा खलु युष्मान् ॥ ११४ ॥

युष्माभिः प्रथमं याचितं तव याचनन्तु पश्चाद्भावित्वादकिञ्चित्करमित्याशङ्कायामाह ॥ अर्थिताइति ॥ हे इन्द्रादयः प्रथमव आदावेव मया अन्वहं प्रतिदिनं उपास्य संपूज्य यूयं यत् दमयन्तीं अर्थिता याचिता यूआनन्तरं भो भगवन्तोमया भैमी लभ्यतामिति यत् वरोऽर्थापितइत्यर्थः तथाचनं यतियतामतिक्रामतां वोयुष्माकं चेद्यदि ह्रीर्लज्जा न भवतीति शेषः तत्तदा युष्माकं याचनमतिक्रामतो ममापि सुतरां सा लज्जा नास्तु न भवतु तस्मादादावेव मया याचितमिति मयैव दमयन्ती लब्धुमर्हेति भावः ॥ ११३ ॥

भवतु मया वा कथञ्चिल्लभ्यमानाप्रीयतां भैमी तु युष्मान्नाङ्गीकरिष्यतीत्याह ॥ कुण्डिनेन्द्रसुतया दमयन्त्या किल निश्चितं मां वरीतुं पूर्व्वं उररीकृतमङ्गीकृतं आस्ते अतएव सा दमयन्ती भवतां दूत्यार्थं तत्र गते मयि दृष्टे सति परं केवलं ब्रीडं लज्जां एष्यति प्राप्स्यति प्राक्पूर्व्वं मां दृष्ट्वा मदनुरागतया लज्जोदयाल्लज्जिता भविष्यतीत्यर्थः न खलु नैव युष्मान् स्वीकरिष्यति अङ्गीकरिष्यति तस्मान्मेदूत्ये कर्म्मणि नियोक्तव्यमिति भावः। ब्रीडशब्दः पुंसिक्लीबेऽप्यस्ति ॥ ११४॥

Digitized by Google

तत्प्रसीदत विधत्त न खेदं
दूत्यमत्यसहशं हि ममेदं ।
भास्यतैव सुलभा न तु साध्यं
तद्विधित्सुभिरनौपयिकेन ॥ ११५ ॥
ईदृशानि गदितानि तदानी
माकलय्य स नलस्य बलारिः ।
शंसति स्म किमपि स्मयमानः
स्वानुगाननविलोकनलोलः ॥ ११६ ॥

तदिति ॥ हि यस्मान्मम इदं दूत्यं अत्यसदृशं अत्यन्तमनु चितं तस्मात् यूयं प्रसीदत मयि प्रसादं कुरुत खेदं अनेन देवाना मप्यस्माकं वचनं न कृतमिति मनसि दुःखं न विधत्त न कुरुत अनौपयिकेन युक्तिशून्यतया तत् दूत्यं विधित्सुभिर्विधातुमिच्छुभि र्युष्माभिर्हास्यतैव उपहसनीयत्वमेव सुलभा सुप्रापा न तु न पुनः साध्यं दमयन्तीविवाहरूपं सुलभं । युक्तमौपयिकं लभ्यमित्यमरः ॥ ११५ ॥

ईदृशानीति ॥ स बलारिरिन्द्रः नलस्य ईदृशान्येवंविधानि गदि तानि भाषणानि आकलय्य श्रुत्वा तदानीं तस्मिन् समये स्वानुगाना निजमनुगच्छतां समानविचाराणां यमादीनां मुखस्य विलोकने लोलः सन् अहो इदमेतां युष्माभिरस्य चातुर्यं वीक्षितमप्यधुना व्यवतीत्युप हासात् इन्द्रशरीरचापल्यः सन् किमप्यनिर्वचनीयं यथा तथा भङ्गी विशेषं कुतेस्ययं स्मयमानो हास्यं कुर्वन् शंसति स्म वक्ष्यमाणमुवाच ॥ ११६ ॥

Digitized by Google

नाभ्यधायि नृपते भवतेदं
रोहिणीरमणवंशभुवेव ।
लज्जते न रसना तव वाम्या-
दर्थिषु स्वयमुरीकृतकाम्या ॥ ११७ ॥

यच्छंसति स्म तदाह ॥ नाभ्यधायीति ॥ हे नृपते नल रोहिणीरमणस्य चन्द्रस्य वंशे भूरुत्पत्तिर्यस्य भवतीति वा तादृशेन पुरुषेणेव भवता त्वया इदं सेयमुपचरतेत्यादि कुण्डिनेन्द्रसुतयेतिपर्य्यन्तं नाभ्यधायि नोक्तं चन्द्रवंश्योऽपि यदङ्गीकरोति तत्परिपालयत्येव त्वया तु चन्द्रवंशोत्पन्नेनाप्यङ्गीकृतं न परिपाल्यते ऽतश्चन्द्रवंश्यजनानोचितमिदं त्वया नोक्तमित्यर्थः अर्थिषु याचकेषु सत्सु स्वयमात्मनैव उरीकृतं जीवितावधि किमप्यधिकमित्यादिना स्वीकृतं काम्यं याचकाभिलषणीयं यया तादृशी तव रसना जिह्वा वाम्यात् अङ्गीकृता परिपालनलक्षणप्रातिकूल्यात् न लज्जते न लज्जिता भवति अपि तु लज्जितव्यैव युज्यत इत्यर्थः अथ च रोहिणीरमणोबलीवर्दस्तद्वंशभुवेव बलीवर्दैनेव त्वया इदं किं नाभ्यधायि अपि तु तादृशेनैवाभ्यधायीत्यर्थः यथा च बलीवर्दस्य जिह्वा वाम्यात् भक्षितस्य तृणादेर्वमनात् न लज्जते तथा तवापि जिह्वा अङ्गीकृतापरिपालनलक्षणवाम्यान्न लज्जते अतस्त्वं बलीवर्दवन्मूर्ख इत्युपहासोऽत्र ध्वन्यते। अथ च रोहिणीरमणपदेन वामित्वं कलङ्कित्वाभिप्रेतं तेन तद्वंशोद्भवस्य स्वीकृतापरिपालनान्न लज्जेति केचित् ॥ ११७ ॥

Digitized by Google

भङ्गुरं न वितथं न कथम्वा
जीवलोकमवलोकयसीमं।
येन धर्म्मयशसी परिहातुं
धीरहो वलसि धीर तवापि॥११८॥
कः कुलेऽजनि जगन्मुकुटे वः
प्रार्थकेप्सितमपूरि न येन।
इन्दुरादिरजनिष्ट कलङ्की
कष्टमत्र स भवानपि माभूत्॥११९॥

विषयनिन्दया प्रवर्त्तयन्नाह॥ भङ्गुरमिति॥ हे धीर हेयोपा देयविवेचनकुशल नल त्वं इमं जीवलोकं कथं भङ्गुरं क्षयमेव नश्वरं अचिरावस्थायिनं नावलोकयसि न विचारयसि कथम्वा वितथं मायाकार्य्यत्वान्मिथ्याभूतं स्वप्नोपमं नावलोकयसि अपि तु धीरत्वा त्त्वयेदमवश्यं विचारयितुं युक्तमित्यर्थः किमर्थमेवं विचारणीयमित्य त्राह अहो चमत्कारे येनाविचारेण हेतुना तवापि वा कथेतरेषां पुण्यश्लोकस्य भवतोऽपि जीवेर्विषयैर्धर्म्मयशसी पुण्यकीर्त्ती परिहातुं परित्यक्तुं वलसि त्वरया भवसि नश्वरविषयभोगाय अनश्वरे धर्म्म यशसी न हातव्ये इत्यर्थः॥ ११८॥

कइति॥ जगतां मुकुटे शिरोऽलङ्कारभूते श्रेष्ठे वो युष्माकं कुले स्वत्यादयः कोऽजनि जातः येन प्रार्थकानां याचकानां ईप्सितमभि लषितं नापूरि न पूरितं अपि तु सर्व्व एव त्वद्वंश्या दातारोजाता इत्यर्थः केवलपदमध्याहार्य्यं अत्र कुले केवलं आदिर्वंशादिरिन्दुश्चन्द्रः कलङ्की अजनिष्ट जातः कष्टं खेदे किन्तु भवानपि स कलङ्की माभूत् अङ्गीकृतादानाच्चमपि द्वितीयः कलङ्की माभूरित्यर्थः॥ ११९॥

Digitized by Google

याचदृष्टिरपि या मुखमुद्रा
याचमानमनु या च न तुष्टिः ।
त्वादृशस्य सकलः सकलङ्कः
शीतभासि शशकः परमङ्कः ॥ १२० ॥

नाक्षराणि पठता किमपाठि
प्रस्मृतोऽथ भवता पठितोऽपि ।
इत्यमर्थिचयसंशयदोला
खेलनं खलु चकार नकारः ॥ १२१ ॥

यथा चन्द्रस्य कलङ्कित्वं तथा ममापि तद्वस्तु का हानिरित्याशङ्क्याह ॥ याचदृष्टिरिति ॥ याचमानं याचकजनमनु लक्ष्यीकृत्य या याचदृष्टिः तस्योपदर्शनं यापि मुखमुद्रा मुखभङ्गीविशेषो मौनं वा या च न तुष्टिः असन्तोषः स सकलः समस्तस्त्वादृशस्य भवद्विधस्य कलङ्कोऽपवादः शीतभासि चन्द्रे तु परं केवलं शशकोऽङ्कश्चिह्नं चन्द्रोऽपि सर्वचिह्न युक्तत्वादेव कलङ्की चिह्नयुतः त्वन्तु अतिथ्यनादरजन्यबहुविधकलङ्का नुष्ठानात् कलङ्की पापी भविष्यसीति भावः ॥ १२० ॥

स्तवेन प्रोत्साहयति ॥ नाक्षराणीति ॥ अक्षराणि ककारादिवर्णमातृकां पठता गुरोरधीयमानेन भवता नकारो नेतिवर्णः किं वा पाठि नाधीतः अथ किम्वा पठितोऽपि नकारः प्रस्मृतो विस्मृतः खलु निश्चितं उत्प्रेक्षा वा इत्थमेवं अर्थिचयस्य याचकसमूहस्य संशयः सन्देह एव दोला हिन्दोला तत्र खेलनं क्रीडनं चकार अपठितत्व विस्मृतत्वकोटिकसंशयविषयो बभूव त्वया पूर्वं याचकेभ्यो याचकेभ्यो निषेधवाचकं नेत्यक्षरं कदापि नोक्तं । अधुनापि तत्र न वक्तव्यमिति भावः ॥ १२१ ॥

Digitized by Google

अब्रवीत्तमनलः क्व नवेदं
लभ्यमुज्झसि यशः शशिकल्पं ।
कल्पवृक्षपतिमर्थिनमेतं
नाप कोऽपि शतमन्युमिहान्यः ॥ १२२ ॥
न व्यहन्यत कदापि मुदं यः
स्वःसदामुपनयन्नभिलाषः ।

वक्र्यादिभिरपि नलप्रोत्साहनायोक्तं तत्र प्रथमं वह्निवचनं श्लोकाभ्यामनुवदति ॥ अब्रवीदिति ॥ अनलोवह्निस्तं नलं अब्रवीदुवाच उक्तमाह हे नल शशिकल्पं चन्द्रवच्छुभ्रं लभ्यं सुलभमात्तं इदं यशः क्व कथं उज्झसि त्यजसि अपि तु नैवेदं त्याज्यमित्यर्थः क्वेति कथमित्यर्थेऽपोष्यतइति हलाः क्व कस्मिन् अन्यस्मिन् उज्झसि त्यक्तुमिच्छसि यदि त्वया दूत्यं न स्वीक्रियते तदान्योऽभ्यर्थनीयः स यदि दूत्यं करिष्यति तदा तवेदं यशोयास्यतीत्यर्थ इति केचित् यशोऽपि नाल्पतरमित्याह इह भूलोके अन्यस्त्वदितरः कोऽपि दाता कल्पवृक्षाणां पतिं स्वामिनं न लितरयाचकवदतिदरिद्रं शतमन्युं शतक्रतुं विहितयज्ञशतत्वात् पात्रोत्तमं एतं इन्द्ररूपं अर्थिनं याचकं नाप न प्राप्तवान् यः सर्व्वमनोरथसम्पादकस्य कल्पवृक्षस्य स्वामी यज्ञ यज्ञशतकर्त्ता तादृशं याचकं नलएव प्राप्तवान् नान्य इति महदेव यशोन त्याज्यमित्यर्थः । अथ च कल्पवृक्षपतित्वादस्य दमयन्तीप्राप्तिः प्रकारान्तरेणापि भविष्यति त्वन्तु कथमनायासलभ्यं यशस्त्यजसीति सूचितं ॥ १२२ ॥

नेति ॥ स्वःसदां देवानां योऽभिलाषोमुदं उपनयन् अभिलषिताशोपस्थापनया हर्षं जनयन् कदापि कस्मिन्नपि काले न व्यहन्यत न

Digitized by Google

तत्पदे त्वदभिषेककृताशः
स त्यजत्वसमतामदमद्य ॥ १२१ ॥
अब्रवीदथ यमस्तमहृष्टं
वीरसेनकुलदीप तमस्त्वां ।

विहृतः स्वयमेव वा यर्हीन्द्रतोऽगाभूत् तत्पदे अभिलाषस्थाने त्वदभिषेककृताशः तवाभिषेकं कुर्वतां त्वां स्थापयतां नोऽस्माकं सोऽभिलाषोऽसमतामदं अहमेव देवानामभीष्टप्रापकोनान्य इत्यसादृश्यगर्व्वं अद्य त्यजतु मुञ्चतु भवत्पक्षस्य सदृशान्तरस्य सद्भावात् । अत्रायमर्थः देवानामभिलाषोऽन्तरङ्गत्वमेवाभिलषितवस्तुप्राप्तेरव्यवहितप्राक्क्षणावच्छिन्नत्वात् यथाभिलाषोऽभिलषितप्राप्तौ कारणं तथाभिलषितदमयन्त्याः प्राप्तेः केवलाभिलाषाजन्यतया त्वमपि कारणं भव तस्मादसादृश्यगर्व्वं त्यजत्वभिलाष इति । इच्छोपस्थितविषया अपि वयं त्वयैवार्थयितुमत्रागता इति भावः । यदृच्छयेति कर्म्मणि कर्म्मकर्त्तरि वा रूपं स्वःसदामिति स्वः स्वर्गे सीदन्तीति क्विप् ॥ १२१ ॥

अथ चतुर्भ्यो यमवचनमनुवदति ॥ अब्रवीदिति ॥ अथानलवचनानन्तरं अहृष्टं दौत्याङ्गीकारेऽसन्तुष्टं तं नलं यमोऽब्रवीत् उवाच किमुवाचेत्याह हे वीरसेनकुलदीप वीरसेनकुलप्रकाशक नल किमप्यनिर्व्वचनीयं तमो दमयन्त्यप्राप्तिसम्भावनाजन्यः शोको यत् त्वां अभिबुभूषति अभिभवितुमिच्छति किमपि किञ्चिदिति क्रियाविशेषणमेतत् तस्मिं चन्द्रवंशप्रवसतेचन्द्रवंशोत्पन्नस्य ते तव सदृशं उचितं अपि तनुचितमेव चन्द्रवंशोत्पन्नो हि प्राप्तविनाशेऽपि न शोकमङ्गीकुरुते तदुत्पन्नेन त्वयापि यथाविधेनैव भवितव्यं न तु शो

यत्किमप्यभिबुभूषति तम् किं
चन्द्रवंशवसतेः सदृशान्ते ॥१२४॥
रोहणः किमपि यः कठिनानां
कामधेनुरपि या पशुरेव ।
नैतयोरपि वृथाऽभवदर्थी
हा विधित्सुरसि वत्स किमेतत् ॥१२५॥
याचितश्चिरयति क नु धीरः
प्राणने क्षणमपि प्रतिभूः कः ।

विशेषेणेत्यर्थः अथ च तमोऽन्धकारोयद्दीपकयं त्वामभिबुभूषति तदनु चितमेव तमसोदीपनाशत्वादिति ध्वनिः । एवं तमोराहुश्चन्द्रशत्रु त्वाचन्द्रवंशोत्पन्नमपि त्वां यदभिबुभूषति तद्युज्यत एवेत्युपहासश्च । तमोध्वान्ते गुणे शोके क्लीवं वा ना विधन्तुद इति मेदिनी ॥ १२४ ॥

रोहण इति ॥ यो रोहणोविदूराद्रिः स कठिनानां कर्कशानां अथ च कृपणाग्रगण्यानां मध्ये किमपि लोकोत्तरः कठिनः यापि कामधेनुः सापि पशुरेव गौरेव अथ च अज्ञैव एतयोरपि रोहण कामधेन्वोरपि अर्थी याचको वृथा निष्फलो नाभवत् अपि तु सफल एव बभूव हा कष्टं हे वत्स एतत् किं अर्थिप्रातिकूल्यं विधित्सुरसि कर्त्तुमिच्छसि कठिनानामचेतनानामपि अज्ञानां पशूनामपि च याच कोनैव निष्फलोभवति तव तु सरसहृदयस्यापि बुद्धिमतोऽपि च याचका वयं निष्फला भवाम इति महानन्य इति भावः ॥ १२५॥

याचित इति ॥ धीरो विवेचकोयाचितोयाचकैः प्रार्थितः सन् क नु चिरयति चिरं विलम्बं करोति अपि तु न कापि याचकायव

ध्वंसति द्विनयनी दृढनिद्रां
द्रागिमेषमिषधूर्णनपूर्णा ॥ १२६ ॥
अभ्रपुष्पमपि दित्सति शीतं
स्वार्थिना विमुखता यदभाजि ।

धावकाल एव ददातीत्यर्थः यतः चणमपि अल्पकालमपि माबने जीवने कः प्रतिभूर्लग्नकः अपि तु न कोऽपि उत्तरकालजीवननिश्चया भावात् यदनन्तरा मरणं स्यात्तदा दानं न भवेदिति मत्वास त्वत्वा झटित्येव धीरोददातीत्यर्थः कथमाशुमरणमित्यत्राह झाक् झटि ति निमेषमिषेण नेत्रसङ्कोचव्याजेन यद्घूर्णनं तेन पूर्णा द्विनयनी चक्षुर्द्वयं दृढनिद्रां महानिद्रां मरणं ध्वंसति कथयति यथा निमेषः शीघ्रं भवति तथा मरणमपि शीघ्रं भवतीति सूचयतीत्यर्थः तस्मा द्वीरेण त्वया मरणस्य शीघ्रभावित्वात् शीघ्रमेव दातव्यमिति भावः ॥ १२६ ॥

अभ्रेति ॥ अर्थिना जलयाचकेन लोकरवलोककस्य चातकस्य चञ्चुपुटेन सा प्रसिद्धा विमुखता विजलजनितं पराङ्मुखत्वं यदभाजि आश्रिता तत् खलु तस्मादेव हेतोः शीतं शीतलं अभ्रपुष्पं जलं दित्स त्यपि दातुमिच्छत्यपि घनसत्त्वे मेघसङ्घे स्वामिमीलित्यं याचकवैमुख्य जनिताऽकीर्तिरसत्ति स्फुरति चातकेन जले याचिते मेघस्य दानेच्छायां जातायामपि तत्त्वाददानात् स्वामित्वमयशोजाव मित्यर्थः खलत्वेनत्वायामा अकीर्तेर्मलिनत्वेन वर्णनीयत्वात्खलमुत्प्रेक्षित मथ च लोकस्य प्रतिनिधस्यार्थिना मुखेन पराङ्मुखत्वं यदा श्रितं तस्मादेव हेतोः अभ्रपुष्पमपि गगनकुसुमतुल्यं असम्भवं वस्त्वपि भवतु अपि च दातव्यमिति दातुमिच्छति मेघतुल्ये पुरुषे स्वामिरवी

Digitized by Google

स्तोककस्य खलु चञ्चुपुटेन
म्लानिरुल्लसति तद्वनसंघे॥ १२७॥
ऊचिवानुचितमक्षरमेतं
पाशपाणिरपि पाणिमुदस्य।
कीर्त्तिरेव भवतः प्रियदारा
दाननीरझरमौक्तिकहारा॥ १२८॥

तिरुल्लसति चसम्भवमपि, याचमानस्यातिनिकृष्टस्यापि याचकस्य वै मुख्येन अभिव्य दातुमिच्छतोऽपि वस्त्वनुपस्थितेर्विलम्बकारिणोऽकीर्त्ति र्जायते किं पुनरिन्द्रादीनां सुलभमपि याचतां वैमुख्येन कथमपि दातु मनिच्छतस्तव वक्तव्यं तस्मादविलम्बं त्वयाऽभ्यर्थ्यं दातव्यं न चेदतितराम कीर्त्तिस्ते स्यास्यतीति भावः। अथं मेघोवारिवाह इति अथं चोम पुष्करमम्बरमिति मेघपुष्पं घनरस इति चधुस्तोटिवभे स्त्रियाविति चामरः स्तोकः स्याचातकाख्ययोरिति हेमचन्द्रः॥ १२७॥

अथ नवभिर्वरुणवचनमनुवदति॥ ऊचिवानिति॥ पाशपाणि रपि वरुणोऽपि पाणिमुदस्य हस्तमुत्तोल्य एतं नवं उचितं युक्तं अक्षरं वचनं ऊचिवान् उक्तवान् किं तदित्याह भवतां भवादृशां चन्द्रवंश्यानां कीर्त्तिरेव प्रियदाराः प्रेयस्यः स्त्रियः किम्भूता दाने क्रियमाणे यन्नीरं जलं तस्य योझरः प्रवाहः स एव मौक्तिकहारो यस्याः सा अतः कीर्त्तिरेव त्वया स्थापनीया न तु स्त्रीनिमित्ताकीर्त्ति रिति भावः। पाशपाणिरित्यनेन नियोगाकरणे त्वां बन्धनं प्राप यिष्यामीति सूचितं। पाणिमुदस्येति याचकस्वभावः॥ १२८॥

Digitized by Google

चर्म्म वर्म्म किल यस्य न भेद्यं
यस्य वज्रमयमस्थि च तौ चेत् ।
स्थायिनाविह न कर्णदधीची
तन्न धर्म्ममवधीरय धीर ॥ १२९ ॥
अद्य यावदपि येन निबद्धौ
न प्रभू विचलितुं बलिविन्ध्यौ ।

चर्म्मेति ॥ यस्य कर्णस्य चर्म्म त्वक् न भेद्यमच्छेद्यं वर्म्म कवचं यस्य च दधीचेर्वज्रमयं वज्ररूपमस्थि किलेति श्रूयते तौ तादृशावपि कर्णदधीची इह पृथिव्यां चेद्यदि न स्थायिनौ उत्पद्यमानः कर्णोन स्थास्यति उत्पन्नो दधीचिर्न स्थित इत्यर्थः हे धीर प्राज्ञ तत्तस्माद्धर्म्मं नावधीरय नावजानीहि धर्म्ममेव चिरस्थायीति मत्वा सर्व्वं परित्यज्य तदेव रक्षतामित्यर्थः अस्मदीयाङ्गीकारे तव चिरस्थायिधर्म्मो भविष्य तीति भावः । द्वापरयुगोत्पन्नस्य कर्णस्य इत्तान्तोत्कीर्त्तनं कल्पभेदा दविरुद्धमिति केचित् ॥ १२९ ॥

अद्येति ॥ येन पाशेन निबद्धौ बलिविन्ध्यौ असुरविशेषपर्व्वतवि शेषौ अद्य यावदपि अद्यपर्य्यन्तमपि विचलितुं अन्यथाभवितुं प्रति ज्ञामनिर्व्वोढुं न प्रभू न समर्थौ जातौ किन्तु यद्येन तावद्याच्ञाङ्गीकारं परिपालयतः एकः पाताले तिष्ठति अन्यश्चोर्द्ध्वं न वर्द्धत इत्यर्थः स प्रास्थितस्याङ्गीकृतस्य अवितथता सत्यताभ्युपायेगुणः स एव पाशो बन्धनहेतुत्वाद्रज्जुः विदुषा पण्डितेन त्वादृशा भवादृशेन जनेन दुरपा स्रोऽपनेतुमशक्यः अङ्गीकृतं सुजनाः परिपालयन्तीति प्रसिद्धोऽनुभवः ।

Digitized by Google

आश्विनावितथतागुणपात्र
स्वाद्दशा स विदुषा दुरपासः ॥ १३० ॥
प्रेयसी जितसुधांशुमुखश्री
र्या न मुञ्चति दिगन्तगतापि।
भङ्गिसङ्गमकुरङ्गदृगर्थे
कः कदर्थयति तामपि कीर्त्तिं ॥ १३१ ॥

पि जीवितावधि किमप्यधिकमेभ्याबङ्गीकृतं परिपाल्यतामित्यर्थः दैत्य पाषाखाभ्यामप्यङ्गीकृतं सत्यं कृतं त्वया तु विदुषा कथं न कर्त्तव्यमि तिभावः ॥ १३० ॥

प्रेयसीति ॥ प्रेयसी प्रियतमा जिता सुधांशुमुखानां चन्द्रादीनां श्रीः शोभा यया तादृशी च या कीर्त्तिर्दिगन्तगतापि दिशामन्तं प्राप्तापि सती न मुञ्चति तत्सम्बन्धित्वेन गीयमानत्वात् तं न त्यजति तामपि तथाविधामपि कीर्त्तिं को विवेकशून्यो जनो भङ्गी विच्छेद वान् विनश्वरः सङ्गमो यस्यास्तादृश्याः कुरङ्गदृशो मृगनयनायाः स्त्रियोऽर्थे निमित्तं अथ च कुत्सितो रङ्गो ययोस्तादृशौ दृशौ यस्यास्तन्निमित्तं कदर्थयति अवजानाति विनाशयति वा अपि तु नित्यां कीर्त्तिं विहाय अनित्यां स्त्रियं न कोऽपि वाञ्छतीत्यर्थः तस्मा त्त्वयापि भैमीलिप्सां विहाय कीर्त्तिरेव जगति स्थाप्यतामिति भावः। कुरङ्गदृगपि प्रेयसी प्राणेश्वरी तथा जितः सुधांशुचन्द्रो यया तादृशी मुखश्रीर्यस्यास्तादृशी च किन्तु सा न चिरस्थायिनी कीर्त्तिस्तु चिरस्थायिनीत्यनयोर्महान् विशेषः ॥ १३१ ॥

Digitized by Google

यान् परं प्रति परेऽर्थयितार
स्तेऽपि यं वयमहो स पुनस्त्वं ।
नैव नः खलु मनोरथमात्रं
शूर पूरय दिशोऽपि यशोभिः ॥१२२॥
अर्थितां त्वयि गतेषु सुरेषु
म्लानदानजनितोर्व्वयशःश्रीः ।

यानिति ॥ परेऽन्ये यान् अस्मान् प्रति उद्दिश्य परं केवलं अर्थयितारो याचितारो न तु दातार इत्यर्थः परमेवार्थे यान् परं यानेव अर्थयितार इति केचित् वरमिति क्वचित् पाठः वरं अभीष्टं उद्दिश्येत्यर्थः अहो आश्चर्ये तेऽपि निखिलजनप्रार्थ्यमाना अपि वयं यं अर्थयितारः स एवंविधः पुनस्त्वं न त्वन्य इत्यर्थः हे शूर दानशूर खलु निश्चितं नोऽस्माकं मनोरथमात्रं केवलमभिलाषं नैव पूरय सफलय किन्तु दिशोऽपि यशोभिः लोकपाला अपि नलस्य याचका जाता इति कीर्त्तिभिः पूरय व्याप्ताः कुरु अस्माकं मनोरथपूरणाय प्रवृत्तेन त्वया महती कीर्त्तिरपि जनयिष्यत इति भावः ॥ १२२ ॥

अर्थितामिति ॥ सुरेषु इन्द्रादिषु देवेषु त्वयि अर्थितां याचकतां गतेषु प्राप्तेषु सत्सु म्लाना मलिनीभूता विनष्टप्राया दानजनिता उर्व्वी महती यशःश्रीः कीर्त्तिशोभा यस्य तादृशः सुरशाखी कल्पवृक्षः अद्य इदानीं केवलेन कीर्त्तिमालिन्यादसहायेन कुसुमेन पुष्पेण भरेण गगनमालामलकं पाण्डु श्वेतं विधत्तां करोतु एतावत्कालं

Digitized by Google

यद्य पाण्डु गमनं सुरग्राखी
केवलेन कुसुमेन विधत्तां ॥ १२२ ॥

प्रवसते भरतार्ज्जुनवैण्यवत्
स्मृतिधृतोऽपि नल त्वमभीष्टदः ।
खगमनाफलतां यदि मन्यसे
तदफलं निखिलं खलु मङ्गलं ॥ १२४ ॥

कौर्त्तिकुसुमाभ्यां जगत् श्वेतं चकार अधुना तु तत्तः कीर्त्तिविनाशात्
केवलं कुसुमेनैव करोत्विति भावः ॥ १२२ ॥

अथ छन्दोऽन्तरेण सर्गाशेषं सूचयति ॥ प्रवसत इति ॥ हे नल त्वं भर
तार्ज्जुनवैण्यवत् भरतोदुष्मन्तपुत्रः अर्ज्जुनः कार्त्तवीर्य्यः वैण्यः पृथुस्त
द्वत् स्मृविष्टतोऽपि स्मरणविषयीकृतोऽपि प्रवसते प्रवासिने जनाय
अभीष्टं वाञ्छितं ददातीति तादृशोभवसीति शेषः स त्वं यदि खगम
नस्य आत्मगमनस्य अफलतां निष्फलतां वृथाऽहं गमिष्यामि कार्य्य
सिद्धिर्दुर्घटैवेत्येवंरूपां मन्यसे भावयसि तत्तर्हि निखिलं समस्तं मङ्गलं
शुभसूचकं भरतादिस्मरणं शुभशकुनादिदर्शनञ्चा खलु निश्चितं अफलं
निष्फलं भवेदिति शेषः तव गमनस्य निष्फलत्वे भरतादिनामस्मरण
स्यापि वैयर्थ्यप्रसङ्गः स्यादित्यर्थः । भरतादिनामस्मरणस्य मङ्गलजनकत्वं
यथा वैण्यं पृथुं हैहयमर्ज्जुनञ्च शाकुन्तलेयं भरतं नलञ्च । एतान्
स्मरन् यः स्मरति प्रयाणे तस्यार्थसिद्धिः पुनरागमश्चेति । द्रुतविल
म्बितमिदं वृत्तं ॥ १२४ ॥

Digitized by Google

इष्टिं नः प्रति ते प्रतिश्रुतिरभूदाद्या सुराह्लादिनी
धर्म्मार्थां सृज तां श्रुतिप्रतिभटीं सत्यान्विताख्यापदां ।

इष्टिमिति ॥ हे नल नोऽस्माकं इष्टिं इच्छां प्रति लक्षीकृत्य आद्या प्रथमा सुरान् देवानस्मान् आह्लादयितुमानन्दयितुं शीलं यस्याः तादृशी सुराह्लादिनीति पाठे स्वर्गाह्लादजनिका स्वरैराह्लोकार सूचकत्वेन आह्लादिनीति वा धर्म्ममेवार्थः प्रयोजनं यस्यास्तादृशी या प्रतिश्रुतिः प्रतिश्रवः जीवितावधि किमप्यधिकं देयमेवं त्वयोऽङ्गीकारोऽभूत् तां प्रतिश्रुतिं सत्यत्वेन श्रुतेर्वेदस्य प्रतिभटीकृत्य सदृशीकृत्य अन्वितं यौगिकं श्रुतेः प्रति प्रतिनिधिरित्यर्थयुक्तं आख्यापदं प्रतिश्रुतिरिति नामशब्दो यस्यास्तादृशीं सृज कुरु सत्यां कुर्व्वित्यर्थः अङ्गीकृतं परिपालयेति भावः । तथासति तव यशोऽप्यतितरां भविष्यतीत्याह त्रिभुवनं त्रिलोकीं पुनती पवित्रयन्ती अथ च शुभत्वादुज्ज्वलां कुर्व्वती पुनस्त्वत्कीर्त्तिः शुभस्य श्वेतवर्णस्य अद्वयं अद्वैतं तथ्यादेशनात् कारणात् श्यामा शित्यादिश्चित्रकृतयोये शितिपीतलोहितहरितः कृष्ण गौररक्तपाताश्याववर्णभेदास्तेषां यानि नामानि शितीत्यादीनि तेषा मन्वयं सम्बन्धं स्वनिष्ठवाचकतानिरूपितवाच्यतारूपं लुम्पतु विना शयतु सर्व्वस्य श्वेतीकरणात् कृष्णादिवर्णाभावो भवत्वित्यर्थः तव सर्व्व त्र व्यापिनी कीर्त्तिर्भविष्यतीति भावः श्रुतिरपि इष्टिं यागमुद्दिश्य प्रवर्त्तते स्वर्गादिदानोपदेशकतया देवानामाह्लादिनी पाठान्तरे तु स्वरैरुदात्तादिभिः श्रोतृणामाह्लादयित्री स्वराह्लादः स्वरशब्दस्तद स्तीति वा तथा धर्म्ममेवार्थः प्रतिपाद्यं यस्यास्तादृशी तस्याः श्रुतेः कीर्त्तिः कीर्त्तनञ्च त्रिभुवनं पुनाति एकमेवाद्वितीयं ब्रह्मेत्यादिश्रुतेश्च अद्वैत

Digitized by Google

त्वत्कीर्त्तिः पुनती पुनस्त्रिभुवनं शुभ्राद्वयादेशना
द्रव्याणां श्रितिपीतलोहितहरिन्नामान्वयं लुम्पतु ॥१२५॥
यं प्रासूत सहस्रपादुदभवत्पादेन खञ्जः कथं
सच्छायातनयः सुतः किल पितुः सादृश्यमन्विष्यति।
एतस्योत्तरमद्य नः समजनि त्वत्तेजसां लङ्घने
साहस्रैरपि पङ्गुरङ्घ्रिभिरभिव्यक्तीभवन् भानुमान्
॥१२६॥

भावं जनयति श्रितिपीतलोहितहरिन्नामान्वयं मायासमन्वं लुम्पति नामैकां लोहितशुक्लकृष्णामित्यादिश्रवणान्माया लोहितादिरूपा। हरिर्योगेन्द्रयोरित्यमरः श्रिती धवलमेचकाविति च। शार्दूलविक्रीडितमिदं वृत्तं॥१२५॥

यमिति॥ सहस्रपात् सहस्रचरणोऽग्र च सहस्रकिरणः सूर्योऽयं प्रासूत जनयामास स छायायाः सूर्यपत्न्यास्तनयः पुत्रः शनैश्चरः कथं पादेन खञ्जः पङ्गुरुदभवत् उत्पन्नः किल यतः सुतः पुत्रः पितुर्जन पितुः सादृश्यं साम्यं अन्विष्यति प्राप्नोति कारणगुणाः कार्यगुण मारभन्त इति न्यायात् एतस्य निरुक्तप्रकारस्य प्रश्नस्य अद्य इदानीं त्वत्तेजसां तव प्रतापानां लङ्घनेऽतिक्रमणे विषये साहस्रैरपि सहस्र संख्यकैरपि अङ्घ्रिभिश्चरणैः अथ च किरणैः पङ्गुः खञ्जोऽथच असमर्थोऽ भिव्यक्तीभवन् प्रकटीभवन् भानुमान् सूर्योनोऽस्माकं उत्तरं प्रतिवाक्यं समजनि जातः पितुः पङ्गुत्वात् सुतरां पुत्रस्य पङ्गुत्वं युक्तमित्यर्थः रवितेजसश्च तेजोऽधिकतरमिति व्यतिरेकोऽत्र ध्वन्यते। पादेनेति येनाङ्गविकृत इति तृतीया। छाया सूर्यप्रियेत्यमरः। विसर्गलोपमति वन्धनसन्धिनिषेधश्चाप्यसन्धिप्रतियोगिकत्वात् सच्छायस्यत्र सन्धिविधेः॥१२६॥

Digitized by Google

इत्याकर्ण्य चितीश्वरस्त्रिदशपरिषद्दस्तागिरश्चाटुगर्भा
वैदर्भीकामुकोऽपि प्रसभविनिहितं दौत्यभारं बभार।
अङ्गीकारङ्गतेऽस्मिन्नमरपरिवृढः सम्भृतानन्दमूचे
भूयादन्तर्द्धिसिद्धेरनुविहितभवच्चित्तता यत्र तत्र
॥ १३७ ॥

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यं।

इत्याकर्ण्येति ॥ चितीश्वरः वैदर्भ्या भैम्याः कामुकोऽपि अभि
लाषुकोऽपि त्रिदशपरिषदो देवसमूहस्य इत्येवंप्रकारा चाटुगर्भाः
प्रियोक्तिमध्यास्ताः पूर्वोक्ता गिरो वचनानि आकर्ण्य श्रुत्वा प्रसभवि
निहितं बलादारोपितं दौत्यमेव दुर्वहत्वात् भारं बभार करिष्यामी
त्यङ्गीचकार। अस्मिन् नले अङ्गीकारं गते प्राप्ते सति अमरपरि
वृढो देवानां प्रभुरिन्द्रः सम्भृतानन्दमुपचितहर्षं यथा तथा ऊचे
नलं प्रत्युवाच उक्तमेवाह हे नल यत्र तत्र सर्व्वत्रैव देशे काले च
अन्तर्द्धिसिद्धेरन्तर्धानसिद्धेः अनुविहितं अनुसृतं भवच्चित्तं तव
मनोरथो यथा तथा भावस्तत्ता तदिच्छानुसारित्वं भूयात् यदा यत्र
तिरोधातुकामोभविष्यसि तदा तत्रान्तर्धानसिद्धिर्भविष्यतीत्यर्थः अत
एव यामिकानुपलब्धेत्याशङ्का न कर्त्तव्येति भावः। स्रग्धरावृत्त
मिदं॥ १३७ ॥

श्रीहर्षमित्यादि ॥ श्रीविजयप्रशस्तिरचनाया ग्रन्थविशेषस्य तातस्य
जनकस्य साम्येन कृतेति भावः नव्ये नव्यजनादरणीये नूतनप्रमेये

तस्य श्रीविजयप्रशस्तिरचनातातस्य नव्ये महा
काव्ये चारुणि नैषधीयचरिते सर्गोऽगमत्पञ्चमः॥१३८॥

वा नैषधीयचरिते इत्यत्र कविवैरसेनिचरिते इति पाठः वैरसे
निर्नलः पञ्चमः पञ्चानां पूरकोऽयं सर्गोऽगमत् समाप्तः ॥ १३८ ॥

इति श्रीप्रेमचन्द्रन्यायरत्नविरचितायां नैषधटीकायामन्वयबोधि
कासमाख्यायां पञ्चमः सर्गः समाप्तः ॥

Digitized by Google

॥ षष्ठः सर्गः ॥

दौत्याय दैत्यारिपतेः प्रवृत्तो
द्विषां निषेद्धा निषधप्रधानं ।

अथ षष्ठसर्गमारभमाणः पञ्चमसर्गशेषोक्तस्य दूत्यभारं बभारेत्येवस्यैवावशेषार्थं दौत्यमङ्गीकृत्य नलः कुण्डिनपुरं प्रस्थितवानित्याह ॥ दौत्यायेति ॥ अथ दौत्याङ्गीकारानन्तरं दैत्यारिपतेर्देवप्रभोरिन्द्रस्य दौत्याय दूतकर्म्म कर्त्तुं प्रवृत्तो जातप्रवृत्तिः सन् द्विषां शत्रूणां निषेद्धा निवारणसमर्थो निषधप्रधानं निषधदेशाधिपः स नलो भीमभूमीपतेर्भीमनाम्नो राज्ञो राजधानीं कुण्डिननगरीं रथस्यदस्य रथवेगस्य लक्षीचकार उद्देश्यां चकार कुण्डिननगरीं प्रति प्रस्थितवानित्यर्थः इन्द्रादीनां चतुर्णामपि दूत्याय प्रवृत्तावपि प्राधान्याद्दैत्यारिपतिपदेनेन्द्रोपादानं द्विषां निषेद्धेत्यनेन भीमस्य भयानकस्यापि भूपतेर्राजधानीप्रवेशेऽस्य भीतिर्नासीदिति सूचितं रथस्यदस्येत्यनेन दौत्यस्यानीप्सितत्वेऽपि अङ्गीकृतस्यावश्यनिष्पाद्यत्वात् सत्वरमेव रथं चालयामास न तु भावनया मन्दमिति

Digitized by Google

स भीमभूमीपतिराजधानीं
लक्षीचकाराथ रयस्यदस्य ॥ १ ॥
भैम्या समं नाजगणद्वियोगं
स दूतधर्म्मे स्थिरधीरधीशः ।
पयोधिपाने मुनिरन्तरायं
दुर्व्वारमप्यौर्व्वमिवौर्व्वशेयः ॥ २ ॥

सूचितं प्रधानमद्रष्ट्याअवृत्तिकलाप पुंलिङ्गेन सामानाधिकरण्य विरोधः। रंहस्तरसी तु रयः स्यद इत्यमरः। अस्मिन् सर्गे कश्चिदिन्द्र वज्रा कश्चिदुपेन्द्रवज्रा कश्चित्तदुपजातिश्च वृत्तं एतेषां लक्षणमुक्तं प्राक् ॥ १ ॥

तदानीं भैमीप्राप्तिनिश्चयजन्यं दुःखमपि तस्य नाभवदित्याह ॥ भैम्येति ॥ अधीशः प्रभुर्नलः दूतधर्म्मे दौत्यानुष्ठाने दुर्व्वारमपि निवारयितुमशक्यमपि अन्तरायं विघ्नरूपं भैम्या समं सह वियोगं विच्छेदं नाजगणत् न गणयामास किंभूतः यतः स्थिरधीरधीश्च हृदयः उपमिनोति इव यथा और्व्वशेय उर्व्वशीपुत्रोमुनिरगस्त्यः पयोधिपाने समुद्रपाने दुर्व्वारमपि दाहकत्वादन्तरायं और्व्वं वाडवानलं नाजगणत् तथेत्यर्थः वियोगसत्त्वे विघ्ने सत्यपि निष्कपटेन हृदयेन दूतकर्म्मणि प्रवृत्तवानित्यर्थः और्व्वशेय इति युक्तं पदं उक्तं च अथातोऽपि उर्व्वशी बहुभोगिनी योऽपि बहुभोगिन्याः पुत्रस्तस्य विघ्नमविगणय्यैव बहुभोजनं युक्तं। नाजगणदिति नाम्नगणोर्व्वेति अतः सन्वद्भावाभावः। और्व्वस्तु वाडवो वडवानल इत्यमरः ॥ २ ॥

Digitized by Google

नलप्रणालीमिलदम्बुजाक्षी
संवादपीयूषपिपासवस्ते।
तदध्वनीक्षार्थमिवानिमेषा
देशस्य तस्याभरणीबभूवुः ॥ २ ॥
तां कुण्डिनाख्यापदमात्रगुप्ता
मिन्द्रस्य भूमेरमरावतीं सः।

इन्द्रादयोऽपि नलागमनप्रतीक्षया तत्रैव स्थिता इत्याह ॥ नलेति ॥ ते इन्द्रादयस्तस्य नलस्य योऽध्वा पुनरागमनमार्गस्तस्य या वीक्षा निरीक्षणं तदर्थमिव अनिमेषा निमेषरहिताः सन्तः यस्मिन् देशे नलेन सह संवादोऽभूत् तस्य देशस्य आभरणीबभूवुः अलङ्कारका भूताः नलस्य पुनरागमनप्रतीक्षया तत्रैव स्थिता इत्यर्थः किम्भूताः नल एव प्रणाली द्वारं तया मिलतो मिलिष्यत आगमिष्यतोऽम्बुजाक्ष्या दमयन्त्याः संवादपीयूषस्य रहस्यकथालक्षणामृतस्य पिपासवः पानाभिलाषिणः नलद्वारा भैमीरहस्यकथाशुश्रूषव इत्यर्थः देवत्वात् स्वाभाविकमपि निमेषशून्यत्वं भैमीरहस्यकथनार्थं नलः कदा गमिष्यतीति नलमार्गप्रतीक्षार्थत्वेनोत्प्रेक्षितं ॥ २ ॥

अथ नलस्य कुण्डिनपुरप्राप्तिमाह ॥ तामिति ॥ स वेगितेन प्रसिद्धस्तदीयो नलसम्बन्धी रथः स्तोकेनाल्पकालेन भूमेरिन्द्रस्य भीमराजस्य तां नगरीं आससाद प्राप्तवान् किम्भूतां कुण्डिनाख्यापदमात्रेण केवलं कुण्डिनमिति नामशब्देन गुप्तां गोपितां यवच्छिन्नां अमरावतीं साक्षादिन्द्रपुरीं अमरावतीकुण्डिनयोर्मिथः स्वरूपतः

Digitized by Google

मनोरथः सिद्धिमिव क्षणेन
रथस्तदीयः पुरमाससाद ॥ ४ ॥
भैमीपदस्पर्शकृतार्थरथ्या
सेयं पुरोऽत्युत्कलिकाकुलस्तां ।
नृपो निपीय क्षणमीक्षणाभ्यां
भृशं निशश्वास सुरैः क्षताशः ॥ ५ ॥
खिद्यत्प्रमोदाश्रुजलेन वामं
रोमाञ्चभृत्पक्ष्मभिरस्य चक्षुः ।

रैक्यमेव किन्तु नाममात्रेण भेद इत्यर्थः उपमिनोति इव यथा मनोरथस्तपस्विनामभिलाषः क्षणेन सिद्धिं प्राप्नोति तथा मनोरथ इत्यनेन रथस्यातिवेगित्वं सूचितं ॥ ४ ॥

तत्र गतस्य नलस्य भैमीस्मरणादिविकारं वर्णयति ॥ भैमीति ॥ भैमीपदस्पर्शेन दमयन्तीचरणसम्पर्केण कृतार्था सफलजन्मा रथ्या मार्गो यत्र तादृशी यत्र भैमी विचरति सा इयं पुरीति प्रत्यभिज्ञाय उत्कलिकया उत्कण्ठया आकुल उन्मनाः सन् नृपो नलः क्षणं व्याप्य ईक्षणाभ्यां चक्षुर्भ्यां तां नगरीं निपीय सादरमालोक्य भृशमत्यन्तं निशश्वास निश्वसिति स्म निःश्वासं मुमोच यतः सुरैर्देवैः क्षता दौत्यादेशात् खण्डिता आशा भैमीप्राप्तिप्रत्याशा यस्य तादृशः ॥ ५ ॥

तस्य नगरीदर्शनादर्थमाह ॥ खिद्यदिति ॥ प्रमोदेन दमयन्त्यधिष्ठिता नगरी मया दृष्टेति हर्षेण जनितोयोऽश्रुजलेनावाष्पवर्षणेन

अन्यत्पुनः कम्प्रमपि स्फुरत्त्वा
त्तस्याः पुरः प्राप नवोपभोगं ॥ ६ ॥
रथादसौ सारथिना सनाथा
द्राजावतीर्य्याशु पुरं विवेश ।

स्विद्यत् सात्त्विकभावविशेषं स्वेदं भजत् तथा पक्ष्मभिर्नवरोमभरैरो मांचं सात्त्विकभावविशेषं बिभर्त्तीति तादृशं सत् नलस्य वामं चक्षुः तस्याः पुरः कुण्डिननगर्य्या नवोपभोगं प्रथमदर्शनं सच च नवीन कामुकत्वं प्राप प्राप्तवान् तथा अन्यदितरद्दक्षिणं चक्षुः पुनः स्फुरतीति स्फुरत् तस्य भावः स्फुरत्त्वं तस्मात् भविष्यद्दैमीलाभसूचकस्फूर्त्तिमत्त्वात् कम्प्रमपि सत्वोदयेन कम्पनशीलमपि तस्याः पुरोनवोपभोगं प्रथमदर्शनं प्राप अन्यत्रापि कामिनोनवोपभोगे स्वेदादयः सात्त्विक भावा जायन्ते पुंसामक्ष्णोर्वामचक्षुषः सात्त्विकत्वं दक्षिणचक्षुषः स्फुरणं च भविष्यन्मङ्गलसूचकमित्येवं वर्णितं केचित्तु वामं चक्षुः सात्त्विकत्वात् न वा नैव उपभोगं प्राप दक्षिणं चक्षुस्तु नवोपभोगं प्रापेति पदभङ्गेनान्वयं व्याचक्षते स्फुरत्तदिति क्वचित् पाठः तत्रस्फुरितं कम्पितं स्फुरदेति पाठस्तत्र वा शब्द एवार्थे स्फुरत्तु इति पाठस्तु न सम्यक् पुनःशब्दोपादानेनैव तुकारस्य नैष्फल्यात् ॥ ६ ॥

अथ कुण्डिनपुरप्रवेशमाह ॥ रथादिति ॥ अथानन्तरं असौ राजा नलः सारथिना सनाथादधिष्ठितात् रथादवतीर्य्य अवरुह्य पुरं कुण्डिननगरं आशु शीघ्रं विवेश प्रविष्टवान् रथे सारथिं संस्थाप्य एकाकी पुरं प्रविष्टवानित्यर्थः । उपमिनोति इव यथा अंशुसंघः किरणसंघो भानवीयात् सूर्य्यसम्बन्धिनोबिम्बात् मण्डलात् निर्गत्य

Digitized by Google

निर्गम्य बिम्बादिव भानवीयात्
सौधाकरं मण्डलमंशुमत्कः ॥ ७ ॥
चित्रं तदा कुण्डिनवेशिनः सा
नलस्य मूर्त्तिर्ववृते न दृश्या ।
बभूव तच्चित्रतरं तथापि
विश्वैकदृश्यैव यदस्य मूर्त्तिः ॥ ८ ॥

निर्गमाय सौधाकरं चन्द्रसम्बन्धिमण्डलं विशति यथा अमावस्यायां चन्द्रबिम्बस्य सूर्य्यकिरणसम्पर्केण तेजस्वित्वं भवतीति ज्योतिर्विदः । तथा च सिद्धान्तशिरोमणौ भास्कराचार्य्यः । तरणिकिरणसङ्गादेष पीयूषपिण्डो दिनकरदिशि चन्द्रचन्द्रिकाभिश्चकास्ति । तदितरदिशि बालाकुन्तलश्यामलश्रीर्घट इव निजमूर्त्तिच्छाययैवातपस्थ इति ॥ ७ ॥

पुरप्रविष्टस्याथ भूयादन्तर्हितसिद्धेरित्यादीन्द्रवचनाद्दृश्यत्वमाह ॥ चित्रमिति ॥ तदा तस्मिन् समये कुण्डिनवेशिनः कुण्डिनपुरप्रवेशिनो नलस्य सा चक्षुर्ग्राह्या मूर्त्तिस्तनुर्यद्दृश्या चक्षुर्ग्राह्या न ववृते न संवृत्ता तच्चित्रं आश्चर्य्यं एतावन्तं कालं चक्षुर्ग्राह्या स्थिता अधुना तत्कालाद्दृश्या न भवतीत्याश्चर्य्यमेवेत्यर्थः अथच सा रमणीयत्वेन प्रसिद्धा नलस्य मूर्त्तिर्यद्दृश्या रमणीया न वर्त्तते तदाश्चर्य्यमेव । यद्यपि दृश्या न ववृते तथापि अस्य नलस्य मूर्त्तिर्यत् विश्वेषां सर्व्वजनानां एका मुख्या दृश्यैव चक्षुर्ग्राह्यैव अथच रमणीयैव बभूव तच्चित्रतरं अतीवाश्चर्य्यं अदृश्यस्य विश्वजनदृश्यत्वमत्याश्चर्य्याय भवत्येव । दृश्यं दर्शनयोग्ये रमणीयेऽपि चेष्यत इति नकः ॥ ८ ॥

Digitized by Google

जनैर्विदग्धैर्भवनैश्च मुग्धैः
पदे पदे विस्मयकल्पवल्लीम् ।
विगाहमाना पुरमस्य दृष्टि-
रयाददे राजकुलातिथित्वं ॥ ९ ॥
हेलां दधौ रक्षिजनेऽस्तसंज्ञे
क्षोणीचरामीति हृदा ललज्जे ।

अथ राजपुरदर्शनमाह ॥ अस्य नलस्य दृष्टिः पदे पदे स्थाने स्थाने वर्त्तमानैः विदग्धैश्चतुरैर्जनैः पुरवासिभिः मुग्धैर्मनोज्ञैर्भवनैः प्रासादैश्च करणैर्विस्मयस्याश्चर्यस्य कल्पवल्लीं कल्पलतां विस्मयजनिकामित्यर्थः पुरं कुण्डिननगरीं विगाहमाना दर्शनविषयिणीं कुर्व्वती सती अथानन्तरं राजकुलस्यातिथित्वं आतिथ्यं आददे प्राप्तवती राजा राजसदनं ददर्शेत्यर्थः । मुग्धस्तु सुन्दरे मूढवति कुलं जनपदे गोत्रे सजातीयगणेष्वपि भवने च तनौ क्लीबं कलञ्जार्थ्यांमथो कुली ति च मेदिनी ॥ ९ ॥

तत्र प्रविष्टस्याह युगपद्भावानाह ॥ हेलामिति ॥ असौ नलः अस्तैः करवालादिभिः संज्ञा यस्य तादृशे अस्तसंज्ञेऽपि रक्षिजने राजद्वारपालके हेलां अवज्ञां दधौ एते किमपि मम कर्त्तुं न शक्नुवन्तीति गर्व्वं दधारेत्यर्थः तथा अहं क्षोणिचरामि राजा भूत्वापि चौरवदन्तः प्रागच्छामीति हृदा मनसा विचिन्त्य ललज्जे लज्जितवान् तथा अथ भैमीं पश्यामि अवलोकयिष्यामीति विचिन्त्य सन्तुतोष हर्षं लेभे तथा

Digitized by Google

द्रक्ष्यामि भैमीमिति संतुतोष
दूत्यं विचिन्त्य स्वमसौ शुशोच ॥ १० ॥
अथोपकार्य्याममरेन्द्रकार्य्या
त्कक्षासु रक्षाधिकृतैरदृष्टः ।
भैमीं दिदृक्षुर्बहु दिक्षु चक्षु
र्दिशन्नसौ तामविशद्विशङ्कः ॥ ११ ॥

स्वं स्वकीयं दूत्यं विचिन्त्य को वा मम लाभो भैमीदर्शने यतोऽहं दूत इति विचार्य्येत्यर्थः शुशोच शोकं प्राप्तवान् दूतस्य मम तस्यामभिलाषोऽनुचित इति मत्वा आत्मानं विनिन्देति भावः। अत्र चतुर्णां सर्व्वादिभावानां मिश्रितत्वाद्भावशबलता ॥ १० ॥

इतः परमन्तःपुरप्रविष्टस्य नलस्य व्यापारमाह ॥ अथेति ॥ अथा नन्तरं असौ नलोऽमरेन्द्रकार्य्यात् सुरपतेः प्रयोजनाद्धेतोः अमराश्च इन्द्रादयश्च इन्द्रश्च ते यथा तेषां कार्य्यात्तां वा दृष्टां उपकार्य्यां राजसदनं अविशत् प्रविष्टवान् किम्भूतः कक्षासु अन्तःपुरप्रकोष्ठेषु वर्त्तमानैः रक्षार्थं रक्षके ये अधिकृता नियुक्तास्तैर्द्वारपालैः कर्त्तृभिरदृष्टः भूयादन्तर्द्धिसिद्धिरित्यादिदेववरादनालोकितः अतएव विशङ्कोनिर्भयोभूत्वा भैमीं दिदृक्षुर्द्रष्टुमिच्छुः सन् बहु अनेकवारं दिक्षु आशासु बहुदिक्षु सर्व्वासु दिक्षु वा चक्षुर्दिशन् प्रेरयन् । अनाहूतस्य परान्तःपुरप्रवेशनिषेधादमरेन्द्रकार्य्यादित्युक्तं। प्रावृत्तु अमरेन्द्रकार्य्यादिन्द्रवरदानाददृष्ट इत्यन्वयमापद्यते। उपकार्य्या राजसद्मन्युपकारोचितेऽन्यवदिति मेदिनी कक्षा. प्रकोष्ठे हर्म्यादेरि त्यमरः ॥ ११ ॥

Digitized by Google

अयं क इत्यन्यनिवारकाणां
गिरा विभुर्द्वारि विभुज्य कण्ठं ।
दृशन्ददे विस्मयनिस्तरङ्गां
स लक्षितायामपि राजसिंहः ॥ १२ ॥
अन्तःपुरान्तः स विलोक्य बालां
काञ्चित्समालब्धुमसम्भृतोरुं ।
निमीलिताक्षः परया भ्रमन्त्या
सङ्घट्टमासाद्य चमच्चकार ॥ १३ ॥

अयमिति ॥ स विभुर्विभवशाली राजसिंहो राजश्रेष्ठो नलः ल-क्षितायामपि अविज्ञातायामपि द्वारि उपकार्य्याद्वारे अयं क इत्यन्यनिवारकाणां अन्यजननिषेधकानां गिरा वाचा हेतुभूतया कण्ठं विभुज्य वक्रीकृत्य विस्मयेन कथमस्मद्दर्शोऽप्येतैर्दृष्ट इत्याश्चर्य्येण निस्तरङ्गां निश्चलां स्थिरां दृशं चक्षुर्ददे दत्तवान् सिंह इत्यनेन दृष्टेऽप्यात्मनि निर्भयत्वं सूच्यते सिंहोऽप्यवज्ञया ग्रीवां वक्रीकृत्य गर्वेण दृष्टिं पश्चाद्ददाति । विभुज्येति भुजकौटिल्य इत्यस्य रूपं ॥ १२ ॥

अन्तःपुरेति ॥ स नलः अन्तःपुरस्यान्तर्मध्ये समालब्धुमुद्वर्तयितुं असंवृतौ अनावृतौ वस्त्रशून्यीकृतौ ऊरू यया तादृशीं काञ्चिद्बालां स्त्रियं विलोक्य दृष्ट्वा निमीलिते वस्त्ररहिताया दर्शनमनुचितमिति मुद्रिते अक्षिणी चक्षुषी येन तादृशः सन् भ्रमन्त्या इतस्ततो गच्छन्त्या परया अन्यया स्त्रिया सङ्घट्टं सम्पर्कं आसाद्य प्राप्य चमच्चकार किमिदम् उचितं जातमित्यकस्मात् स चकितो बभूव । निमीलिताक्ष इति षा क्ष्णां सक्थ्यक्षिभ्यामिति टः ॥ १३ ॥

Digitized by Google

अनादिसर्गस्रजि वानुभूता
चित्रेषु वा भीमसुता नलेन ।
जातेव यद्वा जितशम्बरस्य
सा शाम्बरीशिल्पमलक्षि दिक्षु ॥ १४ ॥

अनादीति ॥ सा भीमसुता दमयन्ती नलेन दिक्षु प्रतिदिशमलक्षि दृष्टा अन्यसन्निधावदृष्टायाः कथं दर्शनं नच स्मृतौ रजतबुद्धिवद्भ्रमरूपं तत् अननुभूतस्य भ्रमविषयत्वानङ्गीकारेण भैम्यास्तथात्वासम्भवादित्य माशङ्क्य भ्रमत्वायमिति निश्चित्य तथान्यथानुपपत्त्या पूर्वानुभवं संभवे सा किम्भूता अनादिः प्रवाहरूपत्वादनवधिर्या सर्गस्रक् सृष्टिपरम्परा तस्याम् । अनुभूता जन्मान्तरेऽपि परिगृहीतत्वादनुभवविषयीकृता ननु जन्मान्तरीयसंस्कारस्य प्रायेणोद्बोधासम्भवात् कथं तस्याः स्मरणमित्यत आह अथवा किम्भूता चित्रेषु आलेख्येषु अनुभूता ननु चित्रे निश्चेष्टैव भैमी दृष्टा यादृशोऽनुभवस्तादृश एव भ्रमो जायते नचात्र तथा सचेष्टाया एवास्या नलेन लक्षितत्वादित्यत आह यद्वा अथ वा जातेव मिथ्या भैमी उत्पन्नैव वा अलक्षि शुक्त्यादौ अनिर्वचनीयं मिथ्यारजतादिकमुत्पद्यत इति वेदान्तिनः नन्विदं वैशेषिकादीनां बहूनां विरुद्धमित्यत आह जितः शम्बरो दैत्यविशेषो येन तादृशस्य मदनस्य या शाम्बरी शम्बरसम्बन्धिनी माया तस्याः शिल्पं अत्र वाकारोऽनुषञ्जनीयः शाम्बर्या निर्माणकौशलं वा अतिमायाविनं शम्बरासुरं जयता कामेन तस्य मायाप्यपहृता तन्माययैवेयं निर्मितावेत्यर्थः तन्मयत्वाद्रूपता कामदत्तयैव तेनेत्थं लक्षितमिति भावः ॥ १४ ॥

अलीकभैमीभ्रमदर्शनाच्च
तस्यान्यकन्याप्सरसोरसाय ।
भैमीभ्रमस्यैव ततः प्रसादा
द्भैमीभ्रमस्तेन न तास्वलम्भि ॥ १५ ॥
भैमीनिराशे हृदि मन्मथेन
दत्तस्वहस्तादिरहाद्विहस्तः ।

अलीकेति ॥ अलीकस्य मिथ्याभूतस्य पूर्वोक्तरीत्या भ्रमविषयतया भासमानस्य भैमीभ्रमस्य दर्शनात् अलीकभैमीभ्रमेणाकृष्टचित्तत्वादित्यर्थः अन्या भैमीभिन्ना कन्या अप्सरस इवेति ताः अस्याः सर्वस्यापि त्या अपि भैमीसख्यस्तस्य नलस्य रसाय अनुरागाय न बभूवुरिति शेषः अप्सरस्तुल्यास्तु तास्त्रिष्वपि भैमीसखीष्वननुरज्य अत्युत्कृष्टतया अलीकेष्वपि भैमीभ्रमेष्वनुरक्तो बभूवेत्यर्थः ननु तास्वेव भैमीभ्रमः कथं नाभूदित्यत्राह ततस्तस्य भैमीभ्रमस्यैव भैमीभ्रान्तेः तारतम्यस्य प्रसादात् सामर्थ्यात् तासु अन्यकन्याप्सरःसु भैमीभ्रमो नालम्भि न प्राप्तः अलीकदृष्टाया भैम्याः सकाशात्तासामतिहीनत्वात् सादृश्याभावाद्भ्रान्तिकारणाभावाद्भैमीभ्रान्तिर्नोत्पन्नेत्यर्थः । सस्वहरतिवत्याः ज्ञाने तसि ॥ १५ ॥

भैमीति ॥ भैम्या विषये निराशे दौत्याङ्गीकारात् विगतवाञ्छे ऽपि हृदि मनसि वर्त्तमानेन मन्मथेन कामेन दत्तः अर्पितः स्वहस्तावलम्बनं यस्मै तादृशात् कामेन कृतसाहाय्यात् उद्दीपिताद्विति यावत् विरहाद्विच्छेदाद्विहस्तो व्याकुलः स नलः नृपान्तःपुरे स्वकार्यादन्यकार्ये अलीकां मिथ्याभूतां तां भैमीमवलोक्य भ्रान्तिविषयीकृत्य अनन्तरं

स तामलीकामवलोक्य तत्र
क्षणादपश्यन् व्यषददिबुद्धः॥ १६॥
प्रियां विकल्पोपहृतां स याव
द्दिगीशसन्देशमजल्पदस्यै।
अदृश्यवाग्भीषितभूरिभीरु
भवो रवस्तावदचेतयत्तं॥ १७॥

विबुद्धो दोषापगमात् भ्रान्तिरहितो भूत्वा अपश्यन् भैमीमनवलोक यन् सन् व्यषदत् विषादं प्राप्तवान्। दोषाक्रोशाराव् हृदि भैमी निरासे सतीति वा येन कल्पोदयस्तस्यैव विबुद्धत्वं कल्पराहित्यं युक्तं अत्र तु तद्विपरीतं जातमिति विरोधो व्यङ्ग्यः। विबुद्धत्वाबुधो वना विष्यमरः॥ १६॥

प्रियामिति॥ स नलो विकल्पेन सङ्कल्पेन उपहृतां उपनीतां प्रियां भैमीं यावत् दिगीशानां दिक्पालानां इन्द्रादीनां सन्देशं संवादं अस्यै किञ्चित् अजल्पत् अवोचत् तावत्तस्मिन्नेव क्षणे अदृश्य स्य दृष्टेरविषयस्य नलस्य वाचा भीषितास्त्रासिता भूरयोऽनेका भीर वो भयस्वभावाः स्त्रियस्ताभ्यो भव उत्पत्तिर्यस्य स ताभ्यो भव उत्प न्नो वा रवः शब्दस्तं नलं अचेतयत् चेतनां प्रापयामास सावधानं चकार भ्रान्तिवीक्षितामपि भैमीं प्रति इन्द्रादिभिरुक्तमेवमुक्तमिति याव दनुमारब्धवान् तावदनेनैव शब्देन अदृश्यो भूपादिः कोऽप्यन्तःपुरे समागत इति भीतानां स्त्रीणां कलकलेन सभ्रान्तो भूत्वा तूष्णी मभूदित्यर्थः॥ १७॥

Digitized by Google

पश्यन् स तस्मिन् मरुतापि तन्व्याः
स्तनौ परिस्प्रष्टुमिवात्तवस्त्रौ ।
अचान्तपश्चान्तमृगाङ्कमास्यं
दधार तिर्य्यग्वलितं विलक्षः ॥ १८ ॥
अन्तःपुरे विस्तृतवागुरेऽपि
बालावलीनां वलितैर्गुणौघैः ।

पश्यन्निति ॥ तस्मिन्नन्तःपुरे मरुतापि अचेतनेन वायुनापि अथ च देवेनापि परिस्प्रष्टुमिव ईषन्मर्द्दयितुमिव आत्तवस्त्रौ अपसारितावरणौ कस्याश्चित्तन्व्याः स्तनौ कुचौ पश्यन् अबुद्धिपूर्व्वकमकस्माद्विलोकयन् स नलः अदृश्यो खलु परस्त्रीस्तनावेक्षि विलक्षो विमनाः सन् तिर्य्यग्वलितं तिरश्चीनं वक्रीकृतं आस्यं मुखं दधार धारयति स्म पराङ्मुखोऽभूदित्यर्थः किम्भूतं आस्यं अचान्तो मृगाङ्कत्वादसोढः पश्चान्तमृगाङ्कः पूर्णमासीचन्द्रो येन तादृशं चन्द्रतुल्यमित्यर्थः । प्रच्छन्नकामुकसम्भोगे चन्द्रतिरोधानं युक्तमिति तथाकृतमिति च ध्वन्यते ॥ १८ ॥

अन्तःपुर इति ॥ मनोभूः कामोऽन्तःपुरे बालावलीनां तरुणीश्रेणीनां वलितैः सविलासैर्गुणौघैः सौन्दर्य्यादिगुणसमूहैः कृत्वा विस्तृत्य इतस्ततः स्थापिता वागुरा बन्धनोपाया येन तादृशः सन्नपि कालः कृष्णवर्णः कनीनिकाख्यः सारः श्रेष्ठभागो यस्य तादृशं तथा हरिणं अभितः पाण्डुरं तस्य नलस्य अक्षिद्वयं चक्षुर्द्वयं वशं सौन्दर्य्यादेर्वशं कर्त्तुं न प्रभुरभूत् न समर्थो बभूव अन्तःपुरे सौन्दर्य्यादिगुणशालिनीरपि तरुणीर्दृष्ट्वा नलो न कामाधीनो बभूवेत्यर्थः ।

Digitized by Google

न कालसारं हरिणान्तरं चि
दयं प्रभुर्बद्धुमभून्मनोभूः ॥१९॥
दोर्मूलमालोक्य कचं दधत्या
स्ततः कुचौ तावनुलेपयन्त्याः ।

अथ च मनोभूस्तस्या मृगयुर्व्याधस्तयोर्नां वेध्यपङ्क्तीनां वल्लितैर्वि
गुणोक्तैर्गुणैर्वैरज्जुसमूहैः करस्थैर्विस्तृतवागुरेऽपि प्रसारितमृग
बन्धनजालेऽपि कालसारं कालसारनामकं तस्य प्रसिद्धयमेव हरिणं
मृगं बद्धुं अन्तःपुरेऽपि न प्रभुरभूत् अन्यो मृगयुस्तु एतादृशोपकर
णोऽरण्येऽपि मृगं बद्धुं शक्नोतीत्याश्चर्यमित्यप्रस्तुतोऽर्थः। वागुरा
मृगबन्धिनीत्यमरः। प्रकृते तु वागुराशब्दो गौणः ॥१९॥

दोर्मूलमिति ॥ एष नलः कचं केशं दधत्या दोरामुत्क्षिप्तः कस्या
श्चित् दोर्मूलं बाहुमूलं आलोक्य दृष्ट्वा ततोऽनन्तरं अन्यस्यां दिशि
दत्तदृष्टिः सन् अनुलेपयन्त्याः कुङ्कुमादिना विलेपयन्त्याः कस्याश्चित्
तौ पीनत्वेन प्रसिद्धौ कुचौ स्तनौ आलोक्य अथानन्तरं ततोऽन्यस्यां
दिशि अपवाससः अपनीतवसनायाः कस्याश्चिन्नाभीमालोक्य वि
चक्षुर्दिक्षु क्रमेण उत्क्रमेण कृष्टं अन्यत आकृष्टं चक्षुर्येन तादृशः
सन् अनु पश्चात् निमील्य मुद्रितनयनो बभूव चतुर्थ्यां दिशस्तु
पश्चाद्वर्तित्वात् एवंविधादप्यपरमत्यन्तरसत्त्वसम्भावनाविषयत्वाद्वा तत्र
दृष्टिप्रक्षेपमकृत्वा सुकरं निमीलनमेव चकार । प्राचस्तु एकस्या
एव स्त्रियाः दोर्मूलमालोक्य किंचिदधो नमितदृष्टिः सन् अन
न्तरं कुचावालोक्य ततोऽप्यधो नमितदृष्टिरनन्तरं नाभीमवलोक्य

Digitized by Google

नाभीमधोऽथ स्मयमानसोऽनु
निमील्य ह्रिया कमलं च चक्षुः ॥ २० ॥
मीलन् प्रियेकोऽभिमुखागताभ्यां
धर्तुं निपीड्य स्तनसान्तराभ्यां ।
स्वाङ्गान्यपेतो विजगौ स पश्यन्
पुमङ्गसङ्गात्पुलके ततस्ते ॥ २१ ॥
निमीलनस्पष्टविलोकनाभ्यां
कदर्थितस्ताः कथयन् कटाक्षैः ।

लज्जावशात् ह्रिया जघनदेशादधोदेशगमनेव कृष्णचक्षुः सन् निमीलि
ति यावदर्थः ॥ २० ॥

मीलन्निति ॥ अभिमुखं परस्परं सम्मुखमागताभ्यां ताभ्यामिव
स्तनाभ्यां मध्ये वर्तमानो मीलन् पूर्वोक्तावस्थामुद्दिश्य नयनः स नलो
निपीड्य गाढं पीडयित्वा धर्तुं न शेके न शक्तः धारयामास हेतु
गर्भनिर्भेदनमात्र निम्नाभ्यां स्तनोऽभ्युन्नतराभ्यां स्तनाभ्यां स्वता सा
न्तराभ्यां सवकाशनविहिताभ्यां उभयोरन्तरमन्तरं तयोरेव नलाकर्षणि
तौ ननु तयोर्वक्षोभ्यां गाढसंश्लेषो जात इति निपीड्य धारयामासेति
हेतुः अनन्तरं ततः स्त्रीद्वयमध्येऽपेतो निर्गतः सन्नयः पुंसः पर
पुरुषस्य अङ्गसङ्गात् देहसंसर्गात् पुलके सतोद्वयाश्चावरोमाञ्चे
स्ते स्थितौ पश्यन् स्वाङ्गानि निजाङ्गानि विजगौ धिक्कृतैतान्यङ्गानि
यस्मादनयोः सख्योरप्येवमभूदिति निर्भेदेन विविक्तवानित्यर्थः
॥ २१ ॥

निमीलनेति ॥ निमीलनेन नियमनलोचनं अनादिदर्शनात् चक्षुर्मु
द्रणेन परस्त्रीसंसर्गात् स्पष्टविलोकनेन च सकटाक्षवीक्षणेन च कद

Digitized by Google

सरागदृष्टीव भृशं सलज्जो
सतः सतां ह्रीः परतोऽपि गुर्वी ॥ २२ ॥
रोमाञ्चिताङ्गीमनु तत्कटाक्षै
र्भ्रान्तेन कान्तेन रतेर्विलक्षः ।

र्पितो विरक्तीभवः स नलः रामेवानुरागेण मन्तुं योऽलमत्र नाहतो भव इव कटाक्षैरपाङ्गदर्शनैस्ताः स्त्रियः कथयन्नवलोकयन् सन् भृशमत्यन्तं सलज्जो लज्जितवान् यदा निमीलनं तदा सङ्कोचनं यदास्य विलोकनं तदा स्तनादिदर्शनं अतः कटाक्षैस्ता दृष्ट्वा अनन्तरं रागेण परस्त्रीलम्पट एवं पश्यतीति मत्वा अविकृतयित्वा लज्जां प्राप्तवानित्यर्थः ननु लज्जा कस्मात् प्राप्तो भवति यत् प्रथमस्यादृष्टस्य सा भाविव्यर्थान्तरन्यासेनोपपादयति सतां साधूनां परतोऽपि अन्यापेक्षयाऽपि सतो गुर्वी अतिमहती स्त्रीलज्जा जायते सतो यावती लज्जा भवति तावती परतो न तस्मादस्याऽपि कटाक्षावलोकनेन अतएव लज्जित इत्यर्थः ॥ २२ ॥

रोमाञ्चिताङ्गीमिति ॥ रोमाञ्चिताङ्गीं अनु अङ्कसंलग्नाम् पुलकितदेहां स्त्रियं प्रति पूर्वोक्तशङ्केर्विलोकमानैस्तस्य नलस्य कटाक्षैर्हेतुभिर्भ्रान्तेन मत्तोऽनुरागादेव रोमाञ्चिताङ्गीमिमां प्रति कटाक्षं करोमीति भ्रान्तिमता रतेः कान्तेन कामेन विलक्षो [विक्षिप्तः कुसुमानि पुष्पवाणाः शरैर्यो बाणसमूहस्तस्य नलस्य धैर्यपूर्णां प्रतिपत्त्यैवयन् धैर्यपूर्णमायकं त्यक्तवान् भवन् मुख्यप्रयोजनाभावेऽपि नवप्रहारः कोऽपि

Digitized by Google

मोघः शरौघः कुसुमानि माभू
न्तद्दैर्य्यपूजां प्रतिपर्य्यवस्यन् ॥ २३ ॥
छित्त्वैकवर्त्मैवमिह भ्रमन्त्याः
स्पर्शः स्त्रियाः सुत्यज इत्यवेत्य।
चतुष्पथस्याभरणं बभूव
लोकावलोकाय सतां स दीपः ॥ २४ ॥
उद्वर्त्तयन्त्या हृदये निपत्य
नृपस्य दृष्टिर्व्यवृतद्द्रुतैव।

भोरीति माभूदिति तद्धैर्य्यपूजायामुपयोगं गच्छन् सन् मोघो विफलो माभूत् अपि तु सफलो बभूव पूजा हि पुष्पैः क्रियत इति वयोक्तं ॥ २३ ॥

छित्त्वेति ॥ इह एकवर्त्मान्तःपुरे भ्रमन्त्या इतस्ततो विचरन्त्याः स्त्रियाः स्पर्शः एवं करणेन सुत्यजः सुखेन त्यक्तुं शक्यते नतन्यथा इत्यवेत्य निश्चित्य एकवर्त्म एकपदीं छित्त्वा सतां साधूनां दीपः प्रकाशकः साधूनां मध्ये उज्ज्वलो वा स नलः लोकानां कर्म्मभूतानां पुरलोकानां अवलोकाय दर्शनाय चतुष्पथस्य शृङ्गाटकस्य आभरणं बभूव अलङ्कारको जातः तत्रैव गतवानित्यर्थः अन्योदीपोऽपि लोकदर्शनावलोकाय चतुष्पथे स्थाप्यते। चतुष्पथमिति चतुर्णां पथां समाहार इति ऋगादिरित्यादिना समासान्तः ॥ २४ ॥

उद्वर्त्तयन्त्या इति ॥ उद्वर्त्तयन्त्या विलेपनं कुर्व्वत्याः कस्याश्चिद्धृदये वक्षसि निपत्य नृपस्य नलस्य दृष्टिर्द्रुतैव सत्वरैव व्यवृतत् निवृत्ता बभूव उत्प्रेक्ष्यते किम्भूतेव कुचयोः स्तनयोर्व्वर्त्तमानैः कर्दमलवैरर्ङ्कपङ्ककारैर्नेत्राञ्जनस्खलातिपिच्छैर्व्वियोगिनो नलस्य वैरात् विरोधात् गत

वियोगिवैरात् कुचयोर्नखाङ्कै-
रर्द्धेन्दुलीलैर्गलहस्तितेव ॥ २५ ॥
तन्वीमुखं द्रागधिगत्य चन्द्रं
वियोगिनस्तस्य निमीलिताभ्यां।
द्वयं द्रढीयः कृतमीक्षणाभ्यां
तदिन्दुता च स्वसरोजता च ॥ २६ ॥
चतुष्पथे तं विनिमीलिताक्षं
चतुर्दिगेताः सुखमन्वदीप्यन् ।

हस्तितेव दूरीकरणाय गले हस्तो गलहस्तः स जातोऽस्या इति तादृशीव नखाङ्कदर्शनं चन्द्रदर्शनञ्च विरहिणामसह्यमिति वैरं। तर्ज्जन्यङ्गुष्ठविस्तारे गलहस्तोऽर्द्धचन्द्रकाविति वचः ॥ २५ ॥

तन्वीति ॥ वियोगिनो विरहिणस्तस्य नलस्य ईक्षणाभ्यां चक्षुर्भ्यां तन्व्याः कस्याश्चित् कृशाङ्ग्याः स्त्रियो मुखं चन्द्रं अधिगत्य निश्चित्य अथ च चन्द्ररूपं तन्वीमुखं अधिगत्य प्राप्य प्राक् झटिति विमीलिताभ्यां मुद्रिताभ्यां सद्भ्यां तस्य मुखस्य इन्दुता चन्द्रत्वञ्च स्वस्यात्मनः सरोजता पद्मत्वञ्च इदं द्वयं द्रढीयो दृढतरं निश्चितं कृतं चन्द्रप्राप्तौ पद्मस्यैव सङ्कोचो न त्वन्यस्य चन्द्रप्राप्तावेव पद्मस्य सङ्कोचो न त्वन्यप्राप्ताविव्यन्वयव्यतिरेकाभ्यां मुखस्य चन्द्रत्वं स्वस्य पद्मत्वं व्यक्तीकृतमित्यर्थः कदाप्यं खलु परकलत्रमिति मत्वा नलो नेत्रसङ्कोचं कृतवानिति भावः ॥ २६ ॥

चतुष्पथ इति ॥ चतुर्दिग्भ्यः एताः आगतास्तत्र स्त्रियश्चतुष्पथे विनिमीलिताक्षं परस्त्रीमुखादिदर्शनाविवेकेन मुद्रितनयनं तं नलं

Digitized by Google

संघट्य तस्मिन् भृशभीनिवृत्ता
स्त्रा एव तद्वस्त्रं न चेददास्यन्॥ २७॥
संघट्टयन्त्यास्तरसात्मभूषा
हीराङ्कुरप्रोतदुकूलधारी।
दिशा नितम्बं परिधाप्य तन्व्या
सत्रापसन्तापमवाप भूपः॥ २८॥

सुखमनायासेन यदा अपहरिष्यन् अपहारयिष्यन् चेद्यदि ता एव स्त्रियस्तस्मिन्नदृष्टे नले संघट्य संघट्टमासाद्य भृशभिया किमिदं स्पृष्टमिति जायमानया सातिशयभीत्या निवृत्ताः पराङ्मुखाः स्युस्तस्य नलस्य वस्त्रं यस्यास्तां अदास्यन् अप्ययन् अतिभयेन परावृत्तत्वात्तस्य यस्या दत्तवतो धर्तुं नाशक्ष्यन्नित्यर्थः। अपहरिष्यन्निति अदास्यन्निति च क्रियाऽतिपत्तौ लृङ्॥ २७॥

संघट्टयन्त्या इति॥ भूपो नलस्तरसा वेगेन संघट्टयन्त्या मिलन्त्यास्तन्व्याः कस्याश्चित्सुन्दर्याः आत्मनो भूषासु अलङ्कारेषु ये हीराख्येष्वङ्कुरेषु कोटिषु प्रोतं स्यूतं सम्यक् दुकूलं पट्टाम्बरं हरति आकर्षतीति तादृशः सन् तस्या नितम्बं दिशा परिधाप्य दिगम्बरीकृत्य विवस्त्रं कृत्वेत्यर्थः तेन परस्त्रीविवस्त्रीकरणेन जनितं यत्पापं तेन सन्त्रापं न खलु मया साधु कृतमिति परमं दुःखं अवाप प्राप्तवान् तरसा परस्त्रीस्पर्शभिया झटिति प्रतिनिवृत्तत्वाद्वेगेन भूषाहीराङ्कुरेषु प्रोतं दुकूलं हरतीति तथा दुकूलवस्त्रं हि वस्त्राकर्षणेनापि तदपनयनं भवतीति दुकूलेत्युक्तं॥ २८॥

Digitized by Google

हतः कयाचित् पथि कन्दुकेन
संघट्य भिन्नः करजैः कयापि।
कयाचनाक्तः कुचकुङ्कुमेन
सम्भुक्तकल्पः स बभूव ताभिः॥ २९॥
छायामयः प्रैक्षि कयापि हारे
निजे स गच्छन्नथ नेक्ष्यमाणः।

हतइति॥ स नलस्ताभिरन्तःपुरे विचरन्तीभिः स्त्रीभिः सम्भुक्तकल्पः ईषत्सम्भोगइव बभूव किम्भूतः कयाचित् स्त्रिया पथि कन्दुकेन गोलाकारक्रीडनकेन हतः अन्यार्थक्षिप्तेन कन्दुकेन पथि मध्ये ईषद्गोवर्त्तमानस्ताडितइत्यर्थः तथा कयापि स्त्रिया संघट्य संश्लिष्य करजैर्नखैर्भिन्नः क्षतः कयाचन स्त्रिया कुचकुङ्कुमेन स्तनस्थकाश्मीरलेपेन आक्तः लेपितः। संभुक्तकल्प इति मनागूने कल्पदेश्यदेशीया इति कल्पप्रत्ययः केवलं ग्राम्यधर्म्माभावात् सम्भोगस्य मनागूनत्वं ताभिर्विलवीयया तासामेव बुद्धिपूर्व्वकत्वं नतु नलस्येति सूचितं ॥ २९ ॥

छायामयइति॥ कयापि स्त्रिया निजे स्वीये हारे छायामयः प्रतिबिम्बितः स नलः प्रैक्षि प्रथमं दृष्टः अथानन्तरं गच्छन् ततोऽन्यत्र चलन् अतएव हारे नेक्ष्यमाणेन दृश्यमानः स नलः अधुनैव क्वचि त्पुरा हारे दृष्टः केदानीं गतइति तस्य नलस्य चिन्तया हेतुभूतया तन्व्या तयैव स्त्रिया स्वस्यैव हृदयमन्तःकरणं प्रविष्ट इति अन्तर्मनसि ध्यानात् सम्यक् निरधायि निश्चितः हृदयएव हारस्य विद्यमानत्वात्तत्र

Digitized by Google

तच्चित्तयान्तर्निरपायि चारु
सखेव तन्व्या हृदयं प्रविष्टः ॥ २० ॥
तच्छायसौन्दर्यनिपीतधैर्याः
प्रत्येकमालिङ्गदमूरतीशः ।
रतिप्रतिच्छन्दितमासु नूनं
नामूषु निर्णीतरतिः कथञ्चित् ॥ २१ ॥

मीप्यात्तत्रैव प्रविष्ट इति युक्तश्छायाविभ्रमनिश्चयः यद्यप्यदृश्यस्य प्रतिबिम्बं न सम्भवति तथापि कौतुकित्वाद् दृश्यस्यापि मम प्रतिबिम्बेन भवितव्यमिति नलस्येच्छावशात्प्रतिबिम्बं जातमित्यवधेयं ॥ २० ॥

तच्छायेति ॥ रतीशः कामो दारादौ तच्छायस्य नलप्रतिबिम्बस्य सौन्दर्येण निपीतं निःशेषेण हृतं धैर्यं यासां तादृशीरमूः स्त्रियः प्रत्येकं पृथक्पृथक् आलिङ्गत् आश्लिष्टवान् प्रतिबिम्बितनलस्य दर्शनात्ताः कामाधीना बभूवुरित्यर्थः ननु रतीशस्य कथं रतीतरस्त्र्यालिङ्गनमित्युत्प्रेक्षयोपपादयति नूनमुत्प्रेक्षे रतीशः रतेः स्वभार्यायाः प्रतिच्छन्दितमासु अतिशयेन प्रतिसदृशीषु रतितुल्यास्वित्यर्थः अमूष्वन्तःपुरिकासु मध्ये कथञ्चित् केनापि सौन्दर्यादिप्रकारेण निर्णीता निश्चिता रतिर्येन तादृशो न बभूवेति शेषः आसां मध्ये मम प्रिया रतिः कतमेति निश्चेतुमशक्तेन कामेन सर्वासामालिङ्गनेन रतेरप्यालिङ्गनं भविष्यतीति मत्वा सर्वा एवालिङ्गिता इत्यर्थः अथ च यो हि अनिर्धारितरतिरनिश्चितसुरतः स सर्वा एवालिङ्गतीति ध्वनिः । तच्छायेति सेनासुरेत्यादिना छायायाः क्लीबत्वं ॥ २१ ॥

Digitized by Google

तस्मादृदृश्यादपि मानिबिभ्यु
स्तच्छायरूपाहितमोहशोभाः।
मन्यन्त एवाद्य तमन्यथाशाः
प्राणानपि स्वान् सुदृशस्तृणानि ॥ ३२ ॥
जागर्त्ति तच्छायदृशां पुरा यः
स्पृष्टे च तस्मिन्विससर्प कम्पः।

तस्मादिति ॥ सुदृशो युवतयः अदृश्यादपि तस्मान्नलान्मानिबिभ्युर्न भयं प्रापुः किम्भूता यतोऽधरादौ तच्छायस्य नलप्रतिबिम्बस्य रूपेण सौन्दर्येण आहितो जनितो यो मोहो विचित्तता तद्योगाद्व्यभिचारिभावत्वेन शोभा उज्ज्वलानन्दस्वभावाः प्रतिबिम्बदर्शनेन कामवशत्वान्न भयं प्रापुरित्यर्थः एतदपि कथमित्यत आह अद्य ता सादरं चोक्तवा मन्मथाज्ञा कामाज्ञा याभिस्ताहृशः कामाधीनाः सत्यः सुदृशः स्वान् कीयान् प्राणानपि तृणानि मन्यन्ते तृणवत्तुच्छत्वेन परिगृह्णन्ति यासां प्राणवाञ्छा न विद्यते तासां भयं कथं भवेदिति भावः। मोहो विचित्तता भीतिदुःखावेगानुचिन्तनैः। चूर्णमागाय प्रतनप्रमदादर्शनादियदिति दर्पणः ॥ ३२ ॥

जागर्त्तीति। तच्छायदृशां चाराद्दिं नलप्रतिबिम्बं पश्यन्तीनां चारुदृशां सुदृशां पुरा पूर्वं प्रतिबिम्बितनलदर्शनेन सत्वोदयाद्यः कम्पः सात्विकभावविशेषो जागर्त्ति अभूत् अनन्तरं तस्मिन्नले स्पृष्टे च संश्लिष्टे च यः कम्पो विससर्प वृद्धिं गतः दर्शनापेक्षया स्पर्शेन श्राविकसात्विकभावप्रयोजकत्वात् दर्शनप्रयुक्तकम्पापेक्षया योऽधिकोऽभवत् इत्यर्थः अनन्तरं गाढालिङ्गनपङ्क्त्या द्रुतं शीघ्रं द्रुते पला

द्रुतं द्रुते तत्पदशब्दभीत्या
स्खलितस्वान्तदृशां परं सः ॥ ३३ ॥
उल्लासयन्तीं स्पृष्टनताङ्गमङ्गं
तासां नखच्छायपिबापि दृष्टिः ।
अत्रैव रत्यास्तदनर्त्ति पत्या
स्वेदेऽप्यबोधं यदहर्षि रोम ॥ ३४ ॥

[यते तस्मिन् सकम्पः परं कौतुकं तस्य सदृशस्य दृशस्य पदशब्दभीत्या परस्परन्दाहृयेन स्खलितो दत्तचकाशतया ततः स्थिरीभवतीति भावत् न तु शृङ्गारोपगमेन तत्तिरोधानात् विवाहितहृदयर्थः कम्पोऽपि यथा शृङ्गारे तथा भयानकेऽपि सम्भवति तथाच भयानक रसविवेके दर्पणः प्रस्वेदरोमाञ्चकम्पादिप्रभेदवानस्य इति। शृङ्गारभयानकी द्वावपि तयोस्तासां जातावित्ति भावः । जागर्तीति सर्गक्रम्यादिना भूते लट् ॥ ३३ ॥

उल्लासयन्तीमिति ॥ रत्याः पत्या कामेन तासामन्तःपुरिकाणां स्पृष्टं नताङ्गं येन तादृशं सत् उल्लासयन्तीं हर्षवशात् पुष्टीक्रियतां तथा तासां नखच्छायपिबापि नखप्रतिबिम्बं पिबन्ती दृष्टिरपि चक्षुरपि उल्लासयन्तीं हर्षवशात् प्रसार्यन्तीं तच्चमत्कारं तावदेवमित्यर्थः किन्तु स्वेदेऽपि कर्त्तव्येऽपि अबोधं चैतन्यशून्यं यत्तत् रोम यदहर्षि हर्षितं विक्रियां प्रापितं तदत्रैव पाषाणवत् अनर्त्ति नर्त्तितः अचेतनस्य हर्षेण पाषाणवत्तत्तुल्यमित्यर्थः तत्र तस्मात्तासां रोमाञ्चोऽभूत् इति भावः । पिबतेर्व प्रमादे चेत्येव इति मत ॥ ३४ ॥

Digitized by Google

यस्मिन्नलस्पर्शकमेत्य दृष्टा
भूयोऽपि तं देशमगान्मृगाक्षी।
निपत्य तत्रास्य धरारजःस्थे
पदे प्रसीदेति शनैरवादीत्॥ २५॥
भ्रमन्नमुष्यामुपकारिकाया
मायस्य भैमीविरहात् क्रशीयान्।

यस्मिन्निति ॥ मृगाक्षी हरिणनयना काचित् स्त्री यस्मिन् देशे नलस्य स्पर्शकमालिङ्गनविशेषं एत्य प्राप्य दृष्टा सर्वैः प्राप्ता भूयोऽपि पुनरपि तं देशं अगात् आलिङ्गनलुब्धा सती जगाम तत्र गत्वा किं चकारेत्याह तत्र देशे धरारजःस्थे पृथ्वीधूलिस्थिते अस्य नलस्य पदे चरणचिह्ने निपत्य पतित्वा प्रसीद मयि प्रसन्नो भवेति शनैरितरजनाकर्णनशङ्कया मन्दं यथा तथा अवादीदुवाच। स्पर्शकं यथा। यत्रोपेतः संमुखमागताया अन्यापदेशाद्व्रजतो नरस्य। गात्रेण गात्रं घटते तदेतदालिङ्गनं स्पर्शकमाहुरार्य्या इति कामशास्त्रं ॥ २५ ॥

भ्रमन्निति ॥ असौ नलः अमुष्यामुपकारिकायां राजान्तःपुरे भ्रमन् भैमीं द्रष्टुमिच्छुः पर्य्यटन् सन् आयस्य आयासं प्राप्य सौध परम्परायां प्रासादश्रेणीनां उपत्यकासु आसन्नभूमिषु मुहुर्वारं वारं विश्राम्यन्तं विश्रामं आचरन्तं चलवान् अथमन्तःपुरप्रचारेऽप्यायासः मुहुर्मुहुर्विश्रामो वास्य भाव इति नलस्य हेतुगर्भविशेषणेनोपपादयति किम्भूतः सतो भैम्या विरहात् वियोगात् कृशीयान् अतिशयेन

असौ मुहुः सौधपरम्परायाः
माधत्त विश्रान्तिमुपत्यकासु ॥ २६ ॥
उल्लिख्य हंसेन दले नलिन्या
स्तस्मै यथादर्शि तथैव भैमी ।
तेनाभिलिख्योपहृतस्वहारा
कस्या न दृष्टाजनि विस्मयाय ॥ २७ ॥
कौमारगन्धीनि निवारयन्ती
वृत्तानि रोमावलिवेत्रचिह्ना ।

न पुनः श्रीमः प्रविश्य हि सञ्चरणकारेऽपि आयासो मुहुर्मुहु र्विश्रामस्य सम्भवत्येव ॥ २६ ॥

उल्लिख्येति ॥ हंसेन नलिन्याः पद्मिन्यादले पत्रे उल्लिख्य लिखित्वा तस्मै नलाय यथा भैमी अदर्शि दर्शिता तथैव तेन तत्र विश्रान्तेन नलेन अभिलिख्य भूम्यां चित्रयित्वा उपहृतः कण्ठेऽर्पितः स्वहारो निजमुक्ताहारो यस्यास्तादृशी चित्रमयी भैमी दृष्टा सती कस्या अन्तःपुरस्त्रियो विस्मयाय आश्चर्याय न अजनि न जाता अपि तु सर्व्वासामेव विस्मयाय जाता तथाभूतां तां दृष्ट्वा अहो कण्ठार्पित हारा केनाश्चर्यं भैमीप्रतिमूर्त्तिर्लिखितेति सर्व्वा एव विस्मिता जाता इत्यर्थः नलः परिश्रान्तोभूत्वा यत्र तत्रापि भैमीप्रतिमूर्त्तिं लिखित्वा मनोविनोदनं व्यदधादिति भावः ॥ २७ ॥

कौमारेति ॥ तेन नलेन सा भैमी भाविकत्वं सम्यक् लिखिता रेखाव द्भूता च चित्रभूता यौवनोन्मायां यौवनसम्बन्धिनां वारं विलक्षणीवि कारदर्शी अनन्यां परिचेतुमशीकरत् कामोऽभिलाषेऽयस्यास्तादृशी

साक्षिस्त्र तैर्मैत्त्रत यौवनीय
द्राःस्थामवस्थाम्परिचेतुकामा ॥ ९८ ॥
पथ्याः पुरन्ध्रीः प्रति सान्द्रचन्द्र
रजःकृतक्रीडकुमारचक्रे।

यौवनप्रारम्भे स्थिता शैशवयौवनयोः सन्धौ वर्त्तमानेत्यर्थः कलयव कौमारस्य शैशवस्य गन्धो लेशोऽपि विद्यते येषु तादृशानि कृतानि चेष्टितानि नयनाञ्चलादीनि कटिस्थौल्यादिचिह्नानि च निवारयन्ती परित्यजन्ती अथ च निषेधन्ती यतो रोमावलिरेव वेत्रं वेत्रयष्टिस्तदेव चिह्नं निषेधचिह्नं यस्यास्तादृशी अत्यापि वेत्रधारिणी पुरे स्थातुमिच्छतः कांश्चिन्निषेधति द्वारदेशोपस्थितांश्च कांश्चित् के यूयमिति परिचेतुमिच्छति वयःसन्धौ वर्त्तमाना भैमीं सिषिला अनुरामाद्दर्शेविभावः। कौमारगन्धीति अल्पार्थो चेत्यनेन इत्समासान्तः ॥ ९८ ॥

पथ्याइति ॥ सान्द्रं निविडं यच्चन्द्ररजः कर्पूरपरागस्तेन कृता क्रीडा खेला येन तादृशं कुमाराणां बालानां चक्रं समूहो यस्मिन् तादृशेऽध्वनि पथि तदङ्कितेलचरणस्य प्रतिमासु प्रतिकृतिषु वर्त्तमानं चक्रवर्त्तिचिह्नं सार्व्वभौमलक्षणं रेखारूपं चक्रं कर्तृ पथ्याविलोकयन्तीः पुरन्ध्रीः कुटुम्बिनीः स्त्रियः प्रति अभ्युदय चित्राणि चक्रे आश्चर्यातिशयं जनयामास बालक्रीडनस्थाने केन सार्व्वभौमेन विचरितमिति साश्चर्याः पुरन्ध्रीश्चकारेत्यर्थः चक्रचिह्नं हि चक्रवर्त्तिचरणस्व वर्त्तते चक्रवर्त्तिचिह्नाभिज्ञानं विवेकिनामेव प्राचीनस्त्रीणां भवतीति पुरन्ध्रीरित्युक्तं राजशिशूनां पार्थिवधूलिभिः क्रीडनमनुचितमिति तदर्थं शुभ्रे रजसि भ्राटति चिह्नाभिव्यक्त्यर्थं वा

चित्रास्ति चक्रोऽर्ध्वनि चक्रवर्त्ति
चिह्नस्तदङ्घ्रिप्रतिमासु चक्रं ॥ ३९ ॥
तारुण्यपुण्यामवलोकयन्त्यो
रन्योन्यमेणेक्षणयोरभिख्यां ।
मध्ये मुहूर्त्तं स बभूव गच्छ
न्नाकस्मिकाच्छादनविस्मयाय ॥ ४० ॥
पुरःस्थितस्य क्वचिदस्य भूषा
रत्नेषु नार्य्यः प्रतिविम्बितानि ।

चन्द्ररथइत्युक्तं । चक्रा इति चक्रादेशेत्येक इति दण्डः मत्स्। स्यात् कुटुम्बिनी पुरन्ध्रीति अथ कर्पूरमल्लियां घनसारचन्द्रसंज्ञ इति चक्रवर्त्ती सार्व्वभौम इति चामरः ॥ ३९ ॥

तारुण्येति ॥ तारुण्येन यौवनेन पुण्यां चार्व्वीं अन्योन्यं परस्पर सम्बन्धिनीं अभिख्यां शोभां अवलोकयन्त्योः पश्यन्त्योरेणेक्षणयोर्ह रिणनयनयोः स्त्रियोर्मध्ये मुहूर्त्तं क्षणमात्रं गच्छन् स नलः आकस्मि केन निष्कारणेन आच्छादनेन तिरोधानेन विस्मयाय आश्चर्य्याय बभूव अकस्मात्तिरोधानं दृष्ट्वा ते स्त्रियौ किमिदमेवं जातमित्याश्चर्य्यरसं प्राप्तवत्यौ इत्यर्थः । पुण्यन्तु चार्व्वपीत्यमरः ॥ ४० ॥

पुर इति ॥ नार्य्यः काश्चिदन्तःपुरसुन्दर्य्यः क्वचिद्देशे पुरोऽग्रे स्थित स्यास्य नलस्य भूषारत्नेषु भूषणरत्नेषु निजानि लोकानि प्रतिविम्बितानि सक्षकृत्वः सक्षवारं विक्षिप्य विक्षिप्य पुनः पुन र्विस्मयं प्राप्य व्योमनि आकाशे अपश्यन् ददृशुः प्रतिविम्बितं हि स्फटि कादिस्वच्छवस्तुनि दृश्यते न त्वाकाशे अस्माकं तनु आकाशेऽपि दृश्यते

व्योमन्यदृश्येषु निजान्यपश्यन्
विस्मित्य विस्मित्य सखस्तत्वः ॥ ४१ ॥
तस्मिन्विषज्यार्द्धपथात्तपातं
तदङ्गरागच्छुरितं निरीक्ष्य ।
विस्मेरतामापुरपि स्मरन्त्यः
क्षिप्तं मिथः कन्दुकमिन्दुमुख्यः ॥ ४२ ॥
पुंसि स्वभर्तृव्यतिरिक्तभूते
भूत्वाप्यनीक्षानियमव्रतिन्यः ।

किमेतदिति साश्चर्यं पुनःपुनर्ददृशुरित्यर्थः । प्रतिबिम्बितानीति भावे क्तः प्रतिबिम्बितानि रूपाणीति वा ॥ ४१ ॥

तस्मिन्निति ॥ इन्दुमुख्यश्चन्द्राननाः स्त्रियस्तस्मिन् विषज्य संसज्य तस्य नलस्य अङ्गरागेण विलेपनेन छुरितं लिप्तं सत् अर्द्धपथे अर्द्धमार्गे एव आत्तोऽवरुद्धो पातः पतनं येन तादृशं कन्दुकं निरीक्ष्य दृष्ट्वा मिथः परस्परं क्षिप्तं स्मरन्त्योऽपि अपिः समुच्चये स च दर्शनक्रियापेक्षया स्वयमेवास्माभिः क्षिप्त इति स्मृत्वा चेत्यर्थः विस्मेरतां सविस्मयतां आपुः प्राप्तवत्यः यस्मै क्षिप्तस्तमप्राप्य मध्ये संघटनयोग्यवस्तुनोऽभावादकस्मात् कथं पतितः कथंवाङ्गरागोऽमिलत्‌ इति साश्चर्या जाता इति भावः ॥ ४२ ॥

पुंसीति ॥ सखिष्वोऽष्टपत्न्यिः स्वभर्त्ता भीमभूपस्तस्माद्व्यतिरिक्तभूते भिन्नरूपे पुंसि पुरुषे या अनीक्षा अदर्शनं तस्यां यो नियमो स्वस्वभावलक्षणं व्रतं विद्यते यासां तथाविधा भूत्वापि भुवि मणिमयायां भूमौ छायासु प्रतिबिम्बेषु तस्य नलस्य रूपं सौन्दर्यं वीक्ष्य

छायासु रूपं भुवि वीक्ष्य तस्य
फलं दृशोरानशिरे मृगाक्ष्यः ॥ ४३ ॥
विलोक्य तच्छायमतर्कि ताभिः
पतिं प्रति स्वं वसुधापि धत्ते ।
यथा वयं किं मदनं तथैनं
त्रिनेत्रनेत्रानलकीलनीलं ॥ ४४ ॥

दृशा दृशोश्चक्षुषोः फलं साफल्यं आनशिरे प्रापुः सुन्दरवस्त्ववलोकनमेव नेत्रसाफल्यं प्रतिबिम्बस्य पुरुषलाभाभावात् अवाभक्षच तासां जात इति भावः । आनशिर इति अश्नुयातो लिटष्टरे अच्छादो नुर्दीर्घं चेति नुर्दीर्घश्च ॥ ४३ ॥

विलोक्येति ॥ ताभिर्महिषीभिर्भुवि तच्छायं नलस्य छायां विलोक्य दृष्ट्वा अतर्कि उत्प्रेक्षितं तर्कितमाह यथा वयं स्वं स्वीयं पतिं स्वामिनं भीमं प्रति मदनं कामं दधाहे तथा वसुधापि पृथिव्यपि किं स्वं पतिं भीमं प्रति एनं मूर्त्तं मदनं धत्ते धारयति तर्हि श्यामत्वमस्य कथमिति मदनं विशिनष्टि किम्भूतं त्रिनेत्रस्य त्रिलोचनस्य यो नेत्रानलो लोचनाग्निस्तस्य कीलेन ज्वालेन नीलं श्यामलं यथास्माकं मनसि गूढः पतिं प्रति कामो वर्त्तते तथा पृथिव्या अपि भूस्वामिनं प्रति मूर्त्तिमान् कामोऽयं वर्त्तते अन्यथा कथमकस्मादिदं मनोज्ञा छाया भूम्यां दृश्यत इति महिष्यस्तर्कयामासुरित्यर्थः । वह्नेर्द्वयोर्ज्वालकीलाविति अमरः ॥ ४४ ॥

रूपं प्रतिच्छायिकयोपनीत
मालोकि ताभिर्यदि नाम कामं ।
तथापि नालोकि तदस्य रूपं
हारिद्रभङ्गाय वितीर्णभङ्गं ॥ ४५ ॥
भवन्नदृश्यः प्रतिबिम्बदेह
व्यूहं वितन्वन्मणिकुट्टिमेषु ।

रूपमिति ॥ ताभिर्महिषीभिः प्रतिच्छायिकया छायारूपप्रतिकृत्या उपनीतं उपस्थापितं रूपं नलस्य स्वरूपं यदि नाम यद्यपि काम मत्यर्थं आलोकि दृष्टं तथापि तत् अतिप्रसिद्धं अस्य नलस्य रूपं वर्णो नालोकि न दृष्टं किम्भूतं हारिद्रभङ्गाय हरिद्राच्छेदाय सुवर्णखण्डाय वा वितीर्णो दत्तो भङ्गः पराजयो येन तादृशं अतिगौर मित्यर्थः केवलं छायामात्रं दृष्टा ता अतितरां दृष्टा इत्यर्थः अत्र रूपं आलोकि रूपं नालोकीति विरोधः तद्भङ्गस्तु रूपशब्दयोः स्वरूपवर्णार्थकतया । हरिद्रारङ्गे हारिद्रं सुवर्णेऽपि तथेष्यत इति भङ्गस्तरङ्ग रुग्भेदे भङ्गो जयविपर्यये । भङ्गः खण्डेऽपि चाख्यात इति च विश्वः ॥ ४५ ॥

भवन्निति ॥ वियोगी विरहवान् स राजा नलः योगीव मुनिरिव अदृश्यो देवानां वरदानादप्रत्यक्षविषयो भवन् तथा मणिकुट्टिमेषु मणिबद्धभूमिषु प्रतिबिम्बदेहव्यूहं प्रतिच्छायिरूपदेहसमूहं वितन्वन् विस्तारयन् तथा परस्य भीमस्य पुरं नगरं गृहोपरिगृहं वा प्रविशन् चित्रमाश्चर्यं रराज शुशुभे अन्यो योगी च सिद्धिवशात् अदृ

Digitized by Google

पुरं परस्य प्रविशन्वियोगी
योगीव चित्रं स रराज राजा ॥ ४६ ॥
पुमानिवास्पर्शि मया भ्रमन्त्या
छाया मया पुंस इव व्यलोकि ।
ब्रुवन्निवाताकि मयापि कश्चि
दिति स्म स स्त्रैणगिरः शृणोति ॥ ४७ ॥
अम्बां प्रणत्योपनता नताङ्गी
नलेन भैमी पथि योगमाप ।

यो भवति कायव्यूहं करोति परस्य च पुरं शरीरं प्रविशति विसवी
भ्योविरक्तत्वाद्वियोगी च भवति । अथ च वियोगी भूत्वापि यत् यो
गीव संयोगीव रराज तच्चित्रमिति ध्वनिः । पुरं पाटलिपुत्रे स्या
द्गृहोपरिगृहेपुरं । पुरं पुरि शरीरे चेति विश्वः ॥ ४६ ॥

पुमानिति ॥ स नल इति स्त्रैणगिरः स्त्रीसम्बन्धवचनानि शृणोति
स्म शुश्रुवान् इतिपदोपस्थाप्यमाह भ्रमन्त्या अङ्गने विचरन्त्या
मया पुमानिव कश्चित् पुरुष इव अस्पर्शि स्पृष्टः इत्येकस्या वचनं
मया पुंस इव पुरुषस्येव छाया प्रतिबिम्बं व्यलोकि दृष्टा इत्यन्यस्या
वचनं मयापि ब्रुवन्निव किंचित् कथयन्निव कश्चित्पुरुषोऽवर्कि तर्कित
इत्यपरस्यावचनं पुंसां स्पर्शनप्रतिबिम्बकथनानां स्त्रीणामपेक्षया
वैलक्षण्यात्सूच्यन्ते तासां तथाविधा गिरः ॥ ४७ ॥

अथ भैमीनलौ पथि मिलितावपि परस्परं नावबुध्यतः सेत्याह ॥
अम्बामिति ॥ अम्बां मातरं प्रणत्य प्रणम्यैव भक्तिप्रह्वाविनयेन नता

स भ्रान्तिभैमीं विविचे न तां च
सा तं च मोहप्रसृतया ददर्श ॥ ४८ ॥
प्रसूप्रसादाधिगता प्रसून
माला नलस्योद्भ्रमवीक्षितस्य ।
क्षिप्तापि कण्ठाय तयोपकण्ठ
स्थितं तमालम्बत सत्यमेव ॥ ४९ ॥
भ्रम्यासनादृष्टजनप्रसादः
सत्येयमित्यद्भुतमाप भूपः ।

उपनता प्रतिबिम्बिता नलाङ्गी सुन्दराङ्गी भैमी पथि स्वान्तःपुरगमन वर्त्मनि नलेन सह योगं सम्बन्धं प्राप प्राप्तवती किन्तु स नलः भ्रान्ति भैमीं तन्मयत्वाख्यकामदशया भ्रमविषयिणीं भैमीं तां च वास्तवीं भैमीञ्च न विविचे न पृथक्कर्तुं शशाक भेदने शक्तोऽपि नलो भ्रान्त्या प्रतारिततया नलभ्रान्तिकभैम्यामपि न विश्वासं अलब्धवानि त्यर्थः सा च भैमी च तं नलं मोहप्रसृतया न ददर्श दृष्टवती ॥ ४८ ॥

प्रस्विति ॥ यथा भैम्या उद्भ्रमवीक्षितस्य भ्रान्त्या विलोकितस्यापि नलस्य कण्ठाय गलमुद्दिश्य क्षिप्ता प्रसूप्रसादाधिगता मातृप्रसादलब्धा प्रसूनमाला कुसुममाला सत्यमेव वास्तविकमेव उपकण्ठं समीपे स्थितं तं नलं नलकण्ठं वा आलम्बत अभजत अतिमनोज्ञेयं मातृदत्ता माला नलयोग्येति निश्चित्य भैम्या भ्रान्तिविषयनलाय दत्तापि सा वास्तविकसमीपस्थनलकण्ठ एव लग्नेत्यर्थः ॥ ४९ ॥

भ्रमीति ॥ भूपो नलः भ्रासनादृष्टस्य मनोरथोपनीतस्य भ्रमविषय स्य वा भैमीविषयस्य जनस्य प्रसादरूपेयं स्रक् माला सत्या न त्वलीका

Digitized by Google

च्छिन्नामदृश्यत्वमिताञ्च मालां
मालोक्य तां विस्मयते स्म बाला ॥ ५० ॥
अन्योन्यमन्यत्रवदीक्षमाणौ
परस्परेणाध्युषितेऽपि देशे ।

इति अद्भुतं आश्चर्य्यं आप प्राप्तवान् अलीकेन दत्तं वस्तु अलीकमेव भवतीति सर्व्वत्र दृष्टं अत्र तु तद्विपरीतं दृश्यते किमेतदित्याश्चर्य्यं लभते स्मेत्यर्थः बाला भैमी च अलीकनलकण्ठाय च्छिन्नां तां मालां अदृश्यत्वं इतां प्राप्तां आलोक्य निरीक्ष्य विस्मयते स्म विस्मयं लभते स्म अलीकनलकण्ठच्छिन्ना माला भूमौ कथं न दृश्यते कुत्रागच्छिवा गता किमिदं जातमित्याश्चर्य्यं प्राप्तवतीत्यर्थः ॥ ५० ॥

अन्योन्यमिति ॥ तौ भैमीनलौ आलिङ्गितं यत् अलीकमसत्यरूपं परस्परं तथान्तर्मध्ये तथ्यमपि सत्यमपि मिथः परस्परं परिरम्भ जाते आलिङ्गितवन्तौ । तयोरपि तन्मयतया परस्परालीकालिङ्गन सत्वयोः सत्यरूपमप्याप्यालिङ्गनं जातमिति भावः ननु कथं वास्तविके ऽप्यलीकबुद्धिरिति विशेषणेन सङ्गमयति किम्भूतौ वास्तविकेन परस्परेण अध्युषितेऽधिष्ठिते देशेऽपि अन्यत्रवत् परस्परानध्युषितदेशे इव अन्योन्यं परस्परं ईक्षमाणौ विलोकयन्तौ यथा अन्योन्यानधिष्ठिते देशे भ्रमवशात्तावन्योन्यं दृष्टवन्तस्तथा अन्योन्याध्युषितेऽपि देशे पश्यन्तावित्यर्थः भ्रान्त्या मदनः प्रतारितत्वात् सत्यरूपेऽपि न अब बतुरिति भावः । केचित्तु आलिङ्गितमाश्रितमलीकमसत्यं येन तौ

आलिङ्गिताचीकपरस्परान्त
स्तथ्यं मिथस्तौ परिषस्वजाते ॥ ५१ ॥
स्पर्शन्तमस्याधिगतापि भैमी
मेने पुनर्भ्रान्तिमदर्शनेन ।
नृपः स पश्यन्नपि तामुदीत
स्तम्भान धर्त्तुं सहसा शशाक ॥ ५२ ॥
स्पर्शातिहर्षादृतसत्यमत्या
प्रवृत्य मिथ्यामतिलब्धबाधौ ।

दृशं परस्परस्य अन्तर्हृदयं यत्र क्रियायां तद्यथा स्यात्तथेति व्याख्यातं ॥ ५१ ॥

स्पर्शमिति ॥ भैमी अस्य नलस्य तं स्पर्शं अधिगतापि प्राप्ता सत्यपि अदर्शनेन नलस्यानवलोकनेन पुनर्भ्रान्तिं मेने निश्चिनोति स्म यद्ययं नलस्पर्शः स्यात्तदा नलोऽपि चाक्षुषविषयः स्यात् उद्भूतस्पर्शवतस्तस्य चक्षुषापि ग्रहीतुं युक्तत्वात्तस्माद्भ्रम एवायमिति निश्चिकायेत्यर्थः तथा नृपो नलस्तां सत्यभूतां भैमीं पश्यन्नपि सहसा झटिति उदीत उद्गतः स्तम्भः सात्त्विकभावविशेषो यस्य तादृशः सन् तां धर्त्तुं गाढमालिङ्ग्य स्थगयितुं न शशाक न समर्थो बभूव स्पर्शसुखमनुभूय सत्त्वोदयाच्चिकेष्टो बभूवेति भावः। उदीतेति इंगताविलस्य रूपं ॥ ५२ ॥

स्पर्शेति। तौ भैमीनलौ स्पर्शेन जनितो योऽतिहर्षो निरतिशय सुखं तेन आदृता अङ्गीकृता या सत्यमतिः अलीकस्येदृकसुखजनन सामर्थ्याभावात् सत्य एवायं स्पर्श इति सत्यबुद्धिस्तया पुनरप्यालिङ्गनादौ प्रवृत्य जातप्रवृत्तिर्भूत्वा यद्वि पुनर्मिथः परस्परं तथ्यं सत्यं

Digitized by Google

पुनर्म्मिथस्तथ्यमपि स्पृशन्तौ
न श्रद्दधाते पथि तौ विमुग्धौ ॥ ५३ ॥
सर्व्वत्र संवादमबाधमानौ
रूपश्रियातिथ्यकरं परन्तौ ।
न शेकतुः केलिरसाद्विरन्तु
मलीकमालोक्य परस्परन्तु ॥ ५४ ॥

स्पृशन्तावपि अनन्तरं आलाभ्यागमनादर्शनाभ्यां स्पर्शाभावे सति मिथ्यामत्या भ्रान्त्यालब्धौ बाधः सत्यस्पर्शस्याप्रामाण्यं याभ्यां तादृशौ सन्तौ न श्रद्दधाते वास्तविकोऽयं स्पर्शइति अत्रां न प्राप्तवन्तौ कथं वास्तविके मिथ्यात्वग्रह इति विशेषणेनोपपादयति विमूढौ विमुग्धौ विशेषेण मूढौ अथच सुन्दरौ ॥ ५३ ॥

एवं सत्येऽप्यलीकभ्रान्तिं दर्शयित्वा संप्रत्यलीकेऽपि सत्यभ्रान्तिं दर्शयन्नाह ॥ सर्व्वत्रेति ॥ तौ भैमीनलौ अलीकन्तु अलीकमपि बाधित स्वरूपमपीति यावत् परस्परमन्योन्यं कर्म्मभूतमालोक्य सत्यत्वेन भ्रमविषयीकृत्य केलिरसात् आलिङ्गनादिक्रीडासुखाद्विरन्तुं विरतिं प्राप्तुं न शेकतुर्न समर्थौ बभूवतुः कथमलीकेऽपि तयोर्विश्वास इति कर्त्तकर्म्मणोर्विशेषणेनोपपादयति सर्व्वत्र वस्तुषु विषयेषु संवादं संवादार्हं दर्शनस्पर्शनादिना यथाश्रुतमुपपद्यमानं तथा रूपश्रिया यथाश्रुतं श्रूयमाणया सौन्दर्य्यशोभया परमतिशयेन आतिथ्यकरं सौख्यकरं तत्तद्रूपेण प्रत्यक्षविषयत्वमुपगतम्वा परस्परं अबाधमानौ सत्यत्वेन मन्यमानौ संवादमिति क्वचित् पाठस्तत्र संवादमबाधमानौ विरुन्धयः क्वचिच्च तथ्यकरमिति पाठस्तत्र रूपश्रिया तथ्यकरं सत्यबुद्धिजनकमित्यर्थः ॥ ५४ ॥

Digitized by Google

परस्परस्पर्शरसोर्म्मिसेका
त्तयोः क्षणञ्चेतसि विप्रलम्भः ।
स्नेहातिदानादिव दीपिकार्च्चि
र्निमिष्य किञ्चिद्द्विगुणन्दिदीपे ॥ ५५ ॥
वेश्मान सा धैर्य्यवियोगयोगा
द्बोधञ्च मोहञ्च मुहुर्द्दधाना ।

परस्परेति ॥ परस्परस्पर्शेन अन्योन्यालिङ्गनेन जनितो यो रसो ऽनुरागस्तस्योर्म्मिस्तरङ्गस्तेन सेकात् सेचनात् अनुरागाधिक्यप्रवर्त्तना दित्यर्थः तयोर्भैमीनलयोश्चेतसि वर्त्तमानो विप्रलम्भः पूर्व्वरागाख्य शृङ्गारभेदो वियोगः क्षणं व्याप्य किञ्चिदीषन्निमिष्य मन्दीभूय पूर्व्वापेक्षया द्विगुणं यथा तथा दिदीपे वद्धे । उपमिनोति स्नेहाति दानादिव स्नेहस्य तैलस्य अतिदानात् बहुप्रक्षेपाद्यथा दीपिकार्च्चिर्दी पशिखा क्षणं व्याप्य किञ्चिन्निमिष्य द्विगुणं दीप्यते तथा । विप्रलम्भो हि संयोगपूर्व्वकोऽतितरां दुःखयतीति भावः ॥ स्नेहः स्यात् पुंसि तैलादिरसद्रवे च सौहृद इति मेदिनी ॥ ५५ ॥

वेश्मेति ॥ सा दमयन्ती धैर्य्यवियोगयोर्योगात् सम्बन्धात् क्रमेण बोधं कथमेवं सम्भवतीति सम्यक् ज्ञानञ्च नलएवायमिति मोहं मिथ्याज्ञानञ्च मुहुः प्रतिक्षणं दधाना सती धैर्य्याद्बोधं वियोगान्मो हञ्च धारयन्ती सती वेश्म निजगृहं आप प्राप्तवती । स नलः उद्भ्र मेण उद्भ्रमात्मा तां सुभ्रुवं पुरोऽग्रे पुनःपुनर्व्वारंवारं पश्यन् सन् तत्रैव बभ्राम गतायामपि भैम्यां भ्रमीभवद्भ्रमायास्तस्या दर्शनादावि

Digitized by Google

पुनः पुनस्तत्र पुरः स पश्यन्
बभ्राम तां सुभ्रुवमुद्भ्रमेण ॥ ५६ ॥
पश्यां नृपः सञ्चरमाण एष
चिरं परिश्रम्य कथङ्कथञ्चित् ।
विदर्भराजप्रभवाभिरामं
प्रासादमभ्रङ्कषमाससाद ॥ ५७ ॥
सखीशतानां सरसैर्विलासैः
स्मरावरोधभ्रममावहन्तीं ।

ज्ञानादिप्रत्याशया तत्रैव सञ्चचारेत्यर्थः । चकारयमुभयप्राधान्यसूचकं ॥ ५६ ॥

अथ नलस्य भैमीगृहागमनमाह ॥ पश्यामिति ॥ पश्यां न तु स्व-च्छन्देन सञ्चरमाणोविप्रलम्भमोहवशादितस्ततः परिभ्रमन्नेष एषो नलश्चरणसञ्चरणेन चिरं परिभ्रम्य परिश्रमं प्राप्य कथं कथञ्चिदति कष्टेन विदर्भराजप्रभवाया भैम्या अभिरामः सख्यादिभिः सह क्रीडा यत्र तादृशं विदर्भराजप्रभवया अभिरामं सुशोभितं वा अभ्रंकषमत्युन्नतत्वाद्गगनलग्नशिखरं प्रासादं आससाद प्राप्तवान् मोहवशेनेतस्ततः परिभ्रमन्नाद्भैमीगृहं प्राप्तवान् न तु बुद्धिपूर्वक-मिति भावः । सञ्चरमाणइति सञ्चरस्तृतीयायुक्तादित्यात्मनेपदं अभ्रं-कषमिति कूलाभ्रकरीषाच कष इति खः ॥ ५७ ॥

तत्र स्थितः नलस्य भैमीसभावलोकनमाह ॥ सखीति ॥ स नलस्तस्य प्रासादस्य मध्ये रथ्यायां परिसरदेशे वर्त्तमाना या अलिवेदिका

विलोकयामास सभां स भैम्या
स्तस्य प्रतोलीमणिवेदिकायां ॥ ५८ ॥
कण्ठः किमस्याः पिकवेणुवीणा
स्तिस्रोजिताः सूचयति त्रिरेखः।
इत्यन्तरस्तूयत यत्र काचि
न्नलेन बाला कलमालपन्ती ॥ ५९ ॥

मणिबद्धपरिष्कृतभूमितलायां भैम्याः सभां विलोकयामास ददर्श किं भूतां सखीभूतानां सखीसमूहानां सरसैः शृङ्गाररसवद्भिर्विलासैर्विभ्रमैः स्मरावरोधभ्रमं कन्दर्पस्यान्तःपुरभ्रान्तिं आवहन्तीं जनयन्तीं सखीनां रतितुल्यत्वात् कामान्तःपुरमिदमिति नलस्य भ्रान्तिं कुर्वंतीमित्यर्थः। स्मरोऽत्रैव वसतु इति नलस्य भ्रमं आवहन्तीं वा ॥ ५८ ॥

अथ पञ्चदशभिः श्लोकैः कुलकेन सभां विशिनष्टि ॥ कण्ठइति ॥ यत्र सभायां कलं मधुरास्फुटं यथा तथा आलपन्ती रागालापं कुर्वती काचिद्बाला भैमीसखी नलेन अन्तर्मनसि इत्येवं अस्तूयत स्तुता इति किं अस्याबालायास्त्रिरेखायम् तादृशः कण्ठोगलस्तिस्रः पिकवेणुवीणा जिताः स्वराद्यत्वेन पराभूताः किं सूचयति ज्ञापयति स्वावस्थितेन सुलक्षणरूपेण रेखात्रयेण कोकिलवंशवीणानां त्रयं मया जितमिति किं कथयतीत्यर्थः एवमस्तूयत सभायां कम्बुग्रीवावतीं मधुरस्वरमालपन्तीं काचिद्दृष्ट्वा तुतोषेति भावः। रेखात्रयाङ्कितग्रीवा कम्बुग्रीवेति कथ्यत इति सामुद्रकं ॥ ५९ ॥

Digitized by Google

एतं नलं तं दमयन्ति पश्य
त्यजार्त्तिमित्यालिकुलप्रबोधान् ।
श्रुत्वा स नारीकरवर्त्तिशारी
मुखात् स्वमाशङ्कत यत्र दृष्टं ॥ ६० ॥
यत्रैकयालीकनलीकृतालौ
कण्ठे मृषाभीमभवीभवन्त्या ।

एतमिति ॥ यत्र सभायां स नलः नार्य्याः कस्याश्चिद्भैमीसख्याः करवर्त्तिनी हस्ते वर्त्तमाना या शारी शारिका पक्षिविशेषः तस्यामुखात् हे दमयन्ति यदर्थे पीडितासि तं एतं अग्रे वर्त्तमानं आगतं वा नलं पश्य आर्त्तिं पीडां मूर्च्छारूपां त्यज इति आलिकुलस्य सखीसमूहस्य प्रबोधान् सान्त्वनवादान् श्रुत्वा सखीभिः शारिकया वा दृष्टं दर्शनविषयतां गमितं स्वमात्मानं आशङ्कत आशङ्कितवान् किमेताभिर्दृष्टोऽहं कथमन्यथा शारिका एवं कथयतीत्याशङ्का स्वववानित्यर्थः यदा यदा भैमीमूर्च्छिताभूत् तदा तदा कथमपि मूर्च्छामपनेतुमशक्ता भैमीसख्यो मिथ्याभूतानपि यान् एतं नलमित्यादिसान्त्वनवादानूचुस्तान् शिक्षिता शारिकाऽपि मध्ये मध्ये कथयन्ति स्म तु वरामेवमजानतो नलस्य तादृशशारीवचनश्रवणात् स्वदर्शनाशङ्का भवितुमुचिता ॥ ६० ॥

यत्रेति । यत्र सभायां तथादृश्यस्य नलस्य दृक्पथे सम्मुखे नलाभीमभवीभवन्त्या अलीकभैमीभवन्त्या भैमीरूपं धारयन्त्या एकया सख्या अलीकनलीकृता असत्यनलाकारीकृता नलरूपधारिणी या

Digitized by Google

तद्दृक्पथे दौर्हृदिकोपनीता
श्यालीनमाधायि मधूकमाला ॥ ६१ ॥
चन्द्राभमाभ्रन्तिलकं ददाना
तद्वन्निजास्येन्दुकृतानुबिम्बं।
सखीमुखे चन्द्रसखे ससर्ज्ज
चन्द्रानवस्थामिव कापि यत्र ॥ ६२ ॥

आली सखी तस्याः कण्ठे दौहृदिकेन अभिलाषेण उपनीता अनेनानीता यद्वा वृक्षाणां दोहदं वेत्तीति दौहृदिकेन मालाकारेण उपनीता मधूकस्य कुसुमविशेषस्य माला स्रक् श्यालीनं सलज्जं यथा तथा आधायि अर्पिता भैमीसन्तोषाय सखीभिरेवं क्रीडा कृतेति भावः ॥ ६१ ॥

चन्द्राभमिति। यत्र सभायां कापि भैमीसखी चन्द्रसखे चन्द्रतुल्ये सखीमुखे चन्द्रस्येव आभा शोभा यस्य तादृशं आभं अभ्रमति रक्तवस्तुविशेषस्तत्सम्बन्धि तिलकं ललाटाभरणं ददाना अर्पयन्ती सती चन्द्रस्य अनवस्थां इयत्तयानवधारणं बाहुल्यं वा अथ च दुरवस्थत्वं ससर्ज्जेव चकारेव किम्भूतं तिलकं तद्वत् चन्द्राकाराभ्रतिलकयुक्तं निजं स्वीयं यदास्यं मुखं तदात्मकेनेन्दुना चन्द्रेण कृत मनुबिम्बं प्रतिबिम्बं यत्र तादृशं चन्द्राकारतिलकयुक्तस्वीयमुखचन्द्रेकृतमनुबिम्बं येनेति वा तिलकदात्रीमुखतिलकयोस्तत्सखीमुखतिलकयोश्च चन्द्रतुल्यत्वाद्बहवश्चन्द्रा भूता इत्यर्थः यदसु बहुतरं भवति तल्लोके एतस्य दुरवस्था आवेत्युक्ता न बहु मन्यते ॥ ६२ ॥

Digitized by Google

दलोदरे काञ्चनकेतकस्य
क्षणान्मसीभावुकवर्णलेखं ।
तस्यैव यत्र स्वमनङ्गलेखं
लिलेख भैमी नखलेखनीभिः ॥ ६२ ॥
विलेखितुं भीमभुवो लिपीषु
सख्यातिविख्यातिमृतापि यत्र ।

दलोदर इति ॥ यत्र सभायां भैमी काञ्चनकेतकस्य सुवर्णकेतक कुसुमस्य दलोदरे पत्रगर्भे नखा एव लेखन्यस्ताभिः करणैस्तस्यैव नलस्यैव नलमुद्दिश्येत्यर्थः स्वं स्वीयं अनङ्गलेखं कामोपदिष्टं लिखनं प्राणनाथ चिरयसि चिरविरहिण्याः खलु गतप्राया भवदेकश रणाः प्राणा इत्यादिरूपं लिलेख लिखति स्म किम्भूतं लेखं क्षणात् क्षणमात्रेण मसीभावुका श्यामीभवनशीला वर्णानामक्षराणां रेखा यस्मिन् तादृशं विरहिणीभिः स्वीयभावसूचनार्थं प्राणेशाय . पत्रिका प्रेष्यते मध्या च वर्णा लिख्यन्ते केतकीपुष्पेषु नखलेखानां श्यामी भवनं स्वभावः ॥ ६२ ॥

विलेखितुमिति ॥ यत्र सभायां लिपीषु चित्रलिखनव्यापारेषु अति विख्यातिं अत्यन्तप्रसिद्धिं बिभ्रत्यपि तादृश्या अपि कुशलया भीष्यर्थं भैमीसख्या भीमभुवो भैम्या लीलाकमलं क्रीडापद्मं विलेखितुं चित्र यितुं अशाकि शक्तं किन्तु पाणिर्भैम्याः करो विलेखितुं नाशाकि तथा कर्णोत्पलं कर्णपूरीकृतनीलकमलं विलेखितुं अपारि पारितं नैव न पुनरक्षि भैम्याश्चक्षुर्विलेखितुं अपारि दमयन्त्याः करचरणं

अस्याकि लीलाकमलं न पाणि
रपारि कर्णोत्पलमपि नैव ॥ ६४ ॥
भैमीमुपावीणयदेत्य यत्र
कलिप्रियस्य प्रियशिष्यवर्गः ।
गन्धर्ववध्वः स्वरमध्वरीणा
तत्कण्ठनालैकधुरीणवीणाः ॥ ६५ ॥
नावा स्मरः किं स्मरभीतिगुप्ते
पयोधरे खेलति कुम्भएव ।

लीलाकमलकर्णोत्पलयोर्दयाप्यतिसुन्दरमिति विशेषेण लेखितुं न शक्तमिति भावः ॥ ६४ ॥

भैमीमिति॥ यत्र सभायां गन्धर्वाणां वध्वः पत्न्यएव कलिप्रियस्य कलहसन्तोषस्य नारदस्य प्रियशिष्यवर्गः प्रियशिष्यसमूहः एत्य आगत्य भैमीं उपावीणयत् वीणया उपागायत् किम्भूतः स्वरमधुना स्वरामृतेन अरीणं अरिक्तं पूर्णं यत्तस्या भैम्याः कण्ठनालं तेनैकधुरं वहतीत्येकधुरीणा तत्सदृशी वीणा यस्य तादृश्यः गन्धर्ववध्वः प्रथमं नारदेन वीणावादनमध्यापितास्तत्रातिनैपुण्याच्च तस्यातिप्रिया एवम्भूता अपि वीणावादने ततोऽप्यधिकं कौशलमभ्यसितुं तत्रागत्य भैमीं वीणयोपगायन्ति स्मेति भावः एतेन वीणारवादपि भैम्याः स्वरस्यातिमाधुर्य्यं सूचितं नालपदेन च भैमीमुखस्य कमलत्वं सूचितं । उपावीणयदिति णिजन्तात् वीणया उपगानादाविति णिच् ॥ ६५ ॥

नावेति॥ यत्र सभायां परस्परसम्भोगार्थमन्योन्यवञ्चको यो नवाङ्गनावर्गस्तेषु मध्ये कश्चिन्नायकः स्वनायिकायाः स्तनौ वाहुभ्यां निपीड्य कापि सखी

इत्यर्द्धचन्द्राभनखाङ्कचुम्बि
कुचा सखी यत्र सखीभिरूचे ॥ ६६ ॥
स्मराशुगीभूय विदर्भसुभ्रू
वक्षोयदक्षोभि खलु प्रसूनैः ।
स्रजं सृजन्त्या तदबोधि तेषु
यत्रैकया सूचिशिखां निखाय ॥ ६७ ॥
यत्रावदत्तामतिभीय भैमी
त्यज त्यजेदं सखि साहसिक्यं ।

सखीभिरिति ऊचे सर्परिहासमुक्ता इति किं हे सखि स्मरः कामो हराद्धरनयनानलाद्वा भीतिर्दाहभयं तस्या हेतोरात्मानं गोपाय तीति हरभीतिगुप् एवम्भूतः सन् ते तव पयोधरे स्तनकलशे अथ च जलाधारभूते कुम्भ एव कलश एव किं नावा नौकया खेलति क्री डति इत्यूचे किं वितर्के नखाङ्कस्य अर्द्धचन्द्राकारत्वान्नौकात्वं युक्तं अन्योऽ नलदाहभीतो निश्चितं जलप्रधानदेशं आश्रित्य नौकामारुह्य खेलति । हरभीतिगुबिति क्विबन्तं ॥ ६६ ॥

स्मरेति ॥ प्रसूनैः पुष्पैः स्मराशुगीभूय कामस्य शरीभूय विदर्भ सुभ्रुवो भैम्या वक्षोयदक्षोभि क्षोभितं तत् भैमीवक्षःक्षोभजन्यं वैरं यत्र सभायां तेषु प्रसूनेषु सूचिशिखां सूच्यग्रं निखाय आरो प्य स्रजं मालां सृजन्त्या ग्रथ्नन्त्या एकया भैमीसख्या अबोधि बोधितं खलूत्प्रेक्षते तेषु सूचिशिखानिखननरूपशस्त्रप्रहारादैरनिर्यातनं कृत मिवेत्यर्थः यत्र काचिन्मालां ग्रथ्नन्तीति भावः ॥ ६७ ॥

यत्रेति ॥ यत्र सभायां भैमी अतिभीय अत्यन्तं भयं प्राप्य तां स्रजं सृजन्तीं सखीं अवदत् उवाच किमुवाचेत्याह हे सखि इदं साहसिक्यं

Digitized by Google

त्वमेव कृत्वा मदनाय दत्से
बाणान् प्रसूनानि गुणेन सज्जान् ॥ ६८ ॥
आलिख्य सख्याः कुचपत्रभङ्गी
मध्ये सुमध्या मकरीं करेण ।
यत्रालपत्तामिदमालि यानं
मन्ये त्वदेकावलिनाकनद्याः ॥ ६९ ॥

साहसकर्म्मं मारणात्मकमधर्मनिष्ठापकं त्यज त्यज मुञ्च मुञ्च साहसिकत्वमेवाह प्रसूनानि पुष्परूपान् बाणान् गुणेन सूत्रेण अथच मौर्व्या सज्जान् सन्नद्धान् कृत्वा त्वमेव मदनाय कामाय दत्से ददासि मम सखी भूत्वापि मत्पीडकाय कामाय मौर्व्वीसन्नद्धान् बाणान् ददासीति महाननयस्तदिदं झटिति परित्याज्यमित्यर्थः कुसुममालायां मौर्व्वीसन्नद्धकामबाणभ्रान्त्या भैम्या अतितरां भयं जातमिति भावः ॥ ६८ ॥

आलिख्येति ॥ सुमध्या क्षीणमध्यभागा काचिद्भैमीसखी सख्याः कुचयोः स्तनयोर्वर्त्तमाना या पत्रभङ्गी पत्रावलिस्तस्या मध्ये करेण हस्तेन मकरीं जलजन्तुविशेषस्त्रियं आलिख्य सम्यक् लिखित्वा यत्र सभायां तां सखीमिति आलपत् अवदत् इति किं हे आलि सखि तव या एकावलिरेकयष्टिकमुक्ताहारभेदस्तद्रूपाया नाकनद्या गङ्गाया इदं मकरीलक्षणं यानं वाहनं मन्ये उत्प्रेक्षे इयमिति पाठे यानमिति प्रथमान्तं पदं इयं मकरी यानं इत्यहं मन्य इतीति शब्दाध्याहारेणान्वयः स्वच्छत्वादेकावल्या नाकनदीत्वं हारसमीपे मकर्य्या विद्यमानत्वात्तस्या नाकनदीवाहनत्वेनोत्प्रेक्षितं गङ्गा मकरवाहिनीत्यागमः । एकावल्येकयष्टिकेत्यमरः ॥ ६९ ॥

Digitized by Google

तामेव सा यत्र जगाद भूयः
पयोधियादः कुचकुम्भयोस्ते ।
सेयं स्थिता तावकहृच्छयाङ्क
प्रियास्तु विस्तारयशःप्रशस्तिः ॥ ७० ॥
शारीश्चरन्तीं सखि मारयैता
मित्यक्षदाये कथिते कयापि ।

तामिति ॥ यत्र सभायां सा चित्रकारिणी सुमध्या भूयः पुन रपि तामेव सखीं जगाद उवाच किं जगादेत्याह हे सखि ते तव कुचकुम्भयोरतिपीनस्तनयोर्विस्तारयशसः पीवरत्वकीर्त्तेः प्रशस्तिः प्रशंसिकेव स्थिता कुचयोर्मध्ये वर्त्तमाना पयोधेः समुद्रस्य यादोज लजन्तुभेदः सेयं मकरी तावकहृच्छयस्य त्वदीयहृदयस्थितस्य काम स्य अङ्कं चिह्नं कामस्य मकरध्वजत्वात् ध्वजरूपो मकर इत्यर्थस्तस्य प्रिया भार्य्येश्वरी अस्तु भवतु मकरध्वजस्य हृदयस्थितत्वेन तद्ध्वजस्या पि मकरस्य हृदयस्थितत्वात् हृदयस्थितमकर्य्यास्तत्प्रियात्वसम्भावनं युक्ततरञ्च या हि समुद्रे वसति सा तं विहाय त्वत्कुचयोः स्थिता तर्हि तदपेक्षया अनयोः पीवरत्वं सहस्रतरमेवेति मकर्य्याःस्तनवि स्तारयशःप्रशस्तित्वं । प्रायस्तु विस्तारयशःप्रशस्तेर्विधेयत्वं वदन्ति ॥ ७० ॥

शारीमिति ॥ हे सखि चरन्तीं गृहाद्गृहान्तरं गच्छन्तीं अथ च भक्षयन्तीं एतां शारीं अक्षोपकरणगुटिकां अथ च पक्षिविशेषं मारय निष्फलां कुरु अथ च विनाशय इत्यनेन कयाचित् भैमी सख्या अक्षदाये पाशकदाने कथिते सति यत्र सभायां स नलः

Digitized by Google

यत्र स्वघातभ्रमभीरुशारी
काकूत्थसाकूतहसः स जज्ञे ॥७१॥
भैमीसमीपे स निरीक्ष्य यत्र
ताम्बूलजाम्बूनदहंसलक्ष्मीं ।
कृतप्रियादूत्यमहोपकार
मरालमोहद्रढिमानमूहे ॥७२॥

स्वघातस्य निजमारणस्य यो भ्रमो द्वितीयार्थस्य यद्वशात् मामेव हन्तुं कथयतीति भ्रान्तिस्तेन भीरुः सभया या शारी पक्षिविशेष स्तस्या या काकुर्ध्वन्युक्तिस्तया उत्थ उत्थितस्तस्या उत्थेन उत्थानेन वा साकूतः साभिप्रायो हसो हास्यं यस्य तादृशो जज्ञे जातः । शारी पाशोपकरणे तथा शकुनिकान्तरे इति दायो दाने यौतुकादि धने इति च विश्वः । चरन्तीमिति चरगतौ भक्षणे चेत्यस्य रूपं ॥७१॥

भैमीति ॥ यत्र सभायां स नलो भैमीसमीपे ताम्बूलस्य यो जाम्बूनदहंसः स्वर्णमयहंसः स्वर्णनिर्म्मितहंसाकारताम्बूलपात्रमित्यर्थः तस्य लक्ष्मीं शोभां निरीक्ष्य दृष्ट्वा अतः प्रियादूत्यलक्षणो महानुपकारो येन तादृशो यो मरालो राजहंसस्तस्मिन् यो मोहो भ्रान्ति स्तस्य द्रढिमानं दार्ढ्यं ऊहे दधौ नलस्य ताम्बूलजाम्बूनदहंसे मम दूतः स हंस एवायमिति दृढतरो भ्रमो जात इत्यर्थः । मरालो राजहंसे स्याद्धंसमात्रेऽपि दृश्यत इति बलः ॥ ७२ ॥

Digitized by Google

तस्मिन्नियं सेति सखीसमाजे
नलस्य सन्देहमथ व्युदस्यन्।
अपृष्ट एव स्फुटमाचचक्षे
स एव रूपातिशयः स्वयन्तां ॥ ७३ ॥
भैमीविनोदाय मुदा सखीभि
स्तदाकृतीनां भुवि कल्पितानां।

अथ नलस्य भैमीनिश्चयमाह ॥ तस्मिन्निति ॥ अथानन्तरं स प्रसिद्धः कोऽपि लोकोत्तरो भैम्या रूपातिशयः इतरापेक्षया सौन्दर्याधिक्यं अपृष्ट एव आसु कतमा भैमी कथ्यतामिति नलेनापृष्टोऽपि स्वयमात्मनैव तां भैमीं स्फुटं व्यक्तं यथा तथा आचचक्षे इयं भैमीति ज्ञापयामास तथाविधरूपातिशयेन नल इयमेव भैमीति निश्चिनोतीत्यर्थः निश्चयः संशयापनोदनपूर्वको भवतीति संशयापनोदनमाह किम्भूतो रूपातिशयः तस्मिन् सखीसमाजे सखीसमूहे सा भैमी इयं इति नलस्य सन्देहं सखीसमाजात् अयं भैमी इयमियमेति संशयमित्यर्थः व्युदस्यन् निराकुर्वन् नलस्य प्रथमं सखीसमूहदर्शनात्तासु भैमी इयमियमेति सन्देहो जातः अनन्तरमलौकिकसौन्दर्यातिशयदर्शनाद्भैम्या असाधारणरूपया भवितव्यमिति आसु मध्ये इयमेव भैमीति निश्चयो जात इत्यर्थः। एवकारोऽप्यर्थे व्युदस्येति ल्यबन्तं क्वचिद्दृश्यते ॥ ७३ ॥

नन्वदृश्यस्यापि तस्य प्रतिबिम्बसम्भवात् कथं तं दृष्ट्वा ताः स्वपक्षिण्यो न जाता इत्यत आह ॥ भैमीति ॥ भैम्या विनोदाय मनोरञ्जनाय सखीभिर्मुदा हर्षेण प्रतिनिधिरूपाणां भुवि कल्पितानां लेखितानां तस्य नलस्य आकृतीनां प्रतिमूर्त्तीनां मध्ये प्रतिवेदिकायां प्रतिबिम्बपरि

नातर्कि मध्ये स्फुटमप्युदीतं
तस्यानुबिम्बं मणिवेदिकायां ॥ ७४ ॥
कृताग्रकोनाग्रजलेशदूती
निराकरिष्णोः कृतकाकुयाच्ञाः ।
भैम्या वचोभिः स निजान्तदाशां
न्यवर्त्तयद्दूरमपि प्रयातां ॥ ७५ ॥

स्कृतभूमौ स्फुटं सुव्यक्तं यथा तथा उदीतमपि उद्गतमपि तस्य नलस्य अनुबिम्बं प्रतिबिम्बं ताभिर्नातर्कि न तर्कितं चित्रप्रतिबिम्बयोः समानतया पृथक्त्वेन ज्ञानाभावात्तद्दृष्ट्वा न ताः सशङ्किता जाता इति भावः । मीलितालङ्कारोऽयं मीलितं वस्तुनो गुप्तिः केनचित्तुल्यलक्ष्मणेति लक्षणात् ॥ ७४ ॥

वरुणादिभिर्गूढं प्रेषितासु दूतीषु भैम्या वैमत्यं दृष्ट्वा नलः समाश्वसितीत्याह ॥ कृताग्रेति ॥ कृता काकुभिर्दैन्योक्तिभिर्याच्ञा याभिस्ताः दूत्योऽग्न्यग्रकोनाग्रजलेशानां वह्नियमवरुणानां दूतीर्निराकरिष्णोः साधुनिराकुर्वत्या भैम्या वचोभिर्न तेषु मे प्रीतिरस्तीत्यादिनिराकरणवचनैः करणैः स नलः दूरमत्यन्तं प्रयातां गतां अथ च दूरदेशं प्राप्तामपि निजां स्वीयां तदाशां भैमीप्राप्त्याशां न्यवर्त्तयन्निवर्त्तयामास भैम्या वरुणादिप्रयुक्तदूतीनिराकरणं दृष्ट्वा दैव्याङ्गीकारात् परित्यक्तामपि भैमीलिप्सां पुनर्मनसि कृतवानित्यर्थः अन्यमपि दूरं प्रयातं वचनैर्निवर्त्तयति । दूतीरित्यत्र इष्णुकत्वादिनात्र कर्त्तरि त्यादिना षष्ठी निराकरिष्णोरिति साध्वर्थे इष्णुच् ॥ ७५ ॥

Digitized by Google

विज्ञप्तिमन्तः सभयः स भैम्यां
मध्येसभं वासवसम्भलीयां।
सम्भालयामास भृशं कृशाश
स्तदालिवृन्दैरभिनन्द्यमानां॥ ७९॥
लिपिर्न दैवी सुपठा भुवीति
तुभ्यं मयि प्रेषितवाचिकस्य।

इन्द्रदूतीविज्ञापनं श्रुत्वा नलः सभयोऽजात इत्याह॥ विज्ञप्तिमिति॥ स नलो मध्येसभं सभाया मध्ये तस्या भैम्या आलिवृन्दैः सखीसमूहैरभिनन्द्यमानां सम्यगियं कथयतीति स्तूयमानां वासवसम्भलीयां इन्द्रकुट्टिनीसम्बन्धिनीं भैम्यां विज्ञप्तिं इन्द्रस्त्वामेवं वदतीति विज्ञापनं सम्भालयामास शुश्राव किम्भूतः भैमी देवराजं वरिष्यतीति बुद्ध्वा अन्तर्मनसि सभयो भययुक्तः तथा निजसखीवचनं भैमी करिष्यत्येवेति बुद्ध्वा भृशमतिशयं कृशा क्षीणा आशा भैमीलिप्सा यस्य तादृशः। मध्येसभमिति पारेमध्ये षष्ठ्या वेत्यव्ययीभावनिपातितं। सम्भालयामासेति भल आभाजने इत्यस्य चौरादिकस्य रूपं। कुट्टिनी सम्भली समे इत्यमरः॥ ७९॥

इतः परमिन्द्रदूत्या विज्ञापनमनुवदति॥ लिपिरिति॥ विज्ञापयन्त्यां इन्द्रवचनविज्ञापनं कुर्वत्यां इन्द्रस्य दूत्यां मयि अवधानस्य चित्तैकायतनस्य दानमेव प्रसादं रचय कुरु मया विज्ञाप्यमानमिन्द्रवक्तव्यं सावधाना शृणिव्यर्थः ननु त्वचेदिन्द्रदूती वर्हि मदर्थं इन्द्रस्य लिपिर्दर्शयितव्येत्याशङ्क्यामिन्द्रविप्रलम्भमपनयति किम्भूतस्य भुवि प

इन्द्रस्य दूत्यां रचय प्रसादं
विज्ञापयन्त्यामवधानदानं ॥ ७७ ॥
सलीलमालिङ्गनयोपपीड
मनामयं पृच्छति वासवस्त्वां ।
शेषस्तदाश्लेषकथापनिद्रै
स्तद्रोमभिः सन्दिदिशे भवत्यै ॥ ७८ ॥
यः प्रेर्य्यमाणोऽपि हृदा मघोन
स्त्वदर्थनायां ह्रियमापदागः ।

धियां वर्त्तमानैर्जनैः देवी देवसम्बन्धिनी लिपिर्न सुपठा न सुखेन पठितुं शक्या इति हेतोस्तुभ्यं त्वदर्थे मयि प्रेषितं वाचिकं सन्देश वचनं येन तादृशस्य। सन्देशवाग्वाचिकं स्यादित्यमरः ॥ ७७ ॥

सलीलमिति ॥ हे भैमि वासव इन्द्रः सलीलं सविलासं यथा तथा आलिङ्गनया आश्लेषेण उपपीडं उपपीड्य गाढमालिङ्ग्येत्यर्थः त्वां अनामयं आरोग्यं पृच्छति हे भैमि तव अनामयं विद्यते कच्चिदिति जिज्ञासत इत्यर्थः शेषो विशेषस्तु तस्येन्द्रस्य रोमभिः कर्त्तृभिस्तव आश्लेषकथया आलिङ्गनकथाश्रवणादेव अपनिद्रैरत्युद्गतैः सद्भि र्भवत्यै तुभ्यं सन्दिष्टः तवालिङ्गनकथामात्रेणैव सञ्जातरोमाञ्चेन रोमा ञ्चेन त्वयि अतितरां सानुरागो जात इति सूचितमित्यर्थः तस्मात्त्वया सोऽनुग्राह्य इति भावः। दमयन्त्याः क्षत्रियपुत्रीत्वात्तुल्यत एवानामय शब्देनारोग्यजिज्ञासा तथा च मनुः ब्राह्मणं कुशलं पृच्छेत् क्षत्रं पृच्छे दनामयं। वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव चेति ॥ ७८ ॥

य इति ॥ हे भैमि मघोन इन्द्रस्य यः कण्ठो हृदा मनसा प्रेर्य्यमा णोऽपि सत्वरीक्रियमाणोऽपि त्वदर्थनायां तव याच्ञायां विषये ह्रियं

Digitized by Google

स्वयम्बरस्थानजुषस्त्वमस्य
बधान कण्ठं वरणस्रजाशु ॥ ७९ ॥
नैनं त्यज क्षीरधिमन्थनाद्यै-
रस्यानुजायोद्गमितामरैः श्रीः ।
अस्मै विमथ्येक्षुरसोदमन्यां
श्राम्यन्तु नोत्पादयितुं श्रियन्ते ॥ ८० ॥

लब्धावकाशं आगोऽपराधं आपत् प्राप्तवान् तं स्वयम्बरस्थानजुषः स्वयम्बरस्थानभागिनोऽस्येन्द्रस्य कण्ठं वरणस्रजा वरणमालया आशु शीघ्रं बधान बन्धनं प्रापय अपराधकारिणो हि झटिति बन्धनं युज्यते इन्द्रस्त्वय्यतितरां जातानुरागस्तत्तं वृणुष्वेति भावः । अत्रानुकूलालङ्कारः । अनुकूलं प्रातिकूल्यमनुकूलानुबन्धि चेदिति लक्षणात् ॥ ७९ ॥

नैनमिति ॥ हे भैमि एनं इन्द्रं न त्यज अङ्गीकुर्वित्यर्थः यतः क्षीरधिमन्थनात् क्षीरसमुद्रविलोडनात् यैरमरैरस्येन्द्रस्य अनुजाय उपेन्द्राय नारायणाय श्रीर्लक्ष्मीरुद्गमिता उत्पादिता ते देवा अस्मै इन्द्राय इक्षुरसोदं इक्षुरससमुद्रं विमथ्य विलोड्य अन्यां श्रियं उत्पादयितुं उद्गमयितुं न श्राम्यन्तु न परिश्रमं प्राप्नुवन्तु अतो देवेषु दयां प्रकाश्य इन्द्रं वृणुष्वेत्यर्थः क्षीरसमुद्रं निर्मथ्य यैरमरैर्लक्ष्मी उत्पाद्य इन्द्रानुजाय दत्ता ज्येष्ठत्वात्तस्यापि पूज्याय इन्द्राय तैस्ततोऽप्यधिका दातव्या सा च क्षीरसमुद्रादुत्तमस्य इक्षुरससमुद्रस्य मथनं विना न प्राप्यत इति तन्मथने तेषां प्रयासः स्यात् त्वत्प्राप्त्या तु स तेषां न भविष्यति त्वं हि लक्ष्मीतोऽप्यतिसुन्दरीति भावः अतिसौन्दर्य्येण त्वमेव इक्षुरससमुद्रसम्भवा लक्ष्मीरित्यर्थः ॥ ८० ॥

Digitized by Google

लोकस्रजि द्यौर्दिवि चादितेया
अप्यादितेयेषु महान्महेन्द्रः।
किङ्कर्त्तुमर्थी यदि सोऽपि रागा
ज्जागर्त्ति कथा किमतःपरापि॥ ८१ ॥
पदं शतेनाप मखैर्यदिन्द्र
स्तस्मै स ते याचनचाटुकारः।

द्यौरिति॥ हे भैमि लोकस्रजि भुवनश्रेणीमध्ये द्यौः स्वर्गो महती अनेन भूमिपातालयोर्मा विवरेति सूचितं दिवि च स्वर्गे च आदितेया अदितिपुत्रा देवा महान्तः अनेन च युद्धसम्मुखमरणादिना प्राप्तस्वर्गाणां राज्ञां गन्धर्वादीनाञ्च निषेधः सूचितः तर्हि ब्रह्मादिभिः किमपराद्धमित्यत आह आदितेयेष्वपि देवेष्वपि महेन्द्रो महान् उत्कृष्टः। सोऽप्येवंविधो महेन्द्रोऽपि रागादनुरागात् किङ्कर्त्तुं किङ्करीभवितुं तव दासत्वमङ्गीकर्त्तुं यदि अर्थी याचको भवति तर्हि अतःपरापि कथा अन्या। किं जागर्त्ति विद्यते अपि तु नैवेत्यादृशी विषये इन्द्रोऽपि तव किङ्करीभवितुमिच्छतीत्येतदेव महत् आश्चर्यं आस्तामित्यर्थः तव सदृशी कापि सौभाग्यवती सौन्दर्यवती च नास्ती [illegible]। कथा स्यादन्तरीयस्य वचनादवचनपञ्चवे। अत्रोपदेशना दी [illegible] मेदिनी ॥ ८१ ॥

पदमिति॥ हे भैमि इन्द्रः शतेन मखैर्यज्ञैर्यत् पदं आप प्राप्तवान् तस्मै पदाय स इन्द्रस्ते तव याचने प्रार्थनायां चाटूनि प्रियवचनानि करोतीति तादृशो भवतीति शेषः अवश्यमिन् प्रसादं कुरु

Digitized by Google

कुरु प्रसादं तदलंकुरुष्व
स्वीकारकृत्कृत्यमटनश्रमेण ॥ ८२ ॥
मन्दाकिनीनन्दनयोर्विहारे
देवे भवद्देवरि माधवे वा ।
श्रेयः श्रिया यातरि यच्च सख्यां
तच्चेतसा भाविनि भावयस्व ॥ ८३ ॥

प्रसन्ना भव तत् ऐन्द्रपदञ्च स्वीकारकृत्स्वीकारसूचकं यद्भुवो नर्तनं चालनं तच्च यः श्रम आयासस्तेन करणेन अलङ्कुरुष्व शोभय इन्द्रेण यच्चयनं कृत्वा महता परिश्रमेण यत् पदं लब्धं तत्त्वं भूभङ्गेनाङ्गीकुरुष्वेत्यर्थः इन्द्रवरणे स्वर्गाधिपत्यं ते भविष्यतीति भावः । चाटुकारेति चाटुशब्दस्य शब्दादिगणपाठादेव हेत्वादाव शब्दादेरित्यादिना टक्षो निषेधात् कर्मणो यदिति यत् ॥ ८२ ॥

मन्दाकिनीति ॥ मन्दाकिनीनन्दनयोः स्वर्गङ्गानन्दनकाननयो र्विहारे जलक्रीडायां वनक्रीडायाञ्च यत् श्रेयः सुखं भवेत् तथा देवे अस्माकं प्रभौ इन्द्रे च यच्छ्रेयो भवेत् तथा देवरि भर्तुर्भ्रातरि माधवे वा नारायणे च यच्छ्रेयो भवेत् तथा सख्यां सहचर्य्यां यातरि देव रपत्न्यां श्रियां लक्ष्म्यां यच्च श्रेयो भवेत् हे भाविनि विचारचतुरे तत्र यन्ति तत् सर्व्वं चेतसा मनसा भावयस्व विचारय इन्द्रवरणे तवैतद् श्रेयःप्राप्तिर्भविष्यतीत्यर्थः तस्मादन्यान्नृपतीन् देवादीन् वा परित्यज्य इन्द्रमेव वृणुष्वेति भावः । भ्रातुः सुर्भ्रातरः पत्न्याः स्वामिनो देवृदेवरा विति भार्य्यास्तु भ्रातृवर्गस्य यातरः स्युः परस्परमिति चामरः ॥ ८३ ॥

Digitized by Google

रज्यस्व राज्ये जगतामितीन्द्रा
याञ्चाप्रतिष्ठां लभसे त्वमेव।
ल कृतस्त्वं बलियाचनेन
यत्प्राप्तये वामनमामनन्ति ॥ ८४ ॥
यानेव देवान्नमसि त्रिकालं
न तत्कृतप्रीकृतिरोचिती ते।

रज्यस्वेति॥ जगतां त्रयाणां भुवनानां राज्ये रज्यस्व अनुरक्ता भव इति इन्द्रात् सकाशात् याञ्चाप्रतिष्ठां प्रार्थनाजनितमाहात्म्यं त्वमेव लभसे प्राप्स्यसि। न त्वन्येत्यर्थः राज्यस्य नावश्यासदभिव्याह यस्य राज्यस्य प्राप्तये बलियाचनेन लघूकृतः खर्व्वीकृतः अथ च अवमानासदीकृतः स आत्मा येन तं नारायणं वामनं खर्व्वं आमनन्ति कथयन्ति पुराणज्ञा इति शेषः याचनजन्यलाघवादेव तं वामनं कथयन्तीत्यर्थः। नारायणेन स्वलाघवमङ्गीकृत्यापि यद्राज्यमिन्द्रार्थं याचितं तद्राज्ये त्वमेव रज्यस्वेतीन्द्रेण स्वयं प्रार्थितायास्तव प्रतिष्ठा कथं न भवति तस्मात्तद्राज्यभोगाय इन्द्रमेव हणुष्वेति भावः॥ ८४॥

यानिति॥ हे भैमि त्वं त्रिकालं त्रिसन्ध्यं व्याप्य यानेव देवान् नमसि नमस्करोषि तत्तावप्रीकृतिस्तेषां कृतप्रीकरणं ते तव न औचिती उचितं त्वया देवा अप्रसन्ना न क्रियन्तामित्यर्थः तर्हि किं कर्त्तव्यमित्यत आह त्रिसन्ध्यं त्रिकालं त्वत्पदयोस्तव चरणयोः प्रविव्यतस्तान् देवानपि अनृणान् ऋणशून्यान् विधातुं कर्त्तुं प्रसीद प्रसन्ना भव एतावत्कालं त्वया देवाः प्रणताः संप्रति तेऽपि त्वयि प्रवि

प्रसीद तावन्मयनुगृहाण विधातु
पतिष्यतस्त्वद्वयोस्त्रिसन्ध्यं ॥ ८५ ॥
इत्युक्तवत्या निभृतादरेण
भैम्या गृहीता मघवत्प्रसादः ।
स्रक् पारिजातस्य ततो नवाशां
वासैरशेषामपुपूरदाशां ॥ ८६ ॥

प्रत्यामेव त्वत्पत्या भवितुमिच्छन्ति यदिन्द्राणी भूत्वा प्रतिप्रत्यासत्त्वी कारेण देवेष्वप्यनुग्रहं प्रकाशयेत्यर्थः किमधिकं वक्तव्यं इन्द्रे हते देव नमस्यापि भविष्यसीति भावः । त्रिकालं त्रिसन्ध्यमिति द्विगुसमास निष्पन्नं पात्रादित्वान्न स्त्रीत्वं॥ ८५ ॥

इत्युक्तेति ॥ इति पूर्वोक्तं उक्तवत्या इन्द्रदूत्या निभृता सर्वथैक मघवत इन्द्रस्य प्रसादः प्रसादरूपा पारिजातस्य स्रक् माला वासैः परिमलैः अथ च भैम्यामवस्थानैः करणैः नवस्य भाग्याः अभिलाषे सत्वे विना अशेषां समस्तां आशां आशापदप्रतिपाद्यां दूत्यादिवाच्छो दिशश्च अपुपूरत् पूर्णां चकार किम्भूता आदरेण देवप्रसादोऽयं इति निभृतया भैम्या गृहीता । भैम्या आदरेण मालाया गृहीतत्वात् इन्द्रे अनुरक्ता जाता कथमन्यथा इन्द्रप्रसादं सादरं गृहीतवतीति निश्चित्य नलो भैमीप्राप्तौ छिन्नाशो जातः इन्द्रदूत्यादीनामाशा तत एव संपूर्णा जातेति भावः । नवाशामिति सत्वे पुत्राद्विपरीति चेति द्वितीया । वासो ग्रहेऽप्यवस्थाने सौरभेऽपि च वर्त्तते इति विश्वः आशा तृष्णादिशोः स्मृतेति धरणिः ॥ ८६ ॥

आर्य्ये विचार्य्यालमितीति कापि
योग्यं सखि स्यादिति काचनापि।
ओङ्कार एवोत्तरमस्तु वस्तु
मङ्गल्यमन्येति च काप्यवोचत्॥ ८७॥
अनाश्रवा वः किमहं कदापि
वक्तुं विशेषः परमस्ति शेषः।

अथेन्द्रवरणसम्मतानां सखीनां वचनमनुवदति॥ आर्य्य इति॥ कापि सखी हे आर्य्ये मान्ये भैमि इह इन्द्रवरणविषये विचार्य्य विविच्य अलं अविचार्य्यैव स्वीकर्त्तव्यमित्यर्थ इति अवोचत् उक्तवती तथा काचनापि सखी हे सखि भैमि इन्द्रवरणं योग्यमुचितं स्यादित्यवोचत् तथा कापि च सखी अत्र इन्द्रवरणविषये अङ्गीकारसूचकं ओङ्कार एव वस्तु वास्तविकं मङ्गल्यं मङ्गलाय हितमेव उत्तरं अस्तु भवतु ओमित्युच्चार्य्य स्वीक्रियतामित्यर्थः इत्यवोचत्। विचार्य्येति निषेधार्थोऽलं खलु युक्तादेविति क्त्वा तयो यप्। ओङ्कारस्य मङ्गल्यत्वं यथा। ओङ्कारश्चाथ शब्दश्च द्वावेतौ ब्रह्मणः पुरा। कण्ठं भित्त्वा विनिर्यातौ तेन माङ्गलिकावुभाविति स्मृतिः॥ ८७॥

अथ भैमीवचनमाह॥ अनाश्रवेति॥ हे सख्यः अहं कदापि कदाचिदपि कोयुष्माकं किं अनाश्रवा वचनाकारिणी अपि तु सर्व्वदैव भवतीनां वचनकारिण्येवेत्यर्थः परं किन्तु शेषोऽवशिष्टो विशेषोऽस्ति अत्र किञ्चिद्वक्तव्यं विद्यत इत्यर्थः इति भीमजया दमयन्त्या ईरिते उक्ते सति मुदा हर्षेण इयत्ता परिमितता दूतीं इन्द्रदूतीं साक्षी भैमीसखीश्च नाधिकृत् न प्राप्नोति स्म अस्माकं वचनं करिष्यतीति मुदा अपरिमितमेव हर्षं ताः प्रापुरित्यर्थः पूर्व्वं भवतीनां सर्व्वं वचनं

इतीरिते भीमजया न दूती
मालिङ्गदालीश्च मुदामियत्ता ॥ ८८ ॥
भैमीश्च दूत्यश्च न किञ्चिदाप
मिति स्वयं भावयतो नलस्य ।
आलोकमात्राद्यदि तन्मुखेन्दो
रभूत्र भिन्नं हृदयारविन्दं ॥ ८९ ॥

इतं कस्मिन् विषये तु तत्र करिष्यामीति मनसिकृत्य भैम्या कथा अवावदत्याशुक्त्वा वक्तुं विशेषदृत्याशुक्तं तासु भैमी इन्द्रवरणं करिष्यत्येव किन्तु वक्तुं विशेष इत्यादिवचनात् कश्चिन्नियमं कृत्वा तत् करिष्यतीति भाव्या हर्षातिशयं प्रापुरिति भावः ॥ ८८ ॥

नलस्य तात्कालिकीं चिन्तामाह ॥ भैमीचेति ॥ अहं भैमीच दूत्यश्च किञ्चिदपि कयोरन्यतरमपि नायं न मान्नवानस्मि इति स्वयं भावयतः इन्द्रे जातानुरागा भैमी कथं मया लभ्या माभूत्वा तल्लाभः कीर्त्तिकरं दूत्यमपि न कृतं इन्द्रदूत्येव तस्य इवतादिति मनसि चिन्तयत इत्यर्थः नलस्य हृदयारविन्दं हृदयकमलं यदि यत्र भिन्नं न विदीर्णं बभूत् तत् तन्मुखेन्दोर्भैमीमुखचन्द्रस्य आलोकमात्राद्दर्शनादेव न तन्यमात्रेतोः । अत्र यदीति यदर्थे यदि सम्भावनायाम्वा तन्मुखेन्दोरालोकमात्रादेव नलस्य हृदयारविन्दं भिन्नं नाभूदिति सम्भाव्यते यद्यपि चिन्तातिशयवशात्तस्य हृदयस्फोटेन भवितव्यं तथापि सभावतरवानन्दजनकस्य भैमीमुखस्य दर्शनेन दुःखापगमात् इन्द्रावादरसूचकस्य दर्शनेनानन्दोदयाद्वा तेन न भूतमिति भावः अथच कमलं चन्द्रप्रकाशाद्भिन्नं विकसितं यत्र भवति तद्युक्तमिति ध्वनिः ॥ ८९ ॥

Digitized by Google

ईषत्स्मितक्षालितसृक्कभागा
दृक्संज्ञया वारिततत्प्रदालिः ।
स्रजा नमस्कृत्य तयैव शक्रं
तां भीमभूरुत्तरयाम्बभूव ॥ ९० ॥
स्तुतौ मघोनस्त्यज साहसिक्यं
वक्तुं कियत्तं यदि वेद वेदः ।

इतः परमसम्मतेन्द्रपरिग्रहाया भैम्या इन्द्रदूतीं प्रति वचनमनुवदितुमुपक्रमते ॥ ईषदिति ॥ ईषत्स्मितेन अल्पहसनेन क्षालितौ धवलीकृतौ सृक्कभागौ ओष्ठप्रान्तभागौ यया तादृशी भीमभूर्भैमी दृक्संज्ञया चक्षुर्भङ्ग्या वारिता निषिद्धा आल्यः आर्य्ये विधायार्घमित्यादिना प्रवर्त्तयन्त्य आलयः सख्यो यया तादृशी सती तयैव स्रजा पारिजातमालया शक्रमिन्द्रं नमस्कृत्य मास्त्वेव मे महान् प्रसाद इति कृत्वा तामिन्द्रदूतीं उत्तरयाम्बभूव तां प्रति उत्तरं दत्तवती एवाचिरनलानुरक्तामपि मामन्यार्थे प्रेरयन्तीति कौतुकवशेनेव हसनं कृतं । प्रान्तावोष्ठस्य सृक्कणी इत्यमरः ॥ ९० ॥

उत्तरवचनमेवाह ॥ स्तुताविति॥ हे इन्द्रदूति मघोन इन्द्रस्य स्तुतौ स्तवे साहसिक्यं साहसं त्यज मुञ्च यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सहेत्यादिश्रुतेः स्तोतुमशक्यस्य विष्णुरूपैतन्महेन्द्रस्य तस्य स्तवं मा कार्षीरित्यर्थः यतस्तमिन्द्रं वक्तुं वर्णयितुं यदि वेद जानाति तर्हि वेदः कियत् किञ्चिद्वेद नान्यः तथाच पुष्पदन्तः अतद्व्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपीति अतस्तादृशस्य वर्णने मम महदेव साहस

ब्रूयोत्तरं साक्षिषि हृत्सु नृणा

मस्यां च विद्यापि ममापि तस्मिन् ॥ ९१ ॥

आज्ञां तदीयामनु कस्य नाम

नकारपारुष्यमुपैति जिह्वा ।

मित्यर्थः तर्हि मास्तौ श्रूयतां त्वया तु इन्द्राय वक्तव्यमुत्तरं कथ्यता मित्यत आह नृणां मनुष्याणां हृत्सु अन्तःकरणेषु साक्षिषि मत्करि अन्तःकरणवर्त्तिसकलविषयाभिज्ञे इत्यर्थः मायोपाधिकचैतन्यरूपे ईश्वरसाक्षिणि वा वेदान्तिनां मतेऽपरोक्षज्ञानविषयत्वेश्वरसाक्षि त्वेनाभ्युपगमात् तथाविधे तस्मिन्निन्द्रे च ज्ञातारमज्ञातारं विज्ञाप यितुं बोधयितुं श्रीशमस्य तादृशं उत्तरं प्रतिवचनं तथा निष्फलं उत्तरं हि अज्ञातारं प्रत्येव सार्थकं न तु सर्वज्ञं प्रतीत्यर्थः वाच मिन्द्रं वरिष्यामि किन्तु नलमेव वरिष्यामीति मम मनसि स्थितमुत्तर मिन्द्रोऽजानात्येव किमर्थं तद्वक्तव्यमिति भावः । इन्द्रियव्याप्तिसाक्षित्व बोधे साक्ष्याधैरिति सप्तमी ॥ ९१ ॥

आज्ञामिति ॥ नाम सम्भावनायां कस्य नाम जिह्वा कर्त्री तदी यामिन्द्रसम्बन्धिनीं आज्ञां अनु लक्षीकृत्य नकारेण न करोमीति नकारघटितत्वादेन पारुष्यं काठिन्यं उपैति गच्छति अपि तु न कस्या पि सर्व्वैरपि तदाज्ञा क्रियत एवेत्यर्थः तर्हि त्वयापि क्रियता मित्यत आह तु पुनरर्थे बाला त्वं प्रज्ञा नमास्वती तामिन्द्राज्ञां माला मालामिव मालारूपां तामाज्ञां मूर्ध्नि निधाय गौरवात् शिरसि स्वी कृत्य विशेषवाग्भिर्विशेषवचनैर्व्यमाय मकारैरपराध्यामि अपरार्थं

Digitized by Google

प्रक्षा तु तां मूर्द्धि निधाय माला
बालापराध्यामि विशेषवाग्भिः ॥ ९२॥
तपःफलत्वेन हरेः कृपेय
मिमन्तपस्येव जनं नियुङ्क्ते।
भवत्युपायं प्रति हि प्रवृत्ता
वुपेयमाधुर्य्यमधैर्य्यकारि ॥ ९३ ॥

युक्ता भवामि अबलादाबाया अबरबेऽप्यपराधो माभीवर्त्तय इति बालापदेन सूचितं भूमीन्द्रस्य वरिष्यमाखलान्मालापि शिरसि निहिता ॥ ९२ ॥

तप इति ॥ इयमेतादृशी हरेरिन्द्रस्य कृपा अनुकम्पा तपःफलत्वेन पूर्वजन्मकृततपसः फलरूपतया इमं मल्लक्षणं जनं तपस्येव तत्कारणभूतायां तपस्यायामेव नियुङ्क्ते पुनः प्रेरयति यत तपसयं कृपा लब्धा तत्पः पुनः कर्त्तुं मां प्रवर्त्तयतीत्यर्थः ननु तपसः फले भावे किमर्थं ते पुनरपि तपसि प्रवृत्तिरित्याशङ्क्याह हि यस्मात् उपेयस्य फलस्य माधुर्य्यं वैचित्र्यं कर्त्तृ उपायं तत्साधनं प्रति उद्दिश्य प्रवृत्तौ अधैर्य्यकारि भवति धैर्य्यं नाशयति तत्रैव पुनः प्रवर्त्तयितुं त्वरयतीत्यर्थः । यथा तपसोपायेनात्यन्तदुर्लभापीन्द्रकृपा प्राप्ता तथा तपसैवोपायेन नलः प्राप्स्यतइति निश्चित्य पुनस्तपःकरणे मम प्रवृत्तिर्जायत इति भावः नाहमिन्द्रकृपालक्षणफललाभात्तुष्टास्मि किन्तु नलप्राप्तिलक्षणमुत्कृष्टफलान्तरमपि लब्धुकामास्मीति परमार्थः ॥ ९३ ॥

Digitized by Google

शुश्रूषिताहे तदहं तमेव
पतिं मुदेऽपि व्रतसम्पदेऽपि ।
विशेषलेशोऽयमदेवदेहं
मंशागतन्तु क्षितिभृत्तयेह ॥ ९४ ॥
अश्रौषमिन्द्रादरिणीर्गिरस्ते
सतीव्रतानिप्रतिलोमतीव्राः ।

तर्हि किमिन्द्रदेवोपासनरूपां तपश्चर्यां करिष्यसीत्यत आह ॥ शुश्रूषिताहे इति ॥ तत्तस्मादहं मुदेऽपि हर्षाय च व्रतसम्पदेऽपि नियमसम्पत्तये च तमेव इन्द्रमेव पतिं प्राचेशं शुश्रूषिताहे सेविष्ये इन्द्रमेव पतिं कृत्वा तत्सेवारूपं तपः करिष्यामि तेन मम हर्षो व्रत सम्पत्तिश्च भविष्यतीत्यर्थः तर्हि अस्माकं मनोरथः सम्पूर्ण एवेत्यत आह अयन्तु अयं पुनर्विशेषलेशोऽल्पोविशेषः इह पृथिव्यां क्षिति भृत्तया क्षितिपालत्वेन अंशेन भागेनागतं अदेवदेहं मनुष्यशरीरं भूमीन्द्रं नलमेव शुश्रूषिताहे न तु देवदेहं देवेन्द्रमिति । अंशेन लोक पालानां जायते पृथिवीपतिरिति स्मरणादिन्द्रस्याप्यंशसत्त्वात् नलरूप मिन्द्रं वरीष्यामि नतु युष्माकं प्रभुमिन्द्रमित्यर्थः । शुश्रूषिताहे इति श्रुवादेः सन्यनुज्ञामत्याङ्श्रुव इत्यात्मनेपदं लुट उत्तमपुरुषैकवचनं ताहे ॥ ९४ ॥

अश्रौषमिति ॥ हे इन्द्रदूति अहं इन्द्रस्य आदरः प्रशंसा विषये यासु तादृशीस्ते तव गिरो वचनानि अश्रौषं श्रुतवती किम्भूता गिरः सतीव्रतस्य साध्वीव्रतस्य अतिप्रतिलोमा अत्यन्तप्रतिकूला अत एव तीव्रा अतिदुःसहाः पतिव्रतायाः परपुरुषप्रशंसासूचकवचन

Digitized by Google

स्वं प्रागहं प्रादिषि नामराय
किन्नाम तस्मै मनसा नराय ॥ ६५ ।
तस्मिन् विमृश्यैव वृते हृदैषा
मैन्द्री दया मामनुतापिका भूत् ।

अतस्त्वमतिदुःसहमनुचितञ्च तस्मान्मया तव तादृग्वचनं यच्छ्रुतं तदनुचितमेव कृतमिति भावः अनूढायास्ते कुतः पातिव्रत्यव्याघात इत्याशङ्क्याह अहं स्वमात्मानं मनसान्तःकरणेन प्राक् पूर्व्वं अमराय देवेन्द्राय न प्रादिषि न प्रदत्तवती किन्नाम किन्तु नराय मनुष्याय तस्मै इन्द्राय भूमीन्द्राय प्रादिषि अथच रलयोरेकरूपत्वात् तस्मै प्रसिद्धाय नराय नलाय प्रादिषि अन्तःकरणेन पूर्व्वमेव नलस्य दत्तत्वान्मम सतीत्वमित्यर्थः । केचित्तु इन्द्रादरिणीति प्रथमान्तं पाठं कल्पयित्वा अहमिन्द्रादरिणी इन्द्रगौरववती सती अश्रौषं त्वया यदुक्तं तदिन्द्रगौरवादेव मया श्रुतमित्यर्थं इति व्याचक्षते । द्वितीयान्तपाठस्य तु बहुषु पुस्तकेषु दृष्टत्वात् प्राचीनैर्व्याख्यातत्वाच्च स एव साधुः । प्रादिषीति प्रपूर्व्वदाञो लुङुत्तमपुरुषैकवचनरूपं ॥ ६५ ॥

तस्मिन्निति ॥ तस्मिन् नले विमृश्यैव विचार्य्यैव हृदा मनसा वृते सति एषा ऐन्द्री इन्द्रसम्बन्धिनी दया कृपा मामनुतापिका मामनुतापयितुं मा भूत् यदि नलो मया मनसा न वृतः स्यात्तर्हि कथञ्चिदिन्द्रो वरणीयो वा स्यात् वृते तु तस्मिन् इतरस्य नानुशोचनमिति बुद्धा इन्द्रकृपामप्राप्यापि नाहमनुतापं प्राप्स्यामीत्यर्थः अथ च मनसा नलवरणं मया विचार्य्यैव कृतमितीन्द्रमप्राप्य नाहं दुःखिनी भविष्यामीत्येतदेव उपमया दर्शयति इव यथा भवे संसारे सम्भव उत्पत्तिर्य्येषां

Digitized by Google

निर्वातुकाममन्यवसन्नवानां
धीरं सुखानामवधीरणेव ॥ ९९ ॥
वर्षेषु यद्भारतमार्य्यधुर्य्याः
स्तुवन्ति गार्हस्थ्यमिवाश्रमेषु ।

माहशानां सुखानां आपातरमणीयत्वात् चक्षुचन्दनवनिवासम्भो गादिजानां सुखाभासानां अवधीरणा अवज्ञा त्वस्मिन् त्वद्भ्रूवाय प्रणयि इदा विसज्य त्वत्ता विषायें वृते त्वाभिन्नत्वेन भावे सति निर्वातुकामं मुमुक्षुं धीरं धैर्य्ययुक्तं यच्छितं नानुतापयति यथा यथा वैषयिकसुखाप्राप्तिर्ब्रह्मानन्दनिष्ठंतं मुमुक्षुं न दुःखयति तथा मत्प्राप्तिनिष्ठेवां मामिन्द्राप्राप्तिर्न दुःखयतीत्यर्थः मोक्षसुखसंसारसुखयोर्यावदन्तरं तावन्मत्प्राप्तिसुखेन्द्रप्राप्तिसुखयोरिति भावः । अनुतापिकेति तुमर्थे चकारस्य चकारसुमर्थे प्रायइति त्वादित्वान्न मामित्यत्र कर्त्तुरित्यादिना षष्ठी ॥ ९९ ॥

वर्षेष्विति ॥ आर्य्यधुर्य्या आर्य्यश्रेष्ठा मन्वादयः आश्रमेषु ब्रह्मचर्य्यादिषु मध्ये गार्हस्थ्यमिव गार्हस्थ्याश्रमं यथा स्तुवन्ति तथा वर्षेषु इलावृतादिषु नवसु मध्ये यत् भारतं वर्षं स्तुवन्ति पुण्यभूमित्वात् प्रशंसन्ति तत्र तस्मिन्निह भारतवर्षे पत्युः प्राणनाथस्य नलस्य वरिवस्यया शुश्रूषयाहं धर्म्मस्य सुखस्य उर्म्मिभिः परम्पराभिः किर्म्मीरितो मिश्रितो यो धर्म्मस्तं लिप्सुरभिलाषुकाऽस्मि भारतवर्षे स्थित्वा नलं शुश्रूषमाणाया मम सुखं जन्मान्तरभोग्यसुखजनकपुण्यञ्च द्वयमपि भविष्यति इन्द्रवरणे तु केवलं भोगदायि सुखमेव भविष्यति तस्मान्न

Digitized by Google

तथापि पत्युर्वरिवस्ययेह
शर्म्मोर्म्मिकिर्म्मीरितधर्म्मलिप्सुः ॥ ९७ ॥
स्वर्गे सतां शर्म्म परं न धर्म्मा
भवन्ति भूमाविह तच्च ते च ।

एव मया मनसि कृत इति भावः । यथा वायुं समाश्रित्य वर्त्तन्ते सर्व्वजन्तवः। तथा गृहस्थमाश्रित्य वर्त्तन्ते सर्व्वे आश्रमाः । यस्मात्त्रयोऽप्याश्रमिणो ज्ञानेनान्नेनचान्वहं । गृहस्थेनैव धार्य्यन्ते तस्माज्ज्येष्ठाश्रमी गृहीति मनुः । गायन्ति देवाः किल गीतकानि धन्यास्तु ये भारतभूमिभागे। स्वर्गापवर्गास्पदमार्गभूते भवन्ति ते नो पुरुषाः सुराभुत्व इति स्मृतिः । वरिवस्या तु शुश्रूषेत्यमरः ॥ ९७ ॥

पूर्व्वोक्तमेव पश्चात्कुर्व्वती ब्रूते ॥ स्वर्ग इति ॥ स्वर्गे सतां तिष्ठतां जनानां परं केवलं शर्म्म सुखं भवति न धर्म्मास्ते पुण्यानि भवन्ति तस्य केवलंभोगभूमित्वात् इह भारतवर्षे भूमौ तच्च शर्म्म च ते च धर्म्माश्च भवन्ति भारतस्य कर्म्मभोगभूमित्वात् नन्विन्द्रे वृते तत्प्रीतिः सुलभा इव त्वया कथं सा भवेदित्याशङ्क्याह अमराणां न केवलमेकस्येन्द्रस्य सकलानामपि देवानां मुदः प्रीतयो मखेनापि यज्ञेनापि सुलभाः साध्याः स्वर्गे केवलमिन्द्र एव वरणेन प्रीतो।भविष्यति अत्र तु यज्ञेन सर्व्वएव देवाः प्रीताभविष्यन्तीत्यर्थः। अतः सुखधर्म्मसकलामरप्रीतीनां तिसृणां मध्ये धर्म्मसकलामरप्रीत्योर्द्वयं विहाय त्यक्त्वा कथं एकं सुखमात्रं ईहे इच्छामि तस्मात्त्वले वृते सुखादित्रयप्राप्तेर्नलवरणमेव

बुभुक्षते नाकमपथ्यकल्पं
धीरस्तमापातसुखोन्मुखं कः ॥ १०० ॥
इतीन्द्रदूत्यां प्रतिवाचमर्द्धे
प्रत्यूह्य सैषाभिदधे वयस्याः ।
किञ्चिद्विवक्षोल्लसदोष्ठलक्ष्मी
जितापनिद्रद्दलपङ्कजास्याः ॥ १०१ ॥

यानेन्द्र इति भावः । उपतिष्ठत इति सङ्गतिमैत्रीकरणयोर्वेत्यात्मने पदं ॥ १०० ॥

अथान्तरे सखीनामिन्द्रानुकूलां विवक्षां निषिध्य इन्द्रदूतीं प्रत्युत्तरदानमसमाप्यापि सखीरेव भैमी प्रत्यूचे इत्याह ॥ इतीति ॥ सा एषा दमयन्ती इन्द्रदूत्या विषये इति पूर्वोक्तप्रकारां प्रतिवाचं प्रत्युत्तरं अर्द्धे मध्य एव प्रत्यूह्य सविघ्नां कृत्वा असमाप्येत्यर्थः वयस्या निजसखीरभिदधे उवाच किम्भूता वयस्याः किञ्चिद्विवक्षया इन्द्रानुकूलं किञ्चिद्वक्तुमिच्छया उल्लसन्तौ स्फुरन्तौ यावोष्ठौ तयोर्लक्ष्म्या शोभया जितं सदृशीकृतं अपनिद्रदलं ईषद्विकसत्पत्रं पङ्कजं पद्मं येन तादृशं आस्यं मुखं यासां तादृश्यः इन्द्रदूत्याः प्रत्युत्तरं व्यक्ता सखीनां निषेधार्थमुवाचेत्यर्थः तासामोष्ठौ पद्मदलसदृशौ मुखञ्च पद्मसदृशमित्यर्थः अपनिद्रदिति अपनिद्रमिवाचरदिति कर्तुराचारे क्विबादिना आयसन्तुक् ततः क्त प्रत्युह्येति प्रपूर्वाद्वहतेः क्त्वा यप् उपसर्गाद्दूहो ह्रस्वेति ह्रस्वः । विघ्नोऽन्तरायः प्रत्यूह इत्यमरः ॥ १०१ ॥

Digitized by Google

अनादिधाविस्वपरम्पराया
हेतुव्रजः स्रोतसि वेश्वरे वा ।
आयत्तधीरेषजनस्तदार्य्याः
किमीदृशः पर्य्यनुयुज्य कार्य्यः ॥ १०२ ॥

यदभिदधे तदाह ॥ अनादीति ॥ अनादि आदिशून्यं यथा तथा धाविन्या अनवच्छेदिन्याः पुनःपुनरावर्त्तमानाया इत्यर्थः स्वस्य जीवात्मनः परम्परायाः स्रोतसि हेतूनां नियामकानां आवर्त्तककार णानां वा अदृष्टानां व्रजः परम्परायाः स्रोतसि प्रवाहे वा सर्वेषां नियामके ईश्वरे वा एष सकलो जनो यस्मादायत्ता प्राक्तनशुभा शुभकर्माधीना ईश्वराधीना वा बुद्धिर्यस्य तादृशो भवति तत्तस्माद्धे आर्य्याः बुद्धिमत्यः सख्यः भवतीभिरीदृशः पराधीनो मल्लक्षणो जनः पर्य्यनुयुज्य किमेवमविविच्य कर्त्तुमिच्छसीत्यादिना आक्षिप्य पृष्ट्वा वा किं कार्य्यः किं कारयितव्यः अपि तु न किमपि अदृष्टमीश्वरो वा यथैव जनं प्रवर्त्तयति तथैव स प्रवर्त्तते न तु स्वाधीनो भूत्वा किञ्चित् करोति तथा च पूर्व्वोक्तमाक्षेपं प्रश्नं वा स नार्हति स्वातन्त्र्याभावात् तस्माददृष्टवशादीश्वरवशाद्वा नले जातानुरागाहं किमिति देव राजं नाङ्गीकरोमीति पर्य्यनुयोगार्हो न भवामीत्यर्थः अस्मिन् विषये युष्माभिः किमपि न वक्तव्यमिति भावः । किं करोतु नरः प्राज्ञः प्रेर्य्य माणः स्वकर्म्मभिरिति किं करोतु सुधीरस्मिन्नीश्वरावशंवद इति च वृद्धवचनमत्र प्रमाणमवगन्तव्यं । अनादिधारीति रेफवत्पाठे अना दिधारिणो अनादिं दधाना या स्वेषामात्मनां परम्परा तस्या इत्यर्थः । अनादिधाविन्येति नाकव्यञ्जनकारवत्पाठे अनादिं दधातीति अनादिधा तादृशी या निजस्य जनतः परम्परा तस्या इत्यन्वयः ॥१०२॥

Digitized by Google

नित्यं नियत्या परवत्यशेषे
कः संविदानोऽप्यनुयोगयोग्यः ।
अचेतना सा च न वाचमर्हे-
द्वक्ता तु वक्त्रश्रमकर्म्म भुङ्क्ते ॥१०२॥
क्रमेलकं निन्दति कोमलेच्छुः
क्रमेलकः कण्टकलम्पटस्तं ।

पूर्वोक्तमेव प्रकटयति ॥ नित्यमिति ॥ अशेषे समस्ते स्थावरजङ्गमात्मके जगति नित्यं सदा नियत्या दैवेन परवति पराधीने सति संविदानोऽपि विज्ञोऽपि कोजनोऽनुयोगस्य किमेवं क्रियत इत्यादिप्रश्नस्याक्षेपस्य वा योग्योऽर्हः अपि तु न कश्चिन्मूर्खोऽपि नियत्या यथा प्रेर्य्यते तथैव सर्वोऽपि प्रवर्त्तत इत्यर्थः तर्हि नियतिरेवानुयुज्यतामित्यत आह सा च नियतिरपि वाचं अनुयोगवचनं नार्हेत् अनुयोगयोग्या न भवति यतोऽचेतना चैतन्यशून्या अनुयोगवचनं हि सचेतनस्यार्हति न तु पाषाणादेरचेतनस्य तस्मात् मम नियतिरपि युष्माभिर्निन्द्या नियतिं वा देवराजरूपवरलाभप्रतिबन्धिकेत्यादिना न निन्दनीयेत्यर्थः अनुयोगे दोषमपि दर्शयति तु पुनर्वक्ता अनुयोगकारी जनो वक्त्रस्य मुखस्य श्रमरूपं कर्म्म भुङ्क्ते अनुभवति वक्त्रस्य श्रमरूपं कर्म्म शोषादिकं अनुभवति वा युष्माभिरस्मिन् विषये तूष्णीं स्थातव्यं दैवाधीना सती नलमेवाहं वरीष्यामीति भावः । संविदान इति समोऽकर्म्मकमादेरित्यात्मनेपदं ॥ १०२ ॥

भवतस्माभिरत्र न किञ्चित्तावत् किन्तु देवराजं परित्यज्य मानुषमभिकाङ्क्षन्त्याश्च इन्द्रदूतीभिरुक्तं कथं तत्रापि केयमित्याह ॥ क्रमेल

प्रीतौ तयोरिष्टभुजोः समायां
मध्यस्थता नैकतरोपहासः ॥ १०४ ॥
गुणा हरन्तोऽपि हरेर्नरं मे
न रोचमानं परिहापयन्ति ।

कमिति ॥ कोमलेक्षुर्मृदुत्वमभिलाषी उष्ट्रः क्रमेलकः कठिनत्वमभिलाषितं उष्ट्रं निन्दति यथा कण्टकलम्पटः कण्टकादिकठिनवस्तुलुब्धः क्रमेलकस्तं कोमलेक्षुं निन्दति इष्टभुजोः स्वस्वेष्टभोजनशीलयोस्तयोः कोमलेक्षुक्रमेलकयोः समायां तुल्यायां प्रीतौ सत्यां एकतरोपहासोऽनयोर्मध्ये एकतरस्योपहासो न मध्यस्थता न माध्यस्थ्यं द्वयोरपि स्वस्वाभिलषितभक्षणत्वात् न मध्यस्थैरेकतरस्योपहासः कर्तव्यः यद्यपि भिन्नविषयप्रवृत्तत्वात् तावपि परस्परनिन्दावादिनौ तथापि मध्यस्थानामेकतरनिन्दा नोचितेत्यर्थः। तस्मान्मम नले पक्षपातः इन्द्रदूत्यात्तु इन्द्रे पक्षपात इत्यावयोस्तुल्यायां प्रीतौ सत्यां भवतोभिरेव पक्षपातं विहाय माध्यस्थ्यं कार्यं न त्वेकतरोपहासः कार्यं इतिभावः। उष्ट्रे क्रमेलकमयमहाङ्गा इत्यमरः ॥ १०४ ॥

ननु तथापि नलापेक्षया इन्द्रस्याधिकगुणवत्त्वात् गुणवत्परित्यागो नोचित इत्याशङ्क्याह ॥ गुणा इति ॥ हरन्तोऽपि मनोहारिणोऽपि हरेरिन्द्रस्य गुणा अणिमादयः सौन्दर्यादयो वा मे मह्यं रोचमानं मम प्रीतिजनकं नरं मनुष्यं भवत नलं न परिहापयन्ति न परित्याजयन्ति ननु मनोहारित्वात् किमिति न परिहापयन्तीत्याशङ्क्य दृष्टान्तदर्शनया परिहरति अपवर्गान्मोक्षादन्यत्र न स पुनरावर्तत इत्यादि मुधा मोक्षस्यैव नित्यत्वावगमादनित्यकं त्रिवर्गं धर्मार्थ

Digitized by Google

न लोकमालोकयथापवर्गा-
त्त्रिवर्गमर्वाञ्चममुञ्चमानं ॥१०५॥
आकीटमाकैटभवैरि तुल्यः
स्वाभीष्टलाभात् कृतकृत्यभावः।
भिन्नस्पृहाणां प्रति चार्थमर्थं
द्विष्टत्वमिष्टत्वमपव्यवस्थं ॥१०६॥

कामरूपं पुरुषार्थत्रयममुञ्चमानं अपरित्यजन्तं लोकं जनं न आलोकयथ यूयं न पश्यथ यथा लोकः परमनिर्वृतिप्राप्तिलक्षणं मोक्षं परित्यज्य धर्मोदर्कमपि त्रिवर्गं सेवते तथैनं परित्यज्य काममेवाहं सेवे जनानां रुचिरेव प्रवर्त्तिका न तु गुणाः प्रवर्त्तका इति भावः ॥१०५॥

रुचिरपि व्यक्तिभेदेन नानेत्याह ॥ आकीटमिति ॥ आकीटं कीटादारभ्य आकैटभवैरि विष्णुपर्य्यन्तं सर्व्वेषां स्वाभीष्टलाभात् निजनिजाभिलषितार्थप्राप्तेः कृतकृत्यभावः कृतकृत्यत्वं चरितार्थत्वं तुल्यः समानः विष्णुर्यथा स्वाभीष्टलाभात् कृतकृत्यो भवति तथा कीटोऽपीत्यर्थः हीनस्योत्कृष्टस्य वा स्वस्वाभिलषितप्राप्त्या कृतकृत्यतायां न कश्चिद्विशेषोऽस्तीति भावः तर्हि एकस्मिन्नर्थे सर्व्वेषां समाना रुचिर्जायतामित्यत आह भिन्नस्पृहाणां विभिन्नरुचीनां सर्व्वेषामर्थमर्थं प्रति च द्विष्टत्वं द्वेषविषयत्वं इष्टत्वमिच्छाविषयत्वं अपव्यवस्थं व्यवस्था नियमस्तद्रहितं एकस्मिन् वस्तुनि सर्व्वेषामेवेच्छा द्वेषो वा भवतीति नियमो न विद्यत इत्यर्थः तस्माद्यदस्मै रोचते तत्तस्येष्टं भवति यन्न रोचते तत्तस्य द्विष्टं भवतीति अतएव मम रुचिर्जनकतादिषु इन्द्रस्तु वद जनकताद्विष्ट इति भावः ॥१०६॥

Digitized by Google

अध्वाग्रजाग्रज्जिभृतापदन्धु
र्बन्धुर्यदि स्यात् प्रतिबन्धुमर्हः ।
जोषं जनः कार्य्यविदस्तु वस्तु
मृष्या निजेच्छा पदवीं मुदस्तु ॥ १०७ ॥

नन्वसमीक्ष्यकारिणी भवती कथमस्माभिः सखीभिर्न निवारणी येत्यत आह ॥ अध्वाग्रेति ॥ हे सख्यः बन्धुः सुहृत् अध्वाग्रे अग्रव र्त्मनि जाग्रत् वर्त्तमानो निभृतो गुप्त आपत् विपत्तिरूपोऽन्धुः कूपो यस्य तादृशो यदि स्यात् तर्हि प्रतिबन्धुं सुहृद्भिर्निषेद्धुं अर्ह उचितः स्यात् अनेन पथा मा गच्छ यदि गमिष्यसि तर्हि कूपे पति ष्यसीति सुहृदां निषेधयोग्यो भवेदित्यर्थः प्रकृते त्वहं न तादृशो ऽहितकरं ज्ञात्वैव तत्र जातानुरागा भवामीति निवारणं मा कुरुते ति भावः । नन्विन्द्रं परित्यज्य मानुषं प्राप्य त्वमपि कथं हर्षं प्राप्स्यसीत्याशङ्क्याह कार्य्यवित् कार्य्यज्ञो हिताहिताभिज्ञो जनोऽ स्मिन् विषये जोषं तूष्णीं अस्तु भवतु मौनमवलम्बतां अकार्य्यज्ञो यथेच्छं वदतु कार्य्यज्ञस्तु न किंचन वदत्वित्यर्थः युष्माभिस्तु पुनर्नि जेच्छा स्वेच्छैव मुदो हर्षस्य पदवीं वर्त्मरूपं वस्तु एष्या प्रष्टव्या यथा युष्माकमपि यस्मिन्निच्छा तल्लाभादेव हर्षो जायते न त्वनिच्छा भात् तथा ममापीत्यर्थः तस्मान्नल एव इष्टत्वान्मम हर्षं जनयिष्य तीति नलमेव वरिष्यामि युष्माभिरत्र तूष्णीं स्थातव्यमिति भावः । पुंस्येवान्धुः प्रहौ कूप इत्यमरः तूष्णीमर्थे सुखे जोषमिति च ॥ १०७ ॥

Digitized by Google

इत्थं प्रतीपोक्तिमतिं सखीनां
विलुप्य पाण्डित्यबलेन बाला ।
अपि श्रुतस्वर्पतिमन्त्रिसूक्तिं
दूतीं बभाषेऽद्भुतलोलमौलिं ॥ १०८ ॥
परेतभर्त्तुर्मनसेव दूतीं
नभस्वतेवानिलसख्यभाजः ।

एवं स्वानभिमतं सखीनां वचनं निरस्य पुनरपीन्द्रदूतीं प्रति भैमी ब्रूते सेत्याह ॥ इत्थमिति ॥ बाला भैमी सखीनां प्रतीपोक्तिमतिं प्रतिकूलवचनविषयिणीं बुद्धिं पाण्डित्यस्य बलेन सामर्थ्येन इत्थं पूर्वोक्तप्रकारेण विलुप्य अपनीय दूतीमिन्द्रदूतीं बभाषे अवादीत् किम्भूतां दूतीं श्रुता स्वर्पतिमन्त्रिण इन्द्रपुरोहितस्य बृहस्पतेः सूक्तिः शोभनवचनं यया तादृशीमपि अद्भुतेन यतो बालाप्येवं वदतीत्याश्चर्यरसेन लोलचपलो मौलिर्यस्यास्तादृशीं ॥ १०८ ॥

यद्बभाषे तदाह ॥ परेतेति ॥ हे इन्द्रदूति यस्मात् पूर्वमेव मया मनसा नलो वृतस्तस्मादहं स्थिरा निश्चला आस्था आग्रहो यत्र क्रियायां तद्यथा तथा परेतभर्त्तुर्यमस्य दूतीं तथा अनिलसख्यभाजो वायुसखस्याग्नेर्दूतीं तथा अम्बुपतेर्वरुणस्य दूतीं निराशं निराशत्ववतीं दूतीनां द्रुतगमने प्रत्येकमुत्प्रेक्षते किम्भूतां यमदूतीं मनसेव अतिवेगिना मनसा वाहनेनेव आशु शीघ्रं आयातवतीं आगतां अग्निदूतीं किम्भूतां नभस्वतेव अतिवेगिना वायुना वाहने

त्रिस्रोतसेवाप्युपनेतुमाशु
स्थिरास्त्वमायातवती निरास्थं ॥ १०९ ॥
भूयोऽर्थमेनं यदि मां त्वमात्थ
तदा पतावात्तभसे मघोनः ।

नेव आशु आयातवतीं वरुणदूतीं किम्भूतां त्रिस्रोतसेव अति वेगिन्या वाहनभूतया गङ्गयेव आशु आयातवतीं वरुणस्य परेतभर्तृ त्वात् परेतप्राणानां तदधीनत्वात् ममस्य प्राणाधीनत्वात् मम सेव त्वत्ता यमदूती शीघ्रमायाता वह्नेरग्निमित्रत्वादग्निनेव कृत्वा वह्निदूती शीघ्रमायाता वरुणस्य च जलपतित्वाज्जलाग्निन्येव वरु णदूती शीघ्रमायातेत्युत्प्रेक्षा न केवलं त्वमेव मया निराकृता किन्तु यमादिदूत्योऽपि पूर्वं निराकृता इति भावः । त्वदाश्वपि सवकार पाठे तत् त्वत्तोऽपि आशु शीघ्रमायातवतीमित्यर्थः । निरास्थमिति निरपूर्वादस्यतेर्लुङि उत्तमपुरुषैकवचनम् अस्यतेस्थुगित्युम् अस्यादेशश्च ॥ १०९ ॥

भूय इति ॥ हे इन्द्रदूति त्वं यदि भूयः पुनरपि इमं इन्द्रवरणरूपमर्थं मां आत्थ ब्रवीषि तदा मघोन इन्द्रस्य पत्नौ पतत्त्वौ आत्त भसे कुरुषे इमं अपयशोनाशया भूयो न वक्तव्यमित्यर्थः तर्हि इन्द्रेऽपराधस्तोत्याह त्वाह नु पुनर्विशिनष्टि इन्द्रे कान्तर्ह्रदयस्थितं तीव्रं कठोरं मन्तुं अपराधं सतीव्रतैः पतिव्रताधर्मैर्वरं मार्जि मार्जि तुमपनेष्यामि कान्तर्ह्रदयस्थितैः सतीव्रतैरिति वा अन्यवैरं वरस्य नलस्यान्यस्मिन्वरणे वर्तमाने इच्छेति दारोपहरणाविद्यमानत्वादं

सतीव्रतैस्तीव्रमिमन्तु मन्तु-
मन्तर्वरं वज्रिणि मार्ज्जितास्मि ॥ ११० ॥

इत्थं पुनर्वागवकाशनाशा-
न्माहेन्द्रदूत्यामपयातवत्यां ।
विवेश तावं हृदयं नलस्य
जीवः पुनः क्षीवमिव प्रबोधः ॥ १११ ॥

श्रवणपुटयुगेन स्वेन साधूपनीतं
दिगधिपकृपयास्मादीदृशः संविधानात् ।

एतेन स्थिते इन्द्रे इति वा नले तुष्टे इन्द्रोऽपि तोषं गमिष्यतीति भावः । आगोऽपराधो मन्तुरित्यमरः ॥ ११० ॥

एवं निरस्तायामिन्द्रदूत्यां नलस्य भैमीलाभसम्भावनामाह ॥ इत्थमिति ॥ इत्थं पूर्वोक्तप्रकारेण शपथदानेन पुनर्वाचोऽवकाशस्य अवसरस्य नाशाद्धेतोर्माहेन्द्रदूत्यां अपयातवत्यां अपगतायां सत्यां नलस्य जीवः प्राणो तावत् भैमीच दूत्यच न किञ्चिदापमित्यादिचिन्तावशाच्चलं हृदयं पुनर्विवेश विशति स्म इव यथा प्रबोधो ज्ञानं क्षीवं मत्तं विशति तथा दूत्यामागतायां चिन्तावशात्तस्य प्राणा मन्दा एवाभवन् अपगतायान्तु तस्यां यद्येव भैमीप्राप्तिर्दूत्यप्राप्तिर्वा भविष्यतीति निश्चयेन तस्य प्राणाः पुनरागता इवेत्यर्थः । मत्तोऽपि क्षीवो भवति । क्षीवमिति क्षीवशब्दो मः क्षीवृञ्मदक्षोऽदमादादिति तस्य स्थानेऽस्त् ॥ १११ ॥

अथ छन्दोऽन्तरेण सर्गान्तं सूचयति ॥ श्रवणेति ॥ निषधजनपदस्य निषधदेशस्येन्द्रो नल आनन्दसान्द्रोऽतिहृष्टः सन् दिगधि

अलभत मधु बालारागवागुत्थमित्थं
निषधजनपदेन्द्रः पातुमानन्दसान्द्रः ॥ ११२ ॥

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यं।
षष्ठः खण्डनखण्डतोऽपि सहजात् क्षोदक्षमे तन्महा
काव्येऽयं व्यगलन्नलस्य चरिते सर्गो निसर्गोज्ज्वलः॥११३॥

पानां दिक्पालानामिन्द्रादीनां कृपया प्राप्तात् ईदृशात् दूतत्वादस्य लक्षणात् संविधानात् सङ्घटनाद्धेतोरित्थं पूर्वोक्तप्रकारं बालाया भैम्या रागवाचोऽनुरागवचनादुत्थमुत्थितं मधु अमृतायमानवचनमित्यर्थः पातुं सादरमाकर्णयितुं अलभत लभते स्म किम्भूतं स्वेन स्वकीयेन श्रवणलक्षणेन पुटयुगेन पात्रयुगलेन साधु सम्यग्यथा तथा उपनीतं आनीतं पूर्वं भैम्याः सानुरागवचनं हंसादिमुखेन श्रुतवान् अधुना तु इन्द्रादिकृपया प्राप्तादस्माद्दूतत्वात् सन् स्वयं श्रुतवानित्यर्थः आनन्दसान्द्रमिति पाठे क्रियाविशेषणं। मालिनीवृत्तमिदं ॥ ११२ ॥

श्रीहर्षमित्यादि ॥ सहजात् एकोत्पत्तिस्थानकतया सहोदरात् खण्डनं षड्दर्शनमतनिराकरणग्रन्थविशेषस्तदेव खण्डोऽविरसमधुरत्वाद्गुडविकारस्तस्मादपि क्षोदक्षमे उपमर्दसहे विचारयोग्ये काव्ये तथा शृङ्गारभूयिष्ठत्वात् खण्डनग्रन्थापेक्षयाप्यविरसमधुरे इत्यर्थः नलस्य चरिते षष्ठः षष्ठां पूरकः सर्गो व्यगलत् समाप्तः अन्यत् सर्वं पूर्ववत्। खण्डनग्रन्थोऽप्यनेन कृत इति भावः ॥ ११३ ॥

इति श्रीप्रेमचन्द्रन्यायरत्नविरचितायामन्वयबोधिकासमाख्यायां नैषधटीकायां षष्ठः सर्गः समाप्तः ॥

Digitized by Google

॥ अथ सप्तमः सर्गः ॥

अथ प्रियासादनशीलनादौ
मनोरथः पल्लवितश्चिरं यः।
विलोकनेनैव स राजपुत्र्याः
पत्या भुवः पूर्णवदभ्यमानि ॥ १ ॥

एवमिन्द्रादिदूतीनिराकरणेन भैमी मय्येवानुरक्तेति निश्चित्य हृष्टोऽतिप्रियामनन्तां प्रत्यक्षं वर्णयति कोऽपि तदनुवदितुं सप्तमं सर्गमारभते ॥ अथेति ॥ अथेन्द्रदूतीनिराकरणानन्तरं भुवः पत्या भूस्वामिना नलेन राजपुत्र्या भैम्या विलोकनेनैव दर्शनमात्रेणैव स मनोरथः पूर्णवत् परिपूर्ण इव फलितप्रायोऽभ्यमानि मानितः। प्राप्तिं विनापि दर्शनमात्रेणैव प्राप्तिजन्यमानन्दं प्राप्तवानित्यर्थः। स कः यो मनोरथोऽभिलाषः प्रियाया भैम्या आसादने प्राप्तिविषये शीलने विशेषरूपेण भावनायामाकलनविषये आदिपदात् सम्भोगादिविषये च चिरं प्रतिदिनं पल्लवितो जातपल्लवः मया भैमी प्राप्यतां विशेषेण च तस्या भावादयोऽनुभूयन्तां सम्भोगादयश्च तस्या मया सह जायन्तामित्यादिना यः पूर्वं प्ररूढोऽभूदित्यर्थः। अस्मिन् सर्गे पूर्वसर्गवदुपजातिश्छन्दः ॥१॥

Digitized by Google

प्रतिप्रतीकं प्रथमं प्रियाया
मथान्तरानन्दसुधासमुद्रे।
ततः प्रमोदाश्रुपरम्परायां
ममज्जतुस्तस्य दृशौ नृपस्य ॥ २ ॥
ब्रह्मादयस्तान्वभवत् प्रमोदं
रोमाग्र एवाग्रनिरीक्षितेऽस्याः।

प्रत्यङ्गं भैमीमालोकयतस्तस्यानन्दोदयादश्रुधारा जातेत्याह ॥ प्रतीति ॥ तस्य नृपस्य नलस्य दृशौ चक्षुषी प्रथमं प्रतिप्रतीकं प्रत्यवयवं प्रियायां भैम्यां ममज्जतुर्निममे अथानन्तरं अन्तरानन्द एव सुधा अमृतं तस्याः समुद्रे ममज्जतुः आन्तरहर्षातिशयवशात् किञ्चिद्दृष्टवत्युरित्यर्थः ततोऽनन्तरं प्रमोदाश्रुपरम्परायां आनन्दजनितनेत्रजलप्रवाहे ममज्जतुः प्रथमं भैम्याः प्रत्यवयवसौन्दर्यदर्शनं तस्मादानन्दस्तस्माच्चाश्रुपरम्परा तत्र जातेत्यर्थः अन्योऽपि समुद्रजलप्रवाहे निमज्जति। अङ्गं प्रतीकोऽवयव इत्यमरः ॥ २ ॥

एवं चक्षुःप्रमोदमुक्त्वा मनःप्रमोदमाह ॥ ब्रह्मेति ॥ असौ नलोऽस्याभैम्या रोमाग्र एव अग्रनिरीक्षिते प्रथमं दृष्टे सति ब्रह्मादयस्य ब्रह्मैक्यस्य प्रमोदं जीवाभिन्नतया ब्रह्मसाक्षात्कारजनितानन्दसदृशमानन्दमित्यर्थः अन्वभवत् अनुभूतवान् अथानन्तरं इत्थमनेन प्रकारेण तस्या भैम्या अशेषा सकलाङ्गविषयिणी या दृष्टिर्दर्शनं तस्यां सत्यां यथा यादृशी औचिती उचितं भवति तथा स्मराद्वैतमुदं मदनैक्यजनितमानन्दं अन्वभवत् ब्रह्मानन्दापेक्षया कामानन्दोऽधिकतर इति कामिनामनुभवात् यस्याः रोमाग्रमात्रदर्शने

Digitized by Google

दयैषितीर्थं तदशेषदृष्टा
पय सारादैतमुदन्नयासौ ॥ ३ ॥
वेलामतिक्रम्य पृथुं मुखेन्दो
रालोकपीयूषरसेन तस्याः ।
नलस्य रागाम्बुनिधौ विवृद्धे
तुङ्गौ कुचावाश्रयतः स्म दृष्टी ॥ ४ ॥
मग्ना सुधायां किमु तन्मुखेन्दो
र्लग्ना स्थिता तत्कुचयोः किमन्तः ।

ग्रस्याबेलामन्दोऽनुभूयते तस्याः रमणीयसकलावयवदर्शने ग्रस्यार्थे
तावन्दार्धिकतरः कामानन्दो भवितुमुचितइत्यर्थः वेषां रे ।ग्याम
घेयदृष्टौ सत्यामिति वा ॥ ३ ॥

वेलामिति ॥ तस्या भैम्या मुखेन्दोर्मुखचन्द्रस्य आलोको दर्शनमस्य
यो यः पीयूषरसोऽमृतरसस्तेन करणेन आलोकरूपं यत् पीयूषं
तस्य यो रसः प्रीतिस्तेन वा नलस्य रागाम्बुनिधौ अनुरागसमुद्रे पृथुं
महतीं वेलां दृष्टसमयरूपां मर्य्यादां अतिक्रम्य विवृद्धे उपचिते
सति नलस्य दृष्टी द्वे चक्षुषी तुङ्गौ उच्चौ कुचौ स्तनौ आश्रयतः
स्म भैम्या मुखदर्शनेन दृष्टसमयविरोधनुरागाधिक्यात् उच्चस्तना
वपि नलो विलोकयामासेति भावः प्रथमं तस्यामुखं ततः स्तनौ दद
र्शेति परमार्थः अन्योऽपि चन्द्रामृतरसातिरेकेण वेलामतिक्रम्य
समुद्रे विवृद्धे सति तुङ्गस्थानमाश्रयति । दृष्टिरित्येकवचनान्तः
क्वचित्पाठः ॥ ४ ॥

मग्नेति ॥ अस्य नलस्य दृष्टिश्चक्षुः स्खलनाद्भिया नु पतनाद्भयेनेव ग्र
णीयोऽतितरां कृशं तस्याभैम्या मध्यं मध्यभागं चिरेण कष्ट विलम्ब्य

Digitized by Google

चिरेण तन्मध्यममुञ्चताथ
दृष्टिः क्रशीयः स्खलनाद्भिया नु ॥ ५ ॥
प्रियाङ्गपान्था कुचयोर्निवृत्य
निवृत्य लोला नलदृग्भ्रमन्ती ।

अमुष्य तव्याज अतिकृशमेतन्मध्यं यद्यहं क्षीणं त्यजामि तर्हि पतिष्या मीति भयेनेव विलम्बेन तथाभैव्यर्थः क्षीणत्वादतिमनोज्ञं तस्यामध्यं चिरेण नलो ददर्शेति भावः किम्भूता दृष्टिः तस्या भैम्यामुखेन्दोर्मुख चन्द्रस्य सुधायां किमु मग्ना निमग्नेव तथा तस्याः कुचयोः स्तनयोरन्त र्मध्ये तमा स्तनता सती किं स्थिता पूर्वं मुखकुचयोरेव दृष्टेर्गतत्वात् कु चान्तरालस्य संकुचितत्वया निर्गन्तुमशक्ता सती स्थितैवेत्यर्थः उत्प्रेक्षा इयं दृष्टेर्विलम्बेन मध्यपरित्यागोत्प्रेक्षायां हेतुः अन्योऽपि यदि प्रथमं ह्रदादिपङ्के निमज्जति अनन्तरं सङ्कुचितस्थाने च पतति ततोऽविदृष्टं तया क्षीणदेशमासाद्य पतनाशङ्कया विलम्बेन तं परित्यजति ॥ ५ ॥

प्रियाङ्गेति ॥ प्रियाया भैम्या अङ्गे शरीरे पान्था नित्यपथिका लोला चपला अथ च स्पृहावती तस्य नलस्य दृक् दृष्टिर्निवृत्य निवृ त्य पुनः पुनः प्रतिनिवृत्य कुचयोः स्तनयोर्भ्रमन्ती पर्यटन्ती सती तभा तमां अतिशयेन शुशुभे अत्रोत्प्रेक्षते किम्भूता दृक् तयोः कुचयोर्व र्तमानो यो मृगनाभिलेपः कस्तूरिकालेपः स एव छायावर्तत्वात्तमो ऽन्धकारस्तेन समासादिता प्राप्तोदिग्भ्रमोदिङ्मोहो यया वाढ

बभौ तमां तन्मृगनाभिलेप
तमःसमासादितदिग्भ्रमेव ॥ ६ ॥
विश्रम्य तच्चारुनितम्बचक्रे
दूतस्य दृक् तस्य खलु स्खलन्ती ।
स्थिरा चिरादास्त तदूरुरम्भा
स्तम्भावुपाश्लिष्य करेण गाढं ॥ ७ ॥
वासः परं नेत्रमहं न नेत्रं
किमु त्वमालिङ्गय तन्मयापि ।

वीव अन्योऽपि पान्थस्तमसा प्राप्तदिग्मोहो भ्रमन् विलम्ब्य विलम्ब्य पूर्व्वस्थानं प्राप्नोति सर्व्वावयवालोकनतत्परोऽपि नलः मध्याङ्काद न्तरया कुचावेव ददर्शेति भावः । लोलश्चञ्चलसतृष्णयोरित्यमरः ॥ ६ ॥

विश्रम्येति ॥ तस्य दूतस्य नलस्य दृक् दृष्टिस्तस्या भैम्याश्चारुणि सुन्दरे नितम्बचक्रे चक्रे विश्रम्य विश्रम्येव भ्रमित्वा अथ च विश्रमं विश्रामं प्राप्य स्खलन्ती खलु भ्रमणायासात्पतन्तीव सती तस्या भैम्या ऊरू एव रम्भास्तम्भौ कदलीस्तम्भौ करेण रश्मिना अथ च हस्तेन गाढमतिशयं उपाश्लिष्य आलिङ्ग्य चिरात् बहुकालं स्थिरा निश्चला आस्त स्थिता अन्योऽपि चक्रभ्रमणं प्राप्य ततः स्खलिता कदलीस्तम्भं हस्तेन गाढमालिङ्ग्य चिरं स्थिरो भवति नलो भैम्याश्चि रमणं दृष्ट्वा आदरेण रम्भास्तम्भनिभावूरू ददर्शेति भावः । बलिहस्तांशवः कराः इत्यमरः ॥ ७ ॥

वास इति ॥ सा नलस्य दृक् दूतीव कारणात् तत्पदयोर्भैमीचरणयोः प्रणाम प्रणामं चकार अथ च सन्निकर्षं प्राप इति किं हे भैमि

Digitized by Google

उरो नितम्बोरु कुरु प्रसाद
मितीव सा तत्पदयोः पपात ॥ ८ ॥
दृग्भ्यां यथाकाममथोपहृत्य
स प्रेयसीमालिकुलस्य तस्याः ।
इदं प्रमोदाद्भुतसम्भृतेन
महीमहेन्द्रो मनसा जगाद ॥ ९ ॥

पदं वासो वस्त्रं नेत्रं आच्छादनं अथ च नेत्रपदप्रतिपाद्यं अहं किमु नेत्रं न अपि तु अहमपि नेत्रपदप्रतिपाद्यं यस्माद्भवामि तत्तस्मादुभयोरपि नेत्रशब्दप्रतिपाद्यत्वात् कारणात्मयापि उरो नितम्बोरु आलिङ्गय वेष्टय यथा नेत्रपदप्रतिपाद्येन वस्त्रेण वक्षो नितम्बं ऊरू च आलिङ्गयसि तथा मयापि तत्तदालिङ्गयेत्यर्थः अथ च वस्त्रमपसार्य्य तत्तदङ्गं प्रदर्शय । प्रसादं कुरु तत्तदङ्गालिङ्गनार्थं मयि प्रसन्ना भव अन्योऽपि स्वसजातीयस्य यस्मादुच्चपदप्राप्तिं पश्यति मह्यमपीदं पदं दीयतामिति तच्चरणयोः पतति । ततो भैम्या ऊरू दृष्ट्वा चरणौ ददर्शेति भावः । नेत्रं पथि गुणे वस्त्रभेदे मूले द्रुमस्य च । रथे चक्षुषि नयान्तु नेत्री नेतरि वाच्यवदिति मेदिनी । उरो नितम्बोर्व्विति प्राण्यङ्गत्वादेकवद्भावो नपुंसकत्वञ्च ॥ ८ ॥

दृग्भ्यामिति ॥ अथानन्तरं स महीमहेन्द्रो नलः यथाकामं अभिलाषमनतिक्रम्य प्रेयसीं प्रियतमां भैमीं तस्या भैम्या आलिकुलं सखीसमूहञ्च दृग्भ्यां चक्षुर्भ्यामुपहृत्य उपायनीकृत्य भैमीं तत्सखीश्च सादरं दृष्ट्वेत्यर्थः प्रमोदो भैमीविलोकनेनानन्दः अद्भुतं तत्सौन्दर्य्यदर्शनेनाश्चर्य्यं ताभ्यां सम्भृतेन व्याप्तेन मनसा इदं वक्ष्यमाणं जगाद उवाच मनसैव भैमीं वर्णयामासेत्यर्थः ॥ ९ ॥

Digitized by Google

पदे विधातुर्यदि मन्मथो वा
ममाभिषिच्येत मनोरथो वा
तदा घटेतापि न वा तदैतत्
प्रतिप्रतीकाद्भुतरूपशिल्पं ॥ १० ॥
तरङ्गिणी भूमिभृतः प्रसूता
जानामि शृङ्गाररसस्य सेयं ।

अथानुरागाद् वदति ॥ पद इति ॥ विधातुर्विश्वनिर्म्मातुर्ब्रह्मणः पदे ऽधिकारे सृष्टिव्यापारे मन्मथो वा कन्दर्पो वा मम मनोरथोऽभिलाषो वा यदि अभिषिच्येत नियुज्येत तदापि तदनिर्व्वचनीयं एतत् पुरोदृश्यमानं तस्याः प्रतिप्रतीकं प्रत्यवयवं अतिरमणीयत्वादद्भुतं आश्चर्य्यकारि यद्रूपं लावण्यं तस्य शिल्पं निर्म्माणं घटेत युज्येत नवा घटेत नवा युज्येत विधातुर्वेदजडत्वादीदृग्रूपनिर्म्माणासमर्थतया कथञ्चित्तत्र कामो मदभिलाषो वा निर्म्मायकतया सम्भाव्यत इत्यर्थः मदिच्छानुरूपं कामोद्दीपकञ्च भैमीरूपमिति भावः ॥ १० ॥

तरङ्गिणीति ॥ भूमिभृतो भीमभूपतेः प्रसूता उत्पन्ना सेयं दमयन्ती शृङ्गाररसस्य तरङ्ग उद्रेकः वहतो अथ च नदीति जानामि मन्ये तस्यां दमयन्त्यां उच्छ्वसनतया अभ्युच्चकुचतया घनेन निविडेन यौवनेन तथाऽनिर्व्वचनीयप्रकारो लावण्यपूरः सौन्दर्य्यविस्तारिरजनि जनितः दमयन्त्याः प्रथमावतीर्णयौवनतया उच्चकुचत्वं सौन्दर्य्याधिक्यं शृङ्गाररसोद्रेकश्च जात इति भावः अथ च भूमिभृतः पर्व्वतादुत्पन्नायां शृङ्गात् पर्व्वताग्रभागादारोगमनं यस्य तादृशस्य रसस्य जलस्य तरङ्गिण्यां

Digitized by Google

लावण्यपूरोऽजनि यौवनेन
यस्यास्तथोच्चैस्तनताघनेन ॥ ११ ॥
अस्यां वपुर्व्यूहविधानविद्यां
किन्द्योतयामास नवामवाप्तां ।

यथा उच्चैर्यथा तथा स्तनता गर्जता घनेन मेघेन पूरो जलप्रवाहो जन्यते । यस्या घनेन निविडेन यौवनेन लावण्यपूरोऽजनि तथा उच्चैस्तनता उच्चकुचत्वञ्च अजनीति भावः । रसः स्वादे जले वीर्य्ये शृङ्गारादाविति हेमचन्द्रः पूरो जलप्रवाहे स्यादिति विश्वः ॥ ११ ॥

अस्यामिति ॥ किं वितर्के लावण्यसीमा सौन्दर्य्यपरमकाष्ठा कर्त्री नवां नूतनां अवाप्तां कुतश्चित् प्राप्तां वपुर्व्यूहविधानविद्यां शरीरसमूहकरणविद्यां अस्यां भैम्यां किं द्योतयामास प्रकाशयामास यस्मात् प्रत्यङ्गं प्रत्यवयवं सर्व्वावयवेषु यः सङ्गः सम्बन्धस्तेन स्फुटं व्यक्तं यथा तथा लब्धः प्राप्तो भूमा प्राचूर्य्यं यया तादृशी सती इमां भैमीं व्याप्ते आश्रयति भैम्याः सर्व्वावयवानामपि लावण्यभूयिष्ठत्वाल्लावण्यसीमा किमस्यां कायविस्तारं चकारेति वितर्कः अन्योऽपि योगी कायव्यूहं प्रकाशयति नवामवाप्तामित्यनेन भैमी बाल्ये नैतादृगासीत् अधुनैव सर्व्वावयवावच्छेदेन लावण्यशालिनी जातेति सूचितं । क्वचित्पुस्तके अवाप्तामित्यत्र सकाम इति पाठस्तत्रायमर्थः स प्रसिद्धः कामः कन्दर्पो नवां तदैवाभ्यस्तां वपुर्व्यूहविधानविद्यां अस्यां किं द्योतयामास यस्मात् प्रत्यङ्गसङ्गस्फुटलब्धभूमा लावण्यसीमा इमामुपास्ते लावण्यसीम्नः कामानुसारित्वात् अस्याः प्रत्यङ्गं कामः किं देह

प्रत्यङ्गसङ्गस्फुटलब्धभूमा
लावण्यसीमा यदिमामुपास्ते ॥ १२ ॥
जम्बालजालात् किमकर्षि जम्बू
नद्या न हारिद्रनिभप्रभेयं ।
अप्यङ्घ्रियुग्मस्य न सङ्कुचित्व
मुन्नीयते दन्तुरता यदत्र ॥ १३ ॥
सत्येव साम्ये सदृशाद्विशेषा
द्गुणान्तरेणोच्चकृषे यदङ्गैः ।

वृत्तेनावतिष्ठत इत्यर्थः भैम्या मुखलग्नाघाङ्गं यथा काममुद्दीपयति तथैव राज्यप्यङ्गानीति भावः ॥ १२ ॥

जम्बालेति ॥ हारिद्रनिभा हरिद्रारञ्जिततुल्या सुवर्णतुल्या वा प्रभा कान्तिर्यस्यास्तादृशी इयं भैमी जम्बूनद्या जम्बूफलरसजातनद्या जम्बालजालात् पङ्कसमूहात् किं नाकर्षि नाकृष्टा न निर्मिता अपि तु तत एव आकर्षीत्यर्थः निर्मितेत्यर्थात् यस्मादस्याः भैम्या अङ्घ्रियुग्मस्य चरणद्वययुग्मस्य सङ्कुचित्वं परस्परसंश्लिष्टत्वं दन्तुरतापि निम्नोन्नततापि नोन्नीयते न ज्ञायते भैम्याः सुवर्णवर्णत्वात् मांसलत्वात्त्वलिताङ्गसन्धिविकलत्वाच्च जम्बूनद्याः पङ्केन निर्माणमुचितं जम्बूनद्याः पङ्कं हि जाम्बूनदं सुवर्णं तच्च पङ्काद्राज्यते तथोपा धयप्रदेशेषु निम्नोन्नतता न संलक्ष्यते भैमी अविवरा गौरी ईदृशी सलक्षणा चाभिजनसुखदेति भावः । निषद्वरस्तु जम्बालः पङ्कोऽस्त्री शा दकर्दमाविन्यमरः ॥ १३ ॥

सत्येवेति ॥ अस्या भैम्या अङ्गैर्मुखाद्यवयवैः कर्तृभिः साम्ये वर्तुलत्वा दिना सादृश्ये सत्येव विद्यमान एव अन्येषात् समत्वात् सदृशात् सद

अस्यास्तनः स्यात्तुलनापि नाम
वस्तु त्वमीषामुपमापमानः ॥ १४ ॥
पुराकृति स्त्रैणमिमां विधातु
मभूद्विधातुः खलु हस्तलेखः ।

स्वत्वेनाभिमतात् चन्द्रादेर्गुणान्तरैरथ अत्याह्लादकत्वनिष्कलङ्कत्वादिना यत् उत्कर्षे उत्कृष्टेर्जातं ततस्तस्मात् तुलनापि नाम स्यात् समानतापि भवेत् माभूद्वाऽमीषां चन्द्राद्यपेक्षयाधिक्यं उभयेषां न्यूनाधिक्यशून्यतापि स्वीक्रियतामित्यर्थः वस्तु तु परमार्थतः पुनरमीषामङ्गानां उपमा उपमेयत्वं अपमानस्तिरस्कारः हीनस्यैवोपमेयत्वेन अधिकस्य तदभावात् सर्व्वत्र हि उपमानस्याधिक्यं उपमेयस्य न्यूनत्वं प्रसिद्धं तथाचान्यरमणीमुखाद्यङ्गापेक्षया चन्द्रादीनामाधिक्यात्तत्र ते उपमानतां गच्छन्तु अत्र तु भैमीमुखादीनामेव चन्द्राद्यपेक्षयोत्कृष्टत्वात् दुपमानत्वे वक्तव्ये उभयेषां समानतापि वा कथञ्चिद्वक्तव्या नतु कदापि हीनानां चन्द्रादीनामुपमानतया आधिक्यमित्यर्थः भैम्या अङ्गानि चन्द्राद्यपेक्षयाप्याह्लादजनकानीति भावः ॥ व्याख्यान्तराणि तु प्राचीनानामरमणीयतया परित्यक्तानि ॥ १४ ॥

पुरेति ॥ स्त्रैणं स्त्रीसमूहः इमां भैमीं विधातुं निर्म्मातुं पुरा प्रथमं कृतिर्निर्म्माणं यस्य तादृशं स्त्रैणं स्त्रीवृन्दं विधातुर्ब्रह्मणो हस्तलेखो हस्ताभ्यासोऽभूत् भैमीजन्मनः प्राक् ब्रह्मणा यत् रम्भामेनकादिस्त्रीणां निर्म्माणं कृतं तदतिसुन्दरीं भैमीं निर्म्मातुं हस्ताभ्यास एव कृत इत्यर्थः अन्योऽपि शिल्पी प्रथमं हस्ताभ्यासं कृत्वा पश्चात् सुन्दरं वस्तु निर्मिमीते पूर्व्वकृतस्त्रीसमूहापेक्षया भैमी अतिसुन्दरीति भावः न केवं प्राक्तनस्त्रीसमूहस्यैव हस्ताभ्यासमात्रप्रयोजनकत्वे भैम्याः स

येयं भवद्भाविपुरन्ध्रिसृष्टिः
सास्यै यशस्तज्जयजम्प्रदातुं ॥ १५ ॥
भव्यानि वानीरगुरेतदङ्गा
व्यथा यथानर्त्ति तथा तथा तैः।

मानवदानवीनां पञ्चास्मातानाम्मा स्त्रीणां सृष्टौ किं प्रयोजनमित्या शङ्क्याह या इयं भवन्ती वर्त्तमाना भाविनी भविष्यन्ती च पुरन्ध्रिसृष्टिः स्त्रीनिर्मितिः सा अस्यै भैम्यै तज्जयजं तस्या भवद्भाविपुरन्ध्रिवर्गे भैमीवर्त्तकत्वे यो जयस्तस्माज्जातं यशः प्रदातुं नलन्यत् किमपि कर्त्तुं यशो ह्युत्कर्षप्रयुक्तं उत्कर्षश्च सजातीयनिष्ठनिकर्षज्ञानापेक्षः यदि विधाता अतिसुन्दरीं भैमीं निर्माय तदानिकृष्टानामितरस्त्रीणां निर्माणं न कुर्य्यात्तदा विधाता भैमीतोऽप्युत्कृष्टां निर्मातुं समर्थ इति जनानां सम्भावनया इयमेवैकसुन्दरीति यशो भैम्याः कथं स्यादित्यर्थः भूतभविष्यद्वर्त्तमानेषु भैमीसदृशी न कापि सुन्दरीविभावः। तदभ्यासाय लिखनं हस्तलेखः स उच्यत इति वचः। इकारान्तः पुरन्ध्रिशब्दोऽप्यस्ति। भवद्भावीति स्त्रीत्वविवक्षायाः प्राक् द्वन्द्वं कृत्वा पुरन्ध्रिशब्देन यथाकथञ्चित् कर्मधारयः अन्यथा भवन्तीभावीति स्यादिति प्राञ्चः भवत् भावि च यथा तथा चेयं पुरन्ध्रिसृष्टिरिति सचारो रविमन्दिरावधीत्यादिवत् सृष्टिक्रियाविशेषणमिति गुरवः वस्तुतस्तु सृष्टिपदप्रतिपाद्यत्वावच्छिन्ने भवत्त्वभावित्वयोरांशिकत्वेनाविरोधात् क्रमेण कर्मधारये उक्तपुंस्केत्यादिना पुंवद्भावोऽविरुद्ध इति ध्येयं ॥ १५ ॥

भव्यानीति ॥ भव्यानि सुन्दराणि चन्द्रपद्माद्युपमानवस्तूनि एतस्या भैम्या अङ्गान्मुखाद्यवयवास्तथा यथा वानीरपङ्क्तीन् पराश्रयान् अगु

तस्याधिकस्योपमयोपमाता
दाता प्रतिष्ठां खलु तेभ्य एव ॥ १९ ॥
नास्पर्शि दृष्टापि विमोहिकेयं
दोषैरशेषैः स्वभियेति मन्ये।

प्रापुः तथा यथा तैर्भैमीवैरनर्ति हर्षात् नृत्यं कृतं अपकर्षमितिभयप्राप्ता वपि कथं तेषां नृत्यमित्यत आह खलु यस्मादुपमाता उपमानकर्त्ता कविः अधिकस्य उत्कृष्टस्यापि तस्य भैम्यङ्गस्य उपमया सादृश्येन तेभ्य एव तुल्यकक्षाणामितरेषामभावात् चन्द्रपद्मादिभ्य एव प्रतिष्ठां माहात्म्यं दाता दास्यति भैमीमुखं चन्द्रसमानकान्तीत्यादिना समानतया कविभिर्वर्ण्यमानत्वात् उत्कृष्टान्यपि भैम्या अङ्गानि अस्माकमुपमेयानीति वयं धन्या इत्यानन्दवशान्नृत्यं कृतमितिभावः अतएवोक्तं पराभवोऽप्युत्तमतोहि कीर्त्तय इति। अगुरिति इस्वगतावित्यस्मात्कुङोऽन् इखिकोर्गा इति इणो गादेशः दातेति लुट्स्याह ॥ १९ ॥

नास्पर्शीति ॥ इयं भैमी दृष्टापि दर्शनविषयतामात्रं गतापि सती विमोहिका कामविकारजनिका अथ च मूर्च्छाजनिका इति स्वस्य निजस्य भिया भयेन हेतुना अशेषैः समस्तैरपि दोषैः कर्तृभिरियं नास्पर्शि न स्पृष्टेत्यहं मन्ये उत्प्रेक्षे या दर्शनमात्रेणापि मोहं जनयति सा दर्शनापेक्षयाप्यतिसन्निकृष्टेन स्पर्शेन किं करिष्यतीति भयेन दोषैर्न स्पृष्टेत्यहं मन्य इत्यर्थः। यस्मादियं दोषैर्न स्पृष्टा ततस्मात् अन्येषु भैमीभिन्नस्थानेषु तैर्दोषैराकुलितः सव्यासाद्याकुलतां प्रापितो गुणौघः सौन्दर्यादिगुणसमूहः अस्यामेव निःशत्रुतया सुखी सन् अस्यां भैम्यां वसति अन्यत्र वैरिभिः सहवसतो महत् कष्टं अस्यान्तु तदभावात् सुखेन वसतीत्यर्थः

अन्येषु नैराकुलितस्तदस्यां
वसत्यसापत्न्यसुखी गुणौघः ॥ १७ ॥
कोशश्रीः प्रियाङ्कैर्घृणयैव त्यक्ता
न वारिदुर्गात्तु वराटकस्य ।
न कण्टकैरावरणाच्च कान्ति
र्धूलीभृता काञ्चनकेतकस्य ॥ १८ ॥

अन्यत्र तु गुणदोषाः सम्वलिताः सन्ति अस्यान्तु दोषान सन्त्येव केवलं सर्व्वे गुणाः सन्तीति भावः अन्योऽपि सपत्नरहितं स्थानं लब्धा निर्बाध स्थाने सुखेन वसति अमीभिरित्यनन्तरमपिशब्दोऽध्याहर्त्तव्यः अन्यथा सर्व्वैर्दोषैर्नाश्रयि किन्तु कियद्भिर्दोषैराश्रयीति विरुद्धप्रतीतिप्रसङ्गः स्यात् ॥ १७ ॥

कोशश्रीति ॥ प्रियाया भैम्या अङ्गैरवयवैः वराटकस्य मध्यबीजको शस्य कान्तिस्तस्या विगलतरहिता इति मत्वा घृणयैव जुगुप्सयैव कोशश्रीः त्यक्ता ननु न पुनर्वारिदुर्गात् जलरूपदुर्गसमाश्रयणेन यद्वी गुणसाम्यात् त्यक्ता अपितु घृणयैव त्यक्ता अपि तस्य विरोधस्या ते वारणान्तराभावात् तथा काञ्चनकेतकस्य सुवर्णकेतककुसुमस्य कान्तिश्च धूलीभिर्ध्वता पूर्णा इति मत्वा घृणयैव श्रीश्च न पुन कण्टकैस्तीक्ष्णाग्रावयवविशेषैरग्र च कुसुमस्तुसमूहैः त्यक्ता यदा वरणं वेष्टनं तथ च रक्षणं तस्माद्वेतोर्वा कोशश्रीः अपि तु घृणयैव कोशश्रीः वराटकसुवर्णकेतकाभ्यामपि परित्यक्तमोरत्यर्थमहित भावः । बीजकोशो वराटक इत्यमरः ॥ १८ ॥

Digitized by Google

प्रत्यङ्गमस्यामभिकेन रक्षां
कर्त्तुं मघोनेव निजास्त्रमस्ति ।
वज्रञ्च भूषामणिमूर्त्तिधारि
नियोजितन्तद्द्युतिकार्म्मुकञ्च ॥ १९ ॥
अस्याः सपक्षैकविधोः कचौघः
स्थाने मुखस्योपरि वासमाप ।

प्रत्यङ्गमिति ॥ अस्यां भैम्यामभिकेन कामुकेन मघोना इन्द्रेण प्रत्यङ्गं प्रत्यवयवं दोषादेः सकाशात् रक्षां कर्त्तुं भैम्या रक्षणाय नियोजितमिव नियुक्तमिव निजास्त्रं स्वायुधं वज्रञ्च भूषामणिमूर्त्तिधारि सत् भूषणवज्राख्यरत्नशरीरधारामायत्तं सत् भैम्यां प्रत्यङ्गं अस्ति विद्यते तथा तस्य वज्रस्य द्युतिः कान्तिरूपमस्याः कार्म्मुकञ्च इन्द्रधनुश्च अस्ति प्रत्यवयवमलङ्कारेषु हीरका विद्यन्ते तेषां द्युतिश्च शक्रचापवत् सर्व्वत्र प्रकाशते तत्र वज्रशब्दच्छलेन श्लेषहेतुकोत्प्रेक्षा इन्द्रधनुषश्च वज्रद्युतिरूपत्वं प्रसिद्धं अन्योऽपि स्वाभीष्टं वस्तु रक्षितुं कमपि निजं नियुङ्क्ते । प्रत्यङ्गमिति काकाक्षिगोलकन्याया दुभयत्र सम्बध्यते अकारो परस्वरमनुयायी । वज्रं हीरके पवावित्यमरः । प्रकाशे शक्रचापानामुदयस्तु यतो भवेत् । अतो यत्र तत्र वज्रमूलको मणिः स्यात् इति रत्नपरीक्षा ॥ १९ ॥

एवं सामान्यतो वर्णयित्वा केशतारम्भापादनखान्तं विशेषतः क्रमेण वर्णयितुमुपक्रममाणः सम्प्रति त्रिभिः श्लोकैः केशान् वर्णयति ॥ अस्या इति ॥ सपक्षो मित्रं सख्य च सदृश एकः केवलो विधुश्चन्द्रो यस्य तादृशस्य अस्या दमयन्त्या मुखस्य उपरि ऊर्द्ध्वे कचौघः केशसमूहः

Digitized by Google

पक्षस्थतावद्बहुचन्द्रकोऽपि
कलापिना येन जितः कलापः ॥ २० ॥
अस्यायदास्येन पुरस्तिरश्च
तिरस्कृतं शीतरुचान्धकारं ।
स्फुटं स्फुरद्भङ्गकचच्छलेन
तदेव पश्चादिदमस्ति बद्धं ॥ २१ ॥

यत् वासं वसतिं आप प्राप्तवान् तत् स्थाने युक्तं यत्तदित्यर्थोऽवगम्यते कथमित्यत आह येन कचौघेन पक्षस्थाः पतत्रस्थिता अथ च मित्र भूतास्तावन्तो बहवश्चन्द्रका मेचका अथ च चन्द्रा एव चन्द्रका यस्य तादृशोऽपि कलापिनां मयूराणां कलापः पिच्छभारो जितः योहि बहूनां चन्द्राणां मित्रं जितवान् स एकचन्द्रसहायस्योपरि वस्तु मर्हत्येव मयूरपिच्छापेक्षयाप्यतिरमणीयो भैम्याः केश इति भावः । युक्ते द्वे साम्प्रतं स्थाने इत्यमरः पक्षो मासार्द्धके पार्श्वगृहे साध्य विरोधयोः । केशादेः परतो वृन्दे बले सखिसहाययोः पुच्छोरन्ध्रे पतत्रे चेति मेदिनी ॥ २० ॥

अस्या इति ॥ अस्या भैम्या आस्येन मुखरूपेण शीतरुचा चन्द्रेण पुरोऽग्रे वर्त्तमानं तिरश्च तिर्य्यग्वर्त्तमानञ्च यत् अन्धकारं तिरस्कृतं अपसारितं स्फुटमुत्प्रेक्षे तदेवेदमन्धकारं स्फुरन् भङ्गः कौटिल्यं येषां तादृशा ये कचाः केशास्तेषां छलेन व्याजेन पश्चात् मुखस्य पश्चाद्भागे बद्धं संयतं सत् अस्ति विद्यते नैते केशाः किन्तु मुखचन्द्रेण पुरस्तिरश्च तिरस्कृततया स्फुरद्भङ्गं विलसत्पराजयं पश्चाद्बद्धमन्धकारमेव अन्यमपि पराजयिनं बद्धं कृत्वा पश्चाद्भागे स्थापयति अतिकुटिला अतिकृष्णाश्च भैम्याः केशपाशा इति भावः ॥ २१ ॥

Digitized by Google

अस्याः कचानां शिखिनश्च किन्नु
विधिङ्कलापौ विमतेरगातां।
तेनायमेभिः किमपूजि पुष्पै
रभर्त्सि दत्त्वा स किमर्द्धचन्द्रं॥ २२ ॥

अस्याइति ॥ किमु वितर्के अस्या भैम्याः कचानां केशानां कलापः समूहः तथा शिखिनो मयूरस्य च कलापो बर्हं उभौ विमतेरहमेवो त्कृष्टो न त्वमिति परस्परविरोधाद्धेतोः उभयोर्निर्णायकत्वात्प्राचीन त्वाद्वा मध्यस्थत्वेन विधिं ब्रह्माणं किमु अगातां गतवन्तौ तत्र ब्रह्मणा अयं पुरोदृश्यमानो भैम्याः कचकलापः एभिर्दृश्यमानैः पुष्पैः किं अपूजि उत्कर्षज्ञापनाय सम्मानितः स मयूरकलापस्तु अर्द्धचन्द्रं गल हस्तं दत्त्वा किं अभर्त्सि तिरस्कृतः ब्रह्मणा मध्यस्थेन सता परस्परवि वदमानयोस्तयोर्मध्ये केशकलापोऽत्युत्कृष्ट इति ज्ञापयितुं किं तस्य पुष्पैः पूजा कृता मयूरकलापस्तु अतितरां हीनोऽप्यधिकेन च केश कलापेन स्पर्द्धमानोऽनुचितकारी गलहस्तं प्रापित इत्यर्थः अर्द्धचन्द्रा काराश्चन्द्रकामयूरकलापे विद्यन्ते ततः चन्द्रकत्वेनेयमुत्प्रेक्षा अन्योऽ प्यधिको मध्यस्थेन पुष्पैः पूज्यते यश्च हीनोऽपि उत्तमेन सह स्पर्द्धते स गलहस्तदानेन भर्त्स्यते मयूरपिच्छादपि मनोहरो भैम्याः केश पाश इति भावः। अगातामिति इणधातोर्लुङ्रूपं। कलापो भूषणे बर्हे तूणीरे संहतेऽपि चेत्यमरः तर्जन्यङ्गुष्ठविस्तारे गलहस्तार्द्धचन्द्र काविति बलः अर्द्धचन्द्रो बाणभेदे चन्द्रके च शिखण्डिनामिति धरणिः ॥ २२ ॥

Digitized by Google

केशान्धकारादथ दृश्यभाल
स्थलार्द्धचन्द्रा स्फुटमष्टमीयं ।
एतां यदासाद्य जगज्जयाय
मनोभुवा सिद्धिरसाधि साधु ॥ २३ ॥
पुष्पन्धनुः पुष्पशरस्य दाहे
श्यामीभवत्केशरशेषमासीत् ।

एकश्लोकेन भालं वर्णयति ॥ केशेति ॥ स्फुटमुत्प्रेक्षे इयं भैमी अष्टमी कृष्णाष्टमीरात्रिः किम्भूता यतः केशलक्षणोयोऽन्धकारस्त स्मादथानन्तरं दृश्यो मनोरमोऽथच अवलोकनीयो भालस्थलरूपोऽर्द्ध चन्द्रोयस्यास्तादृशी कृष्णाष्टमीरात्रिरपि प्रथमयामद्वयान्धकारा अन न्तरं दृश्यार्द्धचन्द्रा च भवति अतएव एतां भैमीं आसाद्य प्राप्य स्वय म्बरे जगतो जयाय मनोभुवा कन्दर्पेण यत् जगद्वशीकरणलक्षणा सिद्धिरसाधि साधिता तत्साधु युक्तमेव अन्योऽपि साधकः कुलविधिं कृष्णाष्टमीं प्राप्य रात्रौ जगद्वशीकर्तुं गुटिकादिसिद्धिं साधयति अर्द्धचन्द्राकारभालस्थलेयमिति भावः । भालं ललाटमलिकोऽस्त्रियामिति विश्वः ॥ २३ ॥

श्लोकत्रयेण भ्रुवौ वर्णयति ॥ पुष्पमिति ॥ किमित्युत्प्रेक्षायां पुष्पश रस्य कन्दर्पस्य दाहे दाहसमये पुष्पं धनुः तस्य पुष्पमयं चापं श्यामी भवन्त ईषदश्यामा श्यामायमानाः केशराः किञ्जल्का एव शेषा यस्य तादृशं किं आसीत् बभूव अनन्तरं ईशेन महादेवः क्रुधा कोपेन तद

व्यधाद्द्विधेयस्तदपि क्रुधा किं
भैमीभ्रुवौ येन विधिर्व्यधत्त ॥ २४ ॥
भ्रूभ्यां प्रियाया भवता मनोभू
चापेन चापे घनसारभावः ।
निजां यदशेषदशामपेत्य
सम्प्रत्यनेनाधिकवीर्य्यतार्जि ॥ २५ ॥

पि केशरावशिष्टमपि धनुः किं द्विधा व्यधात् चकार मध्ये बभञ्ज येन द्विधाभूतेन श्यामीभवत्केशरावशेषेण धनुषा करणेन विधिर्ब्रह्मा भैम्या भ्रुवौ व्यधत्त चकार अन्यथा भ्रुवोरेतादृशमुच्चोपकत्वं न घटत इति भावः भ्रुवोरतिश्यामपक्ष्मलत्वान्मध्यभग्नधनुराकारत्वाच्चेयमुत्प्रेक्षा ॥ २४ ॥

भ्रूभ्यामिति ॥ मनोभूचापेन कामधनुषा प्रियाया भैम्या भ्रूभ्यां भ्रूयुगलेन भवता भ्रूत्वं गच्छता सता घनो दृढः सारो बलं यस्य तस्य भावोऽतिदृढत्वञ्च आपे प्राप्यते स्म न केवलं भ्रूत्वं प्राप्तं किन्तु अतिदृढत्वमपि प्राप्तमिति चकारार्थः पुष्पत्वदशायां निःसारस्यापि धनुषो भैमीभ्रूत्वदशायां ससारत्वं जातमित्यर्थः कथमेवं जातमित्यत आह यद्यस्मात् निजां स्वीयां अशेषदशां अदाहावस्थां अपेत्य संप्रति अनेन कामधनुषा अधिकवीर्य्यता अतिशयितबलत्वं आर्जि अर्जिता पुष्पमयत्वावस्थापेक्षया भ्रूत्वावस्थायां तस्यैव धनुषो जगद्वशीकरणेऽधिकसामर्थ्यदर्शनादेवमनुमीयत इत्यर्थः । अथ च घनसारत्वं कर्पूरत्वं आपे कर्पूरोऽपि निजामदाहावस्थामपेत्य दाहावस्थायामधिकवीर्य्यतां प्राप्नोति । अथ कर्पूरमस्त्रियां घनसारश्चन्द्रसंज्ञ इत्यमरः ॥ २५ ॥

Digitized by Google

स्मारं धनुर्यद्विधुनोज्झितास्या
मास्येन भूतेन च लक्ष्मलेखा ।
एतद्भ्रुवौ जन्म तदाप युग्मं
लीलाचलत्वोचितबालभावं ॥ २६ ॥
इषुत्रयेणैव जगत्त्रयस्य
विनिर्ज्जयात्पुष्पमयाशुगेन ।

स्मारमिति ॥ स्मारं कन्दर्पसम्बन्धि यत् धनुः दग्धं चापं तथा भैम्या आस्येन मुखेन भूतेन मुखत्वं गतवता विधुना चन्द्रेण या च लक्ष्मलेखा कलङ्करेखा अस्यां भैम्यां उज्झिता परित्यक्ता भैमीमुख चन्द्रस्य निष्कलङ्कत्वात् । तत् युग्मं कामधनुश्चन्द्रलक्ष्मलेखयोर्द्वयं एव भ्रुवौ भैमीभ्रूरूपं जन्म आप लेभे भैमीभ्रूस्वरूपेण तद्युगं परिणतमि त्यर्थः किम्भूतं जन्म लीलया विलासेन यच्चलत्वं चापल्यं तत्र उचितो बालभावः केशसत्ता अथ च शिशुत्वं यत्र तादृशं अन्योऽपि जन्म लब्ध्वा क्रीडोचितशैशवचापलं करोति भैमीभ्रुवौ कामधनुश्चन्द्र लक्ष्मलेखाकारे सविलासचपले चञ्चले कामजनिके चेति भावः ॥२६॥

नवभिः श्लोकैश्चक्षुषी वर्णयति ॥ इषिति ॥ पुष्पमयाः आशुगाः पञ्च बाणा यस्य तादृशेन कामेन इषुत्रयेणैव पुष्पमयेण बाणत्रयेणैव जगत्त्र यस्य भुवनत्रयस्य विनिर्ज्जयात् एकैकेन बाणेन एकैकस्य भुवनस्य वशी करणाद्धेतोः शेषौ अवशिष्टौ इयं दृश्यमाना द्विबाणी बाणद्वयं चि वाया भैम्या दृगम्भोजपदे नयनकमलद्वयस्थाने अभिषिच्य आरोप्य

Digitized by Google

शेषा दिवाणी सफलीकृतेयं
प्रियादृगम्भोजपदेऽभिषिच्य ॥ २७॥
सेयं मृदुः कौसुमचापयष्टिः
स्मरस्य मुष्टिग्रहणार्हमध्या ।
तनोति नः श्रीमदपांगमुक्तां
मोहाय या दृष्टिशरौघवृष्टिं ॥ २८॥

सफलीकृता सार्थकीकृता यस्तु वाणेषु मध्ये वाणद्वयस्यैव जगत्त्रय याव सार्थकत्वं जातं अवशिष्टयोस्तु कथं सार्थकत्वं भवेदिति विचिन्त्य कामेन श्रेयोऽनन्तरादर्शनात् भैमीनयनकमलपदेऽभिषिच्य सार्थकं कृतमित्यर्थः अन्योऽपि निष्प्रयोजनं वस्तु उत्तमस्थाने समर्प्य सार्थकं करोति भैमीनयनयोः पद्मपुष्पतुल्यत्वादुदीयकलाच पुष्पमयकाम वाणत्वसम्भावना युक्ततरैव। दिवाणीति द्वयोर्वाणयोः समाहार इति द्विगुः ॥ २७ ॥

सेयमिति ॥ मुष्ट्या यद्ग्रहणं तत्र अर्हा योग्या मध्यो यस्यास्तादृ शी अतिक्षीणमध्या सा इयं भैमी स्मरस्य कामस्य कौसुमी पुष्प सम्बन्धिनी चापयष्टिर्धनुर्लता यतो मृदुः सुकुमाराङ्गी चापयष्टिरपि मध्ये मुष्ट्या ध्रियते सा का या भैमी नोऽस्माकं मोहाय कामविकारा य श्रीमता शोभान्वितेन अपाङ्गेन चक्षुःप्रान्तेन मुक्तां त्यक्तां दृष्टयः कटाक्षनिरीक्षणान्येव शरा वाणास्तेषामोघस्य समूहस्य वृष्टिं तनोति विस्तारयति चापयष्टिरपि अपाङ्गपर्यन्तमाकृष्टानां वाणानां वृष्टिं विस्तारयति यथा कामवाणोजगत्सर्वं मोहयति तथास्याः कटाक्षोऽपीत्यर्थः ॥ २८॥

Digitized by Google

आघूर्णितं पक्ष्मलमक्षियुग्मं
प्रांशुद्युति श्वैत्यजितामृतांशु ।
अस्या इवास्याश्चलदिन्द्रनील
गोलामलश्यामलतारतारं ॥ २९ ॥
कर्णोत्पलेनापि मुखं सनाथं
लभेत नेत्रद्युतिनिर्ज्जितेन ।

आघूर्णितमिति ॥ अस्या भैम्या अक्षियुग्मं चक्षुर्द्वयं अस्या इव नतन्यस्या नयनद्वयेन तुल्यं रामरावणयोर्युद्धं रामरावणयोरिवेतिवदनन्यसदृशमित्यर्थः किम्भूतं आघूर्णितं ईषद्घूर्णायमानं तथा पक्ष्मलं प्रशस्तपक्ष्मयुक्तं तथा प्रांशुरधिकतरा द्युतिः शोभा यस्य तादृशं तथा श्वैत्येन पार्श्वधावल्येन जितोऽमृतांशुश्चन्द्रो येन तादृशं तथा चलन् चपलो य इन्द्रनीलगोलो मारकतगुटिका तद्वदमला स्निग्धा दा श्यामलता श्यामता तां राति अङ्गीकरोतीति तादृशी तारा कनीनिका यस्य तादृशं भैम्याश्चक्षुषोर्यादृशी आघूर्णायमानता पक्ष्मलता अभितः पाण्डुरता स्निग्धश्यामलकनीनिकावत्ता च तादृशी नान्यासां स्त्रीणामासीदिति भावः । अक्षियुग्ममित्यत्र अक्षिपद्ममिति प्रांशुद्युतीत्यत्र प्रान्तद्युतीति पाश्चात्यानां पुस्तकेषु पाठः । अत्रास्या अक्षियुग्मं अस्या इवेत्येकस्यैवोपमानोपमेयत्वकल्पनादनन्वयालङ्कारः तथा च दर्पणः उपमानोपमेयत्वमेकस्यैव त्वनन्वय इति ॥ २९ ॥

कर्णोत्पलेनेति ॥ कुरङ्गी मृगी नेत्रद्युतिनिर्ज्जितेन भैम्या नयनकान्तिपराभूतेन तदीयेन भैमीसम्बन्धिना कर्णोत्पलेनापि का कथा

यद्येतदीयेन तदा कृतार्था
स्वचक्षुषी किं कुरुते कुरङ्गी ॥ ३० ॥
त्वचः समुत्तार्य्य दलानि रीत्या
मोचात्त्वचः पञ्चषपाटनानां ।

भैमीनेत्रयुगलेन वञ्चितकर्णपूरीकृतनीलोत्पलेनापि समार्थं सहितं यथ च नाथयुग्मं स्वस्य मुखं यदि लभेत प्राप्नुयात् ततस्तर्हि कृतार्था चरितार्था सती स्वचक्षुषी निजनयनद्वयं किं कुरुते किं करिष्यति अपि तु न किमपि करिष्यति निष्प्रयोजनत्वात् परित्यक्ष्यतीत्यर्थः धातूनामनेकार्थत्वात् किं किमर्थं करिष्यति धारयिष्यतीति वा कुरङ्गीनेत्रापेक्षया भैम्याः कर्णोत्पलमुत्कृष्टं तस्मादपि तस्यानयने उत्कृष्टे इति भावः ॥ ३० ॥

त्वच इति ॥ पञ्च वा षड्वा याः पाटनास्तद्दलानि तासां रीत्या परिपाट्या त्वचो बहिर्वल्कलानि समुत्तार्य्य निष्कास्य मोचात्त्वचः कदलीवल्कलात् गृहीतैः सारैः श्रेष्ठभागैः तथा पञ्चषपाटनानां रीत्या दलानि आभ्यन्तराणि समुत्तार्य्य उत्पलौघात् नीलोत्पलसमूहात् गृहीतैः सारैः कृत्वा विधिर्ब्रह्मा अस्यां भैम्यां दृक्पाययोर्नयनयोर्य्यद्रूपं अभितःपाण्डरतालक्षणसौन्दर्य्यं गोलकस्य श्यामलतालक्षणसौन्दर्य्यञ्च तस्य शिल्पी निर्म्माता अभूत् विधिर्महता परिश्रमेण पञ्चषट्पाटनाभिः कदलीवल्कलानि नीलोत्पलदलानि च निष्कास्य तन्मध्यस्थसारभागं गृहीत्वा अभितः पाण्डरे असितश्यामलगोलके

सारैर्गृहीतैर्विधिरुत्पलौघा
दस्यामभूदीक्षणरूपशिल्पी ॥ २१ ॥
चकोरनेत्रैणदृगुत्पलाना
न्निमेषयन्त्रेण किमेष कृष्टः ।
सारः सुधोद्गारमयः प्रयत्नै
र्विधातुमेतन्नयने विधातुः ॥ २२ ॥

भैमीचक्षुषी निर्मितवानित्यर्थः इवास्प्रयोगाभावादर्थस्य सम्भाव्यमानत्वाच्च प्रतीयमानोत्प्रेक्षेयं कज्जलसारभागेन कृष्णभागो निर्मितः शोणोत्पलसारभागेन च प्रान्तभागो निर्मित इति भावः ॥ २१ ॥

चकोरेति ॥ एतस्या भैम्या नयने चक्षुषी विधातुं निर्मातुं विधातुर्ब्रह्मणः प्रयत्नैः कर्तृभिः चकोरनेत्रैणदृगुत्पलानां चकोरस्य पक्षिविशेषस्य नेत्रयोः एणस्य हरिणस्य दृशोश्चक्षुषोः उत्पलानामिन्दीवराणाञ्च सम्बन्धी सुधोद्गारमयः पीयूषनिर्भरश्चयोऽतिरमणीय इत्यर्थः एवम्प्रत्ययविषयः सारः श्रेष्ठभागः निमेषवत्त्वेन यन्त्रेण किं कृष्टः आकृष्य भैमीनयनयोः स्थापितः यथायथं पक्ष्मसङ्कोचदलसङ्कोचवत्त्वेन चकोरनयनादिवृत्तेन निमेषयन्त्रेण निष्पीड्य गृहीतेन श्रेष्ठभागेन कृत्वा विधात्रा किं भैमीनयने निर्मिते इत्यर्थः अन्यत्रापि यन्त्रेण निष्पीड्य सारो गृह्यते चकोराणामपि सारस्य सुधोद्गारमयत्वञ्च चकोरस्य चन्द्रिकापानशीलतया तन्नेत्रयोः सुधापरिपूर्णत्वात् एणस्य च चन्द्रोत्सङ्गावस्थायितया तन्नेत्रयोरपि सुधासम्बन्धात् उत्पलानाञ्च रात्रौ विकासितया तत्सम्बन्धात् ॥ २२ ॥

Digitized by Google

ऋणीकृता किं हरिणीभिरासी-
दस्याः सकाशान्नयनद्वयश्रीः।
भूयोगुणेयं सकला बलाद्य-
स्ताभ्योऽनयालभ्यत बिभ्यतीभ्यः ॥ ३३ ॥
दृशौ किमस्याश्चपलस्वभावे
न दूरमाक्रम्य मिथो मिलेतां।

ऋणीकृतेति ॥ हरिणीभिः अस्या भैम्याः सकाशान्नयनद्वयस्य श्रीः शोभा किं ऋणीकृता ऋणत्वेन पूर्व्वं गृहीता आसीत् यद्यस्मात् अनया भैम्या बिभ्यतीभ्यस्त्रस्यन्तीभ्यस्ताभ्यो हरिणीभ्यः सकला समग्रा अथ च कलया वृद्ध्या सहिता भूयोगुणा प्रचुरसौन्दर्य्यादिगुणशा-लिनी अथ च वृद्ध्या द्विगुणा इयं नयनद्वयश्रीर्बलादलभ्यत बलात्कारेण गृहीता उत्तमर्णो हि प्रतिभुवदेयकालातिक्रमशाभयत्रस्तेभ्योऽधमर्णेभ्यो वृद्धिसहितां द्विगुणां सम्पदं बलात् गृह्णाति तस्मात् पूर्व्वमृणत्वेन गृहीतेति सत्यं हरिणीनयनापेक्षया भैमीनयने अतिसुन्दरे इति भावः। कला स्यान्मूलरैवृद्धौ शिल्पादावंशमात्रके। षोडशांशे च चन्द्रस्य कलनाकालमानयोरिति मेदिनी ॥ ३३ ॥

दृशाविति ॥ चपलस्वभावे स्वभावतश्चञ्चले अस्या भैम्या दृशौ चक्षुषी दूरमाक्रम्य गत्वा किं मिथः परस्परं न मिलेतां घाटायां मिलि-ते न भवेतां अपि तु मिलेतामेव तर्हि मेलने का बाधेत्याह अनयो-र्दृशोः प्रयाणे गमनविषये श्रवसी कर्णावेव कूपौ तत्र यो निपातः पतनं तस्मात् भीतिर्भयं तया चेद्यदि विघ्नोऽन्तरायो न कृतः स्यात्

स

न चेत् क्षतः स्यादनयोः प्रयाणे
विघ्नः श्रवःकूपनिपातभीत्या ॥ २४ ॥
केदारभाजा शिशिरप्रवेशात्
पुण्याय मन्ये मृतमुत्पलिन्या।

चपलत्वभावादनुमुमत्ते अपि तस्या नयने श्रवणरूपकूपद्वयं दृष्ट्वा तत्र पतनशङ्कया मध्ये विरते इवेत्यर्थः अन्योऽपि चपलः कूपपतनशङ्कया गमनाद्विरमति भैम्या नयने कर्णान्तविश्रान्ते अतिचपले चेति भावः ॥ २४ ॥

केदारेति ॥ उत्पलिन्या पद्मिन्या केदारभाजा क्षेत्रं भजमानया आलवालं भजमानया वा सत्या अथ च केदारनामकं शिवं भजमानया सत्या शिशिरप्रवेशात् शिशिरर्त्तोरागमनाद्धेतोः अथ च हिमे निमज्जनं प्राप्य पुण्याय मृतं उत्तमफलसम्पादकपुण्यविशेषलाभार्थं मृतं इत्यहं मन्ये सम्भावयामि कुतस्तवेयं सम्भावनेत्याह यतोऽस्मात् इयं भैमी तस्या उत्पलिन्याः कुसुमे पुष्पे एव ईदृशे चक्षुषी यस्याः तादृशी जाता यतश्च चकोरः पक्षिविशेषः तस्या उत्पलिन्याः कोरकौ कलिके एव दृशौ चक्षुषी यस्य तादृशो जातः तस्मात् पुण्यार्थमेव पद्मिन्या तथाभूतया सत्या मृतमित्यहं मन्ये नहि पुण्यातिशयं विना भैमीनयनत्वं चकोरनयनत्वं च तदुत्पन्नाभ्यां कुसुमकोरकाभ्यां प्राप्यते अन्योऽपि केदाराख्यशिवसन्निधौ हिमप्रवेशेन मायां त्यक्त्वा उत्तमपदं प्राप्नोति कोरकापेक्षया कुसुमस्योत्कृष्टत्वाच्चकोरनेत्रापेक्षयापि भैमीनयने उत्कर्ष इति सूचितं। केदारोऽस्त्री शिवे क्षेत्रे भूमिभेदा

Digitized by Google

जाता वसन्तस्तनकुड्मलेयं
वसन्त तत्कोरकटक्कुचकोरः ॥ २५ ॥
नासादसीया तिलपुष्पतूणं
जगत्त्रयन्यस्तशरत्रयस्य ।
श्वासानिलामोदभरानुमेयां
दधद्विबाणीं कुसुमायुधस्य ॥ २६ ॥
बन्धूकबन्धूभवदेतदस्या
मुखेन्दुनानेन सहोज्जिहाना ।

रवावयोरिति मेदिनी । शिशिरो ना हिमे न स्त्री ऋतुभेदे जडे त्रिष्विति च ॥ २५ ॥

अथैकेन श्लोकेन नासिकां वर्णयति ॥ नासेति ॥ अदसीया अमुष्या भैम्याः सम्बन्धिनी नासा नासिका जगत्त्रये न्यस्तं विहितं शरत्रयं येन तादृशस्य कुसुमायुधस्य कामस्य द्विबाणीं अवशिष्टबाणद्वयं दधत् धारयत् तिलपुष्पमयं तूणं इषुधिरेव किम्भूतां द्विबाणीं श्वासानिलस्य निश्वासवायोर्यं आमोदभरः परिमलातिशयस्तेन अनुमेयां अनुमानयोग्यां प्रतीयमानेत्यर्थः कुसुमायुधस्य तूणस्यापि कुसुमत्वात् तिलकुसुमस्य च नासिकाकारत्वादियमुत्प्रेक्षा कामः पञ्चसु बाणेषु मध्ये बाणत्रयव्ययेनैव जगत्त्रयं जित्वा अवशिष्टं बाणद्वयं भैमीनासाख्यतिलपुष्पतूणरन्ध्रद्वये स्थापितवानित्यर्थः श्वासानिलामोदेत्यनेनास्याः पद्मिनीत्वं सूचितं ॥ २६ ॥

षड्भिः श्लोकैरधरोष्ठं वर्णयति ॥ बन्धूकेति ॥ अस्या भैम्या अनेन दृश्यमानेन मुखेन्दुना मुखचन्द्रेण सह उज्जिहाना उद्गच्छन्ती अव

Digitized by Google

रागश्रिया शैशवयौवनीयां
स्वमाह सन्ध्यामधरोष्ठलेखा ॥ ३७ ॥
अस्या मुखेन्दोरधरः सुधाभू
विम्बस्य युक्तः प्रतिविम्ब एषः ।

रोष्ठलेखा एतद्दृश्यमानं स्वमात्मानं शैशवयौवनीयां बाल्ययौवनयोः सन्धौ वर्त्तमानां सन्ध्यां आह अहमेव द्वयोरवस्थयोः सन्ध्येति कथयति किम्भूतं स्वं रागश्रिया रक्तिमशोभया बन्धूकस्य रक्तवर्णपुष्पविशेषस्य बन्धुभवत् सदृशीभवत् वयःसन्धौ वर्त्तमानाया भैम्या अधरोष्ठावतितरां रक्तौ जाताविति भावः अन्यापि दिनरजन्योः सन्धौ सति जायमाना सन्ध्या चन्द्रेण सह उदयते रक्ता च भवति ॥ ३७ ॥

अस्येति ॥ अस्या भैम्या मुखेन्दोर्मुखचन्द्रसम्बन्धी अधर ओष्ठप्रान्तभागः सुधाभूविम्बस्य अमृतभूम्यामुत्पन्नस्य विम्बीफलस्य प्रतिविम्बः सदृशो युक्तः न तु यत्र कुत्राप्युत्पन्नस्य विम्बस्य सदृशः अधरस्य मुखचन्द्रसम्बन्धितया सुधाधारत्वात् । अतिरक्तेनापि विम्बीफलेन सह भैम्याअधरस्य साम्यं नास्त्येव अमृतवत्त्वाभावात् किन्तु यदि विम्बीफलं सुधाभूमिजातं स्यात् तदा द्वयोरपि लौहित्यातिशयात् सुधाधारत्वाच्च तद्युक्तं भवेदित्यर्थः । अथ च सुधाभूविम्बस्य चन्द्रमण्डलस्य प्रतिविम्बः शोभा अस्या मुखेन्दोरधरः मुखचन्द्रप्रतिविम्बापेक्षयाविहीनः । ननु तथापि भैम्यधरविम्बफलयोः साम्यकल्पनमनुचितमेवेति पूर्व्वोक्तं दूषयति अथवा तस्य विम्बस्य श्रीः शोभा द्रुमभाजि वृन्तसहिते देशे विषत इति शेषः तस्य द्रुमावलम्बनताफलत्वात् अस्य

तस्याथवा श्रीद्रुमभाजि देशे
सम्भाव्यमानास्य तु विद्रुमे सा॥ ३८ ॥
जानेऽतिरागादिदमेव विम्बं
विम्बस्य तु व्यक्तमितोऽधरत्वं।

तु अधरस्य पुनः सम्भाव्यमाना न तु वास्तवी तुच्छत्वात्सम्भाव्यमानापी त्यर्थः सा श्रीर्विद्रुमे रत्नविशेषे प्रवाले विद्यते यद्यपि सुधाभूमित्व त्वेन सुधाधारत्वात्कौशल्यवत्त्वाच्च विम्बीफलमेतदधरसाम्यं लभ्भम हति तथापि निकृष्टदेशजत्वेन निकृष्टत्वात्तन्नार्हतीत्यर्थः नहि निकृष्टापकृष्टयोः साम्यं युज्यते अथ च विम्बीफलस्य शोभा द्रुम सहिते देशे वने विद्यते अस्य तु विद्रुमे द्रुमरहिते देशे नगरे विद्यते तस्मादारण्यकनागरिकयोर्न युज्यते साम्यकल्पनमिति भावः केचित्तु सुधाभूरिति पृथक् पदं कल्पयित्वा अस्यामुखेन्दोरधरः सुधायाः भूरवस्थितिदेशः तथा एषोऽधरो विम्बस्य विम्बीफलस्य प्रतिविम्बः सदृशोयुक्त इति व्याचक्षते मुखेन्दोरित्यत्र मुखेन्दाविति सप्तम्यन्तं क्वचित्पुस्तकेषु पाठः ॥ ३८ ॥

जाने इति ॥ अतिरागादत्यन्तलौहित्याद्धेतोर्विम्बं अधरविम्बमि त्यादौ उपमानत्वेन प्रसिद्धं विम्बपदप्रतिपाद्यं इदमेव अग्रे दृश्यमानं भैमीरदनच्छदलक्षणमेव न तु विम्बीफलं इत्यहं जाने मन्ये अथ च अतिरागादनुरागाधिक्यादेवं सम्भावयामि। विम्बीफलस्य तादृशलौहि त्याभावात् सर्वत्रोपमानस्याधिक्याच्च उपमानतया भैमीरदनच्छद एव

Digitized by Google

द्वयोर्विशेषावगमाक्षमाणां
नाम्नि भ्रमोऽभूदनयोर्जनानां ॥ ३८ ॥
मध्योपकण्ठावधरोष्ठभागौ
भातः किमप्युच्छ्वसितौ यदस्याः ।

बिम्बपदप्रतिपाद्य इत्यर्थः तथा बिम्बस्य तु बिम्बीफलस्य पुनरिव पूर्वोक्तादेतोः अधरत्वं ह्यधरपदप्रतिपाद्यत्वं यत्तत् रदनच्छदस्यैवातिलौहित्यात् सर्व्वत्रोपमेयस्य न्यूनत्वाच्च बिम्बीफलमेवाधरपदप्रतिपाद्यमित्यर्थः भैमीरदनच्छदस्यैवोपमानत्वं बिम्बीफलस्यैवोपमेयत्वञ्च युक्तमिति भावः अथ च इतो भैमीरदनच्छदाद्बिम्बीफलस्य अधरत्वं निकृष्टत्वं यत्तत् नन्वेवं सति लोके कथं संज्ञाविपर्य्यास इत्यत आह द्वयोरुपमानोपमेययोरनयोर्दन्तच्छदबिम्बीफलयोर्विशेषावगमे तारतम्यज्ञाने अक्षमाणां असमर्थानां जनानां मूर्खाणां नाम्नि संज्ञायां भ्रमोऽभूत् विपर्य्यासो जातः अतिलौहित्यादधिके भैमीरदनच्छदे उपमानवाचकबिम्बपदं प्रयोक्तव्यं अल्पलौहित्यान्न्यूने बिम्बीफले उपमेयवाचकमधरपदं प्रयोक्तव्यमिति विशेषापरिज्ञानान्मूर्खैरेव नाम्नो विपर्य्यासः कृत इत्यर्थः। विशेषावगमाक्षमाणां भेदग्रहासमर्थानां नाम्नि भ्रमो भ्रान्तिरभूदिति वा। अधरस्तु पुमानोष्ठे हीनेऽनूर्द्ध्वे च वाच्यवदिति मेदिनी ॥ ३८ ॥

मध्योपकण्ठाविति ॥ अस्या भैम्या मध्योपकण्ठौ अधरोष्ठयोर्मध्यसमीपवर्त्तिनौ अधरोष्ठयोर्भागौ अंशविशेषौ किमपि किञ्चित् उच्छ्वसितौ

Digitized by Google

तत्स्वप्नसम्भोगवितीर्णदन्त
दंशेन किम्वा न मयापराद्धं ॥ ४० ॥
विद्याविदर्भेन्द्रसुताधरोष्ठे
नृत्यन्ति कत्यन्तरभेदभाजः ।
इतीव रेखाभिरपश्रमस्ताः
संख्यातवान् कौतुकवान्विधाता ॥ ४१ ॥

उच्छूनौ सन्तौ यथस्माद्धानः शोभेते तस्माद्धेतोः स्वप्ने यः सम्भोगस्तत्र वितीर्णो दत्तो दन्तदंशो दन्तक्षतं येन तादृशेन मया किम्वा नापराद्धं अपि तु नादृगपराधो मया वा क्षतः स्यात् अधरोष्ठयोर्मध्यसमीपवर्त्तिनोः पार्श्वदेशयोः किञ्चिदुच्छूनता सामुद्रिको गुणः स एव स्वप्नसम्भोगदत्तदन्तक्षतत्वेन सम्भावितः स्वप्नसम्भोगे वितीर्णेन दन्तदंशेन द्वारा अपराद्धमिति वा ॥ ४० ॥

विद्येति ॥ विदर्भेन्द्रसुताया भैम्या अधरोष्ठे अन्तरभेदभाजो विद्यास्तैनैकरूपा अपि कायत्वादिना अवान्तरभेदयुक्ताः कति विद्या नृत्यन्ति स्फुरन्ति नायकरूपेण वर्त्तन्ते इतीव एवं सन्दिहान इव लोकानां सन्देहनिवारणार्थमिव वा अपश्रमः श्रमशून्यो विधाता कौतुकवान् कुतूहली सन् रेखाभिः कृत्वा ता विद्याः संख्यातवान् इत्यर्थः विद्यावर्त्तन्त इति गणितवान् शोभाजनिका अधररेखा विद्यागणनार्थत्वेनोत्प्रेक्षिताः अपश्रम इत्यनेन श्रमशून्यत्वादेव अस्या भैमी विद्याः संख्यातुं शक्तोऽभूदन्यथा न स्यादिति सूचितं ॥ ४१ ॥

Digitized by Google

सम्भुज्यमानाद्य मया निशान्ते
स्वप्नेऽनुभूता मधुराधरेयं।
असीमलावण्यरदच्छदेत्यं
कथम्मयैव प्रतिपद्यते वा ॥ ४२ ॥

यदि प्रसादीकुरुते सुधांशो
रेषा सहस्रांशमपि स्मितस्य।

सम्भुज्यमानेति ॥ अद्य निशान्ते रात्र्यवसाने स्वप्ने सम्भुज्यमाना कृतसम्भोगा इयं भैमी मया मधुराधरा सुन्दराधरा चुम्बनदशा अमृतायमानाधरा वा अनुभूता ज्ञाता इत्यमेवमनिर्व्वचनीयप्रकारेण असीमं अवधिशून्यं लावण्यं सौन्दर्य्यं यत्र तादृशोरदच्छदोऽधरो यस्यास्तादृशोयं भैमी कथमा कथञ्च मयैव प्रतिपद्यते ज्ञायते स्वप्ने यादृशो सुन्दराधरानुभूता तादृश्येव जाग्रदवस्थायामपि कथं मयैवानुभूयत इत्याश्चर्य्यमिदमित्यर्थः स्वप्नदृष्टं हि प्रायेण न घटते घटते वा कालान्तरे किञ्चित्तद्विपरीतं। निशान्तस्वप्नदर्शनस्य शीघ्रफलत्वाभिशान्तपदमुक्तं यथाचोक्तं गोविसर्ज्जनवेलायां दृष्टा सद्यः फलं लभेदिति। अद्य च या मधुररसाधरा अनुभूता सा कथमधुना लवणरसाधरानुभूयते इति विरोधाभासः मधुररसलवणरसयोः परस्परं विरोधात् तद्भञ्जनन्तु पूर्व्वव्याख्यानादेव ॥ ४२ ॥

एकश्लोकेन स्मितं वर्णयति ॥ यदीति ॥ एषा दमयन्ती स्मितस्य ईषद्धसनस्य सहस्रांशमपि सहस्रभागैकभागमपि यदि सुधांशोश्च

तत्कौमुदीनां कुरुते तमेव
निर्मञ्छ्य देवः सफलं स्वजन्म ॥ ४२ ॥
चन्द्राधिकैतन्मुखचन्द्रिकाणां
दरायतन्तत्किरणाद्घनानां ।

अस्य प्रसादीकुरुते प्रसन्ना भूत्वा यदि चन्द्राय प्रसादत्वेन स्मित लेशमपि दद्यात् तत्तदा स देवः सुधांशुस्तमेव स्मितस्य लवमेव निर्मञ्छ्य आदराविष्टत्वात् नीराजितं कृत्वा कौमुदीभिः पूरयित्वा कौमुदीनां जन्म सफलं सार्थकं कुरुते कुर्य्यात्तस्य निर्मञ्छन सम्पर्केणापि कौमुदीनां जन्मसाफल्यं भवेदित्यर्थः कौमुदीभ्यो भैमीस्मि तलेशस्यापि सदृशोनेति भावः ॥ ४२ ॥

त्रिभिः श्लोकैर्दन्तपङ्क्तिद्वयं वर्णयति ॥ चन्द्रेति ॥ तस्य चन्द्रस्य किरणात् घनानां निविडानां चन्द्रकिरणमपेक्ष्य गाढानां चन्द्राधिकं चन्द्रादप्युत्कृष्टं एतन्मुखं भैमीमुखचन्द्रस्तस्य चन्द्रिकाणां किरणानां दरायतं ईषद्दीर्घं बिन्दुवृन्दं बिन्दुसमूहोरदावलिद्वन्द्वति दन्तश्रेणी द्वितयमिवाचरति किम्भूतं पुरःसराणि अग्रेसराणि चलानि निःसृतानि च यानि एतन्ति बिन्दवस्तान्येव द्वितीयानि यस्य तादृशं अग्रनिःसृतबिन्दूनां सूक्ष्मत्वादधोदन्तत्वं पश्चादवस्थानमेव निःसरतां बिन्दूनामीषदायतत्वादूर्ध्वदन्तत्वमित्यर्थः नैतद्दन्तावलिद्वन्द्वं किन्तु चन्द्रादप्यधिकस्य भैमीमुखचन्द्रस्यामृताधिक्यात् पौर्व्वापर्य्येण निःसृतामृतबिन्दुवृन्दद्वितयमिति परमार्थः यथा च दृष्टौ पटस्य प्रान्तात् प्रथममेका बिन्दुपङ्क्तिः पतति तदनु च द्वितीया ईषदायता

Digitized by Google

पुरःसरस्तत्पृषद्द्वितीयं
रदावलिद्वन्द्वति विन्दुवृन्दं ॥ ४४ ॥
सेयं मदेतद्विरहार्त्तिमूर्च्छा
तमीविभातस्य विभाति सन्ध्या ।
महेन्द्रकाष्ठागतरागकर्त्री
द्विजैरमीभिः समुपास्यमाना ॥ ४५ ॥
राजौ द्विजानामिह राजदन्ताः
सन्बिभ्रति श्रोत्रियविभ्रमं यत् ।

पंक्तिता तत्रैव लगति तथा विन्दुपंक्तिद्वयमिति भैम्यादन्ता ईषदा यताघनाः शुक्लाश्चेति भावः ॥ ४४ ॥

सेयमिति ॥ सा इयं भैमी मम एतया सह विरहेण जनिता या आर्त्तिः पीडा तज्जनिता या मूर्च्छा सैव तमी रजनी तस्याविभा तस्य प्रभातस्य सम्बन्धिनी सन्ध्या विभाति प्रकाशते इदानीं विरहा वसानसमयत्वात् । किम्भूता महेन्द्रस्य काष्ठामुत्कर्षं गतः प्राप्तोयोरा गोऽनुरागस्तस्य कर्त्री सम्पादयित्री तथा अमीभिर्दृश्यमानैर्द्विजै र्दन्तैः समुपास्यमाना आश्रीयमाणा प्रातःसन्ध्यापि महेन्द्रस्य का ष्ठायां प्राच्यां दिशि गतोयोरागोलौहित्यं तस्य कर्त्री द्विजैर्ब्राह्मण क्षत्रियवैश्यैरुपास्यमाना सेव्यमाना च भवति । रजनी यामिनी तमी ति काष्ठोत्कर्षे स्थितौ दिशीति दन्तविप्राण्डजादिजा इति चामरः ॥ ४५ ॥

राजाविति ॥ इह भैमीनिष्ठायां द्विजानां दन्तानां राजौ श्रेण्यां वर्त्तमाना एते चत्वारो राजदन्ताः सम्मुखीनादन्तश्रेष्ठा यद्यस्मात्

Digitized by Google

उद्वेगरागादिभृजावदाता
श्चत्वार एते तदवैमि मुक्ताः ॥ ४६ ॥
शिरीषकोषादपि कोमलाया
वेधा विधायाङ्गमशेषमस्याः ।

श्रोत्रियाणां ब्राह्मणविशेषाणां विधर्मं विचारं शौक्ल्यञ्च तद्वत् बिभ्रति सम्यक्धारयन्ति तत्तस्मादेते मुक्तामौक्तिकान्येव इत्यवैमि तर्कयामि शौक्ल्यसाम्यात् मुक्तातुल्यांस्तान् जानामीत्यर्थः किम्भूताः उद्वेगरागोगुवाकजनितलौहित्यं आदिर्येषां एवम्भूतायः खदिर रागादिस्तस्य या भजा मार्जनं क्षालनं तया अवदाता विशुद्धाः अन्यो इवेन उद्वेगेन या रागभजा तया अवदाता वा मुक्ताअपि अन्यो इवेन गुवाकेन शुद्धाः क्रियन्ते अथ च राजत् प्रकाशमानं अन्तं स्वरूपं येषां तादृशानां द्विजानां ब्राह्मणानां पंक्तौ वर्त्तमानाः सन्तो ये श्रोत्रियविधर्मं पङ्क्तिपावनत्वं धारयन्ति उद्वेगोद्वेगो मनस्यं रागोविष यासक्तिः आदिना अहङ्कारादयस्तेषां भजया परित्यागेन निर्म्मलान्तःकरणाश्च भवन्ति ते जीवन्मुक्ता इति जनैः सम्भाव्यन्ते । चत्वारो राजदन्ताः स्युः सम्मुखीनारदास्तु ये इति बलः घोण्टा तु पूगः क्रमुकोगुवाकः खपुरोऽस्य तु फलमुद्वेगमित्यमरः ॥ ४६ ॥

चतुर्भिः श्लोकैर्वचनं वर्णयति ॥ शिरीषेति ॥ वेधा विधाता शिरीषकोषादपि शिरीषकुसुमाभ्यन्तरादपि कोमलायाः सुकुमाराङ्ग्या अस्याः भैम्याः अशेषं समस्तं अङ्गं विधाय निर्म्माय सुकुमारसर्गे मृदुवस्तुसृष्टौ प्राप्तः प्रकर्षो नैपुण्यं येन तादृशः सन् अस्या वाचि वचने

प्राप्तप्रकर्षः सुकुमारसर्गे
समापयद्वापि मृदुत्वमुद्रां ॥ ४७ ॥
प्रसूनवाणाद्वयवादिनी सा
काचिद्द्विजेनोपनिषत्पिकेन ।
अस्याः किमास्यद्विजराजतो वा
नाधीयते भैक्षभुजा तरुभ्यः ॥ ४८ ॥

मृदुत्वस्य सौकुमार्य्यस्य मुद्रां मर्य्यादां समापयत् समाप्तिं नीतवान् सुकुमाराङ्गनिर्म्माणेन अभ्यासदार्ढ्यादङ्गेभ्योऽप्यतिसुकुमारतां वचने स्थापयामासेत्यर्थः अतिमधुरवचनेयमिति भावः अन्योऽपि शिल्पी कुत्राप्यभ्यस्य अन्यत्र शिल्पं समापयति ॥ ४७ ॥

प्रसूनेति ॥ तरुभ्यश्चाम्रादिवृक्षेभ्यो भैक्षभुजा फलपुष्पादिलक्षण भिक्षाकदम्बभोजिना द्विजेन पक्षिणा अथ च ब्राह्मणेन पिकेन कोकिलेन अस्या भैम्या आस्यद्विजराजतो मुखचन्द्रात् अथ च आस्यलक्षणात् ब्राह्मणश्रेष्ठात् प्रसूनवाणाद्वयवादिनी कामाद्वैतप्रतिपादिका काचिद्विलक्षणा सा भैमीवचनरूपा उपनिषत् रहस्यविशेषोऽथ च वेदान्तग्रन्थः किं वा नाधीयते न पठ्यते अपितु पठ्यत एव कोकिलस्वरादप्यतिमधुरो भैमीस्वरो झटिति कामाधिक्यमाविर्भावयतीति भावः अन्येनापि भैक्षजीविना ब्राह्मणेन ब्राह्मणश्रेष्ठात् ब्रह्माद्वैत प्रतिपादिका उपनिषदधीयते । भवेदुपनिषद्धर्म्मे वेदान्ते च रहस्यपीति विश्वः भैक्षं भिक्षाकदम्बकमित्यमरः ॥ ४८ ॥

Digitized by Google

पद्माङ्कसद्मानमवेक्ष्य लक्ष्मी
मेकस्य विष्णोः श्रयणात्सपत्नीं।
आस्येन्दुमस्या भजते जिताब्जं
सरस्वती तद्विजिगीषया किं॥ ४९॥
कण्ठे वसन्ती चतुरा यदस्याः
सरस्वती वादयते विपञ्चीं।

पद्माङ्केति॥ सरस्वती वाक् सा च वागधिष्ठात्री एकस्य विष्णोः श्रयणात् उभाभ्यामाश्रयणात् सपत्नीं लक्ष्मीं पद्माङ्कसद्मानं पद्ममध्यनिवासां अवेक्ष्य दृष्ट्वा तस्या लक्ष्म्या विजिगीषया विशेषेण जेतुमिच्छया जिताब्जं पराजितपद्मं अस्या भैम्या आस्येन्दुं मुखचन्द्रं किं भजते आश्रयति सपत्नीगृहादुत्तमं मदीयं गृहं भवत्विति मनसि कृत्वा अन्यत्र तदलब्ध्वा चन्द्रतुल्यत्वात् पद्मपराजयिभैमीमुखमेव किं आश्रयतीत्यर्थः चन्द्रोदये हि पद्मसङ्कोचात् चन्द्रोऽपि जिताब्जोभवति अथवा जिताब्जं जितचन्द्रं भैम्या आस्येन्दुं भजते चन्द्रेण कमलं जितं सोऽप्यनेन जित इति तदाश्रयणाल्लक्ष्मीः सरस्वत्यातितरां जितेत्यर्थः अन्यापि सपत्नीगृहमुत्तमं विलोक्य ईर्ष्यया तद्गृहादुत्तमं स्वगृहं करोति सपत्नीत्वं विजिगीषायां हेतुः। अब्जो धन्वन्तरौ चन्द्रे अब्जं पद्मशङ्खयोरिति हेमचन्द्रः॥ ४९॥

कण्ठइति॥ चतुरा वीणावादननिपुणा सरस्वती अस्या भैम्याः कण्ठे वसन्ती वासं कुर्वती सती यत् विपञ्चीं वीणां वादयते तदेव विपञ्ची

तदेव वाग्भूय मुखे मृगाक्ष्याः
श्रोतुः श्रुतौ याति सुधारसत्वं ॥ ५० ॥
विलोकिता स्यान्मुखमुन्नमय्य
किं वेधसेयं सुषमासमाप्तौ।
धृत्युद्भवा यच्चिबुके चकास्ति
निम्ने मनागङ्गुलियन्त्रणेव ॥ ५१ ॥

वादनमेव मृगाक्ष्या भैम्या मुखे वाग्भूय वाचीत्वेन परिणम्य श्रोतु र्जनस्य श्रुतौ श्रवणे सुधारसत्वं सुधावदास्वाद्यत्वं याति प्राप्नोति वा यं भैम्या मधुरालापः किन्तु कण्ठे निरन्तरं वसन्त्या सरस्वत्या वाद्य मानवीणारवएव कथमन्यथा भूयमाणः श्रोतृणामभूताखादवदा नन्दं जनयतीत्यर्थः अतिमधुरस्वरेयमिति भावः। वाग्भूयेति वाक्शब्दस्य च्विप्रत्ययान्तत्वेन स्वान्त इति प्रादुरादित्वात् क्त्वा यप् ॥५०॥

एकश्लोकेन चिबुकं वर्णयति॥ विलोकितेति॥ सुषमासमाप्तौ मुखस्य परमशोभानिर्म्माणसमाप्तौ सत्यां वेधसा ब्रह्मणा इयं भैमी मुखं उन्नमय्य कीदृशी शोभा जातेतिदिदृक्षया अस्या मुखं किञ्चि दूर्द्ध्वीकृत्य किं विलोकिता स्यात् दृष्टवदना भवेत् कथमेवं त्वया ज्ञातमित्यत्राह यद्यस्मात् मनागीषन्निम्ने अस्याश्चिबुके अधरादधो भागे धृत्युद्भवा धारणजनिता अङ्गुलियन्त्रणेव अङ्गुल्या कृता पीड नेव चकास्ति शोभते अतिमार्द्दवादङ्गुलिधारणेनापि यन्निम्नत्वं जातं तदेव चिबुके वर्त्तते वतुत्तमस्त्रीत्वात् स्वाभाविकश्चिह्नविशेष इत्यर्थः अन्योऽपि शिल्पी किञ्चिन्निर्म्माय तन्मुखमूर्द्ध्वीकृत्य शोभां निरीक्षते आमत्वाच्चाङ्गुलिनिवेशेन च तत्र निम्नत्वं जायते ॥ ५१ ॥

Digitized by Google

प्रियामुखीभूय सुखी सुधांशु
र्जयत्ययं राहुभयव्ययेन।
इमां दधाराधरविम्बलीलां
तस्यैव बालद्युतिचक्रवालं ॥ ५२ ॥
अस्या मुखस्यास्तु न पूर्णिमास्यं
पूर्णस्य जित्वा महिमा हिमांशुं।

पुनरपि नवभिः श्लोकैः सावयवं मुखं वर्णयति ॥ प्रियेति ॥ अयं सुधांशुश्चन्द्रः प्रियाया भैम्या मुखीभूय वदनरूपेण परिणम्य राहोर्यं द्वयं ग्रासाशङ्का तस्य व्ययोऽपगमस्तेन हेतुना सुखी सन् जयति सर्वोत् कर्षेण वर्त्तते चन्द्र एवास्या मुखमित्यर्थः तर्हि अधरलौहित्यं कथमित्य तआह तस्यैव चन्द्रस्य बालं उदयसमयभावि करचक्रवालं किरण मण्डलं कर्तृ इमां प्रत्यक्षविषयां अधरविम्बलीलां लौहित्यलक्षणं ओष्ठाधरविलासं दधार धारयति स्म उदितमात्रस्य चन्द्रस्य लोहितं किरणमण्डलमेव ओष्ठाधररूपेण परिणतमित्यर्थः बालेन्दुकिरणा लोहिता भवन्तीत्येवमुक्तं अथ च बालो लीलां क्रीडां धारयत्येव। चक्र वालन्तु मण्डलमित्यमरः ॥ ५२ ॥

अस्या इति ॥ पूर्णिमाया आस्यं मुखमिव हिमांशुं पूर्णचन्द्रं जित्वा स्थितस्य पूर्णस्य सर्वावयवपरिपूर्णस्य अथ च वर्त्तुलस्य अस्या भैम्या मुखस्य महिमा महत्त्वकीर्त्तिरथ च चन्द्रापेक्षया अधिकपरिमाण वत्त्वं नास्तु किं न तिष्ठतु अपि तु अस्त्वेवेत्यर्थः कुतो महिमेत्यत आह खलु यस्मात् यस्य मुखस्य तृतीयो भागोऽंशो भालो ललाटं अर्ध

भूलक्ष्मखण्डन्दधदर्द्धमिन्दु
भालस्तृतीयः खलु यस्य भागः ॥ ५२ ॥
व्यधत्त धाता मुखपद्ममस्याः
सम्राजमम्भोजकुलेऽखिलेऽपि।

खण्डं इन्दुः अर्द्धखण्डरूपचन्द्रः किम्भूत इन्दुर्भुवावेव लक्ष्म कलङ्कं दधत् धारयन्। यस्य तृतीयोभागोयस्यार्द्धं ततस्ततोऽधिकं भवत्येव भैम्या भालोऽर्द्धचन्द्रतुल्यस्तदधोभागः पूर्णचन्द्रतुल्य इति भावः पौर्णमासमित्यपि क्वचित् पाठः। पूर्णिमास्थं हिमांशुं जित्वा स्थितस्या स्या मुखस्य महिमा नास्तु हीनजयस्य महत्त्वप्रयोजकत्वाभावात् चन्द्रस्य हीनत्वमेव ख्यापयति भूलक्ष्मेत्यादावित्यपि व्याचक्षते। भूरूपं लक्ष्म खण्डं कलङ्कखण्डं दधत् धारयन् यस्य तृतीयो भागो भालोऽर्द्धमिन्दुरर्द्धचन्द्र इति केचित् ॥ ५२ ॥

व्यधत्तेति ॥ धाता ब्रह्मा अखिलेऽपि समस्तेऽपि अम्भोजकुले पद्मवर्गे अस्या भैम्या मुखपद्मं सम्राजं मण्डलेश्वरं अथ च पद्मसमूहमध्ये सम्यक् राजते शोभत इति तादृशं व्यधत्त कृतवान् अतएव हेतोर्नेत्राभिधेयौ नेत्रनामकौ सरोजराजौ पद्मानां राजानौ अथ च तेभ्यः श्रेष्ठे नेत्रे अदसीयां एतदीयां भैमीमुखपद्मरूपसम्राट्सम्बन्धिनीं सेवां अनुवृत्तिं भजतः कुरुत यद्यस्य सरोजसम्राट्त्वं नस्यात् तर्हि नेत्रसंज्ञकाभ्यां सरोजराजाभ्यां कथं सेवा क्रियत इत्यन्यथानुपपत्त्यास्य सम्राट्त्वं सिद्धमित्यर्थः अन्योऽपि सम्राट् राजभिः सेव्यते

Digitized by Google

सरोजराजौ सृजतोऽद्य सीयां
नेत्राभिधेयावत एव सेवां ॥ ५४ ॥
दिवारजन्योरविसोमभीते
चन्द्राम्बुजे निक्षिपतः स्वलक्ष्मीं।
आस्ये यदास्यान तदा तयोः श्री
रेकाश्रयेदन्तु कदा न कान्तं ॥ ५५ ॥

भैम्या नयने पद्मेभ्यउत्कृष्टे मुखन्त्वत्युत्कृष्टमिति भावः। येनेष्टं राज सूयेन मण्डलेश्वरस्य यः। शास्ति यश्चाज्ञया राज्ञः स सम्राडिति मरः॥ ५४ ॥

दिवेति॥ दिवारजन्योर्दिनरात्र्योर्यथाक्रमं रविसोमभीते चन्द्राम्बुजे दिवसे सूर्यभीतश्चन्द्रः रात्रौ चन्द्रभीतं पद्ममित्युभे यदा अस्या भैम्या आस्ये मुखे स्वलक्ष्मीं निजशोभां निक्षिपतः स्थापयतः अथ च पुनर्ग्रहीतुं न्यासीकुरुतः तदा तयोश्चन्द्राम्बुजयोः श्रीः शोभा न भवति इदन्तु भैम्या मुखं पुनरेकाश्रिया चन्द्रपद्मयोरन्यतरस्य शोभया दिवसे चन्द्रशोभया रात्रौ पद्मशोभया चेत्यर्थः कदा कस्मिन् समये दिवसे रात्रौ च न कान्तं न सशोभं अपि तु सर्व्वदैव। चन्द्रस्य शोभा रात्रावेव न तु दिने पद्मस्य शोभा दिनएव न तु रात्रौ भैमीमुखस्य तु दिवा रात्रौ च शोभा अस्तुत्यर्थः। अन्योऽपि धनी कुतश्चिद्भीतः सन् स्वधनं कस्मिंश्चिन्महिमशालिनि जने विन्यस्यति भयकारणापगमे च पुनस्तस्माद्गृह्णाति दिवसे चन्द्रस्य सूर्यकिरणेनाभिभूतत्वात् रात्रौ पद्मस्य सङ्कोचात् मुखस्य च सर्व्वदा प्रफुल्लत्वादेवमुक्तं॥ ५५॥

Digitized by Google

अस्यामुखश्रीप्रतिबिम्बमेव
जलाच्च तातान्मुकुराच्च मित्रात् ।
अभ्यर्थ्य धत्तः खलु पद्मचन्द्रौ
विभूषणं याचितकं कदाचित् ॥ ५६ ॥
अर्काय पत्ये खलु तिष्ठमाना
मूर्त्तैर्मितामच्चिभिरम्बुकेलौ ।

अस्या इति ॥ वस्तूत्प्रेक्षे पद्मचन्द्रौ यथाक्रमं तातात् जनकात् जलाच्च मित्रादर्शमुकुरादर्पणाच्च अभ्यर्थ्य भोजनक मित्र वा भवत्प्रतिबिम्बिता भैमीमुखशोभा मह्यं पञ्चं दीयतां पुनरप्येमां प्रतिदास्यामीत्यादिना याचित्वा अस्या भैम्या मुखश्रीप्रतिबिम्बमेव मुखशोभायाः प्रतिबिम्बरूपं याचितकं याञ्चाप्राप्तं विभूषणं कदाचित् दिने रात्रौ च धत्तो धारयतः यदा जले भैमीमुखस्य प्रतिबिम्बो भवति तदा पद्मं जनकात् तातं जलं तं याचित्वा दिवसे शोभते एवं दर्पणे च यदा तस्य प्रतिबिम्बो भवति तदा चन्द्रः स्वच्छत्वादिसाम्यात् मित्रं दर्पणं तं याचित्वा रात्रौ शोभत इत्यर्थः अन्योऽपि पितृमित्राभ्यां याचितकं गृहीत्वा शोभते याचितकभूषणमपि कदाचिद्धार्य्यते नतु सर्व्वदा इति कदाचिदित्युक्तं भैमीमुखं पद्मचन्द्रापेक्षयात्यतिरमणीयमिति भावः चकारमुभयप्राधान्यसूचकं। दर्पणे मकुरादर्शाविति याञ्चयाप्तं याचितकमिति चामरः ॥ ५६ ॥

अर्कायेति ॥ वस्तूत्प्रेक्षे पत्ये स्वामिने अर्काय सूर्याय तिष्ठमानाः स्वाभिप्रायं प्रकाशयन्त्योऽम्बुजिन्यः पद्मिन्यः विस्तारिताः प्रसारिताः

Digitized by Google

भैमीमुखस्य श्रियमम्बुजिन्यो
याचन्ति विस्तारितपद्महस्ताः ॥ ५७ ॥
अस्यामुखेनैव विजित्य नित्य
स्पर्द्धी मिलत्कुङ्कुमरोषभासा ।

पद्मान्येव हस्ता याभिस्तादृश्यः सत्यः अम्बुकेलौ जलविहारे स्पर्द्धया मरन्दैरर्थिभिश्चक्षुर्भिर्मिलितां ज्ञातां भैमीमुखस्य श्रियं याचन्ति भैमीमुखश्रीरस्मभ्यं दीयतामिति स्वपतिं सूर्य्यं प्रार्थयन्ते कमलभैमीवदनयोर्महदन्तरमिति भावः अन्याप्यन्यदीयं भूषणं वस्तु वा दृष्ट्वा एवंविधं ममापि मह्यं दीयतामिति हस्तं प्रसार्य्य स्वपतिं याचते । अर्कोदय पथ्ये तिष्ठमाना हृद्गतं दर्शयितुकामा अम्बुजिन्यो भैमीमुखस्य श्रियं याचन्ति अस्मत्पतिः सूर्य्योऽधुना समागमिष्यतीति तन्मुखशोभया वयमपि रुचिरा भवाम इति भैमीमुखशोभां भैमीं प्रार्थयन्त इति वा । अर्थायेति श्लाघादेर्य्यत्प्रोक्तेति संप्रदानत्वं तिष्ठमानेति प्रकाशनस्थेयाख्ययोश्चेत्यात्मनेपदं ॥ ५७ ॥

अस्या इति ॥ नित्यस्पर्द्धी भैमीमुखेन सह सर्व्वदा वर्द्धमानस्पर्द्धः खलु निश्चितं अस्या भैम्या मुखेनैव विजित्य पराभूय प्रसह्य हठात् बद्ध्वा आनीय बध्यमान एव स्यात् भवेत् यतोऽयमद्यापि तिष्ठन् परिवेषः परिधिरेव पाशोऽवच्छन्नरश्मयस्य तादृशः विम्बभूतेन मुखेन मिलन्नयं च कुङ्कुमं तदेव रोषभाः क्रोधकोपितं यत्र तादृशेन भैमीमुखेन सह स्पर्द्धया अपराधकस्याऽमुखेनैव क्रोधकोपितेन जित्वा परिवेषमिषात् पाशेन

Digitized by Google

प्रसह्य चन्द्रः खलु नश्यमानः
स्यादेव तिष्ठत्परिवेशपाशः ॥ ५८ ॥
विधोर्विधिर्बिम्बशतानि लोपं
लोपं कुहूरात्रिषु मासिमासि ।
अभङ्गुरश्रीकममुं किमस्या
मुखेन्दुमस्थापयदेकशेषं ॥ ५९ ॥

तत्र इत्यर्थः चन्द्रो भैमीमुखसदृशो न भवतीति भावः अन्योऽपि स्पर्द्धमानं रोषाद्बद्धोभूत्वा विजित्य झटिति बध्नाति सोऽपि तत्रैव चिरं तिष्ठति । वस्तूत्प्रेक्षायां वा ॥ ५८ ॥

विधोरिति ॥ विधिर्विधाता मासि मासि प्रतिमासं कुहूरात्रिषु नष्टेन्दुकलामावास्यारात्रिषु विधोश्चन्द्रस्य बिम्बशतानि मण्डलशतानि लोपंलोपं विलुप्यविलुप्य अभङ्गुरा अविनश्वरी श्रीः शोभा यस्य तादृशं यस्या भैम्या अमुं दृश्यमानं मुखेन्दुं मुखचन्द्रं एकश्चासौ शेषोऽवशिष्टश्चेति तादृशं किं अस्थापयत् स्थापितवान् चन्द्रमण्डलस्य क्षयित्वान्मुखचन्द्रस्य चाविनश्वरशोभत्वात्तत्कार्यकारित्वाच्च विधाता बुद्धिपूर्वकमेव चन्द्रं विलुप्य अद्वितीयं भैमीमुखचन्द्रं स्थापयामासेत्यर्थः कुह्वां चन्द्रस्य सर्वथाऽदर्शनादियमुत्प्रेक्षा अन्योऽपि शिल्पी स्वनिर्मितानां बहूनां मध्ये अपकृष्टानि विनाश्य उत्कृष्टमेकं स्थापयति तदयित्वाच्चन्द्रो भैमीमुखसदृशो नेति भावः लोपंलोपमिति आभीक्ष्ण्ये णमुल् समस्तमभिहितेऽप्याभीक्ष्ण्य इति द्विरुक्तिः ॥ ५९ ॥

Digitized by Google

कपोलपत्रान्मकरात् सकेतु-
र्भ्रूभ्यां जिगीषुर्धनुषा जगन्ति ।
इहावलम्ब्यास्ति रतिं मनोभू-
रज्यद्वयस्यो मधुनाधरेण ॥ ६० ॥
वियोगबाष्पाञ्चितनेत्रपद्म-
च्छद्मार्पितोत्सर्गपयःप्रसूनौ ।

कपोलेति ॥ मनोभूः कामो रतिं स्वप्रियां अथ च अनुरागं अवलम्ब्य इह भैमीमुखे अस्ति वसति किम्भूतः कपोलपत्रात् कपोललिखितपत्रवल्लिरूपात् मकरात् जलजन्तुविशेषात् सकेतुः सध्वजः तथा भ्रूभ्यां भ्रूयुगललक्षणेन धनुषा जगन्ति जिगीषुर्जेतुमिच्छुः तथा मधुना वसन्तरूपेण अथ च मधुवदास्वाद्येन अधरेण दन्तच्छदेन रज्यन् अनुरक्तोभवन् अथ च लोहितीभवन् वयस्यो मित्रं यस्य तादृशः भैमीमुखे सकलकामचिह्नदर्शनादत्र सत्यमेव सपरिवारः कामो वसतीत्यनुमीयत इत्यर्थः भैमीमुखमवलोकनमात्रेणैव सम्पूर्णं काममाविर्भावयतीति भावः उप्रत्ययश्च लादिलात् न जगन्तीत्यत्र कर्तरि त्यादिना षष्ठी रज्यदिति कुपिरञ्ज्योर्गणनित्यं परस्मै वेति परस्मैपदं श्यन् च ॥ ६० ॥

अथ श्लोकपञ्चकेन भैम्याः कर्णौ वर्णयति ॥ वियोगेति ॥ अस्या भैम्याः कर्णौ । रतिवत्पतिभ्यां कामपत्न्यै कामाय च निवेदयपयो निवेदनीयपिच्छके इदंक् एवंविधं किं विधिश्चिख्यं ब्रह्मणो निर्माणं रतिं

कृपा किमस्यारतितल्पतिभ्यां
निवेद्यपूपौ विधिग्निस्यमीदृक् ॥ ६१ ॥
दृशाविश्नद्येन पथातिवक्रः
स्मास्लौघनिष्यन्दरसप्रवाहः ।
सोऽस्याः श्रवःपत्त्रयुगे प्रणाली
लेखेव धावत्यभिकर्णकूपं ॥ ६२ ॥

कामदेवोद्दिश्य निवेदनार्थं किमेनौ ब्रह्मणा निर्मितावित्यर्थः किंविद् शीयसाधर्म्ये घटयति किम्भूतौ वियोगवाम्यैर्विरहजनितामुभिरर्चिते ये नेत्रपद्मे नयनपङ्कजे तयोर्ग्रसना याजेन अर्पिते समीपे दत्ते उत्सर्गाय दानार्थं पयःप्रसूने पद्मे ययोस्तादृशौ भैमीनेत्रयोः कर्णाभ्यामर्पितात् । नैवेद्यवस्तु हि जलाभ्युक्षितपुष्पयुक्तं कृत्वा देवाय निवेद्यते केचित् पूपायपि वर्णकाराः क्रियन्ते भैम्याः कर्णदर्शनादपि कामोत्पत्तिर्जायत इति भावः । पूपोऽपूपः पिष्टकं स्यादित्यमरः ॥ ६१ ॥

दृशेति ॥ अतिवक्रोविषमत्वादतिकुटिलोदुर्बोधोऽथ च अनृजुः स्मास्लामोघस्य समूहस्य निष्यन्दः सारभागएव रसप्रवाहोयेन पथा इव भैमीकर्णकूपे अविशत् प्रविष्टवान् सपन्थाएवा भैम्याः श्रवःपत्त्रयुगे कर्णपत्त्रावलिविषये प्रणाल्या जलगमनमार्गेण लेखेव अभिकर्णकूपं कर्णकूपमभिमुखोभूय धावति गच्छति नेयं कर्णरन्ध्रपर्य्यन्तवर्त्तिनी कर्णपत्त्रावलिलिखिता वक्ररेखा किन्तु कर्णकूपं प्रविष्टवतः स्मास्लौघनिष्यन्दरसप्रवाहस्य वक्रप्रणालीपिक्रमित्यर्थः भैम्याः कर्णौ वक्ररेखायुक्तपत्त्रावलिशोभितावितिभावः सोऽस्या इत्यत्र सा स्या इति पाठो न मनोरमः ॥ ६२ ॥

Digitized by Google

अस्यायदष्टादश संविभज्य
विद्याःश्रुती दध्रतुरर्द्धमर्द्धं ।
कर्णान्तरुत्कीर्णगभीररेखः
किन्तस्य संख्यैव न वा नवाङ्कः ॥ ६१ ॥
मन्येऽमुना कर्णलतामयेन
पाशद्वयेन च्छिदुरेतरेण ।

अस्यादिति ॥ यस्या भैम्याः श्रुती कर्णौ अष्टादशविद्याः संविभज्य द्विधा कृत्वा यत् अर्द्धमर्द्धं प्रत्येकं दध्रतुर्धारयामासतुः कर्णान्तःकर्णमध्ये उत्कीर्णा उन्नता गभीरा रेखा यस्य तादृशोनवाङ्कः नवसंख्याबोधकोऽङ्कः किं तस्यैव भूतार्द्धस्यैव संख्या न वा अपि तु तस्यैव संख्याबोधकोऽङ्क इत्यर्थः यस्य नवा अपूर्व्वाश्चर्य्यरूपा संख्यैव किं इति वा सम्भावना नवसंख्यका विद्या एकः कर्णोधारयति अपरोऽपि तथेति द्योतनार्थं अस्यैव किं भैम्याः कर्णद्वयं नवसंख्याद्योतकेनाङ्कविशेषेण प्रत्येकं चिह्नितमित्यर्थः भैम्याः कर्णाभ्यन्तररेखा नवाङ्कतुल्यत्वादतिसुलक्षणेतिभावः ॥ अत्राष्टादशविद्याः पूर्व्वोक्ता ऋग्वेदादयः विजातिस्त्रीणां वेदाध्ययनादिनिषेधेऽपि तेषामर्थश्रवणं न दोषायेति यथोक्तं कायकलादयोऽन्या एव वाष्टादशविद्याः ॥ ६१ ॥

मन्यइति ॥ रतीशः कामोऽमुना एतदीयेन कर्णलतामयेन कर्णवल्लीरूपेण छिदुरेतरेण दृढतरेण पाशद्वयेन पाशकयुगलद्वयेन अनङ्गीकृता अस्वीकृता आयासतिः परिश्रमाधि

एकाकिपाशं वरुणं विजिग्ये
ऽनङ्गीकृतायासततीरतीशः ॥ ६४ ॥
आत्मैव तातस्य चतुर्भुजस्य
जातश्चतुर्दोरुचितः स्मरोऽपि ।
तच्चापयोः कर्णलते भ्रुवोर्द्वे
वंशत्वगंशौ चिपिटे किमस्याः ॥ ६५ ॥

कं येन तादृशः सन् एकएव एकाकी पाशोबन्धनसाधनविशेषोयस्य तादृशं वरुणं विजिग्ये विजितवान् इत्यहं मन्ये सम्भावयामि पाशद्वयायुधोह्येकपाशायुधमनायासेन जयत्येव भैम्याः कर्णयुगं दृष्ट्वा वरुणादयः सर्व्वेऽपि कामवशाभवन्तीतिभावः ॥ ६४ ॥

आत्मैवेति ॥ स्मरोऽपि कामोऽपि चतुर्दोश्चतुर्भुजउचितोयुक्तः यतश्चतुर्भुजस्य तातस्य पितुर्नारायणस्य आत्मैव स्वरूपमेव जातः आत्मा वै पुत्रनामासीति येयादृशाद्वै जायते स तादृश इति च श्रुतेः तस्माच्चतुर्भुजस्य औरसश्चास्य पुत्रः कन्दर्पश्चतुर्भुज एवेति सिद्धं नन्वेवं चतुर्भुजस्य जिगीषोर्द्वे धनुषी द्वे च मौर्व्यौ । भवितुं युक्ते अस्य तु न पश्यामीत्यत आह अस्या भैम्या भ्रुवौ भ्रूलताद्वये यौ तस्य चतुर्भुजस्य कामस्य चापयोर्द्वयोर्धनुषोश्चिपिटे विस्तृते अस्या द्वे कर्णलते एव वंशत्वगंशौ किं वंशत्वग्भागनिर्म्मितमौर्व्यौ किं भैम्या भ्रुवौ कामधनुषी कर्णौ च मौर्व्यावित्यर्थः वंशपृष्ठमयी च दृढतरा मौर्व्वी क्रियते निर्व्यापारस्य धनुषोऽवतारिता मौर्व्वी सङ्कुचिता कोणे तिष्ठति कर्णलते अपि भ्रूधनुषोः कोणे विद्येते भैमीकर्णलता कामवशीकरणहेतुरिति भावः । चिपिटः खाद्यभेदे ना त्रिषु पिच्चटविस्तृते इति मेदिनी ॥ ६५ ॥

Digitized by Google

ग्रीवाद्भुतैवावटुशोभितापि
प्रसाधिता माणवकेन सेयं।
आलिङ्गितामप्यवलम्बमाना
सरूपताभागखिलोङ्ककाया ॥ ६६ ॥

एकश्लोकेन ग्रीवां वर्णयति ॥ ग्रीवेति ॥ सा प्रसिद्धा या पूर्वं श्रुता सा वा इयं दृश्यमाना भैम्याग्रीवा अद्भुतैव आश्चर्यरूपैव असाधारणसौन्दर्य्यशालित्वात्। अद्भुतत्वमेव विशेषणैर्दर्शयति किम्भूता अवटुना घाटया शोभिता अलङ्कृता अपिः समुच्चये तथा माणवकेन अलंकाराख्यहारविशेषेण प्रसाधिता शोभिता अतएव आलिङ्गितां आलिङ्गनयोग्यतां अवलम्बमाना आश्रयन्ती अत्राप्यपिः समुच्चये तथा सरूपतां रूपवत्तां सौन्दर्य्यं भजत इति तादृशोऽखिलः समस्तजङ्घकायः शरीरोर्द्धदेशो यस्मात्तादृशी अतएवाद्भुतैव भैम्याग्रीवेत्यर्थः अथ च वटुरुपनीतमात्रोद्विजः माणवकोऽपि सएव अवटुना वटुभिन्नेन शोभितापि माणवकेन वटुनैव शोभितेति तथा या आलिङ्गितां वाद्यविशेषतां अवलम्बमानापि सरूपताभाक् समानरूपतां भजमानेऽखिलजङ्घकोवाद्यविशेषो यस्यास्तादृशी भवतीति च विरोधाभासः आलिङ्ग्यवाद्यभेदस्य हि जङ्घकवाद्यभेदेन साम्यं विरुद्धमेव हरीतक्याकृतिस्त्वङ्गिः यवमध्यस्तथोर्द्धकः। आलिङ्ग्यश्चैव गोपुच्छसमानः परिकीर्त्तित इति पृथक्पृथक्लक्षणेन वैलक्षण्यावगमात्। अवटुर्घाटा कृकाटिका इति अलंकारोमाणवक इति मदनानुरजाभेदादङ्क्याविङ्गोर्द्धकास्त्रय इति चामरः ब्रह्मचारी वटुः समावित्ति हारभेदे माणवको बाले कुपुरुषे वटाविति च त्रिकाण्डशेषः ॥ ६६ ॥

Digitized by Google

कवित्वगानप्रियवादसत्या
न्यस्याविधाता व्यधिताधिकण्ठं ।
रेखात्रयन्याममिषादमीषां
वासाय सोऽयं विबभाज सीमाः ॥ ६७ ॥
बाहू प्रियायाजयतां मृणालं
द्वन्द्वे जयो नाम न विस्मयोऽस्मिन् ।

एकश्लोकेन कण्ठं वर्णयति ॥ कवित्वेति ॥ विधाता ब्रह्मा भैम्या अधिकण्ठं कण्ठे कवित्वं काव्यं गानं गीतिः प्रियवादो मधुरवचनं सत्यं तथ्यं एतानि चत्वारि व्यधित स्थापितवान् ननु चतुर्णां वासे किं विनिगमकमित्यत आह सोऽयं विधातैव कण्ठे रेखात्रयन्यासस्य मिषाद्व्याजाद् अमीषां चतुर्णां कवित्वादीनां वासाय पृथक्पृथगवस्थित्यर्थं चतस्रः सीमा विबभाज विभक्तवान् रेखात्रयेण सीमाचतुष्टयसम्भवात् च त्वार्य्येवात्र तिष्ठन्तीत्यर्थः कवित्वादिगुणवती कम्बुकण्ठी चेयमिति भावः ॥ ६७ ॥

श्लोकद्वयेन बाहुद्वयं वर्णयति ॥ बाहू इति ॥ प्रियाया भैम्या बाहू भुजौ मृणालं अयतां पराभवतां उचितमेवैतत् यतोऽस्मिन् द्वन्द्वे बाहुद्वये यज्जयो नाम भवति स विस्मयो न आश्चर्य्यजनको न भवति उत्कृष्टानां जयित्वोचित्यात् अथच द्वन्द्वे युद्धे यत् जयो नाम भवति अस्मिन् विस्मयो न युद्धे एकतरजयस्य नियन्त्रितत्वात् तर्हि कुत्र विस्मय इत्यत आह ननु तत् पुनश्चैरतितरां चित्रं आश्चर्यं यत् भग्नस्य पराजितस्य अमुष्य मृणालस्य अन्तर्हृदयं निर्गुणं यथापूर्व्वं आस्ते

उच्चैस्तु तच्छिद्रममुष्य भग्न
स्यालोक्यते निर्व्यथनं यदन्तः ॥ ६८ ॥
अजीयतावर्त्तशुभंयुनाभ्या
दोर्भ्यां मृणालं किमु कोमलाभ्यां।
निःसूत्रमास्ते घनपङ्कमूर्त्ति
मूर्त्तासु नाकीर्त्तिषु तन्निमग्नं ॥ ६९ ॥

भते भायते पराजितस्यान्तःकरणं यथायुक्तं भवति अस्य तु तत्कोप्या श्चर्य्यमित्यर्थः अथ च भग्नस्य विदारितस्य मृणालस्यान्तर्मध्ये निर्व्य थनं छिद्रं दृश्यते अस्या बाहू मृणालादपि सरलौ कोमलौ चेति भावः। विस्मयायेति क्वचित्पाठः ॥ रन्ध्रं कलहयुग्मयोरिति छिद्रं निर्व्यथनं रोकमितिचामरः ॥ ६८ ॥

अजीयतेति ॥ किमिति सम्भावनायां आवर्त्तवत् जलभ्रमवत् आव र्त्तेन दक्षिणावर्त्तेन रूपेण वा शुभंयुः शुभान्विता नाभिर्यस्यास्तादृश्या भैम्याः कोमलाभ्यां दोर्भ्यां बाहुभ्यां मृणालं पद्मनालगतं बिसं किमु अजीयत जितं अतएव निःसूत्रं अपयशस्कं निरुपायं अथ च तन्तुर हितं सत् मृणालं घनपङ्कमूर्त्तिषु निविडपङ्कमूर्त्तिकालवर्णासु मूर्त्तासु मूर्त्तिमतीषु अकीर्त्तिषु अयशःसु निमग्नं सत् आस्ते अकीर्तेः श्यामत्वे न वर्णनीयत्वात् पङ्कमूर्त्तत्वं अतिकोमलं मृणालं तन्तुरहितं भवति अन्योऽपि केनचिज्जितोनिरुपायः सन्नकीर्त्तिषु निमज्य तिष्ठति को मलमपि मृणालं भैम्या भुजसदृशं नेति भावः। सूत्रन्तु सूचनाग्रन्थे सूत्रं तन्तुव्यवस्थयोरिति विश्वः ॥ ६९ ॥

Digitized by Google

रज्यन्नखस्याङ्गुलिपञ्चकस्य
मिषाद्दशौ हैङ्गुलपत्त्रतूणे।
हैमैकपुङ्खास्ति विशुद्धपर्व्वा
प्रियाकरे पञ्चशरी स्मरस्य ॥ ७० ॥
अस्याः करस्पर्द्धनगर्द्धवर्द्धि
र्बालत्वमापत् खलु पल्लवोऽयं।

श्लोकत्रयेण करौ वर्णयति ॥ रज्यदिति ॥ हैङ्गुलपत्त्रतूणे तादृशपत्त्रमयेषुधिलक्षणे प्रियायाः भैम्याः करे रज्यन्तः स्वयमेव रक्तीभवन्तो नखा यस्य तादृशस्य अङ्गुलिपञ्चकस्य मिषाद्व्याजात् असौ दृश्यमाना स्मरस्य कामस्य पञ्चशरी बाणपञ्चकं अस्ति किम्भूता हैमाः सुवर्णमया एके श्रेष्ठाः पुङ्खा मुखानि यस्यास्तादृशी तथा विशुद्धानि सरलानि पर्व्वाणि ग्रन्थयो यस्याः सा मदनस्य पुष्पायुधत्वादिषुधिरपि पुष्पमयः तच्च पुष्पं साम्याद्रक्तपद्ममेव इषुधिश्च हिङ्गुलेन रज्यते भैम्याः करः कामेषुधितुल्यः तत्र पञ्चाङ्गुलयः पञ्चबाणतुल्याः रक्तनखाश्च सौवर्णपुङ्खतुल्या इत्यर्थः अत्युत्तमं सुवर्णं रक्तं भवति भैम्याः कराङ्गुलिदर्शनात्कामप्रादुर्भावो भवतीति भावः ॥ ७० ॥

अस्या इति ॥ खलूत्प्रेक्षे यः पल्लवः किसलयं अस्या भैम्याः करस्य स्पर्द्धनस्य भैम्याः पाणितुल्योऽहमिति स्पर्द्धायागर्द्धोऽभिलाषस्तेन वृद्धि राधिक्यं यस्य तथाविधः सन् बालत्वं नवीनत्वं आपत्प्राप्तवान् अथ च बालत्वं मूर्खत्वं प्राप्तवान् अपेक्षया उत्कृष्टेन भैमीपाणिना स्पर्द्धमा

Digitized by Google

भूयोऽपि नामाधरसाम्यगर्द्धं
कुर्व्वन् कथं सोऽस्तु नवा प्रबालः ॥ ७१ ॥
अस्यैव सर्गाय भवत्करस्य
सरोजसृष्टिर्म्मम हस्तलेखः ।

नलात् । अथ च स्वयं यः पल्लवोऽपि पदस्वरूपतोऽल्पीयानपि पाणिना सह स्पर्द्धमानो मूर्खत्वं प्राप्तवान् । भूयोऽपि पुनरपि स पल्लवः अधरसाम्यगर्द्धं भैम्या अधरसदृशोऽहमित्यभिकाङ्क्षां कुर्व्वन् सन् कथं वा नाम प्रबालोऽतिनवीनो नास्तु न भवतु अपि तु तथाविध एव भवतु अथ च प्रकृष्टो बालोमूर्खः कथं न भवतु यः पाणिसाम्य मभिलषन् मूर्खोबभूव स पुनरपि पाणितोऽप्युत्कृष्टेनाधरेण साम्य मभिलषन्नतिमूर्खो भवत्येव नामेत्युपहासे नवपल्लवादप्यतिरक्तौ भैम्याः कराधराविति भावः अत्राधरवर्णनं प्रासङ्गिकं । मूर्खेऽर्भकेऽपि बालः स्यादित्यमरः ॥ ७१ ॥

अस्यैवेति ॥ हे भैमि अस्य भवत्करस्यैव भवत्याः पाणेरेव सर्गाय निर्म्माणाय सरोजानां पद्मानां सृष्टिर्मम हस्तलेखो हस्ताभ्यासलेखो ऽभूत् इति किं धाता विधाता हरिणेक्षणायां मृगनयनायामस्यां भैम्यां हस्ते लेखीकृतया लिखितया तया सरोजसृष्ट्या आह सूच यति स्म सरोजादप्यतिरमणीयोभैम्याः करइति भावः हस्ते पद्म रेखा शुभलक्षणा सैव तथोत्प्रेक्षिता अन्योऽपि शिल्पी सुन्दरवस्तु

Digitized by Google

इत्याह धाता हरिणेक्षणायां
किं हस्तलेखीकृतया तयास्यो ॥ ७२ ॥
किं नर्म्मदायाममम सेयमस्या
दृश्याभितोबाहुलतामृणाली,।
कुचौ किमुत्तस्थतुरन्तरीपे
स्मरोष्मशुष्यत्तरबाल्यवारः ॥ ७३ ॥

निर्म्माणार्थे तज्जातीयान्यन्यानि निर्माय हस्ताभ्यासं करोति ॥ ७२ ॥

श्लोकषट्केन स्तनौ वर्णयति ॥ किमिति ॥ मम नर्म्मदाया दर्शन मात्रेण सुखदायिन्या अथ च नर्म्मदाख्यनदीरूपाया अस्या भैम्या अभितः पार्श्वद्वये सेयं दृश्या दर्शनयोग्याविरमणीया बाहुलता भुजवल्लिरूपा मृणाली किं। नर्म्मदानद्यास्तटद्वयेऽपि मृणाली दृश्यते इयमपि मम नर्म्मदा तस्मादस्याः पार्श्वद्वये विद्यमाना बाहुलता मृणाल्येवेति सम्भाव्यत इत्यर्थः तथा स्मरोष्मणा कामोत्तापेन शुष्य त्तरं अतितरां शोषं गच्छद्बाल्यमेव वार्जलं यस्यास्तादृश्या नर्म्मदाया अस्याः कुचौ स्तनरूपे अन्तरीपे द्वीपौ किं उत्तस्थतुः उद्गमञ्चतुः नर्म्मदानद्या अपि उत्तापेन जलशोषादन्तरीपयोरुद्गमञ्जनं भवति भैम्या बाहुलतातिसुन्दरा कुचौ च द्वीपतुल्यत्वादतिपीनाविति भावः। द्वीपोऽस्त्रियामन्तरीपं यदन्तर्वारिणस्तटमिति वार्वारि स लिलं कमलं जलमिति चामरः॥७२॥

तावं प्रभु स्यादनुकर्त्तुमेता
वुत्थानसुस्थौ पतितं न तावत्।
परञ्च नाश्रित्य तरं महान्तं
कुचौ क्षमाज्ञायाः स्वतएव तुङ्गौ॥ ७४॥

तावमिति॥ तावदिति वाक्यालङ्कारे तालं तालफलं कर्तृ उत्थानेन उद्गमनेन सुस्थौ सुन्दरौ एतौ दृश्यमानौ क्षमाज्ञ्या भैम्याः कुचौ अनुकर्त्तुं पीवरतायां सदृशीकर्त्तुं न प्रभु स्यात् समर्थं न भवति यतः पतितं भूमिष्ठं नम्रमधःपतितं वस्तु उद्गमनेन सुन्दरस्य वस्तुनः साम्यं नाप्नुमर्हति अधः पतितत्वेनापकृष्टत्वात् अनुकार्य्यस्य च उत्थान सुन्दरत्वेनोत्कृष्टत्वात् अन्योऽपि पतितः पातित्यदोषयुक्तः पुण्य समृद्धा सुस्थं जनं समीकर्त्तुं न शक्नोति भैम्याः कुचौ भूमिस्थि ततालफलापेक्षयाप्यतिपीवराविति भावः। ननु माभूत् भूमिष्ठता पतितत्वेनास्याः कुचयोः साम्यं वृक्षोपरिस्थितेन तु तालफलेन तद्भवि तुमर्हतीत्यत आह परं पतितादन्यं तालं कर्तृ महान्तं तुङ्गं तरं तालतरुं आश्रित्य च तुङ्गतरवृक्षाश्रयत्वेन तुङ्गं भूत्वापि क्षमाज्ञ्याः कुचौ अनुकर्त्तुं न प्रभु स्यात् यतः कुचौ स्वतएव इतरमनपेक्ष्यैव तुङ्गौ उच्चौ नम्रमन्याश्रयत्वेनोन्नतं वस्तु स्वतएवोन्नतं सदृशीकर्त्तुं शक्नोति इत्योपरिस्थिततालफलादपि भैम्याः कुचावुच्चतराविति भावः चकारोऽप्यर्थे आश्रित्येत्यनेन साकाङ्क्षः परं अन्यं वृक्षमिति वा परम विशेषेण महान्तमिति भावः॥ ७४॥

Digitized by Google

एतत्कुचस्पर्द्धितया घटस्य
ख्यातस्य शास्त्रेषु निदर्शनत्वं ।
तस्माच्च शिल्पान्मणिकादिकारी
प्रसिद्धनामाजनि कुम्भकारः ॥ ७५ ॥

एतदिति ॥ एतस्या भैम्याः कुचस्पर्द्धितया भैमीकुचसदृशोऽहमिति स्पर्द्धया ख्यातस्य प्रसिद्धस्य घटस्य शास्त्रेषु निदर्शनत्वं जातं यत्र यत्र जन्यं तत्तदनित्यं यथा घट इति यत्र नित्यं तत्तदजन्यं यथा घट इत्यन्वयव्यतिरेकाभ्यां दृष्टान्तत्वं जातं अप्रसिद्धस्यापि घटस्य महतो भैमीकुचयोः स्पर्द्धयैव प्रसिद्धत्वात् शास्त्रेषु पण्डितैर्दृष्टान्तत्वेन पुनः पुनः कीर्त्तनं क्रियते अन्यथा जगति विराजमानेषु सुरासुरनरकरितुरगादिवस्तुनिचयेषु निखिलविषयावलोकनरसिकानां शास्त्रकाराणां कथमेकतरसमादरणमित्यर्थः अन्योऽप्यप्रसिद्धः प्रसिद्धस्पर्द्धया प्रसिद्धो भवति वरं विरोधोऽपि समं महात्मभिरिति भारविवचनात् तथा मणिकादिकारी अलिञ्जरादिकारकः कुलालश्च तस्मात् शिल्पात् भैमीकुचस्पर्द्धिकुम्भनिर्म्माणादेव कुम्भकार इति प्रसिद्धनामा अजनि न खलु मणिकादिकरणेन कुम्भकरणात् कुलालस्य कुम्भकारत्वप्रसिद्धिः किन्तु भैमीकुचस्पर्द्धितया ख्यातस्य कुम्भस्य करणादेव कुम्भकारत्वप्रसिद्धिरित्यर्थः कुम्भवद्भैमीकुचौ पीवराविति भावः शास्त्रेषु भारतादिषु निदर्शनत्वं कुम्भकुचा दमयन्तीति दृष्टान्तत्वमिति केचित्। अलिञ्जरः स्यान्मणिक इत्यमरः ॥ ७५ ॥

गुच्छालयस्वच्छमोदबिन्दु
वृन्दाभमुक्ताफलफेनिलाङ्के ।
माणिक्यहारस्य विदर्भसुभ्रू
पयोधरे रोहति रोहितश्रीः ॥ ७६ ॥
निःशङ्कसङ्कोचितपङ्कजोऽय
मस्यामुदीतो मुखमिन्दुबिम्बः ।

गुच्छेति ॥ विदर्भसुभ्रुवो भैम्याः पयोधरे स्तने माणिक्यहारस्य रोहि
तमणेर्लोहिता दीप्तिः रोहति प्रादुर्भवति किम्भूते पयोधरे गुच्छे हार
विशेषे आलयआश्रयोयेषां तादृशानि यानि स्वच्छमानि अति
निर्म्मलानि जलविन्दुवृन्दाभानि जलविन्दुवृन्दसदृशानि मुक्ताफला
नि तैः फेनिलः फेनयुक्तइव अङ्कः क्रोडमध्यभागोयस्य तादृशे
मुक्ताहारमाणिक्यहाराभ्यां भैमीकुचावतितरां शोभेते इतिभावः
अथच फेनिले पयोधरे जलाधारे तडागादौ रोहितस्य मत्स्य
विशेषस्य शोभा प्रादुर्भवति अथच पयोधरे मेघे रोहितश्रीः ऋजु
शक्रधनुःशोभा आविर्भवति । हारभेदा यष्टिभेदाद्गुच्छगुच्छार्द्धगो
स्तना इति रोहितोलोहितोरक्त इति अपो भाषाः । रोहित इति
इन्द्रायुधं शक्रधनुस्तदेव ऋजु रोहितमिति चामरः । अयं श्लोको
न बहुषु पुस्तकेषु दृश्यते भरतसेनादिभिरपि नायं व्याख्यातः
॥ ७६ ॥

निःशङ्केति ॥ अस्या भैम्या वर्त्तमानं मुखमेव इन्दुबिम्बोऽयं उदीत
उद्गतः यतोनिःशङ्कं यथा तथा सङ्कोचितानि सङ्कोचं प्रापितानि
अथ च जितानि पङ्कजानि पद्मानि येन तादृशः चन्द्रेण पद्मानि
सङ्कोच्यन्ते मुखेनापि अतुलात्तानि तथा क्रियन्ते तस्मादिदं मुखं किन्तु

Digitized by Google

चित्रं तथापि स्तनकोकयुग्मं
न स्तोकमप्यञ्चति विप्रयोगं ॥ ७७ ॥
आभ्यां कुचाभ्यामिभकुम्भयोः श्री
रादीयतेऽसाधनयोर्न ताभ्यां ।
भयेन गोपायितमौक्तिकौ तौ
प्रव्यक्तमुक्ताभरणाविमौ यत् ॥ ७८ ॥

चन्द्रबिम्बरूपेत्यर्थः यद्यपि पद्मसङ्कोचात् मुखस्य चन्द्रत्वे सिद्धेऽपि स्तनकोकयुग्मं स्तनद्वयरूपं चक्रवाकयुगलं स्तोकमपि अल्पमपि विप्रयोगं वियोगं यत् नाञ्चति न प्राप्नोति मिलितमेव यत्तिष्ठति तच्चित्रं आश्चर्यं चन्द्रोदये हि चक्रवाकमिथुनं वियोगं प्राप्नोति स्तनद्वयं तु नेत्याश्चर्यं चक्रवाकाकारौ भैम्याः स्तनौ परस्परमति संश्लिष्टावितिभावः । कोकश्चक्रश्चक्रवाक इत्यमरः ॥ ७७ ॥

आभ्यामिति ॥ आभ्यां प्रत्यक्षविषयाभ्यां भैम्याः कुचाभ्यां इभकुम्भयोर्गजकुम्भयोः श्रीः शोभा अथ च सम्पत्तिरादीयते बलाद्गृह्यते ताभ्यामिभकुम्भाभ्यान्तु अनयोः कुचयोरसौ श्रीर्नादीयते कुतस्त्वेदं ज्ञातमित्यत आह यद्यस्मात्तौ इभकुम्भौ भयेन कुचाभ्यां भीत्येव गोपायितं गुप्तीकृतं मौक्तिकं याभ्यां तादृशौ । इमौ कुचौ तु प्रव्यक्तं प्रकटं बहिर्वर्त्तमानं मुक्ताभरणं ययोस्तादृशौ मुक्ता गजकुम्भाभ्यन्तरे विद्यते मुक्ताहारस्तु स्तनयोरुपरि विद्यते अत इयमुत्प्रेक्षा यस्य श्रीरन्येन ह्रियते स तस्माद्भीतः सन् निजश्रियं भूम्याद्यभ्यन्तरे संगोप्य स्थापयति विजेता तु निर्भयः सन् स्वश्रियं बहिः प्रकटयति गजकुम्भाभ्यामप्यतिरमणीयौ भैमीस्तनाविति भावः ॥ ७८ ॥

Digitized by Google

कराग्रजाग्रच्छतकोटिरर्थी
ययोरिमौ तौ तुलयेत् कुचौ चेत्।
सर्व्वं तदा श्रीफलमुन्मदिष्णु
जातं वटीमप्यधुना न लब्धुं ॥ ७९ ॥
स्तनातटे चन्दनपङ्किलेऽस्या
जातस्य यावद्युवमानसानां।

कराग्रेति ॥ कराग्रे जाग्रत् शतकोटिर्वज्रं यस्य स इन्द्रो ययोर्भैम्याः कुचयोरर्थी मर्द्दनाभिलाषी उन्मदिष्णु उन्मादकं अर्थात् पक्वं सर्व्वं श्रीफलं बिल्वफलं चेद्यदि ताविमौ कुचौ तुलयेत् सदृशीकुर्य्यात् तदा तर्हि तत् श्रीफलं अधुना इदानीं वटीमपि अल्पतया कुचलावण्य लेशमपि लब्धुं प्राप्तुं न जातं नोत्पन्नं इन्द्रोऽपि रम्भामेनकादीनां स्तनौ विहाय एतयोरभिलाषी तस्मादतिमहत्तराभ्यामेताभ्यां साम्यं कथमुन्मादकत्वाद्वृद्धजनैरप्रार्थनीयं बिल्वफलं लब्धुमर्हतीत्यर्थः अथ च कराग्रे जाग्रत्यः शतं कोटयो यस्य सोऽपि ययोरर्थी यद्वाभिलाषी तावेतौ कुचौ सर्व्वं श्रीफलं यदि तुलयेत् तर्हि उन्मदिष्णु उन्मादयुक्तं सत् वटीमपि वराटकमपि मूल्यं लब्धुं न जातं अतीवावज्ञास्पदं जातमित्यर्थः भैम्याः स्तनौ पक्वबिल्वापेक्षयाप्यतिरमणीयाविति भावः। वटः कपर्द्दे न्यग्रोधे इति विश्वः ॥ ७९ ॥

स्तनातटइति ॥ अस्या भैम्याश्चन्दनपङ्किले आर्द्रचन्दनरूपपङ्कयुक्ते स्तनावेव अत्युच्चत्वादतटः प्रपातस्थानं तत्र जातस्य उत्पन्नस्य यावद्युवमानसानां सकलयुवजनान्तःकरणानां स्खलनस्य पतनस्य हाराव

हारावलीरत्नमयूखधारा
काराः स्फुरन्ति स्खलनस्य लेखाः ॥ ८० ॥
क्षीणेन मध्येऽपि सतोदरेण
यत् प्राप्यते नाक्रमणं बलिभ्यः ।

त्यां हारश्रेण्यां यानि रत्नानि तेषां यामयूखधाराः किरणपरम्परा
स्ता एव आकारा मूर्त्तयो यासां तथाविधा लेखाश्चिह्नानि स्फुरन्ति
भासन्ते नैताः किरणपरम्पराः किन्तु चन्दनपङ्किलत्वात् पिच्छिलेऽ
युवजनमनस्खलनप्रपातस्थाने निरन्तरं सञ्चरतां विमुग्धयुवजनमान
सानां पतनरेखा एवेत्यर्थः अन्येषामपि पिच्छिलोच्चप्रदेशे सञ्चरतां
पतनं तद्रेखाश्चोत्पद्यन्ते अत्युच्चौ भैमीकुचौ दृष्ट्वा सर्व्वे युवानो मुह्यन्ती
तिभावः । स्तनातट इत्यत्र स्तनावट इति क्वचित् पाठः तत्र स्तनयो
रवटे गर्त्ते गभीरे स्तनमध्ये इत्यर्थः पङ्किले गर्त्ते लोकस्य पतनं भव
त्येव । प्रपातस्त्वतटोभृगुरित्यमरः अवटः स्यात् खिले गर्त्ते कूपे कुहक
जीविनीति विश्वः ॥ ८० ॥

एकश्लोकेन बलिसहितमुदरं वर्णयति ॥ क्षीणेनेति ॥ मध्येऽपि
अवलग्नदेशेऽपि सता विद्यमानेन क्षीणेन कृशतरेणापि उदरेण
जठरेण यत् बलिभिर्बलिभिर्बलिभ्य आक्रमणं परितोवेष्टनं न प्राप्यते
तत् सर्व्वेषामङ्गानां मुखादीनां वृद्धिः सौन्दर्य्यं यस्यां तथाभूतायां
इह भीमभुवि दमयन्त्यां चित्रमाश्चर्य्यरूपं अनङ्गराज्यस्य कामराज्य
स्य यौवनस्य विजृम्भितं विलसितं क्षीणत्वान्मध्यस्थानोपरि स्थितत्वया
तिसामीप्याच्च आक्रमणयोग्यमप्युदरं यत् त्रिबलिभिर्नाक्रान्तं तद
द्भुतयौवनविलसितमित्यर्थः सर्व्वाङ्गवृद्धावित्यनेन यौवनप्राप्त्या मुखावय
यवानां सौन्दर्य्यं जाते यद्युदरं त्रिवलिभिर्वेष्टितं भवेत्तदा महदै

सर्व्वाङ्गशुद्धौ मदनाङ्गराज्य
विजृम्भितं भीमभुवीह चित्रं ॥ ८१ ॥
मध्यं तनूकृत्य यदीदमीयं
वेधा न दध्यात् कमनीयमंशं ।

रूपं भवेदतः कामेन बुद्धिपूर्व्वकं तन्निवारितमित्यर्थः अथ च मध्ये मध्यसीमायामपि तिष्ठता क्षीणेन कोषबलादिरहितेन सता सा धुना सर्व्वाङ्गानां स्वाम्यमात्यादीनां शुद्धौ सत्यामपि भीमभुवि भया नकायां भूमौ उदरेण युद्धेन बलिभ्योबलवद्भ्योयत् आक्रमणं परा भवोन प्राप्यते तत् अनङ्गस्य सप्ताङ्गरहितस्य दुर्ब्बलस्य राज्यविल सितमाश्चर्य्यंरूपं शुचेः सप्ताङ्गसहिततयातिबलवत्त्वात् स्वस्य च सप्ताङ्गराहित्येनातिदर्ब्बलत्वादनुद्भतस्वभावात् मध्यसीमनि वर्त्तमान त्वाच पराभवस्यावश्यम्भावेऽपि यत् पराभवोनजातस्तत्सप्ताङ्गरहित स्य तथैव आश्चर्य्यंरूपं राज्यविलसितमित्यर्थः । अनङ्गस्य सप्ताङ्गरहि तस्य कस्यचिन्मध्यस्थस्य राज्यविलसितमिति वा । यद्वा अनङ्गस्य पक्षपातरहितस्य राज्यस्य विलसितं सुराज्ये देशे हि दुर्ब्बलोबल वद्भिर्नबाध्यते अथ च भीमस्य राज्ञोभुवि भूम्यां गृहे चित्रमाश्चर्य्यं मतिरमणीयं अनङ्गराज्यस्य भैमीलक्षणस्य कामराज्यस्य विजृम्भितं प्रकाशः अथ च भीमस्य शिवस्य भुवि कामराज्यविजृम्भितमाश्चर्य्यं । उदरं जठरे युद्धे इतिवचः ॥ ८१ ॥

एकश्लोकेन मध्यं वर्णयति ॥ मध्यमिति ॥ वेधा विधाता यदि इद मीयं एतदीयं मध्यं तनूकृत्य क्षीणीकृत्य कमनीयं सुन्दरं सारभूतं अंशं भागं न दध्यात् पृथक् कृत्वा न कुत्रापि स्थापयेत् तर्हि सम्प्र

Digitized by Google

केन स्तनौ सम्प्रति यौवनेऽस्याः
सृजेदनन्यप्रतिमाङ्गदीप्तेः ॥ ८२ ॥
गौरीव पत्या सुभगा कदाचित्
कर्त्रीयमप्यर्द्धतनूसमस्थां ।
इतीव मध्ये निदधे विधाता
रोमावलीमेचकसूत्रमस्याः ॥ ८३ ॥

ति यौवने सति अनन्यप्रतिमा अनन्वसदृशी अङ्गदीप्तिर्यस्यास्तथा भूताया अस्या भैम्याः स्तनौ केन अंशेन प्रकारेण वा सृजेत् कुर्य्यात् अतएव मध्यनिर्म्माणसमये शिल्पचतुरो विधाता कमनीयं किय न्मध्यांशं संगृह्य स्थानान्तरे स्थापितवान् अधुना तु तेनांशेनैव स्तनौ निर्म्मितवानित्यनुमीयते कथमन्यथा मध्यस्य क्षीणता स्तनयोश्चातिपी वरतेत्यर्थः अतिक्षुद्रत्वाद्भीमीमध्योऽतिरमणीय इति भावः ॥ ८२ ॥

चतुर्भिः श्लोकैर्लोमावलीं वर्णयति ॥ गौरीवेति ॥ सुभगा सौभाग्य वती इयं दमयन्त्यपि गौरीव पार्व्वतीव कदाचित् पत्या स्वामिना सह अर्द्धतनूसमस्थां शरीरार्द्धसम्मेलनं कर्त्री साधु करिष्यति इतीव इत्यभिप्रेत्येव विधाता अस्या भैम्या मध्ये मध्यभागे रोमावलीरूपं मेच कसूत्रं श्यामतन्तुं निदधे निहितवान् नेयं रोमावली किन्तु अर्द्धशरी रघटनार्थं विधात्रा छायासूत्रं निहितमित्यर्थः अन्योऽपि शिल्पी पाटयितव्यकाष्ठादौ छायासूत्रनिधानेन चिह्नं करोति। कर्त्रीति शीलाचारेत्यादिना साध्वर्थे तृन्‌ तस्य तादित्वात् समस्थामित्यत्र कर्म्मणि षष्ठी कर्त्तेति क्वचित्पाठस्तदा तुडन्तरूपं। स्यात् सम्यक् संघटनमितिवत् ॥ ८३ ॥

Digitized by Google

रोमावलीरज्जुमुरोजकुम्भौ
गम्भीरमासाद्य च नाभिकूपं ।
मद्दृष्टितृष्णा विरमेद्यदि स्या
न्नैषां वतैषासिचयेन गुप्तिः ॥ ८४ ॥
उन्मूलितालानविलाभनाभि
च्छिन्नस्खलच्छृङ्खलरोमदामा ।

रोमावलीति ॥ मद्दृष्टितृष्णा मम दर्शनाभिलाषोऽस्या रोमावली रूपं रज्जुं उरोजौ स्तनरूपौ कुम्भौ गम्भीरं नाभिलक्षणं कूपञ्चासाद्य प्राप्य तदा विरमेत् शाम्येत् वत खेदे यदि एषां रोमावल्यादीनां सिचयेन वस्त्रेण एषा इदन्मद्दृष्टतरा गुप्तिराच्छादनं न स्यात् न भवेत् आच्छादनाभावश्चेत् एतदङ्गत्रयदर्शनेन चरितार्थत्वान्मम दृष्टितृष्णा निवृत्ता भवेदित्यर्थः अथच रज्जुं कुम्भं गम्भीरकूपञ्च प्राप्य पिपासा तदा शाम्येत् यदि असिचयेन खड्गचयया खड्गधारिपुरुषनिवहेन रक्षणं न भवेत् अनावृष्टौ मरुदेशे च कूपादिकं खड्गधारिभीरक्ष्यते दीर्घतररोमावली उच्चकुचा गभीरनाभी चेयमितिभावः । सिचय शब्दघटना इतिचित्रकाव्यश्लेषः ॥ ८४ ॥

उन्मूलितेति ॥ सेयं भैमी मत्तस्य उद्धटस्य अथ च मदविशिष्टस्य मदनद्विपस्य कामरूपहस्तिनोवासु वसतिभूमिरस्तु भवतु किम्भूता यत उन्मूलितमुत्पाटितं यदालानं बन्धनस्तम्भस्तत्सम्बन्धि यद्विलं गर्त्तस्तदाभा तत्सदृशी नाभिर्यस्यास्तादृशी नेयं नाभिः किन्तु कामगजेनोत्पाटितस्यालानस्य गर्त्तं इत्यर्थः तथा छिन्नं त्रुटितं स्खलत् पतितञ्च यत् शृङ्खलं लौहमयगजबन्धनरज्जुस्तद्वत् रोमदाम रोमावलिर्यस्याः

मत्तस्य सेयं मदनद्विपस्य
प्रस्वापवप्रोच्चकुचास्तु वास्तु ॥ ८५ ॥
रोमावलिभ्रूकुसुमैः स्वमौर्व्वी
चापेषुभिर्मध्यललाटमूर्द्ध्नि ।

तादृशी नेयं रोमावलिः किन्तु कामगजश्छिन्नपतितशृङ्खलमित्यर्थः वलीमध्यगतत्वाद्रोमावल्याश्छिन्नत्वं तथा प्रस्वापाय शयनार्थं कृतौ यौ वप्रौ मृत्तिकास्तूपौ तद्वत् उच्चौ कुचौ यस्यास्तादृशी नेता वुच्चकुचौ किन्तु मत्तकामगजशयनार्थं द्वौ वप्रावित्यर्थः मत्तगजस्योभयपार्श्वपरिवर्त्तनाय ह्युभयपार्श्वे वप्रद्वयं क्रियते इमामेवालभ्य कामोऽविमत्तोजात इति भावः मत्तस्य गजस्य वसतिस्थानमप्येतादृशं भवति ॥ ८५ ॥

रोमावलीति ॥ स रतिजानिर्वीरोरतिर्जाया यस्य सचासौ वीरश्चेति स कामशूरएतदीयैर्भैमीसम्बन्धिभिः रोमावली च भ्रुवौ च कुसुमानि च तद्रूपैः स्वस्य मौर्व्वीचापेषुभिर्ज्याधनुर्वाणैः कृत्वा जेत्रो जेता त्रिभुवनं जयति एतच्चित्रमाश्चर्य्यं किम्भूतैर्येतामध्यललाटमूर्द्ध्नि मध्ये ललाटे मूर्द्ध्नि च यस्तैः परस्परमसम्बद्धैः सद्भिः स्थानभिरपि स्थितैरपि। रोमावलीरूपा ज्या मध्यदेशे वर्त्तते भ्रूरूपं धनुर्ललाटे वर्त्तते कुसुमरूपा बाणाश्च मूर्द्ध्नि वर्त्तन्ते एवं पृथक् पृथक् स्थितैरपिमौर्व्वीधनुर्वाणैः कामेन जगत्त्रयं यज्जितं तदाश्चर्य्यमित्यर्थः इतरोवीरस्तु सम्बद्धैरेवैतैर्जेतुं शक्नोति नत्वसम्बद्धैः अत्र तद्विपरीतदर्शनादाश्चर्य्यं भैम्या रोमावलीभ्रूकुसुमानामन्यत्रमदर्शनादपि कामोद्रेकोजायत

Digitized by Google

व्यस्तैरपि स्थास्नुभिरेतदीयै
श्चैत्रः स चित्रं रतिजानिवीरः ॥ ८६ ॥
अस्याः खलु ग्रन्थिनिबद्धकेश
मल्लीकदम्बप्रतिबिम्बवेशात्।
स्मरप्रशस्तीरजताक्षरेयं
पृष्ठस्थलीहाटकपट्टिकायां ॥ ८७ ॥
चक्रेण विश्वं युधि मत्स्यकेतुः
पितुर्ज्जितं वीक्ष्य सुदर्शनेन।

इति भावः। मधुललाटमुद्गीति प्राग्वत्तलादेकवद्भावः रतिजानीति जायाया इत्यानङ्‌बेति इतसमासान्तः जायायाजादेशश्च ॥ ८६ ॥

एकश्लोकेन पृष्ठस्थलीं वर्णयति ॥ अस्या इति ॥ खलूत्प्रेक्षे अस्या भैम्याः पृष्ठस्थली पृष्ठदेश एव हाटकपट्टिका सौवर्णपट्टा वर्ण्या ग्रन्थिनिबद्धाः केशाः संयतकचास्तत्र वर्तमानं यत् मल्लीकदम्बं मल्लिकाकुसुम समूहस्तस्य प्रतिबिम्बं प्रतिमा तस्य वेशाच्छलात् प्रवेशाद्वा इयं दृश्यमना रजताक्षरा रौप्याक्षरा स्मरस्य कामस्य प्रशस्तिः स्तुतिग्रन्थः नेदं भैमीपृष्ठस्थल्यां धम्मिल्लस्थितमल्लीकदम्बप्रतिबिम्बं किन्तु सुवर्णप ट्टिकारूपायामस्यां रजताक्षरलिखिता कामप्रशस्तिरित्यर्थः अन्यापि स्मरादिप्रशस्तिः सुवर्णपट्टिकायां रजताक्षरैर्लिख्यते वेणीनिबद्ध केशमल्लीनां पृष्ठे प्रतिबिम्बासम्भवात् ग्रन्थिनिबद्धेत्युक्तं सुवर्णपट्टिका तुल्या भैम्याः पृष्ठस्थली झटिति कामजनिकेति भावः ॥ स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकमित्यमरः ॥ ८७ ॥

श्लोकद्वयेन नितम्बं वर्णयति ॥ चक्रेणेति ॥ मत्स्यकेतुः कामः पितुः श्रीकृष्णस्य सुदर्शनेन सुदर्शननामकेन अथ च सुखभं दर्शनं यस्य

Digitized by Google

जगज्जिगीषत्यमुना नितम्ब
मयेन किं दुर्लभदर्शनेन ॥ ८८ ॥
रोमावलीदण्डनितम्बचक्रे
गुणञ्च लावण्यजलञ्च बाला।

तादृशेन चक्रेण युधि विश्वं जितं वीक्ष्य दृष्ट्वा बलात्स्वतलाद्दुर्लभं दर्शनं यस्य तादृशेन भैम्यानितम्बमयेन अमुना चक्रेण किं जगद् भुवनं जिगीषति जेतुमिच्छति सुपुत्रायां पितृनुकारित्वात् कामस्य चक्रजयितं पितृसाधर्म्ये विततएव परन्तु पितृचक्रं सुलभदर्शन त्वात् सर्वोपकारयोग्यं अस्य तु चक्रं दुर्लभदर्शनत्वात् सर्वोपकाराक्षम मित्ययं विशेषः भैम्या नितम्बदर्शनप्राप्त्यर्थाः कामाधीना भवन्तीति भावः ॥ ८८ ॥

रोमावलीति ॥ बाला भैमी रोमावलीदण्डनितम्बचक्रे रोमावली रूपं दण्डं नितम्बरूपं चक्रं गुणं रूपादिकं अथ च सूत्रं लावण्यरूपं जलञ्च एवमेतच्चतुष्टयरूपं तारुण्यमूर्त्तेर्यौवनरूपस्य कुचकुम्भकर्त्तुः कुच रूपकुम्भकारकस्य कुलालस्य सहकारित्वं सहकारिकारणसमूहं बिभर्त्ति धारयतीति अहं सम्भावयामि अन्यः कुलालोऽपि कुम्भं करो ति तस्य च दण्डचक्रसूत्रसलिलानि सहकारीणि भवन्ति अत्रापि यौवनमेव कुचरूपकुम्भकरत्वात् कुलालस्तस्य रोमावल्यादिकाश्चत्वा रो दण्डादयः सहकारिण इत्यर्थः यौवनोद्गमेनाविर्भूता भैम्या रोमाव ल्यादयोऽतिरमणीया इति भावः। गुणशब्दोऽत्रोभयवाचकः। गुणो

Digitized by Google

तारुण्यमूर्त्तेः कुचकुम्भकर्त्तुः
बिभर्त्ति शङ्के सहकारि चक्रं ॥ ८९ ॥
अङ्गेन केनापि विजेतुमस्या
गवेष्यते किं चलपत्रपत्रं ।
न चेद्विशेषादितरच्छदेभ्य
स्तस्यास्तु कम्पस्तु कुतोभयेन ॥ ९० ॥

मौर्व्यामप्रधाने रूपादौ सूदइन्द्रिये । त्यागशौर्यादिसत्त्वादिसङ्ख्यावृत्तिरज्जुष्विति मेदिनी ॥ ८९ ॥

एकश्लोकेन योनिं वर्णयति ॥ अङ्गेनेति ॥ अस्या भैम्याः केनापि सुरतप्रधानसाधनतयातिमनोज्ञत्वादनिर्वचनीयेन अथ च ग्राम्यत्वात् प्रकटं वक्तुमयोग्येन अङ्गेन योनिरूपावयवेन चलपत्रस्य अश्वत्थस्य पत्रं विजेतुं विशेषेण पराभवितुं किं गवेष्यते अन्विष्यते कुतश्चया ज्ञातमित्यत आह यद्येवं यद्येवं न स्यात्तर्हि इतरच्छदेभ्योऽन्यवृक्षपत्रेभ्यो विशेषादाधिक्यात् तस्य चलपत्रपत्रस्य कुतः कस्मात्तु भयेन कम्पोऽस्तु भवतु अपितु भैमीवराङ्गकर्त्तृकपराभवशङ्कयैव तस्य कम्पो भवतीत्यर्थः अन्यपत्रापेक्षया अश्वत्थपत्रस्याधिकतरः कम्पो दृश्यते तत एवेयमुत्प्रेक्षा आकारेणाश्वत्थपत्रतुल्यत्वाद्भैमीवराङ्गमतिसुलक्षणान्वितमिति भावः ग्राम्यत्वात् केनापीत्यनेन वराङ्गं गुप्तीकृतं गुप्तीकृत्य वदेद्ग्राम्यमवश्यं वाच्यता यदीत्युक्तेः । योनिर्भवति वै यस्या बोधिद्रुमदलाकृतिः । सान्यथव्यथहीनापि सौख्यसौभाग्यमश्नुतेति सामुद्रकं । बोधिद्रुमश्चलदलः पिप्पलः कुञ्जराशनः । अश्वत्थ इत्यमरः ॥ ९० ॥

Digitized by Google

चित्रलेखा च तिलोत्तमास्या
नासा च रम्भा च यदूरुसृष्टिः।
दृष्टा ततः पूरयतीयमेका
नेकाप्सरःप्रेक्षणकौतुकानि ॥ ८१ ॥
रम्भापि किं चिक्रयति प्रकाण्डं
न चात्मनः स्वेन न चैतदूरू।

पञ्चभिः श्लोकैरूरू वर्णयति ॥ भूरिति ॥ ततस्तस्मादियमेका भैमी दृष्टा सती अनेकाप्सरसां प्रेक्षणकौतुकानि दर्शनजनितकुतूहलानि पूरयति सफलीकरोति यतस्तस्मादस्या भैम्या भ्रूश्चित्रलेखा अप्सरोविशेषः अथ च चित्राश्चर्यरूपा रेखा विन्यासो यस्यास्तादृशी तथास्या नासा नासिका च तिलोत्तमा अप्सरोविशेषः अथ च तिलात्तिलकुसुमादप्युत्तमा मनोज्ञा तथास्या ऊरुसृष्टिः ऊरुनिर्मितिरुभयाभावस्य इव पर्य्यवसायित्वात् विधिना कृतऊरुश्च रम्भा अप्सरोविशेषः अथ च कदलीप्रकाण्डरूपा तस्मादेवेयमनेकाप्सरोदर्शनकौतुकानि जनयति श्लेषच्छलमूलेयं वाग्भङ्गी भैम्याएकैकाङ्गदर्शनमपि सावयवाप्सरो दर्शनजन्यकौतुकं जनयतीत्यप्सरोभ्योऽप्यतिसुन्दरीयमिति भावः। चत्रयं परस्परसमुच्चायकं ॥ ८१ ॥

रम्भापीति ॥ रम्भापि कदल्यपि आत्मनः स्वस्य प्रकाण्डं स्तम्भं स्वेनात्मना न च नैव चिक्रयति किं क्रीयत्वेन न जानाति किं तथा एतस्या भैम्या ऊरू च न चिक्रयति किं एतदूरुत्वेन न जानाति किं साद

स्वस्यैव येनोपरि सा ददाना
पत्राणि जागर्त्यनयोर्भ्रमेण ॥ ९२ ॥
विधाय मूर्द्धानमधश्चरञ्चे
मुञ्चेत्तपोभिः स्वमसारभाव ।

ख्यातिश्रयमहिमा विचिन्त्य भेदयत्नासामर्थ्यात् स्वप्रकाण्डं भैम्यूरुत्वेन भैम्यूरू च स्वप्रकाण्डत्वेन जानातीत्यर्थः लोकोयथा न जानाति तथा रम्भापि न जानातीत्यपरोऽर्थः कुतएवं ज्ञातमित्यतआह येन हेतुना सा रम्भा अनयोर्भैम्यूर्वोर्भ्रमेण भ्रान्त्या भैम्याऊरुद्वयमिति बुद्धा स्वस्यैव निजप्रकाण्डस्यैव उपरि पत्राणि ददाना सती पत्रदानेन चिह्नविशेषं कुर्व्वती सती जागर्त्ति सावधाना तिष्ठति अन्यस्तु जेता जेतव्यस्य परस्य उपरि पत्रं दत्वा चिह्नं करोति नत्वात्मनः रम्भा तु स्वप्रकाण्डैतदूर्व्वोर्विभागकल्पनावैधुर्य्येण परस्मिन् कर्त्तव्यमात्मन्येव करोति रम्भास्तम्भोपरि पत्राणि जायन्ते ततएवेयमुत्प्रेक्षा रम्भास्तम्भनिभौ भैम्या ऊरू इति भावः ॥ ९२ ॥

विधायेति ॥ कदली मूर्द्धानं मस्तकं अग्रं च अग्रभागं अधश्चरं अधोगतं विधाय कृत्वा तपोभिस्तपस्याभिस्त्वाग्रायणादिभिर्यदि स्वीयं असारभावं निःसारत्वं मुञ्चेत् त्यजेत् यदि च तपोभिर्वल्गोयोऽयन्त्वं सार्व्वकालिकं जाड्यं शीतलत्वं नाचेत् न प्राप्नुयात् यदि सम्भावनायां तदा इदमूरुयावः अस्याभैम्या ऊरुवयावर्मनोज्ञः स्यात् भवेदेवं सम्भाव्यते कदली असारभागभूयिष्ठा एतदूरू च तच्छून्यौ

जाड्यञ्च नाप्स्येत् कदली वलीयः
सदा यदि स्यादिदमूरुचारुः ॥ ९३ ॥
जङ्घाप्रकाण्डद्वितयेन तन्व्याः
करः पराजीयत वारणीयः ।
युक्तं ह्रिया कुण्डलनच्छलेन
गोपायति स्वं मुखपुष्करं सः ॥ ९४ ॥

तथा कदली सर्व्वकाले शीतला एतदूरू च ग्रीष्मएव शीतलौ शीतकाले तु उष्णौ तस्माद्दोषद्वयदुष्टत्वात् कदली भैम्यूरुवच्चारुः कथं भवेत् किन्तु तपोभिर्यदि दोषद्वयं परिहरेत्तदा कथञ्चिद्भैम्यूरुतुल्या भवेदित्यर्थः अन्योऽपि मूर्द्धानमधोविधाय तपसा स्वीयमसारत्वं पापं जाड्यं मूर्खत्वञ्च त्यक्त्वा उत्तमेन समानोभवति कदलीस्तम्भापेक्षया भैम्यूरू सुन्दराविति भावः विधायादितपोभिरिति विपर्य्यन्तं जाड्यञ्च नाप्स्येदित्यनाप्यनुषञ्जनीयं । सुषीमः शिशिरो जडस्तुल्यमरः ॥ ९३ ॥

जङ्घेति ॥ तन्व्या भैम्या जङ्घाप्रकाण्डद्वितयेन जङ्घास्तम्भयुगेन वारणीयो वारणस्य सम्बन्धी करः शुण्डः पराजीयत पराजितः अतएव स वारणकरः कुण्डलनच्छलेन मण्डलीकरणव्याजेन स्वं स्वीयं मुखपुष्करं मुखाग्रं ह्रिया लज्जया गोपायति अन्यान् न दर्शयति तद्युक्तं शुण्डायकुण्डलीकरणं हस्तिस्वभावः अन्योऽपि इतरस्मात् पराजितोभूत्वा लज्जया मुखसङ्गोपनं करोति मुखरूपं पुष्करं वा । पुष्करं करिहस्ताग्रे वाद्यभाण्डमुखे जले । व्योम्नि खड्गफले पद्मे तीर्थौषधिविशेषयोरित्यमरः ॥ ९४ ॥

Digitized by Google

यस्यां मुनीनामपि मोहमूहे
भृगुर्महान् यत्कुचशैलशीली ।

यस्यामिति ॥ यस्यां भैम्यां मुनीनामपि का कथा कामकिङ्कराणां मादृशां जितेन्द्रियाणां ऋषीणामपि मोहं स्तनादौ पर्व्वतादि भ्रान्तिं विषयभ्रान्तिञ्च अथ च कामजनितविकारं ऊहे तर्कयामि मुनयोऽप्यनया मोहिता इति तर्कयामीत्यर्थः यत्तस्मात् महान् तापस श्रेष्ठो भृगुर्मुनिविशेषोऽस्याः कुचशैलशीली स्तनपर्व्वताश्रयी मुनीनां पर्व्वताश्रयित्वात् पर्व्वततुल्य स्तनावाश्रयतीत्यर्थः अथ च कामपी डितत्वादस्याः कुचौ भैमीकुचौ मर्द्दयितुमिच्छति अथ च महानतिवि स्तृतो भृगुरतटः कुचशैलसम्बन्धी कुचयोरत्युच्चतया पर्व्वततुल्यता तत्पार्श्वभागो विस्तृतत्वादतटदेशतुल्य इत्यर्थः अतटदेशोऽपि पर्व्वते स्वधर्मं विस्त्यैव यथा भृगुः पर्व्वतोच्चदेशः कुचयोः शीलमेव शैलं स्वभावं शीलयति अनुकरोतीति तादृशः भैमीकुचौ पर्व्वतवद् च्चावित्यर्थः। तथा यस्यामुखं यन्नारदाह्लादि न नारदाह्लादं न जनय तीति न अपितु नारदमुनेराह्लादजनकमेव भवति गानादिना नार दमाह्लादयतीत्यर्थः अथ च कामपीडितत्वात् चुम्बनाभिलाषिणं नार दमाह्लादयतीत्यर्थः अथ च यस्यामुखं नानारदैर्व्वक्त्रभेदैरपि नहि संख्यं अर्क्केदन्तैः दीर्घत्वस्थूलत्वादिभेदेन नञविधैर्दन्तैर्वा माह्लादं आह्ला दयितुं शीलमस्य तादृशं। तथा महाभारतस्य ग्रन्थविशेषस्य सर्गे निर्म्माणे योग्यः समर्थोऽपि व्यासो वेदव्यासः श्रितो आश्रितो ऊरू येन तादृशः कदलीकाननवर्त्ती व्यासः कदलीस्तम्भच्छायाभ्रान्त्या एव ऊरू आश्रितवानित्यर्थः अथ च कामपीडितत्वादेतदूरू समाश्रित्य

नानारदाश्लादि मुखं श्रितोऽव
व्यासोमहाभारतसर्गयोग्यः ॥ ९५ ॥
क्रमोद्गता पीवरताधिजङ्घं
वृक्षाधिरूढिं विदुषी किमस्याः ।

वर्त्तते यत्र च महती भाः शोभा यस्य तादृशं यत् रतं सुरतं तस्य सर्गे सृष्टौ योग्यउपयुक्तोव्यासोविस्तारः श्रितवानेव येन तादृशः विशालोर्व्वोः सम्भोगस्य प्राशस्त्यात् विशालावप्यारुरू इति भावः महाभा इति पृथक्पदं व्यासविशेषणमा। भृगुः शुक्रे प्रपाते च अम दग्नौ। पिनाकिभोति व्यासो मुनौ चाविस्तार इतिच विश्वः ॥ ९५ ॥

एकश्लोकेन जङ्घे वर्णयति ॥ क्रमोद्गतेति ॥ अस्याभैम्या अधिजङ्घं जङ्घयोर्वर्त्तमाना क्रमेणावरोहक्रमेण उद्गता निर्गता पीवरता पीनता इत्यस्य अधिरूढिं वृक्षप्रकारं विदुषी जानती किं यथा वृक्षविशेषस्य मूलतो यथोर्द्ध पीवरता तथास्याजङ्घयोरित्यर्थः यत्र च वृक्षाधिरूढिं आलिङ्गनविशेषं जानती किं तथा भ्रमीभक्तिभिर्मण्डलाकारवेष्टन प्रकारैरावृतमङ्गं येन तथाविधमस्यावासोऽपि परिधानवस्त्रमपि लतायावेष्टितके प्रवीणं कुशलं यथा लता भ्रमीभक्तिभिर्वृक्षं वेष्टय ति तथा परिधानवस्त्रमपि अस्या अङ्गं वेष्टयतीत्यर्थः यत्र च लता वेष्टितके आलिङ्गनविशेषे प्रवीणं निपुणं। अधिजङ्घमिति सप्तम्यर्थे ऽव्ययीभावः ॥ वृक्षाधिरूढिलतावेष्टितके आलिङ्गनविशेषौ। यथाह भरतः। एकेन कान्तचरणं चरणेन कान्ताधिष्ठाय जानुमपरेण च चुम्बनार्थं। आरोढुमिच्छति पतिं तरुवल्लताङ्गी वृक्षाधिरूढिमिति तत् कवयोवदन्तीति । लतेव वृक्षं दयितं लताङ्गी संवेष्टयन्ती नमयेत्तदास्यं। यच्चुम्बनार्थं स्फुटमूर्द्धकाया बुधालतावेष्टितकं तदाहुः

अपि भ्रमीभङ्गिभिरावृताङ्गं
वासोलतावेष्टितकप्रवीणं ॥ ९६ ॥
अरुन्धतीकामपुरन्ध्रिलक्ष्मी
जम्भद्विषद्दारनवाम्बिकानां ।

रिति च । अन्योऽप्याह । वृक्षारोहवदत्र क्रमाद्दाक्रम्यतेऽङ्कवं । वृक्षाधिरूढकं नाम बुधा आलिङ्गनं विदुरिति लतापलययोगेन लतावत्परिवेष्टनैः । यत्र मध्यङ्गमालिङ्गं लतावेष्टितकन्तु तदिति च । अपरोऽप्याह । बाहुभ्यां कण्ठमालिङ्ग्य कामिनी कान्तउच्छ्रिते । अङ्गमारोपयति यद्वृक्षारूढं तदुच्यतइति उपविष्टं प्रियं कान्ता सुप्ता वेष्टयते यदि । लतावेष्टितं ज्ञेयं कामानुभववेदिभिरिति च ॥ ९६ ॥

एकश्लोकेन गुल्फौ वर्णयति ॥ अरुन्धतीति ॥ इहास्यां भैम्यां यत्र स्मात् उचितैव युक्तैव अदृश्यसिद्धिरदर्शनसिद्धिः गुल्फद्वयेन चरणग्रन्थिद्वितयेन आप्ता प्राप्ता तत्तस्मादियं भैमी अरुन्धती कामपुरन्ध्रिलक्ष्मीजम्भद्विषद्दारनवाम्बिकानां अरुन्धती वशिष्ठपत्नी कामस्य पुरन्ध्री रतिः लक्ष्मीः श्रीः जम्भद्विषत इन्द्रस्य दाराः पत्नी शची नवसंख्यका अम्बिकाः ब्राह्म्यादयः एतासां त्रयोदशानां चतुर्दशी चतुर्दशत्वसंख्यापूरणी । निमग्नगुल्फत्वं सामुद्रिकं सुलक्षणं तदरुन्धत्यादीनां यथा विद्यते तथा अस्या अपीत्यर्थः अथ च चतुर्दश्यां तिथौ साधकेन अदृश्यस्य वस्तुनः सिद्धिः प्राप्यते । नवाम्बिका यथा ब्राह्मी

Digitized by Google

यतुर्द्दशीयं तदिहोचितैव
गुल्फद्वयाप्ता यदहर्म्यसिद्धिः ॥ ९७॥
अस्याः पदौ चारुतया महान्ता
वपेक्ष्य सौक्ष्म्यात्त्ववभावभाजः ।
जाता प्रवालस्य महीरुहाणां
जानीमहे पल्लवशब्दलब्धिः ॥ ९८ ॥
जगद्वधूमूर्द्धसु रूपदर्पा
यदेतयादायि पदारविन्दं ।

चैव माहेशी कौमारी वैष्णवी तथा । वाराही नारसिंही च माहेन्द्री चण्डिका तथा । महालक्ष्मीरिति प्रोक्ताः क्रमेणैता नवाम्बिका इत्या गमः ॥ ९७ ॥

चण्डिः श्लोकैः पादौ वर्णयति ॥ अस्याइति ॥ चारुतया सौन्दर्येण महान्तौ उत्कृष्टौ अस्याः भैम्याः पदौ चरणौ अपेक्ष्य सौक्ष्म्यादिव लघुत्वात्त्ववभावभाजः पदयोभावपत्वं भजतो महीरुहाणां वृक्षाणां प्रवालस्य नवकिसलयस्य पल्लवशब्दलब्धिः पल्लवइतिनामप्राप्तिर्जाता इति वयं जानीमहे सम्भावयामः प्रवाले प्रवृत्तः पल्लवशब्देन रूढः किन्तु पदोऽतिसुन्दर भैमीचरणस्य लवः प्रोभालेशोयत्रेति व्युत्पत्त्या यौगिकइत्यर्थः नवकिसलयापेक्षयाप्यतिसुन्दरौ भैमीचरणाविति भावः । पदङ्घ्रिश्चरणोऽस्त्रियामित्यमरः ॥ ९८ ॥

जगदिति ॥ एतया दमयन्त्या रूपदर्पात् सौन्दर्यगर्वात् जग द्वधूनां त्रिभुवनरमणीनां मूर्द्धसु मस्तकेषु पदारविन्दं पादपद्मं

Digitized by Google

तस्मान्न्रसिन्दूरपरागरागै
र्ध्रुव प्रवालप्रवलारुणं तत् ॥ ९९ ॥
रुषारुणा सर्व्वगुणैर्ज्जयन्त्या
भैम्याः पदं श्रीः स्म विधेर्वृणीते ।
ध्रुवं स तामच्छलयद्यतः सा
भ्रमारुणैतत्पदभाग्विभाति ॥ १०० ॥

यद्यस्मात् अदायि दत्तं ध्रुवमुत्प्रेक्षे तत्तस्मात् पदारविन्दं तेन जगद्वधू मूर्द्धसु वर्त्तमानाः सान्द्रा निविडा ये सिन्दूराणां परागारजांसि तैः कृत्वा प्रवालात् विद्रुमात् नवकिसलयाद्वा प्रबलमत्यन्तं अरुणं आरक्तं जातं भैमी त्रिजगद्वधूभ्योऽतिसुन्दरी तच्चरणौ चातिरक्ता विति भावः ॥ ९९ ॥

रुषेति ॥ रुषा कोपेन अरुणा आरक्ता श्रीर्लक्ष्मीः अथ च शोभा सर्व्वगुणैः सौन्दर्य्यादिभिर्जयन्त्याः श्रियं पराजयमानाया भैम्याः पदं व्यवसायं सङ्कल्पनं विधेर्ब्रह्मणः सकाशात् वृणीते स्म विधिं याचते स्म स विधिर्ध्रुवं निश्चितं तां श्रियं अच्छलयत् प्रतारितवान् यतोऽद्यापि रुषा अद्यापि क्रुद्धत्वादतिरक्ता सा श्रीः एतस्या भैम्याः पदं चरणं भजतइति तादृशी भैमीचरणसेविनी सती विभाति शोभते श्रीर तिसुन्दरीं भैमीं दृष्ट्वा ईर्ष्यया स्वस्य तत्सङ्कल्पनं भैमीपदशब्देन विधिं याचितवती विधिस्तु भैम्या अनन्यसाधारणत्वभङ्गभिया तद्दा तुमशक्तस्तया चरणरूपं पदं दत्त्वा तां प्रतारितवानित्यर्थः अति मनोज्ञं भैम्याश्चरणारुण्यमिति भावः ॥ १०० ॥

Digitized by Google

यानेन तन्व्या जितदन्तिनाथौ
पदाब्जराजौ परिशुद्धपार्ष्णी ।
जाने न शुश्रूषयितुं स्वमिच्छू
नतेन मूर्ध्ना कतरस्य राज्ञः ॥ १०१ ॥
कर्णास्विदन्तच्छदबाहुपाणि
पदादिभिः स्वाखिलतुल्यजेतुः ।

यानेनेति ॥ यानेन गमनेन जितौ दन्तिनाथौ हस्तिश्रेष्ठौ याभ्यां तौ परिशुद्धौ विपादिकादिरहितः पार्ष्णिश्चरणाधोभागो ययोस्तादृशौ तन्व्या भैम्याः पदाब्जराजौ श्रेष्ठकमलतुल्यौ चरणौ कतरस्य राज्ञः कस्य नृपश्रेष्ठस्य प्रणयकलहे नमस्कारार्थं नतेन नम्रेण मूर्ध्ना प्रणो व्यभूतेन स्वमात्मानं शुश्रूषयितुं सेवयितुं इच्छू अभिलाषुकौ जातौ इत्यहं न जाने एतादृक्सुकृतपः केन राज्ञा कृतमित्यहं न जानामी त्यर्थः गजगमनेयमिति भावः अथ च यानेन विजययात्रया जितौ दन्तिनाथौ गजपतिनामा नृपविशेषो याभ्यां तौ परिशुद्धोऽविरुद्धः पार्ष्णिः पश्चाद्वर्त्तिनृपो ययोस्तादृशौ तन्व्याः पदाब्जे पादपद्मे एव राजानौ तौ कतरस्य कस्यापि राज्ञो नतेन मूर्ध्ना स्वं शुश्रूषयितुं न इच्छू अपि तु सर्वस्यैव राज्ञ इत्यहं जाने अन्योऽप्येवंविधो राजा गूढमन्त्रत्वात् केन राज्ञा स्वसेवां न कारयतीति ध्वनिः ॥ १०१ ॥

कर्णेति ॥ स्वस्य आत्मनोऽखिलं समस्तं यत्तुल्यं सदृशं तस्य जेतु र्जैत्रस्य कर्णश्च अक्षि चक्षुश्च दन्तच्छदश्चोष्ठश्च बाहुश्च पाणिश्च पदश्च

उद्वेगभागद्वयताभिमाना
द्विधैव वेधा व्यधित द्वितीयं ॥ १०२ ॥
तुषारनिःशेषितमब्जसर्गं
विधातुकामस्य पुनर्विधातुः ।

एतेषां समाहारस्तत्तया तदादिर्येषां आदिना स्तनाधरकरस्य परिग्रहः तस्य भैम्या अवयवस्य अद्वयताभिमानात् मत्सदृशं सुन्दरान्तरं नास्ति अहमेवैकं सुन्दरमित्यद्वैतगर्व्वात् उद्वेगभाक् क्रुद्धो वेधा ब्रह्मा द्विधैव अस्यामेव भैम्यां नलन्यच द्वितीयं द्वयोः पूरणं कर्णा दि व्यधित कृतवान् विधाता प्रथममेकमेकं कर्णाद्यङ्गं भैम्यां निर्म्मितवान् अनन्तरं तेषामनन्यसदृशत्वगर्व्वं दृष्ट्वा क्रोधात्तन्निवारणार्थं द्वितीयकर्णादि कृतवानित्यर्थः अतिक्रुद्धोऽपि दर्पनिवारणार्थं तत्रैव तत्प्रतिद्वन्द्विनं रचयति अत्र भैमीकर्णौ । भैमीकर्णाविवेत्याद्यनन्वयाल ङ्कारोऽप्यूह्यः ॥ १०२ ॥

तुषारेति ॥ इदानीं भैम्यां वर्त्तमानेषु आस्याक्षिकरेषु वदन चरणनयनपाणिद्वयेषु पद्मेषु विधातुर्ब्रह्मणोऽधुना इदानीं यस्य स्वप्रारम्भे माधुकरी भिक्षाविशेषस्तत्सदृशा तत्तुल्या अभिख्याभिक्षा शोभायाच्ञा भवतीति शेषः किम्भूतस्य तुषारेण हिमेन निःशेषितं विनाशितं अब्जसर्गं सरोजसृष्टिं पुनर्विधातुं पुनर्निर्मातुं कामोऽभि लाषो यस्य तादृशस्य माधुकरीभिक्षापि गृहपञ्चकएव भवति अन्योऽपि विनष्टस्य स्वनिर्म्मितोत्तमवस्तुनः पुनर्निर्म्माणार्थं गृहपञ्चकात्

Digitized by Google

पञ्चाशिखाश्याङ्घ्रिकरेष्वभिख्या
भिक्षाधुना माधुकरीसदृक्षा ॥ १०३ ॥
एष्यन्ति यावद्गणनाहिगन्ता
नृपाः स्मरार्त्ताः शरणे प्रवेष्टुं ।
इमे पदाब्जे विधिना निसृष्टा
स्तावत्य एवाङ्गुलयोऽत्र रेखाः ॥ १०४ ॥
प्रियानखीभूतवतो मुदेदं
व्यधाद्विधिः साधुदशत्वमिन्दोः ।

क्वचित् क्वचित् तदुपादानसामग्रीं याचते भैम्या वदनाद्यङ्गानि पद्मेभ्यो ऽप्युत्कृष्टानीति भावः ॥ १०३ ॥

एकश्लोकेन पादाङ्गुलीर्वर्णयति ॥ एष्यन्तीति ॥ स्मरार्त्ताः कामपीडिता नृपा राजान इमे दृश्यमाने भैम्याः पदाब्जे चरणकमलद्वयरूपे शरणे रक्षके प्रवेष्टुं आश्रयितुं यावद्गणनायावत्संख्यकात् दिग्न्तात् एष्यन्ति समागमिष्यन्ति विधिना ब्रह्मणा अत्र पदाब्जयोस्तावत्यस्तावत्संख्यिका एव अङ्गुलयोऽङ्गुलिरूपा रेखा निसृष्टा निर्म्मिताः नृपाः कामपीडिताः सन्तोऽस्याश्चरणद्वयं शरणीकर्तुं दशभ्योऽपि दिग्भ्यः समागमिष्यन्तीति सूचनार्थं ब्रह्मणा दशाङ्गुलिच्छलेन दश रेखा एवात्र निर्म्मिता इत्यर्थः ॥ १०४ ॥

एकश्लोकेन चरणनखान् वर्णयति ॥ प्रियेति ॥ विधिर्ब्रह्मा मुदा स्वेच्छया प्रियाया भैम्याः नखीभूतवतश्चरणनखत्वं प्राप्तवत इन्दो

Digitized by Google

एतत्पदच्छद्मसरागपद्म
सौभाग्यभाग्यं कथमन्यथा स्यात् ॥ १०५ ॥
यस्याः पदाङ्गुष्ठनखौ मुखञ्च
बिभर्त्ति पूर्णेन्दुचतुष्टयं या ।

चन्द्रस्य इदं प्रत्यक्षसिद्धं साधुदण्डत्वं सुन्दरावस्थत्वं अथ च साधु सम्यग्यथा तथा दण्डत्वं दण्डसंख्यायोगित्वं यधात् कृतवान् भैम्याश्चरणनिर्म्माणसमये स्वयमागत्य तन्नखत्वमङ्गीकृतवन्तं चन्द्रं दृष्ट्वा विधाता परितोषात् तं शोभनावस्थान्वितं कृतवानित्यर्थः कथमेवमित्यत आह अन्यथा यद्यस्य साधुदण्डत्वं न विदध्यात्तदा स इन्दुः एतस्या भैम्याः पदच्छद्मना चरणव्याजेन सरागं लोहितं यत्पद्मं तत्र यत्सौभाग्यं सुभगत्वं तस्य भाग्यं भाजनं कथं स्यात् कथं भवेत् अपि तु न भवेदेव पूर्व्वं चन्द्रस्य पद्मसौभाग्यलाभोदुर्घटएवासीत् अधुना तु यद्भूवत्तत्र भैमीचरणनखत्वाङ्गीकारपरितोषितेन विधात्रा विधीयमानं साधुदण्डत्वमेव कारणमित्यर्थः अन्योऽपि साधुदण्डत्वेन दुर्लभमपि वस्तु प्राप्नोति दण्डापि भैमीचरणनखाश्चन्द्रतुल्या इति भावः ॥ १०५ ॥

पुनरप्येकश्लोकेनाङ्गुष्ठनखौ पृथक्कृत्वा वर्णयति ॥यस्या इति ॥या इयं भैमी यस्याः सौन्दर्य्यादिकीर्त्तिः पादाङ्गुष्ठनखौ मुखञ्च एतच्चतुष्टयलक्षणं पूर्णेन्दुचतुष्टयं षोडशकलचन्द्रचतुष्टयं बिभर्त्ति धारयति तस्यामस्यां सुभ्रुवि दमयन्त्यां कलानां चन्द्रांशानां अथ च शिल्पादिविद्यानां चतुःषष्टिः कथं नाम वासमवस्थानं न उपैतु न उपगच्छतु अपि तु उपैत्येव पूर्णचन्द्रोऽपि षोडशकलात्मकस्य चतुष्टयस्य प्रत्येकं षोडशकलाश्चतुर्गुणिताश्चतुःषष्टिर्भवन्तीति चन्द्रचतुष्टयाधिकरणे

Digitized by Google

कलाचतुःषष्टिरुपैतु वासं
तस्यां कथं सुभ्रुवि नाम नास्यां ॥ १०६ ॥
स्रष्टातिविश्वा विधिनैव ताव
त्तस्यापि नीतोपरि यौवनेन ।
वैदग्ध्यमध्याप्य मनोभुवेय
मवापिता वाक्पथपारमेव ॥ १०७ ॥

चतुःषष्टिकलावत्त्वं युक्ततरमेवेत्यर्थः । कला वात्स्यायनैरुक्ता शिल्पा दावंशमात्रके षोडशांशे च चन्द्रस्य कलनाकालमात्रयोरिति मेदिनी ॥ १०६ ॥

इत्थं प्रत्यङ्गवर्णनमतिविस्तरभयादपहरन् संप्रति सावयवावयवि प्रायेण वर्णयितुमशक्येयमिति सूचयति॥ स्रष्टेति ॥ इयं भैमी विधिनैव ब्रह्मणैव तावदादौ अतिविश्वा लोकातीता स्रष्टा निर्मिता। त्रिलोकी वस्तुभ्योऽप्यतिसुन्दरी निर्मितेत्यर्थः अनन्तरं यौवनेन तस्यापि विधि सर्जनस्यापि उपरि ऊर्द्ध्वं नीता प्रापिता यौवनजनितसौन्दर्यातिश यस्य विधेरपि कर्तुमशक्यत्वात् विधिनिर्मितशैशवसौन्दर्यापेक्षयाऽ धिकं सौन्दर्यं प्रापितेत्यर्थः ततोऽप्यनन्तरञ्च मनोभुवा कामेन वैदग्ध्यं लीलाचातुरीं अध्याप्य उपदिश्य वाक्पथस्य वचनवर्त्मनः पारमेव अवापिता प्रापिता अनिर्व्वचनीयैव कृतेत्यर्थः अथ च वाक्पथस्य पारं विद्यापारं प्रापिता अन्योऽपि बुद्धिमान् केन चिदध्यापितोवाक्पथपारं प्राप्नोति सर्व्वथा वर्णयितुमशक्येयमिति भावः ॥ १०७ ॥

Digitized by Google

इति स चिकुरादारभ्यैतां नखावधि वर्णयन्
हरिणरमणीनेत्रां चित्ताम्बुधौ तरदन्तरः ।
हृदयभरणोद्वेलानन्दः सखीवृतभीमजा
नयनविषयीभावे भावं दधार धराधिपः ॥ १०८ ॥
श्रीहर्षं कविराजिराजमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यं ॥

एवं नलकर्तृकभैमीवर्णनं समाप्य छन्दोऽन्तरेण सर्गसमाप्तिं सूचयति ॥ इतीति ॥ स धराधिपो नल इति पूर्वोक्तप्रकारेण चिकुरात् केशादारभ्य नखावधि पादनखपर्यन्तं हरिणरमणीनेत्रां मृगीनेत्रां एतां भैमीं वर्णयन् सन् सखीभिर्वृताया वेष्टिताया भीमजाया नयनविषयीभावे नयनगोचरत्वे भावं अभिप्रायं दधार संप्रत्यहं सखीगणसहिताया भैम्या दृश्यो भवेयमित्यभिलाषं कृतवान् किम्भूतः चित्ताम्बुधौ भैम्या अद्भुतसौन्दर्यदर्शनादेवाश्चर्यरससमुद्रे तरत् प्लवमानमन्तरमन्तःकरणं यस्य सः तथा चिरमनोरथगोचरीभूताया भैम्या दर्शनादेव हृदयस्य मनसो भरणेन परिपूरणेन उद्वेल उच्छ्रितसीम आनन्दो यस्य तादृशः उच्छलितवेलत्वादानन्दस्य समुद्रतुल्यत्वमाधिक्यं सूचितं समुद्रोऽपि कदाचिद्वेलामतिक्रम्य बहिर्निर्गच्छति ॥ हरिणीवृत्तमिदं । रसयुगहयैर्न्सौ म्रौ स्लौ गो यदा हरिणी तदेति लक्षणात् ॥ १०८ ॥

श्रीहर्षमिति ॥ गौडोर्वीशकुलस्य गौडभूमीन्द्रवंशस्य प्रशस्तिः स्तुतिरूपाभिनवेतरचनाया भ्रातरि एकजनकत्वात् सहोदरे साम्यनेन

Digitized by Google

गौडोर्व्वीशकुलप्रशस्तिभणितिभ्रातर्य्ययं तन्महा
काव्ये चारुणि नैषधीयचरिते सर्गोऽगमत्सप्तमः ॥१०९॥

व्रजेति भावः अन्यत् सर्व्वं पूर्व्ववत्। भ्रष्टस्त्रिभगिनीभावव्ययमिति
क्वचित्पाठः भ्रष्टस्य श्रीजिह्मलाद्भगिनीत्वं ॥ १०९ ॥

इति श्रीप्रेमचन्द्रन्यायरत्नविरचितायामन्वयबोधिकासमाख्यायां
नैषधटीकायां सप्तमः सर्गः समाप्तः ॥

॥ अथाष्टमः सर्गः ॥

अथाद्भुतेनास्तनिमेषनिद्र
मुन्निद्ररोमाणममुं युवानं।

अथ नलस्येन्द्रादिदौत्यकर्तव्यतां वर्णयितुमष्टमं सर्गमारभमाणः प्रथमं सखीवृतभीमजानयनविषयीभावे भावं दधार वराधिपहृदयने नैकवाक्यतार्थमिन्द्रादिवरदानेन दृश्यतादृश्यतयोर्द्वयोरपि स्वायत्ततादृश्यतामुपगतं नलं सखीसहिता दमयन्ती ददर्शेत्याह ॥ अथेति ॥ अथ नलस्य दमयन्तीदर्शनविषयीभावाभिलाषानन्तरं समस्ताः सकलाः सुदृशो दीर्घनयनाः नलदर्शनेन सार्थकनयना वा ताः सख्यः तथा महीमघोनो भूमीन्द्रस्य भीमस्य सुता दमयन्ती च उन्निद्ररोमाणं चिरसविभ्रमभैमीविलोकनजनिताह्लादाधिक्यादुद्गतरोमाणममुं युवानं नलं अद्भुतेन कथमेवादृशः सुन्दरः पुरुष इत्याश्चर्येण अस्ता व्यस्ता निमेषनिद्रा नेत्रसङ्कोचधारा यत्र क्रियायां तथथा स्यात्तथा दृशा चक्षुषा पपुः सादरं ददृशुः अद्भुतेन भैमीसौन्दर्यदर्शनजनिताश्चर्येण अस्तनिमेषनिद्रं अतएव रसोदयात् उन्निद्ररो

Digitized by Google

दृष्टा पपुस्ताः सुदृशः समस्ताः
सुता च भीमस्य महीमघोनः ॥ १ ॥
कियच्चिरं दैवतभाषितानि
निह्नोतुमेतं प्रभवन्तु नाम।
पलालजालैः पिहितः स्वयं हि
प्रकाशमासादयतीक्षुडिम्भः ॥ २ ॥

मार्गं यमं युवानं नलमिति वा। दृष्टेति आत्माश्रयत्वादेकवचनं। अस्मिन् सर्गे पूर्वसर्गवदिन्द्रवज्रोपेन्द्रवज्रयोरुपजातिश्छन्दः ॥ १ ॥

देवतावचनमवितथमपि नलञ्च प्रकाशमन्यथाभवष्यति ॥ कियदिति ॥ देवतानामिन्द्रादीनां भाषितानि भूयादन्तर्द्धिसिद्धेरित्यादीन्यन्तर्द्धानविधायकानि वचनानि कियच्चिरं कियन्तं चिरकालं व्याप्य एतं नलं निह्नोतुं आवरीतुं प्रभवन्तु नाम समर्थानि भवन्तु अपितु चिरं सङ्गोपयितुं न पारयन्तीत्यर्थः दृष्टान्तयति हि प्रसिद्धौ पलालानां तृणविशेषाणां जालैः समूहैः पिहितआच्छादितइक्षुडिम्भइक्षुखण्डः स्वयं प्रकाशं प्रकटतां आसादयति प्राप्नोति सार्द्रवालुकामयप्रदेशे झटित्यङ्कुरप्ररोहार्थमिक्षुखण्डाः पलालैराच्छाद्यन्त इति लोकव्यवहारः यथा पलालाच्छन्नोऽपीक्षुखण्डस्तथाविधस्थानसम्पर्कात् प्रकाशतां यान्ति तथा देवतावचनेन विहितान्तर्द्धिसिद्धिरपि नलो भैमीसम्पर्कात् प्रकाशीबभूवेति दृष्टान्तः। आङ्पूर्वः सदधातुश्चुरादौ पठ्यते ॥ २ ॥

Digitized by Google

अपाङ्गमप्याप दृशोर्न रश्मि
र्नलस्य भैमीमभिलष्य यावत् ।
स्मराशुगः सुभ्रुवि तावदस्यां
प्रत्यङ्गमापुङ्खशिखं ममज्ज ॥ २ ॥
यदक्रमं विक्रमशक्तिसाम्या
दुपाचरद्द्वावपि पञ्चबाणः ।

नलस्य दर्शनमात्रेणापि भैमी कामवशा जातेत्याह ॥ अपाङ्गमिति ॥ नलस्य दृशो चक्षुषोर्रश्मिर्ज्योतिर्भैमीं अभिलष्य विषयीकर्तुमना भूत्वा यावत् अपाङ्गमपि अतिसान्निध्यादविलम्बप्राप्यं नयनप्रान्तमपि न आप तावत् प्रथममेव स्मरस्य कामस्य आशुगो बाणोऽस्यां सुभ्रुवि भैम्यां प्रत्यङ्गं प्रत्यवयवं आपुङ्खशिखं पुङ्खाग्रपर्य्यन्तं ममज्ज मग्नोबभूव नल कर्तृकदर्शनात्प्रागेव भैमी झटिति नलं दृष्ट्वा कामपीडिता जातेत्यर्थः अभिलाषे नयनरश्मेरौपचारिकं कर्तृत्वं भैमीं अभिलष्य स्थितस्य नल स्येति वा । आपुङ्खशिखमिति अपपरिवहिरञ्चवः पञ्चम्यावित्यव्ययी भावः । शिखा शाखावर्हिचूडालाङ्गलिक्यग्रमात्रकइति मेदिनी ॥ २ ॥

अनन्तरं द्वावपि युगपत् कामाधीनौ जातावित्याह ॥ यदिति ॥ पञ्च बाणः कामो विक्रमरूपायाः शक्तेः साम्यात् द्वयोरुपरि तुल्यत्वात् विक्र मस्य उत्साहस्य शक्तेः सामर्थ्यस्य च तुल्यत्वाद्वा यद्यस्मात् अक्रमं क्रम रहितं युगपत् द्वावपि भैमीनलौ उपाचरत् उपगतवान् स्वाधीनौ चकार तस्मादमुष्य पञ्चबाणस्य बाणैः सम्मोहनादिभिः पञ्चभिः शरैः कस्मात् कुतोऽपि वैमत्यं पराङ्मुखत्वं न लब्धं यतः कामेन शरव्यभूतयो

कृतं न वैमुख्यममुष्य कस्मात्
बाणैरनर्द्धार्द्धविभागभाग्भिः ॥ ४ ॥

तस्मिन्नलोऽसाविति साऽन्वरज्यत्
क्षणं क्षणं केऽयं स इत्युदास्त ।
पुरः स्म तस्यां वलतेऽस्य चित्तं
दौत्यादनेनाथ पुनर्न्यवर्त्ति ॥ ५ ॥

द्वयोरपि भैमीनलयोरुपरि युगपदेव विक्रमशालिप्रकाण्डः कृतश्चव स्मरस्य पञ्चभिर्बाणैरपि खले कपोतिकान्यायात् युगपदेव तौ भिन्नौ विधेयौ ननु कामबाणाः सम्मोहनादयो बहवस्तेषामर्द्धं भैम्यां पततु अर्द्धञ्च नले पततु कथं सर्व्व एव द्वयोरुपरि युगपत् पतिताश्चेत्यतो बाणान् विशिनष्टि किम्भूतैः अनर्द्धार्द्धविभागभाग्भिः अर्द्धार्द्धभाग मनर्हद्भिः पञ्चानां बाणानां समभागद्वयकरणाशक्यत्वात् । तावपि समकालमेव परस्परमनुरक्तौ जाताविति भावः । कस्मादित्यनन्तरमपि काकोबोध्यः पूर्व्ववाक्ये यच्छब्दस्योपादानादुत्तरवाक्ये तच्छब्दस्यार्थत्वं वैमुख्यमित्यत्र वैमत्यमिति पठित्वा अन्यथा व्याचक्षते प्राञ्चः ॥ ४ ॥

उभयोर्भावमाह ॥ तस्मिन्निति ॥ सा दमयन्ती तस्मिन् पुरुषे असौ नलइति निश्चित्य क्षणं अन्वरज्यत् अनुरक्ता बभूव स महानु भावो नलः कुत्र अतिसुरक्षिते कन्यान्तःपुरे क्व कुतइति विचिन्त्य क्षणं उदास्त उदासीना बभूव क्षणं क्षणं भविष्यत्विमिति द्विरुक्त पदत्वा अस्य नलस्य चित्तं पुरः प्रथमं तस्यां भैम्यां वलते स्म प्रवण मभूत् अनुरक्तं जातं अथानन्तरं अनेन नलस्य चित्तेन नलेन वा दौत्या द्धेतोन्यैवर्त्ति दौत्यमङ्गीकृतवतो मम ईदृगभिलाषोऽनुचितइति वि वृत्तं । पुरश्चात्र पुनरिति क्वचित्पाठः ॥ ५ ॥

Digitized by Google

कयाचिदालोक्य नलं ललज्जे
कयापि तद्भासि हृदा ममज्जे।
तं कापि मेने स्मरमेव कन्या
भेजे मनोभूवशभूयमन्या॥ ६॥
कस्त्वं कुतोवेति न जातु शेकु
स्तं प्रष्टुमप्यप्रतिभातिभारात्।

श्लोकद्वयेन नलाविर्भावे सखीनां चेष्टामाह ॥ कयाचिदिति॥ कयाचिन्मुग्धया भैमीसख्या नलं आलोक्य ललज्जे प्रकाशितलज्जा स्व्यभिचारिभावया जातं कयापि मध्यया भैमीसख्या तद्भासि नलस्य कान्तौ हृदा मनसा ममज्जे मग्नं अहो किमिदं सौन्दर्यमित्याश्चर्येनिमग्नमनसा कामाधीनया जातमित्यर्थः कापि कन्या कुमारी अविमुग्धा भैमीसखी तं नलं स्मरमेव काममेव मेने निश्चिकाय यः स्मरोऽतिसुन्दरत्वेन प्रसिद्धः सखीभिः कथ्यते सएवायमित्यतिमोग्ध्यान्निश्चिकायेत्यर्थः अन्या काचित्प्रगल्भा भैमीसखी नलं दृष्ट्वा मनोभूवशभूयं कामवश्यत्वमेव भेजे जगाम अननुभूतसम्भोगरसापि नलसौन्दर्यातिशयदर्शनात् तेन सह सम्भोगाभिलाषिणी जातेत्यर्थः। तं वीक्ष्य काचित् कुब्जा ललज्जे इति क्वचित्पाठः। वशभूयमिति भुवो भावे सुप्यप्रादाविति भावे क्यः॥ ६॥

कस्त्वमिति॥ अथास्त्रयस्त्रयो भैमीसख्योऽप्रतिभाया अप्रतिपत्त्या अप्रागल्भ्यस्य अतिभारात् आधिक्यात् तं नलं त्वं कः किंनामधेयोऽसि

उत्तस्थुरभ्युत्थितिवाञ्छयेव
निजासनाच्छैकरसाः क्षमाक्ष्यः ॥ ७ ॥
साच्छन्द्यमानन्दपरम्पराणां
भैमी तमालोक्य किमप्यवाप ।

कुतोदेशादयमागत इति प्रष्टुमपि जातु कदाचित् नलस्य दर्शनावधि तावत्कालपर्यन्तमपि न शेकुर्न समर्था बभूवुः तर्हि किं चक्रुरित्यत आह शृङ्गारसीयासां वामाक्ष्यः शृङ्गाराद्भुतास्वैकरसयुक्ताः सख्यो वेगमभ्युत्थितिवाञ्छयेव अभ्युत्थानचिकीर्षयेव निजासनात् स्वीय स्वीयासनात् उत्तस्थुः उत्तिष्ठन्ति स्म अथात्र विपत्तिजनितमुत्थान मभ्युत्थानत्वेनोत्प्रेक्षितं अभ्युत्थानं दूरागतजनसम्मानार्थमुत्थानं अपरिचितं पुरुषं दृष्ट्वा लज्जादिना जडीभूय तं किञ्चिदपदृश्यैव तस्माद्देशादपसरन्तीति कुमारीणां व्यवहारः। वाञ्छयैवेतिपाठे एवकारोऽप्यर्थे अभ्युत्थानेच्छयापि निजासनान्नोत्तस्थुः यतस्तस्मिन् नले रसोदर्शनानुरागिणीयासां वामाक्ष्यः नलसौन्दर्यदर्शने विक्षिप्ताः सख्यः केवलं चित्रपुत्तलिकावत्तस्थुरित्यर्थः ॥ ७ ॥

अथ नलावलोकनेन दमयन्त्या हर्षाधिक्यमाह ॥ साच्छन्द्यमिति ॥ भैमी तं नलं आलोक्य किमपि वक्तुमशक्यं आनन्दपरम्पराणां हर्षधाराणां साच्छन्द्यं निष्प्रतिबन्धकत्वं आधिक्यं अवाप प्राप्ता उपमिनोति निर्झरिणीव नदी यथा धाराधराणां मेघानां वैशिकं तं कालसमयं वर्षाकालं आसाद्य प्राप्य निर्झरिणी वारां जलानां मद्धारवं

Digitized by Google

मदारयं निर्झरिणीव वारा
मासाद्य धाराधरकेलिकालं ॥ ८ ॥
तत्रैव मग्ना यदपश्यदग्रे
नास्याद्दगस्याङ्गमयास्यदन्यत् ।
नादास्यदस्यै यदि बुद्धिधारां
विच्छिद्य विच्छिद्य चिरान्निमेषः ॥ ९ ॥

वेगातिशयं प्राप्नोति तथा प्राय नलस्य दर्शनमात्रेणैव भैमी तोको त्तरमानन्दं प्राप्नवतीति भावः । स्वाच्छन्द्यमिति छन्दोवशेऽप्यभिप्राये इत्यभिधानात् स्वआत्मीयश्छन्दोऽभिप्रायोयस्य स स्वच्छन्दः प्रतिबन्धकशून्यस्तस्य भावस्तत्त्वं ॥ ८ ॥

यद्भिः श्लोकैर्नयनप्रीतिं वर्णयति॥ तत्रैवेति ॥ अस्याभैम्या दृक् अमुस्य नलस्य यत् अङ्गं अग्रे प्रथमं अपश्यत् तत्रैवाङ्गे मग्ना निमग्ना सती अस्य अन्यदङ्गं तदा न अयास्यत् नाप्राप्स्यत् यदि चिराच्चिरकालात् परं जातोनिमेषोनेत्रसङ्कोचोविच्छिद्य विच्छिद्य मध्ये मध्ये पूर्वदृष्टाङ्गदर्शनविच्छेदं कृत्वा अस्यै दमयन्त्यै बुद्धिधारां बुद्धिपरम्परां अङ्गान्तरदर्शनेऽवधानवत्तां न अदास्यत् निमेषात्बुद्धिं प्राप्यैव अङ्गान्तरमपश्यदित्यर्थः अतिसुन्दराङ्गदर्शनस्य निमेषेण विच्छेदे जनिते सति अनन्तरं तस्यैवाङ्गस्य पुनर्दर्शनेच्छया अङ्गान्तरं ददर्श न तु प्रथमदृष्टाङ्गदर्शनविरक्त्येति भावः अयास्यददास्यदिति क्रियाऽतिपत्तौ लृट् ॥ ९ ॥

Digitized by Google

दृशापि सालिङ्गितमङ्गमस्य
जग्राह नाग्रावगताङ्गहर्षैः ।
अङ्गान्तरेऽनन्तरमीक्षिते तु
निवृत्य सस्मार न पूर्व्वदृष्टं ॥ १० ॥
छित्वेकमस्यापघनं विशन्ती
तद्दृष्टिरङ्गान्तरभक्तिसीमां ।

दृशेति ॥ सा दमयन्ती दृशा चक्षुषा आलिङ्गितमपि सम्यक् दृष्टमपि अस्य नलस्य अङ्गं कर्म्म अग्रे प्रथमं अवगतं आलोकितं यदङ्गं तस्माज्जातैर्हर्षैर्हेतुभिर्न जग्राह न प्रत्यक्षविषयीचकार दृष्टमप्यङ्गं पूर्व्वदृष्टाङ्गदर्शनजनितहर्षवशात् ज्ञातवतीत्यर्थः अनन्तरं हर्षानुभवात् परं अङ्गान्तरे ईक्षिते प्रत्यक्षेण गृहीते सति हर्षानुभवात् निवृत्य तु पुनः पूर्व्वदृष्टमङ्गं न सस्मार न स्मृतवती यथा पूर्व्वदृष्टाङ्गजन्यहर्षातिशयात् सम्यग्दृष्टमप्यङ्गान्तरं न जग्राह तथा परदृष्टाङ्गजन्यहर्षातिशयात् पूर्व्वदृष्टमङ्गं न सस्मारेत्यर्थः नलस्य सर्व्वेऽप्यवयवा अतिसुन्दरा इति भावः ॥ १० ॥

छित्वेति ॥ स्वभावेन लोला चपला तस्याभैम्या दृष्टिश्चक्षुरस्य नलस्य एकं प्रथमदृष्टं अपघनं अङ्गं छित्वा व्यक्त्वा अङ्गान्तरभक्तिसीमां अङ्गान्तरविभागमर्य्यादां विशन्ती भजन्ती सती उभयोः प्रथमदृष्टपश्चाद्दृष्टयोरङ्गयोर्य्यौ लाभौ विषयीकरणं तत्र लोभात् लुब्धत्वाद्धेतोश्चिरं बहुकालं व्याप्य गतमागतञ्च गमनागमने चकार द्वयोरप्यङ्गयोरतिसुन्दरतयाह्लादातिशयजनकत्वाद्दूयमपि त्यक्तुं न

चिरं चकारोभयलाभलोभात्
स्वभावलोला गतमागतञ्च ॥ ॥ ११ ॥
निरीक्षितञ्चाक्रमवीक्षितञ्च
दृशा पिबन्ती रभसेन तस्य।
समानमानन्दमियं दधाना
विवेद भेदं न विदर्भसुभ्रूः॥ १२ ॥

दृशाकेत्यर्थः स्वभावेन चपलोऽपि गमनागमने करोत्येव अन्योऽपि वणिक् लाभलोभात् स्वदेशविदेशयोः क्रयविक्रयार्थं गमनागमने करोति। भल्लीत्यत्र भुल्लीति क्वचित्पाठः भल्लान्तरस्य भुल्लिराजो वनं तस्याः सीमां मर्य्यादां विघ्नन्ती आक्रान्तरमवलोकयन्तीत्यर्थः। अपघनेति अपपूर्व्वाद्धन्तेरपादक्रू इति कः हनोघनादेशश्च। अङ्गं प्रतो कोऽवयवोऽपघन इत्यमरः ॥ ११॥

निरीक्षितमिति ॥ निरीक्षितं प्रथमदृष्टं अवीक्षितं प्रथममदृष्टं पश्चाद्दृष्टञ्च तस्य नलस्य अङ्गं दृशा चक्षुषा रभसेनोत्सुकेन पिबन्ती सादरमालोकयन्ती इयं विदर्भसुभ्रूभैमी समानं दृष्टादृष्टदर्शनाद्दृष्टा दृष्टदर्शनयोस्तुल्यमानन्दं दधाना धारयन्ती सती भेदं इदं पूर्व्वदृष्टत्वात्तामानन्दकरं इदञ्चापूर्व्वदृष्टत्वादानन्दातिशयजनकमित्युभयोरङ्गयोस्तारतम्यं न विवेद न निश्चिकाय लोकस्य हि दृष्टवस्तुनि अनादरो भवति अदृष्टे चौत्सुक्यं भवति यथात्र न द्वयोरप्यङ्गयोर्लोकातिशयसौन्दर्य्यशालित्वात् तुल्यानुरागा भूत्वा द्वयमपि ददर्शेति भावः ॥ १२ ॥

Digitized by Google

श्लक्ष्णे घने नैषधकेशपाशे
निपत्य निष्पन्दतरीभवद्भ्यां ।
तस्यानुबन्धं न विमोच्य गन्तु
मपारि तल्लोचनखञ्जनाभ्यां ॥ १३ ॥
भूलोकभर्त्तुर्मुखपाणिपाद
पद्मैः परीरम्भमवाप्य तस्य ।

श्लक्ष्णे इति तस्याभैम्यालोचने चक्षुषी एव खञ्जनौ पक्षिविशेषौ ताभ्यां सूक्ष्मेऽति श्लक्ष्णे घने निबिडे नैषधस्य नलस्य केशपाशे केशसमूहे अथ च केशात्मके पाशे पक्षिधारणरज्जुविशेषे निपत्य सन्निकर्षं प्राप्य अथ च नितरां पतित्वा निष्पन्दतरीभवद्भ्यां निमेषरहिताभ्यां अथ च पाशबद्धतया निश्चलीभवद्भ्यां सद्भ्यां तस्य केशपाशस्य अनुबन्धं सम्बन्धं विमोच्य त्यक्त्वा अथ च अनु पश्चात् बन्धं बन्धनं त्यक्त्वा गन्तुं विषयीकर्त्तुं परिहर्त्तुं अथ च उड्डयितुं नापारि न शक्तं अतिमनोज्ञं नलकेशपाशं भैमी चिरं ददर्शेत्यर्थः खञ्जनोऽपि सूक्ष्मत्वात् अतिशय दर्शनाविषये निबिडे पाशे पतित्वा पाशबद्धत्वा निश्चलीभूत्वा तद्बन्धनं त्यक्त्वा पदमपि उड्डयितुं न शक्नोति भैम्याश्च नेत्रे खञ्जनपक्षितुल्यत्वादतिचपले नलस्य च केशाः सूक्ष्मत्वान्निबिडत्वाच्च मुग्धत्वाच्च सुदर्शाश्चेति भावः। सूक्ष्मास्तु पाशिदन्तवाक्कुचि पर्वकेशाइविसामुद्रकं । विमोच्येति स्वार्थे णिच् कश्चिद्विमुच्येति पाठः ॥ पाशः कचान्ते संघातार्थः कर्णान्ते शोभनार्थक इति विश्वः ॥१३॥

भूलोकेति ॥ दमस्वसुर्दमयन्त्या दृष्टिश्चक्षुरेव सरोजराजिः कमल श्रेणी तस्य भूलोकभर्त्तूराज्ञो नलस्य मुखपाणिपादपद्मैर्मुखपद्मेन

दमस्वसुर्दृष्टिसरोजराजि
स्थिरं न तत्याज सबन्धुबन्धं ॥ १४ ॥

तत्कालमानन्दमयी भवन्ती
भवत्तरानिर्व्वचनीयमोहा ।
सा मुक्तसंसारिदशारसाभ्या
द्विस्वादमुल्लासमभुङ्क्त मिष्टं ॥ १५ ॥

पाणिपद्माभ्यां पादपद्माभ्याञ्च परीरम्भं सम्बन्धं अवाप्य प्राप्य सबन्धु बन्धं सगोत्रसम्बन्धं सजातीयस्नेहं चिरं न तत्याज अन्योऽपि चिरात् बन्धुभिरालिङ्गनं प्राप्य स्नेहं न त्यजति भैमी अतिसुन्दरात् नलस्य मुखपाणिचरणात् चिरेण सादरमालोकयामासेति भावः ॥ १४ ॥

इत्थं प्रत्यक्षं नलमालोकयन्त्या भैम्या आनन्दमोहौ द्वावपि युगपज्जाताविन्याह ॥ तत्कालमिति ॥ सा भैमी मुक्तसंसारिणोर्ये दशे अवस्थे तयोर्यौ रसौ ताभ्यां द्विस्वादं द्विविधरसं मिष्टं रुचि स्वादु बहुतरं उल्लासं हर्षं अभुङ्क्त अनुभूतवती किम्भूता यत स्तत्कालं नलदर्शनसमये आनन्दमयी आनन्दाभिन्नस्वरूपा अथ च आनन्दबहुला भवन्ती तथा भवत्तरोऽतिशयेन भवन् अनिर्व्वचनीयो लोकोत्तरो मोहः कामविकारविशेषो यस्यास्तादृशी अति सुरक्षितेऽन्तःपुरे नलागमनं कथमित्यस्माद्धेतोर्भवत्तरोऽनिर्व्व चनीयो मोहो भ्रान्तिर्यस्याः सेति वा आनन्दस्वरूपत्वं मुक्त दशा आनन्दो ब्रह्मणो रूपमिति श्रुतेः अनिर्व्वचनीयमोहत्वं संसा रिदशा नलं दृष्ट्वा मोहसम्भिन्नमानन्दातिशयं सानुबभूवेति भावः ॥ १५ ॥

Digitized by Google

दूते नलश्रीभृति भाविभावा
कलङ्किनीयं जनि मेति नूनं।
न सव्यधान्नैषधकायमायं
विधिः स्वयं दूतमिमां प्रतीन्द्रं॥ १९॥
पुण्ये मनः कस्य मुनेरपि स्यात्
प्रमाणमास्ते यदघेऽपि धावत्।

ननु नलएवायमितिनिश्चयं विना तस्मिन् जातानुरागाया भैम्याः कथं न पातिव्रत्यभङ्गोऽभूदित्याशङ्कां कविरपहरति ॥ दूतइति॥ इयं दमयन्ती नलश्रीभृति हंसादिमुखेन श्रुतस्य नलस्य कान्तिधारिणि दूते भाविभावा नलबुद्धा भविष्यदनुरागा सती कलङ्किनी पापयुक्ता अकीर्त्तिमती च मा जनि मा भवतु इति नूनं इतीव देवो विधिर्ब्रह्मा इमां भैमीं प्रति उद्दिश्य नैषधस्य नलस्य कायादेहएव माया यस्य तादृशं कपटनलवेषधारिणं इन्द्रमेव स्वयं दूतं न संधात् न चकार नूनमुत्प्रेक्षायां कपटनलवेषधारणयोग्यतायां सत्यामपि इन्द्रोनलरूपं हित्वा स्वीयदूत्यार्थे यन्न गतवान् तन्नैवंविधेविधेरभिप्रायउन्नेयोऽतः नलनिश्चयाभावेऽपि सत्यएव नलेऽनुरागान्न भैम्याः पातिव्रत्यभङ्गोऽभूदिति भावः॥ १९॥

ननु माभूद्भैम्याः पातिव्रत्यभङ्गः किन्तु नलत्वनिश्चयमन्तरेण पतिव्रतायास्तस्याः परपुरुषानुरागोऽनुचितएवेत्याशङ्कामपनयन्नाह ॥ पुण्यइति॥ आस्तां तावत्कामवशंवदाया राजपुत्र्याभैम्याः कथा मुनेरपि कस्य मनोऽन्तःकरणं पुण्ये विषये प्रमाणं निश्चितं स्थिरतरं

तच्चिन्ति चित्त परमेश्वरस्तु
भक्तस्य दृष्यत्करुणोरुणद्धि ॥ १७ ॥
सालोकहष्टे मदनोन्मदिष्णु,
र्यथापत्राणलीनतया न मौन ।

स्यात् भवेत् अपि तु न कस्याऽपि यस्मात् कस्येऽपि परदारगमना दौ पापकर्मण्यपि धावत् शीघ्रं गच्छत् भवति मुनेर्मनः पुण्यविषय एव नियतं प्रवर्त्तत इति न किन्तु पापविषयेऽपि प्रवर्त्तते तथा प्ययं विशेषः पापविषये शीघ्रमविचार्य्यैव प्रवर्त्तते अपिकारेण शीघ्र गमनार्थकधावधातुविन्यादितेन। धावदिंतिपदेन पापमर्थोलब्धः स त्वेयापि प्रायेणैवं भवतीति भैम्यास्तथाविधोमानसानुरागेण दूष धावहोजातइति भावः । नन्वेवं तर्हि सर्व्वेऽपि मुनयः पापिनो भवेयुरित्याशङ्कां परिहरति। तु किन्तु परमेश्वरोहृष्यत्करुण उप लापः सन् तच्चिन्ति पापचिन्तनशीलमपि भक्तस्य निजसेवकस्य चित्तं रुणद्धि पातकान्निवर्त्तयति पापचिन्तनस्वभावमपि भक्तजनान्तः करणं परमेश्वरकृपया पापकर्मणि न प्रवर्त्ततइत्यर्थः तच्चिन्ति परमेश्वरचिन्तीति वा। ननु पुण्यश्लोकोनलोऽपि इन्द्रादिदौत्यमङ्गी कृत्य कथं भैम्यामनुरागं प्राप्तवान् यद्दर्शनेन कामुकजनइव तस्याः स्तना द्यङ्गानि वर्णयामासेत्याशङ्कां, परिहरतीति वास्य श्लोकस्यावतार णिका॥ १७ ॥

इत्थमनौचित्यं परिहृत्य प्रकृतमनुसरन् भैमी कथयामासेत्याह ॥ सेति ॥ सा भैमी अलीकदृष्टे तन्मयतायां असत्यावलोकिते नले मदनेन उन्मदिष्णुरुन्मत्ता सती अपत्राणलीनतया निर्लज्जतया यथा

तथैव तथ्येऽपि नले न लेभे
मुग्धेषु कः सत्यमृषाविवेकः ॥ १८ ॥
व्यर्थीभवद्भावपिधानयत्ना
स्वरेण साथ श्वसगद्गदेन।

पूर्वं मौनं न लेभे संभ्रतायास्वदशायां किमप्यवादीत्तथैव तथ्येऽपि सत्येऽपि नले मौनं न लेभे प्राप्तवती अवादीदित्यर्थः कथमेवमित्यत आह मुग्धेषु मोहं प्राप्तेषु जनेषु सत्यमृषाविवेकस्तथ्यातथ्ययोर्विचारः कः अपि तु नैव मुग्धानां तथ्यातथ्यविवेचनाशून्यत्वात्तद्वचनं न दोषायेति भावः। प्राचीनतमेति पाठे स्वभावतः प्राचीनतमा अधृष्टापि मदनोन्मादिष्णुः सती यथा पूर्वं अलीकदूतनले मौनं नाप न प्राप्तवतीत्यन्वयः। विवेकः स्याज्जलद्रोण्यां पृथग्भावविचारयोरिति मेदिनी ॥ १८ ॥

व्यर्थीभवदिति ॥ सा दमयन्ती सखीचये सखीसमूहे साध्वसेन आकस्मिकपुरुषदर्शनजनितभयेन तद्वाचि मूकतां प्राप्ते सति अथानन्तरं स्वयमात्मना तं नलं ऊचे किम्भूता श्वासोऽविरलश्वासो गद्गदोऽस्पष्टश्चेति तथाभूतेन स्वरेण हता व्यर्थीभवन् विफलीभवन् भावपिधानयत्नः सात्त्विकभावगोपनप्रयासो यस्यास्तादृशी तथा नमन् नम्रीभवन् आननेन्दुर्मुखचन्द्रो यस्याः सा एकस्यापि गद्गदस्वरलक्षणस्य सात्त्विकभावस्य प्रकाशनादेव भावान्तराणामनुमानात् तद्गोपनप्रयासस्य वैयर्थ्यं अनुरक्तमपि पुरुषं लज्जाधिक्यान्मुखमानमय्य कथयन्तीति

Digitized by Google

सखीचये साध्वसबद्धवाचि
स्वयं तमूचे नमदाननेन्दुः॥ १९ ॥
नत्वा शिरोरत्नरुचापि पाद्य
सम्पाद्यमाचारविदातिथिभ्यः।
प्रियाक्षराली रसधारयापि
वैधी विधेया मधुपर्कतृप्तिः॥ २० ॥

मुग्धानां स्वभावः। स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभेदश्च वेपथुः। वैव र्ण्यमश्रु प्रलयइत्यष्टौ सात्त्विकाः स्मृताइति मदसम्मदपीडाद्यैर्वैस्वर्य्यं गद्गदं विदुरिति च दर्पणः॥ १९ ॥

अथेतः परं भैमीवचनमनुवदति॥ नत्वेति॥ त्रिभिर्विशेषकं। हे पुरुषश्रेष्ठ आचारविदा विधिज्ञेन शिष्टाचारवेदिना वा अनेन अतिथिभ्यो गृहागतेभ्योजनेभ्योनत्वा प्रणम्य शिरोरत्नरुचापि अत्र त्वानुपस्थितौ चूडामणिकिरणेनापि पाद्यं पादाय वारि सम्पाद्यं देयं अतिथिभ्यश्चरणक्षालनाय पाद्यदानस्यावश्यकत्वादुदकानुपस्थितौ तुल्यतया रत्नशिरोमणिकिरणेनापि तद्दातव्यमित्यर्थः अतिथिं त्वां प्रणमामीति भावः आचारविदेति प्रतिवाक्यं श्लोकत्रयेऽप्यनुषञ्ज नीयं तथा प्रियाक्षराली प्रियवचनाक्षरपङ्क्तिस्तस्यारसोमाधुर्य्यं तस्य धारयापि परम्परयापि वैधी विधिबोधिता अवश्यानुष्ठेया न तु स्वारसिकी अतिथीनां मधुपर्कजन्या तृप्तिर्विधेया करणीया मधुपर्कोपकरणासम्भवेऽपि प्रियवचनमपि वक्तव्यमित्यर्थः मम प्रिय वचनं श्रुत्वा मधुपर्कजन्यतृप्तिं लभस्वेति भावः। मधुपर्कतृप्तिरिति सम्बन्धषष्ठ्यातृतीयायावा समासः॥ २० ॥

Digitized by Google

आत्मापि शीलेन तृणं विधेयं
देया विहायासनभूर्निजापि।
आनन्दबाष्पैरपि कल्प्यमम्भः
पृच्छा विधेया मधुभिर्वचोभिः॥ २१ ॥
पदोपहारेऽनुपपन्नतापि
सम्भाव्यतेऽपां त्वरयापराधः।

आत्मेति॥ आचारविदा शीलेन सद्वृत्तेन आत्मापि शरीरमपि तृणं विधेयं कर्तव्यं अतिथीनामग्रे सेवार्थं शरीरमपि तृणवदविगणं कर्तव्यमित्यर्थः अथच आस्तरणतृणस्याप्यभावे उपवेशनार्थं आत्मापि तृणस्थाने विधेय इत्यर्थः तथा निजापि स्वीयापि आसनभूरुपवेशनभूमिर्विहाय त्यक्त्वा अतिथिभ्यो देया परिष्कृतभूमेरभावे स्वाधिष्ठानभूमिरपि झटिति त्यक्त्वा दातव्येत्यर्थः तथा आचमनीयजलानुपस्थितौ आनन्दबाष्पैरपि प्रमोदाश्रुभिरपि अम्भोजलं कल्प्यं अतिथिदर्शनमात्रेण प्रमुदितमनसा भवितव्यमित्यर्थः अथ च आचमनीयादिजलस्थाने आनन्दबाष्पा एव विधेया इत्यर्थः तथा मधुभिः प्रियैर्वचोभिः पृच्छा कच्चित् कुशलं ते महानुभावेति कुशलजिज्ञासा विधेया कर्तव्या। अन्योपकरणाभावे हृद्यादिभिरपि अतिथयः सम्भावनीयाः तथाच स्मृतिः। तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता। एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचनेति। आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म चेत्यमरः शीलं स्वभावे सद्वृत्ते इति विश्वः॥२१॥

पदोपहार इति॥ पदोपहारे चरणक्षालनविषये त्वरया झटिति अपां जलानां अनुपपन्नतापि अनानयनमपि यस्मादाचारविदा

Digitized by Google

तत्कर्त्तुमर्हाञ्जलिसज्जनेन
सुसंभृतिप्राञ्जलतापि तावत्॥ २२॥
पुरः परित्यज्य मयात्यसज्जि
स्वमासनं तत् किमिति त्वयाद्य।

अपराधः सम्भाव्यते जलानयनस्य विलम्बान्ममायमपराधोऽभाव इति संभाव्यते तस्मात् अञ्जलिसज्जनेन अञ्जलिबन्धेन सुसम्भृतौ सम्यगातिथ्यसामग्र्योस्थाने विधेया प्राञ्जलतापि ऋजुतापि तावत् प्रथमं कर्त्तुं अर्हा योग्या तावतापि तदपराधशान्तिर्भवतीति भावः यदा अर्घ्यां त्वरया जलाहरणार्थसम्भ्रमेण अनुपनयता नमस्काराभावलक्षणोऽपराधोऽयमात् सम्भाव्यते तस्मात् प्रथमं अञ्जलिसज्जनेन सुसम्भृतिरूपा प्राञ्जलता कर्त्तव्या तावदयेऽप्यधिकारौ निश्चितार्थौ जलाहरणादिव्यग्रतां व्यक्त्वा प्रथमं नमस्कारः कर्त्तव्यस्तेनैव सकलसम्भारजनितातिथीनां तुष्टिर्भवति तस्मात् प्रथमं प्रणामेन अतिथिं त्वां सम्भावयामीति भावः। सुसम्भृतिरित्यसमस्तप्रथमान्तपाठे यावत्तु सम्भृतिर्भवति तावत् अञ्जलिसज्जनेन प्राञ्जलतापि कर्त्तुमर्हेत्यन्वयः पदोपहार इत्यत्र यदोपहार इति क्वचित्पाठः यदा उपहारे अतिथ्युपढौकनविषये तत्तदा अन्यत् सर्व्वं पूर्व्ववत् ॥ २२ ॥

पुर इति॥ पुरः प्रथममेव मया स्वं स्वीयमासनं परित्यज्य अत्यसज्जि भवते दत्तं तदेवदासनं अनर्हमपि स्त्रीजनसम्बन्धित्वाद्भवादृशामयोग्यमपि त्वमल्पकालं व्याप्य किमिति कुतो हेतोर्भवता नालंक्रियेत

अनर्हमप्येतदलंक्रियेत
प्रयातुमीहा यदि चान्यतोऽपि ॥ २३ ॥
निवेद्यतां हन्त समापयन्तौ
शिरीषकोषम्रदिमाभिमानं।
पदौ कियद्दूरमिमौ प्रयासे
निधित्सते तुच्छदयं मनस्ते ॥ २४ ॥

भूषितं न क्रियतां अपि त्वलंक्रियतामित्यर्थः यदि च यद्यपि भवतो ऽपि अन्यत्र देशेऽपि प्रयातुं गन्तुं ईहा चेष्टा वर्त्तते तथापि सत्र मात्रमलंक्रियतामित्यर्थः यद्यपि तस्य देशान्तरगमनोत्सुकत्वादास नस्य चानर्हत्वादवस्थातुं नेच्छसि तथापि क्षणमात्रावस्थाने का हानि रित्यर्थः । क्रियेतेति प्रार्थनायां लिङ् ॥ २३ ॥

निवेद्यतामिति ॥ हे सुन्दर तुच्छदयं निष्कृपं ते तव मनः कर्तृ कियद्दूरं कियद्दूरदेशपर्यन्तं प्रयासे गमनायासविषये इमौ अति कोमलतया प्रत्यक्षविषयीभवन्तौ भवदीयौ पदौ निधित्सते निधातु मिच्छति हन्तेति खेदे इदं निवेद्यतां कथ्यतां किम्भूतौ पदौ शिरी षाणां शिरीषपुष्पाणां कोषः समूहस्तस्य म्रदिमाभिमानं मार्दवगर्वं समापयन्तौ नाशयन्तौ शिरीषकोषादप्यतिसुकुमारौ चरणौ किय द्दूरगमनेन परिश्रमयितुमिच्छसि तत् कथ्यतामित्यर्थः अन्योऽपि निर्दयः सुकुमारं जनं प्रयासे प्रेरयति यस्मिन् देशे गमिष्यसि स देशः कथ्य इति भावः ॥ २४ ॥

Digitized by Google

अनायि देशः कतमस्त्वयाद्य
वसन्तमुक्तस्य दशां वनस्य ।
त्वदाप्तसङ्केततया कृतार्था
अव्यापि नानेन जनेन संज्ञा ॥ २५ ॥
तीर्णः किमर्णोनिधिरेव नैष
सुरक्षिते ऽभूदिह यत् प्रवेशः ।
फलं किमेतस्य तु साहसस्य
न तावदद्यापि विनिश्चिनोमि ॥ २६ ॥

अनायीति ॥ हे सुन्दर अद्य अस्मिन् दिवसे त्वया कतमः किन्ना मको देशो वसन्तेन मुक्तस्य परित्यक्तस्य वनस्य दशामवस्थां अनायि नीतः यथा वसन्तरहितं वनं निःशोभं भवति तथा भवद्रहितः कत मो देशो निःशोभो जात इत्यर्थः किंनामकाद्देशादागतोऽसि कथ्यता मितिभावः तथा त्वयि वाच्ये आप्तः प्राप्तः सङ्केतो वाचकत्वसम्बन्धो यया तस्या भावस्तत्ता तया हेतुना कृतार्था सफला संज्ञापि नामापि अनेन मद्रूपेण जनेन न अव्याप्ता न श्रोतुमर्हा अपि तु नामश्रवणे बाधा नास्तीत्यर्थः किं ते नाम कथ्यतामिति भावः ॥ २५ ॥

तीर्ण इति ॥ हे सुन्दर सुरक्षिते दौवारिकैरतिसावधानतया रक्षिते इहान्तःपुरे यत् तव प्रवेशोऽभूत् एषकिं अर्णोनिधिरेव समुद्र एव त्वया न तीर्णः अपि तु अत्र प्रवेशः समुद्रोत्तरणतुल्य इत्यर्थः तु पुनरेतस्य अन्तःपुरप्रवेशलक्षणस्य साहसस्य अविचार्यकारित्वस्य किं फलं प्रयोजनं तदद्यापि एतत्समयपर्यन्तमपि तावन्न विनिश्चि नोमि नावधारयितुं शक्नोमि किमर्थमन्तःपुरप्रवेशरूपमतिदुर्घटं कर्म्म कृतवान् कथ्यतामित्यर्थः ॥ २६ ॥

Digitized by Google

तव प्रवेशे सुकृतानि हेतु
म्मन्ये मदक्ष्णोरपि तावदत्र ।
न लक्षितोरक्षिभटैर्यदाभ्यां
पीतोऽसि तन्वा जितपुष्पधन्वा ॥ २७ ॥
यथाकृतिः काचन ते यथा वा
दौवारिकान्धङ्करणी च शक्तिः ।

तवेति ॥ अन्तःपुरे तव प्रवेशे मदक्ष्णोरपि अपिशब्द एवार्थे मम चक्षुषोरेव सुकृतानि पुण्यानि तावद्धेतुः कारणमित्यहं मन्ये सम्भावयामि तावदिति वाक्यालङ्कारे अन्यतावच्छिन्नं प्रत्यदृष्ट कारणतया तव प्रवेशलक्षणं कार्यं प्रति मम चक्षुषोरेव शुभादृष्टं हेतुरित्यर्थः कथमेवं ज्ञातमित्यत आह यद्यस्मात् तन्वा शरीरेण जितः पुष्पधन्वा कामो येन तादृशोऽतिसुन्दरोऽसि त्वं रक्षिभटैर्दौवारिकैर्न लक्षितो न दृष्टः आभ्यां मदक्षिभ्यां पीतोऽपि सादरमवलोकितः तस्मान्मदक्ष्णोरेव पुण्यानि तवात्र प्रवेशे हेतुरिति मन्ये यदि भवान् रक्षिगणैर्दृष्टोऽभविष्यत्तदा तैर्निवार्यमाणस्य भवतोऽत्र प्रवेशः कथं भवेत् अतोमदीयपुण्यातिशयवशादेव तैरलक्षितप्रवेशोभवान् मया दृष्टइति भावः । चक्षुषोः पुण्यातिशयवत्त्वमौपचारिकं ॥ २७ ॥

यथेति ॥ हे सुन्दर यथा ते तव काचन लोकोत्तरातिरमणीया आकृतिः शरीरं यथा वा तव दौवारिकाणां द्वारपालानां अन्धङ्करणी अनन्धा अन्धाः क्रियन्तेऽनयेति तथाविधा शक्तिः साम

रुच्योरुचीभिर्जितकाञ्चनाभि
स्तथासि पीयूषभुजां सनाभिः॥ २८॥
न मन्मथस्त्वं स हि नास्तिमूर्त्ति
र्न वाश्विनेयः स हि नाद्वितीयः।
चिह्नैः किमन्यैरथवा तवेयं
श्रीरेव ताभ्यामधिका विशेषः॥ २९॥

यथेति यथा च त्वं जितकाञ्चनाभिस्तिरस्कृतसुवर्णाभिरतिगौरीभी रुचोभिर्दीप्तिभी रुच्योऽभिलाषयोग्यस्तथा त्वं पीयूषभुजां देवानां सनाभिः ज्ञातिरसि देवत्वमन्तरेणैवंविधत्वं न घटतेऽतस्त्वं कश्चन देवोऽसीति मन्ये इत्यर्थः रुच्योरुचीभिरित्यत्रापि यथावैत्यनुवर्त्तनीयं। सनाभिरिति समानान्नाभ्याः कुलपञ्जितप्रियसुभगात् कर्म्मणः कर्म्मोऽभूवत्रावे करणे खव्वनविति खकनट्। सपिण्डास्तु सनाभय इत्यमरः॥ २८॥

इत्यमस्य देवत्वं निश्चित्य वितर्कयति॥ नेति॥ हे सुन्दर त्वं मन्मथः कन्दर्पोऽन हि यतः स मन्मथोनास्त्यविद्यमानामूर्त्तिर्यस्य तादृशः न वा त्वं आश्विनेयोऽश्विनीकुमारः हि यतः स आश्विनेयोऽद्वितीयोऽन अपि तु द्वितीयसहित एव अतिरमणीयाद्यविलाद्वितीयरहितत्वाच्च त्वं कन्दर्पाश्विनीकुमाराभ्यां भिन्नः कश्चिदेव इत्यर्थः। अथवेति पूर्वापरितोषे अथवा अन्यैरलङ्कृतादिभिश्चिह्नैः किं अपि तु अन्यैश्चिह्नैर्न किमपि प्रयोजनं यतस्ताभ्यामनङ्गाश्विनेयाभ्यामधिका इयं दृश्यमाना तव श्रीरेव शोभैव विशेषस्तदन्यत्वज्ञापिका मन्मथाश्विनेयाभ्यामपि त्वमतितरां सुन्दर इति भावः। अत्नोति वितर्कप्रतिरूपकमव्ययं॥ २९॥

Digitized by Google

आलोकतृप्तीकृतलोक यस्मा
मभून पीयूषमयूखमेतं ।
कः स्पर्द्धितुं धावति साधु सार्द्ध
मुद्न्वता नन्वयमन्ववायः ॥ ३० ॥
भूयोऽपि बाला नलसुन्दरं तं
मत्वाऽमरं रक्षिजनाभिबन्धात् ।

आलोकेति ॥ आलोकेन दर्शनेन तृप्तीकृतः सन्तोषितो लोको येन ननु हे तथाविध एतं पीयूषमयूखं त्वां योऽन्ववायोऽसूत अनया मास स कोऽयमन्ववायो वंशउदन्वता समुद्रेण सार्द्धं सह साधु युक्तं यथा तथा स्पर्द्धितुं धावति भवत्वंश इति स्पर्द्धां कर्तुं धावति सत्वरो भवति समुद्रोऽप्यालोकेन उद्योतेन तृप्तीकृतलोकं चन्द्रमसूत अतस्तेन सह स्पर्द्धा युक्तैव कस्मिन् वंशे जातोऽसीत्यपि कथ्यतामिति भावः। आलोकौ दर्शनोद्योताविति वंशोऽन्ववायः सन्तानइत्यमरः ॥ ३० ॥

अथ पुनरपि भैमी तं स्तौति स्मेत्याह ॥ भूयइति ॥ सा बाला भैमी तं नलं रक्षिजनानां दौवारिकाणां अभिबन्धात् चक्षुःप्रतिरोधनात् नलसुन्दरं नलवन्मनोहरं अमरं देवं मत्वा निश्चित्य आतिथ्यपाटूनि अतिथिषु प्रयोज्यानि प्रियवचनानि अपदिश्य व्याजीकृत्य वस्तुतोयाथार्थ्येन वत्स्यां तस्मिन्नुते विद्यमानां प्रियस्य नलस्य श्रियं शोभां भूयः पुनरपि अस्तुत स्तौति स्म दौवारिकाणामस्वीकरणात्ययं नलः

आतिथ्यचापून्यपदिश्य तत्त्वां
श्रियं प्रियस्यास्तुत वस्तुतः सा ॥ ३१ ॥
वाग्जन्मवैफल्यमसह्यशल्यं
गुणाधिके वस्तुनि मौनिता चेत् ।
खलत्वमल्पीयसि जल्पितेऽपि
तदस्तु वन्दिभ्रमभूमितैव ॥ ३२ ॥
कन्दर्प एवेदमविन्दत त्वां
पुण्येन मन्ये पुनरन्यजन्म ।

किन्तु तत्सदृशः कश्चिदेवेति निश्चित्य आतिथ्यप्रियवचनव्याजेन नल-शोभासदृशीं तव शोभां स्तौति स्मेत्यर्थः ॥ ३१ ॥

स्तुतिप्रकारमाह ॥ वाग्जन्मेति ॥ गुणैरद्भुते आश्चर्यभूते वस्तुनि मौनिता मूकीभावश्चेत् गुणाद्भुतं वस्तु न स्तूयते चेत् तर्हि असह्य-शल्यं दुःसहशल्यतुल्यं वाग्जन्मनो वचनोत्पत्तेर्वैफल्यं निष्फलत्वं भवति मूकेन सह तस्य न कोऽपि विशेष इत्यर्थः तस्मात्स्तव्यमेव वक्तव्यमित्या-शङ्क्याह बहुगुणेषु अल्पीयसि अत्यल्पे गुणे जल्पितेऽपि कथितेऽपि खलत्वं क्रूरत्वमायाति खला हि बहुगुणस्य किञ्चिद्गुणं कथयन्ति तत्तस्मात् वन्दिनः स्तुतिपाठकस्य योऽधमो वावदूकत्वात् स्तुतिपाठकोऽ-यमिति भ्रान्तिस्तस्य भूमिता आश्रयतैव अस्तु भवतु वरं लोकाः स्तु-तिपाठकोऽयमिति कथयन्तु स दोषो लघुरेवेत्यर्थः गुणाद्भुतं त्वां स्तो-ष्यामि तत्र मम वावदूकता मर्षयितव्येति भावः ॥ ३२ ॥

कन्दर्प इति ॥ कन्दर्प एव पुण्येन त्वां तद्रूपं इदं दृश्यमानं अन्य-जन्म जन्मान्तरं पुनरविन्दत लेभे इत्यहं मन्ये सम्भावयामि किं

Digitized by Google

चण्डीशचण्डाक्षिकृताशकुण्डे
जुहाव यन्मन्दिरमिन्द्रियाणां ॥ ३२ ॥
शोभायशोभिर्जितशैवशैलं
करोषि लज्जागुरुमौलिमैलं ।

यस्य पुण्यमित्यनयाह यद्यस्मात् चण्डीशस्य शिवस्य चण्डं दुःसहं यदक्षि तृतीयं चक्षुस्तदेव कृताशस्य वह्नेः कुण्डं तस्मिन् इन्द्रियाणां मन्दिरं गृहं शरीरं जुहाव कृतवान् शिवस्य तृतीयनयनरूपे वह्नि कुण्डे शरीरविसर्ज्जनजनितपुण्यातिशयेनैव कामः पूर्व्वापेक्षयाति सुन्दरं त्वामेव जन्म प्राप्तवानित्यर्थः अन्योऽपि कामनया वह्निकुण्डे शरीरं परित्यज्य पूर्व्वजन्मापेक्षया उत्तमं जन्म प्राप्नोति कन्दर्पापेक्ष याऽतिसुन्दरोऽसीति भावः ॥ ३२ ॥

शोभेति ॥ हे सुन्दरोत्तम त्वं शोभा च यशांसि च तैः कान्तिकी र्त्तिभिः शोभाजनितयशोभिर्व्वा कृत्वा जितः शैवः शिवसम्बन्धी शै लोऽतिधवलकैलासपर्व्वतो येन तादृशं ऐलं इलातनयं पुरूरवसं हठेन बलात्कारेण श्रियः शोभाया हरणाद्ग्रहणात् लज्जया गुरुर वनतो मौलिर्मस्तको यस्य तादृशं करोषि यस्य बलवतोऽपि चौरत्वेन हठाद्गृह्यते स लज्जया नतशिरा भवति स्वापेक्षयाधिकशोभा शालिनं भवन्तमनुभूय पुरूरवा लज्जया मस्तकं नमयतीत्यर्थः तथा शोभायशोभिर्जितशैवशैलौ दस्रौ अश्विनीकुमारौ हठश्रीहरणात् रुदन्तौ उद्गतनयनजलौ दुःखाधिक्याद्रोदनयुक्तौ करोषि यस्य च दुर्बलस्य चौरत्वेन बलाद्गृह्यते स किञ्चित् कर्त्तुमक्षमतया दुःखा

दस्रौ हठश्रीहरणादुदस्रौ
कन्दर्पमप्युज्झितरूपदर्पं ॥ ३४ ॥
अवैमि हंसावलयो वलक्षा
स्त्वत्कान्तिकीर्त्तेश्चपलाः पुलाकाः ।
उड्डीय युक्तं पतिताः स्रवन्ती
वेशन्तपूरं परितः प्लवन्ते ॥ ३५ ॥

धिस्राद्देदिति स्वापेक्षयाधिकशोभाशालिनं भवन्तं श्रुत्वा अश्विनी कुमारावपि दुःखिनौ भवत इत्यर्थः तथा शोभायशोभिर्जितशैवशैलं कन्दर्पमपि काममपि हठश्रीहरणात् उज्झितस्त्यक्तो रूपदर्पः सौन्दर्यगर्व्वो येन तादृशं करोषि यस्य चाहङ्कारिणः श्रीरन्येन बलाद्गृह्यते स विगताहङ्कारो भवति भवन्तमनुसृत्य कामः सौन्दर्यगर्व्वं परित्यक्तवानित्यर्थः चतुर्भ्योऽप्यधिकसुन्दरस्त्वमिति भावः ॥ ३४ ॥

अवैमीति ॥ हे सुन्दरोत्तम वलक्षा धवला हंसावलयो राजहंसपङ्क्तयस्त्वत्कान्तिकीर्त्तेस्तव शोभाकीर्त्तेश्चपलाश्चञ्चलाः प्रसरणशीलाः पुलाकास्तुच्छधान्यांशा इत्यहमवैमि जानामि पुलाकत्वं समर्थयति अतएव हंसावलय उड्डीय स्रवन्तीनां नदीनां वेशन्तानां पल्वलानाञ्च पूरं प्रवाहं परितः सर्व्वतः पतिताः सत्यो युक्तं उचितं प्लवन्ते तरन्ति पुलाकतुल्यत्वात्तासां प्लवनमुचितमेवेत्यर्थः पुलाका अप्यतिलघुत्वाद्वायुसम्पर्केणोड्डीय नद्यादौ पतिताः सत्यो गौरवाभावात् प्लवन्ते जगति त्वमेवैकः सुन्दर इति भावः । पूरं परित इति ह्रादियुक्तादिति द्वितीया । वलक्षो धवलोऽर्ज्जुन इति स्यात्पुलाकस्तुच्छधान्य इति स्रवन्ती निम्नगापगेति वेशन्तः पल्वलश्चाल्पसर इति चामरः ॥ ३५ ॥

Digitized by Google

भवत्पदाङ्गुष्ठमपि श्रिताश्री
र्ध्रुवं न लब्धा कुसुमायुधेन ।
जेतुस्तमेतत् खलु चिह्नमस्ति
मर्धेन्दुरास्ते नखवेशधारि ॥ २६ ॥
राजा द्विजानामनुमासभिन्नः
पूर्णां तनूकृत्य तनूं तपोभिः ।

भवदिति ॥ कुसुमायुधेन कामेन भवत्पदस्य तव चरणस्याङ्गुष्ठमङ्गुलिविशेषमपि श्रिता आश्रिता श्रीः शोभा न लब्धा न प्राप्ता ध्रुवमित्यहमुत्प्रेक्षे कथमेवं भावमित्यत आह खलु यस्मात् अस्मिन् भवत्पदाङ्गुष्ठे नखवेशधारि नखरूपधारि एतत् दृश्यमानं अर्धेन्दुरर्धचन्द्रः यस्तं कुसुमायुधं जेतुः शिवस्य चिह्नं आस्ते विद्यते स्वजेतृचिह्नं नखरूपमर्धेन्दुं दृष्ट्वा तन्निष्ठश्रियं ग्रहीतुं कामो न शशाकेत्यर्थः अन्योऽपि स्वजेतृचिह्नमन्यत्रापि दृष्ट्वा तद्गतां श्रियं हर्तुं भयान्न शक्नोति काम स्त्वत्पदाङ्गुष्ठसदृशोऽपि नेति भावः त्वत्पदाङ्गुष्ठः कामस्य जेता अर्धचन्द्राङ्कितत्वात् यथा शिव इत्यनुमानप्रमाणमूलेयमुत्प्रेक्षेत्यवधेयं ॥ २६ ॥

राजेति ॥ अनुमासं मासि मासि भिन्नः पुनरुत्पन्नत्वादन्य एव द्विजानां राजा चन्द्रस्तपोभिश्चान्द्रायणादिभिः पौर्णमासीरात्रौ पूर्णां तनुं शरीरं तनूकृत्य क्षीणीकृत्य कृष्णामावास्यारात्रिषु दृश्येतरतां अदृश्यत्वं एत्य प्राप्य स किं भवन्मुखस्य तव वदनस्य सायुज्यमैक्यं प्राप्नोति किमित्युत्प्रेक्षा वा चन्द्रो बहुजन्मसञ्चिततपःफलादेव तव मु

Digitized by Google

कुहूषु दृश्येतरतां किमेत्य
सायुज्यमाप्नोति भवन्मुखस्य ॥ ३७ ॥
कृत्वा दृशौ ते बहुवर्णचित्रे
किं कृष्णसारस्य तयोर्मृगस्य ।
अदूरजाग्रद्विदरप्रणाली
रेखामयच्छद्विधिरर्द्धचन्द्रं ॥ ३८ ॥

त्वत्वं प्राप्नोतीत्यर्थः चन्द्रवदनोऽसीति भावः अन्योऽपि द्विजानां ब्राह्मणानां राजा श्रेष्ठोऽन्त्येषु जन्मसु चान्द्रायणादितपोभिः शरीरं कृशीकृत्य दृश्येतरतां प्राप्य ब्रह्मसायुज्यलक्षणं मुक्तिविशेषं प्राप्नोति। क्वचिद्दृश्येतरतामिमेत्येति पाठः। द्विजराजः शशधर इत्यमरः ॥ ३७ ॥

कृत्वेति ॥ विधिर्ब्रह्मा ते तव दृशौ चक्षुषी बहुभिर्वर्णैः शुक्लकृष्णरक्तैश्चित्रे नानावर्णे आश्चर्यरूपे वा कृत्वा निर्माय कृष्णसारस्य कृष्णसाराख्यजातिविशेषस्य अथ च कृष्णः कृष्णवर्णः सारः श्रेष्ठो यस्य तादृशस्य मृगस्य तयोर्दृशोरदूरे निकटे जाग्रती स्फुरन्ती या विदररूपा नेत्राधोगर्त्तरूपा प्रणालीरेखा तन्मयेव अर्द्धचन्द्रं गलहस्तं किं अयच्छत् दत्तवान् नेयं मम नयनयोः समीपवर्त्तिनी विदरप्रणालीरेखा किन्तु सौन्दर्यविवेचकेन ब्रह्मणा भवन्नयनादस्मा भिर्बाधितयोर्दत्तो गलहस्त एवेत्यर्थः ममनयनाभ्यामपकृष्टे भव ज्ञयने इतिभावः। विदरः स्फुटनं भिदेत्यमरः ॥ ३८ ॥

मुग्धः समोहात् सुभगान्न देहा
ददद्भवद्भ्रूरचनाय चापं
भ्रूभङ्गजेयस्तव यन्मनोभू
रनेन रूपेण यदातदाभूत् ॥ २९ ॥
मृगस्य नेत्रद्वितयं त्वदास्ये
विधौ विधुत्वानुमितस्य दृश्यं ।

मुग्धइति ॥ स मनोभूः कामो मोहादज्ञानादेव मुग्धो मुग्धशब्दस्य द्व्यर्थत्वादर्थात् मूर्खः न पुनः सुभगात् सुन्दराद्देहाच्छरीराद्धेतोर्मुग्धः सुन्दरः यद्यस्मात् स मनोभूर्भवद्भ्रूरचनाय तव भ्रुवोर्निर्म्माणाय चापं निजधनुर्ददत् ब्रह्मणे प्रयच्छन् सन् अनेन दृश्यमानेन रूपेण सौन्दर्य्यहेतुना यदतदा सर्व्वदैव तव भ्रुवोर्भङ्गः कौटिल्यं तन्मात्रेणैव जेयो जेतुं योग्योऽभूत् यो हि निजायुधं शत्रवे ददाति स निरायुधत्वादनायासेनैव शत्रुणा जेतुं शक्यते तस्मात् कामो मूर्ख एवेत्यर्थः तव भ्रुवौ धनुराकारे कामोद्दीपके चेति भावः। मुग्धः सुन्दरमूढयोरिति विश्वः ॥ २९ ॥

मृगस्येति ॥ त्वदास्ये तव मुखरूपे विधौ पूर्णचन्द्रे विधुत्वेन साधनेनानुमितस्य तव मुखचन्द्रोऽयं मृगवान् चन्द्रत्वाद्यथा गगनचन्द्र इत्यनुमानगोचरीभूतस्य मृगस्य नेत्रद्वितयं चक्षुर्द्वयं दृश्यं दृश्यते एते त्वन्मुखचन्द्रनिमग्नमृगस्यैव चक्षुषी इत्यर्थः तथा तस्यैव मृगस्य त्वत्कचपाश एव तव केशसमूह एव वेण्याकारो यस्य तादृश एव दृश्यमानः पुच्छो वालधिः किम्भूतः पुच्छः स्फुरन् विलसन् चामरगुच्छो यस्य सः कार्य

तस्यैव च त्वत्कचपाशवेशः
पुच्छः स्फुरच्चामरगुच्छ एषः ॥ ४० ॥
आस्तामनङ्गीकरणाद्भवेन
दृश्यः स्मरो नेति पुराणवाणी ।
तवैव देहं श्रितया श्रियेति
नवस्तु वस्तु प्रतिभाति वादः ॥ ४१ ॥

तव केशपाशः किन्तु त्वन्मुखचन्द्रनिमग्नस्य मृगस्य निबद्धचामरगुच्छः पुच्छ एवेत्यर्थः मृगपुच्छे विलासिभिः कौतुकाच्चामरगुच्छो निबध्यते चामरपुच्छो मृगविशेषो वा बोद्धव्यः तव मुखं पूर्णचन्द्रसदृशं चन्द्रगो मृगचन्द्रस्त्वत्ये केशाश्च चामरसदृशा इति भावः ॥ ४० ॥

आस्तामिति ॥ भवेन महादेवेन अनङ्गीकरणाच्छरीरशून्यीकरणात् स्मरः कामो दृश्यो दर्शनगोचरो न इति पुराणानां प्राचीनानां वाणी पुराणा जीर्णा वाणी वा आस्तां तिष्ठतु नेदानीं पुरातनवाण्याः समादरोऽस्तीत्यर्थः तर्हि नवीना वाणी केत्याह तु पुनः शिवभक्तत्वात्तवैव देहं शरीरं श्रितया श्रिया लोकातीतया शोभया कर्त्या अनङ्गीकरणात् तपोभङ्गेन शिवापराधकारितया स्मरस्यास्वीकारात् दृश्यो नयनगोचरो न स्मरः सुन्दरो न इति नवो नूतनो वादो वचनं वस्तु सत्यभूतः प्रतिभाति स्फुरति कामो दग्धत्वाददृश्य एव जातः किन्तु त्वां प्राप्य सुखितया श्रियैवास्वीकाराददृश्यो जात इति वचनमेव नवीनं तथ्यमित्यर्थः साक्षात्कामदेव एवासीति भावः अनङ्गीकरणशब्दादृश्यशब्दयोः श्लिष्टत्वादीदृग्युक्तिः । दृश्यं दर्शनयोग्ये स्यात् सुन्दरे चाभिधेयवदिति विश्वः ॥ ४१ ॥

Digitized by Google

त्वया जगत्युञ्छितकान्तिसारे
यदिन्दुनाश्रीलि शिलोञ्छवृत्तिः ।
आरोपि तन्माणवकोऽपि मौलौ
स यज्वराज्येऽपि महेश्वरेण ॥ ४२ ॥
आदेहदाहं कुसुमायुधस्य
विधाय सौन्दर्य्यकथादरिद्रं ।

त्वयेति । त्वया उञ्छितो गृहीतः कान्तिसारः शोभाश्रेष्ठांशो यस्मात् यस्य वा तादृशे जगति भुवने इन्दुना चन्द्रेण शिलोञ्छवृत्तिः शिलोञ्छलभ्या जीविका यत् अश्रीलि हता ततस्माद्धेतोर्महेश्वरेण महादेवेन माणवकोऽपि बालोऽपि कलारूपोऽपीति यावत् सइन्दुर्मौलौ मस्तके आरोपि स्थापितः तथा यज्वनां याज्ञिकद्विजानां राज्येऽपि राजत्वेऽपि आरोपि अभिषिक्तः तस्मादेव द्विजराजोऽपि जातइत्यर्थः त्वया गृहीतात् कान्तिसारादवशिष्टं कान्तिभागं कथञ्चित् सञ्चेन्व्यार्थं मेलयता चन्द्रेण यच्छिलोञ्छजीविमुनिनेवाचरितं तस्मात् स कामामोऽपि सः परितुष्टेन भगवता शिवेन शिरसि धृतो ब्राह्मणानां मध्ये श्रेष्ठश्च कृतइत्यर्थः चन्द्रे त्वच्छोभालेशमात्रं विद्यतेऽतस्त्वत्तुल्यः सुन्दरो न कोऽप्यस्तीति भावः अन्योऽपि शिलोञ्छजीवी माणवकोऽप्यचिरोपनीतोऽपि महेश्वरेण महता राज्ञा मस्तके आरोप्यते नमस्क्रियते द्विजानां राजत्वे च स्थाप्यते अथ च माणवकोहारविशेषः कण्ठ एव धार्य्यते न तु मौलाविति श्लेषमूलोविरोधश्चात्र व्यङ्ग्यः ॥ ४२ ॥

आदेहेति ॥ कुसुमायुधस्य कामस्य आदेहदाहं शरीरभस्मीकरणमारभ्य जगत् सौन्दर्य्यकथायां दरिद्रं दीनं सुन्दरप्रस्तावरहितं

Digitized by Google

त्वदङ्गशिल्पात्पुनरीश्वरेण
चिरेण जाने जगदन्वकम्पि ॥ ४३॥
मही कृतार्था यदि मानवोऽसि
जितं दिवा यद्यमरेषु कोऽपि।
कुलं त्वयालङ्कृतमौरगञ्चे
न्नाधोऽपि कस्योपरि नागलोकः ॥ ४४॥

विधाय कृत्वा इदानीं त्वदङ्गस्य शिल्पात् निर्म्माणात् ईश्वरेण पुनरपि चिरेण बहुकालात्परं अन्वकम्पि कृपाविषयीकृतं इत्यहं जाने उत्प्रेक्षे कामदेहदाहानन्तरं जगति सौन्दर्य्यवार्त्तापि नासीत् अधुना तु कामस्थाने त्वदभिषेककरणात् पुनरपीश्वरेण तस्मिन् कृपा कृतेत्यर्थः कामवन्मनोज्ञोऽसीति भावः अन्योऽपीश्वरो राजा दारिद्र्यपीडितानां जनानां दयते ॥ ४३ ॥

महीति ॥ यदि त्वं मानवोऽसि कश्चन मनुष्योऽसि तर्हि मही पृथ्वी कृतार्था धन्या त्वयाधिष्ठितत्वात् अथ च कृतः सत्योऽर्थो मह्यते पूज्यते या सा महीति महीशब्दाभिधेयो यस्याः सा किम्वा यदि अमरेषु देवेषु मध्ये त्वं कोऽपि कश्चन देवोऽसि तर्हि दिवा स्वर्गेण जितं सर्व्वोत्कृष्टया भूतं पूर्व्वमिन्द्रादिदेवाद्याधारतया दिवो भूम्यादिजिगीषा स्थिता इदानीन्तु त्वदाधारतया जितमित्यर्थः किम्वा त्वया औरगं कुलं नागानां वंशश्चेद्यदि अलङ्कृतं कश्चन नागोऽसि तर्हि नागलोकः पातालं अधोऽपि अधोदेशे वर्त्तमानोऽपि कस्य लोकस्य उपरि ऊर्द्ध्वदेशे न अपि तु सर्व्वस्यापि उपरि वर्त्तते त्वदाधारो भूत्वा स्वर्ग मर्त्त्याभ्यामप्युत्कृष्ट इत्यर्थः देवोरगमनुष्येषु मध्ये कतमोऽसीति कथ्यता मिति भावः ॥ ४४ ॥

Digitized by Google

सेयं न धत्तेऽनुपपत्तिमुच्चै-
र्मच्चित्तवृत्तिस्त्वयि चिन्त्यमाने ।
ममौ स भद्रं चुलुके समुद्र-
स्त्वयात्तगाम्भीर्य्यमहत्त्वमुद्रः ॥ ४५ ॥
संसारसिन्धावनुबिम्बमत्र
जागर्त्ति जाने नव वैरसेनिः ।

सेयमिति ॥ अतिगम्भीरो महांश्च समुद्रः कथमगस्त्यपाणिपुटके परिमातीत्यतिमहतीमनुपपत्तिं या पूर्व्वं दधार सेयं मम चित्तवृत्तिस्त्वयि चिन्त्यमानेऽतिगाम्भीर्य्यत्वातिमहत्त्वेन च विचार्य्यमाणे सति उच्चैरतिमहतीं तामनुपपत्तिमसम्भवं इदानीं न धत्ते न धारयति यतस्त्वया आत्ते गृहीते गाम्भीर्य्यमहत्त्वे गम्भीरताविशालत्वे एव मुद्रा चिह्नं यस्य तादृशः सन् स समुद्रो भद्रमनायासेन चुलुके अगस्त्यस्य पाणिपुटके ममौ परिमातिस्म त्वया गृहीतगाम्भीर्य्यमहत्त्वस्य समुद्रस्य पाणिपुटके परिमाणे न काप्यनुपपत्तिरित्यर्थः त्वं समुद्रादप्यतिगम्भीरो महांश्चेति भावः ॥ ४५ ॥

संसारेति ॥ अत्रास्मिन् संसारसिन्धौ अनवधित्वात् संसाररूपे समुद्रे वैरसेनिर्नलस्त्वं अनुबिम्बं प्रतिबिम्बं जागर्त्ति स्फुरति इत्यहं जाने सम्भावयामि नलस्तव सदृश इत्यर्थः संसारस्य सिन्धुत्वेन रूपणं प्रतिबिम्बसम्भावनार्थं ननु नलेनाभेदं मम कथं नाङ्गीकरोषीत्यत आह हि यस्मात् बिम्बानुबिम्बौ बिम्बप्रतिबिम्बौ विहाय त्वया

बिम्बानुबिम्बौ हि विहाय धातु
र्न जातु दृष्टातिसरूपदृष्टिः ॥ ४६ ॥
इयत्कृतं केन महीजगत्या
मही महीयः सुकृतं जनेन ।
पादौ यमुद्दिश्य तवापि पद्या
रजःसु पद्मस्रजमारभेते ॥ ४७ ॥
ब्रवीति मे किं किमियं न जाने
सन्देहदोलामवलम्ब्य संवित् ।

धातुर्ब्रह्मणोऽतिसरूपयोरतिसमानसौन्दर्य्ययोः सृष्टिर्निर्म्माणं जातु कदाचिदपि न दृष्टा एकं वस्तु बिम्बं अपरं तत्प्रतिबिम्बं तत्सदृशं तत्त्वेकमेव वस्तुद्वयमिति विधातुः सृष्टिक्रमहृदयार्थः तत्प्रसादप्रसादेव मा मतितरां सुखयसीति भावः ॥ ४६ ॥

इयदिति ॥ महीजगत्यां भूलोके केन अनेन इयदिदं परिमाणं महीयोऽतिमहत्सुकृतं पुण्यं कृतं मही आश्चर्य्यं यं विहितवक्र तरपुण्यं जनं उद्दिश्य तव अतिसुकुमारस्यापि पादौ पद्यारजःसु मार्गधूलिषु पद्मस्रजं कमलमालां आरभेते रचयतः स्वर्गएव महापुण्यशालिनोवर्त्तन्ते भूलोके तु कएवंविधः पुण्यवान् यमुद्दिश्य त्वमपि कार्य्यार्थं पादचारी गच्छसि तं कथयेति भावः । चरणयोः पद्माङ्किवलात्तद्विन्यासचिह्नं पद्मतुल्यं तस्य चानेकत्वात् पद्ममालात्वं । सरणिः पद्धतिः पद्येत्यमरः ॥ ४७ ॥

ब्रवीतीति ॥ इयं मे मम संविद्बुद्धिरन्तःकरणमितियावत् सन्देहरूपां दोलां अवलम्ब्य आरुह्य संशयसहचारिणी भूत्वा किं किं

कस्यापि धन्यस्य गृहातिथिस्त्व
मलोकसम्भावनयाथवालं ॥ ४८ ॥
प्रागेव तावत् तव रूपसृष्टिं
निपीय दृष्टिर्जनुषः फलं मे ।
अपि श्रुती नामृतमाद्रियेतां
तयोः प्रसादीकुरुषे गिरश्चेत् ॥ ४९ ॥

अथवेति प्रकाशयतीति न जाने किं नलस्यासि यदन्यो वेत्यादिसंशय वशात् सत्यं किमिति निश्चेतुं न शक्नोमीत्यर्थः अथवा अलोकसम्भाव नया किं नलोऽसि मामुच्छिद्यागत इत्यादिनिरर्थकसम्भावनया अलं तादृशी सम्भावना न कर्तव्या अतस्त्वं कस्यापि धन्यस्य सौभा ग्यशालिनो जनस्य गृहेऽतिथिर्भविष्यसीत्यर्थात् त्वां पश्यन्त्या मम नानाविधः संशयो जायते स तु न कर्तव्यः मादृशां तदनुकूलसौभा ग्याभावादतस्त्वं कस्यापि लोकोत्तरभागधेयस्य गृहातिथिर्भविष्यसी त्येतदेव निश्चेयमित्यर्थः ॥ ४८ ॥

प्रागेवेति ॥ मे मम दृष्टिश्चक्षुस्तव रूपस्य सौन्दर्यस्य सृष्टिं कृद भिहितभावत्वात् विधात्रा सृष्टं तव सौन्दर्यं निपीय सादरमालोक्य जनुषो जन्मनः फलं साफल्यं तावत् प्रथमं प्रागेव त्वां विलोक्य मम चक्षुषोस्तृप्तिः केवलं जातेत्यर्थः सम्प्रति मम श्रुती अपि कर्णावपि अमृतं नाद्रियेतां न बहुमन्येतां चेद्यदि तयोः श्रुत्योः सम्बन्धे गिरः वचनं प्रसादीकुरुषे प्रसन्नो भूत्वा यदि किमपि वदसि तर्ह्यमृतपा नजन्यतृप्तेरप्यधिकां तृप्तिं मम कर्णौ लभेतामित्यर्थः उत्कण्ठितानां प्रश्नानामुत्तरं प्रयच्छेति भावः । जनुर्जननजन्मानीत्यमरः ॥ ४९ ॥

Digitized by Google

इत्थं मधूत्थं रसमुद्गिरन्ती
तदोष्ठबन्धूकधनुर्विसृष्टा।
कर्णात् प्रसूनाशुगपञ्चवाणी
वाणीमिषेणास्य मनोविवेश॥५०॥
अमज्जदामज्जमसौ सुधासु
प्रियं प्रियायावचनं निपीय।

एवं भैमीवचनमाकर्णयन् नलोऽतितरां कामवशगोऽभूदित्याह॥

इत्थमिति॥ प्रसूनाशुगस्य कामस्य पञ्चवाणी वाणपञ्चकं वाणीमिषेण भैमीवचनव्याजेन अस्य नलस्य कर्णात् कर्णं प्रविश्य मनोऽन्तःकरणं विवेश नेयं भैम्यावाणी नलस्य कर्णद्वारा मनः प्रविष्टा किन्तु कामस्य पञ्चवाणीत्यर्थः किम्भूता वाणी पञ्चवाणी च इत्थं पूर्वोक्तप्रकारेण मधूत्थं अमृतोद्भूतं रसं आस्वादं उद्गिरन्ती प्रकटयन्ती अथच कामस्य वाणाः पुष्पमयत्वात् मधूत्थं रसं पौष्पं रसं क्षरन्ती तथा तस्या भैम्या ओष्ठो बन्धूकधनुरिव सरागत्वात् कामोद्दीपकत्वाच्च बन्धूकपुष्पमय कामचापइव तत्तथा तस्माद्विसृष्टा विमुक्ता अथच तस्या ओष्ठएव बन्धूकधनुस्तस्माद्विसृष्टा। पञ्चवाणीति समाहारात् युगपन्मुक्तानां कामवाणानां युगपदन्तःप्रवेशे यथा कामव्यथा भवति तथा तद्वचन श्रवणेन नलस्य कामव्यथाभूदितिभावः। कर्णादिति यल्लोपे पञ्चमी॥५०॥

अतिहृष्टोऽपि बभूवेत्याह॥ अमज्जदिति॥ असौ नलः प्रियं मधुरं प्रियायाभैम्यावचनं स्वीयस्तुतिरूपं पूर्वोक्तं निपीय सादर

Digitized by Google

द्विषन्मुखेऽपि स्वदते स्तुतिर्या
तन्मिष्टता नेष्टमुखे प्रमेया ॥ ५१ ॥
पौरस्त्यशैलं जनतोपनीता
गृह्णन् यथाऽह्नः पतिरर्घपूजां ।
तथातिथेयीमथ सम्प्रतीच्छ-
न्नस्यावयस्यासनमाससाद ॥ ५२ ॥

माकण्ठं आमज्जं अस्थिवेधपर्य्यन्तं आकण्ठमितिपाठे कण्ठपर्य्यन्तं सुधासु अमृतेषु अमज्जत् मग्नोबभूव सर्व्वाङ्गीणानन्दमयोऽभूदित्यर्थः अत्र हेतुमाह या स्तुतिर्द्विषन्मुखेऽपि शत्रोर्मुखे विद्यमानापि स्वदते रोचते तस्याः स्तुतेर्मिष्टता स्वादुता प्रीतिजनकता इष्टस्य प्रियजनस्य मुखे प्रमेया परिमिता न भवति अपि तु बह्वेव भवतीत्यर्थः । आमज्जमिति अनव्ययीभावत्वात् समासान्तः तस्य तद्धितत्वात् अनीवद्धिताव्ययोक्तेति नपुंसक ॥ ५१ ॥

अथ भैम्यादत्तमपि निजासनं स्वस्य दौत्यात् परित्यज्य तत्सख्याः स्वासनमुपविशतिस्मेत्याह ॥ पौरस्त्येति ॥ अथानन्तरं सनलआतिथेयीं अतिथिषु साध्वीं पूजां भैमीकृतां प्रतीच्छन् स्वीकुर्व्वन् अस्या भैम्या वयस्यासनं सख्यासनं तथा आससाद भेजे यथा अह्नो दिवसस्य पतिः सूर्य्यो जनतया जनसमूहेन उपनीतां वितीर्णां अर्घं पूजां गृह्णन्नङ्गीकुर्व्वन् पौरस्त्यशैलं पुरः पूर्व्वा दिक् तत्र भवं शैलं उदयाचलं आसीदिति ॥ ५२ ॥

Digitized by Google

अयोधि तद्धैर्य्यमनोभवाभ्यां
तामेव भूमीमवलम्ब्य भैमीं ।
आप स्म यत्र स्मरचापमन्त
श्छिन्नं भ्रुवौ तज्जयभङ्गवार्त्तां ॥ ५२ ॥
अथ स्मराज्ञामवधीर्य्य धैर्य्यात्
दूचे स तद्वागुपवीणितोऽपि ।

तदानीं जातमपि कामविकारं नलः स्वधैर्य्येण निवारयामासेत्याह ॥ अयोधीति ॥ तस्य नलस्य धैर्य्यमनोभवाभ्यां धैर्य्यकामाभ्यां तां भैमीमेव भूमीं युद्धस्थानं अवलम्ब्य आश्रित्य अयोधि युद्धं कृतं तर्हि तयोर्म्मध्ये कस्य जयः कस्य वा पराजयोजात इत्याह यत्र भैमी लक्षणायां युद्धभूम्यां पतितं अन्तर्म्मध्ये छिन्नं भ्रुवौ भैम्याभ्रूयुगल लक्षणं स्मरचापं कामधनुः कर्त्तृ तयोर्धैर्य्यमनोभवयोर्जयभङ्गवार्त्तां जयपराजययोर्वृत्तान्तं आप स्म सूचयामास धैर्य्यस्य जयं कामस्य च पराजयं सूचयामासेत्यर्थः यस्य हि धनुर्म्मध्ये छिन्नं सत् युद्ध भूम्यां पतति तस्य पराजयोभवति अन्यस्य च जयोभवतीति लोक प्रसिद्धिः भैम्याभ्रुवोर्म्मध्ये किञ्चिद्व्यवधानवत्त्वात् उद्दीपकत्वाच्चैवमुक्तं भैम्यामुत्पन्नमपि कामं नलो धैर्य्येण निवारयामासेति भावः ॥ ५२ ॥

इत्थं धैर्य्येण कामविकारमपनीय नलस्तां प्रत्यूचे इत्याह ॥ अथेति ॥ अथानन्तरं स नलस्तस्याभैम्या वाचा वाणीरूपया वीणया उपवी णितोऽपि उपगीतः सन्नपि धैर्य्याद्धेतोः स्मरस्य कामस्य आज्ञां अव

विवेकधाराशतधौतमन्तः
सतां न कामः कलुषीकरोति ॥ ५४ ॥
हरित्पतीनां सदसः प्रतीहि
त्वदीयमेवातिथिमागतं मां ।
वहन्तमन्तर्गुरुणादरेण
प्राणानिव स्वःप्रभुवाचिकानि ॥ ५५ ॥

धैर्य्यं प्रवद्याय ऊचे भैमी प्रत्युवाच वीक्षयोपगायने चि कामाधीनत्वं भवति यस्य तु धैर्य्यं तत्र भातमित्यर्थः एतदेव कथमित्यत आह कामो विवेकधाराया विचारप्रवाहस्य शतेन धौतं क्षालितं सतां साधूनामन्तरन्तःकरणं न कलुषीकरोति न मलिनीकरोति तस्मा दुषितमेतदित्यर्थः अन्यदपि वस्तु क्षालितं सत् मलिनं न भवति ॥ ५४ ॥

इतः परं नलेन यदूचे तदेवानुवदति ॥ हरिदिति ॥ हे भैमि हरित्पतीनां दिक्पालानां इन्द्रादीनां सदसः सभात आगतं त्वदीयमेव अतिथिं मां प्रतीहि जानीहि किम्भूतं मां गुरुणा महता आदरेण प्राणानिव स्वःप्रभूणां स्वर्गस्वामिनामिन्द्रादीनां वाचिकानि सन्देशवचनानि अन्तर्हृदये वहन्तं धारयन्तं अहमिन्द्रादि दूतो भूत्वा त्वदर्थमेवात्रागत इत्यर्थः कुत आगतः कस्यातिथिरसीति प्रश्नोत्तरं दत्तं गुरुणादरेण प्राणानिवेति दूतधर्मो दर्शितः । दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताइत्यमरः ॥ ५५ ॥

Digitized by Google

विरम्यतां भूतवती सपर्य्या
निविश्यतामासनमुज्झितं किं।
या दूतता नः फलिनी विधेया
सैवातिथेयी पृथुरुद्भविची ॥ ५६ ॥
कल्याणि कल्यानि तवाङ्गकानि
कच्चित्तमां चित्तमनाविलं ते।

विरम्यतामिति ॥ हे दमयन्ति त्वया विरम्यतां अथयया भूयतां यतः सपर्य्या पूजा भूतवती जातैव मया पूजाजन्यफलं प्राप्तमेवेत्यर्थः निविश्यतामुपविश्यतां किं किमर्थं आसनं उज्झितं परित्यक्तं दूतस्य मम दर्शनमात्रेणासनपरित्यागेन कार्य्यमित्यर्थः नोऽस्माकं या दूतता फलिनी फलवती विधेया कर्त्तव्या सैव पृथुर्महती आतिथेयी अतिथिपूजा उत् उच्चैस्तरां भविची भविष्यति मदुपचारार्थसम्भ्रमेणालं यदर्थमागतोऽस्मि तदेव सफलयेत्यर्थः। पूजा नमस्यापचितिः सपर्य्यार्चार्हणाः समाइत्यमरः ॥ ५६ ॥

कल्याणीति ॥ हे कल्याणि मङ्गलालये भैमि तव अङ्गकानि कोमलान्यङ्गानि कल्यानि नीरोगाणि कच्चित्तमां अतिशयेन नीरोगाणि किं तथा ते तव चित्तं मनः कच्चित्तमामनाविलं अकलुषं प्रायेण न धावति विलम्बेनालं प्रस्तुतकार्य्यविरोधादेतावानेव कुशलप्रश्नोऽस्तु हे आकर्णतटायताक्षि कर्णान्तपर्य्यन्तविस्तृतलोचने मदीयां गिर

Digitized by Google

अलं विलम्बेन गिरं मदीया
माकर्णयाकर्णतटायताक्षि ॥ ५७ ॥
कौमारमारभ्य गणा गुणानां
हरन्ति ते दिक्षु धृताधिपत्यान् ।
सुराधिराजं सलिलाधिपञ्च
हुताशनञ्चार्य्यमनन्दनञ्च ॥ ५८ ॥
चरञ्चिरं शैशवयौवनीय
द्वैराज्यभाजि त्वयि रेदमेति ।

वच्यमाणवचनं आकर्णय शृणु । वार्त्तानिरामयः कल्य इत्यमरः ॥ ५७ ॥

प्रथमं त्रिभिः श्लोकैश्चतुर्णां साधारण्येन दूत्यं करोति ॥ कौमारमिति ॥ हे भैमि कौमारं बाल्यमारभ्य ते तव गुणानां सौन्दर्य्यादीनां गणाः समूहाः दिक्षु धृतमाधिपत्यं यैस्तान् दिक्पालान् हरन्ति सन्तोषयन्ति ननु दिक्पालाबहवस्तेषु कं कं हरन्तीत्यपेक्षायामाह सुराधिनाथमिन्द्रं सलिलाधिपञ्च वरुणं हुताशनमग्निं अर्य्यम्णः सूर्य्यस्य नन्दनं यमञ्च हरन्ति त्वत्सौन्दर्य्याद्याकर्षणेनेन्द्रादयश्चत्वारस्त्वय्यनुरक्ता जाता इति भावः ॥ ५८ ॥

चरदिति ॥ हे भैमि शैशवयौवनीयं बाल्यतारुण्यसम्बन्धि द्वैराज्यं सन्धिं भजत इति तथाभूतायां वयःसन्धौ वर्त्तमानायामित्यर्थः

Digitized by Google

तेषां हृतश्चौरतरेण चित्तं
पञ्चेषुणा लुण्ठितधैर्य्यवित्तं ॥ ५९ ॥
तेषामिदानीं किल केवलं सा
हृदि त्वदाशा विलसत्यजस्रं ।

त्वयि चिरं बहुकालावधि चरत् भ्रमत् अनुक्षणं चिन्ताविषयतां अनयत् तेषामिन्द्रादीनां चित्तं पञ्चेषुणा कामेन लुण्ठितमपहृतं धैर्य्यमेव वित्तं धनं यस्य तादृशं सत् खेदं त्वदप्राप्तिजन्यदुःखं इति प्राप्नोति किम्भूतेन पञ्चेषुणा तेषां हृदः कान्तेश्चौरतरेण अत्यन्तमपहारकेण विरहपीडितानां विवर्णत्वात् अन्योऽपि राजवर्त्मनि मार्गे भ्रमन् चौरतरेण केनचित् अनुर्धरेणापहृतधनो दुःखं प्राप्नोति बहुकालावधि त्वदासक्तचित्ततया गतधैर्य्या इन्द्रादयस्त्वामप्राप्य दुःखिनो भवन्तीत्यर्थः ॥ ५८ ॥

तेषामिति ॥ हे भैमि इदानीं तव यौवनदशायां तेषामिन्द्रादीनां हृदि केवलं सा त्वदाशा त्वत्प्राप्तितृष्णैव किल निश्चितं अजस्रं प्रति क्षणं विलसति स्फुरति केवलपदव्यवच्छेद्यमाह तु पुनस्तदारामहत्तो रथ च सुन्दरीस्तनूः शरीराणि आसाद्य गृहीता आत्मदारारक्षणीयत्वात् स्त्रीयाः स्त्रियः पूर्व्वादयश्चाशादिशः पूर्व्ववत् न विलसन्ति यथा पूर्व्वं पूर्व्वादिदिशः पालितवन्तस्तथेदानीं त्वय्येवासक्तचित्तत्वात् सुन्दरीरपि ताः न पालयन्तीत्यर्थः अतिसन्दर्थः पूर्व्वादि

आशास्तु नासाद्य तनूदरारा:
पूर्व्वादयः पूर्व्ववदात्मदाराः ॥ ६० ॥
अनेन सार्द्धं तव यौवनेन
कोटिं परामच्छिदुरोऽध्यरोहत् ।
प्रेमापि तन्वि त्वयि वासवस्य
गुणोऽपि चापे सुमनःशरस्य ॥ ६१ ॥

दिगधिष्ठातृदेवताविषयन्ते इन्द्रस्य तदाज्ञया वक्षेऽप्याशाम्बरत्वव
इति भावः। आशा तृष्णादिशोः स्त्रियामिति मेदिनी ॥ ६० ॥

एवं सामान्यतः सर्व्वेषां दूत्यं कृत्वा इन्द्रस्य मुख्यत्वात् प्रथमं तस्य
दूत्यं करोति ॥ अनेनेति ॥ हे तन्वि भैमि अनेन दृश्यमानेन तव यौवनेन
सार्द्धं सह अच्छिदुरोऽविच्छिन्नोऽसीमो निरवधिस्त्वद्विषये वासवस्य
इन्द्रस्य प्रेमापि अनुरागोऽपि परां परमां कोटिमुत्कर्षं अध्यरोहत्
प्राप यथा तव यौवनमुत्कर्षं प्राप्तं तथा वासवस्यानुरागोऽप्युत्कर्षं
तव यौवनप्रारम्भावधि इन्द्रस्त्वय्यनुरक्तोऽभवदिति भावः न केवल
मिन्द्रप्रेमैव किन्तु सुमनःशरस्य कामस्य अच्छिदुरोऽच्छेद्योऽसीमो
विस्तृतो गुणोऽपि मौर्व्व्यपि अनेन तव यौवनेन सार्द्धं चापे धनुषि
परां कोटिमटनिं अध्यरोहत् यथा तव यौवनमुत्कृष्टं भवति तथा
कामः स्वमौर्व्वीमपि धनुष्यारोप्य उत्कर्षवतोत्कर्षः तव यौवना
वधि इन्द्रः कामेन पीड्यत इतिभावः। कोटिरस्त्री च चापाग्रे संख्याभेद
प्रकर्षयोरिति मेदिनी ॥ ६१ ॥

Digitized by Google

प्राचीं प्रयाते विरहं दधत्ते
तापाच्च रूपाच्च शशाङ्कशङ्की ।
पराऽपराधैर्निदधाति भानौ
रुषारुणं लोचनवृन्दमिन्द्रः ॥ ६२ ॥
त्रिनेत्रमात्रेण रुषा कृतं य
त्तदेव योऽद्यापि न संवृणोति ।

प्राचीमिति ॥ ते तव विरहं दधत्कारयन्निन्द्रः प्राचीं,पूर्वां दिशं प्रयाते गते प्राच्यामुदिते भानौ सूर्ये तापादुत्तापजनकत्वाच्च रूपाच्च वर्त्तुलत्वाच्च हेतोः शशाङ्कशङ्की चन्द्रएवायमुदेतीति चन्द्रशङ्कां कुर्वन् सन् परस्य चन्द्रस्य अपराधैस्तथा कोपेनारुणं रक्तं लोचनवृन्दं नयनसमूहं तादृशे भानौ निदधाति निक्षिपति उदितमात्रं सूर्यं चन्द्रएवायमिति मन्यमानः सन् क्रोधरक्तैर्लोचनैस्तं पश्यतीत्यर्थः भ्रमस्य साधारणधर्मधीहेतुकत्वादत्र सूर्ये चन्द्रभ्रान्तौ उत्तापकत्वरक्तवर्त्तुलत्वं साधारणधर्मोदयं हेतुः चन्द्रत्वविरहादतितरामिन्द्रं तापयतीति भावः चद्वयमुभयप्राधान्यसूचकं ॥ ६२ ॥

त्रिनेत्रेति । त्रिनेत्रमात्रेण नेत्रत्रयमात्रवता शिवेन रुषा क्रोधेन यत् अनङ्गत्वं कृतं तदेव अनङ्गत्वमेव यस्मै यः कामोऽद्यापि एतावद्दिनपर्य्यन्तमपि न संवृणोति न वरीतुं शक्नोति न प्रतिकरोति स कामोऽद्य सहस्रनेत्रे नयनसहस्रशालिनि इन्द्रे रुष्टे क्रुद्धे सति खलु निश्चितं कां अवस्थां दशां गमिष्यति इत्यहं न वेद न जानामि

Digitized by Google

न वेद दृष्टेऽप्य सहस्रनेत्रे
गन्ता सकामः खलु कामवस्थां ‖ ६३ ‖
पिकस्य वाङ्मात्रकृताद्व्यलीका
न्न स प्रभुर्नन्दति नन्दनेऽपि ।
बालस्य चूडामणिनोऽपराधा
दाराधनं मीलति शूलिनोऽपि ‖ ६४ ‖

कामो न जानाति वा शिवस्यापि नेत्रस्य नेत्रत्रयेण यत् कृतं तदेवाद्यापि न प्रतिकर्तुं शक्तः इन्द्रः पुनः सहस्रनेत्रः अस्य नेत्रसहस्रैर्यत्कर्तव्यं तत् कथं प्रतिकरिष्यतीत्यर्थः कामस्तमतितरां पीडयतीतिभावः ‖ ६३ ‖

पिकस्येति । स प्रभुरिन्द्रः पिकस्य कोकिलस्य वाङ्मात्रेण वचनमात्रेण द्वारा कृतात् व्यलीकादप्रियाद्धेतोर्नन्दनेऽपि नन्दनवनेऽपि न नन्दति न सन्तुष्यति नन्दयतीति नन्दनमानन्दजनकस्वभावं तत्रापि न नन्दतीत्याश्चर्य्यं अन्योऽपि प्रभुर्वाङ्मात्रकृतादप्रियान्नन्दनेऽपि पुत्रेऽपि न नन्दति तथा बालस्य कलामात्रस्य न तु पूर्णस्य चूडामणेः शिरश्चन्द्रस्य अपराधाद्धेतोः शूलिनोऽपि सर्वपूज्यस्य शिवस्यापि आराधनं पूजां न मीलति न करोति पूर्वं प्रतिदिनं शिवपूजायै गतवान् इदानीं तच्छिरश्चन्द्रपीडाभयेन सर्वथानुष्ठेयां शिवपूजामपि परित्यक्तवानित्यर्थः अन्योऽपि स्वरिपुशिरोधृतात्कलया वैरेऽपि न शक्नुते अथ च वचनमात्रजनितमपि विप्रियं बालस्यापराधश्च महानितीत्यवीवास्य तच्छिरश्चन्द्रोऽध्यं जातमिति सूचितं कोकिलहतं चन्द्रकिरणस्याविवरामिमं पीडयतीति भावः ‖ ६४ ‖

Digitized by Google

तमोमयीकृत्य दिशः परागैः
स्मरेषवः शक्रदृशां सृजन्ति।
कुहूगिरं चञ्चुपुटं द्विजस्य
राकारजन्यामपि सत्यवाचं॥ ६५॥
शरैः प्रसूनैस्तुदतः स्मरस्य
स्मर्तुं स किं नाशनिना करोति।

तमोमयीति॥ स्मरेषवः पुष्पमयाः कामबाणाः परागैः रजोभि र्दिशस्तमोमयीकृत्य अन्धकारबहुलाः कृत्वा कुहू इति गीर्वचनं यस्य तादृशस्य द्विजस्य पक्षिणः कोकिलस्य चञ्चुपुटं चोञ्चपुटं शक्रदृशां इन्द्रस्य चक्षुषां सम्बन्धे राकारजन्यामपि पूर्णचन्द्रायां पूर्णिमारात्रावपि सत्या वाक् यस्य तादृशं सृजन्ति कुर्व्वन्ति पुष्पमयकामबाणरजोभिर्दिशामन्धकारबहुलतया किमपि अदृष्टमण्डलात् पूर्णिमारात्रिममावास्यारात्रिरियमिति मन्यमानइन्द्रः स्वाभाविककुहूइतिशब्दं कुर्व्वन्तं कोकिलं अद्य सत्यमेव कुहूःनष्टेन्दुकलामावस्या इति बुद्ध्वा सत्यवादिनं मन्यतइत्यर्थः इन्द्रस्त्वद्दिदृक्षात् कामान्धो जातइति भावः अन्योऽपि वाक्सिद्धोद्विजोब्राह्मणः पूर्णिमायामद्य अमावस्येति वदन्नपि सत्यवाग्भवति। पूर्णे राका निशाकर इत्यमरः कुहूः स्यात् कोकिलालापे नष्टेन्दुकलयोरपीति विश्वः ॥ ६५॥

शरैरिति॥ सइन्द्रः प्रसूनैः पुष्पमयैरपि शरैर्वाणैस्तुदतो व्यथयतः स्मरस्य कामस्य स्मर्तुं कामं स्मरणमात्रावशेषितं कर्त्तुं अशनिना वज्रेण किं न करोति किं न कुर्य्यात् अपितु वज्रेणैव मार

अभेद्यमस्याचच वर्म्म न स्या
दनङ्गता चेद्गिरिशप्रसादः ॥ ६६ ॥
धृताधृतेस्तस्य भवद्वियोगा
न्नानार्द्रशय्यारचनाय लूनैः ।
अप्यन्यदारिद्र्यहराः प्रवालै
र्जाताद्दरिद्रास्तरवोऽमराणां ॥ ६७ ॥

चेदित्यर्थः अचच चेदे चेयदि गिरिशस्य शिवस्य प्रसादोऽस्य कामस्य अनङ्गताङ्गर्पं अभेद्यं भेत्तुमशक्यं वर्म्म कवचं न स्यात् अङ्गस्यैवप्रहार सम्भवात् यद्यङ्गं स्यात्तदातिशुद्धहृद्रोवशेन प्रहृत्य तं मारये दित्यर्थः शिवेनकृतोऽस्यानङ्गत्वरूपोऽविग्रहोऽस्यानुग्रहएव जातः यतो दृष्टुमशक्यत्वात् वज्रप्रहारेण मारयितुं न शक्यते तदिरहात् काम एवमपराध्यति यथामारणार्हो भवतीति भावः मारस्येति सूत्यर्थस्य चेति कर्म्मणि षष्ठी ॥ ६६ ॥

धृतेति ॥ अमराणां देवानां तरवः कल्पवृक्षादयो ऽन्येषां दा रिद्र्यहरा अपि दारिद्र्यनाशकाः सन्तोऽपि भवत्याविरहोगादिच्छेदा धृता अधृतिरधैर्य्यं येन तादृशस्य तस्येन्द्रस्य नाना प्रतिक्षणं नूतना नूतना या आर्द्राः कोमलाः शय्यास्तासां रचनाय निर्म्माणाय लूनै श्छिन्नैः प्रवालैर्नवकिसलयैर्दरिद्राजाताः पल्लवरहिताजाताइत्यर्थः अन्यदारिद्र्यहराणां दारिद्र्यमाश्चर्य्यं तदिरहादिन्द्रस्यातितरां काम ज्वरोजातइति भावः नानाइत्यत्र अन्यान्येति क्वचित् पाठः अन्या अन्याभिन्नाःभिन्नाः प्रतिक्षणं नूतना याः शय्यास्तासां रचनायेत्यर्थः ॥ ६७ ॥

Digitized by Google

रवैर्गुणास्फालभवैः स्मरस्य
स्वर्नायकर्णौ बधिरावभूतां।
गुरोः शृणोतु स्मरमोहनिद्रा
प्रबोधदक्षाणि किमक्षराणि॥ ९८॥
अनङ्गतापप्रशमाय तस्य
कदर्थ्यमाना मुहुरामृणालं।

रवैरिति॥ स्वर्नायकस्य इन्द्रस्य कर्णौ स्मरस्य कामस्य गुणास्फालभवैर्मौर्व्याकर्षणजनितै रवैष्टङ्कारैर्बधिरौ श्रवणाक्षमौ अभूतां जातौ अतएव इन्द्रः स्मरस्य मोहः कामजनिता मूर्च्छा स एव निद्रा तस्याः सकाशात् प्रबोधो जागरणं तत्र दक्षाणि निपुणानि कामस्यानिवारणक्षमाण्यपि गुरोर्बृहस्पतेरक्षराणि उपदेशवचनानि किं कथं शृणोतु अपितु बधिरत्वाच्छ्रोतुं न शक्नोतीत्यर्थः गुरोर्वचनं हि कामव्यथानिवृत्तौ न स्वरूपसत्कारणं किन्तु श्रूयमाणं सदेवेति यद्यपि कामव्यथानिवारणक्षमे बृहस्पतिवचने इन्द्रस्य कामव्यथोपशमाभावे न व्यभिचार इत्यर्थः प्रबलकामव्यथतया इन्द्रो बृहस्पतेरप्युपदेशवचनं न शृणोतीति भावः॥ ९८॥

अनङ्गेति॥ तस्येन्द्रस्य अनङ्गतापप्रशमाय कामजनितसन्तापप्रशान्तये मया मया प्रतिवसन्तं आमृणालं पुष्पादारभ्य मृणालपर्य्यन्तं मुहुर्वारं वारं कदर्थ्यमानाः पीड्यमानाः समुत्पाद्यमाना नाकनन्दन श्रियः [illegible] लिप्सिरे अतो अनुरागं प्रमोदं वहन्त्यां

Digitized by Google

मधौ मधौ नाकनदीनलिन्यो
वरं वहन्तां शिशिरेऽनुरागं ॥ ९८ ॥
दमस्वसः सेयमुपैति तृष्णा
जिष्णोर्दृगत्यग्रिमलेख्यलक्ष्मीं ।

धारयन्तु नतु वसन्ते शिशिरर्त्तौ हिमेन पद्मिन्याः केवलं पत्रपुष्प मात्रं नश्यति मृणालन्तवशिष्यते वसन्तर्त्तौ तु तस्य कामसन्ताप शान्त्यर्थं मृणालानामप्युन्मूलनेन कालान्तरेऽप्युत्पत्त्यसम्भवाद्दृति वरं कदर्थनं शावमित्यर्थः वसन्ते कामपीडा भूयसीति भावः ॥ ९८ ॥

दमस्वसरिति ॥ हे दमस्वसर्दमयन्ति सेयमतिप्रसिद्धा जिष्णो रिन्द्रस्य तृष्णा लोभोगजाति जगत्त्रयमध्ये अग्रिमलेख्यस्य आदिम गणनीयस्य लक्ष्मीं शोभां उपैति प्राप्नोति लोभप्रस्तावे प्रथमगि ल्लोभएव गणनीयइत्यर्थः यस्मात् दृशां चक्षुषां शक्तिमात्र समुद्रोऽपि सहस्रनयनः सन्नपि यस्य इन्द्रस्य दृष्टेश्चक्षुषश्शोभा गस्य तृतीयांशस्य कटाक्षस्य लोलोभोऽभिलाषस्तन्व्यामर्त्ति पीडां बिभर्त्ति धारयति सहस्रमपि यस्य बहुषु नेत्रेषु त्वदीयनेत्रतृतीयां शमपि लब्धुं वाञ्छतीत्यतिवरामिन्द्रो लुब्ध इति भावः इन्द्र एव कटाक्षं प्रार्थयते इति तात्पर्यार्थः तामशब्दोऽप्यर्थे । अपयुक्तत्वाश्यपादौ तु मात्र कुर्याद्दिमे दिने त्रिभागहीनं पादं वा त्रिभागं त्वर्द्धमेव वे त्यत्र त्रिभागस्य तृतीयांशार्थवत्त्वात्तदर्थे बोधः एवम् त्रितियी

इमां यदब्धिस्तव नाम हृष्टि
त्रिभागशेषाभाक्तिमसौ बिभर्त्ति॥ ७०॥
अग्न्याहितानित्यमुपासते या
देदीप्यमानां तनुमस्मर्मूर्त्तेः।
आशापतिस्ते दमयन्ति सोऽपि
स्मरेण दासीभवितुं न्यदेशि॥ ७१॥
त्वद्गोचरस्तं खलु पञ्चबाणः
करोति सन्ताप्य तया विनीतं।

चासौ भागश्चेति कर्म्मधारयः तृतीयोभागस्त्रिभाग इति शाकपार्थि
वादित्वात् कर्म्मधारयइत्यन्ये॥ ७०॥

अथ वह्निर्दूत्यं करोति। अग्न्याहितेति॥ हे दमयन्ति अग्न्याहि
ता आहिताग्नयोद्विजादेदीप्यमानामतिदीप्तां अस्मर्मूर्त्तेः स्मरहरस्य
यां अग्निरूपां तनुं नित्यं प्रतिदिनं उपासते सेवन्ते सोऽपि स्मरह
रतनुरूपोऽपि आशापतिर्दिक्पालोऽग्निः स्मरेण कामेन ते तव दा
सीभवितुं न्यदेशि त्वं भैम्या दासोभवेत्याज्ञप्तः अग्निः कामवशीभूतः
सन् तव दासत्वमिच्छतीति भावः स्मरहरमूर्त्तित्वात् स्वयमेव स्मरस्य
दग्धत्वाच्च सत्यपि स्मरवैरित्वे स्मराज्ञाकारित्वमाश्चर्य्यमित्यपिका
रेण ध्वनितं अपिरिच्छायेत्वया समुच्चये इति केचित्। अग्न्याहिता
इति आहितोऽग्निर्यैरिति बहुव्रीहिः आहितादिर्वाग्न्यादेरिति
आहितस्य पाक्षिकः परनिपातः॥ ७१॥

त्वद्गोचर इति॥ त्वमेवैकस्त्वमेव गोचरोविषयउद्देश्यो यस्य तादृशः
पञ्चबाणः काममस्मग्निं सन्ताप्य सम्यक् तापयित्वा तया विनीतं शिक्षितं

Digitized by Google

स्वयं यथास्वादिततप्तभूयः
परं न सन्तापयिता स भूयः ॥ ७२ ॥

अदाहि यस्तेन दृशार्द्रबाणः
पुरा पुरारेर्नयनालयेन ।
स निर्दहंस्तं भवदक्षिवासी
न वैरशुद्धेरधुनाधमर्णः ॥ ७३ ॥

करोति यथा सोऽग्निः स्वयं आस्वादितमनुभूतं तप्तभूयं तप्तत्वं येन तादृशः सन् भूयः पुनः परमन्यं न सन्तापयिता न सन्तापयिष्यति अहो तप्तानामीदृग्दुःखं इतःप्रभृति नाहं कमपि सन्तापयिष्यामीति बुद्धिशाली यथा भवति तथा कामेन क्रियतेव इत्यर्थः कामस्त्वद्विरहादग्निमतितरां तापयतीति भावः ॥ ७२ ॥

अदाहीति ॥ पुरारेः शिवस्य नयनं ललाटचक्षुरालयमाश्रयो यस्य तादृशेन सता तेनाग्निना पुरा पूर्वं यो दृशार्द्रबाणः पञ्चशरोऽदाहि दग्धः स पञ्चबाणः कटाक्षविक्षेपमात्रजन्यत्वात् भवत्यास्तव अक्षिवासी नेत्रालयः सन् अधुना इदानीं तं निजदाहकं अग्निं निर्दहन्नतितरां तापयन् वैरशुद्धेर्वैरनिर्यातनस्य अधमर्णः ऋणी न भवति अन्यनयनालयस्यात्मदाहकस्यान्यनयनालयेनात्मनैव दाहादेः प्रतीकारः कृत इत्यर्थः पुरुषमाश्रित्य दाहकात् स्त्रियमाश्रित्य दाहकस्य प्राधान्यात् कामस्य महाप्रभावः सूचितः तव कटाक्षमभिव समग्निरत्यन्तं कामव्यथामनुभवतीति भावः ॥ ७३ ॥

Digitized by Google

सोमाय कुप्यन्निव विप्रयुक्तः
स सोममाचामति हूयमानं।
नामापि जागर्त्ति हि यत्र शत्रो
स्तेजस्विनस्तं कतमे सहन्ते॥ ७४॥

सोमायेति॥ विप्रयुक्तोवियोगी अथ च विप्रैर्ब्राह्मणैर्युक्तः सोऽग्निः सोमाय सोमं चन्द्रं मनसिकृत्य कुप्यन्निव सोमलतारसं प्रति क्रोधयुक्त इव हूयमानं सोमयागादौ होतृभिः प्रक्षिप्यमाणं सोमं सोमाख्यलताविशेषरसं आचामति पिबति सोमलतारसं दृष्ट्वा नामसाम्येन संस्काराद्बोधात् चन्द्रं मनसिकृत्य तदीयोद्दीपकतामनुसृत्य च सोमलतारसाय क्रुध्यन्निव तं पिबतीत्यर्थः नन्वेकस्य सोमस्यापराधेनान्यस्मै सोमाय कथं क्रुद्ध इत्याशङ्क्यार्थान्तरन्यासेनाघनयति हि यस्मात् यत्र यदार्थे शत्रोर्नामापि जागर्त्ति वाचकतया स्फुरति तं कतमे के तेजस्विनः सहन्ते सोढुं शक्नुवन्ति अपितु न केऽपि स्ववैरिचन्द्रस्य सोमेतिनाम्नोलताविशेषेऽपि सम्भवात् तेजस्विना अग्निना सोढुमशक्यतया तस्मै क्रुद्ध इत्यर्थः अग्निस्वविरहपीडित तया यज्ञे देवानामुपादेयमपि सोमरसं दुष्टचित्ततया न पिबतीति भावः। सोमायेति यदभिप्रेत्य धात्वर्थइति संप्रदानसंज्ञायां चतुर्थी। क्रुध्यन्नित्यस्य योगे क्रुधद्रुहेर्ष्येत्यादिना संप्रदानसंज्ञया चतुर्थीं कृत्वा व्याचक्षाणानामितरेषां व्याख्यानमसङ्गततयास्माभिरुपेक्षितं। सोमस्तु हिमदीधितौ। वानरे च कुवेरे च पितृदेवे समीरणे। वसुप्रभेदे कर्पूरे नीरे सोमलतौषधाविति मेदिनी ॥ ७४॥

Digitized by Google

शरैरजस्रं कुसुमायुधस्य
कदर्थ्यमानस्तव कारणाय ।
अभ्यर्चयद्भिर्विनिवेद्यमाना
दृष्येष मन्ये कुसुमाद्बिभेति ॥ ७५ ॥
स्मरेन्धने वक्षसि तेन दत्ता
सम्बर्त्तिका शैवलवल्लिचित्रा ।

शरेति ॥ तव कारणाय तदर्थं कुसुमायुधस्य कामस्य शरैः पुष्पमयैर्बाणैरजस्रं कदर्थ्यमानः पीड्यमान एषोऽस्मिरभ्यर्चयद्भिः पूजकैर्जनैर्निवेद्यमानाद्दीयमानादपि कुसुमाद्बिभेति कामशरबुद्ध्या त्रस्यतीत्यहं मन्ये सम्भावयामि अतितरां कामव्यथामनुभवतीति भावः तव कारणायेत्यत्र तवकृते तदर्थे इति क्वचित् पाठः तवश्रीति सम्बोधनं ॥ ७५ ॥

स्मरेन्धन इति । तेनाग्निना स्मरस्य कामानलस्य इन्धने दह्यमानत्वात्काष्ठभूते वक्षसि निजहृदये दत्ता निहिता शैवलवल्ल्या शैवालतया चित्रा चित्रीकृता आश्चर्यरूपा वा सम्बर्त्तिका पद्मनवदलं चेतोभवपावकस्य मदनानलस्य धूमाविला धूममिश्रिता कीलपरम्परेव ज्वालाश्रेणीव यथाक्षि शोभते कामानलजनितसन्तापशान्त्यर्थं हृदये शैवालयुतनवकमलदलं निहितं तत्र शैवालस्य श्यामत्वात् नवकमलदलस्य पाटलत्वात् तत् कामानलस्य धूमाविलकीलते

Digitized by Google

चकास्ति चेतोभवपावकस्य
धूमाविला कीलपरम्परेव ॥ ७६ ॥
पुत्री सुहृद्येन सरोरुहाणां
यत्प्रेयसी चन्दनवासिता दिक् ।
धैर्य्यं विभुः सोऽपि तवैव हेतोः
स्मरप्रतापज्वलने जुहाव ॥ ७७ ॥
तं दह्यमानैरपि मन्मथैधं
यस्तैरुपास्ते मलयः प्रवालैः ।

नोत्प्रेक्षितं पूर्व्वंएव भावः । सम्पत्तिका नवदलमित्यमरः कीलेऽर्चिषो ज्वालकोलाविति च ॥ ७६ ॥

अथ यमस्य दूत्यं करोति ॥ पुत्रीति ॥ सरोरुहाणां पद्मानां सुहृत् प्रकाशकारित्वान्मित्रं सूर्य्योयेन विभुना पुत्रो प्रशस्तपुत्रवान् यत्प्रा चन्दनेन वासिता सुरभीकृता दक्षिणा दिक् यस्य विभोः प्रेयसी प्रियतमा सोऽपि विभुः प्रभुर्यमस्तवैव हेतोः स्मरस्य कामस्य प्रतापज्वलने प्रतापानले धैर्य्यं जुहाव हुतवान् त्वद्विरहात्तनोऽप्यधैर्य्योजात इत्यर्थः पितृमित्रत्वात्कीलनानि कमलानि प्रियासम्बन्धित्वात् चन्दनानि च यस्याप्यायत्तानि सन्ति तथापि त्वद्विरहजनितसन्तापस्यात्यन्तिकतयाऽनिवार्य्यत्वादधैर्य्योजातइत्यभिप्रायेण ध्वनितं इन्द्राग्न्योः समुच्चायकोऽत्रापिकार इत्यन्ये। तवैव हेतोरिति हेतुयुक्तात् हेतोरिति षष्ठी ॥ ७७ ॥

तमिति ॥ मलयोदक्षिणदिग्वर्त्ती पर्व्वतविशेषोमन्मथैधं दह्यमानत्वात् कामानलस्य काष्ठभूतं तं यमं दह्यमानैरपि अतिमसृणदग्धसम्य

कृच्छ्रेऽप्यसौ नोज्झति तस्य सेवां।
सदा यदाशामवलम्बते यः॥ ७८॥
स्मरस्य कीर्त्येव सितीकृतानि
तद्दोःप्रतापैरिव तापितानि।

कथं आपदादिभिरपि मवाधिनैव किमस्मयमर्थीदैसैरयाम्मे सेवते अन्यो ऽपि सेवकोऽस्मदर्थी सेवते उचितमेतदित्यर्थान्तरं न्यस्यति योजको यदाशां अयमस्थिनीं तृष्णां सदा अवलम्बते धारयति योऽयदधीन जीविकोभवति अथच यस्य आशां दिशं अवलम्बते आश्रित्य वसति असौ जनः कृच्छ्रेऽपि सेवया उत्पद्यमाने कष्टेऽपि तस्य सेवां न उज्झति न त्यजति कष्टमङ्गीकृत्यापि तस्य सेवां करोतीत्यर्थः मनबोऽपि यस्य आशां दिशं अवलम्बते अवदाक्ष उचितमेव तथा सेवनं आशाशब्दस्य श्लिष्टत्वादेवमर्थान्तरमुपन्यस्तं यमस्मदिरहजनितसन्तापशान्त्यर्थं तव प्रश्वास् शरीरे निक्षिपति तेऽपि सन्तापाधिक्यात् भयात् दग्धत्वां वान्तीति भावः। आशा ककुभि तृष्णायामिति हेमचन्द्रः॥७८॥

स्मरस्येति॥ स दमोभवद्वियोगात् तव विरहाद्धेतोः पाण्डुनि पाण्डुवर्णानि शत्रुज्वरेण प्रतिवीरकामज्वरेण मर्मरणानि विशी र्णानि च अङ्गानि धत्ते धारयति पाण्डुत्वे मर्मरत्वे च यथाक्रममुत्प्रेक्ष्य ते किंभूतानि स्मरस्य कीर्त्या यशसा सितानीव श्वेतीकृतानीव तस्य

अङ्गानि धत्ते त्वदभावद्वियोगात्
पाण्डूनि चण्डज्वरजर्ज्जराणि ॥ ७९ ॥
यस्तन्वि भर्त्ता घुसृणेन सायं
दिशः समालम्भनकौतुकिन्याः ।
तदा सचेतः प्रणिधाय तुभ्यं
यदा गतो नैति निवृत्य पान्थः ॥ ८० ॥
तथा न तापाय पयोनिधीनां
मध्यामुखोत्थः क्षुधितः शिखावान् ।

कामस्य दोषोभुजस्य प्रतापैस्तापितानीव तापित्वं हि जर्जरं भवति कामस्त्वमतितरां पीडयतीति भावः ॥ ७९ ॥

अथ वरुणस्य दूत्यं करोति ॥ यइति ॥ हे तन्वि त्वमाकर्णय भैमि सायं सायाह्ने घुसृणेन कुङ्कुमसदृशसन्ध्यारागेण कृत्वा यत् समालम्भनं विलेपनं तत्र विषये कौतुकिन्याः कुतूहलवत्या दिशः प्रतीच्या योभर्त्ता स्वामी वरुणः स तदा तस्मिन् समये भाद्रपदमासादौ तुभ्यं त्वामुद्दिश्य चेतः स्वीयं मनः प्रणिधाय प्राणिधानात् यदा यस्मिन् समये गतो गृहात् प्रस्थितः पान्थः पथिको निवृत्य परावृत्य नैति न पुनर्गृहमागच्छति तस्य चित्तं त्वय्येवानुरक्तीभूय नान्यत्र गच्छतीत्यर्थः वरुणोऽपि त्वामभिलषतीति भावः । सिंहे धनुषि मीने च योगतो गत एव स इत्यादि ज्योतिषं । प्रणिधायेति द्विमीतेर्णिङ्ग्ल् दिवमि हे वावनति हेरिति चस्य घत्वं । रक्तसंकल्पु कुङ्कुमं । मगुडं दीपनं घत्वं सौरभं घुसृणं तदिति विकाण्डशेषः ॥ ८० ॥

तथेति ॥ ततः स्मरदाहेन कामजनितसन्तापेन दुःस्थो दुःखितः अतो वारीणि जलानि पाति रक्षतीति तथाविधोऽपि जलरक्षको

Digitized by Google

निजः पतिः सम्प्रति वारिपोऽपि
यथा हृदिस्थः स्मरतापदुस्थः ॥ ८१ ॥
यत्प्रत्युत त्वन्मृदुबाहुवल्ली
स्मृतिस्रजं गुम्फति दुर्व्विनीता ।

ऽपि हृदिस्थः स्मरचागोचरोऽथच अभ्यन्तरे वर्त्तमानो निजः स्वीयः पतिर्व्वरुणः संप्रति त्वद्विषयविरहदशायां यथा पयोनिधीनां समुद्राणां तापाय भवति तथा क्षुधितो दाहोऽन्नपानाद्यभावाद् भुक्षितो हृदिस्थो मध्ये विद्यमानत्वादतिसन्निहितो वारि पिवतीति वारिपोऽपि पयोमुखोत्थो वडवामुखोत्थितः शिखावान् अग्निर्वा डवानलः पयोनिधीनां तापाय न भवति वारिपत्वेन हृदिस्थत्वेन च साम्येऽपि स्मरदाहदुःखत्वाभावात्र तथा वाडवानलस्य तापका रित्वमित्यर्थः त्वद्विरहानलदुःखिनं स्वप्रभुं वरुणं दृष्ट्वापि समुद्रा दुःखिनोभवन्तीत्येतावतापि त्वद्विरहात् कामेनातितरां पीड्यत इति भावः अन्येऽपि प्रभुदुःखं दृष्ट्वा दुःखिनोभवन्ति वाडवानलापेक्षया कामानलोऽधिक इति व्यतिरेकोऽप्युक्तः ॥ ८१ ॥

यदिति ॥ भैम्यं शीतलत्वमेव सुखोपायत्वात्कादम्बी अतएव तेन वल्कलेन स्थिता सन्तापशान्त्यर्थं शरीरे निक्षिप्ता मृणाली अस्य अभिनवं मृणालं यद्यस्मात् त्वन्मृदुबाहुवल्ल्याश्च कोमलभुजलता याः स्मृतिस्रजं गुम्फति मृदुलत्वसाधर्म्यज्ञानेन संस्कारो द्बोधनात् स्मरणपरम्परां जनयति तवतस्मात् प्रत्युत वैपरीत्येन

ततान विधत्तेऽधिकमेव तापं
तेन श्रिता शैत्यगुणा मृणाली ॥ ८२ ॥
न्यस्तं ततस्तेन मृणालदण्ड
खण्डं बभासे हृदि तापभाजि ।
तच्चित्तमर्म्मैर्म्मदनस्य बाणैः
कृतं प्रतच्छिद्रमिव क्षणेन ॥ ८३ ॥

अधिकमेव तापं विधत्ते करोति अतएव दुर्व्विनीता विनयरहिता दुष्टा सन्तापशान्त्यर्थमाश्रितस्य शीतलवस्तुनः सन्तापकारित्वमेव वैपरीत्यं तच्चाप्याधिक्यमित्यतीवात्याद्दुर्व्विनीतत्वं अन्योऽपि दुर्व्विनीतो यदर्थमाश्रीयते तद्विपरीतमेव करोति तापशान्तिर्दूरे तिष्ठतु प्रत्युत सद्गुणतया तत्कोमलभुजलतायाः स्मारकत्वात् मृणाली तमधिकतरां पीडयतीति भावः ॥ ८२ ॥

न्यस्तमिति ॥ यतस्तद्भुजलतास्मारकतया तापकरीं संपूर्णमृणालीं धारयितुं न शक्नोति ततस्तस्मात् पूर्णोक्तात् संपूर्णमृणालीधारणाशक्तत्वाद्धेतोस्तेन नलेन तापभाजि विरहानलसन्तापिते हृदि वक्षसि न्यस्तं निक्षिप्तं मृणालदण्डस्य खण्डं बभासे शुशुभे अत्रोत्प्रेक्षते किम्भूतमिव तस्य नलस्य चित्ते मर्म्मभिर्मदनस्य कामस्य बाणैः क्षणेन विन्यासक्षण एव प्रतच्छिद्रं बहुरन्ध्रं कृतमिव मृणालखण्डस्य स्वाभाविकमपि बहुच्छिद्रत्वं कामबाणकृतत्वेनोत्प्रेक्षितं कामबाणैर्व्वक्षो जर्ज्जरीकृत इति भावः ॥ ८३ ॥

Digitized by Google

इति त्रिलोकीतिलकेषु तेषु
मनोभुवो विक्रमकामचारः ।
अमोघमस्त्रं भवतीमवाप्य
मदान्धतानर्गलचापलस्य ॥ ८४ ॥
सारोत्थधारेव सुधारसस्य
स्वयम्बरः श्वोभविता तवेति ।
सन्तर्पयन्ती दमयन्ति तेषां
श्रुतिः श्रुती नाकसदामयासीत् ॥ ८५ ॥

इत्थमेकैकस्य दूत्यं कृत्वा पुनरपि युगपत् सकलानां दूत्यं करोति ॥ इतीति ॥ हे भैमि भवतीं त्वामेव अमोघं अव्यर्थमस्त्रं अवाप्य प्राप्य मदान्धतया गर्व्वान्धत्वेन अनर्गलं निष्प्रतिबन्धं उच्छृङ्खलं चापलं चौद्धत्यं यस्य तादृशस्य मनोभुवः कामस्य तेषु त्रिलोकीतिलकेषु त्रिभुवनालङ्कारभूतेषु इन्द्रादिषु इति पूर्व्वोक्तप्रकारो विक्रमस्य पराक्रमस्य कामचारः स्वेच्छाचारोवर्त्तत इति शेषः तदर्थमेव ते कामेन पूर्व्वोक्तरीत्या पीड्यन्त इति भावः अवाप्य स्थितस्येति योज्यं ॥ ८४ ॥

सारोत्थेति ॥ हे दमयन्ति श्वोभाविनि दिने तव स्वयम्बरो भविता इति श्रुतिः प्रसिद्धिर्वार्त्ता तेषां नाकसदां देवानामिन्द्रादीनां श्रुती कर्णौ अयासीत् प्राप्तवती किम्भूता सुधारसस्य अमृतरसस्य सारोत्थधारेव सारभागोत्थितप्रवाह इव सन्तर्पयन्ती इन्द्रादीन् हर्षयन्ती यथा सुधारससारभागधारा येषां हर्षं जनयति तथा श्रूयमाणा तव स्वयम्बरवार्त्तापि हर्षं जनयतीत्यर्थः तव स्वयम्बरवार्त्तां श्रुत्वा इन्द्रादयोऽतितरां हृष्टा जाता इति भावः ॥ ८५ ॥

Digitized by Google

समं सपत्नीभवदुःखतीक्ष्णैः
स्वदारनासापथिकैर्मरुद्भिः ।
अनङ्गशौर्य्यानलतापदुःस्थै
रथ प्रतस्थे हरितां महद्भिः ॥ ८९ ॥
अपास्तपाथेयसुधोपयोगै
स्तच्चम्बिनेव स्वमनोरथेन ।

सममिति ॥ अथ तव स्वयम्बरवृत्तान्तश्रवणानन्तरं हरितां दिशां महद्भिर्देवैरिन्द्रादिभिः स्वदाराणां निजस्त्रीणां नासासु नासिकासु पथिकैः पान्थैर्मरुद्भिर्निश्वासवायुभिः समं सह प्रतस्थे प्रस्थितं किम्भूतैर्देवैः अनङ्गस्य कामस्य यत् शौर्य्यं शूरत्वं तदेव अनलउत्तापकत्वादग्निस्तज्जनितायस्तापस्तेन दुःस्थैर्दुःखितैः किम्भूतैर्निश्वासवायुभिः सपत्नीभवेन सपत्नीजनितेन अस्माकं भैमी सपत्नी भविष्यतीति बुद्धेरुत्पन्नेन दुःखेन तीक्ष्णैरत्युष्णैः कामानलसन्तप्तैरिन्द्रादिभिस्तामुद्दिश्य प्रस्थितं तद्दृष्ट्वा तेषां स्त्रीभिरपि दीर्घमुष्णञ्च निश्वसितमित्यर्थः अन्येऽपि पथिकाः पथिकैः सह प्रस्थानं कुर्वन्ति वायुभिः सह प्रस्थितमिति सत्वरता सूचिता अथ च चण्डवायुभिः सह प्रस्थितमित्यमङ्गला यात्रा सूचिता प्रतस्थे इति भावे लिट् । मरुतौ पवनामरावित्यमरः ॥ ८९ ॥

अपास्तेति ॥ तच्चुम्बिना तद्विषयिणा स्वमनोरथेन निजाभिलाषेणोपकल्पितैस्तैरिन्द्रादिभिः सुखमक्लेशं यथा तथा अध्वा पन्था गमि

Digitized by Google

क्षुधञ्च निर्वापयता तृषञ्च
स्वादीयसाध्वा गमितः सुखं तैः ॥ ८७ ॥
प्रिया मनोभूशरदावदाहे
देवीस्त्वदर्थेन निमज्जयद्भिः ।
सुरेषु सारैः क्रियतेऽधुना तैः
पादार्पणानुग्रहभूरियं भूः ॥ ८८ ॥

तैरतिवाहितः किम्भूतेन स्वादीयसा अतितरां स्वादुना सर्वाभिलाषं जनयता अतएव क्षुधं बुभुक्षां तृषं पिपासाञ्च निर्वापयता शमयता किम्भूतैस्तैः अतएव अपास्तः परित्यक्तः पाथेयो वर्त्मभक्ष्यः क्षुधोपयोगोऽम्बूपयोगो यैस्तादृशैः त्वद्विषयकमनोरथजनितानन्दनिमग्नान्तःकरणतया क्षुधा तृष्णा च नाभूदतो वर्त्मभक्ष्यजलोपयोगोऽपि परित्यक्त इत्यर्थः। मनोरथेनेति। उपलक्षणे तृतीया करणे वा गमित इति विडम्बावृत्तः ॥ ८७ ॥

प्रिया इति ॥ सुरेषु देवेषु मध्ये सारैः श्रेष्ठैरिन्द्रादिभिः प्रियाः स्वस्त्रिय इन्द्राणीप्रमुखा देवीस्त्वदर्थेन तन्निमित्तेन मनोभुवः कामस्य शरा बाणा एव दावो वनाग्निस्तज्जनिते दाहे सन्तापे निमज्जयद्भिः पातयद्भिः सद्भिः कामपीडिताः कुर्वद्भिरित्यर्थः अधुना इदानीं इयं भूः पृथिवी पादानामर्पणं निधानं तदेवानुग्रहः कृपा तस्य भूः स्थानं क्रियते इन्द्रादयस्त्वदर्थमिन्द्राणीप्रमुखा अपि स्वस्त्रियस्त्यक्त्वा संप्रति भूलोके आगतवन्त इत्यर्थः ॥ ८८ ॥

Digitized by Google

अलङ्कृतासन्नमहीविभागै
रयं जनस्तैरमरैर्भवत्यां।
अवापितोजङ्गमलेख्यलक्ष्मीं
निक्षिप्य सन्देशमयाक्षराणि ॥ ८९ ॥
एकैकमेते परिरभ्य पीन-
स्तनोपपीडं त्वयि सन्दिशन्ति।

अलङ्कृतेति॥ यैरमरैरिन्द्रादिभिरलङ्कृतो भूषित आसन्नमहीवि
भागः सन्निहितभूप्रदेशो यैस्तादृशैर्भीमनगरीसमीपमुपस्थितैः
सद्भिः भवत्यां त्वयि विषये अयं मल्लक्षणोजनः सन्देशमयाक्ष
राणि वाचिकरूपवर्णान् निक्षिप्य अर्पयित्वा जङ्गमलेख्यलक्ष्मीं
चलत्पत्रिकाशोभां अवापितः प्रापितः अहं चलत्पत्रिकासदृशः
कृत इत्यर्थः त्वां प्रार्थयितुमहं प्रेषितइति भावः अन्यस्मिन्नपि लेख्ये
अक्षराणि निक्षिप्यन्ते ॥ ८९ ॥

एकैकमिति॥ हे दमयन्ति एते इन्द्रादय एकैकं प्रत्येकं पीनस्त
नोपपीडं पीनस्तनयोः पीडयित्वा तव पीनस्तनाभ्यामात्मानं पीडयि
त्वा वा परिरभ्य आलिङ्ग्य त्वयि सन्दिशन्ति वदन्ति सन्देशमेवाह
हे भैमि स्मरस्य कामस्य भल्लैः शल्यैश्च अस्त्रविशेषैः स्मरास्त्रैर्भल्ल
शल्यैर्वा मूर्च्छितां मोहं प्राप्नुवतां नोऽस्माकं मुदे हर्षाय शल्योद्धारा
मूर्च्छापहाराय त्वं विशल्यौषधिर्वल्लिर्व्रणरोपणकरलोनाम्नी ओषधि
लता एधि भव त्वां विनाऽस्माकं काममोहो न शाम्यति अतोऽस्मान् र
क्षेति भावः विशल्यकरणी हि शस्त्रमूर्च्छितानां शल्योद्धारदारा

Digitized by Google

त्वं मूर्च्छतान्नः स्मरभल्लशल्यै
र्मुदे विशल्यौषधिवल्लिरेधि ॥ ९० ॥
त्वत्कान्तिमस्माभिरयं पिपासु
र्मनोरथाश्वासनयैकयैव ।
निजः कटाक्षः खलु विप्रलभ्यः
कियन्ति यावद्भण वासराणि ॥ ९१ ॥

मूर्च्छामयनयति पीनस्तनोपपीडमिति सप्तम्यन्तात् तृतीयान्ताद्वा पीनस्तनशब्दादुपपीडयतेः क्त्वा कर्षतिरुधोपपीड इति तस्य स्थाने णम् एधीति असधातोर्हि हुझल्भ्यो हेर्धिरिति हेर्धिः दाधास्त्वदेद्घुलुक् चेति सकारस्य एत् श्नसोरल्लोप इति सकारलुक् ॥ ९० ॥

त्वत्कान्तिमिति ॥ अस्माभिस्त्वत्कान्तिं तव सौन्दर्यं पिपासुः सादरं सन्निरीक्षितुमिच्छुरयं निजः स्वीयः कटाक्षः एकया अद्वितीयया मनोरथाश्वासनयैव मनोराज्यकल्पनासान्त्वनेनैव कियन्ति वासराणि यावत् कियद्दिवसपर्य्यन्तं खलु निश्चितं विप्रलभ्यः प्रतारणीयः भण कथय प्रतारणा हि कतिचिद्दिवसानि कर्त्तुं शक्यते न तु चिरमतो भैमि स्वसौन्दर्य्यदर्शनयास्माकं कटाक्षं सन्तोषय येन वयं प्रतारका न भवेमेत्यर्थः बहुकालावधि कटाक्षेण त्वामवलोकयितुमिच्छामस्तच्छ्रीघ्रमटित्यस्मान् ईक्षस्वेति भावः । वासराणीति याव च्छब्दयोगे यावदियत्तादिति द्वितीया ॥ ९१ ॥

Digitized by Google

निजे स्रजास्मासु भुजे भजन्त्या
वादित्यवर्गे परिवेशवेशं ।
प्रसीद निर्व्वापय तापमङ्गै
रनङ्गलीलालहरीतुषारैः ॥ ९२ ॥
दयस्व नो घातय नैवमस्मा
ननङ्गचाण्डालशरैरदृश्यैः ।

निजे इति ॥ हे भैमि निजे स्वकीये भुजे द्वौ बाहू आदित्यवर्गे देवगणे अस्मासु परिवेशस्य वेष्टनस्य वेशं आकारं भजन्त्या स्रजा बाहुभ्यां कण्ठं धृत्वास्मान् परिष्वजस्वेत्यर्थः अथच आदित्ये सूर्य्ये परिवेशस्य परिवेषोयुज्यते तथा अनङ्गस्य कामस्य लीला विलासः सैव लहरी जलतरङ्गस्तया तुषारैः शीतलैरङ्गैरवयवैः अस्माकं तापं कामज्वरं निर्वापय शमय प्रसीद प्रसन्ना भव त्वदङ्गसम्पर्कादस्माकं कामज्वरः शान्तिं प्राप्स्यतीत्यतोऽस्मिन् विषयेऽनुग्रहः कर्त्तव्य इत्यर्थः अङ्गैरिति बहुवचनात् सर्व्वाङ्गसंस्पर्शलक्षणालिङ्गनाभिलाषः सूचितः आकारान्तोभुजाशब्दोऽप्यस्ति आदित्यवर्गेऽस्मास्विति वर्गशब्दस्य बहुत्वाभिधानात् सामानाधिकरण्याविरोधः न हि तत्र तुल्यवचनतया नियमः उद्देश्यविधेयभावादौ व्यभिचारदर्शनात् । परिवेशो रवेः पार्श्वे मण्डले वेष्टने तथेत्यजपालः ॥ ९२ ॥

दयस्वेति ॥ हे दमयन्ति नोऽस्माकं दयस्व अस्मासु दयां कुरु एवमनेन प्रकारेण अदृश्यैर्दर्शनायोग्यैः अनङ्गः कामएवातिहिंस्रत्वाच्चाण्डालस्तस्य

Digitized by Google

भिन्नावरं तीक्ष्णकटाक्षवाणैः
प्रेमस्तव प्रेमरसात् पवित्रैः ॥ ९३ ॥
त्वदर्थिनः सन्तु परःसहस्राः
प्राणास्तु नस्त्वच्चरणप्रसादः।
विश्रम्भसे कैतवनाटितञ्चे
दन्तश्चरः पञ्चशरः प्रमाणं ॥ ९४ ॥

शरैरेवांशैरस्मान् न घातय न मारय तव तीक्ष्णैरत्युद्दीपकैरथ च शितैः कटाक्षा अपाङ्गदर्शनान्येव वाणास्तैर्भिन्ना विदारिताः सन्तो वरं प्रेमः प्राणास्त्यज्यामः किम्भूतैर्यतस्तव प्रेमरसात् प्रीतिरूपाद्र सात् पवित्रैः शुद्धैः अदृश्यात् चाण्डालवाणाग्मरणापेक्षया वरं पवित्रवाणामरणं श्रेयइति तव कटाक्षवाणा एवास्मासु पतन्ति त्यर्थः कटाक्षैरस्मानाश्वासय वृथाश्वेतिभावः। न इति कर्मणो वाद यादेरिति कर्मणि षष्ठी ॥ ९३ ॥

त्वदर्थिन इति ॥ हे दमयन्ति परःसहस्राः सहस्राधिका बहवो जनास्त्वदर्थिनस्तव याचकाः सन्तु भवन्तु नस्तु अस्माकं पुनः प्राणास्त्व चरणप्रसादः तव चरणयोरनुगृहीताः त्वच्चरणौ चेत् प्रसन्नौ भवेतां तर्ह्येवास्माकं प्राणनं भवेदित्यर्थः चेद्यदि इदं कैतवनाटितं अलीकभाषितं विश्रम्भसे आशङ्कसे तर्हि अन्तश्चरस्तव अस्माकञ्च अन्त र्वर्त्ती पञ्चशरः कामः प्रमाणं साक्षी भवत्वित्यर्थात् लपिरवादयं संशयितप्राणा जाता इति स्वान्तर्वर्त्ती काम एव पृच्छ्यतामित्यर्थः वयमेवानन्याशा इति भावः। परःसहस्रा इति पराच्छतसहस्र श्चेरिति सुट् ॥ ९४ ॥

Digitized by Google

अस्माकमध्यासितमेतदन्त
स्तावद्भवत्या हृदयं चिराय।
बहिस्त्वयालङ्क्रियतामिदानी
मुरोमुरं विद्विषतः श्रियेव॥ ९५॥
दयोदयश्चेतसि चेत्तवाभू
दलङ्कुरु द्यां विफलोविलम्बः।

अस्माकमिति॥ हे भैमि भवत्या त्वया अस्माकमेतदन्तर्हृदयं मन चिराय चिरकालं तावदध्यासितं अधिष्ठितमेव चिरकालं त्वमस्मा भिर्मनसि धृतासीत्यर्थः इदानीं त्वयाऽस्माकं बहिर्हृदयं वक्षोऽलङ्क्रियतां भूष्यतां श्रियेव यथा श्रिया लक्ष्म्या मुरं विद्विषतो नारायणस्य उरोवक्षोऽलङ्क्रियते तथा बहुकालावधि विप्रलम्भमनुभूय वयमतिदुः खिनो जाताः संप्रति सम्भोगेनानुग्राह्या इति भावः यद्यपि पूर्ववाक्यस्य भवत्येत्यस्यानुषङ्गेणैव उत्तरवाक्यस्यान्वयोपपत्तौ त्वयेतिपदं व्यर्थं तथाप्यनुषङ्गेणान्वयकल्पनापेक्षया साक्षात्पदप्रयोगएव झटित्यन्वयोपस्थापकत्वाच्छ्रेयानिति बोध्यं भवत्या दीप्तिमत्येति वा भवत्यामिति सप्तम्यन्तपाठं कल्पयित्वा व्याख्यानन्तु न मनोरमं। विद्विषत इति द्विषः शत्राविति शतृ। हृदयं वक्षसि स्वान्ते बुक्कायामिति हैमचन्द्रः॥ ९५॥

दयोदय इति॥ हे भैमि चेद्यदि तव चेतसि मनसि दयायाः करुणाया उदय उत्पत्तिरभूत् तदा द्यां स्वर्गं अलङ्कुरु स्वावस्थानेन भूषय

Digitized by Google

भुवः स्वरादेशमथाचरामो
भूमौ धृतिं यासि यदि स्वभूमौ ॥ ९६ ॥
खिन्नोति नास्मान् जलजेन पूजा
त्वयान्वहं तन्वि वितन्यमाना ।
तव प्रसादाय नते तु मौलौ
पूजास्तु नस्त्वत्पदपङ्कजाभ्यां ॥ ९७ ॥

विलम्बः कालक्षेपो विफलो निष्प्रयोजनः शीघ्रमेवास्मान् वरयित्वा स्वर्गं गच्छेत्यर्थः अथेति पूर्वापरितोषे यदि त्वं स्वस्य भूमौ उत्पत्तिस्थाने भूमौ भूलोके धृतिं प्रीतिं यासि प्राप्नोषि तदा वयं भुवः पृथिव्याः स्वरादेशं स्वर्गसंज्ञां आचरामः कुर्मः यत्र वयं वसामः स एव स्वर्गः तवानुरोधात् स्वर्गं परित्यज्य भूलोक एव वत्स्याम इति भावः। भूमिः पृथ्व्यां वासदेशे स्थानमात्रेऽपि च स्त्रियामिति बलः। त्वामेव देवाल यतां नयामो भूमौ रतिश्चेत्तव जन्मभूमाविति कश्चिदुत्तरार्द्धं ॥ ९६ ॥

खिन्नोतीति ॥ हे तन्वि क्षीणाङ्गि भैमि त्वया अन्वहं प्रतिदिनं जलजेन पद्मेन वितन्यमाना विशेषेण क्रियमाणा पूजा अस्मान् न खिनोति न प्रीणयति तु किन्तु प्रणयकुपितायास्तव प्रसादाय प्रसन्नता करणार्थं नते नम्रीभूते अस्माकं मौलौ मस्तके त्वत्पदपङ्कजाभ्यां तव पादपद्माभ्यां नोऽस्माकं पूजा अस्तु भवतु इवरकमलापेक्षया त्वच्चरणकमलयोरुत्कृष्टत्वात् ताभ्यामेव पूजास्माकं प्रीतिकरी भवत्वि त्यर्थः त्वच्चरणयोः प्रणिपातेन यथा वयं सुखिनो भवामस्तथा कुर्व्विति भावः ॥ ९७ ॥

Digitized by Google

स्वर्वैर्वितीर्णैः करवाम वाम
नेत्रे भवत्या किमुपासनासु ।
अङ्ग त्वदङ्गानि निपीतपीत
दर्पाणि पाणिः खलु याचते नः ॥ ९८ ॥
वयं कलादा इव दुर्विदग्धं
त्वद्गौरिमस्पर्द्धि दहेम हेम ।

स्वर्वैरिति ॥ हे वामनेत्रे सुलोचने भैमि भवत्या त्वया उपासनासु आराधनासु वितीर्णैर्दत्तैः स्वर्वैः स्वर्गनिर्मितपुष्पादिभिर्वयं किं करवाम अपितु तैः किमपि प्रयोजनं नास्तीत्यर्थः कुतइत्यतआह अङ्ग हे भैमि खलु यस्मात् नोऽस्माकं पाणिर्हस्तोऽनिपीतौ भक्षितौ विना पिव इतियावत् पीतस्य स्वर्णस्य दर्पोगर्व्वोयैस्तादृशानि त्वदङ्गानि याचते प्रार्थयते यैः सुवर्णादि पराजितं तदभिलाषिणः कथं सुवर्णेन प्रीतिर्भवेदित्यर्थः । वामं सव्ये प्रतीपे च द्रविणे चातिसुन्दर इति विश्वः । पीतं वर्णे सुवर्णे चेति वलः । अङ्गेति सानुनयसम्बोधने ॥ ९८ ॥

वयमिति ॥ प्रसूननाराचः कामस्तस्य शरासनेन धनुषा सह एकवंशे एकवेणौ अथ च एककुले प्रभव उत्पत्तिर्ययोस्तादृशौ भ्रुवौ यस्याः सा हे तथाभूते कामचापसदृशभ्रूयुगे भैमि वयं कलादा इव स्वर्णकाराइव त्वद्गौरिमस्पर्द्धि तव गौरत्वसाम्याभिलाषि अत एव उत्तमेन सह स्पर्द्धाकरणात् दुर्व्विदग्धं दुर्विनीतं वधु पिङ्गलं हेम

प्रसूननाराचशरासनेन
सहैकवंशप्रभवभ्रु वभ्रु ॥ ९९ ॥
सुधासरःसु त्वदनङ्गतापः
शान्तोन नः किं पुनरप्सरःसु ।
निर्व्वाति तु त्वन्ममताक्षरेण
सूनाशुगेषोर्म्मधुशीकरेण ॥ १०० ॥

सुवर्णं दहेम अमी प्रक्षिपाम वयं त्वदीयात्तदपराधवारिणः सुवर्णस्य वह्निप्रक्षेपरूपं दण्डं कुर्म्म इत्यर्थः अस्माकं सुवर्णेन प्रयोजनं नास्ति सुवर्णवर्णां त्वामेवाभिलषाम इति भावः । नाडिन्धमः स्वर्णकारः कलादोरुक्मकारके इति । वधुः स्यात्पिङ्गले त्रिषिति चामरः । एकवंशप्रभवभ्रुइत्यत्र वामभ्रु वाम्यं त्यजेत्यादिवत् द्रुअन्नाद्यादेवेत्यत्रादिपदेन संगृहीतत्वाद्भ्रस्वत्वं यथाच गोपीचन्द्रः आदिपदेन शिष्टप्रयोगदर्शनादुपगतह्रस्वविधानानां ग्रहणमिति ॥ ९८ ॥

सुधेति ॥ हे भैमि नोऽस्माकं त्वदनङ्गतापस्त्वन्निमित्तः कामज्वरः सुधासरस्सु अमृतसरसीष्वपि निमज्जनेन न शान्तः न शान्तिं प्राप्तः किं पुनरपां जलानां सरस्सु सरसीषु अथ च रम्भामेनकादिदेवाङ्गनासु शाम्यति तर्हि कथं शान्तिर्भविष्यतीत्याकाङ्क्षायामाह तु पुनः सूनाशुगस्य कामस्य इषोः पुष्पमयवाणस्य मधुशीकरेण मधुकणरूपेण त्वन्ममताक्षरेण इन्द्रादयोमदीया इति तव वचनेन निर्व्वाति शान्तिं गमिष्यति वर्त्तमानसामीप्ये लट् त्वद्विरहदुःखिनामस्माकममृतसरोऽवगाहनमप्सरःसम्भोगश्च न सुखाय भवतीति भावः योहि अमृतसरोवरेषु न शान्तः सोऽम्बुशीकरेण शाम्यतीत्याश्चर्य्यं ॥ १०० ॥

Digitized by Google

खण्डः किमु त्वद्गिर एव खण्डः
किं शर्करा तत्पथशर्करैव।
छत्रास्ति तद्भङ्गिरसोत्यकच्छ
इत्थानु दिक्षु प्रथितं तदिक्षुः॥ १०१ ॥
ददाम किन्ते सुधयाधरेण
त्वदास्य एव स्वयमास्यते यत।

खण्ड इति ॥ हे छत्रास्ति भैमि त्वद्गिरस्तव वाचः खण्डोभाग एव खण्डो गुडविकारविशेषः किमु नत्वतिरिक्तः तथा तव्यागिरः यस्या गमनमार्गेस्तव वर्त्तमाना शर्करैव कर्परांश एव शर्करा सिता किं तथा तव्यागिरो या भङ्गिर्वक्रता परिपाटी तत्त्रायोरसस्तद्युत्यो यः कच्छोजलप्रायदेशस्तस्य दृशं नु दिक्षु इक्षुः प्रथितं तथाविधं दृश मेव किं इक्षुरूपेण दिक्षु प्रथितमित्यर्थः वयमतितरां त्वद्वचनश्रवणा भिलाषिणोजाताइति भावः खण्डोऽस्त्री शकले नेक्षुविकारमणिदोष योरिति शर्करा खण्डविकृतावुपलाकर्परांशयोः। शर्करान्वितदेशे ऽपि रुग्भेदे शकलेऽपि चेति च मेदिनी जलप्रायमनूपं स्यात् पुंसि कच्छस्तथाविध इत्यमरः॥ १०१ ॥

ददामेति ॥ हे भैमि वयं ते तुभ्यं किं ददाम अपितु त्वद्दानोपयुक्त अस्माकं किमपि वस्तु नास्तीत्यर्थः ननु देवानां युष्माकममृतं वर्त्तते तदेव दीयतामित्याशङ्क्य तदपि न ते दुर्लभमित्याह हि यस्मात् अध रेण अधररूपया सुधया अमृतेन त्वदास्य एव तव मुख एव स्वयं

Digitized by Google

विधुं विजित्य स्वयमेव भावि
त्वदाननं तन्मखभागभागि ॥ १०२ ॥
प्रिये वृणीष्वामरभावमस्म
दिति त्वपोदस्ति वचो न किन्नः ।

आस्वाद्यते स्वीयते यतोऽधरीभूय तव मुख एव अमृतं वर्त्तते अतोऽमृतान्तरदानं न ते प्रीतिकरं भविष्यतीत्यर्थः ननु मा दीयताममृतं किन्त्वमृतवपुषश्चन्द्रस्य यज्ञभागोवर्त्तते स एव दीयतामित्याशङ्क्य सोऽपि न ते दुर्लभ इत्याह यस्माच्च त्वदाननं तव मुखं कर्तृ विधुं चन्द्रं विजित्य स्वयमेव तस्य चन्द्रस्य मखभागभागि यज्ञांशप्राप्ति भावि भविष्यति अतस्तद्दानमपि न ते प्रीतिकरं भविष्यतीत्यर्थः सोऽपि जीयते तस्य धनं जयिना गृह्यतएव अमृतयज्ञभागदाराः वयं त्वत्प्रीतिं जनयितुमशक्नुम इति भावः ॥ १०२ ॥

अमरत्वमपि न ते दातुं योग्यमित्याह ॥ प्रिये इति ॥ हे प्रिये भैमि अस्मत् सकाशात् अमरभावं अमरत्वं अविनाशित्वं वृणीष्व प्रार्थय इति नोऽस्माकं वचः किं त्वपोदस्ति न लज्जावहं न अपि तु लज्जावहमेव भवतीत्यर्थः कथमित्यतआह येन हेतुना अमरा अपि वयं त्वत्पादपद्मे तव चरणकमलद्वयं शरणं रक्षकं प्रविश्य प्राप्य स्वयमेव जिजीविषामः जीवितुमिच्छामः स्वयमसिद्धोहि कथं परान् साधयति त्वच्चरणयुगलं शरणीकृत्य जिजीविषताम् अस्माकं तुभ्यममरत्वप्रदानकथनं केवलमुपहासाय भवतीत्यमरत्व

त्वत्पादपद्मे शरणं प्रविश्य
स्वयं वयं येन जिजीविषामः || १०३ ||
अस्माकमस्मान्मदनापमृत्यो
स्त्राणाय पीयूषरसोऽपि नासौ।
प्रसीद तस्मादधिकं निजन्तु
प्रयच्छ पातुं रदनच्छदन्नः || १०४ ||
मुष्टश्चापेन रोपैरपि सह मकरेणात्मभूः केतुनाभूत्
नष्टस्त्वत्प्रसादादथ मनसिजतां मानसोनन्दनः सन्।

मपि नाम्नाभिर्दातुं प्रक्षमित्यर्थः कथञ्चिदपि तवोपकर्तुमसमर्थान स्मान् केवलं दयां विधाय रक्षेति भावः। अस्मदिति अस्मच्छब्दात पञ्चमीबहुवचनं पञ्चम्याश्च इति तस्य स्थाने तकारः अस्मानिति पाठे तु वृकादिकर्मकत्वविवक्षया कर्महेतुदुःखादेरिति कर्मसंज्ञायां द्वितीया || १०३ ||

अस्माकमिति || अस्माकं अस्मादुपस्थितात् मदनापमृत्योः काम जनिताकस्मिकमरणात् त्राणाय रक्षणाय असौ प्रतिदिनं सेव्यमानः पीयूषरसोऽपि अमृतरसोऽपि न समर्थोभवतीति शेषः प्रसीद अस्माकमुपरि प्रसन्ना भव तु पुनस्तस्मात् पीयूषरसात् अधिकं अतितरां स्वादु अधिकसामर्थ्यञ्च निजं स्वीयं रदनच्छदं अधरं पातुं नोऽस्मभ्यं प्रयच्छ देहि अनेनैव मदनापमृत्युः शान्तिं प्राप्स्यतीति भावः अन्यत्रापि सामान्यौषधेनापमृत्योरप्रतीकारं दृष्ट्वा अधिकवीर्यं मौषधं पातुं ददाति || १०४ ||

अथच्छन्दोऽन्तरेसर्गसमाप्तिं सूचयति || मुष्ट इति || य आत्मभूः कामश्चापेन धनुषा रोपैर्बाणैर्मकरेण मकररूपेण केतुना ध्वजेन

Digitized by Google

भ्रूभ्रान्ते तन्वि धन्वी भवतु तव सितैर्जैत्रभल्लः स्मितै-
स्तादृक्तु त्वन्नेत्रचञ्चत्तरशफरयुगाधीनमीनध्वजाङ्कः
॥ १०५ ॥

स्वप्नेन प्रापितायाः प्रतिरजनि तव श्रीषु मग्नः कटा-
क्षः श्रोत्रे गीतामृताब्धौ त्वमपि ननु तनूमज्जरीसि।
कुमार्य्यै।

स च पुरा हरनयनाग्निना दग्धोऽभूत् अथानन्तरं इदानीं स कामस्त्व-
त्प्रसादादस्माकं मानसो मनःसम्बन्धी नन्दनोऽपत्यं सन् अथ
च मनसः पुत्रः सन् मनसिजतां मनोभवतां च तां धारयतु त्वत्प्र-
सादादानन्दको मदनोऽस्मिन् मनसि पुनरुत्पद्यतां अतएव मनसि-
जत्वमपि धारयत्वित्यर्थः। तस्य धनुरादिकमपि दग्धं तदभावे कथं
भवेदित्यत आह हे तन्वि भैमि स कामस्ते तव भ्रूभ्यां धन्वी धनुष्मान्
भवतु तथा तव सितैः श्वेतैः स्मितैर्हास्यैर्जैत्रं जयशीलं भल्लमस्त्रं
यस्य तादृशः स्तात् भवतु तथा तव नेत्रे एव चञ्चत्तरं अति-
शयेन शोभमानं चञ्चत्तरं वा शफरयुगं प्रोष्ठीयुगलं तदधीनो
मीनध्वजरूपोऽङ्कश्चिह्नं यस्य तादृशोऽस्तु भवतु त्वमस्माकं सम्पूर्णका-
मास्पदं भविष्यसीति झटित्यस्मान् वृणीष्वेति भावः मकरमीनावे-
कार्थाविति काश्यपाः। पत्री रोपइषुर्द्वयोरित्यमरः नन्दनोऽपत्ये-
पुत्रे इति विश्वः। स्तादिति असधातोर्लोटस्तुङ् तोस्तादाशिषीति तुङ-
स्तात् श्नसोरदित्यकारलुक्। स्रग्धरावृत्तमिदं ॥ १०५ ॥

स्वप्नेनेति। ननु भो भैमि प्रतिरजनि रात्रौ रात्रौ स्वप्नेन प्रापिताया
ज्ञानविषयीकृतायास्तव श्रीषु शोभासु नोऽस्माकं कटाक्षो मग्नः तथा

नासा श्वासाधिवासेऽधरमधुनि रसना चरित्रेषु चित्तं तत्तस्त्वङ्गि केश्चिन्न करणहरिणैर्व्वागुरा लङ्घितासि ॥ १०६ ॥

इति धृतसुरसार्थवाचिकौघ
स्वरसनवस्मरपत्रहारकस्य ।

स्मार्त्तं श्रोत्रे कर्णौ तथाभूतायास्तव गीतामृताब्धौ गानरूपामृतसमुद्रे मग्ने तथास्माकं त्वगपि तव तनुः शरीरमेव मञ्जरी वल्लरी तस्याः सौकुमार्य्ये कोमलत्वे मग्ना अस्माकं नासा तव श्वासाधिवासे निश्वासपरिमले मग्ना अस्माकं रसना जिह्वा तव अधरएव मधु अधरस्य मधु वा तस्मिन्मग्ना अस्माकं चित्तं तव चरित्रेषु विलासादिसर्व्वव्यापारेषु मग्नं तत्तस्मात् हे तन्वङ्गि कृशाङ्गि भैमि अस्माकं कैश्चित् कैरपि करणानि इन्द्रियाण्येव हरिणास्तैर्वागुरा मृगबन्धनीरूपा असि त्वं न लङ्घिता नातिक्रान्ता वागुरारूपया त्वया सौन्दर्य्यादिना बद्धानि अस्माकं चक्षुरादीन्द्रियाणि त्वामतीत्य गन्तुं न शक्नुवन्तीत्यर्थः । स्वप्नेऽप्यस्माभि रन्या न स्पृष्टतइति त्वय्येवात्यन्तमनुरागिणोऽस्मान् झटिति वृणीष्वेति भावः यद्यपि देवानामस्वप्नत्वात् स्वप्नेत्यादिकथनमनुचितं तथाप्यत्र स्वप्नपदेन गौण्या लक्षणया उन्मादावस्था लक्ष्यते रजन्या बोद्दीपकतया उन्मादाधिक्यजनकत्वात् प्रतिरजनीतिपदमपि सार्थकं यद्वा प्रति प्रतिकूला रजनी हरिद्रा यस्याः सा तथा हे तादृशि अतिगौराङ्गि इतिसम्बोधनपदमिदमिति प्राञ्चः ॥ १०६ ॥

इत्यमिन्द्रादिसन्दिष्टमुक्त्वा उपसंहरन्नवः पुनरपि दौत्यं प्रकटयति ॥ इतीति ॥ हे भैमि एषु इन्द्रादिषु दिगीशेषु मध्ये यं कमपि

Digitized by Google

सफलय मम दूततां वृणीष्व
स्वयमवधार्य्य दिगीशमेकमेषु ॥१०७॥
आनन्दयेन्द्रमथ मन्मथमग्नमग्निं
केलीभिरम्बर तनूदरि नूतनाभिः ।

अथवैषां दिगीशं दिक्पालं स्वयमात्मनैव अवधार्य्य वृणीष्व मम दूततां च सफलय एतेषामन्यतमस्वीकारात् फलवतीं कुरु किम्भूतस्य मम इति पूर्वोक्तप्रकारेण इतः सुरसार्थस्य देवसमूहस्य इन्द्रादेर्वाचिकौघः सन्देशवचनसमूहो यया वाहकी या स्मरसमरकारिभिर्गिरामञ्जरिः सैव पत्रं लेख्यं यस्य हारकस्य वाहकस्य अन्योऽपि यत्र वाहकस्याभिलषितस्वीकारात् दूत्यं सफलयति इत्यन्योऽप्याश्रयोऽस्ति इतिश्चसुरसार्थवाचिकसम्भिजरसमावहपत्रहारकस्येति क्वचित् पाठः ॥ पुष्पिताग्रावृत्तमिदं ॥१०७॥

आनन्दयेति ॥ हे तनूदरि कृशोदरि दमयन्ति इन्द्रं आनन्दय वरणद्वारा सन्तोषय अथ अथवा मन्मथमग्नं कामजनितपीडानिमग्नं अग्निं नूतनाभिर्नवनवाभिः केलीभिः सुरतक्रीडाभिरम्बर कामपीडासकाशादुत्तोलय अग्निमेवा सुरतक्रीडाभिरानन्दयेत्यर्थः वा किम्वा शमने यमे मनः उदिता उद्गता दया यस्य तादृशं आसादय कुरु यमं वा वृणीष्वेत्यर्थः वाऽथवा यदि इत्थं एवं नो इन्द्रादित्रयमपि यदि वरीतुं नेच्छसि अथ तर्हि वरुणं वृणीष्व वरुणं इन्द्रादीनां चतु

आसादयोदितदयं गमने मनो वा
नो वा यदीत्थमथ तद्वरणं वृणीथाः॥ १०८॥

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यं।
तस्यागादयमष्टमः कविकुलादृष्टाध्वपान्थे महा-
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः॥
॥ १०९ ॥

षां मध्ये यस्य कस्यापि वरणेन मदीया दूतता सफलीक्रियतामिति भावः। वसन्ततिलकावृत्तमिदं॥ १०८॥

श्रीहर्षमिति॥ कविकुलैरितरकविसमूहैरदृष्टोऽपरिशीलितो योऽध्वा पन्थास्तत्र पान्थे नित्यपथिके अभिनवयैव रीत्या निर्म्मिते इत्यर्थः अगात् समाप्तिं गतः॥ १०९॥

इतिश्रीप्रेमचन्द्रन्यायरत्नविरचितायामन्वयबोधिकासमाख्यायां नैषधटीकायामष्टमः सर्गः समाप्तः॥

Digitized by Google

॥ अथ नवमः सर्गः ॥

इतीयमक्षिभ्रुवविभ्रमेङ्गितैः
स्फुटामनिच्छां विवरीतुमुत्सुका ।

अथ नवमं सर्गमारभमाणः प्रथमं पूर्व्वसर्गेण सहैकवाक्यताय पूर्व्वसर्गोक्तनलवचनं भैमी शृणोतिस्मेत्याह ॥ इतीति ॥ इयं भैमी इति पूर्व्वसर्गोक्तं नलवचनं तस्य नलस्य उक्तिमात्रस्य केवलोक्तेः अवधेच्छया अवधानवाञ्छया अशृणोत् शुश्राव न पुनर्दिग्गीशानां दिक्पालानामिन्द्रादीनां याः सन्देशगिरो वाचिकानि तासां गौरवात् इन्द्राद्याश्चाऽवश्यं श्रोतव्येत्यादरातिशयात् शुश्राव किम्भूता अक्ष्णोश्चक्षुषोर्भ्रुवोश्च यो विभ्रमः सङ्कोचनविक्षेपादिरूपविलासस्तद्रूपैरिङ्गितैरभिप्रायसूचकचेष्टितैः स्फुटां व्यक्तां अनिच्छां दिक्पालेष्वनादरं विवरीतुं विशेषेण प्रकटीकर्त्तुं उत्सुका उद्युक्ता एकस्मिन्नेवानुरक्तमनसां पतिव्रतानां पुरुषान्तरविषयकवचनश्रवणं दुःखकरं भवतीति नलानुरक्तया भैम्या इन्द्रादिवाचिकं दुःखितयैव श्रुतमित्यर्थः । काचिद्दिग्गीशसन्देशगिरमिति द्विती

तदुक्तिमात्रश्रवणेच्छयाऽर्पणो
द्दिगीशसन्देशगिरां न गौरवात् ॥ १ ॥
तदर्पितामश्रुतवद्विधाय तां
दिगीशसन्देशमयीं सरस्वतीं ।
इदं तमुर्व्वीतलशीतलद्युतिं
जगाद वैदर्भनरेन्द्रनन्दना ॥ २ ॥
मयाङ्ग पृष्टः कुलनामनी भवा
नमू विमुच्यैव किमन्यदुक्तवान् ।

यान्तः पाठः । अच्छिभुवेति अच्छिणी च भुवौ चेति प्राण्यङ्गत्वादेकव
द्भावः अच्णोर्भुव इत्यत्वमासान्तः । अस्मिन् सर्गे वंशस्थं वृत्तं ॥ १ ॥

एवमिन्द्रादिसन्दिष्टमनाख्यया श्रुत्वा भैमी नलं प्रति वक्तुमारभते ॥ तदर्पितामिति ॥ वैदर्भनरेन्द्रनन्दना दमयन्ती तेन नलेन अर्पितां ज्ञापितां तां दिगीशानां दिक्पालानामिन्द्रादीनां सन्देशमयीं वाचि कल्पां सरस्वतीं वाणीं अश्रुतवत् अनाकर्णितामिव विधाय कृत्वा वैम ख्यात् तस्याउत्तरदानप्रयत्नमकृत्वेत्यर्थः उर्व्वीतलशीतलद्युतिं पृथिवी चन्द्रं तं नलं इदं वक्ष्यमाणं जगाद उक्तवती ॥ २ ॥

किं जगादेत्याशयाग्रिमश्लोकचतुष्टयपर्य्यन्तं ॥ मयेति ॥ अङ्ग हे सुन्दर मया कुलनामनी पृष्टः कस्मिन् कुले जातः किन्नामधेयश्चासीति पूर्वं जिज्ञासितोभवान् अमू कुलनामनी विमुच्यैव त्यक्त्वैव अकथयित्वैव किं किमर्थं अन्यदप्रस्तुतं इन्द्रादिसन्दिष्टं उक्तवान् उवाच अनुचितमेत दित्यर्थः अत्र कुलनामप्रश्नविषये मत्प्रश्नं उत्तरधारयस्य मत्प्रश्नप्रत्युत्तर

Digitized by Google

न मह्यमद्योत्तरधारयस्य किं
ह्रियेऽपि सेयं भवतोऽधमर्णता ॥ २ ॥
अदृश्यमाना क्वचिदीक्षिता क्वचि
न्मयानुयोगे भवतः सरस्वती ।

उत्तरस्य पर्यवसितो भवतः सेयं प्रस्तुता अधमर्णता ऋणिता ह्रियेऽपि लज्जाये अपि किं न भवति अपि तु ऋणापरिशोधनात् तव लज्जा युज्यते पृष्टस्योत्तरमददानोऽपृष्टञ्च प्रयुञ्जानो भवान् कथं न लज्जते इत्यर्थः तस्मात् कुलनामनी कथयेति भावः अन्यस्यापि ऋणमपरिशोधयतो लज्जा जायते। उत्तरधारयस्येति धारेर्णिजन्तात् शाध्वादेरप्रादेरिति शच् उत्तरस्य धारय उत्तरधारय इति तत्पुरुषः मह्यमिति साधुर्धारयतेरिति संप्रदानसंज्ञायां चतुर्थी ॥ २ ॥

अदृश्यमानेति ॥ भवतस्तव सरस्वती वाणी सरस्वतीं सरस्वतीनाम्नीं सरस्वतीं नदीं जेतुमनाः पराभवितुकामा तत्सदृशी भवतीत्यर्थः सा दृश्यमेव द्वयोर्विशेषणोपन्यासेनाविष्करोति किम्भूता वाणी क्वचित् कस्मिंश्चित् कुलनामविषये मम अनुयोगे प्रश्ने अदृश्यमाना उत्तराप्रतिपादनादलक्षिता तथा क्वचित् कुत आगतोऽसीत्यादौ अनुयोगे ईक्षिता सरित्पतीनां सदसः प्रतीहि त्वदीयमेवातिथिमागतं मामित्याद्युत्तरकथनादुपलब्धा किम्भूतां सरस्वतीं क्वचिद्देशविशेषे प्रकाशां प्रकटजलां क्वचिच्च अस्फुटमप्रकटं अर्णोजलं यस्याः सा तथा तां अन्तःसलिलामित्यर्थः अतएव सरस्वतीनदीतुल्या तव वाणीत्यर्थः कुलनामविषयकप्रश्नस्याप्युत्तरं प्रयच्छेति भावः। प्रश्नोऽनुयोगः पृच्छा चेति अमरो

Digitized by Google

क्वचित्प्रकाशं क्वचिदस्फुटार्थकं
सरस्वतीं जेतुमनाः सरस्वतीं ॥ ४ ॥
गिरः श्रुता एव तव श्रवःसुधाः
श्लथाभवन्नाम्नि तु न श्रुतिस्पृहा ।
पिपासुता शान्तिमुपैति वारिजा
न जातु दुग्धान्मधुनोऽधिकादपि ॥ ५ ॥

र्णस्तोयपानीयनीरक्षीराम्बुशम्बरमिति चामरः सरस्वती सरिद्भेदे सरिन्मात्रे च वाचि च । सरस्वती नदी वापि सरस्वानुदधौ नद इति धरणिः ॥ ४ ॥

किन्ते नाम कथ्यतामित्याह । गिर इति । श्रवसोर्मत्कर्णयोः सुधा अतितृप्तिजनकत्वादमृतरूपास्तव गिरो वाचः श्रुता एव आकर्णिता एव तु पुनर्भवतो नाम्नि विषये श्रुतिस्पृहा श्रवणेच्छा न श्लथा न शान्ता तव नामापि श्रोतुमिच्छामि तत्कथ्यतामित्यर्थः ननु नाम्नोऽप्यधिकानि वचनानि श्रुत्वापि कथं ते नामशुश्रूषेत्याशङ्क्यार्थान्तरन्यासेनापनयति वारिजा जलसम्बन्धिनी पिपासुता पानेच्छा अधिकात् जलापेक्षयातिमधुरात् अधिकपीताद्वा दुग्धात् मधुनोऽपि अपिर्वाकारार्थः मधुनो वा जातु कदाचिदपि शान्तिं नोपैति न प्राप्नोति अपि तु जलादेव शाम्यति इच्छा हि यद्विषयिणी भवति तस्यैवोपयानात् सा निवर्त्तते तस्मादनिष्टस्येन्द्रादिसन्देशस्य श्रवणात् कथं त्वन्नामशुश्रूषा शाम्यतीत्यर्थः ॥ ५ ॥

विभर्त्ति वंशः कतमस्तमोऽपहं
भवादृशं नायकरत्नमीदृशम् ।
तमन्यसामान्यधियावमानितं
त्वया महान्तं बहु मन्तुमुत्सहे ॥ ६ ॥
इतीरयित्वा विरतां पुनः स तां
गिरानुजग्राहतरां नराधिपः ।

कस्मिन् कुले जातोऽसि कथ्यतामित्याह । विभर्त्तीति । कतमो वंशः कुलं तमोऽपहं पापरहितं अज्ञानविनाशकं शोकापनुदं वा ईदृशमनिर्वचनीयसौन्दर्य्यादियुतं भवादृशं त्वादृशं नायकरत्नं पुरुषश्रेष्ठं विभर्त्ति धारयति कस्मिन् वंशे उत्पन्नोऽसीत्यर्थः तं वंशं अहं बहु सादरं यथा तथा मन्तुं ज्ञातुं उत्सहे उद्युक्तास्मि किम्भूतं अन्यसामान्यधिया इतरवंशतुल्यत्वबुद्ध्या अवमानितं पूर्व्वं तिरस्कृतं पश्चाच्च उत्पद्यमानेन त्वया हेतुना महान्तं सर्व्वोत्कृष्टं यस्मिन् वंशे जातोऽसि तं कथयेति भावः । अथ च वंशो वेणुस्तमोऽपहं स्वकान्त्या अन्धकारनिवारकं लोकोत्तरं हारमध्ययोग्यं रत्नं मणिं धारयति वेणोरपि रत्नोत्पत्तिर्वृद्धैरुच्यते । तमो राहौ गुणे पापे ध्वान्त इति हेमचन्द्रः नायको नेतरि श्रेष्ठे हारमध्यमणावपीति विश्वः रत्नं स्वजातिश्रेष्ठेऽपीत्यमरः ॥ ६ ॥

एवं कथयन्तीं भैमीं प्रति नल उवाचेत्याह । इतीति । स धराधिपो नल इति पूर्व्वोक्तं ईरयित्वा उक्त्वा विरतां विश्रान्तां तां भैमीं पुनर्गिरा वाचा अनुजग्राहतरां अतिशयेन अनुगृहीतवान् उवाचेत्यर्थः उपमिनोति इव यथा तपात्यये ग्रीष्मावसाने वर्षाकाले घना

Digitized by Google

विरुत्य विश्रान्तवतीं तपात्यये
घनाघनश्चातकमण्डलीमिव ॥ ७ ॥
अयं ममोदासितमेव जिह्वया
द्वयेऽपि तस्मिन्ननतिप्रयोजने ।
गरौ गिरः पल्लवनार्थलाघवे
मितञ्च सारञ्च वचो हि वाग्मिता ॥ ८ ॥

घनोवर्षुकमेघो विरुत्य विरावं शब्दं कृत्वा विश्रान्तवतीं विश्रान्तां चातकमण्डलीं चातकसमूहं गिरा गर्ज्जितेन अनुग्रहाणातितरां तथानुजग्राह तरामित्यर्थः । शत्रुघातुकमत्तेभवर्षुकाब्दा घनाघना इत्यमरः । ७ ॥

यदुवाच तदाह ॥ अयेइति ॥ अये इति सानुनयसम्बोधने अये भैमि मम जिह्वया तस्मिन् कुलनामरूपे द्वयेऽपि द्वितयेऽपि उदासितमेव उदासीनयैव भूतं किम्भूते यतोऽनतिप्रयोजने अतिशयितप्रयोजनशून्ये भवत्या पृष्टमपि कुलनामद्वयं निष्प्रयोजनत्वान्मया नोक्तमित्यर्थः ननु सत्यपि निष्प्रयोजनत्वे पृष्टस्योत्तरं दातव्यमेवेत्याशङ्कायामाह पल्लवनं अल्पस्येप्रमेये वृथाशब्दप्रपञ्चनं अर्थलाघवं बहुषु वक्तव्येषु किञ्चिदर्थ प्रकाशनञ्च द्वे गिरोवाण्या गरौ विषौ विषतुल्यदोषौ यथा विषमविषा श्चैव त्यज्यते तथा एते अपि त्याज्ये इत्यर्थः तस्मान्निरर्थकं न प्रष्टव्यं पृष्टमपि नोत्तरदानार्हमिति मयोदासितमिति भावः दोषत्वमेव समर्थयति हि यस्मात् मितं परिमितशब्दघटितञ्च सारञ्च अवश्यवक्तव्यप्रकाशकञ्च वचो वाग्मिता प्रशस्तवक्तृत्वं । चद्वयमुभयप्राधान्यसूचकं गरइत्येष वचनान्तपाठे अर्थलाघवे पल्लवना शब्दविस्तारो गिरोगर इति योज्यं उदासितमिति भावे क्तः ॥ ८ ॥

Digitized by Google

वृथा कथेयं मयि वर्णपद्धतिः
कयानुपूर्व्वी समकेति केति च ।
इमे समक्षव्यवहारमावयोः
पदे विधातुं खलु युष्मदस्मदी ॥९॥
यदि स्वभावान्मम नोज्ज्वलं कुलं
तदा तदुद्भावनमौचिती कुतः ।

नामजिज्ञासा निष्प्रयोजनेत्याह ॥ वृथेति ॥ आनुपूर्वी उत्तरोत्तरत्वसम्बन्धेन पूर्वपूर्ववर्णवत्ता कया आनुपूर्व्या उपलक्षिता कीदृगानुपूर्व्यवच्छिन्ना का वर्णपद्धतिरक्षरपङ्क्तिर्मयि समकेति सङ्केतिता गृहीतेति का इतीयं कथा कथनं पृच्छा वृथा निष्प्रयोजना नामपृच्छा विफलेत्यर्थः अत्र चकारः पादपूरणार्थः ननु नाम्नोऽपरिज्ञाने व्यवहारसिद्धिः कथमित्यत आह खलु यस्मात् आवयोस्तव मम च समक्षं प्रत्यक्षं व्यवहारं विधातुं सम्पादयितुं युष्मदस्मदी युष्मदस्मच्छब्दाभ्यां निष्पन्ने त्वं अहं इति पदे इमे योग्ये त्वमहमितिपदाभ्यामेवावयोः प्रत्यक्षव्यवहारसिद्धिर्भवतीत्यतोनामजिज्ञासा विफलेत्यर्थः अत्र सङ्केतो भगवदिच्छाविषयतावत्पित्रादीच्छाविषयतारूपोऽपि बोध्यः। आवयोरिति परत्वादस्मदः शेषः युष्मदस्मदी इति स्वरूपवाचकत्वादादेशाभावः ।९।

कुलजिज्ञासापि नोचितेत्याह ॥ यदीति ॥ यदि मम कुलं वंशः स्वभावात् उज्ज्वलं निर्म्मलं प्रशस्तं न भवेत् तदा तस्य अप्रशस्तकुलस्य उद्भावनं कथनं मम कुतः कस्मात् औचिती अपि तु अनौचित्यमेव

Digitized by Google

अथावदातं तदहो विडम्बना
तथा कथा प्रेष्यतयोपसेदुषः ॥ १० ॥
इति प्रतीत्यैव मयावधीरिते
तवापि निर्ब्बन्धरसो न शोभते ।
हरित्पतीनां प्रतिवाचिकं प्रति
श्रमो गिरां ते घटते हि संप्रति ॥ ११ ॥
तथापि निर्ब्बध्नति तेऽथवा स्पृहा
मिथानुबन्धे मितया न किं गिरा ।

अप्रशस्तस्वकुलकथनमनुचितमेवेत्यर्थः । अथ यदि तत्कुलं अवदातं प्रशस्तं भवेत् तत्तदा प्रेष्यतया परदूतत्वेन उपसेदुषस्तत्समीपमागतस्य मम तथा तादृशी प्रशस्तवंशपरिचयरूपा कथा अहो कष्टं विडम्बना धिक्कारः नीचकर्म्मप्रवृत्तस्य स्वकुलोत्कर्षकथनमुपहासाय भवतीत्यर्थः । अवदातमिति दैपशोधने क्तः उपसेदुष इति वस्वन्तात् सीदते षष्ठी ॥ १० ॥

उपसंहरति । इतीति । हे भैमि इति पूर्व्वोक्तं वैयर्थ्यमनौचित्यञ्च प्रतीत्यैव विचार्य्यैव मया अवधीरिते उपेक्षिते कुलनामप्रश्नोत्तररूपे विषये तवापि निर्ब्बन्धे आग्रहे रसोऽनुरागो न शोभते न युज्यते संप्रति इदानीं हरित्पतीनां दिक्पालानामिन्द्रादीनां प्रतिवाचिकं प्रत्युत्तरं प्रति उद्दिश्य ते तव गिरां वाचां श्रम आयासो हि निश्चितं घटते युज्यते निरर्थककुलनामजिज्ञासायामाग्रहं त्यक्त्वा तव दिक्पालानां वचनप्रत्युत्तरकथनं युक्तमित्यर्थः ॥ ११ ॥

इत्यमुक्त्वा भैम्या दौर्म्मनस्यमालक्ष्याह । तथापीति अथवा पूर्व्वा भैमि हे तथापिनिर्ब्बध्नति कुलनामकथनस्यानुचितत्वेऽपि निर्ब्बन्धं

Digitized by Google

हिमांशुवंशस्य करीरमेव मा
निशम्य किं नासि फलेग्रहिग्रहा ॥ १२ ॥
महाजनाचारपरम्परेदृशी
स्वनाम नामाददते न साधवः ।
ततोऽभिधातुं न तदुत्सहे पुन
र्जनः किलाचारमुचं विगायति ॥ १३ ॥

आग्रहं कुर्व्वति भैमि अहं इह मत्कुलनामकथनविषये ते तव स्पृहां इच्छां मितया स्वल्पया गिरा वाचा किं न अनुबन्धे नावृणोमि अपि तु तव स्पृहाया अनुरोधं करोम्येवेत्यर्थः संक्षेपेण कथयामीति भावः मित गिरमेवाह हे भैमि त्वं हिमांशुवंशस्य चन्द्रवंशस्य करीरमङ्कुरं चन्द्र वंशे जातं मां निशम्यैव आकर्ण्यैव फलेग्रहिः सफलोग्रहोनिर्ब्बन्धो यस्या स्तादृशी किं नासि न भवसि अपि तु चन्द्रवंशे जातोऽयमिति मत्वा सफलनिर्ब्बन्धा भव । स्यादवन्ध्यः फलेग्रहिरित्यमरः ॥ १२ ॥

तर्हि नाम कथं न वदसीत्यत आह ॥ महाजनेति । नाम प्रसिद्धौ साध वो महान्तः स्वनाम निजसंज्ञां न आददते न कथयन्ति इतीदृशी महाजनानां साधूनां आचारपरम्परा व्यवहारधारा ततोहेतोस्तत्स्वनाम अभिधातुं कथयितुं अहं नोत्सहे न शक्नोमि किल यस्मात् जनोलोक आचारमुचं व्यवहारत्यागिनं जनं पुनर्विगायति निन्दति । आत्मनाम गुरोर्नाम नामापि कृपणस्य च । आयुष्कामी न गृह्णीयाज्ज्येष्ठापत्यकल त्रयोरिति महाजनव्यवहारः ॥ १३ ॥

Digitized by Google

अहोऽयमालप्य शिखीव शारदो
बभूव तूष्णीमहितापकारकः ।
अथास्य रागस्य दधा पदे पदे
वचांसि हंसीव विदर्भजाददे ॥ १४ ॥
सुधांशुवंशाभरणं भवानिति
श्रुतेऽपि नापैति विशेषसंशयः ।

एवमुक्ता तूष्णीम्भूते नले भैम्युवाचेत्याह ॥ अह इति ॥ अयं नलोऽदः पूर्वोक्तं आलप्य उक्ता तूष्णीं बभूव मौनीभूतः किम्भूतः शारदः शारदा सरस्वती तत्सम्बन्धी वचनपण्डित इत्यर्थः तथा अहितानां शत्रूणां अप कारको हिंसकः क इव शारदः शरत्कालीनः शिखी मयूर इव मयू रोहि वर्षासु रतं कृत्वा शरदि तूष्णीं भवति सोऽपि अहीनां सर्पाणां भक्षकत्वात् तापं करोतीति तादृशः अथानन्तरं विदर्भजा दमयन्ती अस्य नलस्य पदे पदे प्रतिसुप्तिङन्तं मधुरत्वात् रागस्य अनुरागस्य दधा धारयित्री सती स्वप्रयुक्ते पदे पदे नलस्य अनुरागस्य दधा जन यित्री वा वचांसि वचनानि आददे उवाच उपमिमीते हंसीव हंसी हि शरदि मयूरे तूष्णीम्भूते मधुरं रौति हंस्यपि पदे पदे चरणद्वये आस्य रागस्य मुखस्येव रक्तताया दधा धारयित्री लोहितास्यचरणेत्यर्थः शरदि हंसा मधुरस्वरा भवन्ति नमयूराः तथाच शरदि हंसरवाः परुषी कृतस्वरमयूरमयूरमणीयतामिति माघः । रागस्येति कर्मणि षष्ठी दधेति दधातेर्विभाषेति श इति पाणिनीयाः ॥ १४ ॥

भैमीवचांस्येवाह ॥ सुधांश्विति ॥ भवान् सुधांशुवंशाभरणं चन्द्र वंशालङ्कारश्चन्द्रवंशे जात इति सामान्ये श्रुतेऽपि मम विशेषसंशयः

Digitized by Google

कियत्तु मौनं वितता कियत्तु वा
चमत्कृतो वञ्चनचातुरी तव ॥१५॥
मयापि देयं प्रतिवाचिकं न ते
स्वनाम मत्कर्णसुधामकुर्व्वते ।
परेण पुंसा हि ममापि सङ्कथा
कुलाबलाचारसहासनासहा ॥१६॥

नलो वाऽन्यो वा कश्चनेति विशेषविषयः सन्देहो नापैति नामाकथना न्नापगच्छति अहो आश्चर्यकारिणी तव वचने प्रतारणायां चातुरी चातुर्य्यं महती यतः कियत्तु किञ्चेषु नामादिप्रश्नेषु मौनं प्रत्युत्तरादानं कियत्तु कुतः किमर्थमागतोऽसीत्यादिप्रश्नेषु वाक् दिक्पालसन्देशकथनरूपा वाणी वितता विस्तृता प्रस्तुतं सन्देशमनुक्त्वा अप्रस्तुतं प्रलपतीति त्वमतितरां प्रतारणाकुशल इति भावः ।१५।

मयापीति । स्वनाम निजाख्यां मम कर्णयोः सुधाममृतरूपामकुर्व्वते मम अत्यन्तसुखदं स्वनाम न कथयते ते तुभ्यं मयापि प्रतिवाचिकं प्रत्युत्तरं न देयं न दातुमुचितं अत्र हेतुमाह हि यस्मात् परेण पुंसा परपुरुषेण सह ममापि सङ्कथा संलापः कुलाबलानां कुलाङ्गनानां आचारेण सहासनं एकस्मिन्नासने उपवेशनं तत् न सहते इति तादृशी कुलाङ्गनाचारपरपुरुषसङ्कथयोः सामानाधिकरण्यमत्यन्तमनुचितमित्यर्थः यथा त्वया सदाचारभङ्गभिया नाम न कथ्यते तथा मयापि कुलाङ्गनाचारभङ्गभिया स्वाभिप्रायो न कथ्यते इति भावः ।१६।

Digitized by Google

हृदाभिनन्द्य प्रतिबन्ध्यनुत्तरः
प्रियागिरः सस्मितमाह स स्म तां ।
वदामि वामाक्षि परेषु मा क्षिप
त्वमीदृशं माक्षिकमाक्षिपद्वचः ॥ १७ ॥

इत्थमुक्तवतीं भैमीं नलः प्रत्युवाचेत्याह ॥ हृदेति ॥ स नलः हृदा मनसा प्रियाया भैम्या गिरोवचनानि अभिनन्द्य स्तुत्वा प्रतिबन्ध्या कुलाङ्गनाचारानुचिता परपुरुषसङ्कथामहमपि न करोमीत्येवंरूपया अनुत्तरः प्रतिवचनासमर्थः सन् सस्मितं सहास्यं यथा तथा तां भैमीं आह स्म उवाच किमुवाचेत्याह हे वामाक्षि वक्रनयने कुटिलविलोकनशीले इत्यर्थः मनोरमनयने वा भैमि माक्षिकं मधु आक्षिपत् तिरस्कुर्वत् अति मधुरं त्वं स्वीयमीदृशमेवंविधं प्रतिबन्ध्यादिरूपं वचः परेष्विन्द्रादिष्वतिरिक्तेषु मद्भिन्नेषु मा क्षिप मा कथय इति वदामि इन्द्रादीन् प्रत्येव एवं वक्तुमुचितं न तु मां प्रति प्रतिबन्धीं त्यक्त्वा ऋजुमार्गेणैव प्रत्युत्तरं देहीति भावः यद्वा हे वामाक्षि त्वां माक्षिकमाक्षिपदतिमधुरं हितकरं वचो वदामि त्वं ईदृशं त्वं इन्द्रादिदूतत्वेनात्मीयं पुरुषं मां परेषु पुरुषेषु मध्ये माक्षिप मागणय येन सह सङ्कथया पातिव्रत्यभङ्गो भवेत् किन्त्विन्द्रादिदूतत्वात् त्वदीयएवाहमिति मह्यमुत्तरे दत्ते कापि न ते पातिव्रत्यक्षतिरिति भावः अथवा माक्षिकमाक्षिपद्वचः परेषु माक्षिप किन्तु मयि क्षिप मयि परबुद्धिं माकुर्विति त्वदीयो नलएवाहमिति भावः व्याख्यान्तराणि तु ग्रन्थगौरवभयान्न लिखितानि ॥ १७ ॥

Digitized by Google

करोषि नेमं फलिनं मम श्रमं
दिशोऽनुगृह्णासि न कञ्चन प्रभुं ।
त्वमित्थमर्हासि सुरानुपासितुं
रसामृतस्नानपवित्रया गिरा ॥ १८ ॥
सुरेषु सन्देशयसीदृशीं बहुं
रसस्रवेण स्तिमितां न भारतीं ।

करोषीति । हे भैमि इमं मम दौत्यायासं फलिनं सफलं न करोषि अपितु सफलं कुरु तथा दिशः कञ्चन प्रभुं इन्द्रादिषु चतुर्षुमध्ये अन्यतमं दिक्पालं न अनुगृह्णासि अपि तु स्वयम्वरेणानुगृहाण इत्थं पूर्व्वोक्तया रसः शृङ्गाररस एव अमृतं सुधा तत्र यत् स्नानं निमज्जनं रसामृतस्नानमितियावत् तेन पवित्रया शुद्धया गिरा वाचा सुरानिन्द्रादीन् उपासितुं आराद्धुं अर्हासि योग्या भवसि यथा गिरा मां तोषयसि तथा तानपि तोषयेत्यर्थः एवंभूतां वार्त्तां तान् प्रति सन्दिशेतिभावः अथच अमृतसिक्तवस्तुद्वारा देवानामाराधना युज्यते ॥ १८ ॥

सुरेष्विति । हे भैमि ईदृशीं पूर्व्वोक्तप्रकारां बह्वीं विपुलार्थां रसस्य शृङ्गारस्य स्रवेण क्षरणेन स्नपनेन स्तिमितां स्निग्धां भारतीं वाणीं सुरेषु इन्द्रादिषु न सन्देशयसि न सन्दिष्टां करोषि अपितु सन्देशय या भारती मदर्पिता मयि उक्ता सती दर्पकेण कन्दर्पेण तापितेषु पीडितेषु दावो वनाग्निस्तेन अर्द्दितः पीडितो योदावो वनं तस्य वृष्टितां प्रयाति गमि

Digitized by Google

मदर्पिता दर्पकतापितेषु या
प्रयाति दावार्दितदाववृष्टितां ॥ १९ ॥
यथायथेह त्वदपेक्षयानया
निमेषमप्येषजनोविलम्बते ।
रुषा स्मरव्यीकरणे दिवौकसां
तथातथाद्य त्वरते रतेः पतिः ॥ २० ॥
इयच्चिरस्यावदधन्ति मत्पथे
किमिन्द्रनेत्राण्यनिमेषतां ययुः ।

व्यति यथा दह्यमानस्य वनस्य वह्नी वृष्टिः सुखाय भवति तथा मदर्पिता वाणी कामपीडितानामिन्द्रादीनां सुखाय भविष्यतीत्यर्थः अतो झटिति प्रतिसन्दिश्यतामिति भावः । कन्दर्पोदर्पकोऽनङ्ग इत्यमरः दवदावौ तु वन वह्नौ वनेऽप्युभाविति मेदिनी ॥ १९ ॥

यथेति ॥ हे भैमि एष मल्लक्षणो जनोऽनया त्वदपेक्षया त्वत्तः प्रत्युत्तरश्रवणाकाङ्क्षया इह त्वत्सन्निधौ यथायथा निमेषमपि निमेषपरिमितमल्पकालमपि विलम्बते कालक्षेपं करोति तथातथा रतेः पतिः कामो रुषा कोपेन दिवौकसां देवानामिन्द्रादीनां स्मरव्यीकरणे लक्ष्यीकरणे अद्य अस्मिन् दिवसे त्वरते सत्वरोभवति मम विलम्बेन तेषां कामपीडाऽधिकतरा जायते ततः सत्वरं प्रत्युत्तरं देहीति भावः त्वदुपेक्षयेति पाठे तया कृतया उपेक्षया प्रत्युत्तरादानरूपया अवज्ञयेत्यर्थः ॥ २० ॥

इयदिति ॥ इयच्चिरस्य एतावद्बहुकालपर्यन्तं मत्पथे मम प्रत्यागमनवर्त्मनि अवदधन्ति निर्निमेषं सावधानानि इन्द्रस्य नेत्राणि सहस्राणि

Digitized by Google

धिगस्तु मां सत्वरकार्य्यमन्थरं
स्थितः परः प्रेष्यगुणोऽपि यत्र न ॥ २१ ॥
इदं निगद्य क्षितिभर्त्तरि स्थिते
तयाऽभ्यधायि स्वगतं विदग्धया ।

वंचं किं न निर्म्ममौ न जनयामास अपि तु सष्टमेव तानि निर्मितवत् अन्यथा तेषां विलम्बसहनदार्ढ्यं वाप्यमित्यर्थः आत्मानमपि निन्दन्नाह सत्वरे कार्य्ये मन्थरं मन्दं अशीघ्रकारिणं मां धिक् खलु अहमपि निन्द्यो यो भवेयमित्यर्थः यतो यत्र मयि परः श्रेष्ठः प्रेष्यस्य दूतस्य गुणोऽपि क्षिप्रकारित्वादिर्न स्थितो न विद्यते शीघ्रं कार्य्यं निष्पाद्य प्रभुसन्निधौ गन्तव्यमिति दूतगुणः मयि तु तस्याभावान्निन्दनीयो भवेयमित्यर्थः झटिति प्रत्युत्तरं दत्वा मां प्रेषयेति भावः ॥ २१ ॥

इत्यमुक्ता तूष्णीम्भूते नले भैमी मनसा चिन्तयति स्मेत्याह ॥ इदमिति ॥ क्षितिभर्त्तरि नले इदं पूर्व्वोक्तं निगद्य उक्ता स्थिते तूष्णीभावं प्राप्ते सति विदग्धयातिचतुरया तया भैम्या स्वगतं अप्रकाशं यथा तथा अभ्यधायि अवादि मनसि चिन्तितमित्यर्थः तया किम्भूतया भुवो भूलोकस्य स्मरं कन्दर्पं अतिसुन्दरं तं नलं अधिक्षि क्षियामधिकृत्य दूततां दूतं कुर्व्वतामिन्द्रादीनां नये नीतौ यत् नैपुण्यं कौशलं तस्य क्षये अभावे मनोदधत्या धारयन्त्या कीदृशु अभव्यः सामान्यो दूतः प्रेषणीय इति नीतिः तेस्तु अतिसुन्दरोऽयं प्रेषित इति ते नीतिशास्त्रं न जानन्तीति मनसि चिन्तयन्त्येत्यर्थः । नोऽन्यतं कथयन्त्याह सार्द्धमन्तं तथा

Digitized by Google

अभिज्ञि तं दूतयता भुवः स्मरं
मनोद्भवत्या नयनैपुणव्यये ॥ २२ ॥
जलाधिपस्त्वामदिशन्मयि ध्रुवं
परेतराजः प्रजिघाय स स्फुटं ।
मरुत्वतैव प्रहितोऽसि निश्चितं
नियोजितश्चोर्द्ध्वमुखेन तेजसा ॥ २३ ॥

तुरं दूतं वापि हि दूतीन्वा बुधः कुर्य्यात् सदायनेति नीतिः सुन्दरं तदयं जन्तुं न स्त्रियां दूतयेत् सुधीरिति च । अभिज्ञीति समव्ययीभावः ॥ २२ ॥

तं प्रति तया स्वगतं यदुक्तं तदेवाह ॥ जलाधिप इति ॥ जलानामधिपो वरुणो मयि विषये ध्रुवं निश्चितं त्वां आदिशत् आदिष्टवान् तथा स प्रसिद्धः परेतराजो यमः स्फुटं निश्चितं त्वां प्रजिघाय प्रेरितवान् एवं मरुत्वता इन्द्रेण निश्चितं प्रहितोऽसि प्रेरितोऽसि ऊर्द्ध्वमुखेन तेजसा वह्निना च त्वं नियोजितः प्रेरितः सत्यमेव त्वं वरुणादिभिः प्रेषितोऽसी त्यर्थः अथच अतिसुन्दर्यां मयि अतिसुन्दरं त्वां यः समादिशत् स पूर्व्वोक्तनीतिलङ्घनात् निश्चितं जडानां स्वामी अतिमूर्खइत्यर्थः यश्च तादृश्यां मयि तादृशमेव त्वां प्रेषितवान् स परेतानां मृतानां राजैव न सचेतनानां इत्यर्थः येन तादृश्यां मयि तादृशस्त्वं नियोजितः स मरुत्वान् वातुलः येन च तादृश्यां मयि तादृशस्त्वं नियोजितः स ऊर्द्ध्वमुखः पिशाचः पिशाचोहि ऊर्द्ध्वमुखोभवति ऊर्द्ध्वमुखत्वेन त्वन्मुखसौन्दर्य्यं तेन न दृष्टमित्यपि सूचितं दैवैस्त्वयाद्य मयैव मत्तं सम्बोध्यैवमुक्तिः ॥ २३ ॥

Digitized by Google

अथ प्रकाशं निभृतस्मिता सती
सतीकुलस्याभरणं किमप्यसौ।
पुनस्तदाभाषणविभ्रमोन्मुखं
मुखं विदर्भाधिपसम्भवा दधौ॥२४॥
वृथा परीहास इति प्रगल्भता
ननेति च त्वाद्दशि वाग्विगर्हणा।

अथेति ॥ अथ तदुत्तरचिन्तनानन्तरं सतीकुलस्य पतिव्रतासमूहस्य किमपि लोकोत्तरं आभरणं अलङ्कारोऽतिसाध्वीत्यर्थः असौ विदर्भाधिपसम्भवा भीमनृपतनया दमयन्ती निभृतं संवृतं स्मितमीषद्धसनं यथा तादृशी सती भवन्ती प्रकाशं व्यक्तं यथा तथा तेन नलेन सह यदाभाषणमालापस्तत्र यो विभ्रमस्तत्सम्बन्धो वा विभ्रमोविलासस्तत्रोन्मुखं उत्सुकं मुखं पुनर्दधौ धारयतिस्म नलं प्रति पुनरुवाचेत्यर्थः निभृतस्मितेति अहो अयाच्याअपीन्द्रादयोमां वाञ्छन्तीति जायमानमपि स्मितं सतीस्वभावान्निवारितवतीत्यर्थः तदाभाषणेति नलबुद्ध्या तेन सहाभाषणं मुख्यं उत्तरदानन्तु प्रासङ्गिकमिति सूचितं॥२४॥

वृथेति॥ हे देवदूत इतोऽस्मादग्रेतोऽत्र तुभ्यं प्रतिवाचं प्रत्युत्तरं प्रदित्सुरस्मि प्रदातुमिच्छामि इतः कुतः यतो वृथा निष्प्रयोजनोऽयं परीहास उपहासः भवान् वृथा परीहासं करोतीत्युक्ते प्रगल्भता धार्ष्ट्यं भवति यतश्च त्वादृशि महानुभावशालिनि जने ननेति वाक् नाहं त्वदुक्तं करिष्यामीति पुनःपुनर्निषेधवचनञ्च विगर्हणा विशेषेण निन्दैव

Digitized by Google

भवत्यवज्ञा च भवत्यनुत्तरा
दितः प्रदित्सुः प्रतिवाचमस्मि ते ॥ २५ ॥
कथं नु तेषां कृपयापि वागसौ
वसावि मानुष्यकलाञ्छने जने ।
स्वभावभक्तिप्रवणं प्रतीश्वराः ।
कया न वाचा मुदमुद्गिरन्ति वा ॥ २६ ॥

भवति भग्नजनोपि सोपपत्तिकवचनेनैव निरसनीयो नतु निषेधाक्षरैव अन्यथा निरासकस्याधिकतरा निन्दा भवतीति त्वयि निषेधवचनमनुचितमित्यर्थः यतश्च भवति महापुरुषे त्वयि अनुत्तरात् उत्तरादानात् अवज्ञा अनादरश्च भवति इतएव हेतोरूत्तमुपपत्तियुतां प्रतिवाचं प्रदातुमिच्छामीत्यन्वयः एतादृक् पृष्टं परीहासबुद्धेवोपेक्षणीयं निषेधाक्षरैरेव वा निरसनीयं किम्वा तूष्णीम्भावेनानादरणीयं किन्तु तथात्वेन महामहिम्नस्तव दौर्मनस्यं भवेदिति तवैवानुरोधात्प्रतिवक्तुमारभ्यते नत्विन्द्रादीनामित्यर्थः । नमेति देवानां पृथक् पृथक्प्रिषेधसूचनार्थं द्विर्वचनं परीहास इति प्रादेर्घञि बहुलमित्युपसर्गस्य दीर्घः ॥ २५ ॥

कथमिति॥ नु प्रश्ने विस्मये वा मानुष्यकं मनुष्यत्वरूपं लाञ्छनं कलङ्को यस्य तादृशे मल्लक्षणे जने तेषामिन्द्रादीनां कृपयापि दययापि असौ इदृशी वाक् भैमि अस्मान् वृणीष्वेति वचनं कथं असावि प्रसूता निःसारिता यद्यपि देवा मयि कृपावन्तोजातास्तथापि मानव्या देवानर्हत्वात् मानव्यां मयि देवानां तेषामेवंकथनमनुचितमित्यर्थः वा अथवा स्वभावाद्या भक्तिस्तया प्रवणं नम्रं जनं प्रति उद्दिश्य ईश्वराः प्रभवः कया वा वाचा मुदं हर्षं न उद्गिरन्ति अपितु यया कयापि वाचा हर्षं प्राप्नुन्तीत्यर्थः तेषां हर्षप्रकटनएव तात्पर्य्यं न तु मद्वचने इतिसोल्लुण्ठनमितिभावः ।२६।

Digitized by Google

अहो महेन्द्रस्य कथं मयौचिती
सुराङ्गनासङ्गमशोभिताश्रुतः ।
ह्रदस्य हंसावलिमांसलश्रियो
बलाकयेव प्रबला विडम्बना ॥ २७ ॥
पुरः सुरीणां भण केव मानुषी
न यत्र तास्तत्र तु सापि शोभिका ।

अहो इति । अहो विषादे सम्बोधने वा सुराङ्गनानामुर्वश्यादीनां सङ्गमेन सम्भोगेन शोभितुं शीलमस्य तस्य भावस्तत्ता तां बिभर्त्ति धारयतीति तादृशस्य महेन्द्रस्य मानव्या मया कृता प्रबला अतिमहती विडम्बना सम्भोगयाच्ञारूपा चातुरी कथं उचिता योग्या अपितु अनुचितेत्यर्थः उपमिनोति हंसावलिभिर्हंसानां श्रेणीभिर्मांसला अतिबहुला श्रीः शोभा यस्य तादृशस्य ह्रदस्य सरोविशेषस्य बलाकयेव बकीव यथा हंसश्रेणीशोभितस्य ह्रदस्य बलाकया कृता प्रबला विडम्बना अनुचिता भवति तथेत्यर्थः महेन्द्रस्य सुराङ्गनाविहाय मानवीवरणाभिलाषोऽनुचित इति इन्द्रवरणनिषेधे अस्य तात्पर्यं सूचितं ॥ २७ ॥

पूर्वोक्तमेव स्फुटति । पुर इति । हे देवदूत सुरीणां देवीनां पुरोऽग्रे मानवी केव भण कथय अपितु न कापि कुत्सितैवेत्यर्थः तर्हि मानवी कुत्र शोभत इत्याह यत्र तु ताः सुर्य्यो न विद्यन्ते तत्र पृथिव्यां सापि मानव्यपि शोभिका शोभाशालिनी मानुष्यपेक्षयाहं सुन्दरी नतु देव्यपेक्षयेत्यर्थः अत्रैव दृष्टान्तमुपन्यस्यति अनाभरणे सर्वाभरणशून्ये अकिञ्चनस्य दरिद्रस्य नायिकायाः किरीटोत्कर्षे अल्पाभरणे कश्चिदुत्कर्ष इत्यर्थः

Digitized by Google

अकाञ्चने ऽकिञ्चननायिकाङ्गके।
किमारकूटाभरणेन न श्रियः॥ २८॥
यथातथा नाम गिरः किरन्तु ते
श्रुती पुनर्मे बधिरे तदक्षरे।
पृषत्किशोरी कुरुतामसङ्गतां
कथं मनोवृत्तिमपि द्विपाधिपे॥ २९॥
अदोनिगद्यैव नतास्ययानया
श्रुतौ लगित्वाभिहितालिरालपत्।

आरकूटाभरणेन पित्तलालङ्कारेण किं श्रियः शोभा न भवन्ति अपि तु भवन्त्येव पूर्व्वोक्तमेव तात्पर्य्यं रीतिः स्त्रियामारकूट इत्यमरः॥ २८॥

देवानां वाचिकमपि मे श्रवणायोग्यमित्याह॥ यथातथेति॥ ते देवा यथातथा येन तेन प्रकारेणाभिलाषेण छलया वा गिरः प्रार्थनावचनानि नाम किरन्तु क्षिपन्तु यथासुखेन वदन्त्वित्यर्थः मे मम श्रुती कर्णौ पुनस्तदक्षरे तासां गिरामेकस्मिन्नप्यक्षरे विषये बधिरे श्रोतुमशक्ते अयोग्यत्वात्तद्गिरो नाकर्णयामीत्यर्थः अत्र दृष्टान्तयति पृषतो हरिणस्य किशोरी बाला द्विपाधिपे ऐरावते हस्तिश्रेष्ठे वा असङ्गतामयोग्यां मनोवृत्तिमपि मनोरथमात्रमपि कथं कुरुतां अपितु नैव करोतीत्यर्थः पशुरपि बालापि हरिणी योग्यायोग्यविभागं जानाति ततो ऽप्यधिकज्ञानवती मादृशी कथमेवमयोग्ये विषये प्रवर्त्ततामिति भावः॥ २९॥

अनन्तरं भैमीसखीवचनमनुवदति॥ अद इति॥ अद एतावन्मात्रं निगद्यैव उक्त्वैव नतं लज्जया नम्रीकृतं आस्यं मुखं यया तथाभूतया सत्या अनया भैम्या श्रुतौ कर्णसमीपे लगित्वा नमया भूत्वा अभिहिता ममाभि

Digitized by Google

प्रविश्य यन्मे हृदयं ह्रियाह त
द्विनिर्य्यदाकर्णय मन्मुखाध्वना ॥ ३० ॥
बिभेमि चिन्तामपि कर्त्तुमीदृशीं
चिराय चित्तार्पितनैषधेश्वरा ।

प्रायं त्वमपि ज्ञास्यतस्त्वयैव कथ्यतामित्युक्ता चारुभैमीसखी चाप
पत् व्यक्तमुवाच किमालपदित्याह हे देवदूत इयं ह्रिया लज्जया मे
मम हृदयं प्रविश्य यदाह लज्जयैव स्वाभिप्रायं व्यञ्जयन्ती यत् कथयति
त्वं मम मुखमेव अध्वा पन्थास्तेन विनिर्य्यदागच्छत् तत् आकर्णय श्रृणु
लज्जावशाद्यदभिप्रेतमनया कथयितुं न शक्यते तदेव मया उच्यते ननु
स्वारसिकं किमपीति श्रूयतामिति भावः ॥ ३० ॥

बिभेमीति॥ ईदृशीं इन्द्रादिवरणं मदिष्टसाधनं नवेत्येवंविधां चिन्ता
मपि विचारमपि कर्त्तुं अहं बिभेमि भयं प्राप्नोमि किमुत निश्चयं
कर्त्तुमित्यपेरर्थः यतोऽहं चिराय बहुकालमेव चित्ते मनसि अर्पितः पति
त्वेन वृतो नैषधेश्वरो नलो यया तादृशी पातिव्रत्यभङ्गभिया विचार
यितुमपि नोत्सहे इत्यर्थः अथ च मम पतिर्नलो मनस्येव वर्त्तते विचा
रेऽपि मानसव्यापारस्तस्मात्तच्छ्रवणमाशङ्क्य बिभेमीत्यर्थः ननु विचारे
का बाधेत्यत आह किञ्च यस्मात् मृणालतन्तुवच्छिदुरा भिदुरा सती
स्थितिः पतिव्रतामर्य्यादा लवादपि अल्पादपि चापलात् मानसव्यभि
चारात् त्रुट्यति नश्यति यथा मृणालतन्तुः स्पर्शमात्रादपि छिद्यते तथा
अन्यविषयकथयापि सतीस्थितिर्भज्यत इत्यर्थः पतिं या नाभिचरवि

Digitized by Google

मृणालतन्तुच्छिदुरा सतीस्थिति
र्लवादपि त्रुट्यति चापलात् किल ॥ ३१ ॥
ममाशयः स्वप्नदशाशयापि वा
नलं विलङ्घ्येतरमस्पृशद्यदि ।
कुतः पुनस्तत्र समस्तसाक्षिणी
निजैव बुद्धिर्विबुधैर्न पृच्छ्यते ॥ ३२ ॥
अपि स्वमस्वप्नमसूषुपन्नमी
परस्य दारानवैतुमेव मां ।

मनोवाक्कायकर्म्मभिरित्यादिस्मृतेमानसव्यभिचारमाशङ्क्य विचारयि तुमपि बिभेमीति भावः ॥ ३१ ॥

अत्रेन्द्रादीनामपि विवेचना नास्तीत्याह ॥ ममेति ॥ मम आशयो ऽभिप्रायः स्वप्नदशायाः स्वप्नावस्थाया आशयापि वशेनापि वा यदि नलं विलङ्घ्य त्यक्त्वा इतरं पुरुषं अस्पृशत् विषयीचकार तर्हि विबुधै र्देवैरिन्द्रादिभिः अथ च विशेषेण बुध्यन्तीति विबुधैः पण्डितैस्तैस्तत्र तस्मिन् विषये समस्तसाक्षिणी निखिललोकवृत्तग्राहिणी निजैव आत्मी यैव बुद्धिः कुतः कस्माद्धेतोः पुनर्न पृच्छ्यते अपि तु पृच्छ्यतामित्यर्थः स्वप्नावस्थायामपि नाहं नलादन्यं चिन्तयामीति सर्व्वज्ञत्वाज्ज्ञानद्भिरपि देवैः कथं तवात्र नियोगः कृत इति भावः ॥ ३२ ॥

देवानुपहसन्त्याह ॥ अपीति ॥ अमी देवा मां परस्य दारान् स्त्रियं अव वैतुं ज्ञातुमेव अस्वप्नमपि स्वभावतः स्वप्नशून्यमपि स्वमात्मानं असूषुपन् निद्रापयामासुः जागरणावस्थायां इयं परस्य दारा इति ज्ञातुं शक्नुयु

Digitized by Google

स्वयं दुरध्वार्णवनाविकाः कथं
स्पृशन्तु विज्ञाय हृदापि तादृशीं ॥ ३३ ॥
अनुग्रहः केवलएष मादृशे
मनुष्यजन्मन्यपि यन्मनोजने ।
स चेद्विधेयस्तदमी तमेव मे
प्रसद्य भिक्षां वितरीतुमीशतां ॥ ३४ ॥

एतत्तद्भागायैव अलग्ना अपि स्वप्नमङ्गीचक्रुरित्यर्थः अपि सम्भावनायां वा एतदर्थमेव स्वप्नमङ्गीचक्रुरिति सम्भावयामीत्यर्थः अत्रान्यथानुपपत्तिं प्रमाणयति अन्यथा स्वयमात्मनैव दुष्टोऽध्वा दुरध्वः परदारप्रार्थनमार्गः स एव अर्णवः समुद्रस्तन्नाविकास्तमुत्तारयितुं कर्णधारा अमी देवा मां तादृशीं परदारान् विज्ञाय हृदापि मनसापि कथं स्पृशन्तु अभिलषन्तु अपि तु न कथमपि कुपथप्रस्थाननिवारकाणामेतदनुचितमित्यर्थः अतः स्वप्नवशादेव मां ते प्रार्थयन्तीति भावः एवं विधा अपि परदारानभिलषन्तीत्युपहासः। अस्तुषुपन्निति त्रिकन्तात् स्वपिते र्लुङ् अन् स्वपः सुप्स्वननोक्षेति सुपादेशः ॥ ३३ ॥

स्तुवन्त्याह ॥ अनुग्रहइति ॥ मनुष्यजन्मन्यपि मनुष्याज्जन्म यस्य तथाविधेऽपि मादृशे मत्सदृशे जने यत् एषां मनोऽनुरक्तमिति शेषः एष केवलोऽनुग्रहोऽनुकम्पैव नतु दोषायेत्यर्थः चेद्यदि सोऽनुग्रहोऽविधेयः कर्त्तव्यस्तर्हि अमी देवाः प्रसद्य प्रसन्ना भूत्वा मे मह्यं तमेव नलमेव भिक्षां वितरीतुं दातुं ईशतां प्रभवन्तु देवैः प्रसन्नीभूय नलएव दीयतां मदभिलाषः कर्त्तव्य इत्यर्थः। वितरीतुमिति वृङवृञ्भ्यतामित्यादिना इट् ॥ ३४ ॥

Digitized by Google

अपि द्रढीयः शृणु मे प्रतिश्रुतं
सपीडयेत् पाणिमिमं न चेन्नृपः।
हुताशनोद्बन्धनवारिवारितां
निजायुषस्तत् करवै स्ववैरितां ॥ ३५ ॥
निषिद्धमप्याचरणीयमापदि
क्रिया सती नावति यत्र सर्व्वथा।

नलस्याप्राप्तौ न जीविष्यामीत्याह ॥ अपीति ॥ अपि किञ्च हे दूत द्रढीयो दृढतरं केनाप्यनिवार्य्यं मे मम प्रतिश्रुतं प्रतिज्ञातं शृणु तदेवा ह स नृपो नलश्चेद्यदि इमं मदीयं पाणिं न पीडयेत् इच्छायुपरोधान्न गृह्णी यात् तत्तदा हुताशनेन वह्निदाहेन उद्बन्धनेन गलरज्ज्वादिना वारि णा जलप्रवेशेन च वारितां निवारितां धर्म्मशास्त्रादौ निषिद्धामपि निजा युषः स्वजीवनकालस्य स्ववैरितां स्वेनैव शत्रुतां करवै करिष्यामि नला प्राप्तौ निषिद्धमपि आत्मघातनं करिष्यामीत्यर्थः ॥ ३५ ॥

नन्वात्मघातोऽनुचित इत्यत्राह ॥ निषिद्धमिति ॥ यत्र यस्यां आपदि सती शोभना श्रुत्यादौ विहिता क्रिया सर्व्वथा सर्व्वप्रकारेणापि न अव ति न रक्षति आत्मानमित्यर्थात् तत्र आपदि सत्यां निषिद्धमपि श्रुत्यादौ प्रतिषिद्धमपि कर्म्म आचरणीयं अनुष्ठेयं गत्यन्तराभावात् इदमेवार्था न्तरन्यासेन द्रढयति हि यस्मात् घनाम्बुना मेघजलेन निविडजलेन वा राजपथे राजमार्गे पिच्छिले पङ्किले सति बुधैरपि न केवलं मूर्खैः पण्डि तैरपि क्वचित् किञ्चिदुद्दिश्य अपथेन कुमार्गेण गम्यते तस्मान्नलाप्राप्तौ

Digitized by Google

घनाम्बुना राजपथे हि पिच्छिले
क्वचिद्बुधैरप्यपथेन गम्यते ॥ ३६ ॥
स्त्रिया मया वाग्मिषु तेषु शक्यते
न जातु सम्यग्वितरीतुमुत्तरं ।
मदर्थ सन्दिष्टमृतार्थपद्धती
प्रबन्धृता स्तु प्रतिबन्धृता न ते ॥ ३७ ॥
निरस्य दूतः स्म तया विसर्ज्जितः
प्रियोक्तिरप्याह कदुष्णमक्षरं ।

ममात्मघातोऽपि न दोषाय भविष्यतीति भावः। अपथेनेति नञः पथोवे ति पञ्चीवत्तेत्समासान्तः ॥ ३६ ॥

बहुजल्पनेनालमेतावतैवात्र निरस्तो भवेत्युपसंहरन्नाह ॥ स्त्रियेति ॥ स्त्रिया स्त्रीत्वादल्पमतिकया मया वाग्मिषु तेषु देवेषु सम्यक् समीचीनं उत्तरं वितरीतुं दातुं जातु कदाचिदपि न शक्यते तत्तस्मादन्यास्यां मम भाषितमेव संक्षिप्तत्वात् सूत्रं तस्य पद्धतीरचना तस्यां विषये ते तव प्रबन्धृता प्रबन्धकर्तृत्वं टीकाकारत्वं खलु भवतु नतु प्रतिबन्धृता प्रति कूलत्वं खलु अन्यत्रापि एकस्य सूत्रोपरि अपरैव प्रबन्धः क्रियते संक्षेपे णैव मया उक्तं अत्र मदभिप्रायं ज्ञात्वा इदमेव स्वकल्पितैर्विवरणपदै र्बहुलीकृत्य देवा बोधनीया न पुनर्मद्वचनोपरि दोषारोपेण देवानां समीपे प्रतिकूलत्वमाचरणीयमित्यर्थः। इयदेव तत्प्रश्नस्योत्तरं पल्लवि तेनालमिति भावः ॥ ३७ ॥

अथ नलः किञ्चिज्जातरोष इव कथयति श्लोकेनाह ॥ निरस्येति ॥ तया तेन पूर्व्वोक्तप्रकारेण निरस्य निराकृत्य विसर्ज्जितः प्रस्थापितो दूतो

Digitized by Google

कुतूहलेनेव मुहुः कुहूरवं
विडम्ब्य डिम्भेन पिकः प्रकोपितः ॥ ३८ ॥
अहो मनस्त्वामनु तेऽपि तन्वते
त्वमप्यमीभ्योविमुखीतिकौतुकं ।
क वा निधिर्निर्धनमेति किञ्च तं
स वाक्कवाटं घटयन्निरस्यति ॥ ३९ ॥

नलः प्रियोक्तिरपि मधुरवचनोऽपि कटुकं सन्तापकरं परुषं अक्षरं वचनं आह स्म यथा प्रियोक्तिरपि कटुकमक्षरं आह स्म तथा निरस्य विसर्जित इति वा योजना अत्रोपमिनोति डिम्भेन मनुष्यबालकेन कुतूहलेन कौतुकेन मुहुर्वारम्वारं कुहूरवं कुहू इति शब्दं विडम्ब्य अनुकृत्य प्रकोपितः क्रोधितः पिकः कोकिल इव यथा प्रियोक्तिरपि कोकिलः प्रकोपितः सन् परुषं रौति तथेत्यर्थः ॥ ३८ ॥

परुषवचनमेवाह ॥ अहो इति ॥ अहो आश्चर्य्ये हे भैमि तेऽपि देवा अपि मानुषीं त्वां अनुलक्षीकृत्य मनो मनोरथं तन्वते विस्तारयन्ति देवा अपि मानुषीमभिलषन्तीत्याश्चर्य्यमित्यर्थः आस्तां तावत् तत् त्वमपि मानुष्यपि त्वं अमीभ्योऽभिलषद्भ्यो देवेभ्योऽपि विमुखी पराङ्मुखीत्यहो कौतुकं महदाश्चर्य्यं उत्तमा अपि अधमं कामयन्त इत्याश्चर्य्यं तत्रापि अधमस्यानङ्गीकार इति महदाश्चर्य्यं अत्रासम्भवे दृष्टान्तमाह निधिः पद्मशङ्खादिर्निर्द्धनं दरिद्रं एति दैवादागच्छति किञ्चान्यच स वा दरिद्रो वा तं निधिं वागेव त्वया नागन्तव्यमिति निषेधवचनमेव प्रतिबन्धकत्वात् कवाटं तत् घटयन् योजयन् सन् निरस्यति निराकरोतीति क वा कुत्र वा दृष्टमिति शेषः अपि तु न कुत्रापि दृष्टं एतद्द्वयमतीवासम्भवमित्यर्थः इदं परुषवचनं ॥ ३९ ॥

Digitized by Google

महाखिलस्त्रीषु वहेऽवहेलया
महेन्द्ररागाद्गुरुमादरं त्वयि।
त्वमीदृशि श्रेयसि संमुखेऽपि तं
पराङ्मुखी चन्द्रमुखि न्यवीवृतः॥ ४०॥
दिवौकसं कामयते न मानवी
नवीनमश्रावि तवाननादिदं।

नेदं त्वया सम्यगाचरितमित्याह॥ महेति॥ हे चन्द्रमुखि चन्द्रवदने भैमि त्वयि महेन्द्रस्य रागात् अन्याः स्त्रियो विहाय त्वय्येवानुरक्तत्वा द्धेतोः अखिलस्त्रीषु त्वदितरासु शचीप्रभृतिरमणीषु अवहेलया अनाद रेण सह त्वयि गुरुं महान्तं आदरं सम्मानं वहे धारये त्वय्येव महेन्द्र स्यानुरागात् त्वदितरा न बऊ मन्ये त्वामेव बऊमन्ये इत्यर्थः ईदृशि एवं विधे सम्मुखेऽपि स्वयमागन्तुमुन्मुखेऽपि महेन्द्रानुरागरूपे श्रेयसि अभ्युदये विषये त्वं पराङ्मुखी तदनङ्गीकुर्व्वाणा सती तं आदरं न्यवी वृतः निवर्त्तितवती स्वयमेव नाशितवती त्वमित्यर्थः किमिति पाठे किं किमर्थं न्यवीवृतः आदरमित्यर्थात् अतस्त्वत्सदृशी कापि निर्बुद्धिर्ना स्तीति भावः॥ ४०॥

अश्रुतपूर्व्वञ्चेदमित्याह। दिवौकसमिति। मानवी मानुषी दिवौकसं देवं न कामयते नाभिलषति इतीदं नवीनं नूतनं तवाननात् तव मुखा न्मया अश्रावि श्रुतं उत्तमस्यानभिलाषादिदमाश्चर्य्यमित्यर्थः एष ते तव दुर्ग्रहदोषः दुष्टनिर्ब्बन्धरूपो दोषः सम्यगतितरां हितेन आप्तेन गुरुणापि पित्रादिनापि कथं वा न शाम्यते नापनीयते अपि तु तेनापनेतुं युज्यते

Digitized by Google

कथं न वा दुर्ग्रहदोष एष ते
हितेन सम्यग्गुरुणापि भ्राम्यते ॥ ४१ ॥
अनुग्रहादेव दिवौकसां नरो
निरस्य मानुष्यकमेति दिव्यतां ।

अपत्यहितमिच्छता पित्रा अपत्यदुराग्रहः केनाप्युपायेनापनीयते तव तु नेत्याश्चर्यमित्यर्थः अथच दुष्टग्रहा मङ्गलादयस्तज्जनितो दोषोऽरिष्टं सम्यग्हितेन केन्द्रस्थानस्थितत्वादनुकूलतरेण गुरुणा बृहस्पतिना भ्राम्यतएव न भ्राम्यतइत्याश्चर्यं किं कुर्व्वन्ति ग्रहाः सर्व्वे यस्य केन्द्री बृहस्पतिरिति ज्योतिषं सर्व्वथा दुर्ग्रहं परित्यज्य इन्द्रादिषु मध्ये यं कमपि देवं वृणीष्वेति भावः ॥ ४१ ॥

देवानुग्रहेण किं न भविष्यतीत्याह ॥ अनुग्रहादिति ॥ नरो मनुष्योदिवौकसां देवानामनुग्रहादेव मानुष्यकं मनुष्यत्वं निरस्य विहाय दिव्यतां देवत्वं एति प्राप्नोति अतस्त्वं देवपत्नी भव तदनुग्रहात् देवत्वं प्राप्स्यसीतिभावः ननु देवपत्नीत्वाज्जातेऽपि देवत्वे मानवशरीरवत्त्वान्मानवीमध्ये गणनीया भविष्यामि ननु देवीमध्ये इत्याशङ्क्यामपनयन्नाह सिद्धरसस्पर्शौषधसाधितपारदसम्पर्केण सुवर्णभूतानां अयसां लोहानामपि अयोऽधिकारे लोहप्रस्तावे कुतः कस्मात् स्मरितत्वं आम्नातत्वं इष्यते अपि तु न कुतोऽपि अयोविकारे इति पाठे अयोविकारे लोहविकारमध्ये इत्यर्थः सिद्धपारदस्पर्शेन सुवर्णभूतानां लोहानां लोहमध्ये गणना न क्रियते किन्तु सुवर्णमध्यएव या मानवास्तवापि देवपत्नीत्वाद्देवतामध्यएव गणना भविष्यती

Digitized by Google

अथोऽधिकारे स्वरितत्वमिष्यते
कुतोऽयसां सिद्धरसस्पृशामपि ॥ ४२ ॥
हरिं परित्यज्य नलाभिलाषुका
न लज्जसे वा विदुषीम्मुखा कथं ।

अर्थः । स्वरितत्वमिति स्वरयाक्षेपे इति चौरादिकात् क्तः स्पृशामिति स्पृशोऽनुदके सुपीति क्विप् ॥ ४२ ॥

याच्ञायाच्ञविवेचनाविधुरासीत्याह ॥ हरिमिति ॥ हे भैमि विदुषीम्मुखा आत्मानं विदुषीं पण्डितां मुखाना पण्डितम्मन्या त्वं हरिमिन्द्रं परित्यज्य नलाभिलाषुका नलनामकं राजानं चयच तृणविशेषं अभिलषन्ती सती कथन्ना न लज्जसे अपितु त्वया लज्जितुं युक्तं अहमेव बुद्धिमतीत्यभिमन्यसे इन्द्रं परित्यज्य तृणतुल्यं नलञ्च प्रियमिच्छसी त्यतीवनिर्लज्जासीत्यर्थः त्वादृशी मूर्खा निर्लज्जा च न काप्यस्तीतिभावः। भाः करभोरु हे करिकर तुल्योरुयुगेकंसुखं राति ददाति या सा करा तादृशी भा दीप्तिर्ययोस्तादृशौ ऊरू यस्याः तथाविधे वा इति पूर्व्वार्द्धा त्ताद्धेतोस्त्वां उपेक्षितवानहमुष्ट्रेन तादृशात् गम्भीरतात् गम्भीकण्टक कम्पटात् करभात् उष्ट्रादपि उरु महतीं वदे ज्ञानपूर्व्वकं वदामि उष्ट्रस्यापि कदाचित्तारतम्यज्ञानं भवति तत्तु तन्नास्त्येवेति उष्ट्रापेक्ष यापि त्वमतिनिर्ब्बुद्धिरित्यर्थः । वदे इति ज्ञानेइत्यात्मनेपदं केचित्तु करभादुष्ट्रादुरु महतीं त्वां भोः करभोरु इतिवदे सम्बोधयामि उष्ट्रा धिक्येन करभादुरुरितिव्युत्पत्त्या करभोरु इति सम्बोधयामि नतु करि करस्य करवत्तिर्भामस्य वा सदृशावूरू यस्या इति व्युत्पत्त्या इतिवाच

Digitized by Google

उपेक्षिते चोः करभाच्छमोरता
तुरं वदे त्वां करभोरु भोरुति ॥ ४३ ॥
विहाय हा सर्व्वसुपर्व्वनायकं
त्वया धृतः किं नरसाधिमभ्रमः ।
मुखं विमुच्य श्वसितस्य धारया
वृथैव नासापथधावनश्रमः ॥ ४४ ॥
तपोऽनले जुह्वति सूरयस्तनू
र्दिवे फलायान्यजनुर्भविष्णवे ।

च्छते तत्र सम्मुद्धौ गुणाभावे उपायान्तरं चिन्तनीयं । करभः करिहस्ते स्यात् करभः करिशावके । करभोमणिबन्धादिकनिष्ठान्तोच्छ्रतस्मृते इति बचः ॥ ४३ ॥

सर्व्वथा भ्रान्तासीत्याह ॥ विहायेति ॥ हे भैमि त्वया सर्व्वेषां सुपर्व्वणां देवानां नायकं प्रभुं इन्द्रं विहाय त्यक्त्वा हा कष्टं नरे मनुष्यमात्रे साधिमभ्रमः साधुत्वभ्रान्तिः किं धृतः वृथैव धृतइत्यर्थः अथच रलयोरैक्यात् नलएव साधुरिति भ्रमोवृथैव धृतः उक्तमर्थं लोकोक्त्या समर्थयति श्वसितस्य निश्वासानिलस्य धारया परम्परया कर्त्र्या मखं विमुच्य अनायासगमनोपायभूतं मुखमार्गं विहाय नासापथेन नासिकामार्गेण धावनं शीघ्रगमनं तत्र श्रमः प्रयासो वृथैव क्रियते यथा निश्वासानिलधारया ऋजुमार्गं मुखं त्यक्त्वा नासिकारूपेण वक्रमार्गेण वृथैव गम्यते तथा त्वयेत्यर्थः । अथवा त्वया इन्द्रं विहाय किंनरे कुत्सितमनुष्ये साधुत्वभ्रमोधृतः हा कष्टं एतदनुचितमित्यर्थः ॥ ४४ ॥

मूर्खैवासीत्याह ॥ तपइति ॥ सूरयः पण्डिता अन्यजनुषि जन्मान्तरे भविष्णवे भाविने दिवे स्वर्गलक्षणाय फलाय तपएव शरीरशोषकत्वाद

Digitized by Google

करे पुनः कर्षति सैव विक्लवा
बलादिव त्वां बलसे न बालिशे ॥ ४५ ॥
यदि स्वमुद्बन्धुमनाविना नलं
भवेर्भवन्तीं हरिरन्तरिक्षगां ।
दिविस्थितानां प्रथितः पतिस्ततो
हरिष्यति न्याय्यमुपेक्षते हि कः ॥ ४६ ॥

नलस्त्वस्मिन् यान्नायवादी तनूः शरीराणि मुञ्चति क्षिपन्ति यदर्थं शरीरपीडामप्यङ्गीकृत्य तपः कुर्व्वन्ति सैव श्रीरेव विक्लवा त्वद्दुःखाय व्याकुला सती बलादिव बलात्कारेणैव पुनस्त्वां करे धृत्वा कर्षति नेतुमिच्छति हे बालिशे मूर्खे त्वं पुनर्न बलसे नोन्मुखीभवसि पण्डिता जन्मान्तरप्राप्यं यत्फलमुद्दिश्य शरीरमपि पीडयन्ति तत्फलं स्वयमेवास्मिन्नेव जन्मनि विना शरीरक्लेशप्रदानं त्वां प्राप्तुमिच्छति त्वन्तु तन्नाङ्गीकरोषीति मूर्खतरासीति बालिशपदसम्बोधनेन सूचितं ॥ ४५ ॥

उताश्रनोद्बन्धनेत्यादि यदुक्तं तत्क्रमेण दूषयति ॥ यदीति ॥ हे भैमि त्वं यदि नलं विना स्वं आत्मानं उद्बन्धुं उद्बन्धनविषयतां नेतुं मनो यस्यास्तादृशी भवेः उद्बन्धनेन मर्त्तुमना यदि भविष्यसीत्यर्थः तत तर्हि अन्तरिक्षगां उद्बन्धनार्थमाकाशस्थां भवन्तीं त्वां हरिरिन्द्रो हरिष्यति नेष्यति यस्मात्स दिविस्थितानां अन्तरिक्षस्थानां पतिः प्रभुः प्रथितः ख्यातः युक्तञ्चैतत् हि यतो न्याय्यं न्यायादनपेतं स्वीयं भागं कोजन उपेक्षते तुच्छत्वेन परित्यजति अपितु सर्व्वएव ग्राह्यं वस्तु मत्वा गृह्णाति इन्द्रस्य अन्तरिक्षपतित्वादुद्बन्धनार्थमन्तरिक्षस्थायास्तव हरणं न्याय्यं एतावतापि तस्य वशगता भविष्यसि तस्मादधुना स्वयमेव तं वृणीष्वेतिभावः ॥ ४६ ॥

Digitized by Google

निवेक्ष्यसे यद्यनले नलोज्झिता
सुरे तदस्मिन्महती दया धृता ।
चिराद्धनेनार्थितयापि दुर्लभं
स्वयं त्वयैवाङ्ग यदङ्गमर्प्यते ॥ ४७ ॥
जितं जितं तत्खलु पाशपाणिना
विना नलं वारि यदि प्रवेक्ष्यसि ।

निवेक्ष्यसे इति । नलेन उज्झिता त्यक्ता सती यदि त्वं अनले वह्नौ निवेक्ष्यसे प्रवेक्ष्यसि तदा त्वया अस्मिन् सुरे देवेऽनले महती दया धृता कृता कुत इत्याह यद्यस्मात् अङ्ग हे भैमि अनेन अनलेन चिरात् बहुकालं व्याप्य अर्थितयापि प्रार्थनयापि दुर्लभं दुष्प्रापं अङ्गं त्वया स्वयमेव अर्प्यते अनलाय दीयते यच्चिरकालं याचितमपि दुष्प्रापमासीत् तत् यदि स्वयमेव दात्रा दीयते तत्र दयैव निमित्तमिति ज्ञायते एतावता वह्निप्रवेशोऽपि त्वया कर्त्तुं न शक्यते इति भावः अङ्गेति सोपहाससम्बोधने अस्मिन् कृते किं भविष्यतीति न जानासीत्युपहासः । ४७ ।

जितमिति । हे भैमि त्वं नलं विना पूर्व्वोक्ताद्धेतोरनलप्रवेशं विना वा यदि वारि जलं प्रवेक्ष्यसि तत्तर्हि खलु निश्चितं पाशपाणिना वरुणेन जितं जितं अतिशयेन जितं चिरमीप्सिताया अतिदुर्लभायाश्च तव अनायासेन लाभात् सर्व्वोत्कृष्टत्वेन वृत्तमित्यर्थः कुत इत्याह यत स्तदा त्वयि वारिप्रविष्टायां सत्यां असौ पयःपतिर्वरुणस्त्वदास्यात् त्वन्मामकान् असून् प्राणान् प्राणसमां त्वामित्यर्थः बहिरपि वक्षसि हृदयोपर्य्यपि वक्ष्यतेतरां अतिशयेन धारयिष्यति इदानीमन्तःकरणे धारयति

मदा त्वदाख्यान् बधिरप्रभूनसौ
पयःपतिर्वत्स्यति वध्यतेतरां ॥ ४८ ॥
करिष्यसे यद्यतएव दूषणा
दुपायमन्यं विदुषी स्वमृत्यवे ।
प्रियातिथिः स्वेन गता गृहान् कथं
न धर्मराजं चरितार्थयिष्यसि ॥ ४९ ॥
निषेधवेषोविधिरेष तेऽथवा
तवैव युक्ता खलु वाचि वक्रता ।

तदागीस्तु आलिङ्गनबाह्वहिरपि धारयिष्यति अतत्त्वेनातितरां जित मित्यर्थः पयस्यपि प्रवेष्टुं नार्हसि तथात्वे पयसः पत्युर्हस्तगता भवि ष्यसीति भावः ॥ ४८ ॥

अन्यमपि मरणोपायं कर्तुं नार्हसीत्याह ॥ करिष्यसइति ॥ हे भैमि अतएव पूर्वोक्तादेव दूषणात् उद्बन्धनादिना मरणेऽपि इन्द्रादिहस्त गता भविष्यसीत्येवंरूपात् दोषात् यदि स्वमृत्यवे स्वमरणाय विदुषी पण्डिता त्वं अन्यं विषपानादिरूपं उपायं करिष्यसे तर्हि स्वेन स्वयमेव गृहान् गता प्रिया प्राणेश्वरी अतिथिरभ्यागता त्वं धर्मराजं यमं कथं न चरितार्थयिष्यसि कृतार्थं न करिष्यसि अपितु चरितार्थयिष्य स्येव येन केनाप्युपायेन त्वया मर्त्तव्यं सर्व्वथा यमस्याधीना भविष्य स्येवेत्यर्थः तस्मान्मरणोपायान्तरमपि कर्तुं नार्हसीति भावः ॥ ४९ ॥

इन्द्रादिवरणे सम्मतापि वा मामेवं प्रतारयसीत्याह ॥ निषेधेति ॥ हे भैमि अथवा ते तव एषः अहमिन्द्रादीन् न वरीष्यामीति निषेधो

Digitized by Google

विजृम्भितं यस्य किल ध्वनेरिदं
विदग्धनारीवदनं तदाकरः ॥ ५० ॥
भ्रमामि ते भैमि सरस्वतीरस
प्रवाहचक्रेषु निपत्य कत्यदः ।

वेशोरूपं यस्य तादृशो विधिरेव इन्द्राद्यन्यतममेव वरीष्यसीत्येतद्रूपएव यथाश्रुतार्थग्राहिका मया पूर्वं निषेधएव ज्ञातः अधुनातु इन्द्रादीनपि का नाङ्गीकरोतीति परमपर्यालोचनया विधिरेव ज्ञात इत्यर्थः कथं घरजायाः स्त्रियावचनमेवं सम्भावयसीत्याशङ्क्याह खलु यस्मात् विदग्धायास्तवैव वाचि वक्रता युक्ता वक्रता त्वादृशवचनविषयैव युक्तेत्यर्थः एतदपि कथमित्याह किल यस्मात् यस्य ध्वनेरुत्तमकाव्यस्य इदं निषेधस्य विधिरूपतया पर्य्यवसानलक्षणं विजृम्भितं विलसितं तस्य ध्वनेराकरउत्पत्तिस्थानं विदग्धनारीवदनं चतुरवनितामुखमेव विदग्धनारीवदनादेव वक्रोक्तिरूपं काव्यं निःसरतीत्यर्थः इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद्ध्वनिर्बुधैः कथित इति काव्यप्रकाशः विदग्धनारीप्रतिपादितं काव्यं हि विधिरूपं सत् क्वचिन्निषेधरूपतया पर्य्यवस्यति क्वचिच्च निषेधरूपं विधिरूपतया यथा वापीं स्नातुमितोगतासि न पुनस्तस्याधमस्यान्तिकमित्यादि अत्र तदन्तिकमेव रन्तुं गतासीति निषेधस्य विधिरूपतया पर्य्यवसानं भम धम्मिअ वीसत्थो सोसुणओ अज्ज मारिओ देण इत्यादिच अत्र भ्रमेतिविधेर्न भ्रमेतिनिषेधरूपतया पर्य्यवसानं अत्र विदग्धनायिकैव प्रतिपादिका । ५० ।

इन्द्राद्यन्यतमः कश्चित्त्वया मनसि वृतएव लज्जां परित्यज्य स कथ्यतामित्याह । भ्रमामीति । हे भैमि ते तव सरस्वत्या वाण्या योरसोमा

Digitized by Google

अपामनादृत्य मनाक् कुरु स्फुटं
कृतार्थनीयः कतमः सुरोत्तमः ॥ ५१ ॥
मतः किमैरावतकुम्भकैतव
प्रगल्भपीनस्तनदिग्धवस्तव ।

धुर्य्यं तस्य प्रवाहोधारा तस्य चक्रेषु चक्राकारादिरूपचक्राकारावर्त्तेषु निपत्य अहं कति कियन्तं कालं कतिवारान् वा अद एवंप्रकारं भ्रमामि भ्रान्तो भवामि निषेधरूपेण विधिरूपेण वा कथयसि निश्चयाभावात् कियन्तं कालं मया भ्रमितव्यमित्यर्थः अथच अन्योऽपि सरस्वतीनाम नदीजलप्रवाहावर्त्तेषु निपत्य बहुकालं भ्राम्यति तस्मात्त्वया अपां लज्जां मनाक् ईषत् अनादृत्य निराकृत्य इन्द्रादिषु मध्ये कतमः सुरोत्तमो दिक्पालत्वात् देवश्रेष्ठः कृतार्थनीयः कृतार्थः कर्त्तव्य इति स्फुटं व्यक्तं कुरु कोऽदेवश्रेष्ठस्त्वया स्वीकर्त्तव्यस्तं वदेत्यर्थः मनाक्स्फुटं कुर्व्विति वा यद्यपि लज्जावशात्त्वया अभिप्रेतं पतिं व्यक्तीकर्त्तुं न शक्यते तर्हि कथाचिद्भङ्ग्या वक्तव्यं मया सर्व्वं बोद्धुं शक्यत इत्यर्थः ॥ ५१ ॥

इन्द्रमेव वा त्वमङ्गीकृतवतीत्याह । मत इति । किम सम्भावनायां ऐरावतस्य कुम्भयोः कैतवेन च्छलेन ऐरावतकुम्भाविव प्रगल्भौ प्रौढौ पीनौ स्तनौ यस्यास्तादृशी या दिक् पूर्व्वा दिक् तस्याधवः स्वामी इन्द्र एव मतोऽभिप्रेतः प्रायेणैवं त्वया विचारितं स्यादित्यर्थः युक्तमेवैतत् यत सहस्रचक्षुर्मी तव शरीरशोभां अवगाहितुं साकल्येन द्रष्टुं सहस्रनेत्रा दिन्द्रात् पृथक् अन्यो विशेषो मम मते क्वापि न क्षमोन योग्यः नेत्रद्वयेन

सहस्रनेत्रास्य पृथक् मते मम
त्वदङ्गलक्ष्मीमवगाहितुं क्षमः ॥ ५२ ॥
प्रसीद तस्मिन् दमयन्ति सन्ततं
त्वदङ्गसङ्गप्रभवैर्जगत्प्रभुः ।
पुलोमजालोचननीरजाकण्टकै
स्तनुं घनामातनुतां स कण्टकैः ॥ ५३ ॥
असंशयं रज्यसि जातवेदसि
स्वयं खलु क्षत्रियगोत्रजन्मनः ।

सर्वं तव शरीरसौन्दर्यं द्रष्टुं न शक्नोति सहस्रनेत्रत्वादिन्द्र एव तद्द्रष्टुं योग्य इति मयाप्येतत् सम्भावितमित्यर्थः ॥ ५२ ॥

तमर्थमेव द्रढयन्नाह । प्रसीदेति । हे दमयन्ति त्वं तस्मै इन्द्राय प्रसीद प्रसन्ना भव तं वृणीष्वेत्यर्थः अनन्तरं त्वदङ्गसङ्गात् प्रभव उत्पत्तिर्येषां तादृशैः कण्टकै रोमाञ्चैः करणैः स जगत्प्रभुरिन्द्रस्तनुं शरीरं घनां निविडां सन्ततं आतनुतां करोतु किम्भूतैः पुलोमजायाः शच्या लोचनयोर्नयनयोर्नीरजाकण्टकैः अत्यर्थं पीडकत्वात् नीरजाग्रवृक्षावयवविशेषतुल्यैः इन्द्रस्त्वया वृतश्चेत् इन्द्राणीं परित्यज्य त्वय्येवानुरक्तो भविष्यतीति भावः ॥ ५३ ॥

वह्निरेवचा त्वया मनसा वृत इत्याह । असंशयमिति हे भैमि त्वम संशयं निश्चितमेव जातवेदसि वह्नौ स्वयं आत्मबुद्ध्यैव विचार्य रज्यसि अनुरक्ता भवसि खलु यस्मात् हे विलासिनि क्षत्रियगोत्रे क्षत्रियवंशे जन्म यस्यास्तथाविधायास्ते तव मनोरथोजस्विनं तेजस्विनं तं वह्निं

Digitized by Google

विना तमोजस्विनमन्यतः कथं
मनोरथस्ते व्रजते विलासिनि ॥५४॥
त्वयैकसत्या तनुतापशङ्कया
ततो निवर्त्यं न मनः कथञ्चन।
हिमोपमा तस्य परीक्षणक्षणे
सतीषु वृत्तिः शतशो निरूपिता ॥५५॥

विना त्वया अन्यतः अन्यस्मिन् पुरुषे कथं व्रजते धावति अपि तु नैव व्रजते सदृशं सदृशेनैव युज्यते त्वं हि अमियवंशोद्भवत्वात्तेजस्विनी वह्निरपि स्वभावतस्तेजस्वी अतस्तस्मिंस्तव मनोरथो युज्यत इत्यर्थः ॥५२॥

ननु वह्निरत्यन्ततनुतापजनकस्तत्कथं तदरतं सम्भाव्यत इत्याशङ्क्याह । त्वयेति । हे भैमि एकसत्या अद्वितीयपतिव्रतया त्वया तनुतापशङ्कया देहतापसम्भावनया अतनुरतिमहान् यस्तापस्तच्छङ्कया वा ततो वह्नेः सकाशात् कथञ्चन कथमपि मनो न निवर्त्यं न निवर्तनीयं कुत इत्याह सतीषु पतिव्रतासु स्त्रीषु यत् परीक्षणं पातिव्रत्यपरीक्षा तत् क्षणे तत्समये तस्य वह्नेर्वृत्तिः स्थितिर्हिमोपमा हिमतुल्या शतशो बहुशो निरूपिता रामायणादौ सीतापरीक्षणादिसमये वाल्मीक्यादिभिर्वर्णिता अतः पतिव्रतायास्तव वह्निजनितसन्तापाशङ्का नास्तीत्यर्थः ॥५५॥

Digitized by Google

स धर्म्मराजः खलु धर्म्मशीलया
त्वयास्ति चित्तातिथितामवापितः ।
ममापि साधुः प्रतिभात्ययं क्रम
स्त्वकास्ति योग्येन हि योग्यसङ्गमः ॥ ५६ ॥
अजातविच्छेदलवैः स्मरोत्सवै
रगस्त्यभासा दिशि निर्म्मलत्विषि ।

यमोवा त्वया मनसि वृतइत्याह ॥ सइति ॥ खलु सम्भावनायां हे भैमि स प्रसिद्धोधर्म्मराजोयमस्त्वया चित्तातिथितां मनोरथविषयतां अवा पितः प्रापितोऽस्ति त्वया यमो मनसि वृत इति सम्भावयामीत्यर्थः हेतुगर्भविशेषणमाह किम्भूतया त्वया धर्म्मशीलया धर्म्मसाधनं शीलं स्वभावोयस्याः सा तथा एवंभूतया अयं साधुः समीचीनः क्रमः धर्म्म शीला धर्म्मशीलस्यानुरज्यते इति परिपाटी ममापि प्रतिभाति एत न्ममापि सम्मतमित्यर्थः हि यतः योग्येन सदृशेन सह योग्यस्य सदृशस्य सङ्गमस्त्वकास्ति शोभते तस्माद्धर्म्मराजेन सह धर्म्मशीलायास्तव सङ्ग मोयुक्तइति भावः ॥ ५६ ॥

अजातेति । हे भैमि अगस्त्यभासा दक्षिणदिक्स्थितागस्त्यनक्षत्र कान्त्या निर्म्मला त्विट् कान्तिर्यस्यास्तथाविधायां दक्षिणस्यां दिशि अनु त्पन्नशिला यमस्य पत्नीत्वात् मन्युशङ्काशून्या सती त्वं तेन यमेन सह अजा तोविच्छेदस्य लवोलेशोऽपि यत्र तथाविधैः स्मरोत्सवैः कामोत्सवरू पाभिः केलिभिः क्रीडाभिः कृत्वा धृतावधिं अनवधिं आचन्द्रार्कं कालं

युगावधिं कालमनन्तयुग्मिता
निमेषवत्त्वेन नयस्व कोटिभिः ॥ ५७ ॥
शिरीषमृद्वी वरुणं किमीहसे
पयःप्रकृत्या मृदुवर्गवासवं ।
विहाय सर्व्वान वृणुते स्म किन्न सा
निशापि शीतांशुमनेन हेतुना ॥ ५८ ॥

निमेषवत् क्षणमात्रस्य सुखेनाल्पतया भासमानत्वात् निमेषमिव नयस्व अतिवाहय अन्यवरणे विच्छेदः सम्भाव्यते एतद्वरणे मरणाभावात् चाव ज्ञानं कार्य्यं कामसुखमनुभवेतिभावः ॥ ५७ ॥

वरणीया त्वया मनसा वृतइत्याह । शिरीषमृद्वीति । हेभैमि शिरीषमृद्वी शिरीषपुष्पवदतिकोमला त्वं पयःप्रकृत्या जलस्वभावेन यद्वा जलरूपया प्रकृत्या उपादानकारणेन वा मृदुवर्गाणां कोमलवस्तुसमूहानां वासवं इन्द्रं अतिकोमलं वरुणं किं ईहसे इच्छसि त्वं मृद्वी वरुणोऽपि मृदुतरस्तस्मात्तं किं मनसा प्रार्थयसीत्यर्थः युक्तञ्चेदमिति दृष्टान्तेनाह सा मृदुतरतायां प्रसिद्धा निशापि रात्रिरपि अनेन हेतुना मृदुना मृदुसंयोगो युक्त इति कारणेन सर्व्वान् देवान् विहाय शीतांशुं चन्द्रं किं न वृणुतेस्म अपितु एतेनैव कारणेन वृतवतीत्यर्थः ॥ ५८ ॥

Digitized by Google

असेवि यत्त्यक्तदिवा दिवानिशं
श्रियः प्रियेणानणुरामणीयकः ।
सहामुना तत्र पयःपयोनिधौ
कृशोदरि क्रीड यथामनोरथं ॥ ५९ ॥
इति स्फुटं तद्वचसस्तयादरात्
सुरस्पृहारोपविजृम्भनादपि ।

असेवीति । त्यक्ता द्यौः स्वर्गो येन तादृशेन श्रियो लक्ष्म्याः प्रियेण स्वामिना नारायणेन अनणु महत् रामणीयकं सौन्दर्यं यस्य तादृशो यो वरुणो दिवानिशं रात्रिन्दिवं असेवि सेवितः नारायणोऽपि स्वर्गं त्यक्त्वा क्षीराब्धौ यमुपाश्रितेत्यर्थः हे कृशोदरि भैमि अमुना वरुणेन सह तत्र पयसो दुग्धस्य पयोनिधौ समुद्रे यथामनोरथं यथेच्छं क्रीड विहर स्वर्गं परित्यज्य नारायणेनाश्रितत्वात् क्षीरसमुद्रः स्वर्गापेक्षयापि रमणीयः वरुणोऽपि नारायणाश्रितत्वादितरदेवापेक्षयाऽत्यर्थं रमणीयस्तत्तेनैव सार्द्धं विहरेत्यर्थः श्रियः प्रियेणेत्यनेन श्रीरपि तव प्रतिवेशिनी भविष्यतीति सूचितं ॥ ५९ ॥

इत्थं नलवचनं श्रुत्वा वरवर्णनिश्चितैकतमयोग्यतया भैमी विषण्णा आसीत् तत्र कविरुत्प्रेक्षते । इतीति । स्फुटं उत्प्रेक्षे वराणां वरमध्ये श्रुतं श्लिष्टं एवं नलेनोक्तमपि तस्यास्तथाभूतया तया भैम्या वक् इति पूर्वोक्तं तद्वाक्यं नलवचनं श्रुतवत् अश्रुतवत् एकतरवरनिश्चयाभावात् श्रुतं अन्यतरस्यावरणादश्रुतमित्यर्थः अत्राद्ये कारणमाह तद्वचसो नलवचनस्य आदरात् गौरवात् श्रुतं अश्रवणे कारणमाह सुरेषु

Digitized by Google

कराङ्कसुप्तैककपोलकर्णया
श्रुतश्च तद्भाषितमश्रुतश्च तत् ॥ ६० ॥
चिरादनध्यायमवाङ्मुखी मुखे
ततः स्म सा वासयते दमस्वसा ।
कृतायतश्वासविमोक्षणाय तं
क्षणाद्बभाषे करुणं विचक्षणा ॥ ६१ ॥

इन्द्रादिषु स्पृहारोपोऽभिलाषाय प्रलोभनं तद्रूपात् विडम्बनाद्दूषणात् पतिव्रतायाः परपुरुषाभिलाषारोपवचनं दुःश्रुतमिति न श्रुतमिति भावः ॥ ६० ॥

भैमी बहुक्षणं मौनमवलम्ब्य दीर्घं निश्वस्य च नलं प्रत्युवाचेत्याह ॥ चिरादिति ॥ ततोऽनन्तरं सा दमस्वसा भैमी चिरात् बहुक्षणं अवाङ्मुखी अधोमुखी सती अनध्यायं वचनाभावं मौनं मुखे वासयते स्म स्थापयामास बहुक्षणमधोमुखी भूत्वा चिन्तयन्ती किञ्चिन्नोवाचेत्यर्थः अथानन्तरं विचक्षणाऽतिचतुरा सा कृतमायतस्य दीर्घस्य श्वासस्य निश्वासस्य विमोक्षणं परित्यागो यया तादृशी सती तं नलं क्षणात् मुहूर्त्तादनन्तरं अकरुणं कठोरं बभाषे उवाच करुणं करुणरसप्रधानं वचो बभाषे इत्यपरे विचक्षणेति उत्तरदाने हेतुः अविचक्षणा हि अत्यन्तानिष्टविषये मौनमवलम्ब्यैव तिष्ठन्ति नतु किमपि वक्तुं प्रभवन्ति अनयातु विचक्षणत्वात् प्रत्युत्तरं दत्तमिति भावः चिरान्मौनमवलम्ब्य दीर्घं च निश्वस्य कथनं सचिन्तानां स्वभावः । वासयत इति अकर्म्मकाण्णिजन्तात् सतश्चेतनप्रयोज्यकत्वाभावेन बुधादित्वाभावाच्चित्तेऽणुधादेरित्यात्मनेपदं ॥ ६१ ॥

Digitized by Google

विभिन्दता दुष्कृतिणीं मम श्रुतिं
दिगिन्द्रदुर्व्वाचिकवाचिसञ्चयैः ।
प्रयातजीवामिव मां प्रति स्फुटं
कृतं त्वयाप्यन्तकदूततोचितं ॥ ६२ ॥
त्वदास्यनिर्य्यन्मदलीकदुर्यशो
मषीमयं सत्निपिरूपभागिव ।

अनन्तरवचनमेवाह । विभिन्दतेति । हे दूत दिगिन्द्राणां दिक्पालानां दुर्व्वाचिकान्येव दुष्टसन्देशवचनान्येव सूचयो लौहशलाकास्तासां सञ्चयैः समूहैः कृत्वा दुष्कृतिणीं परपुरुषप्रलोभनवाक्यश्रवणात् पापकारिणीं मम श्रुतिं कर्णं विभिन्दता विशेषेण विदारयता त्वयापि अतिसुन्दरेण नलसदृशाकारेणापि भवता अतएव प्रयातजीवामिव मृतप्रायां मां प्रति लक्षीकृत्य स्फुटं सुव्यक्तं अन्तकस्य दूततायां दौत्ये उचितं युक्तं कर्म्म कृतं चतुर्णां दूतत्वेऽपि यमदौत्योचितं कर्म्माचरितमित्यर्थः दुष्कृतिणीं मामिति वा यमदूतो हि परपुरुषप्रलोभनवचनं श्रुतवत्याः पापिन्या मृतायाः स्त्रियाः कर्णौ लौहशलाकाभिर्भिनत्ति त्वयापि तथाकरणाद्यमदूततोचितं कृतमित्यर्थः अतिसुन्दरस्य विशेषतो नलसदृशस्य तव मां प्रतिपीडकत्वमयुक्तमित्यपिकारेण सूचितं ॥ ६२ ॥

त्वद्वचनं केवलं मम दुःखायैव जातमित्याह ॥ त्वदास्येति ॥ अदरदं भवदुदरत्नं भवता उक्तं दुष्टमक्षरं मम श्रुतिं कर्णं आविश्य प्रविश्य

श्रुतिं समाविश्य भवद्वचश्चरं
सृजत्यदः कीटवदुत्कटा रुजः ॥ ६३ ॥
तमाखिलं प्रेष्य विदर्भजेरिता
प्रगाढमौनव्रतयैकया सखी ।
चपां समाराधयतीयमन्यया
भवन्तमाह स्वरसज्ञया मया ॥ ६४ ॥

कीटवत् कर्णकीटइव उत्कटा दुःसहा रुजः पीडाः सृजति जनयति किं भूतं त्वदास्यात् तव मुखात् निर्यन्निर्गच्छत् यन्मम अश्रीकं अलक्ष्यं दुःखं ग्रहग्रामानुरागरूपं मिथ्यापथयत्नादेव मषी कज्जलं तन्मयं तद्वचरं सत् भवत् अतएव लिपिरूपभागिव केवलमसरूपं भजमानमिव अस्य इव्यचरं मसीभाजननिर्गतकल्पया मत्या लिख्यते यथा कर्णकीटः कर्णं प्रविश्य पीडयति तथा तव वचनं श्रूयमाणं सत्पीडयतीत्यर्थः ॥ ६३ ॥

तमिति ॥ अथानन्तरं विदर्भजया भैम्या ईरिता मदभिप्रायं त्वमेव प्रकाशयेति प्रेरिता आलिर्भैमीसखी तं अखिलं उवाच किमूचे इत्याह हे देवदूत इयं सखी भैमी प्रगाढं दृढतरं मौनव्रतं यस्यास्तथाविधया एकया स्वस्य रसज्ञया जिह्वया चपां लज्जां समाराधयति सम्यक्सेवते अन्यया अपरया स्वरसज्ञया स्वकीयजिह्वास्वरूपया अथच स्वस्य रसमभिप्रायं जानातीति तादृश्या मया भवन्तं त्वामाह वदति इयं लज्जावशात् स्वाभिप्रायं न कथयति अतोऽहमेवैतत्प्रेरिता एतदभिप्रायं कथयामि श्रूयतामित्यर्थः अन्योऽपि मौनी भूत्वा देवतामाराधयति । अत्र प्रश्लेषेण अप्रगाढमौनव्रतयेति मयेत्यस्यापि विशेषणमिति केचित् ॥ ६४ ॥

Digitized by Google

तमर्चितुं संवरणस्रजा नृपं
स्वयम्वरः सम्भविता परेद्यवि ।
ममासुभिर्गन्तुमनाः पुरःसरै
स्तदन्तरायः पुनरेष वासरः ॥ ६५ ॥
तदद्य विश्रम्य दयालुरेधि मे
दिनं निनीषामि भवद्विलोकिनी ।

किमाहेत्याह ॥ तमिति ॥ संवरणस्रजा वरणमालया तं नृपं नलं अर्चितुं परेद्यवि परस्मिन्नहनि स्वयम्वरः संभविता सम्यक् भविष्यति एष वासरो दिवसः पुनस्तस्य स्वयम्वरस्य अन्तरायोविघ्नः एतावानेव विलम्बोऽस्तीत्यर्थः किम्भूतः पुरःसरैरेतद्दिवसात् पूर्व्वमेव गन्तुकामैर्मम असुभिः प्राणैः सह गन्तुमनाः प्रयातुमिच्छुः नललाभे केवलमेतद्दि वसमात्रं विलम्बोवर्त्तते औत्सुक्यात्तदपि सोढुं न शक्नोमि एतावता इन्द्रादिसन्दिष्टश्रवणे मम यावानादरोवर्त्तते विवेचनीयइति भावः ॥ ६५ ॥

तदद्येति ॥ यस्मादेतद्दिवसमतिवाहयितुमशक्यं ततस्मात् अद्य अत्र विश्रम्य विश्रामं कृत्वा मे मम दयालुरेधि क्षमावान् भव यतोभवद्वि लोकिनी भवन्तमालोकयन्ती सती अहं दिनं वर्त्तमानं दिवसं निनीषा मि अतिवाहयितुमिच्छामि कथं पतिव्रतायास्ते परपुरुषदर्शनलालसे त्याशङ्क्याह किल यस्मात् स मत्प्रियो मम पतिर्नलः पत्रिणा हंसेन नखैः

Digitized by Google

नखैः किलाख्यायि विलिख्य पक्षिणा
तवैव रूपेण समः स मत्प्रियः ॥ ६६ ॥
दृशोर्द्वयी ते विधिनास्ति वञ्चिता
मुखस्य लक्ष्मीं तव यन्न वीक्षते ।
असावपि श्वस्तदिमां नलानने
विलोक्य साफल्यमुपैतु जन्मनः ॥ ६७ ॥

पक्षिणा नखैः पद्मिनीपत्रे विलिख्य विशेषेण लिखिता रूपेण सौन्दर्येण तवैव समस्तुल्य आख्यायि दर्शितः तस्मात् नलतुल्या तत्सदृशस्य तव दर्शनान्मे पवित्रतात्मताभाव इति भावः ॥ ६६ ॥

अथाधुनावस्थाने तवापि महत् कार्य्यं भवेदित्याह ॥ दृशोरिति ॥ ते त्व दृशोर्द्वयी चक्षुर्द्वयं विधिना वञ्चिता विप्रलब्धा अस्ति भवति यस्मात् तव मुखस्य लक्ष्मीं शोभां न वीक्षते साक्षान्न पश्यति दर्पणादौ मुख प्रतिबिम्बस्य दर्शने जातेऽपि साक्षाद्दर्शनाभावाद्विधिना प्रतारितेत्यर्थः ततस्मात् असावपि नेत्रद्वय्यपि श्वोभाविदिने नलानने नलस्य वदने इमां एतत्सजातीयां लक्ष्मीं विलोक्य जन्मनः साफल्यं सफलत्वं उपैतु प्राप्नोतु तव नलतुल्यत्वान्नलमुखे एतावतीं शोभां विलोक्य कृतार्थं भविष्यति अतः स्वकार्य्यार्थमपि अद्य त्वया स्थातव्यमित्यर्थः अथच श्वस्त्र इहैव त्वमिन्द्रादीन् त्यक्त्वापि अद्यात्र स्थित्वा श्वोगन्ता द्रष्टव्यः पश्चात् इन्द्रादयो मया वरणीया नलो वेति त्वया विवेचनीयमिति भावः ॥ ६७ ॥

ममैव पाणीकरणेऽग्निसाक्षिकं
प्रसङ्गसम्पादितमङ्ग सङ्गतं।

मम नलवरणे तवापि सहायता भवितुमुचितेत्याह ॥ ममैवेति ॥
अङ्ग हे इन्द्रादिदूत पाणीकरणएव विवाहसमयएव अग्निसाक्षिकं
अग्निसमक्षं अतएव अजर्य्यं अविनाशि मम आर्य्यपुत्त्रीयं आर्य्यस्य अति
मान्यस्य वीरसेनस्य पुत्त्रेण नलेनाग्निष्ठं सङ्गतं प्रेम अर्जितुं संपादयितुं कथं
तव स्पृहा वाञ्छा न भवति अपितु भवितुं युज्यते इन्द्रादिवरणार्थमेव
भवता यत्नः क्रियते नलवरणार्थन्तु किमर्थं न क्रियतइत्यर्थः नन्विन्द्रादयो
देवास्तेषामर्थे यत्नः कर्त्तुं युज्यते नलेन सार्द्धं विशिष्टसम्बन्धाभावात्
कथं तदर्थं यतनीयमित्याशङ्क्याह तव किम्भूतस्य हा खेदे सहाधीतवतः
अथवा सौन्दर्य्यादिभिर्नलसदृशस्य सादृश्यसम्बन्धादेव नलस्तव सुहृत्
अतस्तदर्थमपि त्वया यतनीयमित्यर्थः भवतु अन्यार्थमागतेन मया कि
मर्थमन्यस्मिन् एतावान् प्रयासः कर्त्तव्य इत्याशङ्क्याह किम्भूतं सङ्गतं प्र
सङ्गेन नतु बहुतरप्रयासेन सम्पादितं सम्पाद्यं आवयोर्मैलनं जातप्राय
मेव त्वया केवलं निमित्तमात्रेण भवितव्यमित्यर्थः अतोऽत्र स्थित्वा
श्रीमम नलेन सह पाणिग्रहणे किञ्चिदानुकूल्यं भजस्वेति भावः
आर्य्यपुत्त्रः स्वामीति वा अथवा मम पाणीकरणएव अग्निसाक्षिकं
अग्निसाक्षिकत्वाद्दृढतरं प्रसङ्गसम्पादितं अजर्य्यं आर्य्यपुत्त्रीयं सङ्गतं
नलेन सार्द्धं स्वस्य मैत्रीं अर्जितुं सहाधीतवतः सदृशस्य तव कथं न स्पृहा
भवति अन्यार्थमागतेनापि त्वयात्रागत्य स्थितेन प्रासङ्गिकी नलेन सह
मैत्र्यपि सम्पादिता स्यात् तस्मादत्र आगन्तव्यमितिभावः। पाणिग्रहः सम

न चा सचाधीतवतः कृपा कथं
तवार्य्यपुत्रीयमजर्य्यमर्जितुं ॥ ९८ ॥
दिगीश्वरार्थं न कथञ्चन त्वया
कदर्थनीयास्मि कृतोऽयमञ्जलिः ।
प्रसद्यतां नाद्य निगाद्यमीदृशं
दधे दृशौ वाष्परयास्पदे भृशं ॥ ९९ ॥
वृणे दिगीशानिति का कथा तथा
त्वयीति नेमे नलभामपीश्वया ।

व्यन्तप्रतिरूपकोऽव्ययः अजर्य्यमिति जिरच सङ्गमे कर्त्तरीति यत्। सङ्गतं प्रेम्णि युक्ते चेतिवचः। ९८ ।

पुनः कथनावकाशनिरासायाह। दिगिति। हे दूत त्वया दिगीश्वरार्थं इन्द्राद्यर्थं कथञ्चन केनापि प्रकारेण उपरुध्य अस्मि अहं नकदर्थनीया न पीडनीया अयं अञ्जलिः कृतोऽतः प्रसद्यतां मयि प्रसन्नेन भूयतां अद्य ईदृशं एवंविधं इन्द्रादिवरणविषयकं किमपि न निगाद्यं न कथनीयं तथात्वे किं करिष्यसीत्याह दृशौ चक्षुषी भृशं अतितरां वाष्परयस्य अश्रुवेगस्य आस्पदे स्थाने दधे करिष्यामि पुनस्तौ अतिशयं रोदिष्यामीत्यर्थः। ९९ ।

स्वस्य पातिव्रत्यप्रकटनेन च पुनर्वचनावकाशं निरस्यति। वृणे इति। अहं दिगीशान् दिक्पालान् इन्द्रादीन् वृणे वरिष्यामि इति कथा का अपि तु ईदृक् कथापि न युज्यते याहं त्वयि वर्त्तमानां तथा इंखोक्तेन

सतीव्रतेऽस्मिन् तृणयामि जीवितं
स्मरस्तु किं वस्तु नवस्तु भस्म यः ॥ ७० ॥
न्यवेशि रत्नत्रितये जिनेन यः
स धर्म्मचिन्तामणिरुज्झितो यया ।

संवदमानां इति इमां नलभामपि नलकान्तिमपि इंद्रया कटाक्षविक्षेपा दिविषद्यापि नेच्छे साभिलाषं न पश्यामि पातिव्रत्यभङ्गभिया नलकान्ति तुल्यां त्वत्कान्तिमपि न पश्यामि इन्द्रादीन् वरीष्यामीति का कथेत्यर्थः ननु यदि इन्द्राद्युपरोधात् नलत्वां न वरीष्यति तर्हि कामानलेन दग्धा भविष्यसीत्याशङ्क्याह अहं सतीव्रते पतिव्रताव्रतरूपेऽस्मिन् अथच तीव्र तया सहवर्त्तमानेऽतितीक्ष्णेऽस्मिन् जीवितं प्राणानपि तृणयामि तृण वत् गणयामि सतीव्रतरक्षार्थं जीवनादरमपि नकरोमीत्यर्थः स्मरस्तु कामः पुनः किं वस्तु अस्तु भवतु अपितु नकिमपि यः स्मरस्तत्प्रसिद्धं हरनेत्रानलजनितं भस्म हरनेत्रानलजनितभस्मीभूतत्वान्निःसारः कामः पतिव्रताया मम किमपि न कर्त्तुं शक्नोतीत्यर्थः मां ईदृशीं पतिव्रतां ज्ञात्वा इन्द्रादिवरणप्रस्तावाद्विरमेतिभावः ॥ ७० ॥

कामसुखार्थं पातिव्रत्यं नैव त्याज्यमित्याह । न्यवेशीति । जिनेन धर्म्मश्रेष्ठिना बुद्धेनापि रत्नत्रितये सम्यग्दर्शनसम्यग्ज्ञानसम्यक्चारित्रलक्षणधर्म्मरूपरत्नत्रितयमध्ये योन्यवेशि निवेशितः स सम्यक्चारित्ररूपधर्म्मचिन्तामणिर्धर्म्मश्रेष्ठोयया स्त्रिया कयाजिनः शिवस्य कोप एव अनलस्तस्य भस्मनः कामस्य कृते कामसुखनिमित्तं उज्झित स्त्यक्तः तया स्त्रिया स्वकुले निजपित्रादिवंशे तदेव भस्म धृतं विस्तारितं

Digitized by Google

कृपाग्निकोपानलभस्मनः कृते
तदेव भस्म स्वकुले स्तृतं तया ॥ ७१ ॥
निपीय पीयूषरसौरसीरसौ
गिरः स्वकन्दर्पकृताग्नशाकृतीः ।
कृतान्तदूतं न तया यथोदितं
कृतान्तमेव स्वममन्यतादयं ॥ ७२ ॥
स भिन्नमर्म्मापि तदर्त्तिकाकुभिः
स्वदूतधर्म्मान्न विरन्तुमैहत ।

यच्चितं या कामार्थं चारित्रं परित्यजति सा केवलं कुलमेव कलङ्कयती त्यर्थः अथच मूर्खेणापि भस्मार्थं चिन्तामणिर्न त्यज्यते। सदृक्छिद्रान् वृत्तानि धर्म्मं धर्मेश्वराजगुरिति बौद्धसिद्धान्ते रत्नचितयमुक्तं ॥ ७१ ॥

इत्थं भैमीवचनं श्रुत्वा नल आत्मानं गर्हयामासेत्याह ॥ निपीयेति ॥ असौ नलः पीयूषरसस्य सुधारसस्य औरसीः पुत्रीः सुधारसोत्पन्नवद तिमधुरा अतएव स्वस्य आत्मनः कन्दर्पकृताग्नस्य कामानलस्य आकृती रुद्दीपिकागिरो भैम्याः पूर्व्वोक्तवचनानि निपीय सादरं श्रुत्वा स्वमा त्मानं तया भैम्या यथा येन प्रकारेण उदितं विभिन्दतादुष्कृतिर्नो मम स्तुतिमित्यादिना उक्तं कृतान्तदूतं तथा न अमन्यत किन्तु अदयं निष्कृपं स्वं कृतान्तमेव यममेव अमन्यत यमदूतस्य कदाचिदुपेक्षा भवेत् तस्मा यमदूतोनाहं किन्तु निर्दयत्वात्साक्षाद्यम एवाहमिति मन्यते स्मेत्यर्थः ॥ ७२ ॥

इत्थं जातनिर्व्वेदोऽपि नलोदूतधर्मत्वात् पुनरपि तामुवाचेत्याह ॥ सइति ॥ स नलस्तस्या भैम्या अर्त्तिः पीडा तया काकुभिर्दैन्यभावकैर्भिन्न

Digitized by Google

शनैरथांसन्निभृतं विनिश्वसन्
विचित्रवाकूचित्रशिखण्डिनन्दनः ॥ ७३ ॥
दिवोधवस्त्वां यदि कल्पशाखिनं
कदापि याचेत निजाङ्गनाश्रयं ।
कथं भवेरस्य नजीवितेश्वरी
न मोघयाञ्चः स हि भीरु भूरुहः ॥ ७४ ॥
शिखी विधाय त्वदवाप्तिकामनां
स्वयं कृतस्नानशुचिः स्वमूर्त्तिषु ।

मर्मापि विदीर्णहृदयोऽपि स्वस्य दूतधर्मादिरन्तुं विरतोभवितुं न ऐच्छत नेच्छतिस्म तर्हिं किं चकारेत्याह निभृतं मानया श्वासवमिति गुप्तं विनिश्वसन् निर्विण्णहृदयत्वान्निश्वासं परित्यजन् शनैर्मन्दं अथांसत्वाय यामास यतः स विचित्रवाचि नानाविधवचनचातुर्थ्ये चित्रशिखण्डि नन्दनः बृहस्पतिरिव । वाचस्पतिश्चित्रशिखण्डिज इत्यमरः ॥ ७३ ॥

यदथांसत्तदाह ॥ दिवइति ॥ हे भैमि दिवः स्वर्गस्य धवः स्वामी इन्द्रः निजाङ्गनमेव आश्रयोयस्य तादृशं स्वप्राङ्गनावस्थायिनं अतिसन्निहितं कल्पशाखिनं कल्पवृक्षं कदापि त्वां यदि याचेत मह्यं भैमी दीयतामिति प्रार्थयेत तदा त्वं अस्य इन्द्रस्य जीवितेश्वरी प्राणेश्वरी कथं न भवेः हे भीरु भयशीले हि यस्मात् स भूरुहः कल्पवृक्षो मोघा विफला याच्ञा यस्य तादृशोन भवति अपितु अवश्यमेव याचितं ददातीत्यर्थः अभीष्टदः सदा सन्निहितः स्वामिना च याचितः कल्पवृक्षस्त्वामवश्यमेवास्मै दास्यतीतिभावः ॥ ७४ ॥

वह्निरपि त्वामनायासेन लब्धुमर्हतीत्याह ॥ शिखीति ॥ शिखी वह्निस्त्वदवाप्तिकामनां त्वत्प्राप्त्यभिलाषं विधाय भैमीलाभकामोऽहमिति

Digitized by Google

क्रतुं विधत्ते यदि सार्व्वकामिकं
कथं स मिथ्यास्तु विधिस्तु वैदिकः ॥ ७५ ।
सदा तदाशामधितिष्ठतः कर
वरं प्रदातुं बलिताद्बलादपि ।
मुनेरगस्त्याद्वृणुते स धर्म्मराड्
यदि त्वदाप्तिं भज का तदा गतिः ॥ ७६ ॥

संकल्प्य वामूर्त्तिं दच्चियाग्न्यादिषु स्वयमात्मनैवकृतं धमसे स्वाहेति मन्त्रे स प्रथितं स्वाशं यस्येव यजमानैर्दत्तं स्वाशभूतं हविर्येन तादृशः सन् यदि सार्व्वकामिकं सर्व्वकामदं क्रतुं यज्ञं विधत्ते कुरुते तदा स वैदिकः श्रौतो विधिस्तु पुनः कथं मिथ्या असत्योऽस्तु अपितु सत्यएव भविष्यतीत्यर्थः अग्निर्गागुष्ठितोयज्ञः सर्व्वान् कामान् ददाति किंपुनः स्वयं वह्निनानुष्ठि तस्तस्माद्वह्निना त्वमसुलभा न भविष्यसीतिभावः ॥ ७५ ॥

यमेनाऽपि त्वामनायासेन लब्धुमर्हतीत्याह ॥ सदेति ॥ स प्रसिद्धो धर्म्म राड्यमोयदि अगस्त्यान्मुनेः सकाशात्त्वदाप्तिं भैमी मह्यं दीयतामिति त्वल्लाभं वृणुते तदा का गतिः कउपायः भज कथय अपितु नकापि गतिर स्तीत्यर्थः किम्भूतात् सदा तदाशां तस्य यमस्य दिशं अधितिष्ठतः अध्या सीनात् तथा अतएव बलादपि बलेनापि अनिच्छतोऽपि यमाय वरं वर णीयं करं राजग्राह्यं भागं प्रदातुं बलितात् स्वयमेव प्रवृत्तात् यमस्या धिकारे वसामि तदस्मै राजभागोऽवश्यं देयइति विचार्य्य मुनित्वाद रक्ष्यं राजभागं स्वयमेव दातुमुत्सुकादित्यर्थः यमेनापि त्वमसुल भा न भविष्यसीति भावः ॥ ७६ ॥

Digitized by Google

क्रतोः क्रते जाग्रति वेत्ति कः कति
प्रभोरपां वेश्मनि कामधेनवः ।
त्वदर्थमेकामपि याचते स चेत्
प्रचेतसः पाणिगतैव वर्त्तसे ॥ ७७ ॥
न सन्निधात्री यदि विघ्नसिद्धये
पतिव्रता पत्युरनिच्छया शची ।

वरुणोऽपि त्वामनायासेन लब्धुमर्हतीत्याह । क्रतोरिति । हे भैमि अपां प्रभोर्वरुणस्य वेश्मनि गृहे क्रतोः क्रते यज्ञहविरर्थं कतिसंख्याकाः कामधेनवो जाग्रति विद्यन्ते इति कोवेत्ति जानाति अपितु न कोऽपि बहुसन्तिष्ठन्तीत्यर्थः एतदहमेव निगूढं जानामीति भावः तेन किमत आह स वरुणश्चेद्यदि तासु मध्ये एकामपि कामधेनुं मह्यं भैमी दीयतामिति त्वदर्थं त्वल्लक्षणं वस्तु याचते तर्हि त्वं प्रचेतसो वरुणस्य पाणिगतैव हस्तप्राप्तैव वर्त्तसे भविष्यसि योऽहि यद्वस्तु कामधेनुं याचते सा तद्वस्तु तत्क्षणादेव तस्मै ददाति तस्माद्वरुणेन याचिता सा अवश्यमेव त्वामस्मै दास्यतीत्यर्थः तस्मादधुनैव एतत् सर्व्वं विचार्य्य इन्द्राद्यन्यतमं वृणीष्वेति भावः ॥७७ ॥

भीषयन्नप्याह । नेति । भर्त्तुरन्यासक्तत्वेऽपि पतिव्रता सती इन्द्राणी पत्युरिन्द्रस्य अनिच्छया अननुमत्या हेतुना विघ्नसिद्धये मदनागमनात् स्वयम्बरे विघ्नो जायतामिति विघ्नोत्पादाय यदि न सन्निधात्री सन्निहिता न भविष्यति स्वयम्बरे नमनिष्यति तर्हि राजव्रजानां नृपतिसमूहानां वैघ्नसात् परस्परकलहाद्धेतोः स स्वयम्बर एव कुतः कस्मात् अपितु न कुतोऽपि नलप्राप्तिर्दूरे तिष्ठतु स्वयम्बरएव न भविष्यतीत्यर्थः किम्भूतः परस्परमन्योऽन्यं स्पर्द्धिनोवरा वरयितारोयत्र स

Digitized by Google

सएव राजव्रजवैरसात् कुतः
परस्परस्पर्द्धिवरः स्वयम्बरः ॥ ७८ ॥
निजस्य वृत्तान्तमजानतां मिथो
मुखस्य रोषात् परुषाणि जल्पतः।
मृधं किमच्छच्छकदण्डताण्डवं
भुजाभुजि क्षोणिभुजां दिदृक्षसे॥ ७९ ॥

तथा तादृश्याः शच्याः सान्निध्याभावात् वरायामहमहमिकया कलह रूपः स्वयम्बरस्य विघ्नो भविष्यतीत्यर्थः शची पूजिता सती सन्निधाय स्वयम्बरस्य विघ्नं नाशयतीति वार्त्ता अतएव कालिदासः सान्निध्य योगात् किल तत्र शच्याइत्यादि विवाहादौ षोडशमातृकामध्ये च शची पूज्यते तथाच गौरी पद्मा शची मेधा सावित्री विजया जयेत्यादि ॥ ७८ ॥

तमर्थमेव द्रढयति ॥ निजस्येति ॥ हे भैमि त्वं शच्याः सान्निध्याभा वात् क्षोणिभुजां राज्ञां भुजैश्च भुजैश्च प्रहृत्य इदं युद्धं प्रवृत्तमिति भुजाभुजि हस्ताहस्ति मृधं युद्धं किं दिदृक्षसे द्रष्टुमिच्छसि किम्भूतं मृधं अच्छच्छकदण्डताण्डवं स्वयम्बरेऽस्मान्तरसमवधानाभावात् अच्छत्र कान्छत्रमूर्न्यीकृतायै दण्डास्तेषां ताण्डवं नृत्यं यत्र तादृशं किम्भूतानां क्षोणिभुजां रोषात् क्रोधात् मिथोऽन्योऽन्यं परुषाणि रूक्षाणि जल्पतां निजस्य स्वीयस्य मुखस्य वृत्तान्तं व्यापारं अजानतां कं प्रति किमहं कथ यामीत्यविदुषां अतीव क्रोधान्धानामित्यर्थः प्रायेण त्वं राजसमूहयुद्ध दर्शनाभिलाषिणी नतु स्वयम्बराकाङ्क्षिणीत्यर्थः शचीसान्निध्याभावेन राज्ञां परस्परविरोधात् तव स्वयम्बरो दुर्घटो भविष्यतीति भावः। ताण्डवं नटनं नाट्यमित्यमरः ॥ ७९ ॥

Digitized by Google

अपार्थयन् याजकहुतक्रतिश्रमं
ज्वलेद्रुषा चेद्वपुषा तु नानलः ।
अलं नलः कर्त्तुमनग्निसाक्षिकं
विधिं विवाहे तव सारसाक्षि कं ॥ ८० ॥
पतिम्बरायाः कुलजं वरस्य वा
यमः कमप्याचरितातिथिं यदि ।

वह्निरपि क्रुद्धा स्वयम्बरे प्रतिकूलतामाचरिष्यतीत्याह ॥ अपार्थयन्निति ॥ अनलोवह्निश्चेद्यदि त्वयानादृतत्वात् रुषा क्रोधेन ज्वलेत् अति क्रुद्धो भवेत् तु पुनर्याजकानां पुरोधसां हुतक्रतिश्रमं निर्व्वापवह्नि सन्धुक्षणार्थं हुत्वारायासं अपार्थयन् विफलीकुर्व्वन् सन् वपुषा ज्वाला रूपेण शरीरेण न ज्वलेत् दीप्तो न भवेत् हे सारसाक्षि कमलनयने भैमि तर्हि नलस्तव विवाहे विषये अग्निः साक्षी यत्र स तथा तद्व्यतिरिक्तं कं विधिं वैवाहिकानुष्ठानं कर्त्तुं अलं समर्थो भवेत् अपितु न क मपि अग्निज्वलनं विना वैवाहिकहोमाभावेन विप्रसंस्कारभङ्ग लक्षणं दोषमवेक्ष्य नलोऽपि न त्वां परिणेष्यतीति भावः । सारसं सरसी रुहमित्यमरः ॥ ८० ॥

यमोऽपि तथा कर्त्तुं शक्नोतीत्याह ॥ पतिम्बरायाइति ॥ यमो यदि पतिम्बरायाः पतिवरणार्थमुद्यतायाः कन्यायास्तव वरस्य वा जामातु र्नलस्य वा कमपि कुलजं सपिण्डं अतिथिं स्वगृहागतं आचरिता करि ष्यति त्वयानादृतत्वात् क्रोधेन यमो यदि तव नलस्य वा कमपि सपिण्डं मारयिष्यतीत्यर्थः तर्हि हे साध्वि पतिव्रते भैमि समृद्धिमानपि अति समृद्धोऽपि स्वयम्बरो विफलीभविष्णुतां निष्फलत्वं कथं न गन्ता न ग

Digitized by Google

कथं नगन्ता विफलीभविष्णुतां
स्वयम्बरः साध्वि समृद्धिमानपि ॥ ८१ ॥
अपः प्रति स्वामितया परः सुरः
स नानिषेधेद्यदि नैषधक्रुधा ।
नलाय लोभाततपाणयेऽपि तत्
पिता कथं त्वां वद स प्रदास्यति ॥ ८२ ॥

मिष्यति अपितु सपिञ्जमरबेनाम्रोचात् स्वयम्बरोऽपि विफलो भविष्य तीत्यर्थः । पतिम्बरेति सह्यादेः संज्ञायामिति खमछ् ॥ ८१ ॥

वरुणोऽपि प्रतिबन्धको भवितुं शक्नोतीत्याह ॥ अपइति ॥ परः एते भ्योऽन्यः स प्रसिद्धः सुरोदेवो वरुणः अपोजलं प्रति लक्षीकृत्य स्वामि तया प्रभुत्वेन यदि नैषधक्रुधा नलं प्रति कोपेन ता अपोनिषेधेत् मा भवतीभिस्तत्र गन्तव्यमिति प्रतिषेधेत् तर्हि ते तव पिता भीमः लोभेन आततः प्रसारितः पाणिर्येन स तथा एवंविधायापि नलाय त्वां कथं केन प्रकारेण संप्रदास्यति वद कथय अपितु जलं विना कथमुत्सर्गोभवे दिति विविच्य नैव दास्यतीत्यर्थः यद्यप्यतिसुन्दर्य्यां त्वयि लुब्धत्वात् जल रूपाङ्गासमवधानप्रयुक्तवैधात्सर्गवैगुण्यमङ्गीकृत्यापि नलोहस्तं प्रसार्य्य याचेत तथाप्यतिधार्म्मिकत्वात् पिता त्वां न दास्यतीत्यपिना सूचि तं । अपइति स्वामिशब्दयोगात् षष्ठीसम्बन्धोः प्राप्तावपि द्वितीयावर्ज्जं नान्या विभक्तिः पञ्चादाविति निषेधात् कर्मप्रवचनीययुक्ते द्वितीयेत्यादिना द्वितीया ॥ ८२ ॥

Digitized by Google

इदं महत्तेऽभिहितं हितं मया
विहाय मोहं दमयन्ति चिन्तय।
सुरेषु विघ्नैकपरेषु को नरः
करस्थमप्यर्थमवाप्तुमीश्वरः॥ ८३॥
इमा गिरस्तस्य विचिन्त्य चेतसा
तथेति संप्रत्ययमाससाद सा।

इत्थं देवानां प्रातिकूल्यप्रकारमुक्त्वा उपसंहरन्नाह। इदमिति। हे दमयन्ति मया ते तव तुभ्यं वा इदं महत् हितं अभिहितं उक्तं त्वं मोहं अज्ञानं विहाय त्यक्त्वा चिन्तय अनेनेदं हितमुक्तमहितं वेति विचारय अत्र प्रतीकारोपायोऽपि नास्तीत्याह सुरेषु देवेषु विघ्नैकपरेषु केवलं विघ्नं कर्त्तुमिच्छत्सु सत्सु को नरो मनुष्यः करस्थमपि हस्तस्थितमप्यर्थं वस्तु अवाप्तुं लब्धुं ईश्वरः प्रभुर्भवेत् अपितु न कोऽपि देवेषु रुष्टेषु हस्तस्थमपि वस्तु दुष्प्रापं किं पुनर्मनोरथमात्रविषयोऽतिदूरस्थो नल इत्यपेरर्थः तस्मादधुनैव सर्व्वं विचारयेति भावः॥ ८३॥

इत्थं भीषिता भैमी नलोक्तिं सत्यत्वेनाङ्गीकृत्य रोदित्याह॥ इमा इति॥ सा भैमी तस्य नलस्य इमाः पूर्व्वोक्ता गिरश्चेतसा विचिन्त्य विचार्य्य तथेति संप्रत्ययं यदयं वदति तत्सत्यमिति सम्यक् प्रतीतिं आससाद प्राप ततश्च दृशौ चक्षुषी नभोनभस्यत्वं वर्षाम्बुजलत्वात् श्रावणभाद्रमास तुल्यत्वं अलम्भयत् प्रापयामास किम्भूते दृशौ निवारितो निरस्तोऽवग्रहो वृष्टिप्रतिबन्धो यस्य एवंविधो नीरनिर्झरो जलप्रवाहो ययो स्तादृश्यौ। अतिशयं रोदित्यर्थः। आषाढे श्रावणे तु स्यान्नभाः श्राव

Digitized by Google

निवारितावग्रहनीरनिर्झरे
नभोनभस्यत्वमलम्भयद्दृशौ ॥ ८४ ॥
स्फुटोत्पलाभ्यामलिदम्पतीव त
द्विलोचनाभ्यां कुचकुड्मलाश्रया ।
निपत्य विन्दू हृदि कज्जलाविलौ
मणीव नीलौ तरलौ विलेसतुः ॥ ८५ ॥

स्थिरश्च सः । स्यु नभस्यप्रौष्ठपदभाद्रभाद्रपदाः समाहृत्यमरः वृष्टिर्वर्षे तद्विघातेऽवग्राहावग्रहौ समाविति च ॥ ८४ ॥

रोदनमेव विशिनष्टि । स्फुटोदिति । अलिदम्पतीव भ्रमरस्त्रीपुंसाविव विन्दू अश्रुजलविन्दुद्वयं स्फुटोत्पलाभ्यां प्रफुल्लनीलोत्पलतुल्याभ्यां तस्या भैम्याविलोचनाभ्यां नेत्रयोः सकाशात् कुचौ स्तनौ कुड्मलौ कलिके इवेति कुचकुड्मलौ तयोराश्रया प्राप्तीच्छयेव हृदि वक्षसि निपत्य मणीव इन्द्रनीलाविव विलेसतुः शोभितवन्तौ किम्भूतौ कज्जलाविलौ कज्जलेन कलुषौ अतएव नीलौ नीलवर्णौ तथा तरलौ चपलौ भ्रमरावपि नीलौ तरलौ च भवतः इन्द्रनीलमणी अपि नीलौ तरलौ हारमध्यगौ च भवतः । अत्र चक्षुषी परित्यज्य कुचयोः पततोर्विन्द्वोर्भ्रमरमिथुनसादृश्यं भ्रमरमिथुनं हि विकसितकमलं बहुशमुपभुज्य किञ्चिद्विरक्तीभूय नवीनमध्वाश्रया विकसिष्यत्कमलकोरके निपतति । अनन्तरञ्च वक्षसि पतितयोस्तयोर्मणिसादृश्यं मणी हि हारमध्यगौ भूत्वा वक्षसि तिष्ठतः । दम्पतीवेत्यत्र मणीवेत्यत्र च मणीवादेर्वेत्यनेन सन्धिनिषेधस्य पाक्षिकत्वात् सन्धिः ॥ ८५ ॥

Digitized by Google

धुता पतत्पुष्पशिलीमुखाशुगैः
शुचेस्तदासीत् सरसी रसस्य सा।
रयाय बद्धादरयाश्रुधारया
सनालनीलोत्पलनीललोचना ॥ ८६ ॥
अथोन्मभन्ती रुदती गतक्षमा
ससम्भ्रमा लुप्तरतिः स्खलन्मतिः।

धुतेति। सा दमयन्ती तदा तस्मिन् समये शुचेरसस्य विप्रलम्भशृङ्गारस्य सरसी सर इव आसीत् अधिकतरं विप्रलम्भं बभारेत्यर्थः किम्भूता आपतन्त आगच्छन्तो ये पुष्पशिलीमुखस्य कामस्य आशुगा बाणास्तै धुंता कम्पिता अतिशयं पीडितेत्यर्थः पुनः किम्भूता रयाय वेगाय बद्धादरया कृताभिनिवेशया अधिकतरयेत्यर्थः अश्रुधारया सनालं नालसहितं यत् नीलोत्पलं तद्वन्नीलं लोचनं यस्याः सा अत्यर्थं रुदतीयं अथच शुचेर्ग्रीष्मसम्बन्धिनी रसस्य जलस्य सरसी आसीत् शुचेर्निर्मलस्य जलस्य सरसीतिवा किम्भूता सरसी पतन्ति श्लथवृन्तत्वात् निष्पतन्ति पुष्पाणि येभ्यस्तादृशा ये शिलीमुखा भ्रमरा आशुगा वायवश्च तैर्धुंता कम्पिता यद्वा पतद्भिः पक्षिभिर्हंसादिभिः पुष्पेषु स्थितैः शिलीमुखैर्भ्रमरैः आशुगेन वायुनाच धुता तथा ग्रीष्मसमये जलस्याल्पत्वाद्दृश्यमाननालनीलोत्पला भवति शुचिः शोकस्य सरसी बभूवेति वा। शुचिः शुद्धेऽनुपहते शृङ्गाराषाढयोः स्मृतः। ग्रीष्मे ऽहुतवहेऽपीतिविश्वः। शोकपक्षे शुचधातो र्भ्राजादेरिरिति भावे इः। ८६।

इत्थमत्यर्थं रुदती भैमी विललापेत्याह। अथेति ॥ अथानन्तरं सा भैमी प्रियस्य नलस्य प्राप्तेर्विघातस्य निश्चयात् नलप्राप्तिः सर्वथा न

Digitized by Google

व्यधात् प्रियप्राप्तिविघातनिस्तथा
मृदूनि दूना परिदेवितानि सा ॥ ८७ ॥
त्वरस्व पञ्चेषुकृताग्ननात्मन
स्तनुष्व मङ्गस्ममयं यशस्स्वयं ।
विधे परेच्छाफलभञ्जनव्रती
पताद्य तृप्यन्नसुभिर्ममाफलैः ॥ ८८ ॥
भृशं वियोगानलताप्यमान किं
विलीयसे न त्वमयोमयं यदि ।

भविष्यतीति निश्चयाद्धेतोर्दूना उत्तप्ता सती मृदूनि श्रोतुः कारुण्य जनकानि परिदेवितानि विलापवचनानि व्यधात् कृतवती विभ्रान्ता उन्मत्ता उन्मादवती तथा वदती रोदनं कुर्वती गतक्षमा गतधैर्या ससम्भ्रमा सभया गुरुरतिर्गाढानुरागा स्वजन्मतिर्मोहं गच्छन्ती ॥ ८७ ॥

परिदेवितान्येवाह । त्वरस्वेति । हेपञ्चेषुकृताग्न कामानल त्वं त्वरस्व सत्वरोभव कस्मिन् कर्म्मणीत्याह मां दग्ध्वा मङ्गस्ममयं आत्मनो निजस्य यशश्चयं कीर्त्तिसमूहं तनुष्व विस्तारय अन्योऽपि कृवाग्नः काष्ठादिकं दग्ध्वा भस्म करोति हे विधे हे विधातः परस्य इच्छाया वाञ्छायाः फलस्य यद्भञ्जनं विनाशनं तदेव व्रतं अवश्यनिर्व्वाह्यं विद्यते यस्य तादृशस्त्वं अफलैर्नलालाभान्निष्प्रयोजनैर्मम असुभिः प्राणैस्तृप्यन् हृष्टः सन् पत पतितोभव अनपराधां मां मारयित्वा पतितोभवेत्यर्थः अन्योऽपि अन्यफलभञ्जनव्रती पतितो भवति ॥ ८८ ॥

भृशमिति । हे भृशमत्यर्थं वियोगानलताप्यमान विरहाग्निना दह्यमान स्वान्त मनस्त्वं यदि अयोमयं लोहमयं तर्हि किं कथं न विलीयसे

Digitized by Google

स्मरेषुभिर्भेद्य न वज्रमप्यसि
द्रवीषि न स्वान्त कथं न दीर्य्यसे॥ ८९ ॥
विलम्बसे जीवित किं द्रव द्रुतं
ज्वलत्यदस्ते हृदयं निकेतनं ।
जहासि नाद्यापि मृषासुखासिका
मपूर्व्वमालस्यमहो तवेदृशं ॥ ९० ॥

न द्रवीभवसि यद्यपि अन्यत्तापमानं सत् द्रवीभवति तवतु तदभा वात् अयसोऽप्यतिकठिनमसीत्यर्थः तथा हे स्मरेषुभिः कामबाणैर्भेद्य स्वान्त वज्रमपि नासि स्मरस्य पुष्पमयैरपि बाणैर्भेद्यत्वात्त्वं वज्रमित्यपि वक्तुं नशक्यसइत्यर्थः तर्हि कथं नदीर्य्यसे स्वयमेव विदीर्णं न भवसि न द्रवीषि न कथयसि अपितु विदाराभावकारणं कथयेत्यर्थः ॥ ८९ ॥

विलम्बसइति ॥ हे जीवित किं किमर्थं विलम्बसे विलम्बं करोषि द्रुतं शीघ्रं द्रव पलायस्व यतस्ते तव अदएतत् हृदयं निकेतनं हृदयस्थ त्वद्वासस्थलं ज्वलति कामाग्निना दह्यते अद्यापि निकेतने दह्यमानेऽपि मृषा मिथ्या सुखासिकां सुखावस्थानं न जहासि न त्यजसि अपितु शीघ्रं त्यज अहो आश्चर्य्यं तव ईदृशं निकेतने दह्यमानेऽपि सुखावस्थानरूपं आलस्यं अलसत्वं अपूर्व्वं लोकोत्तरं अन्योह्यलसोनिकेतने दह्यमाने सुखावस्थानं त्यक्त्वा झटिति तस्मात् पलायते त्वन्तु ज्वलत्यपि गृहे तन्मध्य एव तिष्ठसि तस्मात्तव लोकोत्तरमाश्चर्य्यजनकमालस्यमित्यर्थः त्वं शीघ्रं निर्गच्छ तथासति मम एतावद्दुःखं न भविष्यतीति भावः ॥ ९० ॥

Digitized by Google

दृशा मृषा पातकिनोमनोरथाः
कथं पृथू वामपि विप्रलेभिरे ।
प्रियश्रियः प्रेक्षणघाति पातकं
स्वमश्रुभिः क्षालयतं शतं समाः ॥ ९१ ॥
प्रियं न मृत्युं न लभे त्वदीप्सितं
तदेव न स्यान्मम यत्त्वमिच्छसि ।

दृशाविति । हे दृशौ चक्षुषी मृषा मिथ्यामयाः पातकिनः परस्य प्रतारकत्वात् पातकयुक्ता मनोरथाः पृथू अपि अतिविशाले अपि वां युवां विप्रलेभिरे प्रतारयन्तिस्म मनसोऽणुत्वात् तैः प्रतारणा युज्यते युवान्तु पृथू तद्युवयोरपि अणुभिः प्रतारणं कृतं तदाश्चर्यमित्यर्थः अयञ्च पृथुरतिमहान् अणोर्हि प्रतार्योन भवति संप्रति युवां प्रियश्रियो नलशोभायाः प्रेक्षणघाति दर्शनप्रतिबन्धकं स्वं स्वीयं पातकं शतं समाः शतवत्सरान् व्याप्य यावज्जीवमित्यर्थः अश्रुभिः करणैः क्षालयतं संमार्जयतं युवयोरपि नलशोभादर्शनप्रतिबन्धकं दुरदृष्टं वर्त्तते तद्यावत् तावन्नलशोभादर्शनं नभवतीति तदेव तावन्निराकुरुतमित्यर्थः अन्यदपि मलिनं जलेन क्षालयति नलदर्शनाभावाद्यावज्जीवमपि रोदनं युवयोः प्राप्तमिति भावः ॥ ९१ ॥

प्रियमिति । हे मनस्त्वदीप्सितं त्वया लब्धुमिष्टं प्रियं नलं तदभावे मृत्युञ्च द्वयमपि अहं न लभे न प्राप्नोमि कुत इत्याह त्वं यत् इच्छसि मम तदेव न स्यात् न भवेत् संप्रति प्रियेण नलेन सह मे मम वियोगमेव इच्छ अभिलष

वियोगमेवेच्छ मनः प्रियेण मे
तव प्रसादान्न भवत्वसावपि ॥ ९२ ॥
न काकुवाक्यैरतिवाममङ्गजं
द्विषत्सु याचे पवनन्तु दक्षिणं ।

तव प्रसादात् असावपि वियोगोऽपि मम न भवतु त्वया वियोगे प्रार्थिते तद्विपरीतः प्रियलाभो भविष्यतीतिभावः ॥ ९२ ॥

नेति ॥ अहं द्विषत्सु विरहिशत्रुषु चन्द्रचन्दनरोलम्बादिषु मध्ये काकुवाक्यैर्दैन्यवचनैः कृत्वा अङ्गजं कामं न याचे न किमपि प्रार्थये किम्भूतं यतोऽतिवामं विरहिषु अतिप्रतिकूलं विरहिप्रतिकूलत्वादेव कामो न याचितुं योग्यइत्यर्थः अथच अतिक्रान्ता वामाः स्त्रियोयेन तादृशं स्त्रीणां वचनाकारिणमित्यर्थः अथच रतौ प्रीतौ वामं वक्रं विरहिप्रीतिविरोधिनमित्यर्थः तस्मात् कामं न याचे तु किन्तु पवनं काकुवचनैर्याचे वक्ष्यमाणं प्रार्थये यतोदक्षिणं अवामं अथच दाक्षिणात्यं अवामत्वात् दाक्षिणात्यतया उत्तरदिग्गवस्थितनलराजधान्यभिगामित्वाच्च पवनएव याचितुं योग्य इत्यर्थः अथच अङ्गजः पुत्रोऽपि अतिवक्रत्वान्न याचितुमर्हः दक्षिणाप्यवामत्वात् याचितुमर्हः याच्यमानमर्थमेवाह अयं पवनो यया दिशा उपलक्षितः प्रियोनलः यस्यां दिशि मम प्रियोनलो वर्त्तते तया दिशोपलक्षितं तस्यां दिशि मद्भस्मापि किरतु विक्षिपतु दक्षिणानिलः कुण्डिनपुरादुत्तरस्यां दिशि वर्त्तमानां नलराजधानीं प्रति मद्भस्म नयतु तथात्वे मम भस्मनोऽपि नलसम्बन्धोभवेदित्यर्थः ननु मलयानिलोऽपि विरहिणां वैरी तत्कथं विरहिण्यास्तव वचनं स करिष्यतीत्याशङ्क्याह यतोवैरविधिर्वैरकरणं वधावधिर्म्मारणपर्य्यन्तः एतच्च कारणं स

दिशापि मद्भस्म किरत्वयं तया
प्रियो यया वैरविधिर्वधावधिः ॥ ९३ ॥
अमूनि गच्छन्ति युगानि न क्षणः
कियत् सहिष्ये न हि मृत्युरस्ति मे।
स मां न कान्तः स्फुटमन्तरुज्झिता
न तं मनस्तच्च न कायवायवः ॥ ९४ ॥
मदुग्रतापव्ययशक्तशीकरः
सुराः स वः केन पपे कृपार्णवः।

मम साधारणं वैरमस्तु असाधारणमिति बोध्यं वैरिणामनेकत्वेऽपि प्राधान्यात् कामपवनयोरेव याच्ञायाचनाभ्यामुल्लेखः कृतः ॥ ९३ ॥

अमूनीति ॥ अमूनि युगानि सुखमया बहवश्चन्द्राः कालविशेषा गच्छन्ति क्षणो दुःखमयोऽल्पोऽपि कालेन गच्छति दुःखमयो क्षणकालेऽपि बहुयुगतुल्यो भवतीतिभावः। कियत् किं परिमाणं दुःखमहं सहिष्ये अनुभविष्यामि जीवनावध्येव सहनीयमेतदित्याह यतो मे मम मृत्युर्नास्ति मृत्योरभावादेव अनवधिकालमेतत् सहनीयमित्यर्थः मरणाभावः कथमित्यत आह स्फुटं यतोऽन्तर्मध्ये स्थितः स कान्तो नलः मां न उज्झिता न त्यक्ष्यति कायवायवश्च प्राणाश्च तत् मनो नोज्झितारः ममैतत्स्थूलशरीरनाशेऽपि लिङ्गशरीरं स्थास्यति तथापि अन्तःकरणादयः परस्परसम्बन्धाविच्छेदा इव स्थास्यन्ति न तु लिङ्गशरीरस्थमप्यन्तःकरणं नैव त्यक्ष्यति तस्मान्मरणाभावान्ममैतावद्दुःखं चिरसहनीयमिति भावः ॥ ९४ ॥

मदुग्रेति । हे सुरा इन्द्रादयः स प्रसिद्धो वो युष्माकं कृपार्णवः कारुण्यसमुद्रः केन पपे पीतः किम्भूतः मम य उग्रतापो नलविरहज

Digitized by Google

उदेति कोटिर्न मुदे मदुत्तमा
किमाशु सङ्कल्पलवश्रमेण वः ॥ ९५ ॥
ममैव वाऽहर्दिवमश्रुदुर्दिनैः
प्रसह्य वर्षासु ऋतौ प्रसज्जिते ।
कथं नु शृण्वन्तु सुपुण्य देवता
भवन्त्वरण्ये रुदितं न मे गिरः ॥ ९६ ॥

नितसन्तापकस्य मयि नाम्ने मनोयोग्यः सीकरः कणमात्रं यस्य तादृशः अन्योऽजलसमुद्रोऽमृतत्वेन पीतः अयं केन पीतः यूयं ईदृशा निष्कृपाः कथं भवथ कथयतेत्यर्थः ननु त्वदभिलाषादेवैवं क्रियते इत्याशङ्क्याह वो युष्माकं सङ्कल्पलवश्रमेण इच्छालेशमात्रकृपेणैव श्रमेण मदुत्तमा मत्त उत्कृष्टा अर्थात् स्त्रीणां कोटिर्मुदे युष्माकं प्रीतये आशु शीघ्रं किं न उदेति नोत्पद्यते अपितु युष्माकं इच्छामात्रेणैव मदपेक्षयाविशिष्टयो जायन्ते तत्किमर्थं मदभिलाषविडम्बनया मयि निष्कृपा भवथेत्यर्थः ॥ ९५ ॥

ममैवेति । वा अथवा अहर्दिवं दिवानिशं ममैव अश्रूण्येव दुर्दिनानि मेघच्छन्नदिनानि वृष्टयस्तैः कृत्वा प्रसह्य अकस्मात् वर्षासु ऋतौ प्रसज्जिते प्रवर्त्तिते सति देवता इन्द्रादयो देवाः सुपुण्य अस्माकं शयनकालोऽयमिति मत्वा सुखेन सुप्ताः कथं नु शृण्वन्तु मत्परिदेवनगिर इत्यर्थात् तस्मात् मे मम गिरः परिदेवनवचनानि अरण्ये रुदितं न भवन्तु अरण्य रुदितवन्निष्फलतां न व्रजन्तु इतः परं देवानुद्दिश्य वृथाविलापं न करिष्यामीत्यर्थः अरण्ये रुदितं न भवन्तु अपितु अरण्ये रुदितमेव भवन्त्विति वचनः । वर्षास्विति आपोदारा इत्यादिना एकत्वे बहुवचनं ॥ ९६ ॥

Digitized by Google

भिदां हृदि द्वारमवाप्य मैव मे
हृतासुभिः प्राणसमः समक्रमः ॥ १०० ॥
इति प्रियाकाकुभिरुन्मिषन् भृशं
दिगीशदूत्येन हृदि स्थिरीकृतः ।
नृपः स योगेऽपि वियोगमन्मथः
कृशं तमुद्भ्रान्तमजीजनत् पुनः ॥ १०१ ॥

आदरि आदरयुक्तं तत्वात् त्वां किञ्चित् अथवे याचे सत्यवृत्ततुल्यत्वात् त्वया वदातव्यमित्यर्थः किन्तदित्याह मम हृदि भिदां विदारणमेव द्वारं अवाप्य हृतासुभिरनीप्सितप्राणैः समं सह प्राणसमः प्राणतुल्यस्त्वं मैव गमः नैव याहि मम प्राणा हृदयात् निःसरन्तु त्वं मा याहि जन्मान्तरेऽपि मम त्वय्येवानुरागो भवेदितिभावः प्राणतुल्यत्वात् प्राणैः सह गमने प्रश्रेयं । विदरीतुमिति वृकवृत्तनकृतामित्यादिना इंह् धान्तरमिति चार्थे टप् ॥ १०० ॥

इत्थं भैमीवचनमाकर्ण्य नलस्य विप्रलम्भाधिक्यं जातमित्याह । इतीति । स पूर्वसम्भृतो वियोगमन्मथो विरहजनितकामो योगेऽपि भैमीसान्निध्ये सत्यपि तं नृपं नलं कृशं वाप्य पुनरुद्भ्रान्तं उन्मत्तं अजीजनत् कृतवान् पूर्वमप्यनेकवारं कृतवान् इति पुनःपदार्थः किम्भूतः दिगीशानामिन्द्रादीनां दूत्येन हृदि मनसि स्थिरीकृतः अन्या पिकारोबोध्यः इन्द्रादिदूततया स्थिरीकृतोऽपि निवर्त्तितोऽपि दैवात्पी डारेव भैम्या निराशत्वात् पुनप्राप्तोऽपि इति पूर्वोक्तरूपैः प्रियाया भैम्याः काकुभिर्दैन्यभाषणैर्भृशमत्यर्थं उन्मिषन् प्रकटीभवन् उन्मादमवाप्तोऽपि प्रलपति स्मेति भावः ॥ १०१ ॥

Digitized by Google

महेन्द्रदूत्यादि समस्तमात्मन
स्ततः स विस्मृत्य मनोरथस्थितैः ।
क्रियाः प्रियाया ललितैः करम्बिता
विकल्पयन्नित्यमलीकमालपत् ॥ १०२ ॥
अयि प्रिये कस्य कृते विलप्यते
विलिप्यते हा मुखमस्रुविन्दुभिः ।

तदेव विशिष्याह ॥ महेन्द्रेति ॥ सनलस्ततोऽनन्तरं आत्मनः समस्तं महेन्द्रदूत्यादि आदिना वह्निदूत्यादिकञ्च विस्मृत्य मनोरथस्थितैः पूर्व्वं मनोरथकल्पितैर्ललितैर्भैमीविलासैः करम्बिता मिश्रिताः प्रियायाभैम्याः क्रिया विलापादिरूपा विकल्पयन् तर्कयन् सम्भावयन्निति यावत् इत्थं वक्ष्यमाणप्रकारं अलीकं अयुक्तिपूर्व्वकं आलपत् उक्तवान् यथा पूर्व्वं विप्रलम्भावस्थायां भैमीं मानिनीत्वेन मनसि कल्पयित्वा तदभिमानवचनोचितमलीकमुक्तवान् तथा उक्तविलापवचनमपि प्रत्यक्षवचनत्वेन सम्भाव्य उक्तवानित्यर्थः ॥ १०२ ॥

यदालपत् तदाह ॥ अयीति ॥ अयीति सानुनयसम्बोधने अयि प्रिये भैमि त्वया कस्य कृते निमित्तं विलप्यते विलापः क्रियते हा कष्टं कस्य कृते च अस्रुविन्दुभिः करणैर्मुखं विलिप्यते विशेषेण लिप्तं क्रियते अतिशयं क्लिश्यत इत्यर्थः एतदुभयममङ्गलत्वान्नैव कर्त्तव्यमित्यर्थः । तिरश्चन्ती तिर्य्यग्गामिनी वक्रे लोचनशीले चक्षुःस्वभावौ यस्याः सा तया तथाभूतया वक्रलोचनया वक्रस्वभावया चेत्यर्थः लोचनलीलयेति पाठे तिरश्चतोर्लोचनयोर्लीलया विलासेन कटाक्षेणेत्यर्थः त्वया पुरो

Digitized by Google

पुरस्त्वयालोकि नमन्नयं कि
तिरश्चलल्लोचनशीलया नलः ॥१०२॥
चकास्ति विन्दुच्युतकातिचातुरी
घनाश्रुविन्दुस्रुतिकैतवात्तव।

ऽग्रे गमन् त्वच्चरणयोः पतितुमुद्यमं कुर्व्वन् अयं नलः किं नालोकि न दृष्टः तव लोचनमिव स्वभावेोऽपि वक्रः कथमन्यथा चरणपतनाय उद्योगमपि मामदृष्ट्वैव रोदिषि संप्रति प्रणयकलहं परित्यज्य चरणपतनोद्यतं मामवलोकनेनानुगृह्णाय रोदनं माकार्षीरिति भावः अत्र उन्मादवशात् रोदनं प्रणयकोपजनितत्वेन सम्भावितं ॥ १०२ ॥

चकास्तीति । मसाराविन्द्रनीलाविव तारे कनीनिके ययोस्तादृशी अक्षिणी चक्षुषी यस्याः सा तथा हे तथाविधे प्रिये तव घना निविडा येऽश्रुविन्दवस्तेषां स्रुतिः क्षरणं तस्याः कैतवाद्व्याजात् विन्दुच्युतके प्राचीनोक्तशब्दालङ्कारविशेषे ऽतिचातुरी अतिनैपुण्यं चकास्ति भाति त्वं विन्दुच्युतकालङ्कारं सम्यग्जानासीत्यर्थः अथच विन्दूनां च्युतमेव च्युतकं तत्रातिचातुरी शोभते त्वं सम्यगश्रुकरोदनं कर्तुं जानासीत्यर्थः यतस्त्वं असंशयं निश्चितं संसारं सकलं जगत् आत्मना ससारं श्रेष्ठवस्तुयुक्तं तनोषि करोषि अस्मिन् संसारे त्वादृशी कापि कुशला नास्ति यतस्त्वं रोदनेऽप्यतितरां शोभसे इत्यर्थः अथच विन्दोरनुस्वारस्य च्यवनचातुर्य्यात् सानुस्वारसंसारशब्दं विन्दुच्यवनेन ससारं तनोषि । अनुस्वारच्यवनाच्चार्थान्तरं भवति तद्विन्दुच्युतकं । यथा काले तडिल्लता जाले घनपीनपयोधरे । कान्तः सर्व्वगुणोपेतो बालेन्दुः खे न लभ्यत इति

Digitized by Google

मसारतारादपि ससारमात्मना
तनोषि संसारमसंशयं यतः ॥ १०४ ॥
अपास्तपाथोरुहि शायितं करे
करोषि लीलानलिनं किमाननं ।
तनोषि हारं कियदश्रुणः स्रव
रदोषनिर्व्वासितभूषणे हृदि ॥ १०५ ॥
दृशोरमङ्गल्यमिदं मिलज्जलं
करेण तावत् परिमार्ज्जयामि ते ।

अथ बालेन्दुर्नवीनचन्द्रः खे आकाशे न लभ्यते पश्चादुद्गतात्सहनेन ह्वैवाले आप्तो दुःखेन लभ्यत इत्यर्थः । नीलमणिर्मसारः स्यादिति हारावली ॥ १०४ ॥

अपास्तेति ॥ हे प्रिये अपास्तं परित्यक्तं पाथोरुहं लीलापद्मं यस्मात् तादृशे करे पाणौ शायितं स्थापितं आननं मुखं किं किमर्थं लीलानलिनं लीलापद्मं करोषि लीलापद्मस्थाने मुखं किमर्थं करोषीत्यर्थः अपितु तन्मा कुरु लीलापद्मं गृहाण चिन्तां माकार्षीरिति भावः । तथा अदोषेण वैध व्यादिदोषाभावेन अथच मदीयापराधं विना निर्व्वासितान्यपनीतानि भूषणानि हारादीनि यस्मात् तादृशे हृदि वक्षसि कियदश्रुणः स्रवैः क्षरणैरश्रुबिन्दुभिर्हारं मुक्तावलीं किं तनोषि किमित्यत्रापि सम्बध्यते यद्वा कियदिति क्रियाविशेषणं हारस्थानेऽश्रुबिन्दून् किमर्थं करोषीत्यर्थः हृदि हारं धारय रोदनं माकार्षीरि तिभावः ॥ १०५ ॥

दृशोरिति ॥ हे प्रिये ते तव दृशोश्चक्षुषोर्मिलत् सङ्गच्छमानं इदं अश्रु अमङ्गल्यं तावत् प्रथमं करेण निजपाणिना परिमार्जयामि प्रोञ्छामि

Digitized by Google

अयापराधं भवदङ्घ्रिपङ्कज
द्वयोरजोभिः सममात्ममौलिना ॥ १०६ ॥
मम त्वदङ्घ्र्यङ्गुलिनखामृतद्युतेः
किरीटमाणिक्यमयूखमञ्जरी ।
उपासनामस्य करोतु रोहिणी
त्यजत्यजाकारणरोषणे रुषं ॥ १०७ ॥

अतोऽमङ्गल्यं मङ्गलार्हं न भवति अथ पश्चात् भवत्यास्तव अङ्घ्रिपङ्कजद्व्या द्वरणकमलद्वयस्य रजोभिर्धूलीभिः समं सह अपराधं निजदोषं आत्ममौलिना स्वकीयमस्तकेन परिमार्जयामि यदि मदीयमपराधं सम्भाव्य अनुजनं परित्यजसि तर्हि अमङ्गल्यं तत् प्रथमं प्रोञ्छामि पश्चात् त्वच्चरणे पतित्वा स्वापराधमपनयामीत्यर्थः । परिमार्जयामीति वर्त्तमान सामीप्ये लट् ॥ १०६ ॥

ममेति ॥ हे प्रिये मम रोहिणी लोहितवर्णा किरीटमाणिक्यस्य किरीटस्थितपद्मरागमणेर्मयूखमञ्जरी दीर्घाकारत्वात् किरणरूपा मञ्जरी अस्य पुरोवर्त्तिनस्तव योऽङ्घ्र्योनिर्म्मलोऽङ्गुलिरङ्घ्रस्य नखः स एव अमृतद्युतिश्चन्द्रस्तस्य उपासनां सेवां करोतु हे अकारणरोषणे अकारणं कारणं विना रोषणं कोपोयस्याः सा तथा हे एवंविधे रुषं कोपं त्यजत्यज मुञ्चमुञ्च एषोऽहं तव चरणे प्रणतो भवामि कोपं मुञ्च मुञ्चेत्यर्थः अथच रोहिणी चन्द्रप्रिया तारकाविशेषश्चन्द्रस्य उपासनां समीपेऽवस्थानं करोति । रोहिणी बहुरोहिण्यां रोहिणी लोहिताश्रयेः । अकारणरोषणे भे धेवि विप्रः ॥ १०७ ॥

Digitized by Google

तनोषि मानं मयि चेन्मनागपि
त्वयि श्रये तद्बहुमानमानतः ।
विनम्य वक्त्रं यदि वर्त्तसे क्वचि
न्नमामि ते चण्डि तदा पदावधि ॥ १०८ ॥
प्रभुत्वभूम्नानुगृहाण वा न वा
प्रणाममात्राधिगमेऽपि कः श्रमः ।

तनोषीति । हे प्रिये चेद्यदि त्वं मयि मनागपि स्वल्पमपि मानं प्रणयकोपं ईर्ष्याकोपं वा तनोषि कुरुषे तर्हि अहं आनतः सन् त्वयि बहुमानं बहुतरं श्रये कुर्वे । तथा हे चण्डि कोपने भैमि यदि त्वं क्वचित् किञ्चित् वक्त्रं मुखं विनम्य नमयित्वा वर्त्तसे तदा अहं पदावधि चरणपर्य्यन्तं ते तुभ्यं नमामि दण्डवत्प्रणामेन तव कोपमपनयामीत्यर्थः बहुमानेन अल्पं मानं बहुना नमनेनाल्पं नमनञ्च अपनेष्यामीति भावः । विनम्येति अन्तर्भावितण्यर्थो नमिर्बोध्यः । मानः कोपः स तु द्वेधा प्रणयेर्ष्यासमुद्भव इति साहित्यदर्पणः ॥ १०८ ॥

प्रभुत्वेति । हे प्रिये त्वं मम प्राणेश्वरीत्वात् प्रभुत्वभूम्ना प्रभुत्वशक्त्याधिक्येन मां अनुगृहाण वा मां प्रति अनुग्रहं वा कुरु वा किम्वा नानुगृहाण अत्र न कापि विप्रतिपत्तिरस्तीत्यर्थः किन्तु प्रणाममात्राधिगमेऽपि केवलं मदीयप्रणामाङ्गीकारेऽपि तव कः श्रमः प्रयासः प्रभवो हि स्वतन्त्रत्वात् कदाचित् सेवकाननुगृह्णन्ति नानुगृह्णन्ति वा किन्तु तत्प्रणाममङ्गीकुर्वन्त्येव त्वन्तु तदपि न करोषीति मया किमपराद्धमिति कथयेति भावः । अतएव याचतां प्रार्थयमानानां कल्पलतासि अभीष्टप्रदानत्वा

Digitized by Google

क्व याचतां कल्पलतासि मां प्रति
क्व दृष्टिदाने तव बद्धमुष्टिता ॥ १०९ ॥
स्मरेषुमाथं सहसे मृदुः कथं
हृदि द्रढीयःकुचसंवृते तव ।
निपत्य वैसारिणकेतनस्य वा
व्रजन्ति बाणा विमुखोत्पतिष्णुताम् ॥ ११० ॥
स्मितस्य संभावय सृक्कणा कणान्
विधेहि लीलाचलमञ्चलं भ्रुवः ।

याचकात् कल्पलतातुल्या त्वं क्व तथा मां प्रति दृष्टिदानेऽपि अवलोकनमात्रेऽपि तव बद्धमुष्टिता कृपणता क्व अपितु कल्पलतात्वकृपणत्वयोरत्यन्तासामानाधिकरण्यमशक्यमित्यर्थः नाहं मञ्जुतरं याचे किन्तु कटाक्षावलोकनमात्रेणापि मामनुगृहाणेति भावः ॥ १०९ ॥

स्मरेष्विति । हे प्रिये मृदुरतिकोमला त्वं स्मरेषुभिर्माथं विलोडनं कामबाणजनितव्यथां कथं सहसे अङ्गीकरोषि मृदूनां कामबाणव्यथा असह्यैव तत् कथं मामनाश्रित्य तां स्वीकरोषीत्यर्थः । वेति पूर्व्वापरितोषे अथवा वैसारिणकेतनस्य मीनकेतनस्य कामस्य बाणा द्रढीयोभ्यां कठिनतराभ्यां कुचाभ्यां संवृते पिहिते हृदि वक्षसि निपत्य पतित्वा यथा निमज्ज्यैव विमुखोत्पतिष्णुतां पराङ्मुखीभूय उत्पतनशीलतां व्रजन्ति प्राप्नुवन्ति यथा कठिनवस्तुनि पाषाणादौ बाणादयो निपत्य अनिमज्ज्यैव पराङ्मुखीभूय उत्पतन्ति तथेत्यर्थः अतः कामबाणपीडा तव न जायते इति मानमाश्रयसीति भावः । मीने वैसारिणोऽण्डज इत्यमरः ॥ ११० ॥

स्मितस्येति । हे प्रिये सृक्कणा ओष्ठप्रान्तेन स्मितस्य कणान् लेशान् सम्भावय सत्तार्थान् कुरु ईषद्धसनं किञ्चित् कुर्व्वित्यर्थः तथा भ्रुवोऽञ्चल

Digitized by Google

अपाङ्गरथ्यापथिकीञ्च हेलया
प्रसद्य सन्धेहि दृशं ममोपरि ॥ १११ ॥
समापय प्रावृषमश्रुविप्रुषां
स्मितेन विश्राणय कौमुदीमुदः ।
दृशावितः खेलतु खञ्जनद्वयी
विकाशिपङ्केरुहमस्तु ते मुखं ॥ ११२ ॥
सुधारसोद्वेलनकेलिमक्षर
स्रजा सृजान्तर्मम कर्णकूपयोः ।

प्रान्तं लीलया विलासेन चलं चपलं विधेहि कुरु भ्रूभङ्गमपि किञ्चित् कुर्वित्यर्थः तथा अपाङ्गो नेत्रप्रान्त एव रथ्या प्रतोली तत्र पथिकीं अध्वन्यां दृशं दृष्टिं च प्रसद्य प्रसन्नीभूय हेलया अनादरेणापि विलासेनेति वा ममोपरि सन्धेहि प्रक्षिप किञ्चित् कटाक्षेण मां विलोकयेत्यर्थः । प्रसह्येत्यत्र प्रसीदेति क्वचित् पाठः । प्रान्तावोष्ठस्य सृक्कणी इत्यमरः ॥ १११ ॥

समापयेति । हे प्रिये त्वं अश्रुविप्रुषां नयनजलबिन्दूनां प्रावृषं वर्षर्त्तुं अथच वर्षाकालं समापय शान्तिं नय रोदनं माकार्षीरित्यर्थः तथा स्मितेन ईषद्धसनेन कौमुदीमुदो ज्योत्स्नाजन्यहर्षान् विश्राणय मह्यं वितर ईषद्धास्येनापि मां तोषयेत्यर्थः तथा तव दृशौ चक्षुषी एव खञ्जनद्वयं खञ्जनपक्षियुगलं इतोऽस्मिन् मल्लक्षणे जने खेलतु क्रीडतु कटाक्षेण मां विलोकयेत्यर्थः तथा ते तव मुखं विकाशिपङ्केरुहं प्रफुल्लकमलतुल्यं अस्तु भवतु मुखं प्रसन्नं कुर्वित्यर्थः अथच वर्षाकाले ऽतीते कौमुदी खञ्जनक्रीडा कमलविकाशश्च भवति । ११२ ॥

सुधेति । हे प्रिये त्वं मम कर्णावेव कूपौ तयोरन्तर्मध्ये अक्षरस्रजा वर्णश्रेण्या सुधारसस्य उद्वेलनं वेलां तीरमतिक्रम्य वर्त्तनं वर्द्धनमिति या

दृशौ मदीये मदिराक्षि कारय
स्मितश्रिया पायसपारणामपि ॥ ११३ ॥
ममासनार्द्धे भव मण्डनं न न
प्रिये मदुत्सङ्गविभूषणं भव ।
भ्रमाद्भ्रमादालपमङ्ग मृष्यतां
विना ममोरः कतमत्तवासनं ॥ ११४ ॥

यत् तदेव कोपिः क्रीडितं तां त्यज कुरु मम कर्णसुखदं किमपि कथये त्यर्थः तथा हे मदिराक्षि मदिरोमत्तखञ्जनवत् अक्षिणी यस्याः सा तथा तत्सम्बुद्धिः हे अतिचञ्चलनयने इत्यर्थः मदीये दृशौ चक्षुषी स्मित श्रिया ईषद्धसनशोभया पायसेन परमान्नेन या पारणा उपवासानन्तर भोजनं तामपि कारय यथा उपोषितस्य पायसपारणया तृप्तिर्भवति तथा तवाहर्शनेन उपोषिततुल्ययोर्मम नयनयोस्तत्स्मितशोभादर्शने न तृप्तिर्भवतीत्यर्थः स्मितपूर्वं किमपि ब्रूहीति भावः ॥ ११३ ॥

ममेति । हे प्रिये त्वं मम आसनार्द्धे मण्डनं अर्थात् आसनस्य भूषणं भव ममासनार्द्धे वसेत्यर्थः न न एवं मया अनुचितमेवोक्तं हे प्रिये मदु त्सङ्गस्य मम क्रोडस्य विभूषणं भव आसनार्द्धापेक्षया क्रोडस्योत्कृष्ट त्वात् तव चातिप्रियत्वात् तत्रैव वसेत्यर्थः एतदपि मया समीचीनं नोक्त मित्यभिप्रेत्याह अङ्ग हे प्रिये अहं भ्रमात् भ्रमात् आलपं एतदपि भ्रान्त्या उक्तवानस्मि मृष्यतां क्षमेष्वा अनुचितत्वात् क्षम्यतां तर्हि किं वक्तव्यं ब्रूही त्याह हे प्रिये मम उरोवक्षःस्थलं विना कतमत् बहुषु मध्ये श्रेष्ठं किं तव आसनं भवेत् अपितु न किमप्युत्सङ्गादि उत्सङ्गापेक्षयापि वक्षसः श्रेष्ठत्वात् तत्रैव वसेत्यर्थः । वनेति भ्रमाद्भ्रमादितिच सम्भ्रमे द्विरुक्तिः अङ्गेति सानुनयसम्बोधने ॥ ११४ ॥

Digitized by Google

अधीतपञ्चाशुगबाणवञ्चने
स्थिता मदन्तर्बहिरेषि चेदुरः ।
स्मराशुगेभ्यो हृदयं बिभेतु न
प्रविश्य तत्त्वन्मयसंपुटे मम ॥ ११५ ॥
परिष्वजस्वानवकाशबाणता
स्मरस्य लग्ने हृदयद्वयेऽस्तु नौ ।

अधीतेति । हे अधीतपञ्चाशुगबाणवञ्चने अधीता शिक्षिता पञ्चाशुगबाणानां कामशराणां वञ्चना प्रतारणा यया सा तथा हे एवंविधे भैमि मदन्तर्मम मनसि स्थिता त्वं चेद्यदि बहिर्वर्त्तमानं उरो वक्ष एषि प्राप्नोषि तत् तर्हि मम हृदयं त्वन्मयसंपुटे प्रविश्य तव बहिरन्तश्चोभयत्र वर्त्तमानत्वात् त्वन्मयसंपुटे तिरोभूय स्मराशुगेभ्यः कामबाणेभ्यो न बिभेतु भयं न प्राप्नोतु त्वं पञ्चबाणं मनसि तिष्ठस्येव अधुना तु यदि वक्षसि तिष्ठेस्तदा कामज्वरः शान्तिं गच्छेदित्यर्थः अन्योऽपि बाणवारकजनद्वयमध्यस्थितो बाणभीतिं न प्राप्नोति ॥ ११५ ॥

परिष्वजस्वेति । हे प्रिये त्वं परिष्वजस्व आलिङ्गय तथा सति नौ आवयोर्हृदयद्वये लग्ने गाढालिङ्गनवशान्निरन्तरं मिथोमिलिते सति स्मरस्य कामस्य अनवकाशोऽप्राप्तलक्ष्यप्रदेशो बाणो यस्य स तथा तस्य भावस्तत्ता निष्फलस्मरता अस्तु भवतु कामबाणो हि विरहिणां हृदय एव पतति गाढालिङ्गनेन निरन्तरे आवयोर्हृदये तु स कामेन प्रक्षिप्तोऽप्यवकाशमपि न प्राप्नोति तस्माद्दृढतरमालिङ्गयेति भावः ममैव हृदयं तवालिङ्गनयोग्यमित्याह मम वीरत्वात् दृढा अतिकठोरा इयं उरस्तटी वक्षःस्थल

Digitized by Google

दृढा मम त्वत्कुचयोः कठोरयो
रुरस्तटीयं परिचारिकोचिता ॥११६॥
तवाधराय स्पृहयामि यन्मधु
स्रवैः श्रवःसात्त्विकमाक्षिकागिरः ।
अधित्यकासु स्तनयोस्तनोतु ते
ममेन्दुलेखाभ्युदयाद्भुतं नखः ॥११७॥

कठोरयोस्त्वत्कुचयोरुचिता योग्या परिचारिका सेविका कठिनमेव कठिनस्य योग्यं परिचारकं भवतीति मदीयहृदयमेव तवाभिरूपयो मित्यर्थः ॥ ११६ ॥

तवेति ॥ हे प्रिये अहं तव तस्मै अधराय ओष्ठाय स्पृहयामि तमधरं चुम्बितुमिच्छामि यस्य अधरस्य मधुस्रवैर्मधुक्षरणैस्तव गिरो वाचः श्रवःसात्त्विकमाक्षिका भवन्ती कर्णौ सात्त्विकौ प्राशितौ यस्य तच्छ्रवः सात्त्विकं माक्षिकं मधु यासु तादृश्यो भवन्ति अधरस्यामृतमयत्वात् तदुत्पन्नावाच्यः कर्णयोरमृतरूपा भवन्तीत्यर्थः । तथा मम नखस्ते तव स्तनयोरधित्यकासु ऊर्द्ध्वभागेषु इन्दुलेखायाश्चन्द्रकलाया अभ्युदयेन प्रकाशेन जनितं अद्भुतं आश्चर्यं तनोतु सखीनां जनयतु इन्दुलेखापि उदयशैलस्याधित्यकायां उदिता सती जनानामाश्चर्यं तनोति एतेन कुचयो रुच्चत्वं सूचितं तव अधरं पातुं कुचौच करेण पीडयितुमिच्छामीति भावः । अधरायेति ईप्सितादि स्पृहादेरिति संप्रदानसंज्ञायां चतुर्थी ॥ ११७ ॥

Digitized by Google

न वर्त्तसे मन्मथनाटिका कथं
प्रकाशरोमावलिसूत्रधारिणी ।
तवाङ्कहारे रुचिमेति नायकः
शिखामणिश्च द्विजराड्विदूषकः ॥ ११८ ॥
गिरानुकम्पस्व दयस्व चुम्बनैः
प्रसीद शुश्रूषयितुं मया कुचौ ।

नेति । हे प्रिये त्वं मन्मथं कामं नाटयति वर्द्धयतीति तादृशी कथं न वर्त्तसे अपितु कामोद्दीपिकैव भवसि किम्भूता यतः प्रकाशते शोभतइति प्रकाशा या रोमावलिः सैव सूत्रं नीलतन्तुस्तद्धारयितुं शीलमस्याइति तादृशी तथा चकृ हे भैमि तव हारे नायकोमध्यमणिः रुचिं दीप्तिं एति प्राप्नोति तथा तव शिखामणिः शिरःस्थितमणिर्द्विजराजं चन्द्रं विशेषेण दूषयति निन्दतीति तादृशः चन्द्रादप्यत्युत्कृष्टइत्यर्थः ईदृशीं त्वां विलोक्य मम कामोवर्द्धतइति भावः अथच त्वं मन्मथस्य नाटिका उपरूपकविशेषइव सापि सूत्रधारः पूर्वरङ्गप्रयोक्ता प्रधाननटस्तद्वती भवति तथा तस्यां नायकः प्रधानपात्रं अङ्कहारे अङ्गविक्षेपे रुचिं एति एवं शिखायां मणिर्यस्य तादृशोद्विजराट् ब्राह्मणश्रेष्ठोविदूषकः प्रधानपात्रानुचरोभवति । कुसुमवसन्ताद्यभिधः कर्म्मवपुर्वेशभाषाद्यैः । हास्यकरः कलहरतिर्विदूषकः स्यात् स्वकर्म्मज्ञइति साहित्यदर्पणः अङ्गहारोऽङ्गविक्षेपइत्यमरः ॥ ११८ ॥

गिरेति । हे प्रिये त्वं गिरा वाक्येन अनुकम्पस्व मयि अनुकम्पां कुरु कृपया किमपि कथयेत्यर्थः तथा चुम्बनैर्दयस्व दयया चुम्बनानि देहीत्यर्थः मया प्रयोज्येन कुचौ शुश्रूषयितुं पत्रावलीलिखनादिना सेवयितुं

Digitized by Google

निशेव चान्द्रस्य करोत्करस्य च
मम त्वमेकासि नलस्य जीवितं ॥ ११९ ॥
मुनिर्यथात्मानमथ प्रबोधवान्
प्रकाशयन्तं स्वमसावबुध्यत ।

प्रसीद प्रसन्ना भव यद्यस्मात् त्वं एका केवला नलस्य मम जीवितं असि भवसि त्वदन्या न कापि मे प्रियतमास्तीत्यर्थः उपमिनोति चान्द्रस्य चन्द्रसम्बन्धिनः करोत्करस्य किरणसमूहस्य निशेव रात्रिरिव यथा एका रात्रिश्चन्द्रसम्बन्धिकिरणसमूहस्य जीवितं तथा ममापि त्वमित्यर्थः त्वदधीनजीवितं मां वचनादिना अनुगृहाणेति भावः ॥ ११९ ॥

नल इत्थं मोहात् प्रलप्य मोहापगमेन प्रकाशितमात्मानमुपलभ्य निर्विण्ण इव पुनः किञ्चिदुवाचेत्याह ॥ मुनिरिति ॥ अथानन्तरं प्रबोधवान् विगतमोहोऽसौ नलः स्वं आत्मानं प्रकाशयन्तं नलोऽहमिति नलत्वेन व्यक्तीकुर्व्वन्तं आत्मानं अबुध्यत आत्मानं कथयता मया दूतधर्म्मः परित्यक्त एतदनुचितं कृतमिति ज्ञातवानित्यर्थः तथा अनादि संस्कारतयापि मोहापगमेन दूतोऽहमिति उद्बुद्धदूत्यसंस्कारतयाच तां भैमीं प्रकृतिं प्रपन्नां नलोऽयमिति ज्ञात्वा रोदनात् पूर्व्वावस्थां प्राप्तां विलोक्य भिरोवक्ष्यमाणप्रकारवचनानि अभजत् उवाच त्वत्करोदनां भैमीं दृष्ट्वा आत्मानमेवोद्दिश्य दूतधर्म्मोचितमाहस्मेत्यर्थः उपमिनोति मुनिर्यथा मुनिर्मननशीलो यतिरिव सोऽपि प्रबोधवान् श्रमदमादिना ज्ञाततत्त्वज्ञानः सन् स्वं प्रकाशयन्तं स्वप्रकाशं आत्मानं प्रकृतिभिन्नतया बुध्यति तथा तां प्रसिद्धां संसारजनिकां प्रकृतिं गुणत्रयस्साम्यावस्थारूपां प्रकर्षेणापन्नां प्रथितां विलोक्य आत्मभिन्नत्वेन ज्ञात्वा

Digitized by Google

अपि प्रपन्नां प्रकृतिं विलोक्य ता
मवाप्तसंस्कारतयाऽसृजद्गिरः ॥ १२० ॥
अये मयात्मा किमनिह्नुतीकृतः
किमत्र मन्ता स तु मां शतक्रतुः ।
पुरः स्वभक्त्याथ नमन् ह्रियाविलो
विलोकिताहे न तदिङ्गितान्यपि । १२१ ॥
स्वनाम यन्नाम मुधाभ्यधाममुं
महेन्द्रकार्य्यं महदेतदुज्झितं ।

अवाप्तसंस्कारतया उद्बुद्धपूर्व्वपूर्व्वजन्मान्तरीयसंस्कारतया अनयाहमेव मेवं कृतइति पूर्व्वजन्मवृत्तान्तमनुस्मृत्य वागादिव्यवहारानपि सृजति मुञ्चति ॥ १२० ॥

यदुवाच तदाह । अये इति । अये विषादे मया किं किमर्थं आत्मा अनिह्नुतीकृतः नलोऽहमिति किमर्थं प्रकाशितः एतदनुचितमेव कृत मित्यर्थः स तु स पुनः शतक्रतुरिन्द्रः मां किं कीदृशं कुत्सितं वा मन्ता ज्ञास्यति असाधुरेवायमिति ज्ञास्यतीत्यर्थः तथा आविलो गर्हिता चरणेन कलुषितोऽहं पुरः प्रथमं स्वभक्त्या नमन् अथानन्तरं ह्रिया लज्जया नमन् सन् तस्य शतक्रतोरिङ्गितान्यपि भ्रूभङ्गा दिकोपचिह्नान्यपि न विलोकिताहे नम्रमुखत्वात् न विलोकयि ष्यामि क्रोधेङ्गितानां दर्शनाभावेन क्रोधमार्जनासम्भावनापि नास्ती त्यर्थः । अये क्रोधे विषादे च सम्भ्रमे स्मरणेऽपि चेतिमेदिनी ॥ १२१ ॥

स्वनामेति । नाम खेदे अहं मुधा मिथ्या स्वनाम नलोऽहमिति निजसं ज्ञां यत् अभ्यधां अवोचं तत् एतत् महत् महेन्द्रकार्य्यं दूत्यरूपं उज्झितं त्यक्तं विनाशितमित्यर्थः एतेन च मम निन्दा भविष्यतीत्याह हनूमदाद्यैरा

हनूमदाद्यैर्यशसा मया पुन
र्द्विषां हसैर्दूतपथः सितीकृतः ॥ १२२ ॥
धियात्मनस्तावदचारु नाचरं
परस्तु यद्वेद स तद्वदिष्यति ।
जनावनायोद्यमिनं जनार्द्दनं
क्षये जगज्जीवपिबं वदन् शिवं ॥ १२३ ॥

मादिदूतैः प्रभुकार्य्यनिर्व्वाहकत्वात् यशसा दूतपथः दूतानां मार्गः सितीकृतः मया पुनरिन्द्रादिदूतेन द्विषां प्रभूणां हसैर्हासैः सितीकृतः हनूमदादिभिर्यशोऽर्ज्जितं मया तु वैरिहास्यं लब्धमित्यर्थः । अत्र उपमानादुपमेयस्य न्यूनत्वकथने व्यतिरेकः ॥ १२२ ॥

धियेति । अहं आत्मनो धिया आत्मबुद्ध्या अचारु अशोभनं जनामकथनरूपमिन्द्रादिप्रतिकूलं तावत् नाचरं नकृतवान् किन्तु उन्मादादेव तत् कृतवानित्यर्थः परस्तु अन्यो जनः पुनर्यद्वेद यथाश्रुतं यत् जानाति स तत्तथा वदिष्यति अन्यो जनोऽपि एतद्बुद्धिपूर्व्वकमबुद्धिपूर्व्वकमिति अविविच्यैव यथाश्रुतं वक्ष्यतीत्यर्थः यद्वा तु पुनः सम्प्रसिद्धः परोऽन्यो दुर्ज्जनो यद्वदिष्यति तदहं वेद जाने दुर्जनोऽहि यथावृत्तं न वदति किन्तु विपरीतमेव वदतीति जाने इत्यर्थः तदेव विशेषयेनाह किम्भूतः परः जनानां अवनाय रक्षणाय उद्यमिनं कृतोद्यमं विष्णुं जनार्द्दनं जनानां पीडकं वदन् तथा क्षये प्रलये जगज्जीवपिबं जगतां जीवापहारकं हरं शिवं मङ्गलं वदन् निरङ्कुशाः खलु दुर्जना इतिभावः । विष्णुः प्रजाः पालयति हरः संहरति क्षयेइति पुराणवार्त्ता ॥ १२३

Digitized by Google

स्फुटत्यदः किं हृदयं त्रपाभरात्
यदस्य शुद्धिर्विबुधैर्विबुध्यतां।
विदन्तु ते तत्त्वमिदन्तु दन्तुर
ज्जनानने कः करमर्पयिष्यति ॥ १२४॥
मम श्रमश्चेतनयानया फली
बलीयसालोपि च सैव वेधसा ।

स्फुटतीति ॥ त्रपाभरात् आत्मप्रकाशनेन कार्य्यासम्पादनेन च अदो हृदयं किं निश्चयं स्फुटति विदीर्णं भवति यद्यस्मात् अस्य हृदयस्य शुद्धिर्निर्दोषता विबुधैर्देवैर्विबुध्यतां ज्ञायतां अज्ञाप्यपरितोषमेवाह ते देवास्तत्त्वं यथार्थं विदन्तु जानन्तु तुकिन्तु इदं दन्तुरं विषमं यत् जनानामानने मुखे कोजनः करं हस्तं अर्पयिष्यति हस्तेन तेषां मुखं पिधास्यति अपितु नकोऽपि तथेदं नवक्तव्यमिति तान् वारयिष्यतीत्यर्थः बुद्धिपूर्व्वकमेव एतदनेन कृतमिति जनावदिष्यन्त्येवेति भावः ॥ १२४ ॥

ममेति ॥ अनया एतत्काले पुनरुत्पन्नया चेतनया दूतोऽहमिति स्वधर्म्मैकदूतत्वप्रकारकबुद्ध्या मम श्रमो दूत्यायासः फली सफलः स्यात् किन्तु बलीयसा अतिप्रबलतरेण वेधसा दैवेन च सैव चेतनैव अलोपि विनाशिता दैववशादेव मया दूतत्वबुद्धिं त्यक्त्वा स्वनाम कथितमित्यर्थः ननु चेतनारक्षणे किमिति यत्नो न कृत इत्यत आह दैवपरवशात् दैववशात् विनश्वरं नाशोन्मुखं वस्तु प्रतिकर्तुं चिकित्सितुं रक्षितुं महेश्वरोऽपि शिवोऽपि न ईश्वरः समर्थो न भवति का कथा मादृशामित्यर्थः

Digitized by Google

न खलु दैवस्वरसाद्विनश्वरं
महेश्वरोऽपि प्रतिकर्त्तुमीश्वरः ॥ १२५ ॥
इति स्वयं मोहमयोर्म्मिनिर्म्मितं
प्रकाशनं शोचति नैषधे निजं ।
तथाव्यथामग्नतदुद्दिधीर्षया
दयालुरागाल्लघु हेमहंसराट् ॥ १२६ ॥
नलं स तत्पक्षरवोर्द्ध्ववीक्षिणं
सएष पक्षीति भणन्तमभ्यधात् ।

दैववशात् अबुद्धिपूर्व्वकमेव मया आत्मप्रकाशनं कृतमिति भावः ॥ १२५ ॥

एवं शोचति नले हंसस्तत्रागतवानित्याह ॥ इतीति ॥ नैषधे नले स्वय मात्मनैव मोहमयोर्म्मिनिर्म्मितं भ्रमबाहुल्यात् कृतं प्रकाशनं स्वनाम कथनादिरूपं इति पूर्व्वोक्तप्रकारेण शोचति तद्विषयमनुतापं कुर्व्वति सति हेमहंसराट् सुवर्णमयहंसानां राजा दयालुः कृपावान् सन् तया तादृशी अनुतापरूपा या व्यथा पीडा तस्यां मग्नस्य तस्य नलस्य उद्दिधी र्षया उद्धरणेच्छया लघु झटिति आगात् तत्र आगतवान् अन्योऽपि मग्नादेर्मग्नस्य उद्धरणाय दयालुर्भूत्वा झटित्यागच्छति ॥ १२६ ॥

हंस आगत्य यदुवाच तदाह ॥ नलमिति ॥ तस्य हंसस्य पक्षयोरवेव शब्देन ऊर्द्ध्ववीक्षिणं ऊर्द्ध्व दत्तदृष्टिं तथा यो मम पूर्व्वं दूतत्वं कृतवान् स एष पक्षी हंस इति भणन्तं कथयन्तं नलं स हंसोऽभ्यधात् उवाच किम भ्यधादित्याह हे अदय निष्कृप नल इमां भैमीं अति अत्यन्तं निराशतां नैराश्यं मानय माप्रापय यत इयं भैमी परं केवलं अतःपरं अद्भुत

मयाद्य चैनामनि मा निराशता
मवाप्य विज्ञापयमतःपरं परं ॥ १२७ ॥
सुरेषु पश्यन्निजसापराधता
मियत्प्रयत्नस्यापि न तस्य सिद्धये।
न कूटसाक्षीभवनोचितो भवान्
सतां हि चेतः शुचितात्मसाक्षिका ॥ १२८ ॥
इतीरिणापृच्छ्य नलं विदर्भजा
मपि प्रयातेन खगेन सान्त्वितः ।

प्राप्तान् विज्ञाता त्यजति क्षीणधर्म्यं पातकं तव भविष्यतीति एवं माकार्षीरिति भावः ॥ १२७ ॥

सुरेष्विति । हे नल भवान् तेषां देवानां अर्थसिद्धये प्रयोजनसिद्ध्यै इयत् प्रयत्नस्यापि एतावत्प्रयासं प्राप्यापि निजसापराधतां स्वीयम् शुचितकारित्वं पश्यन् सन् कूटसाक्षीभवनोचितः अकूटसाक्षिणः कूटसाक्षीभवनं तत्र उचितो योग्यो न भवति अत्र कापट्याभावात् अपटसाक्षितुल्यो न भवतीत्यर्थः हि यतः सतां साधूनां चेतःशुचिता आत्मसाक्षिका आत्मैव साक्षी यत्र तादृशी भवति मया निष्कपटं कृत्यं कृतमिति त्वं तावत् जानासि देवा अपि सर्वज्ञत्वात् एतत् सर्वं जानन्ति तस्मात् किमर्थं चिन्तनमिति भावः ॥ १२८ ॥

इत्थमुक्ता हंसे गते नलः शिथिलीकृतदौत्यकर्माभिमानो पुनर्देवान् वीक्ष्य च ॥ इतीति । इतीरिणा इत्थं भाषमाणेन तथा नलं विदर्भजामपि भैमीं च आपृच्छ्य सम्बोध्य आगच्छामीति विज्ञाप्य प्रयातेन प्रस्थितेन खगेन हंसेन सान्त्वित आश्वासितः स नृपो नलः हरित्पतीन् इन्द्रादीन् दिक्पालान् चित्तेन प्रणम्य अतः परं मम कर्तव्यं किमपि नाव

Digitized by Google

मृदुर्बभाषे भगिनीं दमस्य स
प्रणम्य चित्तेन हरित्पतीन्नृपः ॥ १२९ ॥
ददेऽपि तुभ्यं कियतीः कदर्थनाः
सुरेषु रागप्रसवावकेशिनीः ।
अदम्भदूत्येन भजन्तु वा दयां
दिशन्तु वा दण्डममी ममागसा ॥ १३० ॥

स्थितं श्रूयतामिति मनसैव नमस्कृत्य मृदुः सदयः सन् दमस्य भगिनीं भैमीं बभाषे उवाच ॥ १२९ ॥

यद्बभाषे तदाह । ददे इति । हे भैमि अहं तुभ्यमपि निर्दयदूत्य करणात् कियतीः कतिसंख्याकाः कदर्थनाः पीडा ददे किम्भूता यतः सुरेषु इन्द्रादिषु विषये योरागोऽनुरागः स एव प्रसवः फलं तत्र अवकेशिनीः वन्ध्याः अनुरागानुत्पादिका इत्यर्थः यथेच्छं विधेहि इतः परं देवादि विषयं किमपि न वक्ष्यामीति भावः तव कदर्थनादाने ममापि सा भवेदि त्यपिशब्दार्थः एवं सति अमी देवा अदम्भदूत्येन निष्कपटदूततया मयि दयां वा भजन्तु भैम्यैव नलानुरक्तत्वात् वयं नाङ्गीकृता· अस्यतु कोऽप राध इति कृपां वा कुर्व्वन्तु मम आगसा अस्मदीयकार्य्यमकृत्वा स्वीयं कार्य्यं कृतमित्यपराधेन दण्डं शास्तिं वा दिशन्तु कुर्व्वन्तु मयि देवास्तुष्टा रुष्टा वा भवन्तु तत् सर्व्वं सहनीयं किन्तु तुभ्यं दुःखदानमसह्यमिति भावः वन्ध्योऽ फलोऽवकेशी चेत्यमरः ॥ १३० ॥

Digitized by Google

अयोगजामन्वभवं न वेदनां
हिताय मेऽभूदियमुन्मदिष्णुता।
उदेति दोषादपि दोषलाघवं
कृशत्वमज्ञानवशादिवैनसः ॥ १२१ ॥
तवेत्ययोगस्मरपावकोऽपि मे
कदर्थनात्यर्थतयागमद्दयां।

अयोगजामिति। मे मम इयं उन्मदिष्णुता उन्मादो हिताय अभूत् यतोऽयोगजां वियोगजनितां वेदनां अहं न अन्वभवं नानुभूतवान् उन्मादवशात् विरहपीडा मया नानुभूता तस्मात् उन्मादोऽपि मम हितक रोजात इत्यर्थः इदमर्थान्तरेण द्रढयति दोषादपि दोषभूतादप्येकस्मात् दोषस्य दोषभूतस्यान्यस्य लाघवं अल्पत्वरूपं गुण उदेति जायते उपमि नोति अज्ञानवशादिव यथा अज्ञानरूपदोषवशात् एनसः पापरूप दोषस्य कृशत्वं अल्पत्वं उदेति तथा अज्ञानकृतपापस्य ज्ञानकृतपापा पेक्षया अल्पत्वं धर्मशास्त्रे प्रायश्चित्ते विवेचितं प्रकृते उन्मादोऽपि दोषएव किन्तु विरहवेदनानुभवस्य प्रतिबन्धकत्वात् गुणोत्पादकोऽपि जातइत्यर्थः ॥ १२१ ॥

तवेति। हे भैमि तव अयोगस्मरपावकोऽपि त्वत्सम्बन्धि विरहजनितकामानलोऽपि कदर्थनात्यर्थतया पीडाधिक्येन अतिपीडा कारित्वेनापि इति पूर्व्वोक्तप्रकारेण मे मम दयां अगमत् मयि कृपानुगतः यद्यस्मात् स स्मरपावकः अद्य त्वद्विलापसमये उन्माद्य उन्मत्तीकृत्य मया प्रयोज्यभूतेन आत्मनो ममैव प्रकाशं कारयन् नलोऽहमिति मां व्यक्तीकुर्व्वन् मां अनुकम्पतेस्म अनुगृहीतवान् कामोन्मादं विना अहं दूतधर्म्मान् कथमपि आत्मप्रकाशनेन

Digitized by Google

प्रकाममुन्माद्य यदद्य कारय
अथात्मनो मामनुकम्पनेस्म सः॥१२२॥
अमी समीचैकपरास्तवामराः
स्वकिङ्करं मामपि कर्त्तुमीशिषे।
विचार्य्य कार्य्यं सृज मा विधान्मुधा
कृतानुतापस्त्वयि पार्थिविग्रहं॥१२३॥

विरतोभवेयं अतो विरहानलएव ममातितरामुपकारको भाव इत्यर्थः ।१२२।

अमी इति। हे भैमि अमी अमरा इन्द्रादयस्तव समीचैकपरा त्वदभिलाषैकपरायणास्त्वामेवाभिलषन्तीत्यर्थः तथ मामपि अपि कारादिन्द्रादींश्च स्वकिङ्करं निजदासं कर्त्तुं ईशिषे समर्था भवसि इन्द्रादिवरणे मम वरणेऽपि उभयथापि तव सामर्थ्यं वर्त्तत इत्यर्थः अतोविचार्य्य विविच्य कार्य्यं विधेयं सृज कुरु इन्द्रादिवरणं मद्वरणं वा निःश्रेयसाधनमिति अधुनैव विचार्य्य यद्विधेयं तत् कुर्व्वित्यर्थः विचारे कारणमाह यतः कृतस्य अनुतापः पश्चात्तापः त्वयि पार्थिं विग्रहं पार्थ्यैः पार्थात्यस्य प्रभोर्विग्रहं कायं तद्दुःखमिति यावत् मुधा मिथ्या माविधात् माकार्षीत् अविचार्य्यं इन्द्राद्यन्यतमे वृते किमि ति नलमहं नावरिषं तथा मयि वृते किमिति कथन देवं नावरिष मिति पश्चात्तापो भविष्यति स यथा न भवेत् तथा विचार्य्य क्रियतामिति भावः सन्धिमकृत्वा पठितिर्निर्मत्ते विजिगीषौ पार्थिंवग्राहो वैरावये ।१२३।

Digitized by Google

उदासितेनैव मयेदमुच्यते
भयाच्च तेभ्यः स्मरतानवाच्च वा।
हितं यदि स्यान्मदसुव्ययेन ते
तदा तव प्रेमणि शुद्धिलब्धये॥ १२४॥
इतीदृशैर्नैषधसूनृतामृतै
र्विदर्भजन्मा भृशमुल्ललास सा।

उदासितेनेति। हे भैमि उदासितेनैव उदासीनेनैव मया इदं पूर्वोक्तं त्वं उच्यसे कथ्यसे किन्तु तेभ्योदेवेभ्योभयात् नोच्यसे तथा च स्मरतानवात् कामजनितक्षीणकार्श्यात् भयात् उच्यसे अयं देवभीत्या अमी समीहितपराङ्मुखामरा इति न कथयामि तथा स्वस्य कामपीडा भीत्या स्वीकुरु मामपि कर्तुं मोक्षिवेइति कथयामि किन्तूदासी नोभूत्वा पूर्वोक्तं सर्वं कथयामीत्यर्थः ननु देवे वृते कामपीडया तव मृतिरेव स्यादित्यत इष्टापत्तिमङ्गीकुर्वन्नाह यदि मदसुव्ययेन मम प्राणा पगमेन ते तव हितं स्यात् तदा तव प्रेमणि अनुरागे विषये शुद्धि लब्धये आनृण्यलाभाय स्यात् प्राणव्ययनमेवेति प्रेक्ष्य तव हिताय प्राणानपि त्यजामीत्यर्थः॥१२४॥

इत्थं नलवचनमाकर्ण्य भैमी अत्यर्थं तुतोषेत्याह। इतीति। ईदृशैः पूर्वोक्तैः इदेऽपि तुभ्यमित्यादिरूपैः नैषधस्य नलस्य सूनृतानि प्रिय सत्यवचनानि अमृतानीवेति तैः कृत्वा सा विदर्भजन्मा भैमी इति वक्ष्यमाणप्रकारेण भृशमत्यर्थं उल्ललास हर्षं प्राप उपमिनोति यथा शिशि रानुजन्मनः शिशिरतुं मनुपश्चीकृत्य जन्म यस्य तादृशस्य वसन्तस्य ऋतोरधिकमीरधिका मीदूरविकचरैरत्यन्तविकासिभिः पिकानां कौ

Digitized by Google

घनोरधिश्रोः शिशिरानुजन्मनः
पिकस्वरैर्दूरविकस्वरैर्यया ॥ १२५ ॥
नलं तदावेत्य तमाश्रये निजे
घृणां विगानञ्च मुमोच भीमजा ।
जुगुप्समाना पि मनोधृतं तदा
सतीधिया दैवतदूतधावि सा ॥ १२६ ॥
मनोभुवस्ते भविनां मनः पिता
निमज्जयन्नेनसि नैव लज्जसे ।

पिकानां स्वरैश्च प्रमुल्लसति तथा उल्लास कोकिलस्वरसाम्येन नल वचनानामुद्दीपकत्वं सूचितं ॥ १२५ ॥

उल्लासप्रकारमेवाह ॥ नलमिति ॥ सा भीमजा तदा तस्मिन् समये निजे स्वीये आश्रये मनसि तं नलं अवेत्य सोऽयं नल इति प्रत्यभिज्ञाय घृणां नलप्राप्त्यभावनिश्चयात् निजशरीरे जुगुप्सां विगानञ्च परपुरुषसंलापात् निन्दाञ्च मुमोच तत्याज किम्भूता दैवतदूतधावि देवदूताभिलाषि तथा तया सतीधिया पातिव्रत्यबुद्ध्या धृतं नियमितं नलमपि तस्मान्निवर्त्तितं मनोजुगुप्समाना निन्दन्ती । जुगुप्समाना जुगुप्सां मुमोचेति विरोधाभासः शरीरमनोरूपविषयभेदात्तद्भङ्गः ॥ १२६ ॥

मनोभुव इति ॥ सती पतिव्रता सा भैमी धिया बुद्ध्या इत्येवंप्रकारेण मन्मथनिन्दिनी स्थिता कन्दर्पं निन्दितवती इति किं हे मन्मथ मनसो भूरुत्पत्तिर्यस्य तादृशस्य ते तव भविनां जन्तूनां मनोऽन्तःकरणं पिता जनकः तत् मनः एनसि पापे निमज्जयन् निमग्नीकुर्वन् न लज्जसे सलज्जो न भवसि अपितु तव लज्जैव युज्यते इतिकाकुः अन्यो हि सत्पुत्रः पितरं

Digitized by Google

अमुद्रि सत्पुत्त्रकथा त्वयति सा
स्थिता सती मन्मथनन्दिनी धिया ॥ १३७ ॥
प्रसूनमित्येव तदङ्गवर्णना
न सा विशेषात् कतमत्तदित्यभूत् ।
तदा कदम्बं तदवर्षि रोमभि
र्मुदश्रुणा प्रावृषि हर्षमागतैः ॥ १३८ ॥
मयैव संबोध्य नलं व्यलापि यत्
समाप्य मद्दृत्तमिदं विमृश्य तत् ।

पुत्त्रशोकं नयति त्वम् पापे प्रक्षिपसीति त्वमतिदुश्चरित्रेत्यर्थः तथा त्वया सती शोभना पुत्त्रकथा पुत्त्रेण लोकान् जयतीत्यादि कथा अमुद्रि विलोपिता इति निन्दितवतीत्यर्थः ॥ १३७ ॥

इत्थं परामृष्टवत्यास्तस्या हर्षातिशयात् आनन्दाश्रुरोमाञ्चौ जातौ विव्याह ॥ प्रसूनमिति ॥ प्रसूनं सौकुमार्य्यातिशयात् पुष्पमित्येव तस्याः भैम्याः अङ्गवर्णना सामान्याकारेण पूर्व्वमभूत् परन्तु तत् प्रसूनं कत मत् किंजातीयं इति विशेषाकारेण सा तदङ्गवर्णना नाभूत् तदा तस्मिन् नलनिश्चयसमये मुदश्रुणा आनन्दजनितनयनजलेन प्रावृषि तस्यां वर्षाकाले उपस्थिते सति हर्षं उत्सिक्तं आगतैः प्राप्तैः रोमभिः कर्तृभिस्तत् भैम्या अङ्गं कदम्बं कदम्बपुष्पं अवर्षि विशेषेण वर्षितं प्रावृट्कालेहि कदम्बकुसुमानि जायन्ते तानि च सकण्टकानि भवन्ति भैम्याअङ्गं उत्सिक्तरोमभिः कदम्बकुसुमसदृशं जातमित्यर्थः हर्षातिशयात् सा अश्रूणि मुमोच पुलकिताच जातेति भावः ॥ १३८ ॥

मयैवेति ॥ मयैव नलं सम्बोध्य इयं नतेनैषधेत्यादिश्लोकचतुष्केन नलसम्बोधनान्युक्त्वा यद्व्यलापि विलपितं असौ नलस्तदिदं विव

अथावितिभ्रान्तिमबाहमस्तुतः
स्वभावितस्तोक्रमविभ्रमक्रमः ॥ १२९ ॥
विदर्भराजप्रभवा ततः पर
त्रपासखी वक्तुमलं न सा नलं।

एतं विमृश्य विभाव्य मदुक्तं यथा यातं स्वं आत्मानं याद यदि प्रिये अस्य स्रते विधास्यते इत्यादिश्लोकैः कथयतिस्म इति सर्वकथां दमयन्त्याः दमयन्त्याभ्रान्तिं येन नलेनैव भावितः अये मयात्मा विसर्विङ्गतीक्रव इत्यादिश्लोकैः कथितोयः स्तोक्रमविभ्रमस्य क्रमीयोत्पादकत्वमित्याच स्य क्रमः परिपाटी सः अस्मात् स्वभावितवान् नल स्वात्ममात्मानं गुप्तैव नलस्वात्मानं प्रकाशितवानिति भैम्याभ्रान्तिरासीत् अनन्तरं अयि मया त्वा विसर्विङ्गतीक्रव इत्यादिनलवचनं श्रुत्वा सा तां भ्रान्तिं तत्याजे त्यर्थः ॥ १२९ ॥

अथ भैमी लज्जावशात् किमपि नोवाचेत्याह । विदर्भेति । सा विद र्भराजप्रभवा भैमी ततःपरं नलस्मित्यवाहमस्तुतः ततः पूर्वोक्ता दित्यदिति चेचित् त्रपासखी लज्जासहिता सती नलं वक्तुं किमपि कथयितुं नालं न समर्थाभूत् लज्जापि कथमित्याह पुरीगमत्वमित्य यात् पूर्वं त्रपया निर्लज्जा सती अभिमुखं समक्षं तं नलं यदूचे उक्त वती तेनैव समक्षवचनेनैव हेतुना क्रियोलज्जाया महाकरी लज्जाय तुर्गे नलस्य यथा बभूव यतिवरां लज्जामाधिकायं परिचितं नायकं समक्षमाभाष्य पश्चात् नायकेन निश्चित्य अधिकतरां लज्जां प्राहु

पुरस्तमूचेऽभिमुखं यदत्रपा
ममज्ज तेनैव महाह्रदे ह्रियः ॥ १४० ॥
यदापवार्य्यापि न दातुमुत्तरं
शशाक सख्याः श्रवसि प्रियाय सा ।
विहस्य सख्येव तमब्रवीत्तदा
ह्रियाधुना मौनधना तव प्रिया ॥ १४१ ॥
पदातिथेयाल्लिखितस्य ते स्वयं
वितन्वती लोचननिर्झरानियं ।

चन्तीति स्त्रीणां स्वभावः अथच महाह्रदे निमग्नायाः कथं वचनसामर्थ्यं चपासखीति सखीपदेन लज्जा क्षणमपि तां न परित्यजतीति सूचितं ॥ १४० ॥

अथ भैमीं लज्जया वक्तुमशक्तां दृष्ट्वा तत्सखी नलमुवाचेत्याह ॥ यदेति ॥ सा भैमी यदा अपवार्य्यापि पराावृत्यापि मुखं तिर्य्यग्वलितं कृत्वापीत्यर्थः सख्याः श्रवसि कर्णे लगित्वा प्रियाय नलाय उत्तरं दातुं न शशाक समर्था नाभूत् तदा सख्येव विहस्य तं नलं अब्रवीत् उवाच किमब्रवीदित्याह अधुना इदानीं तव प्रिया भैमी ह्रिया लज्जया मौनधना मौनमेव धनं यस्यास्तादृशी लज्जावशात् तुभ्यमुत्तरं दातुं न शक्नोतीत्यर्थः ॥ १४१

किञ्च ॥ पदेति ॥ हे नल इयं भैमी लोचननिर्झरान् नयनजलप्रवाहान् स्वयमात्मनैव लिखितस्य चित्रितस्य ते तव पदातिथेयान् अतिथिभूतस्य तव चरणप्रक्षालनार्थान् वितन्वती कुर्व्वती सती यां

Digitized by Google

जगाद यां सैव मुखान्मम त्वया
प्रसूनबाणोपनिषन्निशम्यतां ॥ १४२ ॥
असंशयं स त्वयि हंसएव मां
शशंस न त्वद्विरहाप्तसंशयां ।
क्व चन्द्रवंशस्य वतंस मद्वधा
नृशंसता संभविनी भवादृशे ॥ १४३ ॥
जितस्त्वयास्येन विधुः स्मरः श्रिया
कृतप्रतिज्ञौ मम तौ वधे कुतः ।

प्रसूनबाणोपनिषदं जगाद उक्तवती सैव प्रसूनबाणस्य कामस्य उपनिषत् कामाद्वैतप्रतिपादकं रहस्यं मम मुखात् त्वया निशम्यतां श्रूयतां कामपीडितया वदत्या अनया पूर्वं यदुक्तं तत् मयैव उच्यते श्रूयतामित्यर्थः ॥ १४२ ॥

का सा कामोपनिषदित्याह ॥ असंशयमिति ॥ स हंसएव त्वद्विरहेण आप्तः प्राप्तः संशयो जीवनसन्देहो यया तादृशीं मां असंशयं निश्चितमेव त्वयि न शशंस नोक्तवान् यतोहे चन्द्रवंशस्य वतंस शिरोमणे भवादृशे अतिदयाशालिनि त्वयि मद्वधात् मम मारणात् नृशंसता क्रूरता निर्दयता वा क्व कुतः सम्भविनी सम्भविष्यति अपितु नैव सम्भविनी हंसेनैव ममैतादृगवस्था तव पुरस्तान्नोक्ता तव तु न कोऽप्यपराधो विद्यतइत्यर्थः ॥ १४३ ॥

जितइति ॥ त्वया आस्येन मुखेन विधुश्चन्द्रो जितः श्रिया कान्त्या च स्मरः कामोजितः तौ त्वयैव जितौ विधुस्मरौ अनपराधाया मम वधे कुतः कस्मात् कृतप्रतिज्ञौ । भैमीं वधिष्याव एवेति प्रतिज्ञां कृतवन्तौ

Digitized by Google

तवेति कृत्वा यदि तज्जितं मया
न मोघसङ्कल्पधराः किलामराः ॥ १४४ ॥
निजांशुनिर्दग्ध मदङ्गभस्मभि
र्मुधा विधुर्व्वाञ्छति लाञ्छनोन्मृजां ।

कथयेत्यथात् त्वयैव जितौ तौ त्वामेव पीडयेतां मयातु किमपराद्धं यत्तौ मामपि पीडयत इति त्वं कथयेत्यर्थः । स्वयमेव हेतुमाश्याह तवेति कृत्वा अहं तव प्रिया इति बुद्ध्वा यदि मद्बधे कृतप्रतिज्ञौ । तत्तर्हि मया जितं ताभ्यां पीडितयापि उत्कृष्टया भूतं किल यस्मात् अमरादेवामोघसंकल्पधराः विफलसङ्कल्पधारिणोन भवन्ति देवाय द्यत् मनसि सङ्कल्पयन्ति तत्तत् सत्यमेव भवति देवौ चन्द्रस्मरावपि अहं तव प्रियेति यदि मनसि सङ्कल्पितवन्तौ तर्हि तव प्रियैवाहं भविष्यामीति मया जितमित्यर्थः । अत्र पूर्व्वार्द्धे प्रत्यनीकालङ्कारः प्रत्यनीकमशक्तेन प्रतीकारे रिपोर्यदि । तदीयस्य तिरस्कारस्तस्यैवोत् कर्षसाधकइति लक्षणात् ॥ १४४ ॥

निजांश्विति ॥ विधुश्चन्द्रः निजांशुभिः स्वकीयकिरणैर्निर्दग्धं निःशेषेण भस्मीकृतं यत् मदङ्गं मम शरीरं तस्य भस्मभिः कृत्वा मुधा मिथ्या लाञ्छनोन्मृजां स्वकीयकलङ्कप्रोञ्छनं वाञ्छति अभिलषति चन्द्रः कलङ्कित्वात् त्वन्मुखसादृश्यं न प्राप्तवान् अधुना तु तल्लाभाय मदङ्गभस्मना तत् कलङ्कं परिमार्ष्टुमिच्छति तन्मिथ्यैवेत्यर्थः यतस्तावतापि मदङ्गभस्मना कलङ्कप्रोञ्छनेनापि विधुस्तदास्यतां त्वन्मुखतुल्यतां किं यास्यति प्राप्स्यति अपितु नैव यास्यति कुतः वधूवधेन मल्लक्षणस्त्रीहत्यया पुनः कलङ्कित एव यद्यपि मदङ्गभस्मना मार्ज्जनया पूर्व्वसञ्चितः कलङ्को

त्वदाश्रितां यास्यति मामपि किं
वधूवधेनैव पुनः कलङ्कितः ॥ १४५ ॥
प्रसीद यच्छ स्वशरान् मनोभुवे
स हन्तु मां तैर्धृतकौसुमाशुगः ।
त्वदेकचित्ताहमसून् विमुञ्चती
त्वमेव भूत्वा तृणवज्जयानि तं ॥ १४६ ॥

गमिष्यति तथापि वधूवधजनितं पुनरपि कलङ्कान्तरं भविष्यतीति उत्तमप्रयासो विफल इत्यर्थः त्वद्विरहात्कामोमामतितरां पीडयतीति भावः अन्यमपि कलङ्कं भस्मना मार्जयति ॥ १४५ ॥

प्रसीदेति । हे नल त्वं प्रसीद मयि प्रसन्नोभव मनोभुवे कामाय स्व शरान् निजलौहमयबाणान् यच्छ देहि किमर्थमित्याह धृताः कौसु माशुगाः पुष्पमयबाणायेन तादृशः स मनोभूः तैस्त्वया दत्तैः शरैर्मां हन्तु मारयतु कामस्य बाणाः पुष्पमयत्वात् मां केवलं पीडयन्ति नतु झटि ति मारयितुं शक्नुवन्ति तव बाणास्तु लौहमयत्वात् झटिति मारयितुं शक्नुवन्ति तस्मात्तान् कामाय देहि स मां तैर्झटिति मारयत्वित्यर्थः झटिति मरणे तव कोलाभ इत्याह त्वदेकचित्ता त्वन्मात्रचित्तवृत्तिरहं तच्छरपीडनात् असून् प्राणान् विमुञ्चती त्यजन्ती सती त्वमेव भूत्वा तं मनोभुवं तृणवत् अनायासेन जयानि त्वयाहि सौन्दर्यादिना कामो जितएव अहमपि मरणानन्तरं त्वं भूत्वा तं जेष्यामीत्यर्थः । मरणे यादृ शी जन्तोर्भावना यस्य जायते । तादृशं लभते जन्म स भूयोहि स्वक र्मभिरिति वचनात् यंयं वापि स्मरन् भावमित्यादिवचनाच्च त्वदेक चित्ताया मम मरणोत्तरं त्वद्रूपप्राप्तिरिति भावः ॥ १४६ ॥

Digitized by Google

श्रुतिः सुराणां गुणगायनी यदि
त्वदङ्घ्रिमग्नस्य जनस्य किन्ततः ।
स्तवे रवेरप्सु कृतावगाहनैः कृते
न मुद्वती जातु भवेत् कुमुद्वती ॥ १४७ ॥
कथास्तु प्रियेय वरमद्य न म्रियेय
ममावगन्तासि न भावमन्यथा ।

ननु देवा वेदैरपि प्रशंस्यन्ते तत् कथं तान् परित्यज्य मदनुरक्ता भवसी त्याशङ्क्याह ॥ श्रुतिरिति ॥ श्रुतिर्वेदो यदि सुराणां देवानां गुणगायनी गुणवर्णनपरा भवति ततस्तेन त्वदङ्घ्रिमग्नस्य तवचरणपराय णस्य त्वय्येवानुरक्तस्येत्यर्थः ममाद्यस्य जनस्य किं अपितु नकिम पि अत्रार्थान्तरमुपन्यस्यति अप्सु जले कृतावगाहनैः कृतावगाहनैर्ब्राह्मणा दिभिः रवेः सूर्य्यस्य स्तवे कृते सति जातु कदाचिदपि कुमुद्वती चन्द्रानु रक्ता कुमुदिनी मुद्वती हर्षवती सूर्य्यविषये अनुरागिणी न भवेत् तद्व दहमपीत्यर्थः ॥ १४७ ॥

कथास्त्विति ॥ अद्याहं कथास्तु प्रियेय कथावशेषीभवामि म्रिये इत्यर्थः एतद्वरं मनागिष्टं न पुनर्म्रियेय तिष्ठामि नजीवामि मरणप्रार्थनं कथ मित्याह अन्यथा मरणं विना त्वं मम भावं अनुरागं नावगन्तासि नज्ञा स्यसि तदपि कथमित्यत आह हे नाथ हे जीवाभ्यधिक प्राणाधिक आशु शीघ्रं त्वदर्थं मुक्तासुतया त्यक्तप्राणतया हेतुना मां त्वमेव एकः केवलो यस्याः तथाविधां त्वदेकशरणां प्रतीहि जानीहि प्राणाधिकं त्वामलब्ध्वा प्राणास्त्यक्ता इति लोकमुखादाकर्ण्य तस्मिन् मदनुरागं ज्ञा स्यसि तस्मान्मम मरणमेव युक्तमितिभावः । सुनायेति दन्त्यसकारवत्

Digitized by Google

त्वदर्थमुक्तासुतयाशु नाथ मां
प्रतीहि जीवाभ्यधिकां त्वदेकिकां ॥ १४८ ॥
महेन्द्रहेतेरपि रक्षणं भया
द्यदर्थिसाधारणमस्त्रभृद्व्रतं ।
न सूनबाणाशुगतोऽपि मामवन्
व्रतं तदुच्चैरवकीर्णिनस्तव ॥ १४९ ॥
तवास्मि मां घातुकमप्युपेक्षसे
मृषामरं स्वामरगौरवात् स्मरं ।

पाठे शोभनेनाथः सुनाथः तत्सम्बुद्धिः यद्वा न सुनाथोऽसुनाथस्तत्स
म्बुद्धिः हे अतिकठिनेत्यर्थः प्राणापगमेन विना नजागासीत्युपालम्भात्त
थासम्बोधनं उक्तं असुनाथ प्राणनाथेत्यपि व्याचक्षते ॥ १४८ ॥

महेन्द्रेति ॥ महेन्द्रस्य हेतिर्वज्रं तस्मात् यद्भयं तस्मात् रक्षणंपाल
नरूपं यत् अर्थिषु याचकेषु साधारणं स्त्रीपुरुषाविवेकेन सामान्यं अस्त्र
भृतां शूराणां व्रतं नियमः हे सूनबाणस्य कामस्य आशुगतः पुष्पमयशरा
दपि मां न अवन् रक्षन् नल अवकीर्णिनः क्षतव्रतस्य तव तद्व्रतं उच्चैरति
शयेन क्षतं नष्टं शूराणां वज्रादपि शरणागतस्य रक्षणरूपव्रतं पाल
यितुं यतन्ते त्वन्तु शूरोऽपि पुष्पमयवाणादपि शरणागताया मम रक्षणं
न करोषीति तव शूरव्रतमतिशयेन नष्टमित्यर्थः । अवकीर्णी क्षतव्रत
इत्यमरः ॥ १४९ ॥

तवेति ॥ हे नल अस्मि अहं तव त्वदीयैव हा खेदे त्वन्तु मांघातुकमप
कृतमपि स्मरं कामं अमरगौरवात् देवोऽयमिति गौरवात् अपच

Digitized by Google

अवेहि चाण्डालमनङ्गमङ्ग तं
स्वकाण्डकारस्य मधोः सखा हि सः ॥ १५० ॥
लघौ लघावेव पुरः परे बुधै-
र्विधेयमुत्तेजनमात्मतेजसः ।
तृणे तृणेढि ज्वलनः खलु ज्वलन्
क्रमात् करीषद्रुमकाण्डमण्डलं ॥ १५१ ॥

अविनाश्योऽयमिति गौरवात् उपेक्षसे त्यजसि न मारयसि तस्मिन्नमर गौरवं न कर्त्तव्यमित्याह किम्भूतं यतोमृषामरं कुत्सितदेवं अथच भगवता शिवेन दग्धत्वात् अमरत्वशून्यं किञ्च अङ्ग हे नल तं अनङ्गं चण्डालमेव अवेहि जानीहि हि यस्मात् सोऽनङ्गः स्वस्य काण्डाः पुष्पमयाः वाणास्तान् करोतीति तादृशस्य मधोर्वसन्तस्य सखा मित्रं चण्डाल एव काण्डकारो भवतीति वसन्तचाण्डालतत्संसर्गित्वात् कामोऽपि चाण्डाल इत्यर्थः तस्मात् अमरगौरवात् तस्मिन्नुपेक्षा तव नोचितेतिभावः ॥ १५० ॥

ननु लघुत्वात्तमुपेक्षे नतु गौरवादित्याशङ्क्याह ॥ लघाविति ॥ बुधैः पण्डितैः लघौ लघौ अल्पे अल्पएव परे शत्रौ पुरः प्रथमं आत्मतेजसः निजप्रतापस्य उत्तेजनं संधुक्षणं विधेयं कर्त्तव्यं अल्पतरशत्रुजयाभ्यासेन हि महान् शत्रुर्जीयते तस्मादल्पमात्रोऽपि शत्रुः सर्वथा नोपेक्षणीय इतिभावः खलु यस्मात् ज्वलनो वह्निस्तृणे निःसारे दारुणि प्रथमं ज्वलन् सन् क्रमात् करीषाणां शुष्कगोमयचूर्णानां द्रुमकाण्डानां वृक्षस्कन्धानाञ्च मण्डलं राशिं तृणेढि दहति तेजस्विनामवधिर्वह्निरपि प्रथमं निःसारं दग्ध्वा पुष्टतरोभूत्वा महान्तं दहति तद्वत् त्वमपि अल्पमपि कामं विनाशयेति भावः ॥ १५१ ॥

Digitized by Google

सुरापराधस्तव वा कियानयं
स्वयम्बरायामनुकम्पता मयि।
गिरापि वक्ष्यन्ति मखेषु तर्पणा
दिदं न देवा मुखलज्जयैव ते ॥ १५२ ॥
व्रजन्तु तेऽपि वरं स्वयम्बरं
प्रसाद्य तानेव मयावरिष्यसे।

अथ नलेन देवापराधमाशङ्क्य यद्विलपितं तदपनयन्त्याह ॥ सुरेति ॥ वा सम्भावनायां स्वयम्बरायां स्वयमात्मबुद्ध्यैव वृणुते इति तादृश्यां मयि तव या अनुकम्पता स्वीकाररूपा दयालुता अयमेतल्लक्षणस्तव सुरेषु इन्द्रादिषु अपराधः कियान् अपितु अतीवाल्पोऽयमपराध इत्यर्थः यतो मखेषु यज्ञेषु तर्पणात् हविर्दानतः देवा इन्द्रादयस्ते तव मुखलज्जया इदं कथमियमस्मदाकाङ्क्षिता त्वया स्वीकृतेत्येवंरूपं गिरापि वा प्रश्न द्वारे वाचापि न वक्ष्यन्ति न कथयिष्यन्ति अन्योऽपि बहूपकारिणं अपराधयुक्तमपि मुखलज्जया किमपि न कथयति अहं तावत् स्वयमेव त्वां वृणे देवाश्च यज्ञे हविर्भोजनेन तव वशमागतास्तत् कथमस्वीकारापराध ग्रहेत्यर्थः ॥ १५२ ॥

व्रजन्त्विति ॥ वरमिति मनागङ्गीकारे ते तेऽपि इन्द्रादयो देवा वरं स्वयम्बरं व्रजन्तु आगच्छन्तु तेन किमित्यत आह मया तान् देवानेव प्रसाद्य प्रसन्नीकृत्य त्वं वरिष्यसे ननु त्वद्वरणार्थमागतास्त्वया चास्वीकृताः कथं प्रसन्ना भवेयुरित्याशङ्क्याह सर्वथापि केनापि योगेनापि तान् देवान् दया कृपा न स्पृशेत् ते अस्यामपि दयां मयि न करिष्यन्ति अपितु करिष्यन्त्येवेत्यर्थः यतस्तेऽपि देवास्तावत् मदनेन कामवन्निर्दयान भव

Digitized by Google

न सर्व्वथा तानपि न स्पृशेद्दया
न तेऽपि तावन्मदनस्त्वमेव वा ॥ १५३ ॥
इतीयमालेख्यगतेऽपि वीक्षिते
त्वयि स्मरव्रीडसमस्यया ऽनया ।
पदेपदे मौनमयान्तरीपिणी
प्रवर्त्तिता सारघसारसाविनी ॥ १५४ ॥

न्ति तथा त्वमेव वा त्वदभिन्नो यथा न भवन्ति त्वं कामश्च द्वावेव जगति निर्दयौ देवास्तु युवामिव निर्दया न भवन्ति अतस्त्वमेव मयि ते दयां करिष्यन्तीत्यर्थः ॥ १५३ ॥

इतीति । हे नल अनया भैम्या इति पूर्व्वोक्तप्रकारेण सख्या मम मुखेन सारघसारसाविनी सरघा मधुमक्षिका तत्कृतं मधु सारघं तस्य सारः श्रेष्ठभागस्तस्य साविनी नदी प्रवर्त्तिता जनिता अनया मधु तुल्यं मधुरवचनमुक्तमित्यर्थः किम्भूता पदे पदे स्थाने स्थाने मध्ये मध्ये मौनमयं अभाषणरूपं यत् अन्तरीपं द्वीपं तद्विद्यते यस्यां तादृशी अनया किम्भूतया आलेख्यगतेऽपि पटकादौ चित्रितेऽपि वीक्षिते दृष्टे त्वयि विषये स्मरव्रीडयोः कामलज्जयोः समस्या मिश्रीभावो यस्यां सा तया तादृश्या कामलज्जावत्येत्यर्थः चित्रितेऽपि त्वयि विषये या कामं लज्जां च प्राप्तवती साऽधुना साक्षात्कृते त्वयि अत्यर्थमेव कामलज्जे प्राप्नोति अतोमम्मुखद्वारेव एतत् सर्व्वमुवाचेति भावः । स्रवन्ती साविनी धुनीति च ॥ १५४ ॥

Digitized by Google

चण्डालस्ते विषमविशिखः स्पृश्यते दृश्यते न
ख्यातोऽनङ्गस्त्वयि जयति यः किन्तु कृत्ताङ्गुलीकः।
कृत्वा मित्रं मधुमधिवनस्थानमन्तश्चरित्वा
तस्याः प्राणान् हरति हरितस्त्वद्यशस्तज्जुषन्तां ॥१५५॥

अथ भैम्याः कामपीडातिशयं ज्ञापयन्ती नलं प्रति सोल्लुण्ठनमाह ॥ चण्डाल इति ॥ विषमविशिखः काम एव निर्दयत्वात् कृत्ताङ्गुलीकश्छिन्नकनिष्ठाङ्गुलीकश्चण्डालस्त्वयि जयति सति जयशालिनि त्वयि वर्त्तमानेऽपि अधिवनस्थानं वनमधिकृत्य स्थानं वासो यस्य तादृशं मधुं वसन्तं मित्रं सहायं कृत्वा ते तव तस्या भैम्या अन्तर्मनसि चरित्वा प्रविश्य प्राणान् हरति अत्र विषये हरितो दिशः त्वस्मिन् जयशालिनि वर्त्तमानेऽपि तत् चण्डालकर्त्तृकभार्य्याप्राणहरणरूपं तव यशः कीर्त्तिं जुषन्तां सेवन्तां एतेन तव दिगन्तव्यापकं यशो भवत्वित्यर्थः जयशालिनि त्वयि विद्यमानेऽपि तव प्रिया चण्डालेन हन्यत इति तवैव अकीर्त्तिर्दिगन्तगामिनी भविष्यतीति सोल्लुण्ठनं ननु भवतीभिरपि स कथं निवारयितुं न शक्य तेइत्याशङ्क्याह किन्तु वितर्के यो विषमविशिखोऽनङ्ग इति ख्यातः प्रसिद्धः स न स्पृश्यते न च दृश्यते स्पर्शनदर्शनाभावात् सोऽस्माभिर्निवारयितुमशक्य इत्यर्थः देशविशेषे चण्डालानां कनिष्ठाङ्गुलीं छित्वा चिह्नं करोति चण्डालोऽपि विषमविशिखोऽतितीक्ष्णबाणो भवति तथा कृत्ताङ्गुलीकत्वात् अनङ्ग इति ख्यातो भवति एवं वनवासिनं मधुं मद्यपं मित्रं कृत्वा अन्तर्वनाभ्यन्तरे प्रविश्य पथिकानां प्राणांश्च हरति । कामस्तव प्रियाम् नितरां पीडयति तेन च तवैवाकीर्त्तिर्भवति तस्माद्यथास्याः पीडा शाम्यति तव चाकीर्त्तिर्न भवति तथा विधेयमिति भावः। मन्दाक्रान्तावृत्तमिदं मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ तौ गयुग्ममिति लक्षणात् ॥१५५॥

Digitized by Google

अथ भीमभुवैव रहोऽभिहितां
नतमौलिरपत्रपया स निजां ।
अमरैः सह राजसमाजगतिं
जगतीपतिरभ्युपगत्य ययौ ॥ १५६ ॥

अस्तस्याः प्रियमाप्तुमुद्धुरधियो धाराः सृजन्त्यारया
नम्रोन्नम्रकपोलपाणिपुलकैर्व्वीतस्तितीरस्तुणः ।

अथेति ॥ अथानन्तरं स जगतीपतिर्भूपतिर्नलः अपत्रपया पूर्व्वश्लोको क्तसखीवोक्तलुण्ठनवादभयात् लज्जया नतमौलिर्नम्रीकृतमस्तकः सन् भीमभुवैव भैम्यैव सखीद्वारा रहसि एकान्ते अभिहितां प्रजल्पु ते तेऽपी विश्लोकेन उक्तां निजां स्वीयां अमरैरिन्द्रादिभिः सह राजसमाजगतिं राजसभास्वयम्बरस्थानागमनं अभ्युपगत्य स्वीकृत्य ययौ गतवान् इन्द्रादिसमीपमित्यर्थः । लज्जा सापत्रपान्यतइत्यमरः । इदं तोटक वृत्तं इह तोटकमम्बुधिसैर्गदितमिति लक्षणात् ॥१५६ ॥

अथ नले गते भैम्या सा रात्रिर्दुःखेनातिवाहितेत्याह ॥ अस्तइति ॥ यद्यस्मात् तस्याभैम्याश्चत्वारः प्रहराश्चतुर्यामरूपा सा क्षपा रात्रिः स्मरा र्त्तिभिः कामपीडाभिः कृता दुःक्षपा दुःखेनातिवाहनीया ततस्मा दिव विधिना ब्रह्मणा तस्यां भैम्यां कृपया दयया अखिला प्रतिदिनभावि नी सर्व्वा रात्रिस्त्रियामा त्रिप्रहरात्मिका कृता इवोत्प्रेक्षायां त्रिया मेति रात्रेर्नामच्छलादिदमुत्प्रेक्षितं किम्भूतायाः शोभाविदिने प्रियं बलं आप्तुं लब्धुं उद्धुरा उत्कण्ठिता धीर्यस्याः सा तथा तस्या अत्युत् सुकाया इत्यर्थः तथा अश्रुलोचनयनजलस्य धाराः प्रवाहान् रयार्द्वेगेन

चत्वारः प्रहराः स्मरार्त्तिभिरभूत् सा यत् (?) क्षपा दुःक्ष पा तन्नस्यां कृपयाखिलेव विधिना रात्रिस्त्रियामा कृता ॥ १५७ ॥

तदखिलमिह भूतं भृत्यगत्या जगत्याः पतिरभिलपतिस्म स्वात्मदूतत्वतत्त्वं ।

उत्पन्नाखण्डनयाः निम्मूताधाराः नभोग्रमैर्गतोग्रतः कपोलपालमज्ञत ... उत्पु पुलकैरोमाचैः कृता वेत्ततीर्थंभूवेतमयुक्ता इव ... नदी धारायां पतितैर्वेतसपृषैर्नभोग्रमत्वं भवति सा रात्रिरतिदुःखेना तिवाहितेति भावः रात्रेरायन्तयामार्द्धयोर्दिवसव्यवहारात् त्रियामा त्वं तथाच श्रुतिः त्रियामां रजनीं प्राहुस्त्यक्त्वाद्यन्तचतुष्टयं । नाडीनां तदुभे सन्ध्ये दिवसाद्यन्तसंज्ञिते इति ॥ शार्दूलविक्रीडितमिदं वृत्तं ॥ १५७ ॥

नलोऽपि इन्द्रादिसमीपं गत्वा यथावृत्तं सर्व्वमाख्यातवानित्याह ॥ तदिति ॥ जगत्याः पृथिव्याः पतिर्नलः इह भैमीसमीपे भूतं वृत्तं अखि लं समस्तं ननु वचनयोग्यं किञ्चित् तत् स्वात्मदूतत्वस्य निजदौत्यस्य तत्त्वं याथार्थ्यं भूतस्य सत्यस्य गत्या प्रकारेण मया आदौ निष्कपटं दौत्यं कृत मनन्तरमुन्मादवशादात्मप्रकाशनं कृतमिति यथार्थप्रकारेण निरस्ता सत्यं यज्ञतया ... तथा व्यक्तवान् ... यथा तथा इन्द्रादिषु प्राप्य झटिति अभिलपतिस्म उक्तवान् भृत्यगत्या कथने इन्द्रादीनां हेतुगर्भं विशेषणमाह निम्मूतेषु इन्द्रादिषु यतस्त्रिभुवनजनानां सर्व्वमर्त्यपाताल वर्त्तिजनानामपि लोकानां यावन्ति वृत्तानि चरितानि तेषां वृत्तान्तस्य

त्रिभुवनजनयावद्वृत्तवृत्तान्तसाक्षात्‌-
कृति कृतिषु निरस्तानन्दमिन्द्रादिषु द्राक् ॥ १५८ ॥

॥ श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यं ।
संदृब्धार्णववर्णनस्य नवमस्तस्य व्यरंसीन्महा-
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः
॥ १५९ ॥

वार्त्तायाः साक्षात्कृतौ प्रत्यक्षीकरणे कृतिषु कृशत्वेषु । मालिनीवृत्त-मिदं ॥ १५८ ॥

श्रीहर्षमिति । संदृब्धं ग्रथितं अर्णवस्य समुद्रस्य वर्णनं येन तादृशस्य तस्य महाकाव्ये नवमः सर्गोऽव्यरंसीत् विरतः समाप्तिं गतः अर्णव-वर्णनमपि अनेन कृतमिति भावः । अन्यत् सर्वं पूर्ववत् । व्यरंसीदिति व्याङ्परिभ्यो रम इत्यात्मनेपदनिषेधात् परस्मैपदं यमरमनमादन्ताव-सिच् इरितोवेति सिद्ध् । १५९ ।

इति श्रीप्रेमचन्द्रन्यायरत्नविरचितायामन्वयबोधिकासमाख्यायां नैषधटीकायां नवमः सर्गः समाप्तः ।

Digitized by Google

॥ अथ दशमः सर्गः ॥

रथैरथायुः कुलजाः कुमाराः
शस्त्रेषु शास्त्रेषु च लब्धपाराः ।

अथ स्वयम्बरानुष्ठानवर्णनरूपं दशमं सर्गमारभमाणो भीमनिमन्त्रितानां राजपुत्राणामागमनं वर्णयति । अथेति । अथानन्तरं कुमारा राजबालका युवराजा वा कुत्सितो मारः कन्दर्पो यैस्ते तथा अतिसुन्दरा युवान इति वा भीमभूपेन निमन्त्रिताः सन्तो रथैः स्वयम्बरं स्वयं व्रियतेऽनेनेति स्वयम्बरसमाजं आयुः आगतवन्तः किम्भूताः कुलजाः प्रशस्तकुले जाताः कुलीनाः तथा शस्त्रेषु बाणादिषु शास्त्रेषु च वेदादिषु च लब्धपाराः पारगामिनः समस्तशस्त्रप्रयोगोपसंहारकुशलाः समस्तशास्त्रवेत्तारश्चेत्यर्थः तथा शम्बरस्य दैत्यविशेषस्य वैरी कामस्तस्य वपुः शरीरसमूहवल्लक्ष्मीः शोभा येषां तादृशाः नैते राजकुमाराः किन्तु शम्बरासुरविनाशाय कामेन धृतः शरीरसमूह इवेति सम्भाव्यमाना अतिसुन्दरा इत्यर्थः । तथा श्रिया सम्पत्त्या जितो यक्षराट् कुबेरो यैस्तादृशा अतिसम्पत्तिशालिन इत्यर्थः कुलजा इत्यादिविशेषणैर्वरोचितागुणाः कथिताः । यदुक्तं कन्या वरयते रूपं माता वित्तं पिता श्रुतं बान्धवाः कुलमिच्छन्ति मिष्टान्नमितरे जना इति छविषायां शास्त्र

Digitized by Google

स्वयम्बरं शम्बरवैरिकाय
व्यूहश्रियः श्रीजितयक्षराजः ॥ १
नाभूदभूमिः स्मरसायकानां
नासीदगन्ता कुलजः कुमारः।
नास्थादपन्था धरणेः कणोऽपि
व्रजेषु राज्ञां युगपद्व्रजत्सु ॥ २ ॥
योग्यैर्व्रजद्भिर्नृपजां वरीतुं
वीरैरनर्घैः प्रसभेन हर्त्तुं ।

पेक्षया प्रशस्ताभ्यर्हितत्वात् आदावुपन्यासः। कुमारः स्यात्कुमे स्कन्दे युवराजेऽश्ववारके बालके वरुणद्रौ ना न द्वयोर्जात्यकाञ्चन इति मेदिनी। अस्मिन् सर्गे उपेन्द्रवज्रेन्द्रवज्रा तदुपजातयश्च वृत्तानि एषां लक्षणमुक्तं प्राक् ॥ १ ॥

सर्व्वएव राजकुमाराः स्वयम्बरमाजग्मुरित्याह॥ नाभूदिति॥ कुलजः प्रशस्तकुलजातः कुमारो राजबालकः स्मरसायकानां कामबाणानां अभूमिरगोचरो नाभूत् एवं स्वयम्बरे अगन्ता नासीत् अपितु सर्व्वएव कुलीनाराजकुमाराः कामबाणपीडिताः स्वयम्बरं जग्मुरित्यर्थः प्रशस्तकुलजातानामेव भैमीलाभसम्भावनावत्त्वात् कुलज इत्युक्तं तथा राज्ञां व्रजेषु समूहेषु युगपत् एकदैव व्रजत्सु स्वयम्बरमभिगच्छत्सु सत्सु धरणेः पृथिव्याः कणोऽपि अल्पभागोऽपि अपन्था अमार्गो नास्थात् नासीत् सर्व्वातिशयेन एकदैव गच्छतां तेषां पथिकानां बाहुल्यात् धरणिरेव मार्गोऽभूदित्यर्थः। अपन्था इति नञः पथोवेति समासान्तविधेर्वैकल्पिकत्वादत्रनिषेधः॥२॥

तदानीं सर्व्वेषामेव स्वयम्बरगमनात् दिशोजनशून्या अभूवन्नित्याह श्लोकद्वयेन॥ योग्यैरिति॥ नृपजां भैमीं वरीतुं व्रजद्भिर्गच्छद्भिर्योग्यैः

द्रष्टुं परैस्तामनुपरोद्धुमन्यैः
स्वमात्मशेषाः ककुभो बभूवुः ॥ ३ ॥
लोकैरशेषैरवनेः श्रियन्ता-
मुद्दिश्य दिश्यैर्विहिते प्रयाणे ।
स्ववर्त्तितज्जनयन्त्रणार्त्ति-
विश्रान्तिमापुः ककुभां विभागाः ॥ ४ ॥
न तं ययेयुर्न तिलाविकीर्णाः
सैन्यैस्तथा राजपथा बभूवुः ।

कुलशौन्दर्य्यादिगुणविभिस्तया तां प्रसभेन बलात्कारेण हर्त्तुं गच्छद्भिर् गर्वैरयोग्यैः कुलसौन्दर्य्यादिरहितैर्वीरैः शूरैः तथा स्वयम्बरकौतुकं द्रष्टुं गच्छद्भिः परैर्योग्यवीरभिन्नैरुदासीनैः तथा ताम् योग्यवीरोदासीनान् उपरोद्धुं सेवितुं गच्छद्भिरन्यैः पूर्व्वोक्तत्रितयभिन्नैः सेवकैः कृत्वा ककुभो दिशः स्वमात्मं आत्मैव शेषोऽवशिष्टं यासां तादृश्यो बभूवुः जनशून्या बभूवुरित्यर्थः सर्व्वेऽपि जनाः स्वयम्बरं गता इतिभावः ॥ ३ ॥

लोकैरिति । अशेषैः समस्तैर्दिश्यैः दिग्भवैर्लोकैरवनेः पृथिव्याः श्रियं लक्ष्मीभूतां भैमीं उद्दिश्य प्रयाणे गमने विहिते कृते सति ककुभां दिशां विभागाः प्रदेशाः स्ववर्त्तिनः स्वस्मिन् वर्त्तमानाश्च ते जनाश्च तैः कृत्वा या यन्त्रणा सङ्कटता तया या आर्त्तिः पीडा तस्या विश्रान्तिं विश्रामं आपुः प्राप्तवत्यः भारराहित्यात् सुखावकाशं प्रापुरित्यर्थः ॥ ४ ॥

अथ तेषां गमनप्रकारमेवाह । नतमिति । विकीर्णा ऊर्द्धं विक्षिप्ताः तिला अतिसूक्ष्माः शस्यविशेषा अपि यथा तलं भूतलं न ईयुर्न प्रापुः तथा सैन्यैः कृत्वा राजपथा राजमार्गा बभूवुः सैन्यबाहुल्यादतिसंबाधा बभूवुरित्यर्थः तत्र तादृशेष्वपि राजपथेषु यो भूभृद्राजा पुरस्तादग्रे भवितुं प्राप प्राप्तवान् स भूभृत् भैमीं लब्धामिव मेने मन्यतेस्म यतो यावद्राज

भैमीं सलब्धामिव तत्र मेने
यः प्राप भूभृद्भवितुं पुरस्तात्॥ ५॥
नृपः पुरःस्थैः प्रतिरुद्धवर्त्मा
पश्चाज्जनैः कश्चन नुद्यमानः।
यन्त्रस्थसिद्धार्थपदाभिषेकं
लब्ध्वाप्यसिद्धार्थममन्यत स्वं॥ ६॥
राज्ञां पथि स्यानतयानुपूर्व्वी
विलङ्घनाशक्तिविलम्बभाजां।

र्हन्ति तावत् पुरोगतं मामेव भैमी वरीष्यतीति मनसि निश्चितवानि त्यर्थः परस्परमहमहमिकया सर्व्वैस्तैर्गतमिति भावः॥ ५॥

नृपइति॥ पुरःस्थैरग्रेसरैर्जनैः प्रतिरुद्धवर्त्मा आवृतमार्गस्तथा पश्चात् स्थितैर्जनैर्नुद्यमानः किमिति विलम्बः क्रियते झटिति गन्तव्यमिति प्रेर्य्य माणः कश्चन नृपः यन्त्रस्यात्तैलाकर्षयन्त्रस्थिता ये सिद्धार्थाः सर्षपा स्तेषां पदे स्थानेऽभिषेकं लब्ध्वापि अपिरेवार्थे उभयपार्श्वस्थकाष्ठद्वय निष्पीडितसर्षपावस्थां प्राप्यैव स्वमात्मानं असिद्धार्थं अकृतकार्य्यं अम न्यत अहो दुस्तरस्ङ्कटमधन्वयं स्वयम्बरगमनप्रतिबन्धकमुपस्थितं तत् सर्व्वथा भैमीलाभो मम न भविष्यतीत्याशङ्कितवानित्यर्थः अथच सर्व्व पपदाभिषेकं लब्ध्वापि आत्मानं सिद्धार्थं सर्व्वपभिन्नं अमन्यतेति वि रोधः अर्थापिर्विरोधे विरोधभङ्गस्तु उक्तव्याख्यानेन॥ सिद्धार्थं स्तु पुमान्श्वाक्वसिंहेच सितसर्षप इति मेदिनी॥ ६॥

राज्ञामिति॥ विदर्भेन्द्रपुर्य्याः कुण्डिननगरस्य पताकाः अग्रकम्पै रग्रस्थचेलाञ्चलकम्पनैः कृत्वा राज्ञां आक्रान्तसंस्थानमिव आकार

Digitized by Google

आक्रान्तसंधानमिवाग्रकम्पै
र्दर्द्दुर्विदर्भेन्द्रपुरीपताकाः ॥ ७ ॥
प्राग्भूय कर्कोटक आचकर्ष
सकम्बलं नागबलं यदुच्चैः ।

यत्सङ्केतमिव दद्दुः अग्रकम्पसङ्केतेन रात्र्याक्रमयन्तीवेव विस्मृतानां यतः पथि श्लाघतया निविडतया आनुपूर्व्यं अग्रपश्चाद्भावरूपक्रमस्य विलङ्घनेऽतिक्रमे या अशक्तिरसामर्थ्यं तया विलम्बभाजां कालक्षेपं कुर्वतां अन्योऽपि विलम्बेनागच्छतां हस्तकम्पसङ्केतेन आह्वानं करोति ॥ ७ ॥

प्राग्भूयेति ॥ भुवस्तले पृथिवीतले कुब्जिनगामिरोषां घटकोद्भावनशीलः कर्कः श्वेताश्वः प्राग्भूय अग्रगामी भूत्वा यत्सकम्बलं कृपासहितं नागबलं हस्तिसैन्यं उच्चैरतितरां आचकर्ष स्वसन्निधिं नीतवान् तत् नागबलं अश्वतरोगर्हभावडवाजातः उच्चैरन्वगच्छत् पश्चात् अगति स्म अग्रगामिनं श्वेताश्वं दृष्ट्वा हस्तिबलं वेगेन तत्पश्चात् जगाम हस्तिबलञ्च तादृशं दृष्ट्वा अश्वतरस्तथा तत्पश्चाज्जगामेत्यर्थः सर्वत्र जात्याश्रयमादेकवचनं कुब्जिनगामिरोषामित्यस्य कर्कादिचितयेऽप्यन्वयः समासान्तविधेरनित्यत्वादत्र निषेधः कुब्जिनगामीति नागबलमित्यस्य विशेषणम्या । तथा वासुकेः सर्पराजस्य च भुवस्तले पाताले यत् कुब्जिनगामि सकम्बलं कम्बलनामकनागसहितं नागबलं सर्पसैन्यं कर्कोटकनामा नागविशेषः प्राग्भूय उच्चैराचकर्ष तन्नागबलं अश्वतरश्च

Digitized by Google

भुवस्तले कुण्डिनगामिरान्तां
तदा तुकेशाश्वतरोऽभ्यगच्छत् ॥ ८ ॥
आगच्छदुर्व्वीश्वचमूसमुत्थै
र्भूरेणुभिः पाण्डरिता मुखश्रीः ।
विस्पष्टमाचष्ट दिशां जनेषु
रूपं पतित्यागदशानुरूपं ॥ ९ ॥

नामा नागविशेषोऽभ्यगच्छत् नागा अपि स्वयम्बरं जग्मुरितिभावः शब्दश्लेषमूलेयं तुल्ययोगिता। कर्कः कर्के तिले वह्नौ शुक्लाश्वे दर्पणे घटे इति कर्कोटकः स्यात्नागपूरनागवेयप्रभेदयोरिति कम्बलोनागभेदे स्यात् सास्नाप्रावरयोरपीति नागः पन्नगमातङ्गक्रूराचारिषु तोयदे इति च मेदिनी गर्द्दभादश्वाजाते खराश्वतरवेशराइति बलः ॥ ८ ॥

आगच्छदिति ॥ आगच्छन्तो ये उर्व्वीशा राजानस्तेषां चमूभ्यः सैन्येभ्यः समुत्थैः सम्यगुत्थितैर्भूरेणुभिर्धूलिभिः कृता पाण्डरिता पाण्डरी कृता दिशां दिग्वधूनां मुखश्रीः कर्त्री पतित्यागेन या दशा अवस्था तस्या अनुरूपं सदृशं रूपं जनेषु विस्पष्टं स्फुटं यथा स्यात्तथा आचष्ट सूचयामास पतित्यागेन स्त्रीणां विरहादेवं रूपं भवतीति सूचयामासे त्यर्थः राजानोदिशां पतयः दिशश्च वध्व इति समासोक्तिः सर्व्वा अपि दिशो राजशून्याः सैन्यादिविमर्द्दोत्थितधूलिधूसराश्च जाता इति भावः ॥ ९ ॥

Digitized by Google

आखण्डलोदण्डधरः कृशानुः
पाशीति नाथैः ककुभां चतुर्भिः ।
भैम्येव बद्धा स्वगुणेन कृष्टै
र्यये तदुद्वाहरसान्न शेषैः ॥ १० ॥
मन्त्रैः पुरं भीमपुरोहितस्य
तद्बद्धरक्षं विशति क्व रक्षः ।
तच्चोद्यमं दिक्पतिराततान
यातुं ततो जातु न यातुधानः ॥ ११ ॥

दिक्पालानां मध्ये नैर्ऋतवर्जमिन्द्रादिचतुष्टयमेव तत्र गतमित्याह । आखण्डल इति । आखण्डल इन्द्रो दण्डधरो यमः कृशानुर्वह्निः पाशी वरुणः इति चतुर्भिः ककुभां दिशां नाथैर्दिक्पालैस्तस्या भैम्या उद्वाहरसात् विवाहानुरागात् यये गतं शेषैश्चतुर्भ्यः इतरैर्दिक्पालैर्वक्ष्यमाणकारणात् न यये चतुर्भिः किंभूतैः भैम्या स्वगुणेन निजसौन्दर्यादिना रज्ज्वा च सूत्रेण बद्धा आकृष्टैरिव अन्येऽपि सूत्रेण बद्धा आकृष्यन्ते । यये इति या गतावित्यस्य भावे लिट् ॥ १० ॥

शेषाणामगमने कारणमुत्प्रेक्षते । मन्त्रैरिति । रक्षो राक्षसः भीमपुरोहितस्य मन्त्रैर्भूताः प्रेताः पिशाचाश्च राक्षसाश्च सरीसृपा इत्यादिभिर्बद्धरक्षं कृतरक्षं तत् पुरं कुण्डिननगरं क्व कुतो विशति अपितु न कुतोऽपि प्रवेष्टुं शक्नोति ततस्तस्मादेव हेतोर्यातुधानो नैर्ऋतो दिक्पतिः जातु कथंचिदपि तत्र पुरे यातुं गन्तुं उद्यमं उद्योगं न आततान न कृतवान् नैर्ऋतदिक्पालस्यापि तत्र जिगमिषा स्थिता किन्तु एतदर्थमेव तेन न गतमित्यर्थः । यातुधानः पुण्यजनो नैर्ऋतो यातुरक्षसी इत्यमरः ॥ ११ ॥

Digitized by Google

कर्त्तुं प्रशाकाभिमुखं न भैम्या
मृगं दृगम्भोरुहतर्जितं यत् ।
अस्याविवाहाय ययौ विदर्भान्
तद्वाहनस्तेन न गन्धवाहः ॥ १२ ॥
जातौ न वित्ते न गुणे न कामः
सौन्दर्य्यएव प्रवणः सवामः ।

कर्त्तुमिति । गन्धवाहो वायुदिक्पालः दृगम्भोरुहेण भैम्यानयनपद्मे न तर्जितं चक्षुःसौन्दर्य्ये तिरस्कृतं मृगं वाहनं यत् भैम्या अभिमुखं सम्मुखं कर्त्तुं न प्रशाक तेन हेतुनेव तस्याभैम्या विवाहाय भैमीं परिणेतुं विदर्भान् जनपदान् न ययौ न गतवान् किम्भूतः यतः स मृग एव वाहनं यस्य तादृशः दैर्घसाम्येऽपि अम्भोरुहतुल्यत्वादेव भैमीनयनं मृगनयनादुत्कृष्टं अतस्तेन नयनसौन्दर्य्यविषये तर्ज्जितत्वाद्भीतस्य मृगस्य तदभिमुखगमनासामर्थ्यादन्यस्य च वाहनस्याभावात् वायुना तत्र न गत मित्यर्थः ॥ १२ ॥

जाताविति । कुबेरोदिक्पालः स्थिततरां रमणीश्रेष्ठां तां दमयन्तीं प्रति उद्दिश्य नागात् न गतवान् किम्भूतः यतः स्वच्छे स्फटिकमयत्वात् तिनिर्म्मले स्वस्य शैले कैलासपर्व्वते इंक्षिता दृष्टा कृत्स्ना निन्दनीयता यस्य तादृशं वेरं शरीरं यस्य तादृशः स्वस्य निन्दितशरीरत्वादेव कुवेरस्तत्र न गतवानित्यर्थः ननु जात्यादयः प्रशस्ताः सन्ति ततः किमिति न गतवानित्यत आह कामः कन्याया अभिलाषः जातौ कौलिन्ये न प्रवणः नाम्रस्तोभवति तथा वित्ते धने न प्रवणस्तथा गुणे विद्यादौ न प्रवणः

Digitized by Google

स्वच्छः स्वर्गी सेवितकुत्सवेर
स्तां प्रत्यगान्न स्मितरां कुवेरः ॥ १३ ॥
भैमीविवाहं सहतेऽस्य कस्मा
दर्द्धं तनुर्या गिरिजात्मभर्त्तुः
तेनाग्रजन्या विदधे विदर्भी
मीशानयानाय नयान्तरायः ॥ १४ ॥

यतोवामो वक्रोऽथच मनोहरः स कामः सौन्दर्य्येणैव कन्या वरयते रूप मिति प्रागुक्तवचनात् रूपएव प्रवर्धो भवति इत्यविचार्य्यैव कुवेरः स्वय म्वरं न गतवानितिभावः कुवेर इति योगरूढं पदं कुत्सितोवेरः शरीरं यस्येतिव्युत्पत्तेः । वेरः कलेवरे क्लीवं वार्त्ताकौ कुङ्कुमेऽपि चेति मेदिनी ॥ १३ ॥

भैमीति ॥ आत्मभर्त्तुः शिवस्य अर्द्धं तनुः शरीरार्द्धरूपा या गिरि जा स्वस्वामिकर्त्तृकं भैमीविवाहं कस्मात् सहतेस्म अपितु नैव सस हत तेन तत्सहनाभावेन हेतुना विदर्भाम् ईशान् अग्रजन्या तया गिरि जया ईशानस्य शिवस्य दिक्पालस्य यानाय स्वयम्वरगमनाय अन्तरा यो विघ्नो विदधे विहितः शिवस्यापि तत्र गमनं मनसि स्थितं किन्तु शरीरार्द्धभूतायाः पार्वत्या गमनाभावादिव तेन नगतमित्यर्थः । अर्द्ध मित्यस्यांशिनि वाच्यविकत्वान्न तनुरित्यनेन सामानाधिकरण्यहानिः ॥ १४ ॥

Digitized by Google

स्वयम्बरं भीमनरेन्द्रजाया
दिशः पतिर्न प्रविवेश शेषः।
प्रयातु भारं स निवेश्य कस्मि
न्नद्भिर्महीगौरवसासहिः कः ॥१५॥
ययौ विमृश्योर्द्ध्वदिशः पतिर्न्न
स्वयम्वरं वीक्षितधर्म्मशास्त्रः।

स्वयम्बरमिति॥ शेषोऽनन्तो दिशः पतिर्दिक्पालः भीमनरेन्द्रजाया भैम्याः स्वयम्बरं न प्रविवेश प्रविष्टवान् कुत इत्याह स शेषः भारं पृथिवीलक्षणं कस्मिन् स्वसदृशे निवेश्य स्थापयित्वा प्रयातु स्वयम्बरं गच्छतु ननु पातालेऽपि सर्पान्तराणि सन्ति तेष्वेकस्मिन् निवेश्य किमिति नागतवानित्यतआह कोऽद्भिः सर्पः महीगौरवसासहिः अभीक्ष्णं पृथ्वीभारसहनक्षमः अपितु न कोऽपि भूमिभारसहनक्षमसर्पान्तराभावादिव शेषो न गतवानित्यर्थः। सासहिरिति यङ्लुगन्तात् सहतेर्भ्रुजादेरिरिति इः ॥१५॥

ययाविति॥ वीक्षितं पर्य्यालोचितं धर्म्मशास्त्रं येन तादृशः ऊर्द्धदिशः पतिर्ब्रह्मा विमृश्य वक्ष्यमाणं विचार्य्यैव स्वयम्बरं न ययौ न गतवान् विचारमेवाह पितामहेन ब्रह्मणा अथच पितृपित्रा समं सह विवाहः लोके भुवने जने वा क्व दृष्टः तथा श्रुतिषु वेदेषु बहुवचनात् स्मृतिषु च क्व श्रुतः अपितु न दृष्टो न श्रुतः क्वापि न समानार्थैर्यो कन्यां वरयेदित्यादिना पितामहेन विवाहस्य निषिद्धत्वात् तेन नागतमित्यर्थः मन्वादि

व्यलोकि लोके श्रुतिषु श्रुतो वा
समं विवाहः क्व पितामहेन ॥१६॥
भैमीनिरस्तं समवेत्य दूत्या
मुखात् किलेन्द्रप्रमुखा दिगीन्द्राः।
स्पन्दे मुखेन्दौ च वितत्य मान्द्यं
चित्तस्य ते राजसमाजमीयुः ॥१७॥
नलभ्रमेणापि भजेत भैमी
कदाचिदस्मानिति शेषिताशा।

द्वारा धर्म्यमात्मानं प्रणीय वयमेवं कुर्य्यामिति भावः। पितामहः पद्मयोनौ जनके जनकस्यपेति हेमचन्द्रः ॥१६॥

भैमीति। ते इन्द्रप्रमुखा इन्द्रादयो दिगीशा दिक्पाला दूत्या मुखात् दूतीमुखद्वारा स्वं आत्मानं भैमीनिरस्तं भैम्या निराकृतं किल निश्चयेन अवेत्य ज्ञात्वा चित्तस्य मनसो मान्द्यं मन्दतां स्पन्दे गमने मुखेन्दौ मुखचन्द्रे च वितत्य विस्तार्य्य किमर्थमस्माभिरत्र गन्तव्यमित्युत्साहभङ्गात् चित्तस्य विषादं गमनमान्द्यमुखमालिन्याभ्यां प्रकटीकृत्य राजसमाजं स्वयम्बरस्थलं ईयुः गतवन्तः ॥१७॥

नलरूपं धृत्वा इन्द्रादयस्तत्र जग्मुरित्याह। नलेति। भैमी नलभ्रमेणापि नलभ्रान्त्यापि कदाचिदस्मान् भजेत वृणीत इति इत्थं शेषिता अवशेषिता आशा यया तादृशी सा महेन्द्रादिचतुष्टयी काचिदनिर्व्वचनीया अलीकरूपा मिथ्यारूपा चतुर्नली बभूव दूतीमुखेनात्मानं भैमी

Digitized by Google

अभूम्महेन्द्रादिचतुष्टयी सा
चतुर्नली काचिदलोकरूपा ॥ १८ ॥
प्रयस्यतान्तद्भवितुं सुराणां
दृष्टेन पृष्टेन परस्परेण ।
तद्द्वैतसिद्धिर्न्नवतानुमेने
स्वाभाविकात् कृत्रिममन्यदेव ॥ १९ ॥
पूर्णेन्दुमास्यं विदधुः पुनस्ते
पुनर्म्मुखीचक्रुरनिन्द्रमब्जं ।

निराकृतं श्रुत्वापि नलभ्रान्त्यापि यद्यस्मान् भजेतेति एतावन्मात्रामाशा माश्रित्य नलरूपं गृहीत्वा इन्द्रादयस्तत्र जग्मुरित्यर्थः। काचिदिति सम्भावनायां ॥ १८ ॥

तथापि तैः सम्यक् नलरूपं न प्राप्तमित्याह ॥ प्रयस्यतामिति ॥ तद्भवितुं नलीभवितुं प्रयस्यतां प्रयासं कुर्व्वतां सुराणामिन्द्रादीनां दृष्टेन आलोकितेन पृष्टेन अहं नलतुल्यो जातोनवेति जिज्ञासितेन पृष्टेन पृष्टेनेति पाठे पुनःपुनर्जिज्ञासितेन परस्परेण अन्योऽन्येन तद्द्वैतसिद्धिस्तस्य नलस्य द्वैतं द्वितीयत्वं तस्य सिद्धिर्निष्पत्तिर्न्नवेत कर्त्तृ नानुमेने न स्वीकृता त्वं नलतुल्योनाभूस्त्वमपि नलतुल्योनाभूरिति परस्परं ते कथयामासुरित्यर्थः यतः स्वाभाविकात् सहजाद्वस्तुनः कृत्रिमं कृत्वा निर्वृत्तं वस्तु अन्यदेव भवति सहजकृत्रिमयोर्महदन्तरमित्यर्थः तद्द्वैतसिद्धिरित्यत्र तत्साम्यसिद्धिरिति क्वचित् पाठः ॥ १९ ॥

तद्द्वैतसिद्ध्यभावमेव विवृणोति ॥ पूर्णेन्दुमिति ॥ ते इन्द्रादयः पूर्णेन्दुं पौर्णमासीचन्द्रं आस्यं मुखं विदधुः अनन्तरं अयोग्यत्वात्तं विहाय पुनरनिन्द्रं

Digitized by Google

स्ववक्त्रमादर्शतलेऽथ दृष्ट्वा
दृष्ट्वा बभञ्जुर्न तथातिमञ्जु ॥ २० ॥
तेषां तदा लब्धुमनीश्वराणां
श्रियं निजास्येन नलाननस्य ।
नालं तरीतुं पुनरुक्तिदोषं
बर्हिर्मुखानामनलाननत्वं ॥ २१ ॥
प्रियावियोगक्वथितात् किमैला
च्चन्द्राद्गृहीतैर्यक्ष्मपीडितात्ते ।

प्रमुखं चन्द्रं पद्मं मुखीचक्रुः अथानन्तरं आदर्शतले दर्पणमध्ये स्ववक्त्रं तादृशं निजवदनं दृष्ट्वा दृष्ट्वा पुनः पुनर्दृष्ट्वा बभञ्जुर्भग्नीचक्रुः किम्भूतं यत् तथा नलमुखवत् न अतिमञ्जु नातिशोभनं पूर्वं चन्द्रप्रमुखकमलाभ्यामपि नलमुखमुत्कृष्टमिति भावः ॥ २० ॥

तेषामिति । तदा नलरूपधारणावसरे निजास्येन निजमुखेन नलाननस्य नलमुखस्य श्रियं शोभां लब्धुं अनीश्वराणां असमर्थानां तेषां बर्हिर्मुखानां देवानां अनलाननत्वं अभिमुखत्वं अथच नलमुखसदृशमुखराहित्यं कर्तृ पुनरुक्तिरूपं दोषं तरीतुं परिहर्तुं अलं समर्थं नाभूत् तेषां पूर्वमपि स्वभावात् अनलाननत्वं स्थितं अधुनापि नलाननसदृशाननालाभात् पुनरप्यनलाननत्वं जातमिति पुनरुक्तत्वात् पौनरुक्त्यं । बर्हिर्मुखाः क्रतुभुजो गीर्वाणा दानवारय इत्यमरः । बर्हिः कुशज्वलनयोरिति विश्वः ॥ २१ ॥

प्रियेति । किमित्युत्प्रेक्षायां ते देवाः किं प्रियावियोगेन उर्वशीविरहेण क्वथितात् बाधितात् ऐलात् पुरूरवसः तथा राजयक्ष्मणा पीडि-

Digitized by Google

ध्मातात्द्रवेण स्मरतोऽपि सारैः
सङ्कल्पयन्ति स्म नलानुकल्पं ॥ २२ ॥
नलस्य पश्यन्त्वियदन्तरं तै
र्भैमीति भूपान् विधिराहृतोऽस्मै ।

तावच्चाद्य तया भवेन शिवेन ध्मातात् दग्धात् स्मरतोऽपि कामादपि गृहीतैः सारैः श्रेष्ठभागैः कृत्वा समात्मानं नलस्य अनुकल्पं प्रतिनिधिं कल्पयन्ति स्म कृतवन्तः अयमर्थः भैम्याः पूर्व्वरागविप्रलम्भेनातितरां खिन्नो नलस्तदानीं उर्व्वशीविरहपीडितपुरूरवोराहुपीडितचन्द्रहरकोपा नलदग्धकामैस्तुल्यस्तत्र तथाविधस्य नलस्यानुकरणे देवैः किं तथावि धेभ्यः पुरूरवःप्रभृतिभ्यः सारभागो गृहीतइत्युत्प्रेक्षा अयच अन्य त्रापि क्वथनेन पीडनेन दाहेनच सार आकृष्यते ॥ २२ ॥

नतु भैमी नलमेव वरिष्यतीति यद्यपि राजानो देवाश्च पूर्व्वं ज्ञातव न्तस्तर्हिं कथन्ते स्वयम्बरमाजग्मुरित्याशङ्क्याह ॥ नलस्येति ॥ भैमी तैर्भू पैः सह नलस्य इयत् एतावत् अन्तरं विशेषं पश्यतु इति मनसि कृत्वा विधिर्भूपान् राज्ञोऽस्य भैमीमुद्दिश्य आहृत आनीतवान् तथा दिग्गी शानपि इन्द्रादिदिक्पालानपि नलरूपधारणद्वारा नलस्य स्पर्द्धां कार यित्वा तस्यैव नलस्यैव तेभ्योदेवेभ्यः सकाशात् प्रथिमानं महत्त्वं अस्यै आख्यत् कथितवान् तत्र पतिर्नल ईदृक् महान् यस्य रूपं ग्रहीतुं देवा अपि प्रयासं कुर्व्वन्तीति आख्यदित्यर्थः स्पर्द्धा हि अधिकेनैव सह भवति

Digitized by Google

स्पर्द्धां दिगीशानपि कारयित्वा
तस्यैव तेभ्यः प्रथिमानमाख्यत् ॥ २३ ॥
सभा नलश्रीयमकैर्यमाद्यै
र्नलं विनाभूद्धृतदिव्यरत्नैः ।
भामाङ्गनप्राघुणिके चतुर्भि
र्देवद्रुमैर्द्यौरिव पारिजाते ॥ २४ ॥

राजानो देवाश्च स्वेच्छया स्वयम्बरं नागताः किन्तु भैम्यै नलस्य सर्व्वोत्कृष्टत्वं सूचयतो विधेरिच्छयैवागता इतिभावः ॥ २३ ॥

अथ नलागमनात् प्राक् इन्द्रादयः सभायां गताइत्याह ॥ सभेति ॥ नलं विना नलश्रियो नलशोभायायमकैः सदृशैर्यमाद्यैश्चतुर्भिर्यमवरुणाग्नीन्द्रैः कृत्वा सभा स्वयम्बरसमाजः पारिजाते देवतरौ भामायाः सत्यभामाया अङ्गनस्य चत्वरस्य प्राघुणिके अतिथौ सति सत्यभामार्थं श्रीकृष्णेन पारिजातस्याहृतत्वात् तं विना चतुर्भिर्देवद्रुमैर्मन्दारसन्तानकल्पवृक्षहरिचन्दनैश्चतुर्भिर्देवतरुभिः कृत्वा द्यौरिव स्वर्गइव अभूत् यथा पञ्चस्य मध्ये प्रधानं पारिजातं विना मन्दारादिभिर्द्यौर्नातिशोभनाभूत् तथा नलं विना देवैः सा सभा नातिशोभनाभूदित्यर्थः किम्भूतैर्यमाद्यैर्देवद्रुमैश्च धृतानि दिव्यानि रत्नानि यैस्तादृशैः देवानामङ्गेषु आभरणभूतानि रत्नानि स्थितानि देवद्रुमाणाञ्च स्वभावतश्चामूलात् शिखरपर्य्यन्तं मुक्तादिरत्नानि स्थितानीत्यर्थः देवागतानन्तु न मत इति भावः ॥ २४ ॥

Digitized by Google

तत्रागमद्वासुकिरीशभूषा
भस्मोपदेशस्फुटगौरदेहः ।
फणीन्द्रवृन्दप्रणिगद्यमान
प्रसीदजीवाद्यनुजीविवादः ॥ २५ ॥
द्वीपान्तरेभ्यः पुटभेदनं तत्
क्षणादवापे सुरभूमिभूपैः ।

प्रागभूय कर्कोटकेति श्लोके शेषेण नागानां गमनमभिहितं संप्रति वासुकेराह ॥ तत्रेति ॥ वासुकिः सर्पराजस्तत्र सभायां आगमदागतवान किंभूतः ईशस्य शिवस्य भूषायै यद्भस्म विभूतिस्तदेव उपदेशोऽङ्गराग स्तेन स्फुटः सुव्यक्तो गौरः शुभ्रो देहो यस्य तादृशः स्वभावतः शुभ्रोऽपि शिवाङ्गभस्मसम्बन्धादतिशुभ्र इत्यर्थः एतेन शिवाङ्गमपि परित्यज्यागत इति ध्वनिः तथा फणीन्द्रवृन्दैः कर्कोटकादिनागश्रेष्ठसमूहैः प्रणिगद्यमान उच्चार्यमाणः प्रसीद जीव इत्यादिशब्दो यत्र स तथा तादृशोऽनुजीविनां सेवकानां वादः कोलाहलो यस्य सः सपरिवारएव वासुकिस्तत्रागत इत्यर्थः ॥ २५ ॥

द्वीपान्तरीया राजानोऽपि तत्राजग्मुरित्याह ॥ द्वीपेति ॥ सुरभूमीनां द्वीपान्तरस्थानां भूपैराजभिर्द्वीपान्तरेभ्यः प्लक्षादिभ्यस्तत् पुटभेदनं कुण्डिनाख्यं पत्तनं क्षणात् झटिति अवापे प्राप्तं कथं द्वीपान्तरेभ्योऽपि झटित्यागतमित्याशङ्क्याह तत्कालं तस्मिन् समये केन यूना स्मरेषूणां वेगेन पततां कामबाणानां ये पक्षास्तेषां योऽनिलो वायुस्तेन तूलकीला तूलस्य

Digitized by Google

तत्कालमालम्बि न केन यत्ना
त्स्मरेषुपर्णानिलतूललीला ॥ २६ ॥
रम्येषु हर्म्येषु निवेशनेन
सपर्य्यया कुण्डिननाकनाथः ।
प्रियोक्तिदानादरनम्रताद्यै
रुपाचरत्साधु स राजचक्रं ॥ २७ ॥
चतुःसमुद्रीपरिखे नृपाणा
मन्तःपुरे वासितकीर्त्तिदारे ।

विलासो नालम्बि न स्वीकृता अपितु सर्व्वैरपि श्लाक्ष्णवासियुवभिराल म्बि तूर्ण यथा वातगुम्फो झटिति देशान्तरं प्राप्नोति तथा तेऽपि कामनु न्नाद्वीपान्तरेभ्योऽपि झटित्याजग्मुरित्यर्थः श्लक्ष्णादिद्वीपानां भौममात्रा धिकारत्वेन देवभूमित्वं ॥ २६ ॥

अथ भीमः समागतानां राज्ञां पूजां चकारेत्याह । रम्येष्विति । स कुण्डिननाकनाथः कुण्डिनेन्द्रो भीमः रम्येषु मनोहरेषु हर्म्येषु प्रासा देषु निवेशनेन स्थापनेन तथा सपर्य्यया पाद्यादिना पूजया प्रियोक्त्या प्रि यवचनेन दानेन भक्ष्यपेयादिवस्तुवितरणेन आदरेण सम्मानेन नम्रता द्यैर्विनयादिभिः कृत्वा चाद साधु यथा स्यात्तथा राज्ञां चक्रं समूहं उपा चरत् सत्कृतवान् । प्रियोक्तिदानादरनम्रताद्यैरित्यत्र प्रियोक्तिदाना दवनम्रताद्यैरिति पाठं कल्पयित्वा प्रियोक्तिदानात् अवनम्रताद्यैरितिव्या ख्यानं भ्रमविलसितमेव अर्थाभावात् प्रक्रमभङ्गदोषापाताच्च ॥ २७ ॥

सार्व्वभौमोऽपि भीमः स्वस्य कीर्त्तिरक्षार्थमेव तथा भूपान् सत्कृत वानित्याह । चतुरिति । चतुर्णां समुद्राणां समाहारश्चतुःसमुद्री सैव

Digitized by Google

औदार्य्यदाक्षिण्यदयादमानां
चतुष्टयी रक्षणसौविदल्ला ॥ २८ ॥
अभ्यागतैः कुण्डिनवासवस्य
परोक्षवृत्तेष्वपि तेषु तेषु ।

परिखा यत्र तादृशे तथा वासिता व्यापिता कीर्त्तिरेव दारा महिषी यत्र एवंविधे नृपाणामन्तःपुरे भूमण्डलरूपे औदार्य्यं दातृत्वं दाक्षिण्यं परच्छन्दानुवर्त्तित्वं सारल्यम्वा दया निरुपाधिपरदुःखप्रहरणेच्छा दमोऽजितेन्द्रियता एषाञ्चतुष्टयी रक्षणाय कीर्त्तिरूपमहिषीरक्षणार्थं सौविदल्ला कञ्चुकिनी भवति औदार्य्यादिचतुष्टयेन नृपाणां कीर्त्तिरक्ष्य ते नान्यथेति तेन सार्व्वभौमेनापि कीर्त्तिरक्षणार्थं राजानस्तथा सत्कृता इति भावः अन्यापि अन्तःपुरवर्त्तिनी महिषी कञ्चुकिभीरक्ष्यते । दक्षिणस्तु परच्छन्दानुवर्त्तिनि । दक्षोऽपसव्ये सरले इति हेमचन्द्रः । सौविदल्लाः कञ्चुकिन इत्यमरः ॥ २८ ॥

भीमेन समानएव सर्व्वेषां समादरः कृतइत्याह ॥ अभ्यागतैरिति ॥ अभ्यागतैरतिथिभूतैर्नृपैः कुण्डिनवासवस्य कुण्डिनेन्द्रस्य भीमस्य परोक्षवृत्तेष्वपि का कथा निजप्रत्यक्षवृत्तेषु भृत्यादिद्वारा क्रियमाणेषु अप्रत्यक्षनिष्पन्नेष्वपि तेषु तेषु प्रियोक्त्यादिषु विषये स्वल्पोऽपि किञ्चिदपि विशेषः अस्य महान् समादरः कृतः मम तु स्वल्पः कृतइत्यादिरूपं तारतम्यं नावापि न प्राप्तः किम्भूतः जिज्ञासितोज्ञातुमिष्टोयः सेप्सितस्य निजाभिलषितस्य भैमीलक्षणस्य लाभः प्राप्तिस्तस्य चिह्नं सूचकं अनेनास्य महान् समादरः कृतस्तस्मा एवासौ भैमीं दास्यतीति समादरतारतम्यमेव भैमी

Digitized by Google

जिघांसितस्तेषु मितस्ताभवित्रं
स्वल्पोऽपि नावापि नृपैर्विशेषः ॥ २९ ॥
अङ्के विदर्भेन्द्रपुरस्य मङ्क्षु
न सम्ममौ नैष तया समाजः।
यथा पयोराशिरगस्त्यहस्ते
यथा जगद्वा जठरे मुरारेः ॥ ३० ॥
पुरे पथिद्वारगृहाणि तत्र
चित्रीकृतान्युत्सववाञ्छयैव।

लाभस्तूचकं स्यात् भीमेन पुनः सर्व्वेषां समान एव समादरः कृत इति कस्य भैमीं दास्यतीति निश्चेतुमसमर्थास्ते जाता इत्यर्थः ॥ २९ ॥

बहूनामपि राज्ञां कुण्डिनपुरे समावेशो जातइत्याह ॥ अङ्क इति ॥ विदर्भेन्द्रपुरस्य भीमनगरस्य कुण्डिनस्य अङ्के क्रोडे एव समाजो राजसमूहस्तया नन सम्ममौ परिमातिस्म अपितु पुरस्य महत्त्वात् तथैव सम्ममावित्यहं मङ्क्षु मन्ये यथा अगस्त्यस्य मुनेर्हस्ते पाणिपुटके पयोराशिः समुद्रः सम्ममौ यथावा मुरारेर्नारायणस्य जठरे उदरे जगत् विश्वं सम्ममौ कुण्डिननगरमतिमहदासीदिति भावः ॥ ३० ॥

पुर इति ॥ तत्र पुरे कुण्डिननगरे पथि राजमार्गे द्वाराणि येषां तादृशानि गृहाणि पश्चात्तत्र द्वाराणि गृहाणिचेति तानीतिवा उत्सववाञ्छया विवाहोत्सवाभिलाषेण चित्रीकृतान्येव आलेपनादिना जनैर्व्विलेपितान्येव। न केवलमेतानि चित्रितानि किन्तु नभस्तु तुरप्यर्थं आकाशमपि तेषामागच्छतां महीभुजां राज्ञां आभरणप्रभाभिः

Digitized by Google

नभस्तु किर्म्मीरमकारि तेषां
महीभुजामाभरणप्रभाभिः ॥ २१ ॥
विलासवैदग्ध्यविभूषणश्री
स्तेषां तथाभूत् परिचारकेऽपि ।
अमासिषुः स्त्रीशिशुवालिशास्तं
यथागतं नायकमेव कञ्चित् ॥ २२ ॥
अस्वेदगात्राश्चलचामरौघै
रमीलनेत्राः प्रतिवस्तुचित्रैः ।

भूषणकान्तिभिः किर्म्मीरं चित्रितं अकारि कृतं आकाशमपि चित्रितं गृहादीनि चित्रीकृतानीति किं वाच्यमित्यर्थः ॥ २१ ॥

विलासेति । तेषां राज्ञां परिचारकेऽपि भृत्येऽपि विलासः कटाक्षविक्षेपादिशृङ्गारचेष्टा वैदग्ध्यं वक्रोक्त्यादिभावणचातुर्य्यं भूषणं तैव संकटकादि एषां श्रीः शोभा तथा अभूत् यथा येन प्रकारेण तं परिचारकमपि स्त्रियः शिशवो वालिशा मूर्खाश्च कश्चित् काम पि आगतं नायकमेव मुख्यं राजानमेव अमासिषुः अमन्यन्त विलासादिशोभया भृत्येऽपि स्त्र्यादीनां प्रधानराजभ्रान्तिरभूदित्यर्थः ॥ २२ ॥

अस्वेदेति । तत्र देवाः इन्द्रादयो नृदेवाः राजानश्च भिदां परस्परभेदं न भेजुर्न प्रापुः समाना एव बभूवुरित्यर्थः अभेदमेव समानविशेषणैराह देवाः किम्भूताः अस्वेदं स्वभावतो घर्म्मजलरहितं गात्रं येषां ते तथा चलानां चामराणामोघैः समूहैश्च पवनज्ञिताः तथा अमीलं स्वभावतोनिर्निमेषं नेत्रं येषां ते तथा प्रतिवस्तुचित्रैः सर्व्वेषु भूषणादिव

Digitized by Google

अम्लानमाला विपुलातपत्रै
र्देवानृदेवाश्च भिदां नभेजुः ॥ ३३ ॥
अन्योऽन्यभाषानवबोधभीतेः
संस्कृत्रिमाभिर्व्यवहारवत्सु ।
दिग्भ्यः समेतेषु नरेषु वाग्भिः
सौवर्गवर्गो न जनैरचिह्नि ॥ ३४ ॥

तेषु चाश्चर्यैरुपलक्षिताः तथा सभावतोऽम्लाना माला पारिजातादि पुष्पमाल्यं येषां ते तथा विपुलैरातपत्रैश्चत्रैरुपलक्षिताः नृदेवा अपि चलचामरादिभिः कृत्वा अभेदगाम्भीर्यया प्रतिवस्तुभिन्नैः अतिमनोहर मरीचलसमूहदर्शनजनिताश्चर्यैः कृत्वा अम्लानमेन्द्रया विपुलातपत्रैः कृत्वा अम्लानमालाः सम्यंग्या राजानोदेवतुल्याबभूवुरिति भावः ॥ ३३ ॥

अन्यदप्यभेदकारणमाह ॥ अन्योऽन्येति ॥ जनैः कुण्डिनपुरवासि भिर्दिग्भ्यः समेतेषु समागतेषु नरेषु मध्ये सौवर्गवर्गः स्वर्गे भवाः सौवर्गा देवास्तेषां वर्गः समूहोन अचिह्नि देवत्वेन न ज्ञातः किम्भूतेषु यतोऽन्यो ऽन्यभाषानवबोधे नानादिग्भवानां तेषां परस्परभाषाग्रहणाभावे या भीतिर्भयं तस्याहेतोः संस्कृत्रिमाभिः संस्कृताभिर्वाग्भिः सर्वसाधारणी भिर्व्यवहारवत्सु परस्परं व्यवहारं कुर्वत्सु संस्कृतभाषाया देवमनुष्य साधारणत्वात् सर्वेषाम् तथा व्यवहारदर्शनात् एते देवामनुष्यावा इति विविच्य निश्चेतुं जनान शक्नुवन्तीत्यर्थः सौवर्गेत्यत्र स्वर्गीयेति क्वचित् पाठः ॥ ३४ ॥

Digitized by Google

ते तत्र भैम्याश्चरितानि चित्रे
चित्राणि पौरैः पुरि लेखितानि ।
निरीक्ष्य निन्युर्दिवसं निशान्तु
तत्स्वप्नसम्भोगकलाविलासैः ॥ ३५ ॥
सा विभ्रमं स्वप्नगतापि तस्यां
निशि स्वलाभस्य ददे यदेभ्यः ।

त इति । ते देवानुदेवास्तत्र पुरि कुण्डिने पौरैः पुरवासिभिश्चि
त्रकरैश्चित्रे लेखितानि चित्रितानि चित्राणि नानाविधानि आश्चर्य्य
जनकानि वा भैम्याश्चरितानि निरीक्ष्य दृष्ट्वा दिवसं निन्युर्गमयामासुः
तथा तस्या भैम्याः स्वप्ने यः सम्भोगः सुरतं तस्य कलाभिर्विलासैश्चुम्बना
दिकलाकौतुकैः सता निशान्तु रात्रिमपि निन्युः भैमीसम्पर्किव्यापार
मात्रेणैव ते तमहोरात्रं गमयामासुरितिभावः देवपक्षे अस्वप्नानां
तेषां स्वप्नासम्भवात् स्वप्नसम्भोगेत्यस्य कामोन्मादजनितसम्भोगोऽर्थो
बोद्धव्यः ॥ ३५ ॥

सेति । सती पतिव्रतापि सा भैमी तस्यां स्वयम्बरदिनपूर्व्वरात्रौ स्वप्नग
ता स्वप्नप्राप्ता सती एभ्यो भूमिभुग्भ्यः स्वलाभस्य निजप्राप्तेर्विभ्रमं विलासं
भ्रमञ्च निश्चयेन भ्रान्तिं यत् ददे दत्तवती तत् वदान्या बहुप्रदानशीला
सती भवन्ती सा अर्थिनां याचकानां भूमिभुजां देवानां राज्ञाञ्च कामं
अभिलाषं पूरयतिस्म सत्यपि साध्वीत्वे वदान्यत्वात् तेषां कामं पूरितवती
व्याघातः वस्तुतस्तु पतिव्रतायाः सर्व्वकामपूरणं विरुद्धं किन्तु भ्रान्तिद

तदर्थिनां भूमिभुजां वदान्या
सती सती पूरयति स्म कामं ॥ २६ ॥
वैदर्भदूतानुनयोपहूतैः
शृङ्गारभङ्गीष्वनुभाववद्भिः ।
स्वयम्बरस्थानजनाश्रयस्तै
र्दिने परत्रालमकारि वीरैः ॥ २७ ॥
भूषाभिरच्चैरपि संवृते यं
वीक्ष्याकृत प्राकृतबुद्धिमेव ।

छाया अलीकत्वात् सर्व्वकामपूरणेऽपि दोषाभावः । स्वर्गगतापीत्यत्रापि कारः सतीत्यनेन योजनीयः सङ्गतत्वात् । भूमिं भुञ्जन्ति पालयन्ति भुञ्जते उपभुक्तां कुर्व्वते चेतिव्युत्पत्त्या भूमिभुक्पदेन देवा राजानश्च बोध्याः उभयोरेव प्रार्थयितृत्वात् ॥ २६ ॥

अथ परदिने तेषां सभाप्रवेशमाह ॥ वैदर्भेति ॥ तैर्व्वीरैः शूरैः परत्र परस्मिन् दिवसे स्वयम्बरस्थानस्य स्वयम्बरदेशस्य जनाश्रयो मञ्चपीठश्च मकारि अलङ्कृतः विभूषितः वैदर्भस्य भीमस्य दूतैः चाटुभिरनुनयेन विनयेन उपहूतैराकारितैः तथा शृङ्गारभङ्गीषु शृङ्गारविच्छित्तिषु अनुभाववद्भिर्निश्चयप्राप्तिभिर्निपुणैरित्यर्थः सर्व्वेऽपि सभायामुपविष्टा इति भावः ॥ अनुभावः प्रभावे स्यान्निश्चये भावबोधक इति मेदिनी मञ्चपीठस्त्रीजनाश्रय इत्यमरः ॥ २७ ॥

नलोऽपि तत्रागतवानित्याह ॥ भूषाभिरिति ॥ विबुधानां देवानां अधिनाथइन्द्रोऽयं नलं वीक्ष्य भूषाभिरलङ्कारैरच्चैरतितरां संवृते

प्रसूनबाणे विबुधाधिनाथ
स्तेनाथ साशोभि सभा नलेन ॥ ३८ ॥
धृताङ्गरागे कलितद्युशोभां
तस्मिन् सभां चुम्बति राजचन्द्रे ।
गता वताक्ष्णोर्विषयं विलङ्घ्य
क्व चन्दनक्षत्रकुलस्य कान्तिः ॥ ३९ ॥

पि भूषितेऽपि प्रसूनबाणे कन्दर्पे प्राकृतबुद्धिमेव नीचबुद्धिमेव अकृत साक्षाद्भूतो मदनोऽपि नलापेक्षया कुरूप इति बुद्धिं कृतवान् अथानन्तरं तेन नलेन सा सभा स्वयम्बरसमाजोऽशोभि शोभिता नलोऽपि तत्र सभायां प्रविष्टइति भावः अथच विबुधानां पण्डितानामधिनाथः अतिपण्डितोऽपि संस्कृतोऽपि प्राकृतबुद्धिमकृतेति विरोधाभासः ॥ प्राकृतश्च पृथग्जन इत्यमरः ॥ ३८ ॥

नलं दृष्ट्वा सर्व्वेऽपि निःश्रीका जाता इत्याह ॥ धृतेति । धृतोऽङ्गरागः कुङ्कुमाद्यनुलेपनं येन तादृशे राजा चन्द्रइवेति राजचन्द्रे राजश्रेष्ठे तस्मिन् नले कलिता धृता दिवः स्वर्गस्य आकाशस्य च शोभा यया तादृशीं सभां चुम्बति प्रविशति सति क्षमाधिपनक्षत्राणीवेति तेषां कुलस्य समूहस्य कान्तिः शोभा वत खेदे अक्ष्णोश्चक्षुषोर्विषयं गोचरत्वं विलङ्घ्य परित्यज्य क्व कुत्र गता तत्र जाने इतिशेषः अतिसुन्दरं नलं दृष्ट्वा भैमी इममेव वरिष्यतीति निश्चित्य सर्व्वे राजानोनिःश्रीका जाताइतिभावः अथच उदितमात्रत्वात् किञ्चिदारक्ते चन्द्रे आकाशमारूढे सति नक्षत्रसमूहस्य कान्तिर्नैव तिष्ठति ॥ ३९ ॥

Digitized by Google

द्रागद्‌भुतैयः क्षोणिभुजाममुष्मि
न्नाश्चर्य्यपर्य्युत्सुकिता निपेतुः ।
अनन्तरं दन्तुरितभ्रुवान्तु
नितान्तमीर्ष्याकलुषा दृगंशाः ॥ ४० ॥
सुधांशुरेष प्रथमो भुवीति
स्मरो द्वितीयः किमसाविती मं ।

द्रागिति । क्षोणिभुजां राज्ञां दृष्टयश्चक्षूंषि आश्चर्य्येण अहो लोकातीतमस्य सौन्दर्य्यमिति विस्मयेन पर्य्युत्सुकिता दर्शनार्थमुत्कण्ठिताः सत्यः अमुष्मिन् नले द्राक् झटिति निपेतुः साभिलाषं पतितवत्यः अनन्तरं क्रोधवशात् दन्तुरिता कुटिलीकृता भ्रूर्यैस्तादृशां क्षोणिभुजां दृगंशा नेत्रप्रान्ताः नितान्तमत्यर्थं ईर्ष्यया कलुषाः कषायिताः सन्तोऽमुष्मिन् निपेतुः राजानः प्रथममदृष्टपूर्व्वसौन्दर्य्यं नलं साभिलाषं ददृशुरनन्तरञ्च भैमी अस्मान् विहाय अतिसुन्दरमिममेव वरिष्यतीति मत्वा क्रुद्धा बभूवुरिति भावः ॥ ४० ॥

सुधांशुरिति । क्षितीशाः केचिद्राजानो मत्सरिण ईर्ष्यायुताः सन्त इति स्तुतिच्छलेन किंशब्दस्य प्रश्नकाकुभयार्थत्वात् स्तवव्याजेन इमं नलं निनिन्दुः निन्दितवन्तः इति किं भुवि पृथिव्यां एष किं प्रथमोनवीनः सुधांशुश्चन्द्र इति तथा भुवि असौ किं द्वितीयः स्मरः कन्दर्पः इति तथा भुवि अयं किं तृतीयोदस्रोऽश्विनीकुमार इति स्तुतिच्छलात् निनिन्दुः अत्र प्रश्नार्थकेन किम्शब्देन अभेदाध्यवसायरूपातिशयोक्त्युत्थानात् स्तुतिर्गम्यते काक्वर्थेन तु तेन निन्दा यथा एषकिं भुवि नवीनः सुधां

Digitized by Google

दस्रस्तृतीयोऽयमिति चितीशाः
स्तुतिच्छलान्मत्सरिणोनिनिन्दुः॥४१॥
आद्यं विधोर्जन्म स एष भूमौ
द्वैतं युवासौ रतिवल्लभस्य।
नासत्ययोर्मूर्त्तिरियं तृतीया
इति स्तुतस्तैः किल मत्सरैः सः॥४२॥
इहेदृशाः सन्ति कतीति दुष्टै
रैष्टान्तितालीकनलावली तैः।

सुरपितु नैवेति एवं सर्व्वत्र भुवीत्यस्य किमित्यस्य च वाक्यत्रयेऽप्यनुषङ्गः ॥४१॥

उक्तमेवार्थं पुनरप्याह॥ आद्यमिति॥ मत्सरैः परद्वेषिभिः कैश्चित्तैर्नृपैः स नलः किल व्याजेन इत्यनेन प्रकारेण स्तुत इति किं स एव युवा भूमौ विधोश्चन्द्रस्य आद्यं जन्म नवीनश्चन्द्रः किं पृथिव्यामुत्पन्नः तथा असौ युवा रतिवल्लभस्य कामस्य द्वैतं द्वितीयः कामः किं तथा इयं नासत्ययोरश्विनीकुमारयोस्तृतीया मूर्त्तिः अयं तृतीयोऽश्विनीकुमारः किं अत्रापि अध्याहृतस्य किंशब्दस्य प्रश्नकाकुभयार्थत्वात् स्तुतिनिन्दे बोध्ये। द्वैतमिति द्विता एव द्वैतमिति क्वचित् स्वार्थिकप्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिक्रम्य वर्त्तन्त इति क्लीवत्वं अत्रार्थाभेदेऽपि वक्तृभेदात् वाक्यभेदाच्च न पौनरुक्त्यमिति बोध्यं॥ ४२॥

कैश्चित् व्यक्तमेव नलं निनिन्दुरित्याह। इहेति। इह सभायां ईदृशा एतत्सदृशाः कति बहवः सन्ति इति अस्मिन् विषये दुष्टैर्दुरात्मभिस्तैः

Digitized by Google

आत्मापकर्षे किल मत्सराणां
द्विषः परस्पर्द्धनया समाधिः ॥ ४३ ॥
गुणेन केनापि जनेऽनवद्ये
दोषान्तरोक्तिः खलु तत्खलत्वं ।
रूपेण तत्संसददूषितस्य
सुरैर्नरत्वं यददूषि तस्य ॥ ४४ ॥

कैश्चित् राजभिः अलीकनलानां मिथ्यानलीभूतानामिन्द्रादीनां आवलि समूहः दृष्टान्तिता दृष्टान्तीकृता कथमेनं लुप एतत् सदृशा बहवो विद्यन्ते संप्रति अस्यां सभायामप्येते दृश्यन्तामिति अलीकनलीभूता इन्द्रादयो दृष्टान्तत्वेन दर्शिता इत्यर्थः ननु अलीकनलीभूता अपि ते नल अयोग्या अयोग्यानाञ्च दृष्टान्तीकरणे दृष्टान्तयितुरेवापकर्षो भवति तत्कथं तैः स्वापकर्षः स्वीकृत इत्यत आह किल यतः मत्सराणामीर्ष्यावतां आत्मापकर्षे अवापि कारो बोध्यः निजस्यापकर्षे भवत्यपि द्विषः शत्रोः परेण अयोग्येन सह स्पर्द्धनया तुल्यतया समाधिः समाधानं निजस्यापकर्षम् विविच्यैव सादृश्यदाने व्यग्रता भवतीत्यर्थः ॥ ४३ ॥

गुणेनेति ॥ केनापि अनिर्व्वचनीयेन गुणेन सौन्दर्य्यादिना अनवद्ये अनिन्दनीये जने यत् दोषान्तरस्य उक्तिर्दोषान्तरारोपणं तत् खलु निश्चितं खलत्वं क्रूरत्वं यत् यस्मात् रूपेण सौन्दर्य्येण तस्मिन् संसदि अदूषितस्य अनिन्दितस्य तस्य नलस्य नरत्वं मनुष्यत्वं सुरैर्देवैरदूषि दूषितं अयमतिसुन्दरः सत्यं किन्तु नरोऽल्पायुरिति सुरैर्यत् निन्दितं तदेव तेषां खलत्वमित्यर्थः अथच रलयोरैक्यात् नरत्वदूषणव्याजेन नलत्वमेव दूषितमिति ध्वनिः देवा अपि नलं दृष्ट्वा सेर्ष्याजाता इतिभावः ॥ ४४ ॥

Digitized by Google

नलानसत्यानवदत्स सत्यः
कृतोपवेशान् सविधे सुरेशान्।
नोभाविलाभूः किमु दर्पकश्च
भवन्ति नासत्ययुतौ भवन्तः॥ ६५॥
अमी तमाहुः स्म यदत्र मध्ये
कस्यापि नोत्पत्तिरभूदिलायां।

नलस्यापि अलीकनलीभूतान् इन्द्रादीन् दृष्ट्वा विस्मयोजात इति श्लोकयमाह॥ नलानिति॥ स सत्योनलः सविधे समीपे कृतोपवेशान् अवस्थितान् असत्यान् नलान् अलीकनलीभूतान् सुरेशान् इन्द्रादीन् अवदत् वक्ष्यमाणमुवाच किमवददित्याह उ भोः भवन्तः नासत्ययुतौ अश्विनीकुमाराभ्यां सहितौ इलाभूः पुरूरवा दर्पकः कामश्च एतौ उभौ किं न भवन्ति अपितु पुरूरवःकन्दर्पाश्विनीकुमाराएव भवन्तइत्यर्थः नलं दृष्ट्वा यथान्येषां विस्मयोजातस्तथा नलस्यापि अलीकनलचतुष्टयदर्शनेन विस्मयोजात इतिभावः॥ ४५॥

अमीइति॥ अमी मिथ्यानलाः सुरेशास्तं सत्यं नलं आहुः स्म उक्तवन्तः किमाहुः केत्याह अत्र सभायां यत् ये चत्वारोवयं एषां मध्ये कस्यापि इलायां पुरूरवोमातरि उत्पत्तिर्नाभूत् अस्माकं कोऽपि पुरूरवानेत्यर्थः तथा ते तव सविधे समीपे स्थिता वयं अदर्पकादर्पकाह्निमाः स्मः भवामः वयं कन्दर्पानेत्यर्थः तथा अत्रास्मासु मध्ये कश्चित् कोऽपि नासत्यतां अश्विनीकुमारतां न बिभर्त्ति नधारयति अस्माकं मध्ये

Digitized by Google

अदर्पकाः स्मः सविधे स्थितास्ते
नासत्यतां नापि बिभर्त्ति कश्चित् ॥ ४६ ॥
तेभ्यः परान्नः परिभावयस्व
श्रिया विदूरीकृतकामदेवान् ।

कोऽप्यश्विनीकुमारोनेत्यर्थः त्वया पुरूरवःप्रभृतिचतुष्टयविषयकः प्रश्नः कृतस्तेषां मध्ये न कोऽपि वयमितिभावः अथच इलायां भूम्यां अस्माकं मध्ये कस्यापि उत्पत्तिर्नाभूत् वयं न भूमिजाताः किन्तु स्वर्गीयादेवा इत्यर्थः तथा तव समीपे स्थिताः सन्तोऽदर्पकास्त्वदीयसौन्दर्य्यतिरस्कृत त्वाद्दर्पशून्याः स्मः तथा अस्माकं कश्चित् असत्यतां अलीकभाषकतां न बिभर्त्तीति न अपितु सद्रूपधारकाश्चवयमसत्याश्चेत्यर्थः इत्थं तेषामपि कोऽनिजपरिचयोध्वनितः यदित्थमयं प्रथमावड्वचनान्तं अत्र प्रश्नोत्त रभूतश्लोकद्वये वक्रोक्त्यलङ्कारोज्ञेयः । अन्यस्यान्यार्थकं वाक्यमन्यथा योजयेद्यदि । अन्यः श्लेषेण काक्वा वा सा वक्रोक्तिस्ततोद्विधेति लक्षणात् इलोर्व्वीवाग्वुधस्त्री गौरिति हेमचन्द्रः ॥ ४६ ॥

तर्हिं के यूयमित्याशङ्क्याह ॥ तेभ्यइति ॥ श्रिया शोभया विदूरीकृतस्ति रस्कृतः कामदेवोयैस्तादृशान्नोऽस्मान् तेभ्यऐलादिभ्यः परानन्यान् परि भावयस्व जानीहि वयं ऐलादिभ्योभिन्नाः कोऽपि जना इति सामान्यतो जानीहीत्यर्थः अत्रागमने कारणमाह अस्मिन् समाजे सभायां बहुषु राजसु विषये भ्रमन्ती असौ भैमी किम सम्भावनायां अस्मासु घटिष्यते योगं यास्यतीतिदुराशयाऽऽगतावयमित्यर्थः अथच हे श्रिया सौन्द र्य्येण विदूरीकृतकाम जितमन्मथनल तेभ्यः परान् अस्मान् देवान् परि भावयस्व तथा अस्मिन् समाजे बहुषु पक्षसु सदृशेषु भ्रमन्ती मुह्यन्ती

Digitized by Google

अस्मिन् समाजे बहुषु भ्रमन्ती
भैमी किलास्मासु घटिष्यतेऽसौ ॥ ४७ ॥
असाम यन्नाम तवेह रूपं
स्वेनाधिगत्य श्रितमुग्धभावाः ।

भैमी अस्मासु मध्ये कस्मिंश्चित् घटिष्यते वयं देवा भैमीवरणार्थमागताइतिभ्रमिः । घटिष्यतइतियुजादित्वादत्र चिन्त्यभावः ॥ ४७ ॥

असामेति ॥ हे नरेन्द्र नाम प्राकाश्ये वयं स्वेन साक्षादात्मनैव नतु परेण तव रूपं सौन्दर्य्यं अधिगत्य ज्ञात्वा दृष्ट्वा श्रितोधृतो मुग्धभावो मूढता यैस्तादृशाः सन्तोयद्यस्मात् इह सभायां असाम तिष्ठाम तत्तस्मात् नोऽस्माकं आशया प्रत्याशामात्रेण पतितां भैमीपतित्वं धिक् सा निन्दनीया अस्तु आशया भैमीप्राप्तिदुराशया आपतितान् आगतान् नोऽस्मान् धिगितिवा तथा अस्माकं इदं विबुधत्वं पण्डितत्वञ्च धिगस्तु यतोवयं तव सौन्दर्य्यमात्रदर्शनेनैव विमूढाजाता अतोऽस्माकं दुराशया आगमनं पण्डितत्वञ्च वृथैवेत्यर्थः अथच स्वेन आत्मशरीरेण तव रूपं स्वरूपं अधिगत्य प्राप्यैव श्रितमुग्धभावा अङ्गीकृतसौन्दर्य्याः सन्तोयतइह असाम दीप्याम तत्तस्मात् अस्माकं आशापतितां दिक्पतित्वं धिक् तथा विबुधत्वं देवत्वञ्च धिगस्तु यतोवयं तव शरीरं गृहीत्वा सुन्दराजाता अतोवयं वृथैव दिक्पाला देवाश्चेत्यर्थः। स्वे आत्मनि तव रूपं नाधिगत्य श्रितमुग्धभावाः सन्तोयदिह असामेतिवा स्वेन तवरूपं अधिगत्य श्रितमुग्धभावाः सन्तोयदिह तव नाम एको नलएव भैमीवरणयोग्यइति प्रसिद्धिं असाम नाशितवन्तइत्यपिवा हे स्वेन धनानां स्वामिन् नरेन्द्रेत्यपि व्याचक्षते ॥

तस्मोधिगाम्पपतिताम्परेन्द्र

धिक्चेदमस्माद्विबुधत्वमस्तु ॥ ४८ ॥

सा वागवस्मायितमां नलेन

तेषामनाघ्रातवाक्छलेन ।

स्वीरत्नलाभे।चितयत्नमस्य

मेनं नहि स्म प्रतिभाति किञ्चित् ॥ ४९ ॥

यः स्पर्द्धया येन निजप्रतिष्ठां

लिप्सुः स एवाह तदुन्नतत्वं ।

असामेति असभुवीत्यस्य असगतिकान्तिदीप्यादानेष्वित्यस्य च लोटउ

त्तमपुरुषबहुवचनेन रूपं मस्ते मोटन्नासेत्यस्य लुङि रूपं ॥ ४८ ॥

नलेन पुनस्तद्वचनानां यथाश्रुतोवाच्यार्थएव प्रतीतोनतु व्यङ्ग्यार्थ इत्याह ॥ सेति ॥ अनाघ्रातं अनाकलितं देवानां वाक्छलं द्वितीयार्थ व्यङ्ग्यं वाक्चापल्यं येन तादृशेन नलेन तेषां देवानां सा पूर्वोक्ता वाक् अवस्मायितमां अतिशयेनावस्नाता द्वितीयार्थानुसन्धानाभावेन श्रु ताप्यश्रुतावत् विहितेत्यर्थः हि यस्मात् स्त्रीरत्नस्य भैम्यालाभे उचितोयो ग्योयोयत्नउपायस्तच मम तत्परमेनं नलं प्रति अद्यीकत्य किञ्चित् कि मपि न भाति नस्फुरति भैमीप्राप्त्युपायान्वेषणव्यग्रतया तैः कथितमपि देवत्वं न ज्ञातमितिभावः ॥ ४९ ॥

अवस्मायां कारणान्तरमप्याह ॥ यइति ॥ योजनः येन जनेन सह स्पर्द्धया निजप्रतिष्ठां स्वस्य गौरवं लिप्सुर्लब्धुमिच्छुर्भवति सएव जनोथ

Digitized by Google

कः स्पर्द्धितुः स्वाभिहितस्वहाने
स्थानेऽवहेलां बहुलां न कुर्य्यात् ॥ ५० ॥
गीर्द्देवतागीतयशःप्रशस्तिः
श्रिया तडित्वल्ललिताभिनेता ।
मुदा तदावैक्षत केशवस्तं
स्वयम्बराडम्बरमम्बरस्थः ॥ ५१ ॥

स्मात् तस्य उन्नतत्वं तस्मादाधिक्यं आह कथयति तस्मात् स्वेनैव अभिहिता उक्ता स्वस्य हानिर्न्यूनता येन तादृशस्य स्पर्द्धितुः सम्बन्धे बहुलां अधिकतरां अवहेलां अवज्ञां स्थाने युक्तं कोजनोन कुर्य्यात् अपितु सर्व्वं एवकरोति प्रकृते भैम्यर्थं नलरूपं धारयद्भिर्द्देवैर्नलस्यैवाधिकता स्वस्य च न्यूनता व्यक्तीकृता तस्मात्तेनैव नलेन तेषामवज्ञा युक्तैव कृतेति भावः ॥ ५० ॥

अथ सभायां सरस्वत्यागमनं वर्णयितुं लक्ष्मीसरस्वतीसहितस्य नारायणस्याऽऽगमनं वर्णयति ॥ गीर्द्देवतेति ॥ केशवो नारायणस्तदा तस्मिन् समये अम्बरस्थ आकाशमार्गस्थितः सन् मुदा हर्षेण तं स्वयम्बरस्य आडम्बरं समारम्भं अवैक्षत ददर्श किम्भूतः गीर्द्देवतया सरस्वत्या गीता यशसः प्रशस्तिर्बर्णोयस्य स तथा श्रिया लक्ष्म्या तडित्वतोविद्युत् सहितमेघस्य यत् ललितं विलासस्तस्य अभिनेता अभिनयं कुर्व्वाणः स्वयम्बरदर्शनार्थं कौतुकेन लक्ष्मीसरस्वतीसहितोनारायणस्तत्रागतवानिति भावः आडम्बरः समारम्भे गजगर्जिततूर्य्ययोरिति विश्वः ॥ ५१ ॥

Digitized by Google

अष्टौ तदाष्टासु हरित्सु दृष्टीः
सदोदिदृक्षुर्निदिदेश देवः।
लैङ्गीमदृष्ट्वापि शिरःश्रियं यो
दृष्टौ मृषावादितकेतकीकः ॥ ५२ ॥

एकेन पश्यन्निपदात्मनाद्रिं
चक्षुर्मुरारेरभवत् परेण।

अत्रापि तत्कौतुकदर्शनार्थं तत्रागतवानित्याह ॥ अष्टाविति ॥ स दे वः सदः स्वयम्वरसभां दिदृक्षुर्द्रष्टुमिच्छुः सन् तदा तस्मिन् समये सभायामष्टासु हरित्सु दिक्षु अष्टौ दृष्टीः चतुर्मुखत्वात् अष्टौ चक्षूंषि निदिदेश प्रेरितवान् अष्टाभिश्चक्षुर्भिरेकदैव समाजशोभां द्रष्टुमित्यर्थः एक दैव स्वयम्वरशोभादर्शनात् तस्याष्टौ चक्षूंषि सफलानि जातानीति भावः स कः योदेवः लैङ्गीं लिङ्गरूपशिवसम्बन्धिनीं शिरःश्रियं मस्तकशोभां अदृष्ट्वापि अविलोक्यापि दृष्टौ लिङ्गशिरोदर्शनविषये मृषावादिता मिथ्याभाषणं कारिता कूटसाक्षिणी कृता केतकी येन तादृशः अस्येतिभावः पुरा किल महत्त्वे विवदमानौ विष्णुब्रह्माणौ शिवलिङ्गस्य पादौ शिरश्च विलोकयितुं पातालं सत्यलोकञ्च गतौ अनन्तरं पातालं गत्वा चरणावदृष्ट्वा विष्णुर्मया चरणौ नदृष्टावित्ति सत्यमेव देवसभायामुक्तवान् ब्रह्मापि शिरः सीमां नापश्यत् किन्तु वायुना शिरसः पतन्तीं केतकीं गृहीत्वा शिरोदृष्टमिति देवसभायां मृषोक्तवान् तत्र साक्षित्वेन इयमानीतेति ब्रह्मणा केतकी कूटसाक्षिणी कृतेति पुराणवार्त्ता ॥ ५२ ॥

निरन्तरं भ्रमन्तौ सूर्य्याचन्द्रमसावपि स्वयम्वरशोभां द्रष्टुमागतावित्याह श्लोकद्वयेन ॥ एकेनेति ॥ द्वादश आत्मानो मूर्त्तयो यस्य स द्वादशात्मा

तैर्द्वादशात्मा दशभिस्तु शेष
र्दिशोदशालोकन लोकपूर्णाः ॥ ५३ ॥
प्रदक्षिणं दैवतसद्म्मर्म्यमद्रिं
सदैव कुर्व्वन्नपि शर्व्वरीशः ।
द्रष्टा महेन्द्रानुजदक्षिमूर्त्त्या
न प्राप तद्दर्शनविप्नतापं ॥ ५४ ॥

सूर्य्यएकेनात्मना अद्रिं सुमेरुं पर्य्यक्षिपत् प्रदक्षिणीचकार परेण अन्येन आत्मना मुरारेः स्वयम्बरशोभां पश्यतोनारायणस्य च दक्षिणनयनं अभवत् शेषैरवशिष्टैस्तै दशभिरात्मभिस्तु लोकैर्जनैः पूर्णा दशदिश आलोकत दशभिर्मूर्त्तिभिर्दशसु दिक्षु स्थितानां लोकानां धर्म्माधर्म्मकृत्यानि दृष्ट वानित्यर्थः नारायणस्य चक्षुर्भूत्वा स्वयम्बरशोभां ददर्शेति प्रस्तुतं अपर दयं प्रासङ्गिकं । निरन्तरभ्रमणशीलस्य मम कथं दशदिग्भवजनवृत्तान्त परिज्ञानं मेरुप्रदक्षिणं भाविभमीस्वयम्बरदर्शनञ्च भविष्यतीति पुरा विविच्यैव सूर्य्यः किं द्वादशात्मा एकेनात्मना नारायणचक्षुश्चाभवदित्यु त्प्रेक्षात्र ध्वन्यते ॥ सूरसूर्य्यार्य्यमादित्यद्वादशात्मदिवाकराइत्यमरः ॥५३॥

प्रदक्षिणमिति ॥ सर्व्वरीशश्चन्द्रः सदैव सर्व्वस्मिन् कालएव दैवतानां सद्म्मर्म्यं निवासस्थानं अद्रिं सुमेरुं प्रदक्षिणं कुर्व्वन्नपि महेन्द्रानुजस्य नारा यणस्य दक्षिमूर्त्त्या वामनयनरूपेण देहेन कृत्वा द्रष्टा पश्यन् सन् तस्य स्वयम्बरस्य दर्शने योविघ्नस्तेन तापं दुःखं न प्राप चन्द्रोऽपि नारायणचक्षु र्भूत्वा स्वयम्बरशोभां ददर्शेत्यर्थः ॥ ५४ ॥

Digitized by Google

आलोकमाना वरलोकलक्ष्मी
मुत्का विकीर्णाप्सरसो रसोत्काः ।
जनाम्बुधौ तत्र निजाननानि
वितेनुरम्भोरुहकाननानि ॥ ५५ ॥
न यक्षलक्षैः किमलक्षि नो सा
सिद्धैः किमध्यासि सभाप्तशोभा ।
सा किन्नरैः किं न रसादसेवि
नादर्शि हर्षेण महर्षिभिर्व्वा ॥ ५६ ॥

तद्दर्शनार्थं अप्सरसोऽपि सभायामाजग्मुरित्याह ॥ आलोकेति ॥ रसेनानुरागेणैव उत्का उत्कण्ठिताः सत्यस्तात्कालिकीं स्वयम्वरसमयजातां वरलोकानां विवाहार्थमुपस्थितानां राज्ञां लक्ष्मीं शोभां आलोकमानाः पश्यन्त्योऽप्सरसः स्वर्व्वेश्यास्तत्र जनाम्बुधौ जनसमूहरूपसमुद्रे निजाननानि स्वीयमुखानि अम्भोरुहकाननानि कमलवनानि वितेनुश्चक्रुः अन्यत्रापि जलाशये कमलवनानि भवन्त्येव अप्सरसोऽपि समाजमाजग्मुरितिभावः ॥ ५५ ॥

नेति ॥ आप्ता प्राप्ता शोभा यया तादृशी सा सभा यक्षलक्षैर्यक्षसमूहैः किं न अलक्षि न दृष्टा अपितु अलक्ष्येव तथा सिद्धैः सिद्धगणैर्व्वा सा किं नो अध्यासि नाधिष्ठिता अपितु अध्यास्येव तथा रसादनुरागात्सा किन्नरैः किं नासेवि न सेविता अपितु असेव्येव तथा महर्षिभिर्व्वशिष्ठैर्व्वा हर्षेण सा नादर्शि न दृष्टा अपितु अदर्श्येव ॥ ५६ ॥

Digitized by Google

वाल्मीकिरश्लाघत तामनेक
शाखत्रयीभूरुहराजिभाजा।
क्लेशं विना कण्ठपथेन यस्य
दैवी दिवः प्रागभुवमागमद्वाक्॥ ५७॥
प्राशंसि संसद्गुरुणापि चार्व्वी
चार्व्वाकतासर्व्वविदूषकेण।

वाल्मीकिरिति। स वाल्मीकिस्तां सभां अश्लाघत स्तुतवान् स कः दैवी वाक् पद्यमयी संस्कृता वाणी यस्य कण्ठपथेन कण्ठमार्गेण क्लेशं विना अनायासेन दिवः स्वर्गात् प्राक् प्रथमं भुवं पृथ्वीं आगमत् आगता प्रथमं भूमौ यः पद्यमयसंस्कृतप्रवर्त्तक इत्यर्थः किंभूतेन कण्ठपथेन अनेकाः शाखाश्वलायनादयो यस्यास्तादृशी या त्रयी त्रिवेदी सैव भूरुहराजि वृक्षश्रेणी तां भजत इति तादृशेन सशाखवेदत्रयपाठकेनेत्यर्थः अन्यो ऽपि बहुशाखवृक्षश्रेणीयुक्तमार्गेण दूरादप्यनायासेन आगच्छति वाल्मीकिमुनिरपि तथागतवानिति भावः। शाखा द्रुमांशे वेदांशे भुजे पक्षान्तरेऽन्तिके इति हेमचन्द्रः। ५७।

प्राशंसीति। चार्व्वाकतया नास्तिकतया सर्व्वेषां वेदादीनां विदूषकेणापि खण्डकेनापि तेन गुरुणा बृहस्पतिना चार्व्वी अतिमनोज्ञा सा संसत्सभा प्राशंसि स्तुता यदीयां यत्सम्बन्धिनीं रसनां जिह्वां वाचामधिदेवतायाः सरस्वत्यास्थानपट्टं सभासिंहासनं अहं जानामि मन्ये तस्य जिह्वाग्रे सदा सरस्वती वसतीत्यर्थः बृहस्पतिरपि तथागत इति

Digitized by Google

आख्यानपङ्कं रसनां यदीयां
जानामि वाचामधिदेवतायाः ॥ ५८ ॥
नाकेऽपि दीव्यत्तमदिव्यवाचि
वचःस्रगाचार्य्यकवित् कविर्य्यः।
दैतेयनीतेः पथि सार्थवाहः
काव्यः स काव्येन सभामभाणीत् ॥ ५९ ॥
अमेलयद्भीमनृपः परं न
नाकर्षदेतान् दमनस्वसैव।

भावः। पुरा किल असुरमोहनार्थं बृहस्पतिना चार्व्वाकशास्त्रं प्रणीय वेदादि दूषितं ॥ ५८ ॥

नाकेऽपीति ॥ स काव्यः शुक्रः काव्येन तद्दोषो शब्दार्थावित्यादि लक्षणाक्रान्तेन प्रबन्धविशेषेण सभां अभाणीत् अवर्णयत् स कः यः दीव्य त्तमा अतिशयेन दीव्यन्ती शोभमाना दिव्या संस्कृता वाक् यत्र तादृशेऽपि नाके स्वर्गे यः कविः कवित्वेन ख्यातः यत्र स्वर्गे सर्व्वेऽपि कवयस्तथापि प्राधान्यात् कवित्वेन प्रसिद्ध इत्यर्थः किम्भूतः यतो वचःस्रजि वचन मालागुम्फने विषये आचार्य्यकं कौशलं वेत्तीति तादृशः तथा दैतेय नीतेर्दैत्यानां नीतिशास्त्रस्य पथि मार्गे सार्थवाहः मार्गप्रदर्शकः दैत्या नां नीतिशास्त्रप्रवर्त्तक इत्यर्थः सुरासुराणां मान्यः शुक्रोऽपि तत्रागत इति भावः ॥ ५९ ॥

शुक्रवर्णितं काव्यमेवाह ॥ अमेलयदिति ॥ भीमनृपः परं केवलं एतान् यूनोऽनामेलयत् भैमीस्वयम्वरार्थं नानीतवान् तथा दमनस्वसैव भैम्येव परं एतान् नाकर्षत् स्वसौन्दर्य्यादिगुणेन नाकृष्टवती किन्तु विधा तापि एतान् यूनोविचित्य एकदेशीकृत्य इदं सर्व्वस्वं एताव

इदं विधातापि विचित्य यूनः
स्वशिल्पसर्व्वस्वमदर्शयन्नः ॥ ९० ॥
एकाकिभावेन पुरा पुरारि
र्यः पञ्चतां पञ्चशरं निनाय ।
तद्भीसमाधानममुष्य काय
निकायलीलाः किममी युवानः ॥ ९१ ॥
पूर्णेन्दुविम्बाननुमासभिन्ना
नस्थापयत् क्वापि निधाय वेधाः ।

न्मम विज्ञानकौशलमिति नोऽस्मान् अदर्शयत् दर्शितवान् इदं अत्यन्त सभीत्कर्षलक्षणवस्तुध्वन्यात्मकं काव्यं ॥ ९० ॥

एकाकीति । पुरा पूर्व्वं यः पुरारिः शिवः एकाकिभावेन एकाकित्वेन असहायत्वेन हेतुना पञ्चशरं कामं पञ्चतां मरणं निनाय मारयतिस्म किमुत्प्रेक्षे अमुष्य पञ्चशरस्य कायनिकायलीलाः शरीरव्यूहविलसित रूपाअमी युवानः किं अतस्तस्मात् शिवाद्भियो भयस्य समाधानं प्रतीकार रोजातः पूर्व्वमेकत्वान्मम शिवेन तथाकृतं इति विचिन्त्य कामेन राज समूहरूपः कायव्यूहः कृतस्तस्मादधुना बहुत्वात्तद्भीतिर्नास्तीत्यर्थः अत्र उत्प्रेक्षालङ्कारेण सभाश्रिता राजानः कामसदृशा इत्युपमा ध्वन्यते तस्मादिदमलङ्कारेणालङ्कारध्वन्यात्मकं काव्यं ॥ ९१ ॥

पूर्णेन्दुविम्बानिति । शिल्पी निर्म्माणकुशलोवेधा विधाता अनुमासं मासि मासि भिन्नान् पृथग्भूतान् पूर्णेन्दुविम्बान् पूर्णचन्द्रमण्डलान् क्वा पि कुत्रापि देशे निधाय तिरोहितीकृत्य अस्थापयत् रक्षितवान् तैरेव रक्षितैः पूर्णेन्दुविम्बैः कृत्वा अमीषां राज्ञां लावण्यमयानि सौन्दर्य्य वन्ति मुखानि निरमात् निर्म्मितवान् इत्यहं मन्ये सम्भावयामि अन्योऽपि

Digitized by Google

तैरेव शिल्पी निरमादमीषां
मुखानि लावण्यमयानि मन्ये ॥ ६२ ॥
मुधार्पितं मूर्द्धसु रत्नमेतै
र्यन्नाम तानि स्वयमेतएव ।
स्वतः प्रकाशे परमात्मबोधे
बोधान्तरं न स्फुरणार्थमर्थ्यं ॥ ६३ ॥
प्रवेक्ष्यतः सुन्दरवृन्दमुच्चै
रिदं मुदा चेदितरेतरं तत् ।

शिल्पी सुन्दरवस्तूनि सङ्गृह्य किमपि सुन्दरं वस्तु निर्माति । अत्रापि पूर्ववद्भङ्गिः ॥ ६२ ॥

मुधेति ॥ एतैराजभिर्मुधा मिथ्या मूर्द्धसु मस्तकेषु रत्नं अर्पितं निहितं यद्यस्मात् एते राजानएव स्वयं तानि रत्नानि नाम प्रसिद्धानि रत्नभूतानां तेषामुपरि रत्नान्तरधारणं व्यर्थमित्यर्थः इदमर्थान्तरन्यासेन द्रढयति स्वतःप्रकाशे स्वप्रकाशे परमात्मनेबोधे ब्रह्मसाक्षात्कारे सति स्फुरणार्थं तत्प्रकाशार्थं बोधान्तरं ज्ञानान्तरं अर्थ्यं सप्रयोजनं न भवति यथा ब्रह्मतत्त्वबोधस्य स्वप्रकाशत्वात् तस्मिन् जाते सति तत्प्रकाशकज्ञानान्तरान्वेषणं व्यर्थं तथा रत्नभूतानां तेषां शिरसि रत्नान्तरारोपणं व्यर्थमित्यर्थः अतिसुन्दराएते इति भावः ब्रह्मबोधस्य स्वप्रकाशत्वं वेदान्तादिषु प्रसिद्धं ॥ ६३ ॥

प्रवेक्ष्यत इति ॥ एतौ अश्विनीकुमारौ चेद्यदि उच्चैर्मुदा अतिहर्षेण इदं सुन्दराणां राज्ञां वृन्दं समूहं प्रवेक्ष्यतः एषां मध्ये प्रविष्टौ भविष्यतः तत्तदा विमिश्रौ मिलितौ सन्तौ तौ वत्सराणां सहस्रैरपि इतरेतरं परस्परं बन्धयितुं परिचेतुं न शक्ष्यतः शक्तौ न भविष्यतः अयं मे भ्रा

न शक्नुतोऽलक्षयितुं विभिन्नौ
दृष्टौ सदस्यैरपि वत्सराणां ॥ ६४ ॥
स्थितैरियद्भिर्युवभिर्विदग्धै
र्दग्धेऽपि कामे जगतः क्षतिः का ।
एकाम्बुविन्दुव्ययमम्बुराशेः
पूर्णस्य कः शंसति शोषदोषं ॥ ६५ ॥
इति स्तुवन् झङ्कृतिवन्द्नाभि
र्गन्धर्व्ववर्गेण स गायतेव ॥ ।

ता इति परस्परं ज्ञातुमसमर्थौ भविष्यत इत्यर्थः अत्र स्थिताः सर्व्वे अश्विनीकुमारतुल्या इति भावः ॥ ६४ ॥

स्थितैरिति ॥ विदग्धैर्नागरैरयच्च दाहरहितैरियद्भिरेतावद्भिः स्थितैर्विद्यमानैर्युवभिर्हेतुभिः कामे एकस्मिन् कन्दर्पे दग्धेऽपि हरन यनानलेन भस्मीकृतेऽपि जगतो भुवनस्य का क्षतिः का हानिः अपितु कामसदृशानामेतेषां बहूनां स्थितत्वात् न कापि हानिरित्यर्थः एतदेव अर्थान्तरन्यासेन समर्थयते कोजनः पूर्णस्य अम्बुराशेः समुद्रस्य एकस्य अम्बुविन्दोर्जलकणस्य व्ययं अपगमं शोषदोषं शोषरूपं दोषं शंसति कथयति अपितु एकाम्बुविन्दुव्ययेऽपि समुद्रः शुष्क इति न कोऽपि वद तीत्यर्थः अत्रस्थाः सर्व्वे कामसदृशा इति भावः ॥ ६५ ॥

इतीति ॥ इति पूर्व्वोक्तप्रकारेण स्तुवन् सभां प्रशंसन् स कान्यः गायतेव गानं कुर्व्वतेव गन्धर्व्वाणां वर्गेण समूहेन झङ्कृतिवन्द्नाभि र्झङ्कारोच्चारणैः कृत्वा अन्यमानि अनुमतः गानमध्ये जयकार्ये क्षमिति

ओङ्कारभूम्ना पठतैव वेदान्
महर्षिवृन्देन तयाभ्यमानि ॥ ६६ ॥
न्यवीविशत्तानथ राजसिंहान्
सिंहासनौघेषु विदर्भराजः ।
शृङ्गेषु यत्र त्रिदशैरिवैभि
रशोभि कार्त्तस्वरभूधरस्य ॥ ६७ ॥
विचिन्त्य नानाभुवनागतांस्ता
नमर्त्यसंकीर्त्यचरित्रगोत्रान् ।

शब्दः क्रियते तेनैव समीचीनं वदतीति गन्धर्व्वैः स शुक्राचार्य्योऽनुमत इत्यर्थः तथा वेदान् पठतैव वेदपाठं कुर्व्वतैव महर्षिवृन्देन महर्षिस मूहेन ओङ्कारस्य भूम्ना बाहुल्येन ज्ञाता अभ्यमानि वेदमध्ये ओङ्काराः सन्ति तएव क्वचित् स्वीकारार्थाभवन्ति तेषामुच्चारणेनैव महर्षिभिः शुक्रोऽनुमतइत्यर्थः । ओमित्यनुमतौ प्रोक्तं प्रणवे चाप्युपक्रमे इति धरणिः ॥ ६६ ॥

न्यवीविशदिति ॥ अथानन्तरं विदर्भराजोभीमः सिंहासनौघेषु भद्रा सनसमूहेषु तान् राजसिंहान् राजश्रेष्ठान् न्यवीविशत् निवेशयामास यत्र सिंहासनौघेषु उपविष्टैरेभीराजसिंहैः कार्त्तस्वरभूधरस्य स्वर्णाचलस्य सुमेरोः शृङ्गेषु शिखरेषु उपविष्टैस्त्रिदशैर्देवैरिव अशो भि शोभितं एतेन सिंहासनानामत्युच्चत्वं स्वर्णमयत्वञ्च राज्ञाञ्च देवतु ल्यत्वं सूचितं । रुक्मं कार्त्तस्वरं जाम्बूनदमष्टापदोऽस्त्रियामित्यमरः ॥ ६७॥

विचिन्त्येति ॥ तेन क्षितिपेन भीमेन नानाभुवनेभ्यआगतान् तान् राजसिंहान् अमर्त्येन मर्त्यानां सर्व्वज्ञत्वाभावात् तद्भिन्नेन देवेन कीर्त्यानि

कथ्याः कथङ्कारममी सुतायां
मिति व्यषादि क्षितिपेन तेन॥९८॥
श्रद्धालुसङ्कल्पितकल्पनायां
कल्पद्रुमस्याथ रथाङ्गपाणेः।
तदाकुलोऽसौ कुलदैवतस्य
स्मृतिं ततान क्षणमतानः ॥९९॥

वर्णनीयानि चरित्रगोत्राणि कर्मकुलनामानि येषां तथाविधान्
विचिन्त्य अमी राजसिंहाः सुतायां भैम्यां कथङ्कारं केन प्रकारेण कथ्याः
अन्यैः कथनीया इत्येवं मत्वा व्यषादि विषण्णं येषां चरित्रादीनि देवा
एव जानन्ति ते कथं मनुष्यैः कथनीयाः चरित्राद्यज्ञाने च भैम्याः
कथं वरणे प्रवृत्तिर्भवेदिति विचार्य भीमोविषण्णोजातइत्यर्थः। कथ
ङ्कारमिति णमन्तात् कथमित्थमेवमन्यथाभ्य इति ण्वम्। गोत्रा भूग
व्ययोर्गोत्रः शैले गोत्रं कुलाख्ययोरिति मेदिनी॥९८॥

श्रद्धाल्विति॥ अथानन्तरं तदा तत्समये आकुल इतिकर्त्तव्यतामूढो
ऽसौ भीमएकतानोऽनन्यमनाः सन् कुलदैवतस्य वंशपरम्परोपासितस्य
रथाङ्गपाणेश्चक्रपाणेर्नारायणस्य स्मृतिं स्मरणं क्षणं व्याप्य ततान
चकार किम्भूतस्य यतः श्रद्धालुना श्रद्धायुक्तेन भक्तेन यत्सङ्कल्पितं अभिल
षितं वस्तु तस्य कल्पनायां सिद्धौ कल्पद्रुमस्य कल्पवृक्षसदृशस्य कल्प
वृक्षोयथा याचकानां अभिलाषं पूरयति अयमपि श्रद्धावतां भक्तानां
तथेत्यर्थः क्वचित् तदाकुलेत्यत्र तत्राकुलेति कल्पनायामित्यत्र भावनाया
मिति च पाठः॥९९॥

Digitized by Google

तच्चिन्तनानन्तरमेव देवः
सरस्वतीं सस्मितमाह स स्म।
स्वयम्वरे राजकगोत्रवृत्त
वक्त्रीमिह त्वां करवाणि वाणि॥ ७०॥
कुलञ्च शीलञ्च बलञ्च राज्ञां
जानासि नानाभुवनागतानां।
एषामतस्त्वं भव वावदूका
मूकायितुं कः समयस्तवायं॥ ७१॥
जगत्त्रयीपण्डितमण्डितेयं
सभा न भूता न च भाविनी वा।

तच्चिन्तनेति॥ तच्चिन्तनस्य भीमजार्त्तस्मरणस्य अनन्तरमेव स देवो नारायणः सस्मितं सहास्यं यथा तथा सरस्वतीं आह स्म वक्ष्यमाणमुवाच किमाहेत्याह हे वाणि सरस्वति त्वां इह स्वयम्वरे राजकस्य राजसमूहस्य गोत्रवृत्तानां कुलनामचरित्राणां वक्त्रीं वर्णयित्रीं करवाणि करोमि भैम्या विज्ञानाय राजसमूहवर्णनार्थं त्वया स्वयम्वरे गन्तव्यमिति त्वां प्रेरयामीत्यर्थः॥ ७०॥

कुलञ्चेति॥ हे सरस्वति त्वं नानाभुवनेभ्य आगतानां राज्ञां कुलञ्च शीलञ्च बलञ्च जानासि अतो हेतोस्त्वं त्वमेव एषां राज्ञां कुलादीनाम् वावदूका अतिशयेन वक्त्री भव तव मूकायितुं मूकीभवितुं तूष्णीं स्थातुं अयं कः समयोऽवसरः अपितु वक्तुमेवायं समय इत्यर्थः कुलञ्चेत्यादौ च काराः परस्परसमुच्चयार्था राज्ञामित्यत्र यूनामिति क्वचित् पाठः॥७१॥

जगत्त्रयीति॥ हे सरस्वति यतो जगत्त्रय्यास्त्रयाणां जगतां पण्डितैर्मण्डिता शोभिता अत इयं ईदृशी सभा न भूता पूर्वं कुत्रापि न जाता

Digitized by Google

राज्ञां गुणख्यापनकैतवेन
सङ्ख्यावतः श्रावय वाङ्मुखानि ॥ ७२ ॥
इतीरिता नञ्चरणात् परागं
गीर्व्वाणचूडामणिमृष्टशेषं ।
तस्य प्रसादेन सदाज्ञयासा
वादाय मूर्द्ध्नादरिणी बभार ॥ ७३ ॥
मध्येसभं सावततार बाला
गन्धर्व्वविद्यामयकण्ठनाला ।

न च नपुनर्भाविनी भविष्यति च तस्मादत्र राज्ञां गुणख्यापनस्य गुण बोधनस्य कैतवेनच्छलेन संख्यावतः पण्डितान् वाङ्मुखानि उपन्यासान् श्रावय। संख्यावान् पण्डितः कविरिति उपन्यासस्तु वाङ्मुखमिति चामरः ॥ ७२ ॥

इतीति ॥ इति पूर्व्वोक्तप्रकारेण ईरिता नारायणेनोक्ता असौ सरस्वती आदरिणी तद्गुतौ आदरवती सती तस्य नारायणस्य चरणात् गीर्व्वाणानां देवानां चूडामणिभिः शिरोरत्नैर्मृष्टस्य प्रोञ्छितस्य शेषमवशिष्टं परागं धूलिं अथ च चरणस्य पद्मतुल्यत्वात् कौसुमं रजः तस्य आज्ञया त्वया स्वयम्बरे गन्तव्यमिति निदेशरूपेण प्रसादेन सह आदाय गृहीत्वा मूर्द्ध्ना मस्तकेन बभार धृतवती महानयं प्रसादइति तदाज्ञा मङ्गीचकारेत्यर्थः। परागश्चन्दने रेणौ गिरौ ख्यात्युपरागयोः। स्नानीय पुष्परजसोरिति हेमचन्द्रः ॥ ७३ ॥

मध्येसभमिति ॥ सा सरस्वती बाला बालिका सती बालस्त्रीरूपं धारयन्ती सती मध्येसभं सभामध्ये अवततार अवतीर्णा बभूव

Digitized by Google

त्रयीमयीभूतवलीविभङ्गा
साहित्यनिर्व्वर्त्तितदृक्तरङ्गा ॥ ७४ ॥
आसीदथर्व्वा त्रिवलित्रिवेदी
मूलादिनिर्गत्य वितायमाना।

किम्भूता गन्धर्व्वविद्या गीतकला तन्मयं तदङ्गं अथच तत्स्वरूपं कण्ठनालं यस्याः सा गानप्रबोधककण्ठनालेत्यर्थः तथा त्रयी त्रित्वसंख्या अथ च त्रिवेदी अत्रयीमयस्त्रयीमयीभूतोवलीविभङ्गोवलीविन्यासो यस्याः सा तथा साहित्येन शृङ्गारादिरसवर्णसंमेलनेन अथच काव्य शास्त्रेण निर्व्वर्त्तितोनिष्पादितोदृक्तरङ्गः कटाक्षविक्षेपोयस्याः सा। साहित्येन यौगपद्येन निर्व्वर्त्तिता दृक्तरङ्गा यस्याःसा दृष्टी सर्व्वेषां मातृ भावेन सहैव निरीक्षणं नतु कटाक्षेणेति भावइति केचित् कण्ठस्य नालत्वेन मुखस्य पद्मतुल्यत्वं ध्वनितं मध्येसभमिति पारेमध्ये षष्ठ्या वेति अव्ययीभावनिपातितं ॥ ७४ ॥

चतुर्द्दशभिः श्लोकैर्वेदादिविद्यामयं सरस्वतीस्वरूपमेव वर्णयति ॥ आसीदिति ॥ अथर्व्वा श्रुतिरथर्व्ववेदः यदीया यत्सम्बन्धिनी उदर रोमलेखा उदरवर्त्तिरोमावलिरासीत् किम्भूता त्रिवलिर्व्वलित्रयरूपा या त्रिवेदी ऋग्यजुःसामरूपा तस्याम्मूलात् मूलात् विनिर्गत्य ब्रह्मणा विनिर्गमय्य वितायमाना विस्तार्य्यमाणा ब्रह्मणा त्रिवेदीमध्यादाकृष्याऽथ र्व्ववेदः पृथक्कृत इति प्रसिद्धिः तथा नानाभिचारेषु षट्सु मारणोच्चा टनादिकर्म्मसु उचिता पापाधिक्यात् श्यामा मेचका श्यामा श्रीः

Digitized by Google

नानाभिचारोचितमेचकश्रीः
श्रुतिर्यदीयोदररोमलेखा ॥ ७५ ॥
शिक्षैव साक्षाच्चरितं यदीयं
कल्पश्रिया कल्पविधिर्यदीयः ।
यस्याः समस्तार्थनिरुक्तिरूपै
र्निरुक्तिविद्या खलु पर्य्यणंसीत् ॥ ७६ ॥

शोभा यस्यास्तादृशी अथच नानाभिचारोचितमेचकश्रीर्न किन्तु नाभिगमनोचितमेचकश्रीरिव अथर्व्ववेदे नानाभिचारविधयः सन्ति तस्य च श्यामत्वं पुराणादौ वर्णितं॥ ७५ ॥

शिक्षैवेति॥ यदीयं चरितं आचरणं साक्षात् शिक्षैव वेदाङ्गविशेष एव अथच साक्षात् लोकानां उपदेश एव तथा कल्पस्य वेदाङ्गविशेषस्य श्रिया शोभया कृत्वा यदीयः कल्पविधिः कल्पस्य विधिप्रतिपादकशास्त्रस्य विधिर्विधानं कल्पवेदाङ्गस्य इतिकर्त्तव्यताबोधकत्वात् विधिसङ्गमनमित्यर्थः अथच कल्पस्य कल्पवृक्षस्य श्रिया सम्पत्त्या मणिमुक्तादिरूपया कृत्वा आकल्पविधिर्वेशकरणं तथा खलूत्प्रेक्षायां निश्चये वा यस्याः समस्तार्थानां सकलाभिधेयानां निरुक्तिरूपैर्निर्वचनरूपैः कृत्वा निरुक्तविद्या वेदाङ्गविशेषः पर्य्यणंसीत्परिणता। कल्पो विकल्पे कल्पाद्रौ संवर्त्ते ब्रह्मवासरे। शास्त्रे न्याये विधाविति हेमचन्द्रः। शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गणः। छन्दसां विचितिश्चैव वेदाङ्गानि अमूनि षट्॥ ७६ ॥

Digitized by Google

जात्या च वृत्तेन च भिद्यमानं
छन्दोभुजद्वन्द्वमभूद्यदीयं ।
श्लोकार्द्धविश्रान्तिमयीभविष्णुः
पर्व्वद्वयीसन्धिसुचिह्नमध्यं ॥ ७७ ॥

असंशयं सा गुणदीर्घभाव
क्षतां दधाना विततिं यदीया ।

जात्येति । जात्या च मात्रावृत्तेन आर्य्यादिना च वृत्तेन च अक्षर संख्यातेन उक्थादिना च भिद्यमानं द्विधाभूतं छन्दः यदीयं भुजद्वन्द्वं अभूत् अथच जात्या जन्मना स्वभावेन वृत्तेन चरित्रेण च भिद्यमानं अन्यतो भिन्नं उत्कृष्टं भुजद्वन्द्वं अभूत् किम्भूतं छन्दोरूपं भुजद्वन्द्वं श्लोक स्यार्द्धे या विश्रान्तिर्विश्रामस्तन्मयीभविष्णुस्तद्रूपीभवन् यः पर्व्वद्वयी सन्धिः कूर्परसन्धिः स एव सुचिह्नं शोभनचिह्नं तन्मध्ये यस्य तादृशं श्लोकार्द्धयोर्विश्राम एव यस्य पर्व्वद्वयीसन्धिरित्यर्थः । पद्यं चतुष्पदी तच वृत्तं जातिरितिद्विधा वृत्तमक्षरसंख्यातं जातिर्मात्राकृता भवेदिति छन्दोमञ्जरी ॥ ७७ ॥

असंशयमिति । किञ्च असंशयं निश्चितमेव सा अतिप्रसिद्धा यदीया मेखला काञ्ची व्याकरणेन वेदाङ्गविशेषेण करचि रचिता कीदृशी गुणस्य पञ्चगणसूत्रस्य दीर्घभावेन दीर्घत्वेन क्षतां जनितां विततिं विस्तारं दधाना धारयन्ती तथा शब्दपरम्पराणां शिञ्जितश्रेणीनां विधायिका जनिका व्याकरणमपि गुणाः इकारएकरणोगुण इत्यादिना विहिताः दीर्घाः सवर्णेणाग्दीर्घं इत्यादिना विहिताः भावाः धात्वर्थः केवलोभाव इत्यनेन कथिताधात्वर्थाः भावविहितवतिङ्कृत्तद्धितप्रत्ययाश्च एतैः

Digitized by Google

विधायिका शब्दपरम्पराणां
किमारचि व्याकरणेन काञ्ची ॥ ७८ ॥
स्थितैव कण्ठे परिणम्य हार
लता बभूवोदिततारवृत्ता ।
ज्योतिर्म्मयी यद्भजनाय विद्या
मध्येऽङ्कमङ्केन भृता विशङ्के ॥ ७९ ॥
अवैमि वादिप्रतिवादिगाढ
स्वपक्षरागेण विराजमाने ।

लतां विततिं दधानं तथा शब्दपरम्पराणां हरिहरादीनां विधायकं साधकं ॥ ७८ ॥

स्थितैवेति ॥ ज्योतिर्मयी ज्योतिषशास्त्ररूपा विद्या यस्या भजनाय उपासनार्थं परिणम्य रूपान्तरं प्राप्य कण्ठे स्थिता हारलतैव बभूव इत्यहं विशङ्के तर्कयामि ज्योतिर्विद्यैव यस्या हारलता जातेत्यर्थः किम्भू ता ज्योतिर्मयी विद्या उदितमुक्तं तारं तारा नक्षत्रं तत्सम्बन्धि वृत्तं शुभा शुभफलकथनरूपं यस्यां सा तथा मध्येऽङ्कं अङ्कानां शिक्षादीनां मध्ये अङ्केन गणनया भृता धृता षडङ्गमध्ये गणितेत्यर्थः अङ्केन संख्याभिधाय केन भृता पूर्णेति वा हारलतापि उदितः प्रकाशीभूतस्तारोमध्यमणि र्मुक्ता शुद्धिर्वा यस्यां सा चासौ वृत्ता वर्तुलमौक्तिकाचेति तादृशी तथा मध्येऽङ्कं शरीराणां मध्ये अङ्केन क्रोडेन भृता धृता । मध्येऽङ्कमिति पारे मध्ये षष्ठ्यावेत्यव्ययीभावः ॥ ७९ ॥

अवैमीति ॥ ते प्रसिद्धे पूर्व्वपक्षोत्तरपक्षशास्त्रे पूर्व्वपक्षशास्त्रमुत्तरप क्षशास्त्रञ्च द्वे यदीयौ रदच्छदौ ओष्ठाधरौ भूतवती जाते इत्यहं अवै

ते पूर्व्वपक्षोत्तरपक्षशास्त्रे
रदच्छदौ भूतवती यदीयौ ॥ ८० ॥
ब्रह्मार्थकर्म्मार्थकवेदभेदा
द्द्विधा विधाय स्थितयात्मदेहं ।
चक्रे पराच्छादनचारु यस्या
मीमांसया मांसलमूरुयुग्मं ॥ ८१ ॥
उद्देशपर्व्वण्यपि लक्षणेऽपि
द्विधोदितैः षोडशभिःपदार्थैः ।

मि सम्भावयामि किम्भूते वादिप्रतिवादिनोर्योगाढो दृढः स्वपक्षरागः स्वसिद्धान्तानुरागस्तेन विराजमाने शोभमाने ॥ ८० ॥

ब्रह्मार्थेति । मीमांसया शास्त्रेण यस्याः सरस्वत्या ऊरुयुग्मं चक्रे कृतं ननु एकेन मीमांसाशास्त्रेण कथमूरुद्वयं कृतमिति विशेषणेन तस्यापि द्वैविध्यमाह किम्भूतया ब्रह्मार्थकर्म्मार्थकयोर्ब्रह्मप्रतिपादककर्म्मप्रतिपादकयोर्वेदयोर्भेदात् ब्रह्मकाण्डत्वकर्म्मकाण्डत्वाभ्यां विभागात् आत्मदेहं द्विधा विधाय कृत्वा स्थितया ब्रह्मकाण्डीयं कर्म्मकाण्डीयञ्च वेदद्वयमधिकृत्य जैमिनिबादरायणाभ्यां प्रणीतत्वेन पूर्व्वोत्तररूपया द्विविधमीमांसया ऊरुद्वयं रचितमित्यर्थः किम्भूतं ऊरुयुग्मं परेण उत्कृष्टेन आच्छादनेन वस्त्रेण चारु मनोज्ञं तथा मांसलं स्थूलं मीमांसापि परेषां बौद्धादीनां आच्छादनेन निराकरणेन चारुः तथा मांसला भट्टमिश्रादिभिः शङ्कराचार्य्यादिभिश्च कृतबहुविचारत्वेन परिपुष्टा । ८१ ।

उद्देशेति । वयं यस्याः सरस्वत्या दशनद्विमार्गी दन्तपङ्क्तिद्वयी तां प्रसिद्धां आन्वीक्षिकीं तर्कविद्यां प्रतीमो जानीमः किम्भूतां आन्वीक्षिकीं

Digitized by Google

आन्वीक्षिकीं यद्दशनद्विमालीं
तां मुक्तिकामाकलितां प्रतीमः ॥ ८२ ॥
तर्का रदा यद्वदनस्य तर्क्या
वादेऽस्य शक्तिः क तथान्यथा तैः।

नामतः कथनमुद्देशस्तस्य पर्व्वणि प्रस्तावेऽपि तथा समानजातीयव्यवच्छेदो लक्षणं तस्मिन्नपि द्विधा उद्देशतया लक्षणतया च उदितैर्भगवता गौतमेन निर्दिष्टैः षोडशभिः पदार्थैः प्रमाणादिभिर्निग्रहस्थानान्तैरुप लक्षितां तथा मुक्तिकामैः एतेषां तत्त्वज्ञानान्निःश्रेयसाधिगमइत्युक्तत्वान्मुमुक्षुभिराकलितां अभ्यस्तां दन्तपङ्क्तिद्वयी च पर्व्वणि ग्रन्थौ उदिता उत्तेजिता तथा लक्षणे सामुद्रकशास्त्रे उदिता उक्ता। षोडशसंख्यकास्तथाविधोदितत्वेन द्वात्रिंशत्संख्यका भवन्ति दन्तपंक्तिद्वयी च द्वात्रिंशद्दन्तात्मिका भवति तादृशीं दशनद्विमालीं आकलितां ग्रथितां मुक्तिकां प्रतीमः दन्तान् मौक्तिकान्येव जानीमः। प्रमाणप्रमेयसंशय प्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमइति गौतमसूत्र पर्व्व क्लीवं मन्थे ग्रन्थौ प्रस्तावे लक्षणान्तरे दर्शप्रतिपदोः सन्धौ विषुवत्प्रभृतिष्वपीति मेदिनी॥ ८२॥

तर्काइति। तर्का यद्ययं निर्वह्निः स्यात्तदा निर्धूमः स्यादित्येवंरूपा यद्वदनस्य यस्या मुखस्य रदा दन्तास्तर्क्याः सम्भावनीयाः अत्रान्यथानुपपत्तिं प्रमाणयति तत्तर्करूपरदैरन्यथा विना अस्य वदनस्य तथा तादृशे

पत्रं क्व दातुं गुणशालिपूगं
क्व वादनः खण्डयितुं प्रभुत्वं ॥ ८२ ॥
सपल्लवं व्यासपराशराभ्यां
प्रणीतभावादुभयीभविष्णु ।

वादे वादिनिराकरणकथाविशेषे शक्तिः सामर्थ्यं क्व कुत्र अपितु न क्वापि तर्कैरेव विवादशक्तिर्भवतीति तर्का एव तद्दत्ता जाता इत्यर्थः कथमन्य थेति क्वचित्पाठः अथच रदैर्विना तथावादे दन्त्यवर्णानामुच्चारणे अस्य शक्तिः क्व तथा तैरन्यथा प्रतिवादिने पत्रं दातुं तस्योपरि पत्रावलम्बनं कर्त्तुं प्रतिवादिनः प्रतिज्ञापत्रं खण्डयितुं वा प्रभुत्वं शक्तिः क्व तर्कं विना प्रतिवादिनि पत्रदाने तत्पत्रनिराकरणे वा प्रभुत्वं न भवतीत्यर्थः अथ च रदैर्विना पत्रं पर्णं दातुं खण्डयितुं मुखस्य प्रभुत्वं क्व दातुमिति पक्षे दोटवखण्डने इत्यस्य रूपं तथा तैरन्यथा वादतोवादनिमित्तात् गुणशालिनां पाण्डित्यादिगुणयुक्तानां पूगं समूहं खण्डयितुं निराकर्तुं अस्य प्रभुत्वं क्व तर्कं विना गुणशालिसमूहनिराकरणं न भवतीत्यर्थः अथच अदतोभक्षयतोऽस्य रदैर्विना गुणैः सौरभादिभिः शालतइति तादृशं पूगं गुवाकफलं खण्डयितुं क्व वा प्रभुत्वं । दन्तानां कर्कशत्वात् कर्कशैस्तर्कैर्निर्माणं युक्तं । तैरन्यथेति पृथग्विनानानेत्यत्र विनापदेन विनार्थग्रहणात्तृतीया । पूगः क्रमकवृन्दयोरित्यमरः ॥ ८२ ॥

सपल्लवमिति ॥ तत्प्रसिद्धं पुराणं यस्याः पाणियुग्मं वर्त्तते जातं किम्भूतं पुराणं सपल्लवं इतिहासादिभिः सविस्तारं तथा व्यासपराश राभ्यां मुनिभ्यां प्रणीतभावान्निर्म्मितत्वात् उभयीभविष्णु पुराणोय

तन्मत्स्यपद्माद्युपलक्ष्यमाणं
यत्पाणियुग्मं वहते पुराणं ॥ ८४ ॥
आकल्पविच्छेदविवर्ज्जितोयः
स धर्म्मशास्त्रव्रज एव यस्याः ।

पुराणतां प्राप्तं तथा मत्स्यपद्मादिभिरादिना कूर्म्मवराहादिभिश्च पदै रुपलक्ष्यमाणं निर्दिश्यमानं पुराणमेव यस्याः करयुग्माकारेण परिणत मित्यर्थः अथ च पाणियुग्ममपि सपल्लवं अलक्तरागसहितं किसलयस्य सदृशम्वा तथा व्यासेन विस्तारेण पराणः श्रेष्ठभक्ष्यग्रन्थं तस्य रा ग्रहणं तेन च सह प्रवीणभावं प्रकर्षं अतति गच्छतीति तादृशं सविस्तारं उत्त मभक्ष्यग्रहणतत्परञ्चेत्यर्थः तथा उभयोर्भागयोः दक्षिणत्ववामत्वाभ्यां द्विविधीभूतं तथा रेखारूपमत्स्यपद्मादिसामुद्रकलक्षणैरुपलक्ष्यमाणं युक्तं । पल्लवोऽस्त्री किसलये विटपे विस्तरे वने शृङ्गारेऽलक्तरागे ऽस्त्रीति मेदिनी । व्यासोना विस्तृते मुनाविति च । पल्लवेन सदृशमिति पक्षे सदृशब्देन सह सादृश्यार्थेऽव्ययीभावः ॥ ८४ ॥

आकल्पेति ॥ स धर्म्मशास्त्राणां मन्वादिप्रणीतधर्म्मसंहितानां व्रजः समूह एव यस्या मूर्द्धा मस्तकीभूतः सन् कस्य जनस्य मुदे हर्षाय न वृत्तोन जातः अपितु सर्व्वस्यापि इत्यहं पश्यामि जाने कस्य ब्रह्मणो मुदे इति वा स कः यः आकल्पं प्रलयकालपर्य्यन्तं योविच्छेदोऽप्रचार स्तेन विवर्जितो रहितः धर्म्मशास्त्रं प्रलयकालपर्य्यन्तमपि प्रचरिष्य तीति भावः किम्भूतः श्रुतिर्वेद एव मूलं तेन शोभते इति तादृशः तथा मार्गे स्थितः दृढतरमध्यसनीय इत्यर्थः अथ च मूर्द्धापि आकल्पस्य वेष

Digitized by Google

पश्यामि मूर्द्धा श्रुतिमूलशाली
कण्ठे स्थितः कस्य मुदे न वृत्तः ॥ ८५ ॥
भ्रुवौ दलाभ्यां प्रणवस्य यस्या
स्तद्बिन्दुना भालतमालपत्रं ।
तदर्द्धचन्द्रेण विधिर्व्विपञ्ची
निक्काणनाकोणधनुः प्रणिन्ये ॥ ८६ ॥
त्रिकुण्डली वृत्तसमाप्तिलिप्याः
कराङ्गुली काञ्चनलेखनीनां ।

च्छस्य विच्छेदेन विवर्जितः सदाचकृत इत्यर्थः तथा श्रुत्योः कर्णयोर्मूले शालत इति तादृशः तथा कण्ठस्थितः कण्ठनालस्योपरि स्थितः तथा वृत्तो वर्त्तुलः धर्म्मशास्त्रमेव यदीयमलङ्काकारेव परिणतमित्यर्थः । श्रुतिः श्रोत्रे च तत्कर्म्मण्याम्नायवार्त्तयोः स्त्रियामिति मेदिनी ॥ ८५ ॥

भ्रुवाविति । विधिर्विधाता प्रणवस्य ओङ्कारस्य दलाभ्यां कृत्वा यस्याः सरस्वत्या भ्रुवौ प्रणिन्ये निर्म्ममे तथा तस्य प्रणवस्य बिन्दुना अनुस्वारेण यस्या भालतमालपत्रं ललाटतिलकं प्रणिन्ये तथा तस्य प्रणवस्य अर्द्ध चन्द्रेण अर्द्धचन्द्राकारावयवेन विपञ्चावीणाया निक्काणनार्थं वादनार्थं यः कोणोवीणावादनसाधनद्रव्यं स एव धनुराकारत्वात् धनुस्तत्प्रणिन्ये अत्र प्रणवो गौडलिप्या देवनागरलिप्या वा बोद्धव्यः । तमालपत्रति लकचित्रकाणि विशेषकमिति वीणातु वल्लकी विपञ्चीति कोणोवीणादि वादनमिति चामरः ॥ ८६ ॥

त्रिकुण्डलीति । यदीये काये यस्याः शरीरे वृत्ता वर्त्तुला या समाप्ति ज्ञापिका लिपिः समाप्तिलिपिर्विसर्गाकारा तस्याः सारैः श्रेष्ठांशैः कृत्वा

Digitized by Google

कैश्यं मसीनां स्मितभाः कठिन्याः
काये यदीये निरमायि सारैः ॥ ८७ ॥
या सोमसिद्धान्तमयाननेव
शून्यात्मतावादमयोदरेव ।

लिकुचयुग्मी कुड्मलद्वयं निरमायि निर्म्मिता विधिनेत्यर्थात् तथा काव्यस्य सर्व्वस्य लेखनीनां सारैः कराङ्गुली निरमायि तथा मसीनां सारैः कैश्यं केशवृन्दं निरमायि तथा कठिन्याः खटिकायाः सारैः स्मितभाः हास्यस्य दीप्तिर्निरमायि । लेख्यशेषे समाप्तिसूचको विसर्गो लिख्यते स एव कुड्मलद्वयत्वेन परिणत इत्यर्थः । विसर्गश्च यथा मृङ्गवदाननवत्सस्य बालिका कुचयुग्मवत् । नेत्रवत् कृष्णसर्पस्य स विसर्ग इति स्मृत इति । तद्वृन्दे कैशिकं कैश्यमित्यमरः कठिनी खटिकेति विश्वः ॥ ८७ ॥

येति ॥ या सरस्वती सोमसिद्धान्तः कापालिकदर्शनं तन्मयं तदेव आननं मुखं यस्यास्तादृशीव अथ च सोमस्य चन्द्रस्य सिद्धान्तो याथार्थ्यं तन्मयं आननं यस्याः सा पूर्व्वपक्षभूतस्य सोमस्य सिद्धान्तमयं दूषकरूपमाननं यस्या इति वा सोमत्वेन सिद्धान्तितमाननं यस्या इति च व्याख्यते तथा शून्यात्मतावादो माध्यमिकबौद्धविशेषदर्शनं तन्मयं तदेव उदरं यस्यास्तादृशीव अथ च शून्यतावादो नास्त्येवेति कथनं तन्मयं तद्विषय उदरं यस्याः सा अतिकृशोदरीत्यर्थः तथा विज्ञानस्य सामस्त्यं साकल्यं विज्ञानमेव सकलं नो घटादीति योगाचारबौद्धविशेषमतं तन्मयं तदेव अन्तरं यस्यास्तादृशीव अथ च विज्ञानस्य विशिष्टज्ञानस्य सामस्त्यं तन्मयं तत्प्रचुरं अन्तरं चित्तं यस्यास्तादृशी तथा साकारतासिद्धिशा

विश्रामसामस्त्यमयान्तरेव
साकारतासिद्धिमयाखिलेव ॥ ८८ ॥
भीमस्तयागद्यत मोदितुं ते
वेला किलेयं तदलं विषद्य ।
मया निगाद्यं जगतीपतीनां
गोत्रं चरित्रं च यथावदेषां ॥ ८९ ॥
विन्दत्यसव्ये मकरन्दलीलां
मन्दाकिनी यच्चरणारविन्दे ।

साकारानुमेयज्ञानविषयबाह्यार्थवादरूपसौत्रान्तिकमतं तन्मयं तत्प्रचुरं अखिलं सकलं यस्यास्तादृशीव अथच साकारतासिद्धिमयं सौन्दर्य्यलाभप्रचुरं अखिलं यस्यास्तादृशी एवम्भूता मध्येसभमवततारेत्यादि कुलकं इवोत्प्रेक्षायां ॥ ८८ ॥

अथैवंरूपा सरस्वती सभायामवतीर्य्य चिन्तयन्तं भीममाश्वासयति स्मेत्याह ॥ भीमइति ॥ तया सरस्वत्या भीमोऽगद्यत उक्तः किमुक्त इत्याह हे भीम किल यस्मात्ते तव मोदितुं हर्षाय इयं वेला समयः तत्तस्मात् विषद्य अलं विषादं माकुरु नन्वहं राज्ञां कुलनामपरिचायकजनाभावादेव विषादं करोमीत्यत आह एषां जगतीपतीनां राज्ञां विचित्रं नानाविधं गोत्रं चरित्रञ्च मया यथावत् निगाद्यं वक्तुमर्हं अहमेव सर्व्वं कथयिष्यामि विषादं माकुर्व्वित्यर्थः । विषद्येति निषेधार्थालंखलुयुक्तादेति अलं योगे क्त्वा ॥ ८९ ॥

ननु का त्वं या नानादिगन्तवासिनामपि राज्ञां गोत्रचरित्रकथने प्रतिजानीषेइत्यपेक्षायामाह ॥ विन्दतीति ॥ मन्दाकिनी गङ्गा असव्ये द

Digitized by Google

अत्रावतीर्णा गुणवर्णनाय
राज्ञां तदाज्ञावशगास्मि कापि ॥ ९० ॥
तत्कालवेद्यैः शकुनस्वराद्यै
राप्तामवाप्तां नृपतिः प्रतीत्य ।
तां लोकपालैकधुरीण एष
तस्यै सपर्य्यामुचितां दिदेश ॥ ९१ ॥

यस्य चरणारविन्दे पादपद्मे मकरन्दस्य पुष्परसस्य लीलां विलासं विन्दति लभते अरविन्दे मकरन्दस्य ख्यातुमुचितत्वात् तत्सदृशीभवतीत्यर्थः तस्य नारायणस्य आज्ञावशगा निदेशकारिणी कापि अहं राज्ञां गुणवर्णनाय अत्र सभायां अवतीर्णास्मि अहं हि भगवता नारायणेन प्रेषिता तदाज्ञया च मम सामर्थ्यमपि युक्तमिति भावः। कापीत्यनेन मादृश्यस्तन्निदेशकारिण्योऽनेकाः सन्तीति सूचितं । विन्दत्यसत्यइत्यत्र अविन्दतासाविति क्वचित्पाठः ॥ ९० ॥

अथ भीमस्तां पूजयामासेत्याह ॥ तत्कालेति ॥ लोकपालैरिन्द्रादिभिः सह एकधुरं वहतीति तादृशोलोकपालसदृशोऽयंपतिर्भीमः अवाप्तां अकस्मात्सभायां प्राप्तां तां देवीं तत्काले तदागमनसमयएव वेद्यैर्ज्ञेयैः शकुनस्वराद्यैः काकादिपक्षिशब्दादिभिः शकुनैः शुभसूचकैः स्वराद्यैर्नासानिश्वसनयनस्पन्दादिभिर्व्वा कृत्वा आप्तां आत्मीयां प्रतीत्य ज्ञात्वा तस्यै उचितां योग्यां सपर्य्यां पूजां दिदेश आदिष्टवान् आप्तागमनसमये हि भुजस्पन्दादयोजायन्ते। शकुनस्तु पुमान् पक्षिमात्रपक्षिविशेषयोः। शुभशंसिनिमित्ते च शकुनं स्यान्नपुंसकमिति स्वरो नासासमीरणे उदात्तादावकारादौ षड्जादौ च ध्वनौ पुमानिति च मेदिनी ॥ ९१ ॥

दिगन्तरेभ्यः पृथिवीपतीना
माकर्षकौतूहलसिद्धविद्यां ।
ततः क्षितीशः स निजां तनूजां
मध्येमहाराजकमाजुहाव ॥ ९२ ॥
दासीषु नासीरचरीषु जातं
स्फीतं क्रमेणालिषु वीक्षितासु ।

अथ भीमः सभामध्ये भैमीमानेतुमादिदेशेत्याह ॥ दिगन्तरेभ्य इति ॥ ततोदेवीसपर्यानन्तरं स क्षितीशोभीमः मध्येमहाराजकं महाराजसमूहमध्ये निजां तनूजां पुत्रीं आजुहाव आकारितवान् किम्भूतां दिगन्तरेभ्योनानादिग्भ्यः पृथिवीपतीनां राज्ञां य आकर्ष आकर्षणं तत्र यत् कौतूहलं कौतुकं तत्र सिद्धविद्यां जपादिनात्मवशी कृतमन्त्ररूपां सौन्दर्येण सर्व्वाकर्षणकारिणीं । मध्येमहाराजकमिति पारेमध्ये षष्ठ्यावेत्यव्ययीभावः ॥ ९२ ॥

अथ सभां प्रविशन्तीं राजभिर्दृश्यमानां भैमीं षोडशभिः श्लोकैः कुलकेन विशिनष्टि ॥ दासीष्विति ॥ नासीरचरीषु अग्रसरीषु दासीषु भैम्याश्चेटीषु वीक्षितासु दृष्टासु सतीषु जातं प्रथमं समुत्पन्नं क्रमे णानन्तरं आलिषु भैम्याः सखीषु वीक्षितासु सतीषु स्फीतं उपचितं अथानन्तरं स्वाङ्गेषु भैम्या अवयवेषु दृष्टेषु सत्सु रूपात् सौन्दर्य्यात् उत्थितं उच्छलितुमारब्धं अवलोककानां प्रेक्षकाणां अद्भुताब्धिं विस्म यसमुद्रं उद्वेलयन्तीं अतिक्रान्तमर्यादं कुर्व्वतीं भैमीं नृपावपाङ्क्षरेण

स्वाङ्गेषु रूपोत्थमयाद्भुताब्धि
मुद्वेलयन्तीमवलोककानां ॥ ९३ ॥
स्निग्धत्वमायाजललेपलोप
सपत्नरत्नांशुमृजांशुकाभां ।

रोमराजिरिति रतः सोऽस्मासोऽयेनान्वयः। तास्यादिषु क्रमेण अधिक सौन्दर्यदर्शनेन रोमाञ्चोऽतितरां मुग्धाजाता इतिभावः ॥ ९२ ॥

स्निग्धत्वेति ॥ किम्भूतां स्निग्धत्वाय चैक्कण्यजनकौ यौ मायाजल लेपौ मायाजलं शुद्धिकारकं रुचिमोदकं लेपोवर्णोत्कर्षकारी द्रव्य विशेषसंयोगस्तयोर्लोपे नाशे सपत्नाः शत्रुभूताः स्निग्धत्वजनकमाया जलाद्यनपेक्षिणो ये रत्नानां अंशवः किरणास्तैर्मृजा शुद्धिर्यस्यास्तादृशी अंशुकस्य वस्त्रस्य शोभा दीप्तिर्यस्यास्तादृशीं स्वभावतः परिष्कृतैरत्नैः खचितं वस्त्रं परिहितवतीमित्यर्थः स्निग्धत्वं तैलविशेषादिना चैक्कण्यं मायाजलं लेपस्य एषां लोपे इति वा सपत्नेत्यत्र सयत्नेति पाश्चात्यानां पुस्तकेषु पाठः तत्र स्निग्धत्वमायाजललेपलोपे सयत्नानि कृतप्रयासानि कथमपि तानङ्गीकुर्वाणानि यानि रत्नानीत्याद्यन्वयः मायाजलादिकं अनुज्ज्वलरत्नानामौज्ज्वल्यकारकं भैमीवस्त्रप्रोतरत्नानि तु स्वभावादे वोज्ज्वलानीति भावः। तथा नेपथ्येषु भूषणेषु विद्यमाना ये हीरास्तेषां द्युतिरेव वारि जलं तत्र वर्त्तत इति तादृशं तदवस्थितं यत्स्वच्छायं भैम्या एव प्रतिविम्बं तेन सच्छायं समानप्रभं सदृशं आलिजालं सखीसमूहो यस्यास्तादृशीं हीरकादिजडितालङ्कारयुतां स्वापेक्षया किञ्चिन्न्यूनाभिः

Digitized by Google

नेपथ्यहीरद्युतिवारिवर्त्ति
स्वच्छायसच्छायनिजालिजालां ॥ ९४ ॥
विलेपनामोदमुदागतेन
तत्कर्णपूरोत्पलसर्पिणा च।
रतीशदूतेन मधुव्रतेन
कर्णे रहः किञ्चिदिवाच्यमानां ॥ ९५ ॥
विरोधिवर्णाभरणाश्मभासां
मल्लाजिकौतूहलमीक्षमाणां।

सखीभिर्युक्तामित्यर्थः अन्यत्रापि जलेप्रतिबिम्बं जायते। आलिजालामित्यत्र आलिमालामिति क्वचित् पाठः॥ ९४॥

विलेपनेति॥ पुनः किम्भूतां विलेपनस्य चन्दनाद्यनुलेपस्य आमोदेन परिमलेन या मुत् हर्षस्तया हेतुना आगतेन अथानन्तरं तस्या भैम्याः कर्णपूर एव उत्पलं तत्सर्पिणा तत्समीपगतेन मधुव्रतेन भ्रमरेणैव रतीशस्य कामस्य दूतेन सन्देशहारकेण कर्णे किञ्चित् किमपि रहोगोपनीयं एषां मध्ये नल एव सुन्दरः स एव वरणीय इत्यादिकं उच्यमानामिव कथ्यमानामिव अन्योऽपि दूतो गोपनीयं कर्णे कथयति॥ ९५॥

विरोधीति॥ पुनः किम्भूतां विरोधिनः परस्परं विरुद्धा वर्णाः शुक्लपीतरक्तादयो येषां तथाविधा ये आभरणाश्मानो भूषणोपलास्तेषां याभासोदीप्तयस्तासां मल्लाजिकौतूहलं मल्लयुद्धकौतुकं ईक्षमाणां मल्लमुखत्वात् परस्परोपमर्द्दं कुर्व्वतीं रत्नसकलदीप्तिमिव पश्यन्तीं तथा विलासात्कटाक्षविक्षेपवशात् वलिते वक्रिते भ्रुवौ वहन्तीं धारयन्तीं

स्मरस्य चापभ्रमचालिते नु
भ्रुवौ विलासाद्दलिते वहन्तीं ॥ ९६ ॥
सामोदपुष्पाशुगवासिताङ्गीं
किशोरशाखाग्रशयालिमालां ।
वसन्तलक्ष्मीमिव राजभिस्तैः ।
कल्पद्रुमैरप्यभिलष्यमाणां ॥ ९७ ॥

वक्रतायामुत्प्रेक्षते किम्भूते स्मरेण कामेन स्वचापभ्रमेण निजधनुर्भ्रान्त्या चालिते नु गुणारोपायाकर्षिते इव नूत्प्रेक्षायां ॥ ९६ ॥

सामोदेति ॥ पुनः किम्भूतां कल्पद्रुमैर्वसन्तलक्ष्मीमिव तैराजभिरभिलष्यमाणामपि लिप्स्यमानां च यथा कल्पवृक्षैर्वसन्तलक्ष्मीरभिलष्यते तथा राजभिरभिलष्यमाणामित्यर्थः उभयोः साधर्म्यं विशेषणेनाह किम्भूतां सामोदातिसुन्दरतच्छोभेन सपर्णोयः पुष्पाशुगः कामस्तेन वासितमधिष्ठितमङ्गं यस्यास्तादृशीं वसन्तलक्ष्मीमपि सामोदं सपरिमलं यत्पुष्पं तत्सम्बन्धिना आशुगेन वायुना वासितं सुरभीकृतं अङ्गं स्वरूपं यस्यास्तादृशीं तथा किशोराणि कोमलानि सूक्ष्माणि वा शाखा याणि अङ्गुलयोयेषां एवंविधाः शयाहस्तायस्यास्तादृशो आलिमाला सखीश्रेणी यस्यास्तादृशीं किशोरं नवीनं यत् शाखाग्रं पल्लवस्तद्वत् शयोयस्याइति केचित् वसन्तलक्ष्मीमपि किशोरशाखा किसलयस्तदग्रे शया शयाना स्थिता अलिमाला भ्रमरश्रेणी यस्यां तादृशीं। शाखाग्रमिति अङ्गुल्या यौगिकी संज्ञा शाखायाबाहोरग्रमिति व्युत्पत्तेः । आमोदोमन्धहर्षयोरिति आशुगोमारुते वाण इति शाखा पक्षान्तरे बाहौ वेदभागद्रुमाङ्गयोरिति च मेदिनी ॥ ९७ ॥

Digitized by Google

पीतावदातारुणनीलभासां
देहोपदेहात् किरणैर्मणीनां ।
गोरोचनाचन्दनकुङ्कुमेण
नाभीविलेपान् पुनरुक्तयन्तीं ॥ ९८ ॥
स्मरं प्रसूनेन शरासनेन
जेतारमश्रद्दधती नलस्य ।
तस्मै स्वभूषाद्यमरंशुशिल्पं
बलद्विषः कार्म्मुकमर्पयन्तीं ॥ ९९ ॥
विभूषणेभ्यो वरमंशुकेषु
ततो वर सान्द्रमणिप्रभासु ।

पीतेति ॥ पुनः किम्भूतां पीता गौरा अवदाताः शुक्लाः अरुणा रक्ता नीलाः कृष्णाश्च भासोदीप्तयोर्येषां तादृशानां मणीनां किरणैः कृत्वा देहोपदेहाच्छरीरानुलेपनाद्धेतोः क्रमेण गोरोचनया चन्दनेन कुङ्कुमेन एणनाभ्या कस्तूर्य्या च कृत्वा विलेपान् अनुलेपनानि पुनरुक्तयन्तीं पुन रुक्तान् कुर्व्वतीं विफलान् कुर्व्वतीमित्यर्थः ॥ ९८ ॥

स्मरमिति ॥ पुनः किम्भूतां स्मरं कामं प्रसूनेन पुष्पमयेन शरासनेन धनुषा कृत्वा नलस्य जेतारं जेत्रं अश्रद्दधतीं असम्भावयन्तीं अतएव तस्मै स्मराय स्वभूषाद्यमरंशूनां निजालङ्काररत्नकिरणानां शिल्पं निर्म्माणरूपं बलद्विषइन्द्रस्य कार्म्मुकं कठिनं धनुरर्पयन्तीं ददानामिव इन्द्रधनुर्हि नानाविधरत्नकिरणैर्भवतीति प्रसिद्धिः इन्द्रधनुवदेव यदीय रत्नशोभेति भावः ॥ ९९ ॥

विभूषणेभ्यइति ॥ पुनः किम्भूतां वरमिति मनागिष्टे विभूषणेभ्यः स्वर्णाद्यलङ्कारेभ्योवरमंशुकेषु वस्त्रेषु राजकस्य राजसमूहस्य दृशा

Digitized by Google

सम्यक् पुनः क्वापि न राजकस्य
पातुं दृशा धात्टधृतावकाशां ॥ १०० ॥
प्राक्पुष्पवर्षैर्वियतः पतद्भि
र्द्रष्टुं न दत्तामथ तद्द्विरेफैः ।

चक्षुषा पातुं सादरमीक्षितुं धात्रा विधात्रा धृतः सम्पादितोऽवकाशः स्थानं यस्यां तादृशीं तथा ततोऽंशुकेभ्योऽपि वरं सान्द्रमणिप्रभासु उज्ज्वलमणिदीप्तिषु राजकस्य दृशा पातुं धात्टधृतावकाशां विभूषणानि प्रायेण वस्त्रैरावृतानि अतस्तदपेक्षया तस्यावस्त्राणि वरं राजानः पश्यन्तु किम्वा वस्त्राणामपि मणिकिरणैराच्छादितत्वात् तदपेक्षया वरं तस्या मणिकिरणान् ते पश्यन्त्वित्यर्थः किन्तु क्वापि मुखाद्यवयवेषु पुनः सम्यक् सामस्त्येन राजकस्य दृशा पातुं न धात्टधृतावकाशां कथञ्चि द्राजानोऽस्यावस्त्रादीनि पश्यन्तु किन्तु भूषणादिभिराच्छादितत्वान्मुखा द्यवयवानां दर्शने विधिनैव तेभ्योऽवकाशो न दत्त इत्यर्थः विभूषणां शुकमणिशून्यं यस्याः किमप्यङ्गं नासीदिति भावः। मनागिष्टे वरं क्लीवे केचिदाऊस्तदव्ययमिति मेदिनी ॥ १०० ॥

प्रकारान्तरेणाप्यमुमर्थमेवाह ॥ प्रागिति ॥ पुनः किम्भूतां वियतो गग नात्पतद्भिः सन्तुष्टदेवगणप्रक्षिप्तैः पुष्पवर्षैः प्राक् प्रथमं राजकस्य द्रष्टुं न दत्तां अथानन्तरं तद्द्विरेफैः सौरभलोभात् तत्पुष्पानुगामिभि र्भ्रमरैर्द्रष्टुं न दत्तां ततोऽनन्तरं तेभ्योद्विरेफेभ्योया भीतिभयं तया भुग्नेन वक्रीकृतेन मुखेन द्रष्टुं न दत्तां । दत्तामित्यत्र विधिरेव कर्त्तेति ध्वनयति विधेर्विधातुर्वाञ्छितविघ्नयत्नोऽभिलषितप्रतिबन्धकीभूतप्रयासः अहो आश्चर्य्यविषयः विधिना येन केनापि प्रकारेण सर्व्वाभिलाषं

Digitized by Google

तद्भीतिभुग्नेन ततोमुखेन
विधेरहो वाञ्छितविघ्नयत्नः ॥ १०१ ॥
एतद्वरं स्यामिति राजकेन
मनोरथातिथ्यमवापिताय ।
सखीमुखायोत्सृजतीमपाङ्गात्
कर्पूरकस्तूरिकयोः प्रवाहं ॥ १०२ ॥
स्मितेच्छदन्तच्छदकम्पकिर्मि
हिगम्बरीभूतरदांशुवृन्दैः ।

नाशयितुं प्रयस्यते इत्यर्थः राजानो भैम्या मुखाद्यवयवं प्रष्टुमत्यन्तमुत्क
ण्ठिताजाता इतिभावः ॥ १०१ ॥

एतदिति ॥ पुनः किम्भूतां अपाङ्गात् नेत्रप्रान्तात् कर्पूरकस्तूरिकयोः
प्रवाहं श्वेतश्यामकान्तिपूरं सखीमुखाय उत्सृजतीं ददतीं कटाक्षैः सखी
मुखमवलोकयन्तीमित्यर्थः किम्भूताय सखीमुखाय अहं एतत् सखीमुखं
वरं मनोज्ञं स्यां भवेयं इत्येवं प्रकारेण राजकेन राजसमूहेन मनो
रथातिथ्यं अभिलाषविषयतां अवापिताय प्रापिताय सखीमुखत्वे भैमी
कटाक्षलाभोभवेदित्यस्माकं सखीमुखत्वमेव वरं नतु राजत्वमिति राज
भिरभिलषितायेत्यर्थः कर्पूरकस्तूरिकापदेन कटाक्षस्य सितासितत्व
मुक्तं ॥ १०२ ॥

स्मितेच्छदन्तेति ॥ पुनः किम्भूतां स्मितेच्छोरीषद्धसनं चिकीर्षोर्दन्त
च्छदयोरोष्ठाधरयोः कम्पेन ईषच्चलनेन किर्मिरिमम्बरीभूता चित्रली
भूता ईषद्व्यक्तीभूता ये रदा दन्तास्तेषां अंशुवृन्दैः किरणसमूहैः ज्ञाता
कौमुदीनां ज्योत्स्नानां हृदि स्थितं मदं गर्वं नुदन्तीं खण्डयन्तीं मद

Digitized by Google

आनन्दितोर्व्वीन्द्रमुखारविन्दै-
र्मुदं नुदन्तीं हृदि कौमुदीनां ॥ १०३ ॥
प्रत्यङ्गभूषाच्छमणिच्छलेन
यत्राग्रतन्निश्चललोकनेत्रां ।
हाराग्रजाग्रद्गरुडाश्मरश्मि
पीनाभनाभीकुहरान्धकारां ॥ १०४ ॥
तद्धीरसारस्मितविस्मितेन्दु
प्रभाशिरःकम्परुचोऽभिनेतुं ।

स्वमुखे हेतुगर्भविशेषणमाह किम्भूतैः आनन्दितानि प्रफुल्लीकृतानि उर्व्वीन्द्राणां राज्ञां मुखान्येव अरविन्दानि यैस्तादृशैः कौमुद्योहि पद्मानि न प्रकाशयितुं प्रभुवन्ति एतैस्तु पद्मान्यपि प्रकाशितानि अतः कौमुदीगर्व्वखर्व्वनमेषां युक्तमित्यर्थः सहास्यमुखामिति भावः ॥ १०३ ॥

प्रत्यङ्गेति ॥ पुनः किम्भूतां प्रत्यङ्गं प्रत्यवयवं भूषासु भूषणेषु वर्त्तमाना येऽच्छा निर्म्मला मणयस्तेषां छलेन येषु अङ्गेषु.अग्राणि तेष्वेवाङ्गेषु निश्चलानि लोकानां राज्ञां नेत्राणि यस्यास्तादृशीं नैते भूषणमणयः किन्तु राज्ञां दर्शनोत्सुकानि अङ्गेषु लगित्वा निश्चलानि नयनान्येवेत्यर्थः तथा हाराग्रे जाग्रत् स्फुरन् योगरुडाश्मा गारुडोमरकतमणिस्तस्य रश्मिभिः किरणैः पीना वर्द्धिता आभा यस्य तादृशो नाभीकुहरान्धकारो नाभीरूपदरीस्थिततिमिरं यस्यास्तादृशीं ॥ १०४ ॥

तद्धीरेति ॥ पुनः किम्भूतां तस्या भैम्या यद्धीरसारस्मितं मुक्ताश्रेष्ठभूतमीषद्धसनं तेन विस्मिता प्राप्तविस्मया या इन्दुप्रभा चन्द्रकान्तिस्तस्य यः शिरःकम्पोविस्मयेन मस्तकचालनं तस्य रुचो विकाशानभिनेतुं

Digitized by Google

विपाण्डुतामण्डितचामराली
नानामरालीकृतलास्यलीलां ॥ १०५ ॥
तदङ्गभोगावलिगायनीनां
मध्ये निरुक्तिक्रमकुण्ठितानां ।
स्वयं धृतामप्सरसाम्प्रसादं
ह्रियं हृदोमण्डनमर्पयन्तीं ॥ १०६ ॥

विस्मयवशात्कम्पितैरेवं शिरः कम्पयतीति प्रकाशयितुं विपाण्डुतया शुक्लाधिक्येन मण्डिता भूषिता या चामराली चामरश्रेणी सैव नानाम राल्यो नानाहंस्यस्ताभिः कृता लास्यस्य नृत्यस्य लीला विलासो यस्यास्तां दृशीं अतिशुभ्रचामरैर्वीज्यमानामित्यर्थः ॥ १०५ ॥

तदङ्गेति ॥ पुनः किम्भूतां अप्सरसां मेनकादीनां स्वयमात्मनैव धृतां हृदोमण्डनं स्वीयां हृदयभूषणरूपां ह्रियं लज्जामेव प्रसादं अर्पयन्तीं ददतीं प्रसाददाने हेतुगर्भविशेषणमाह किम्भूतानां तस्या भैम्या अङ्गानां या भोगावलिरुपभोगवर्णनग्रन्थस्तस्यागायनीनां गानं कुर्व्वं तीनां लज्जादाने हेतुगर्भविशेषणमाह पुनः किम्भूतानां स्तुतीनां मध्ये असमाप्तायामेव स्तुतौ निरुक्तिक्रमे निर्व्वचनपरिपाट्यां विषये कुण्ठि तानां निष्प्रतिभानां सम्यक् स्तोतुमशक्तानामित्यर्थः अन्योऽपि भोगाव लीपाठकानां स्वयं धृतं हारादिकं हृदयमण्डनं प्रसादमर्पयति यस्याः सौन्दर्य्यस्तुतिकरणासामर्थ्यादप्सरसोऽपि लज्जिता जाता इतिभावः अप्स रसामिति सम्बन्धविवक्षायां षष्ठी ॥ १०६ ॥

Digitized by Google

ताराद्रदानां वदनस्य चन्द्रं
रुचा कचानाञ्च नभोजयन्तीं ।
आकण्ठमक्ष्णोर्द्दितयं मधूनि
महीभृतः कस्य न भोजयन्तीं ॥ १०७ ॥
अलङ्कृताङ्गाद्भुतकेवलाङ्गीं
स्तवाधिकाध्यक्षनिवेद्यलक्ष्मीं ।

ताराइति ॥ पुनः किम्भूतां रदानां दन्तानां रुचा दीप्त्या तारा नक्ष त्राणि जयन्तीं तिरस्कुर्व्वतीं तथा वदनस्य मुखस्य रुचा चन्द्रं जयन्तीं तथा कचानां केशानाञ्च रुचा नभ आकाशं जयन्तीं नीरूपस्याप्याकाशस्य कविभिः श्यामत्वेन वर्ण्यमानत्वात् आकाशापेक्षयाप्यतिश्यामकेशामि त्यर्थः तथा कस्य महीभृतोराज्ञोऽक्ष्णोर्द्दितयं चक्षुर्द्वयं आकण्ठं कण्ठप र्य्यन्तं अतितरामित्यर्थः मधूनि न भोजयन्तीं न पाययन्तीं अपितु सर्व्वस्यापि अतिसुन्दरतद्दर्शनेन राजनेत्रयोरमृतेनेव तृप्तिर्जातेति भावः ॥ १०७ ॥

अलङ्कृतेति ॥ पुनः किम्भूतां अलङ्कृतात् भूषणैर्भूषितादपि अङ्गात् अन्यासामवयवात् अद्भुतमाश्चर्य्यं केवलमनलङ्कृतमपि अङ्गं यस्यास्ता दृशीं यस्या अनलङ्कृतमप्यङ्गमाश्चर्य्यजनकं अधुना सालङ्कृते तस्मिन् किं वक्तव्यमित्यर्थः अत्याश्चर्य्यजनकभूषितावयवामिति भावः तथा स्तवात् स्तुतेरधिका स्तुतिवचोऽगोचरा अध्यक्षनिवेद्या प्रत्यक्षदृश्या लक्ष्मीः शोभा यस्यास्तादृशीं स्तवोहि आरोपितगुणकथनं तेनापि यस्य वास्तविकशोभां कथयितुं न शक्यत इत्यर्थः अथ एवम्विधां विमानेन नरवाह्येन चतुरङ्गयानेन सभां स्वयम्बरसमाजं विशन्तीं प्रविशन्तीं

Digitized by Google

इमां विमानेन सभां विशन्तीं
पपावपाङ्गैरथ राजराजिः ॥१०८॥ कुलकं॥
आसीदसौ तत्र न कोऽपि भूप
स्तन्मूर्त्तिरूपोद्भवदद्भुतस्य।
उत्तेजुरङ्गानि मुदा न यस्य
विनिद्ररोमाङ्कुरदन्तुराणि ॥ १०९ ॥
अङ्गुष्ठमूर्द्ध्ना च निपीडिताग्रा
मध्येन भागेन च मध्यमायाः।

इमां भैमीं राजराजिर्नृपश्रेणी अपाङ्गैर्नेत्रप्रान्तैः पपौ साभिलाषं ददर्श ॥१०८॥

॥अथ भैम्यां सभाप्रविष्टायां राज्ञामनुभावानाह श्लोकत्रयेण। आसीदिति। तस्या भैम्यामूर्त्तेः शरीरस्य रूपेण सौन्दर्य्येण उद्भवदुत्पद्य मानमद्भुतमाश्चर्य्यं यस्य तादृशस्य यस्य मुदा अनुरागेण विनिद्रैरुद्गतै रोमभिरेव अङ्कुरैर्दन्तुराणि नतोन्नतानि अङ्गानि गात्राणि उत्तेजुः न प्रापुः असौ ईदृशः कोऽपि भूपो राजा तत्र सभायां नासीत् नाभूत् अपि तु तत्र सर्व्वेऽपि तद्रूपदर्शनाज्जातविस्मया रोमाञ्चिताङ्गाः सानुरागाश्च जाता इति भावः॥ १०९ ॥

अङ्गुष्ठेति। नाम सम्भावनायां तत्र सभायां भैमीं अवलोक्य केन अनेन अङ्गुष्ठस्य मूर्द्ध्ना अग्रेण च मध्यमाया अङ्गुल्या मध्येन भागेन च निपीडितं नियन्त्रितं नम्रीकृतमग्रं यस्यास्तादृशी तर्जनी दक्षिणकर

आस्फोटि भैमीमवलोक्य तत्र
न तर्ज्जनी केन जनेन नाम ॥ ११० ॥
अस्मिन् समाजे मनुजेश्वराणां
तां खञ्जनाक्षीमवलोक्य केन ।
पुनः पुनर्लोलितमौलिना न
भ्रुवोरुदक्षेपितरां दधी वा ॥ १११ ॥
स्वयम्बरस्याजिरमाजिह्मानां
विभाव्य भैमीमथ भूमिनाथैः ।

प्रदेशिनी नास्फोटि न वादिता अपि तु सर्व्वैरेवास्फोटि मनोज्ञवस्तु दर्शने हर्षातिशयाज्जनैरेवं क्रियतइति लोकरीतिः ॥ ११० ॥

अस्मिन्निति । अस्मिन् समाजे सभायां मनुजेश्वराणां राज्ञां मध्ये केन वा जनेन खञ्जनाविव अक्षिणी यस्यास्तादृशीं तां भैमीं अवलोक्य पुनःपुनर्वारंवारं लोलितमौलिना कम्पितशिरसा सता भ्रुवोर्दधी न उदक्षेपितरां अतिशयेनोत्क्षिप्ता अपि तु सर्व्वैरेव मनुजेश्वरैराश्चर्य्यवशाच्छिरःकम्पोभ्रुवोरुत्क्षेपश्च कृतइत्यर्थः ॥ १११ ॥

स्वयम्बरस्येति । अथानन्तरं भूमिनाथैराजभिः स्वयम्बरस्याजिरं मण्डपं आजिह्मानां आयातां भैमीं विभाव्य दृष्ट्वा मुदा हर्षेण विकल चित्तभावात् विकलान्तःकरणत्वात् खण्डैरसम्पूर्णैरक्षरैर्वर्णैरुल्लासि रूपैर्हेतुभिर्जिह्मं कुटिला जिह्वा यत्र क्रियायां तद्यथा स्यात्तथा इदं वक्ष्यमाणप्रकारमवादि उक्तं भैमीदर्शनमात्रेण काममरवशत्वात् वक्तुम

Digitized by Google

इदं मुदा विक्लवचित्तभावा
द्रवादि स्वःपृष्ठाम्बरजिघ्नजिह्वं ॥११२॥
रम्भादिलोभात् कृतकर्म्मभिर्भूः
शून्यैव माभूत् सुरभूमिपान्थैः।
इत्येतयालोपि दिवोऽपि पुंसा
वैमत्यमत्यप्सरसा रसायां ॥ ११३ ॥
रूपं यदाकर्ण्य जनाननेभ्य
स्तत्तद्दिगन्तादयमागमाम।

शक्नुवन्तोऽपि इर्षेवशाद्गन्तुं यावदशक्नुवन्नित्यर्थः। आजिहासामिति चोत्साह
गताविल्यस्य गुहोत्यादेरूपं ॥ ११२ ॥

यद्वादि तदाह ॥ रम्भादीति। रम्भादीनामप्सरसां लाभात् कृतं कर्म्म युद्धयागादिकं यैस्तादृशैः सुरभूमेः स्वर्गस्य पान्थैः पथिकैः स्वर्गं जिगमिषुभिः पुरुषैर्भूः पृथिवी शून्यैव रिक्तैव माभूत् न भवतु इति विचार्य्य अत्यप्सरसा अतिक्रान्ता अप्सरसो यया तादृश्या एतया भैम्या पुंसां पुरुषाणां दिवोऽपि स्वर्गमुद्दिश्यैव रसायां भूम्यां वैमत्यं अरुचिर लोपि विनाशितं अतिसुन्दरीणामप्सरसामावासं स्वर्गमुद्दिश्य कृतकर्म्म णां पुरुषाणां भूम्यां पूर्वं वैमत्यं स्थितं अधुना तदप्सरोभ्योऽप्यतिसुन्दर्य्यां रसायामुत्पन्नया भैम्या तद्विनाशितमित्यर्थः भैमी रम्भादिभ्योऽप्यति सुन्दरीति भावः। दिवइति उद्दिश्येतियजन्तक्रियापेक्षया यजगर्भादे रिति पञ्चमी अपरे तु दिवः स्वर्गस्य पुंसां इन्द्रादीनां रसायां वैमत्यं अनिच्छा एतया अलोपि लुप्तमिति व्याचक्षते॥ ११३ ॥

रूपमिति॥ वयं अस्या यद्रूपं सौन्दर्य्यं जनाननेभ्यो जनमुखेभ्य आक र्ण्य श्रुत्वा तत्तद्दिगन्तात् तस्मात् तस्मात् प्राच्यादिदिक्प्रान्तात् आम

Digitized by Google

सौन्दर्य्यसारादनुभूयमाना
दस्यास्तदस्मादङ्ग नाऽऽकनीयः ॥११४॥
रसस्य शृङ्गार इति श्रुतस्य
क नाम जागर्त्ति महानुदन्वान्।
कस्मादुदस्थादियमन्यथा श्री
र्लावण्यवैदग्ध्यनिधिः पयोधेः ॥११५॥

नाम आगतवन्तः तदस्या रूपं अनुभूयमानात् प्रत्यक्षं दृश्यमानात् अस्मात् सौन्दर्य्यसारात् लावण्यातिशयाङ्गेतोर्वङ्ग अतिशयेन अकनीयो ऽनल्पतरं न अपि तु अल्पतरमेव अन्यदीयं स्वल्पमपि रूपं लोकमुखा च्छ्रूयते अस्यास्तु यच्छ्रुतं ततोऽप्यधिकमनुभूतमिति भावः। आगमा मेति लुङ्कम् वृदित्वादङ्॥ ११४॥

रसस्येति॥ शृङ्गार इति नाम्ना श्रुतस्य नवरसमध्ये ख्यातस्य रसस्य महान् उदन्वान् समुद्रः क कुत्रापि देशे जागर्त्ति तिष्ठति नाम सम्भा व्यते नाम प्रश्ने वा क जागर्त्तीति पृच्छ्यते। तिष्ठतीति कथमवगतमित्यत आह अन्यथा शृङ्गारसमुद्रं विना लावण्यस्य सौन्दर्य्यस्य वैदग्ध्यस्य चातु र्य्यस्य च निधिराश्रय इयं भैमीरूपा श्रीर्लक्ष्मीः कस्मात् पयोधेः समुद्रात् उदस्थात् उत्पन्ना लक्ष्मीः "समुद्रादुत्पन्नेति प्रसिद्धं इयन्तु लावण्यवैद ग्ध्याभ्यां श्रियोऽप्यधिका तस्मात् शृङ्गाररससमुद्रादुत्पन्ना सन्समुद्रः क्वापि देशे वर्त्तत इत्यर्थः॥ ११५॥

Digitized by Google

साक्षात्सुधांशुर्मुखमेव भैम्या
दिवः स्फुटं लाक्षणिकः शशाङ्कः ।
एतद्भुवौ मुख्यमनङ्गचापं
पुष्पं पुनस्तद्गुणमात्रवृत्त्या ॥ ११६ ॥
लब्धे धृतं कुण्डलिके सुदत्या
ताडङ्कयुग्मं स्मरधन्विने किं ।

साक्षादिति ॥ भैम्या मुखमेव साक्षात् प्रधानभूतः उपमानभूत इति यावत् सुधांशुश्चन्द्रः दिवश्चाकाशस्य शशाङ्कश्चन्द्रः पुनः स्फुटं सुव्यक्तं लाक्षणिकः कलङ्कं मध्ये वर्ततीति तादृशः कलङ्कित्वेन मुखापेक्षया हीनत्वादुपमेय इत्यर्थः अथ च भैम्यामुखमेव साक्षादभिधावृत्त्या सुधांशुः सुधांशुपदेन भैम्या मुखमेव मुख्यवृत्त्या अभिधेयमित्यर्थः दिवोऽम्बरस्थ स्त्री शशाङ्कः पुनः स्फुटं निश्चितं लाक्षणिकः सुधांशुपदेन लक्षणया प्रतिपाद्यः एतदीयश्रियहृदयोगाद्गौण इत्यर्थः चन्द्रापेक्षयाप्युत्कृष्टं भैमीमुखमिति भावः तथा एतस्या भैम्या भुवौ मुख्यं प्रधानं अनङ्गचापं कामकार्म्मुकं अनङ्गचापपदेन एतद्भुवावेव अभिधया प्रतिपाद्ये इत्यर्थः अथ च मुख्यं मुखे भवं भूरूपं कामचापं । यत् पुनः पुष्पं अनङ्गचापत्वेन व्यवह्रियते तत्तयोर्भुवोर्गुणमात्रवृत्त्या उद्दीपकत्वादिगुणसम्बन्धेन गौण्या वृत्त्या । पुष्पे अनङ्गचापपदं लाक्षणिकमित्यर्थः अथ च पुष्पं यत् कामचापमित्युच्यते तद्गुणमात्रस्य भौर्वीमात्रस्य वृत्त्या अवस्थानेन । पुष्परूपकामचापापेक्षयापि भैमीभुवावतिकामोद्दीपिके इति भावः व्याख्यान्तराणि तु कष्टकल्पनया सम्भाव्यानीत्युपेक्षितानि ॥ ११६ ॥

लब्धे इति ॥ सुदत्या शोभनदन्तया भैम्या ताडङ्कयुग्मं कर्णभूषणीकृत ताडङ्कयुग्मं स्मरधन्विने कामधानुष्काय कुण्डलिके कुण्डलाकारे कर्णे

सव्यापसव्यं विशिखा विसृष्टा
स्तेनैतयोर्यान्ति किमन्तरेण ॥ ११७ ॥
तनोत्यकीर्त्तिं कुसुमायुधस्य
सैषा वतेन्दीवरकर्णपूरी ।
यतः श्रवःकुण्डलिकापराद्ध
शरं खलः ख्यापयिता तमाभ्यां ॥ ११८ ॥

ज्ञात्वा किं धृतं तया तेन कामेन सव्यापसव्यं दक्षिणवामहस्तक्षेपं यथास्यात्तथा विसृष्टा विमुक्ता विशिखा वाणा एतयोः कुण्डलिकयोरन्तरेण मध्येन किं यान्ति कटाक्षवाणाः कर्णताडङ्ककुण्डलाभ्यन्तरेण निर्यान्तीति भावः प्रवीणस्य धानुष्कस्य वाणा लक्ष्याभ्यन्तरेण यान्ति । सव्यापसव्यमिति कथञ्चित् क्रियाविशेषणं कर्त्तव्यं ॥ ११७ ॥

तनोतीति ॥ वतेत्याश्चर्य्ये सैषा भैमी इन्दीवरकर्णपूरी ताडङ्ककुण्डलिकाद्वयान्तर्निहितनीलोत्पलरूपकर्णभूषणद्वयं श्यामत्वात् कुसुमायुधस्य कामस्य अकीर्त्तिं अयशस्तनोति विस्तारयति नेदमिन्दीवरद्वयं किन्तु कामस्याकीर्त्तिरेवेत्यर्थः अकीर्त्तिविस्तार एव कथमित्यत आह यतो यस्माद्धेतोः खलो दुर्जन आभ्यां इन्दीवरकर्णपूराभ्यां ज्ञात्वा तं कुसुमायुधं श्रवसोः कर्णयोः कुण्डलिकारूपाल्लक्ष्यद्वयादपराद्धौ च्युतौ शरौ नीलोत्पलरूपौ वाणौ यस्य तादृशं ख्यापयिता वदिष्यति कामो वृथैव धानुष्कः यो भैमीश्रवःकुण्डलिकारूपलक्ष्याच्च्युतसायकः यतोऽद्यापि भमो कर्णयोर्नीलोत्पलरूपौ सायकौ तादृशलक्ष्याच्च्युतौ भूत्वा कर्णपूररूपेण तिष्ठत इति दुर्जनः कथयिष्यतीत्यर्थः । भैम्या इन्दीवरकर्णपूरद्वयं अत्यन्तकामोद्दीपकमिति भावः ॥ ११८ ॥

Digitized by Google

रजःपदं षट्पदकीटजुष्टं
हित्वात्मनः पुष्पमयं पुराणं।
अथात्मभूराद्रियतां स भैम्या
भ्रूयुग्ममन्तर्धृतमुष्टि चापं ॥ ११९ ॥
पद्मान् हिमे प्रावृषि खञ्जरीटान्
क्षिप्नुर्यमादाय विधिः क्वचित्तान्।

रज इति ॥ स आत्मभूः कामः रजसां परागाणां अथ च कालधूलीनां पदं स्थानं तथा षट्पदा भ्रमरा एव कीटा घुणास्तैर्जुष्टं सेवितं पुराणं जीर्णं आत्मनः स्वस्य पुष्पमयं चापं धनुर्हित्वा त्यक्त्वा अथ संप्रति भैम्या भ्रूयुग्मं भ्रूद्वयलक्षणं अन्तर्मध्ये आधेयत्वेन धृतामुष्टिर्येन तादृशं मुष्टिना मध्ये धृतत्वाददृश्यमानमध्यमित्यर्थः एवम्भूतं चापं धनुराद्रियतां नूतनं धनुः करोतु अन्योऽपि घुणोपहतं पुरातनं धनुर्हित्वा नवीनं धनुः करोति भैम्या भ्रूद्वयमतिकामोद्दीपकमिति भावः ॥ ११९ ॥

पद्मानिति ॥ विधिर्ब्रह्मा यं सारं आदाय तेभ्य आकृष्य तान् प्रसिद्धान् पद्मान् नीलकमलानि हिमे शीतकाले तथा खञ्जरीटान् खञ्जनपक्षिणः प्रावृषि वर्षाकाले च क्वचिदनिरूपितस्थाने क्षिप्नुः प्रक्षेपणशीलः सन् तेन पद्मादिभ्य आकृष्टेन सारेण श्रेष्ठांशेन कृत्वा प्रतिवर्षं वर्षे वर्षे एतदीयं भैमीसम्बन्धि दृष्टिद्वयं चक्षुर्युगं उच्चरतितरां पुष्णाति वर्द्धयति प्रतिवर्षं शीतकालादौ पद्माद्यदर्शनात् भैमीचक्षुषोः शोभाधिक्यदर्शनाच्च तदीयसारेणैव तयोः शोभावृद्धिर्ब्रह्मणा क्रियतइत्यर्थः

Digitized by Google

सारेण तेन प्रतिवर्षमुच्चैः
पृष्णाति दृष्टिद्वयमतदीयं॥ १२०॥
एतदृशोरम्बुरुहैर्विशेषं
भृङ्गो जनः पृच्छतु तद्गुणज्ञौ।
इतीव धात्रा कृततारकाक्षि
स्त्रीपुंसमाध्यस्थ्यमिवाक्षियुग्मे॥ १२१॥

अन्योऽपि शिल्पी नाशोन्मुखाद्वस्तुनः सारभागमाकृष्य अन्यद्विद्यमानं वस्तु वर्द्धयति भैमीनयनद्वयं नीलोत्पलादप्यतिसुन्दरं खञ्जनादप्यतिचञ्चलञ्चेति भावः॥ हेमन्ते पद्मानि नश्यन्ति वर्षासु च खञ्जना न दृश्यन्ते अत इदमुत्प्रेक्षितं अत्र पद्मानिति पद्मशब्दस्य वा पुंसि पद्मं नलिनमित्यमरवचनात् सम्भवत्यपि पुंस्त्वे प्रायेण तथा कवीनां व्यवहारादर्शनादप्रयुक्तत्वदोषोऽस्त्व्यः अतएव साहित्यदर्पणे भाति पद्मः सरोवरे इत्यप्रयुक्तत्वदोषोदाहरणं दत्तं॥ १२०॥

एतदिति॥ जन उभयोस्तारतम्यज्ञाने सन्दिग्धोलोकः अम्बुरुहैः पद्मैः सह एतस्या भैम्या दृशोश्चक्षुषोर्विशेषं तारतम्यं तेषामम्बुरुहाणां दृशोश्च गुणान् जानीतइति तादृशौ भृङ्गौ भृङ्गं भृङ्गीञ्च पृच्छतु इत्यभिप्रेत्यैव धात्रा ब्रह्मणा इह अस्मिन् अक्षियुग्मे भैमीनेत्रद्वये तारके कनीनिके एव अलिस्त्रीपुंसौ भ्रमरदम्पती तयोर्माध्यस्थ्यं मध्यभागवर्त्तित्वं अथ च विचारकारित्वं अक्रत कृतं मध्यस्थोहि सन्दिग्धानां संशयं छिनत्ति कमलानि परित्यज्य भ्रमरदम्पत्योरत्रागमनात् चक्षुषोरेवातिरमणीयत्वं ताभ्यां कथितमित्यर्थः भैमीनयने कमलादप्युत्कृष्टे इति भावः॥ १२१॥

Digitized by Google

व्यधत्त सौधे रतिकामयोस्त
त्पुत्रं वयोऽस्या हृदि वासभाजोः ।
तदग्रजाग्रत्पृथुशातकौम्भ
कुम्भौ न सम्भावयति स्तनौ कः ॥ १२२ ॥
अस्याभुजाभ्यां विजिताद्बिसात्किं
पृथक्करोऽग्रह्यत तत्प्रसूनं ।

व्यधत्तेति । तयोरतिकामयोर्भैम्या वयोयौवनं कर्तृ अस्या भैम्या हृदि वासभाजोर्निवसतोर्रतिकामयोः सौधे प्रासादौ व्यधत्त चकार सौधद्वये प्रमाणमाह कोऽजनः अस्याः स्तनौ तयोः सौधयोरग्रे आग्रतौ प्रकाशमानौ पृथू पीवरौ शातकुम्भस्य स्वर्णस्य कुम्भौ कलसौ न सम्भावयति न वितर्कयति अपि तु सर्व्व एव सम्भावयति अतो यौवनेन भैमीहृदये रतिकामयोः प्रासादौ कृतावित्यनुमितं अन्यत्रापि प्रासादोपरि स्वर्णकुम्भः स्थाप्यते भैम्याः स्तनौ स्वर्णकुम्भवन्मनोज्ञौ अत्यन्तकामोद्दीपकौ चेति भावः अन्योऽपि भक्तः प्रभोः स्वर्णकलसादियुक्तं प्रासादं रचयति । वयस्तावच्चे वाल्यादाविति हेमचन्द्रः ॥ १२२ ॥

अस्या इति । अस्या भैम्या भुजाभ्यां बाहुभ्यां विजितात् पराजितात् बिसात् मृणालात् पृथक् प्रत्येकं तस्य बिसस्य प्रसूनं पुष्पं कमलमुत्पलम् करो राजग्राह्यभागोऽग्रह्यत गृहीतः किं अथ च करः पाणिः नैतौ पाणी किन्तु विजितविसदत्तवलिरूपकमलद्वयमिति वितर्कः कुत एतदित्याह स्थाह इव भुजद्वये तत्पार्श्वभूतं बिसप्रसूनं श्रियः शोभाया अथ च लक्ष्म्याऽग्रहावसतिस्थानं श्रीगृहत्वेन केनैकेनं ईक्ष्यते न दृश्यते अपि तु

Digitized by Google

इष्यते तन्न गुणाः श्रियः कै
र्न गीयते वा क एव लोकैः ॥ १२३ ॥
छद्मैव तच्छम्बरजं बिसिन्या
स्तत्पद्ममस्यास्तु भुजाग्रसद्म ।
उत्कण्टकादुद्गमनेन नाला
दुत्कण्टकं प्रातशिखैर्नखैर्यत् ॥ १२४ ॥

सर्व्वैरेव इष्यते तथा कैर्व्वा लोकैः क एव कशब्देनैव न गीयते न कीर्त्यते अपि तु सर्व्वैरेव गीयते प्रत्यक्षसिद्धस्यानपलपनीयत्वात् जनप्रवादस्यामूलत्वाभावाच्च सत्यमेव तदित्यर्थः भैम्याबाहुकरं बिसकमलाभ्यामप्यतिरमणीयमितिभावः । मृणाः पुंसि च भूम्न्येवेत्यमरः ॥ १२३ ॥

छद्मैवेति ॥ तत् प्रसिद्धं शम्बरजं जलाज्जातं बिसिन्याः पद्मिन्याः पद्मं छद्मैव अलीकमेव अथच शम्बरादैत्यविशेषाज्जातं तत् छद्मैव मायारूपमेव तर्हि तत् सत्यं किं तत्राह अस्या भैम्यास्तु पुनर्भुजाग्रमेव सद्म यस्य तादृशं तत् पद्मं तदेव सत्यं पद्ममित्यर्थः कुत एतदित्याशङ्क्याह यद्यस्मात् उत्कण्टकात् उद्गतरोमाञ्चात् अथ च उद्गततीक्ष्णाग्रावयवविशेषात् नालात् भुजदण्डात् अथ च पद्मदण्डात् उद्गमनेन उद्भवेन हेतुना प्रातशिखैस्तीक्ष्णाग्रैर्नखैः कृत्वा भुजाग्रसद्मपद्ममेव उत्कण्टकं उद्गतकण्टकं बिसिनीपुष्पं यदि वास्तविकपद्ममेव स्यात् तर्हि उत्कण्टकनालोत्पन्नत्वेन उत्कण्टकमेव स्यात् कार्य्यकारणयोः समानगुणत्वस्यावश्यम्भावात् एतद्भुजाग्रसद्मपद्मन्तु उत्कण्टकनालादुत्पन्नञ्च उत्कण्टकञ्च तस्मादिदमेव वास्तविकपद्ममित्यर्थः । शम्बरो दैत्यहरिणमत्स्यशैलजिनान्तरे । नपुंसकन्तु सलिलबौद्धव्रतविशेषयोरिति मेदिनी ॥ १२४ ॥

Digitized by Google

आगर्त्ति मर्त्येषु तुलार्थमस्या
योग्येति योग्यानुपलम्भनं नः ।
यद्यस्ति नाके भुवनेऽथवाध
स्तदा न कौतस्कुतलोकबाधः ॥ १२५ ॥
नमः करेभ्योऽस्तु विधेर्न्न वास्तु
स्पृष्टं धियाप्यस्य न किं पुनस्तैः ।

आगर्त्तीति ॥ मर्त्त्येषु मर्त्यलोकेषु अस्या भैम्यास्तुलार्थं सादृश्यार्थं योग्या उचिता कापि सुन्दरी आगर्त्ति तिष्ठति इति इत्यमाशङ्कायां नोऽस्माकं योग्यानुपलम्भनं योग्यायाः सदृश्या अनुपलम्भनं अनुपलब्धिः सदृश्यन्तरानुपलब्धेरेव साशङ्का कर्त्तुं न युज्यत इत्यर्थः यत्र योग्यत्व तदनुपलम्भनञ्चेति तत् अभावप्रतीतौ मीमांसकादिभिरुक्तं योग्यानुपलम्भनरूपं प्रमाणमेव तदाशङ्कानिवारकमित्यर्थः तच्च प्रतियोगिसत्तापादकआपत्तिविषयोपलब्धिप्रतियोगिकलक्ष्यं तथाहि मर्त्यलोकेषु यदि भैमी सदृशी विद्येत तदा तद्वत्तया ते अस्माभिरुपलभ्येरन् नचोपलभ्यन्ते तस्मात् मर्त्येषु न कापि भैमीसदृशी विद्यत इत्यर्थः तर्हि स्वर्गे पाताले वा स्यादित्याशङ्काह यदि नाके स्वर्गे अथ वा अधोभुवने पाताले एतद्योग्या अस्ति तर्हि कौतस्कुतस्य कुतः कुतश्चागतस्य लोकस्य स्वर्गपातालाभ्यामपि समागतस्य देवलोकस्य नागलोकस्य च बाधः संमर्द्दो न स्यात् यस्माज्जातस्तस्मात् स्वर्गपातालयोरप्येतत्सदृशी नास्ति अन्यथा देवलोका नागलोकाश्चात्र नागच्छेयुरिति भावः । कौतस्कुत इति कुतः कुत आगत इति ठञ् कस्कादित्वात् विसर्गाभावः ॥ १२५ ॥

नमइति ॥ विधेर्ब्रह्मणः करेभ्यो भैमीनिर्म्माणकुशलेभ्यो नमोऽस्तु वा अथ वा तेभ्यो नमो नास्तु यतोऽस्य ब्रह्मणो धियापि बुद्ध्यापि इदंरूपं

स्पर्शादिदं स्यात्मुदितं हि शिल्पं
मनोभुवोऽनङ्गतयानुरूपं ॥ १२६ ॥
इमां न मृद्वीमसृजत् कराभ्यां
वेधाः कुशाध्यासनकर्कशाभ्यां ।
शृङ्गारधारां मनसा न शान्ति
विश्रान्तिधन्वाध्वमहीरुहेण ॥ १२७ ॥

शिल्पं न सृष्टं तैः करैः पुनः सृष्टमिति किं वाच्यं एतदपि कथमित्यत आह हि यस्मादिदमतिमृदु भैमीरूपं शिल्पं स्पर्शात् हस्तादिसंस्पर्शात् मुदितं मृदितं स्यात् तर्हि केन निर्म्मितमित्याह इदं शिल्पं अनङ्गतया निरवयवत्वेन मनोभुवः कामस्य अनुरूपं योग्यं कामएवास्य निर्म्माता न पुनर्विधिस्तस्मात् कामायैव नमोऽस्त्वित्यर्थः ॥ १२६ ॥

इमामिति ॥ वेधा विधाता मृद्वीं कोमलाङ्गीं इमां भैमीं कराभ्यां पाणिभ्यां न असृजत् न निर्म्मितवान् किम्भूताभ्यां यतः कुशस्य कुशाङ्कुरी यस्य अध्यासनेन अधिष्ठानेन कर्कशाभ्यां कठिनाभ्यां न हि कोमलं कठिनेन सृज्यते तर्हि मनसोनिरवयवत्वात् तेनैवासृजदित्याशङ्क्याह शृङ्गारधारां शृङ्गारप्रवाहमयीं अनवच्छिन्नशृङ्गाररसामिमां मनसापि नासृजत् किम्भूतेन यतः शान्तेः शान्तरसस्य विश्रान्त्यै विश्रामाय धन्वाध्वनि मरुदेशमार्गे महीरुहेण वृक्षरूपेण सदा शान्तरसयुक्तेनेत्यर्थः न हि शान्तरसावलम्बिना शृङ्गाररसमयी वस्तु सृज्यते तस्माद्विधिना कराभ्यां मनसा वा नेयं सृष्टेत्यर्थः ॥ १२७ ॥

Digitized by Google

उन्नास्य धातुस्तुलिता करेण
श्रोणौ किमेषा स्तनयोर्गुरुर्व्वी।
तेनान्तरालैस्त्रिभिरङ्गुलीना
मुदीतमध्यत्रिवलीविलासा॥ १२८ ॥
निजामृतोद्यन्नवनीतजाङ्गी
मेतां क्रमोन्मीलितपीतिमानं।

उन्नास्येति ॥ एषा भैमी श्रोणौ नितम्बदेशावच्छेदेन किं गुरुः किम्वा कुचयोः स्तनद्वयावच्छेदेन गुर्व्वीति ज्ञातुं धातुर्विधातुः करेण उन्नास्य उत्तोल्य एषा तुलिता परिमिता तेनैव हेतुना एषा धातुरङ्गुलीनां त्रिभिरन्तरालैरभ्यन्तरैः कृत्वा उदीतउद्भूतोमध्ये मध्यदेशे त्रिवलीविलासो यस्यास्तादृशी किमिति किंशब्दोऽत्र योज्यः अति पीवरश्रोणिरतिपीवरस्तनी चेयमिति भावः॥ १२८॥

निजेति॥ इन्दुश्चन्द्र इमां भैमीं निजादात्मीयादमृतादुद्यत् उत्पन्नं यन्नवनीतं तत्सारभूतं तस्माज्जायत इति तादृशं चाङ्गं यस्यास्तादृशीं तथा क्रमेण उन्मीलितः प्रकटीभूतः पीतिमा यस्या एवम्भूतां च कृत्वा आत्मना स्वयमेव अस्या भैम्या मुखमभूत् नवनीते हि क्रमेण पीतिमा जायते तन्निर्म्मितत्वात्तस्याअपि पीतत्वं जातं ननु पद्ममपि तन्मुखीभवितुं शक्नोति तत्कथं चन्द्र एव तज्जातमित्युक्तमित्यत आह अम्बुजेन पद्मेन पुनर्भैमीमुखं दुर्घटं घटयितुमशक्यं किम्भूतेन यतो निद्रालुना रात्रौ निमीलनशीलेन तन्मुखन्तु सदा प्रफुल्लं इदन्तु रात्रौ सङ्कुचितं भवतीति

कृत्वेन्दुरस्यामुखमात्मनाभू
न्निद्रालुना दुर्घटमम्बुजेन ॥ १२९ ॥
अस्याः स चारुर्म्मधुरेव कारुः
श्वासं वितेने मलयानिलेन ।
अमूनि पुष्पैर्विदधेऽङ्गकानि
चकार वाचं पिकपञ्चमेन ॥ १३० ॥
कृतिः स्मरस्यैव न धातुरेषा
नास्याधि शिल्पीतरकारुजेयः ।

तेनैतद्दुर्घटमित्यर्थः अन्योऽपि निद्रालुः सुन्दरवस्तु निर्म्मातुं न शक्नोति अतिकोमलाङ्गी चन्द्रमुखी चेयमिति भावः ॥ १२९ ॥

अस्या इति ॥ स प्रसिद्धश्चारुर्निर्म्माणकुशलो मधुर्व्वसन्त एव अस्याः कारुर्निर्म्माता यतः स मलयानिलेन अस्याः श्वासं सुगन्धिनिश्वासं वितेने निर्म्ममे तथा पुष्पैश्चम्पकादिभिरस्या अमूनि अतिगौराणि अङ्गकानि अतिकोमलानि शरीराणि विदधे तथा पिकानां कोकिलानां पञ्चमेन स्वरेण अस्या वाचं मधुरं वचनं चकार मलयानिलादि सर्व्वं वसन्तस्यैवाधीनं अतस्तैस्तैरुपकरणैर्व्वसन्त एवास्या निर्म्मातेत्यर्थः सुगन्धिनिश्वासा गौरकोमलाङ्गी मधुरवचना चेयमिति भावः कोकिलो वसन्ते पञ्चमस्वरेण रौति तथाहि षड्जं मयूरो वदति वसन्ते तु पञ्चमं । पुष्पसाधारणे काले पिकः कूजति पञ्चममिति ॥ १३० ॥

कृतिरिति ॥ एषा भैमीरूपा कृतिर्निर्म्मितिः स्मरस्यैव कामस्यैव धातुर्ब्रह्मणो न हि यस्मात् अस्या भैम्याः शिल्पी इतरैः कारुभिः शिल्पि

Digitized by Google

रूपस्य शिल्पे वयसा च वेधा
निर्जीयते स्म स्मरकिङ्करेण ॥ १३१ ॥
गुरोरपीमां भणदोष्ठकण्ठं
निर्बन्धिगर्व्वच्छिदया विनेतुं।
श्रमः स्मरस्यैष भवं विहाय
मुक्तिं गतानामनुतापनाय ॥ १३२ ॥

भिर्जेयः पराभवनीयो न भवेतेन धातुर्निर्म्माणकृतं रूपं निरवद्यमित्युत्प्रेक्षते त्याह स वेधा विधाता स्मरस्य किङ्करेण सेवकेनापि वयसा यौवनेन रूपस्य शिल्पे निर्म्माणविषये निर्जीयते पराभूयते विधात्रा यत्कृतं यत् रूपं सृज्यते ततोऽप्यधिकं यौवनेन सृज्यते अतो वेधा यौवनेन पराभूतस्तस्माद्विधातुर्नैयं सृष्टिरित्यर्थः ॥ १३१ ॥

गुरोरिति ॥ इमां भैमीं भवान् वर्णयतु गुरोरपि अतिशायकस्य बृहस्पतेरपि ओष्ठकण्ठं ओष्ठं कण्ठञ्च कर्म्म निरस्तौ वर्णयितुमशक्तस्यापि निर्बन्धनविषये योऽसौ गर्व्वोऽहङ्कारस्तस्य छिदया निराकरणेन हेतुना विनेतुं विनीतं कर्त्तुं अद्यप्रभृति त्वया निर्बन्धनं न कर्त्तव्यमिति शिक्षयितुं तथा भवं संसारं विहाय त्यक्त्वा मुक्तिं गतानां जीवन्मुक्तानां नारदादीनां अनुतापनाय भैमीसद्भावात् संसार एव मोक्षोऽयं संसारं परित्यज्य किमिति मुक्ता जाता इति तेषां अनुतापं जनयितुञ्च भैमीनिर्म्माणरूपः श्रमः प्रयासः स्मरस्यैव कामस्यैव न तु विध्यादेः। ओष्ठकण्ठमिति प्राण्यङ्गत्वादेकवद्भावः ॥ १३२ ॥

Digitized by Google

आख्यातुमच्छिप्रजसर्व्वपीतां
भैमीं तदेकाङ्गनिखातदृक्षु ।
गाथासुधाश्लेषकलाविलासै
रलञ्चकाराननचन्द्रमिन्द्रः ॥ १३३ ॥
स्मितेन गौरी हरिणी दृशेयं
वीणावती सुस्वरकण्ठभासा ।

आख्यातुमिति ॥ इन्द्रस्तस्या भैम्या एकाङ्गे एकैकस्मिन्नप्यवयवे निखाता समारोपिता दृक् दृष्टिर्यैस्तादृशेषु स्तिमितनयनत्वात् केवलमेकैकमेवाङ्गं साभिलाषं पश्यत्सु राजसु मध्ये अच्छिप्रजैः सहस्रसंख्यैर्नयनैः सर्व्वेषु अङ्गेषु पीतां साभिलाषं दृष्टसर्व्वावयवां भैमीं आख्यातुं वर्णयितुं गाथा श्लोक एव सुधा अमृतं तस्या या श्लेषकला श्लेषालङ्कारविद्या तस्या विलासैः श्लेषालङ्कारयुक्तश्लोकनिर्म्माणकौशलैराननचन्द्रं मुखचन्द्रं अलङ्चकार भूषितवान् वक्ष्यमाणप्रकारेण श्लेषेण तां वर्णयामासेत्यर्थः । चन्द्रोऽपि सुधासम्पर्कितषोडशकलाविलासैरलङ्कृतो भवति ॥ १३३ ॥

इन्द्रप्रणीतां श्लिष्टगाथामेवाह ॥ स्मितेनेति ॥ इयं भैमी स्मितेन हास्येन गौरी शुक्ला अथ च अप्सरोविशेषः पार्व्वती वा वरवर्णधूर्व्वा तथा दृशा दीर्घचक्षुषा हरिणी कुरङ्गी अथ च अप्सरोविशेषः तथा सुस्वरकण्ठभासा अतिमधुरकण्ठस्वरश्रिया वीणावती विपञ्चीवाद्ययुक्ता अथ च अप्सरोविशेषः सरस्वती वा तथा कायप्रभया अङ्गकान्त्या हेमैव सुवर्णमयेव अथ च हेमा स्वर्गवेश्याप्सरोविशेष एव तथा अस्या अङ्गानां अवयवानां श्लेषैः कृत्वा अवशिष्टान्यङ्गानि दृष्ट्वेत्यर्थः वापि तन्वी सुन्दरी मे मम मतिं बुद्धिं गाह्नामति न बुद्धिविषयिणी भवति एतदवशिष्टा

हेमैव कायप्रभयाङ्गमेषै
स्तन्वी मतिं क्रामति मे न कापि ॥ १२४ ॥
इति ब्रुवाणः सविधे नलेन
विलोकितः शङ्कितमानसेन ।
व्याहृत्य मर्त्योचितमर्थमुक्ते
राजस्तस्य नुनोद शङ्कां ॥ १२५ ॥
स्वं नैषधादेशमहो विधाय
कार्य्यस्य हेतोरपि नालसः सन् ।

स्त्रानां साम्यं न कुत्रापि तन्व्यां पश्यामीत्यर्थः अथ च एतस्या अङ्गश्रेणिः मत्वा तन्वी मेनका अप्सरोविशेषोऽपि मतिं क्रामति एतस्या अङ्गानि दृष्ट्वा मेनकाऽप्सरा अपि लज्जतइत्यर्थः साम्यान्मेनकेयमिति भावः ॥१२४॥

इतीति ॥ सविधे नलस्य समीपे इत्येवंप्रकारेण ब्रुवाणो गौर्थ्यार्थ श्लेषेण भैमीं वर्णयन् आखण्डल इन्द्रः शङ्कितमानसेन कथमयं भैमीं अप्सरस्त्वेन स्तौति नूनमयं मद्वेषधारी इन्द्रो भवेदिति संशयितान्तःकरणेन नलेन विलोकितः सोत्कण्ठमीक्षितः सन् उक्तेः क्रितेने त्यादिगौर्थ्यार्थप्रतिपादकस्ववचनस्य मर्त्योचितं अर्थं मनुष्ययोग्यं श्लेषेत्यादिप्रथमार्थं व्याहृत्य व्याख्याय तस्य नलस्य शङ्कां नुनोद अपनीतवान् प्रथमार्थं श्रुत्वा ममवान्यथा बुद्धिर्जाता नलयमिन्द्रः किन्तु कश्च न राजेति मत्वा नलः शङ्कां तत्याजेति भावः ॥ १२५ ॥

स्वमिति ॥ अहो आश्चर्य्यं स इन्द्रः कार्य्यस्य भैमीप्राप्तिलक्षणस्य हेतोः स्वमात्मानं नैषधादेशं नलरूपमादेशं विधाय नलरूपं धृत्वेत्यर्थः अनलो

Digitized by Google

किं स्थानिवद्भावमधत्त दुष्ट
तादृक्कृतव्याकरणः पुनः सः ॥ १३६ ॥

न सन्नपि नलाभिन्नो न भवन्नपि अपितु नल एव भवन्नपि नलरूपो वा मनुष्यो भवन्नपि वा स्थानिवत् अतिप्रतारणचतुरैन्द्रविग्रहवत् दुष्टं निन्दितं भावं आशयं किं किमर्थं अधत्त धृतवान् अयमस्य दुष्टभावो ज्ञातइत्यतआह किंभूतः यतः स इन्द्रः पुनः तादृक् मर्त्त्योचितं कृतं व्याकरणं व्याख्यानं येन तादृशः इन्द्ररूपत्वे तस्य दुष्टाशयत्वं युक्तं तस्य परप्रतारणस्वभावात् नलरूपत्वे तु तन्न युज्यते नलस्य सर्व्वथाप्य दुष्टाशयत्वात् नलरूपं धारयतोऽप्यस्य मर्त्त्योचितव्याख्यानरूपपरप्रतारणमयुक्तमेवेतिभावः। अथच सन् पण्डित एष ना पुरुषइन्द्रस्तादृक् कृतव्याकरणः विहिततथाविधैन्द्रव्याकरणः सन् स्वं स्वकर्तृकं धादेशं नहोधइत्यादिना हकारादीनां स्थाने धकारादेशं विधाय कृत्वा अनन्तरं अनलः अल्प्रत्ययशून्यस्य कार्य्यस्य उवादेशेर्हेतोर्दुष्टं असर्व्वविषयत्वान्निन्दितं स्थानिवद्भावं भूप्रभृत्यादेशस्य असादिस्थानितुल्यत्वं किं न अधत्त कृतवान् अपि तु अधत्तैव अयमर्थः नद्धइत्यादौ स्थानिवद्भावोनाङ्गीकृतः यतस्तथात्वे धकारस्य हकारस्थानित्वेन तत्तुल्यत्वात् तदुत्तरस्य क्तादितकारस्य स्थाने धोऽधातूर्थ्यादित्यादिना धकारो न स्यात् तूर्य्यपरत्वाभावात् भुवौभुव इत्यादौ तु उवादिकार्य्यार्थं स्थानिवद्भावोऽङ्गीकृतः अन्यथा असादिधातोः स्थाने आदिष्टस्य भूप्रभृतेर्धातुत्वाभावात् गुडावित्यादिना उवादिकार्य्यं न स्यात् अतएव क्वाचित्कत्वात् स दुष्ट इति उप्रत्ययस्य ऐन्द्रादिव्याकरणे अल् इति संज्ञा तस्मिन् परे इयुवादेशौ न भवतः तस्य कुटादिवर्ज्जमित्यादिना व्यैकादित्वात्। अत्र अनित्युपलक्षणं यावन्ङिन्तिङ्कृतां ग्रहणं। व्याख्यानान्तराणि तु कुसृष्टिकल्पनाकल्पितत्वादुपेक्षितानि ॥ १३६ ॥

Digitized by Google

इयमियमधिरथ्यं याति नेपथ्यमञ्जु
र्विशति विशति वेदीमुर्वशी सेयमुर्व्याः ।
इतिजनजनितैः सानन्दवादैर्विजज्ञे
नलहृदि परभैमीवर्णनाकर्णनाप्तिः ॥१३७॥

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यं ।
तर्केष्वप्यसमश्रमस्य दशमस्तस्य व्यरंसीन्महाकाव्ये
चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥१३८॥

अथ छन्दोऽन्तरेण सर्गशेषं सूचयति । इयमिति । नेपथ्येन भूषणेन मञ्जुरतिरुचिरा इयमियं भैमी अधिरथ्यं रथ्यायां सभाप्रान्तप्रतोल्यां याति गच्छति तथा सेयमतिप्रसिद्धा उर्व्याः पृथिव्या उर्वशी देवाङ्गना विशेषो भैमी वेदीं सभावेदिकां विशति विशति इत्येवंप्रकारैर्जन जनितैर्लोककृतैः सानन्दवादैः सहर्षवचनैः कर्तृभिः नलहृदि नलान्तः करणे वर्त्तमाना परा श्रेष्ठा परैः कृता वा या भैमीवर्णना तस्या यत् आकर्णनं श्रवणं तस्य आप्तिर्लाभो विजज्ञे विघ्निता भैमीदर्शनेन सम्भ्रान्तानां जनानां कोलाहलेन अन्यैः कृता भैमीवर्णना नलेन न श्रुते त्यर्थः । इयमियमिति विशतिविशतीति च वाक्यद्वयं यावदिच्छमा धिक्ये इत्यनेन सम्भ्रमे द्विरुक्तिः । १३७ ।

श्रीहर्षमिति । न केवलं काव्यानुशीलने किन्तु तर्केष्वपि तर्कशास्त्रे ष्वपि असमोऽनिरुपमः श्रमोऽभ्यासायासोयस्य तादृशस्य तस्य नैषधीय चरिते महाकाव्ये दशमः सर्गो व्यरंसीत् विरतः समाप्तः । १३८ ।

इतिश्रीप्रेमचन्द्रन्यायरत्नविरचितायामन्वयबोधिकासमाख्यायां नव धटीकायां दशमः सर्गः समाप्तः ।

Digitized by Google

॥ अथैकादशः सर्गः ॥

तां देवतामिव मुखेन्दुवसत्प्रसादां
सद्दृशा रसादनिमिषेण निभालयन्तीं ।

अथ सरस्वतीकर्त्तृकराजगणवर्णनरूपमेकादशसर्गमारभमाणः पूर्व्वं सर्गसूचितसभाप्रवेशोपक्रमाया भैम्याः संप्रति सभाप्राप्तिं वर्णयति ॥ तामिति । भीमभूमोङ्गजा भैमी तदनु तत्पश्चात् इयमियमधि रथ्यमित्यादिराजगणसानन्दवादानन्तरं चेतसि मनसि धृतस्य वरश्री यत्नेन निश्चितस्य वरस्य जामातुर्नलस्य अथ च देवतादेरभीप्सितस्य लाभाय प्रार्थ्ये देवतामिव तां राजसभां बभाज प्राप्तवती यथा कश्चित् वरस्य अभीप्सितस्य लाभाय देवतां भजति तथेत्यर्थः किम्भूतां राजसभां देवतां च मुखेन्दौ सभ्यानां मुखचन्द्रे वसन् प्रसादः प्रसन्नता पक्षे अभीप्सितं वरयेत्यादिप्रसादवचनं यस्यास्तादृशीं तथा रसादनु रागात् अनिमिषेण निमेषशून्येन सद्दृशा चक्षुषा निभालयन्तीं पश्यन्तीं अथच स्वभावतोऽनिमिषेण चक्षुषा रसात् भक्त्यतिशयेन प्रीतत्वात् भक्तां पश्यन्तीं अत्र देवतामिवेत्युपमया यथा प्रसन्नदेवताभजनेनावश्यमेव

लाभाय चेतसि धृतस्य वरस्य भीम
भूमीन्द्रजा तदनु राजसभां बभाज ॥ १ ॥
तन्निर्म्मलावयवभित्तिषु तद्विभूषा
रत्नेषु च प्रतिफलन्निजदेहदम्भात् ।
दृष्ट्या परं न हृदयेन न केवलं तैः
सर्व्वात्मनैव सुतनौ युवभिर्म्ममज्जे ॥ २ ॥
द्यामन्तरा वसुमतीमपि गाधिजन्मा
यद्यन्यमेव निरमास्यत नाकलोकं ।

अभिलषितसिद्धिर्भवति तथा राजसभाभजनेनास्या अवश्यमेव नल लाभो भविष्यतीतिसूचितं । वरोवृतौ विटे जामातरि श्रेष्ठे देवतादेर भीप्सिते इतिहेमचन्द्रः । अस्मिन् सर्गे वसन्ततिलकावृत्तं उक्ता वसन्त तिलका तभजाजगौग इति लक्षणात् ॥ १ ॥

तन्निर्म्मलेति ॥ तैर्युवभिः सुतनौ भैम्यां परं केवलं दृष्ट्या चक्षुषा न म मज्जे तथा केवलं हृदयेन मनसा न ममज्जे किन्तु तस्या भैम्यानिर्म्मला सु स्वच्छासु अवयवभित्तिषु शरीरप्रदेशेषु तथा तस्या भूषारत्नेषु अल ङ्कारमणिषु च प्रतिफलन् प्रतिबिम्बतां गच्छन् योनिजदेहः स्वशरीरं तस्य दम्भाद्व्याजात् सर्व्वात्मनैव सर्व्वावयवेनैव ममज्जे मग्नीभूतं । भित्तिः कुड्यप्रदेशयोरितिमेदिनी ॥ २ ॥

द्यामिति ॥ गाधिजन्मा विश्वामित्रोद्यां स्वर्गं वसुमतीमपि पृथिवीञ्च अन्तरा स्वर्गमर्त्त्ययोर्मध्ये अन्यमेव नाकलोकं यदि निरमास्यत अकरि ष्यत् तदा स नाकलोकस्य यादृक् चारुः सुन्दरोऽभविष्यत् तदस्य स्वय म्बरसमाजोऽर्द्धमाकाशं अवलोकितुं स्वयम्बरकौतुकं द्रष्टुमागतानां

चारुः स यादृगभविष्यदभूद्विमानै-
स्तादृक् तदभ्रमवलोकितुमागतानां ॥ ३ ॥
कुर्व्वद्भिरात्मभवसौरभसंप्रदानं
भूपालचक्रचलचामरमारुतौघं ।
आलोकनाय दिवि सञ्चरतां सुराणां
तत्रार्च्चनाविधिरभूदधिवासधूपैः ॥ ४ ॥
तत्रावनीन्द्रचयचन्दनचन्द्रलेप
नेपथ्यगन्धमयगन्धवहप्रवाहं ।

देवानां विमानैर्व्योमयानैः कृत्वा तादृक् मार्ग अभूत् अन्तरीक्षनिर्म्मि तस्वर्गतुल्यं स्वयम्बरसमाजोऽभ्रमाकाशमभूदित्यर्थः । अवलोकितुमिति भौवादिकस्य लोकधातोरूपं ॥ ३ ॥

कुर्व्वद्भिरिति ॥ तत्र स्वयम्बरदेशे अधिवासधूपैः सभाधिवासनार्थं विहितैर्धूपैः कृत्वा आलोकनाय स्वयम्बरकौतुकं द्रष्टुं दिवि आकाशे सञ्च रतां सुराणां अर्च्चनाविधिः पूजाविधानं अभूत् किम्भूतैः भूपालचक्रस्य राजसमूहस्य चलानि चञ्चलानि यानि चामराणि तेषां मारुतौघं वायु संघं आत्मभवस्य स्वोत्पन्नस्य सौरभस्य संप्रदानं दानपात्रं कुर्व्वद्भिः चलचामरवायुवशात् गगनतलमुद्गच्छद्भिर्धूपैर्देवाः परितुष्टा जाता इत्यर्थः ॥ ४ ॥

तत्रेति ॥ तत्र स्वयम्बरसमाजे भृङ्गवर्गोभ्रमरसमूहः अवनीन्द्र चयस्य राजसमूहस्य यश्चन्दनचन्द्रलेपश्चन्दनयुक्तकर्पूरैरङ्गरागस्तद्रूपं यन्नेपथ्यं भूषणं तस्य गन्धमयः परिमलवाही योगन्धवहो वायुस्तस्य प्रवाहं प्रकर्षेण वहनं आलीभिः पंक्तिभिः संरुध्य आवृत्य सौरभं तत्य

Digitized by Google

आलीभिरापतदनङ्गशरानुकारी
संरुध्य सौरभमगाहत भृङ्गवर्गः ॥ ५ ॥
उत्तुङ्गमङ्गलमृदङ्गनिनादभङ्गी
सर्व्वानुवादविधिबोधितसाधुमेधाः ।
सौधस्रजः स्रुतपताकतयाभिनिन्यु
र्मन्ये जनेषु निजताण्डवपण्डितत्वं ॥ ६ ॥
संभाषणं भगवती सदृशं विधाय
वाग्देवता विनयबन्धुरकन्धरायाः ।

रिमत्वं अगाहत विलोडितवान् किम्भूतः आपतन्तो आगच्छन्तोऽनङ्ग शराः कामबाणास्तान् अनुकरोतीत्येवंशीलः पतत्कामबाणसदृश इत्यर्थः सौगन्ध्यबाहुल्यात् भ्रमराः मेघीभूता भूत्वा सर्व्वत्र प्रचरन्ति स्मेति भावः अन्योऽपि वस्त्रादिना वायुं संरुध्य सौरभं गाहते । मनसाराय कसंयः सिताम्भोहिमवाशुवेत्यमरः ॥ ५ ॥

उत्तुङ्गेति । सौधानां तवत्यसदनानां स्रजः मालाः स्रुतपताकतया चञ्चलपताकतया जनेषु सभ्यनृपतिषु निजताण्डवपण्डितत्वं स्वीयनृत्य कौशलं अभिनिन्युः अभिनयेन दर्शयामासुः इत्यहं मन्ये सम्भावयामि किम्भूताः उत्तुङ्गोऽतितारो यो मङ्गलमृदङ्गनिनादो माङ्गलिकविवाह मुरजध्वनिस्तस्य या भङ्गिः प्रकारविशेषास्तासां यः सर्व्वानुवादविधिः सकलसम्पादक्रिया सकलस्य मृदङ्गशब्दस्य प्रतिशब्दक्रियेति यावत् तेन बोधिता ज्ञापिता साध्वी उत्कृष्टा मेधा धारणात्मिका बुद्धिर्याभिस्तादृश्यः अन्या अपि नर्त्तक्यो मृदङ्गनिनादभङ्गीनामनुवादेन स्वीयनृत्यकौशलं हस्ताद्य भिनयेन सभ्येषु दर्शयन्ति ॥ ६ ॥

अथ सरस्वतीकर्त्तृकवरवर्णनरूपं सर्गप्रस्तुतमुत्थापयति ॥ सम्भाषण मिति । चतुर्दशजगतां चतुर्दशभुवनानां जनताभिर्जनसमूहैर्नमस्या

Digitized by Google

ऊचे चतुर्दशजगज्जननातमस्या
तत्राश्रिता सदसि दक्षिणपक्षमस्याः ॥ ७ ॥
अभ्यागमन्मखभुजामिह कोटिरेषा
येषां पृथक्कथनमब्दशतानि पाति ।
अस्यां वृणीष्व मनसा परिभाव्य कञ्चि
द्यं चित्तवृत्तिरनुधावति तावकीना ॥ ८ ॥
एषां त्वदीक्षणरसादनिमेषतैषा
स्वाभाविकानिमिषतामिलिता यथाभूत् ।

पूज्या भगवती ऐश्वर्य्यसामग्र्यादिषड्गुणयुक्ता वाग्देवता सरस्वती विन येन बन्धुरा नम्रा कन्धरा शिरोधिर्य्यस्यास्तथाविधाया अस्या भैम्याः सदृशं योग्यं सम्भाषणं विधाय कृत्वा तत्र सदसि स्वयम्बरसमाजे अस्या दक्षिणपक्षं दक्षिणपार्श्वं अथच अनुकूलपक्षं आश्रिता सती ऊचे वक्ष्य माणमुवाच । भगवतीत्यादिविशेषणेन सरस्वत्यादेवादिवर्णनसामर्थ्यं दक्षिणपक्षमित्यनेन च भैमीपक्षपातित्वं सूचितं ॥ ७ ॥

यदूचे तदाह ॥ अभ्यागमदिति ॥ हे दमयन्ति इह सभायां मखभुजां देवानां एषा कोटिरभ्यागमत् आगता बहुसंख्यका देवा अत्रागता इत्यर्थः येषां मखभुजां पृथक्कथनं पार्थक्येन वर्णनं अब्दशतं वत्सरशतं अति पतति अतिक्रामतीति तादृशं वत्सरशतेनापि वक्तुमशक्यमित्यर्थः तस्मात् अस्यां मखभुजां कोटौ मध्ये यं कञ्चित् मखभुजं तावकीना त्वदीया चित्तवृत्तिर्बुद्धिरनुधावति वरणीयत्वेन विषयीकरोति तं मनसा परि भाव्य विचार्य्य त्वं वृणीष्व स्वीकुरु ॥ ८ ॥

एषामिति ॥ ननु हे मुग्धे सुन्दरि एषां देवानां त्वदीक्षणे तव साभि निवेशदर्शने रसादनुरागाद्धेतोरेषा प्रत्यक्षदृश्या अनिमेषता निमेष

आस्ये तथैव तव नन्वधरोपभोगै
र्मुग्धे विधाऽमृतपानमपि द्विधास्तु ॥ ९ ॥
एषां गिरेः सकलरत्नफलस्तरुः स
प्राग्दुग्धभूमिसुरभेः खलु पञ्चशाखः ।
मुक्ताफलं फलनसान्वयनाम तन्व
न्नाभाति विन्दुभिरिवच्छुरितः पयोभिः ॥ १० ॥

शून्यता स्वाभाविक्या सहजया अनिमिषतया मिलिता सती यथा द्विधा द्विप्रकारा अभूत् तथैव तेषां अमृतपानमपि तव आस्ये विधौ मुखचन्द्रे अधरोपभोगैरधरचुम्बनैर्द्विधा द्विप्रकारमस्तु भवतु यथा देवा देवत्वादनिमेषा अपि साभिनिवेशत्वदवलोकनात् पुनरप्यनिमेषाजाता तथा देवत्वाचन्द्रामृतपायिनोऽपि त्वदधरपानात् पुनरपि तादृशाभवन्त्वित्यर्थः । मुग्धे सुन्दरे आस्ये इति वा ॥ ९ ॥

एषामिति ॥ हे भैमि प्राक् प्रथमं दुग्धा भूमिरेव सुरभिर्धेनुर्येन तादृशस्य एषां देवानां गिरेः सुमेरोः पञ्चशाखः शाखापञ्चकविशिष्टः अथ च पाणिरिव स प्रसिद्धः सकलरत्नान्येव फलानि यस्य तादृशस्तरुः कल्पवृक्ष आभाति शोभते किं कुर्व्वन् मुक्ताफलं खलु निश्चयेन फलनेन प्रसवनेन सान्वयं सार्थकं नाम संज्ञा यस्य तादृशं तन्वन् कुर्व्वन् यथा आम्रादयः फलशब्देन व्यपदिश्यन्ते तथा मुक्तानामपि मुक्ताफलेति फलशब्देन व्यवपदेशं कुर्व्वन्नित्यर्थः मुक्ताफलमयत्वे उत्प्रेक्षते किम्भूतः पयोभिर्दुग्धमयैर्विन्दुभिश्छुरित इवसर्व्वतोव्याप्तइव नैतानि मुक्ताफलानि किन्तु गोरूपधरां पृथ्वीं दुग्धवतः सुमेरोर्हस्तभूते तस्मिन् उद्गत्य दुग्धविन्दव एव लग्ना इत्यर्थः सुमेरुः कल्पवृक्षस्य देवानामेव तस्मात् तानेव वृणीष्व तथासति तयोः स्वामिनी भविष्यसीति भावः ॥ १० ॥

Digitized by Google

वक्त्रेन्दुसन्निधिनिमीलिदलारविन्द-
द्वन्द्वभ्रमक्षममथाञ्जलिमात्ममौलौ ।
कृत्वापराधभयचञ्चलमीक्षमाणा
सान्यत्र गन्तुममरैः कृपयान्वमानि ॥ ११ ॥
तत्तद्विरागमुदितं शिविकाधरस्थाः
साक्षाद्विदुः स्म न मनागपि यानधुर्य्याः ।

वक्त्रेन्द्विति ॥ अथ देवप्रशंसनरूपसरस्वतीवचनानन्तरं अमरैर्देवैः कृपया सा भैमी अन्यत्र गन्तुं अन्वमानि अनुमता किम्भूता आत्ममौलौ निजमस्तके अवरबाहुयोर्योऽपराधस्तज्जन्यं यद्भयं तेन चञ्चलं अञ्जलिं कृत्वा ईक्षमाणा देवान् पश्यन्ती अपराधभयचञ्चलमिति ईक्षणक्रियाविशेषणं वा किम्भूतं अञ्जलिं वक्त्रेन्दुसन्निधौ मुखचन्द्रसमीपे निमीलीनि सङ्कुचन्ति दलानि पत्राणि यस्य तादृशं यत् अरविन्दद्वन्द्वं कमलयुगलं तस्य भ्रमे भ्रान्तौ क्षमं समर्थं सङ्कुचद्दलकमलयुगलतुल्यमित्यर्थः तादृशीं तां दृष्ट्वा यत्र तेऽनुरागस्तं वृणुष्वेति देवैरनुज्ञातमित्यर्थः ॥ ११ ॥

तत्तदिति ॥ यानधुर्य्याः शिविकावाहिन उदितं उत्पन्नं तेषु तेषु देवेषु विरागं भैम्याविरक्त्यं साक्षात् प्रत्यक्षेण मनागपि लेशतोऽपि न विदुः स्म न ज्ञातवन्तः किम्भूता यतः शिविकाया यानस्य अधरस्था अधोदेशवर्त्तिनः नह्यधःस्थितैरूर्द्धस्थितवृत्तान्तः प्रत्यक्षेण ज्ञातुं शक्यते । तु किन्तु आसन्ना निकटवर्त्तिनो ये नायकादेवास्तेषां विषण्णानि म्लानानि यानि मुखानि तैः कृत्वा अनुमेयानि यानि भैम्याविरक्तचरितानि विरागचेष्टितानि नमस्कारादीनि तेषां अनुमया अनुमानेन जज्ञुस्त

आस्ये तथैव तव नव्यधरोपभोगै
र्मुग्धे विधावमृतपानमपि द्विधास्तु ॥ ९ ॥
एषां गिरेः सकलरत्नफलस्तरुः स
प्राग्दुग्धभूमिसुरभेः खलु पञ्चशाखः।
मुक्ताफलं फलनसान्वयनाम तन्व
न्नाभाति बिन्दुभिरिवच्छुरितः पयोभिः॥१०॥

शून्यता स्वाभाविक्या सहजया अनिमिषतया मिलिता सती यथा द्विधा द्विप्रकारा अभूत् तथैव तेषां अमृतपानमपि तव आस्ये विधौ मुख चन्द्रे अधरोपभोगैरधरचुम्बनैर्द्विधा द्विप्रकारमस्तु भवतु यथा देवा देवत्वादनिमेषा अपि साभिनिवेशत्वदवलोकनात् पुनरप्यनिमेषाजाता तथा देवत्वाचन्द्रामृतपायिनोऽपि त्वदधरपानात् पुनरपि तादृशाभव न्वित्यर्थः। मुग्धे सुन्दरे आस्ये इति वा ॥ ९ ॥

एषामिति॥ हे भैमि प्राक् प्रथमं दुग्धा भूमिरेव सुरभिर्धेनुर्येन तादृ शस्य एषां देवानां गिरेः सुमेरोः पञ्चशाखः शाखापञ्चकविशिष्टः अथ च पाणिरिव स प्रसिद्धः सकलरत्नान्येव फलानि यस्य तादृशस्तरुः कल्प वृक्ष आभाति शोभते किं कुर्व्वन् मुक्ताफलं खलु निश्चयेन फलनेन प्रसव नेन सान्वयं सार्थकं नाम संज्ञा यस्य तादृशं तन्वन् कुर्व्वन् यथा आम्रा दयः फलशब्देन व्यपदिश्यन्ते तथा मुक्तानामपि मुक्ताफलेति फलशब्देन व्यवपदेशं कुर्व्वन्नित्यर्थः मुक्ताफलमयत्वे उत्प्रेच्यते किम्भूतः पयोभिदु ग्धमयैर्विन्दुभिश्छुरित इवसर्व्वतोव्याप्तइव नैतानि मुक्ताफलानि किन्तु गोरूपधरां पृथ्वीं दुग्धवतः सुमेरोर्हस्तभूते तस्मिन् उद्गत्य दुग्ध विन्दव एव लग्ना इत्यर्थः सुमेरुः कल्पवृक्षश्च देवानामेव तस्मात् तानेव वृणीष्व तथासति तयोः स्वामिनी भविष्यसीति भावः॥ १०॥

वक्त्रेन्दुसन्निधिनिमीलिदलारविन्द
द्वन्द्वभ्रमक्षममयाञ्जलिमात्ममौलौ ।
कृत्वापराधभयचञ्चलमीक्षमाणा
सान्यत्र गन्तुममरैः कृपयान्वमानि ॥ ११ ॥
तत्तद्विरागमुदितं शिबिकाधरस्थाः
साक्षाद्विदुः स्म न मनागपि यानधुर्य्याः ।

वक्त्रेन्द्विति ॥ अथ देवप्रशंसनरूपसरस्वतीवचनानन्तरं अमरैर्देवैः कृपया सा भैमी अन्यत्र गन्तुं अन्वमानि अनुमता किम्भूता आत्ममौलौ निजमस्तके अवरस्यपि योऽपराधस्तज्जन्यं यद्भयं तेन चञ्चलं अञ्जलिं कृत्वा ईक्षमाणा देवान् पश्यन्ती अपराधभयचञ्चलमिति ईक्षण क्रियाविशेषणं वा किम्भूतं अञ्जलिं वक्त्रेन्दुसन्निधौ मुखचन्द्रसमीपे निमीलीनि सङ्कुचन्ति दलानि पत्राणि यस्य तादृशं यत् अरविन्दद्वन्द्वं कमल युगलं तस्य भ्रमे भ्रान्तौ क्षमं समर्थं सङ्कुचत्कमलयुगलतुल्यमित्यर्थः तादृशीं तां दृष्ट्वा यत्र तेऽनुरागस्तं वृणुष्वेति देवैरनुज्ञातेत्यर्थः ॥ ११ ॥

तत्तदिति ॥ यानधुर्य्याः शिबिकावाहिन उदितं उत्पन्नं तेषु तेषु देवेषु विरागं भैम्याविरक्त्यं साक्षात् प्रत्यक्षेण मनागपि लेशतोऽपि न विदुः स्म न ज्ञातवन्तः किम्भूता यतः शिबिकाया यानस्य अधरस्था अधोदेशवर्त्तिनः नह्यधःस्थितैरूर्द्ध्वस्थितवृत्तान्तः प्रत्यक्षेण ज्ञातुं शक्यते । तु किन्तु आसन्ना निकटवर्त्तिनो ये नायकादेवास्तेषां विषमाणि म्लानानि यानि मुखानि तैः कृत्वा अनुमेयानि यानि भैम्याविरक्तचरितानि विरागचेष्टितानि नमस्कारादीनि तेषां अनुमया अनुमानेन जग्मुस्तत्

Digitized by Google

आसन्ननायकविषन्नमुखानुमेय
भैमीविरक्तचरितानुमया तु जग्मुः ॥ १२ ॥
रक्षःस्वरक्षणमवेक्ष्य निजं निवृत्तो
विद्याधरेष्वधरतां वपुषैव भैम्याः ।
गन्धर्व्वसंसदि न गन्धमपि स्वरस्य
तस्याविमृष्य विमुखोऽजनि यानिवर्गः ॥१३॥
दीनेषु सत्स्वपि कृताफलवित्तरक्षै
र्यक्षैरदर्शि न मुखं त्रपयैव तस्याः ।

विरागं ज्ञातवन्तः । एतेन च शिविकावाहकानां पण्डितत्वं सूचितं ॥ १२ ॥

रक्षःस्विति ॥ यानिनां यानवाहकानां वर्गः समूहः रक्षःसु राक्षसेषु निजं स्वीयं स्वरक्षणं विनाशनं अवेक्ष्य विमृश्य निवृत्तः तेभ्यः पराङ्मुखोऽभूत् यदि वयं एतेषां समीपे गच्छामस्तदास्मान् भक्षयेयुरिति भयेन राक्षसानां समीपे न जगामेत्यर्थः तथा विद्याधरेषु भैम्यावपुषैव शरीरेणैव कृत्वा अधरतां अपकृष्टतां अवेक्ष्य विचार्य्य निवृत्तः अश्वमुखनराश्वनरमुखाश्वाङ्गत्वात् तथाविधेषु अतिसुन्दरी भैमी अवश्यमेव विरक्ता भविष्यतीति निश्चित्य तेभ्यः परावृत्तइत्यर्थः तथा गन्धर्व्वसंसदि गन्धर्व्ववर्गे तस्या भैम्याः स्वरस्य कण्ठमाधुर्य्यस्य गन्धमपि अल्पांशमपि न विमृष्य नावेक्ष्य विमुखोऽजनि पराङ्मुखोऽजातः अतिसुस्वरा भैमी स्वापेक्षया निकृष्टस्वरान् गन्धर्व्वान् कथं वरीष्यतीति विविच्य तेभ्यो निवृत्तइत्यर्थः ॥ १३ ॥

दीनेष्विति ॥ दीनेषु दरिद्रेषु सत्स्वपि जगति विद्यमानेष्वपि कृता अफला निष्प्रयोजना वित्तानां धनानां रक्षा यैस्तादृशैरतिकृपणैरित्यर्थः

Digitized by Google

ते जानतेस्म सुरशाखिपतिव्रतां किं
तां कल्पवीरुधमधिक्षिति नावतीर्णां ॥ १४ ॥
यान्यास्ततः फणभृतामधिपं सुरौघा
न्माञ्जिष्ठमञ्जिमविगाहिपदौष्ठलक्ष्मीं ।
तां मानसं निखिलवारिचयान्नवीना
हंसावलीमिव घनागमयाम्बभूवुः ॥ १५ ॥

यद्वैरूपयैव तस्या भैम्याः सकाशात् लज्जयव मुखं नादर्शि न दर्शितं स भायां वक्रीकृतवदनैः सद्भिः स्थितमित्यर्थः त्रपा किमिति जातेत्याशङ्क्याह ते यद्यात्तां भैमीं अधिक्षिति पृथिव्यां अवतीर्णां सुरशाखिनः पत्युः कल्प वृक्षस्य व्रतं बहुवदान्यत्वरूपो नियमो यस्यास्तादृशीं अथच यज्ञादौ हविः प्राप्त्या उपजीव्यत्वात् सुराणां शाखी वृक्षसदृशोनलस्तस्य पतिव्रतां कल्प वीरुधं कल्पलतां अतिवदान्यामित्यर्थः किं न जानतेस्म न ज्ञातवन्तः अ पितु जानतेस्मैव अतिवदान्यां तां दृष्ट्वा अतिकृपणैस्तैर्लज्जावशात् मुखं न दर्शितमिति भावः अन्योऽपि कृपणोवदान्यसमीपे लज्जते ॥ १४ ॥

यान्याइति ॥ ततोऽनन्तरं यान्यायानवाहकास्तां भैमीं सुरौघात् देव समूहात् फणभृतां सर्पाणामधिपं प्रभुं वासुकिं गमयाम्बभूवुः प्रापयन्ति स्म किम्भूतां माञ्जिष्ठं मञ्जिष्ठया रक्तं यद्वस्तु तस्य मञ्जिमानं मनोज्ञत्वं विगा हितुं शीलं यस्यास्तादृशी पदौष्ठलक्ष्मीश्चरणाधरशोभा यस्यास्तादृशीं अनौपमिनोति नवीना घना मेघा हंसावलीमिव यथा हंसश्रेणीं निखि लवारिचयात् नानाजलाधारसमूहात् मानसं सरोवरविशेषं गमयन्ति तथा गमयाम्बभूवुः हंसावल्यपि माञ्जिष्ठमञ्जिमविगाहिपदौष्ठलक्ष्मीर्भ वति यान्या अपि नवीना युवानः वर्षाकाले राजहंसपंक्तयः सकलान् जलाधारान् परित्यज्य मानसं यान्तीति कवीनां प्रसिद्धिः ॥ १५ ॥

Digitized by Google

यस्याविभोरखिलवाङ्मयविस्तरोऽय-
माख्यायते परिणतिर्म्मुनिभिः पुनः सा ।
उद्गत्वरामृतकरार्द्धपरार्द्ध्यभालां
बालामभाषत सभासततप्रगल्भा ॥ १९ ॥
आश्लेषलग्नगिरिजाकुचकुङ्कुमेन
यः पट्टसूत्रपरिरम्भणशोणशोभः ।

यस्या इति ॥ मुनिभिर्वाल्मीकिप्रभृतिभिरयं वेदादिरूपोऽखिलवाङ्मयविस्तरः सकलशब्दविस्तारः विभोः सर्व्वव्यापिकाया यस्या देव्याः परिणतिः परिणाम आख्यायते कथ्यते शब्दरूपेणैव या विश्वं व्याप्य स्थितेति कथ्यते सभायां सततं प्रगल्भा सा सरस्वती तां बालां भैमीं पुनरभाषत उक्तवती तां किम्भूतां उद्गत्वरं उद्यत् यत् अमृतकरस्य चन्द्रस्य अर्द्धं तद्वत् परार्द्ध्यं श्रेष्ठं तत्तुल्यं भालं ललाटं यस्यास्तादृशीं अर्द्धेन्दुरिव चन्द्रसाम्येन भैम्या भालस्य कुङ्कुमाक्तत्वं ध्वनितं ॥ १९ ॥

यदभाषत तदाह । आश्लेषेति । हे भैमि सिता शुक्ला श्रीः शोभा यस्य तादृशः सोऽयं वासुकिः स कः यः शम्भोः शिवस्य यज्ञोपवीतपदवीं यज्ञसूत्रस्थानं भजते आश्रयति किम्भूतः आश्लेषेण आलिङ्गनेन लग्नं यत् गिरिजायाः पार्व्वत्याः कुचयोः कुङ्कुमं तेन हेतुना पट्टसूत्रपरिरम्भणस्येव आरक्तपट्टसूत्रनिर्म्मितवेष्टनस्येव शोणा आरक्ता शोभा यस्य तादृशः विहारसमयेऽपि यः शिवेन न त्यज्यत इत्यर्थः तथा शम्भोः सेवासु प्रसितः प्रसक्तः शम्भोरतिप्रियोऽयं तस्मादयमेव तव वरयोग्य इति भावः अथच सेवासु प्रसित इत्यनेन सेवायामेवास्य

Digitized by Google

यज्ञोपवीतपदवीं भजते स शम्भोः
सेवासु वासुकिरयं प्रसितः सितश्रीः ॥ १७॥
पाणौ फणी भजति कङ्कणभूयमैशे
सोऽयं मनोहरमणीरमणीयमूर्त्तिः ।
कोटीरबन्धनधनुर्गुणयोगपट्ट
व्यापारपारगममुं भज भूतभर्त्तुः ॥ १८ ॥
धृत्वैकया रसनयामृतमीश्वरेन्दो
रप्यन्यया त्वदधरस्य रसं द्विजिह्वः ।

क्षोभमच्छति सम्भोगावकाशः कथं भवेदिति नायं वरणीय इति सूचितं यज्ञोपवीतमपि शुक्लं भवति ॥ १७ ॥

पाणाविति ॥ तथा मनोहराभिर्मणीभिः कृत्वा रमणीया मूर्त्तिर्यस्य तादृशः सोऽयं फणी वासुकिः ऐशे शिवसम्बन्धिनि पाणौ कङ्कणभूयं कङ्कणत्वं भजति प्राप्नोति हे भैमि अमुं वासुकिं भज वृणुष्व किम्भूतं भूतभर्त्तुः शिवस्य कोटीरबन्धनस्य जटाजूटबन्धनस्य धनुर्गुणस्य योग पट्टस्य च व्यापारो भवनतत्कार्यं तस्य पारगं पारदर्शिनं हरस्य कोटी रादिविशेषणेन वरणाभावः सूचितः ॥ कोटीरः स्याज्जटाजूटइति कोषः ॥ १८ ॥

धृत्वेति ॥ एकया रसनया जिह्वया ईश्वरेन्दोः शिवललाटचन्द्रस्य अमृतं धृत्वा अन्यया द्वितीयया रसनया तव अधरस्य रसमपि धृत्वा चन्द्रामृतमोष्ठामृतञ्च युगपदेकदा आस्वादयन् पिबन् एतदुभयस्य चन्द्रा मृतोष्ठामृतयोर्द्वयस्य विशेषं तारतम्यं निश्चेतुं यदि क्षमः समर्थः स्यात् तर्हि एष परं वासुकिरेव नान्यः यतोऽयं द्विजिह्वः द्वे जिह्वे यस्य तादृशः । राज्ञां वरणयोग्यत्वेऽपि चन्द्रामृतसम्बन्धाभावात् देवानां तत्सम्भवेऽपि

Digitized by Google

आस्वादयन् युगपदेष परं विशेषं
निर्णेतुमेतदुभयस्य यदि क्षमः स्यात् ॥१९॥
आशीविषेण रदनच्छदर्दशदान
मेतेन ते पुनरनर्थतया न गण्यं ।
बाधां विधातुमधरे हि न तावकीने
पीयूषसारघटिते घटतेऽस्य शक्तिः ॥ २० ॥
तद्विस्फुरत्फणविलोकनभूतभीतेः
कम्पश्च वीक्ष्य पुलकश्च ततोऽनु तस्याः ।

द्विजिह्वत्वाभावेन द्वयोः समकालं पानासम्भवात् सर्पान्तराणां द्विजिह्वत्व सम्भवेऽपि पन्नगामृतसम्बन्धाभावात् एतस्य तु तदुभयसम्भवात् द्वयोर्वि शेषनिर्णयेऽयमेव योग्यो नान्यस्तस्मादसाधारणक्षमताशाली एष त्वया वरणीय इत्यर्थः अयञ्च द्विजिह्वः खलोऽयं न वरणीय इतिसूचितं ॥१९॥

आशीविषेणेति । हे भैमि आशी तालुगता सर्पाणां दंष्ट्रा तस्यां विषं यस्य तादृशेन एतेन वासुकिना क्रियमाणं ते तव रदनच्छदस्य अधरस्य दंशदानं दंशकरणं अधरखण्डनं अनर्थतया मरणहेतुतया पुनर्न गण्यं त्वया न सम्भावनीयं एतस्य वरणे सुरते दन्तघातेन विषसञ्चारान्मरणम्भ वेत्तस्मादेनं वृणे इति नाशङ्कनीयमित्यर्थः कथमित्याह हि यस्मात् पीयू षस्य अमृतस्य सारेण घटिते निर्म्मिते तावकीने त्वदीये अधरे बाधां विष जन्यां पीडां विधातुं कर्त्तुं अस्य तादृशदन्तच्छददंशनस्य वासुकेर्व्वा शक्तिः सामर्थ्यं न घटते न युज्यते अमृते हि विषं न प्रभवतीत्यर्थः तस्मात्तादृशीं शङ्कां विहाय एनं वृणीष्वेति भावः ॥ २० ॥

तदिति । ततोऽनु तस्य पश्चात् तस्य वासुकेर्विस्फुरन्तो ये फणास्तेषां विलोकनेन भूता जाता भीतिर्यस्यास्तथाभूतायास्तस्याभैम्याः कम्पश्च

Digitized by Google

सञ्जातसात्विकविकारधियः स्वभृत्यान्
नृत्यान्न्यषेधदुरगाधिपतिर्विलक्षः ॥ २१ ॥
तद्दर्शिभिः स्ववरणे फणिभिर्निराशै-
र्निश्वस्य तत्किमपि दृष्टमनात्मनीनं ।

पुलकांश्च वीक्ष्य दृष्टा संजाता सात्विकविकारे शृङ्गारानुभावविशेषे धीः इयमस्मत्स्वामिनमेव वरीष्यति यत इयं कम्परोमाञ्चलक्षणं सात्विक विकारं भजतइति बुद्धिर्येषां तादृशान् स्वभृत्यान् निजदासान् उरगाधिपतिः सर्पाणां प्रभुर्वासुकिर्विलक्षः सलज्जः सन् नृत्यात् हर्षवशजनितनर्त्तनात् न्यषेधत् निवारयामास फणदर्शनभीतायाः भैम्याः समुत्पन्नौ भयानकसात्विकभवौ कम्परोमाञ्चौ अज्ञबुद्धित्वात् शृङ्गारीयत्वेन सम्भाव्य हर्षवशात् नर्त्तितुमुद्यतान् स्वभृत्यान् वासुकिः सलज्जो भूत्वा निवारयामासेत्यर्थः। सात्विकाश्च स्तम्भः स्वेदश्च रोमाञ्चः स्वरभेदश्च वेपथुः। वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्विकाः स्मृता इति साहित्यदर्पणोक्ताः शृङ्गारइव भयानकेऽपि सम्भवन्ति उक्तञ्च भयानक विवेके तत्रैव अनुभावोऽत्र वैवर्ण्यगद्गदस्वरभाषणं। प्रलयस्वेदरोमाञ्च कम्पदिक्प्रेक्षणादय इति ॥ २१ ॥

तद्दर्शिभिरिति । तद्दर्शिभिस्तत्स्वप्रभुवासुकिवैलक्ष्यं पश्यद्भिरत एव स्ववरणे निराशैः प्रत्याशाशून्यैः फणिभिः अन्यैः सर्पैः कर्कोटकादि भिर्निश्वस्य अनात्मनीनं आत्मनामहितं तत् किमपि अपूर्व्वं दृष्टं ज्ञातं किं तदित्याह यत् तान् सर्पान् उद्दिश्य प्रयातुमनसोऽपि गन्तुकामा अपि विमानवाहा भैमीशिविकावाहिनः प्रतीपः सम्मुखवाहित्वात् प्रतिकूलोयः पवनो निश्वासवायुस्तद्रूपं यदशकुनं अयात्रिकं तस्माद्धेतो स्तान् प्रति द्रागा अतिकष्टं न जग्मुर्न गतवन्तः प्रतिकूलवायोरशकुन

यस्मान् प्रयातुमनसोऽपि विमानवाहा
हाहा प्रतीपपवनाशकुनाश्च जग्मुः ॥ २२ ॥
ह्रीसंकुचत्फणगणादुरगप्रधाना
त्तां राजसंघमनयन्त विमानवाहाः ।
सन्ध्यानमद्दलकुलात् कमलाद्विनीय
कह्लारमिन्दुकिरणा इव हासभासं ॥ २३ ॥
देव्याभ्यधायि भव भीरु धृतावधाना
भूमीभुजस्त्यजत भीमभुवो निरीक्षां ।

त्वादिव इतरसर्पसम्मुखं न जग्मुरित्यर्थः अयोग्यत्वात्तान् प्रति न गता इति भावः ॥ २२ ॥

ह्रीति ॥ विमानवाहास्तां भैमीं ह्रिया लज्जया सङ्कुचत् सङ्कोचं गच्छत् फणानां गणः समूहोयस्य तादृशात् उरगप्रधानात् सर्पराजा हासुकेर्विनीय अपनीय राजसङ्घं नृपसमूहं अनयन्त प्रापयामासुः अत्रोपमिनोति इन्दुकिरणाइव यथा चन्द्रकिरणाः सन्ध्यायां नमत् संकुचत् दलकुलं दलसमूहोयस्य तादृशात् कमलात् पद्मात् विनीय हासभासं प्रकाशदीप्तिं कह्लारं सौगन्धिकं नयन्ति तथा अनयन्त । सौगन्धिकन्तु कह्लारमित्यमरः ॥ २३ ॥

देव्येति ॥ देव्या सरस्वत्या अभ्यधायि उक्तं किमभ्यधायीत्याह हे भीरु सर्पफणदर्शनात् भयशीले भैमि त्वं धृतावधाना सावधाना भव संप्रति भयं परित्यज्य राज्ञो विलोकयेति भावः तथा हे भूमीभुजोराजानोयूयं संप्रति भीमभुवो भैम्या निरीक्षां दर्शनं त्यजत मा कुरुत युष्मासु पश्यत्सु इयं लज्जावशान्न युष्मान् पश्यति तस्माद्भैमीं विलोकयतेत्यर्थः ननु वरणे सन्देहात् दर्शनमपि कथं त्याज्यमित्यत

Digitized by Google

आलोकितामपि पुनः पिबतां दृशैता
मिच्छा विगच्छति न वत्सरकोटिभिर्व्वः ॥२४॥
लोकेशकेशवशिवानपि यश्चकार
शृङ्गारसान्तरभृशान्तरशान्तभावान् ।
पञ्चेन्द्रियाणि जगतामिषुपञ्चकेन
संक्षोभयन् वितनुतां वितनुर्म्मुदं वः ॥२५॥
पुष्पेषुणा ध्रुवममूनिषुवर्षजन्म
ऊङ्कारमन्त्रबलभस्मितशान्तिशक्तीन् ।

आह आलोकितामपि दृष्टामपि एतां भैमीं पुनर्दृशा चक्षुषा पिबतां साभिलाषं पश्यतां वो युष्माकं इच्छा एतद्दर्शनलालसा वत्सरकोटिभिः कोटिसंख्यकवर्षैरपि न विगच्छति न शाम्यति तस्मादेकवारं युष्माभिर्दृष्टेयं पुनःपुनर्न द्रष्टव्येत्यर्थः भीव इत्यत्र सुभ्रु इति त्यजतेत्यत्र च भजतेति क्वचित् पाठः इयं देवादीनां सान्निध्यं परित्यज्य अधुना युष्माकं सान्निध्यमायाता द्रष्टव्येति तत्रार्थः नन्वियं प्रथमं दृष्टैव किं पुनःपुनर्दर्शने नेत्याशङ्क्याह अवलोकितामिति तत्पाठे अवतारणिका ॥ २४ ॥

लोकेशेति ॥ हे राजानः स वितनुः कामो वो युष्माकं मुदं हर्षं वितनुतां विस्तारयतु स कः यः लोकेशकेशवशिवानपि ब्रह्मविष्णुशिवानपि शृङ्गारेण सान्तरो व्यवहितो भृशो ऽतिशयितश्चान्तरो मानसः शान्तभावः शान्तरसो येषां तादृशान् चकार किम्भूतः जगतां पञ्चेन्द्रियाणि चक्षुरादीनि इषुपञ्चकेन पञ्चभिर्बाणैः संक्षोभयन् व्याकुलयन् यः सृष्टिस्थितिप्रलयकारिणोऽपि देवान् स्ववशीचकार तस्य भवतां वशीकरणे कः प्रयास इति तदधीनाः सन्तो यूयं यथेच्छमेनां विलोकयतेति भावः ॥२५॥

पुष्पेषुणेति ॥ हे शृङ्गारसर्गरसिकद्व्यणुकोदरि शृङ्गारस्य रसस्य सर्गे

Digitized by Google

शृङ्गारसर्गरसिकद्व्यणुकोदरि त्वं
द्वीपाधिपान्नयनयोर्नय गोचरत्वं ॥ २६ ॥
स्वादूदके जलनिधौ सवनेन सार्द्धं
भव्या भवन्तु तव वारिविगाहलीलाः ।
द्वीपस्य तं पतिममुं भज पुष्करस्य
निस्तन्द्रपुष्करतिरस्करणक्षमाक्षि ॥ २७ ॥

निर्म्माणे रचितं जातानुरागं योग्यमितियावत् यत् द्व्यणुकं तद्वत् उदरं यस्या हे तथाविधे कामोद्दीपकातिकृशोदरीत्यर्थः भैमि त्वं अमून् द्वीपाधिपान् पुष्करादिद्वीपस्वरूपान् नयनयोर्गोचरत्वं विषयत्वं नय प्रापय अनुग्रहबुद्ध्या विलोकयेत्यर्थः किम्भूतान् ध्रुवं उत्प्रेक्षे निश्चितं वा पुष्पेषुणा कामेन इषुवर्षे बाणत्यागे अर्पितोयोऽङ्गाररूपोमन्त्रस्तस्य बलेन सामर्थ्येन भञ्जिता विनाशिता शान्तिर्भक्तिरुपशमप्रभावो येषां तादृशान् अन्योऽपि ऊंफडादिमन्त्रोच्चारणेन बाणं प्रक्षिप्य शत्रूणां सामर्थ्यं नाशयति । नमइति पाठोऽसाधुः चेङ्धातुना सिद्धत्वात् पाश्चात्यानां पुस्तकेतु नमितिरिति दृश्यते तत्र कर्म्मणि क्तिप्रत्ययो बोध्यः ॥ २६ ॥

स्वादूदकइति । हे निस्तन्द्रपुष्करतिरस्करणक्षमाक्षि निस्तन्द्रं प्रफुल्लं यत् पुष्करं पद्मं तस्य तिरस्करणे पराजये क्षमे योग्ये अक्षिणी चक्षुषी यस्याः हे तथाविधे कमलनयने भैमि स्वादु मधुरं उदकं यत्र तादृशे जलनिधौ समुद्रे सवनेन सवननाम्ना अनेन राज्ञा सार्द्धं सह तव वारिविगाहलीलाजलावगाहनक्रीडाभव्यारम्याभवन्तु तस्मात् पुष्करस्य द्वीपस्य तं प्रसिद्धं पतिं अमुं सवननामानं भज वृणुष्व यदि स्वादूदकसमुद्रे जलक्रीडामिच्छसि तदैतं पुष्करद्वीपपतिं पतिं कुर्व्वित्यर्थः ॥२७ ॥

Digitized by Google

सावर्त्तभावभवदद्भुतनाभिकूपे
स्वर्भैमिमेतदुपवर्त्तनमात्मनैव ।
स्वाराज्यमर्जयसि न श्रियमेतदीया
मेतद्गृहे परिगृहाण शचीविलासं ॥ २८ ॥
देवः स्वयं वसति तत्र किल स्वयम्भू
र्न्यग्रोधमण्डलतले हिमशीतले यः ।

सावर्त्तेति । आवर्त्तेन दक्षिणावर्त्तेन सह वर्त्तमानः सावर्त्तस्तस्य भावस्तेन भवदुत्पद्यमानं अद्भुतमाश्चर्यं यस्मात् तादृशो नाभिरूपः कूपो यस्या हे तथाविधे सुवर्त्तुलनाभिकूपे भैमि एतस्य यवनस्य उपवर्त्तनं देशं भौमं भूमिभवं स्वः स्वर्गं आत्मनैव स्वयमेव वरणमात्रेणैव नार्जयसि न करोषि अपितु अर्जय तथा एतदीयां एतद्देशसम्बन्धिनीं यवनसम्बन्धिनीं वा श्रियं सम्पत्तिं स्वाराज्यं स्वर्गाधिपत्यं इन्द्रत्वं नार्जयसि अपितु अर्जय तस्मादेतस्य यवनस्य गृहे शच्याइन्द्रपत्न्या विलासं चेष्टितं परिगृहाण स्वीकुरु इन्द्रतुल्यमिमं शचीव त्वं वृणुष्वेत्यर्थः अन्यः कूपोऽपि आवर्त्तेन जलभ्रमेण आश्चर्य्यकारी भवति । देशविषयो तूपवर्त्तनमित्यमरः ॥ २८ ॥

देवइति । तत्र पुष्करद्वीपे हिमवत् शीतले न्यग्रोधमण्डलतले महदाकारवटवृक्षाधःप्रदेशे किल प्रसिद्धं यः स्वयम्भूर्ब्रह्मा देवः स्वयं स्वरूपेण वसति स ब्रह्मा त्वां त्वद्रूपं अनन्यकल्पं अनन्यसदृशं काव्यमिति पाठे अन्यैः कल्पयितुं निर्म्मातुमशक्यं निजशिल्पं स्वीयनिर्म्मितिं विलोक्य सर्व्वेषु कारवु शिल्पिषु विषये करेण हस्तेन दर्पं गर्व्वं करोतु एतादृगतिसुन्दरनिर्म्माणं मम हस्तादेवेति मद्धस्तसदृशः केषामपि हस्तो नास्तीति हस्तावच्छेदेन गर्व्वं करोतीत्यर्थः पुष्करद्वीपे मूर्त्तिमान्

Digitized by Google

स त्वां विलोक्य निजशिल्पमनन्यकल्पं
सर्व्वेषु कारुषु करोतु करेण दर्पं ॥ २९ ॥
न्यग्रोधनादिव दिवः पतदातपादे
र्न्यग्रोधमात्मभरधारमिवावरोहैः ।
तं तस्य पाकिफलनीलदलद्युतिभ्यां
द्वीपस्य पश्य शिखिपत्रजमातपत्रं ॥ ३० ॥
न श्वेततां चरतु वा भुवनेषु राज
हंसस्य न प्रियतमा कथमस्य कीर्त्तिः

श्चा वर्त्तते एतदरश्चे तु मदर्शनमपि वे भविष्यतीति भावः मखेत्य च मखयेति क्वचित् पाठः ॥ २९ ॥

न्यग्रोधनादिति । हे भैमि त्वं पाकिफलानां पक्वफलानां नीलद लानाञ्च द्युतिभ्यां कान्तिभ्यां कृत्वा शिखिपत्रजं मयूरपक्षनिर्म्मितं तस्य द्वीपस्य पुष्करस्य आतपत्रं छत्रमिव तं वृक्षं पश्य किम्भूतं दिवआकाशा त्पततआतपादेरधश्चवृष्ट्यादेर्न्यग्रोधात् अधोदेशे रोधनात् निराकरणादिव न्यग्रोधं न्यग्रोधइतियौगिकनामानं तथा अवरोहैः शाखोत्पन्नमूलैः कृत्वा आत्मनोभरं भारं शरीरगौरवं धारयतीत्येवंभूतमिव अन्योऽपि स्थूलोदरत्वादिना निजशरीरगौरवं धारयति समस्तमपि पुष्करद्वीपं तस्यच्छायायां वर्त्तते इत्यर्थः ॥ ३० ॥

नेति । राजहंसस्य नृपश्रेष्ठस्य अस्य सवनस्य प्रियतमा अत्यन्त मभिमता कीर्त्तिः कथं न श्वेततां श्वेता न भवतु अपितु श्वेतैव भवतु तथा भुवनेषु त्रिषु लोकेषु स्वर्गादिषु कथं न चरतु न गच्छतु अपितु गच्छत्वेव त्रिलोकान् कथं न व्याप्नोत्वित्यर्थः एतद्द्वयमुचितमेव न चित्रं किन्तु तत्तु चित्रं विस्मयजनकं यत् विमर्दिनः श्वेततायाः अदवं रै

चित्रन्तु तद्विशदिमाद्वयमादिशन्ती
क्षीरञ्च नाम्बु च मिथः पृथगातनोति ॥३१॥
शूरेऽपि सूरिपरिषत्प्रथमार्च्चितेऽपि
शृङ्गारभङ्गिमधुरेऽपि कलाकरेऽपि ।
तस्मिन्नवद्यमियमाप तदेव नाम
यत्कोमलं न किल तस्य नलेति नाम ॥३२॥
भ्रूवल्लिवेल्लितमथाकृतिभङ्गमेषा
लिङ्गं चकार तदनादरणस्य विज्ञा ।

त्वं आदिशन्ती लोकत्रयमपि श्वेतीकुर्व्वन्ती सती क्षीरं दुग्धञ्च अम्बु जलञ्च मिथः परस्परं पृथक् विभिन्नं नातनोति न करोति अन्या तु राजहंसस्य प्रिया हंसी श्वेतापि भवति भुवनेषु जलेषु च चरति किन्तु क्षीरनीरे मिश्रिते अपि पृथक् करोति इयं राजहंसप्रियापि यत्तन्न करोति तदाश्चर्य्यमित्यर्थः अतिशुभ्रा लोकत्रयव्यापिनी चास्यकीर्त्तिरिति भावः । पयः कीलालममृतं जीवनं भुवनं वनमित्यमरः ॥ ३१ ॥

शूरेऽपीति । इयं भैमी शूरेऽपि वीरेऽपि तथा सूरिपरिषदि पण्डितसभायां प्रथमं आदौ अर्च्चितेऽपि पूजितेऽपि तथा शृङ्गारभङ्ग्या शृङ्गारचेष्टितेन मधुरेऽपि मनोज्ञेऽपि तथा कलानां गीतादिचतुःषष्टिविद्यानां आकरेऽपि आश्रयेऽपि तस्मिन् नलनामके राज्ञि नाम प्रसिद्धौ तदेव अवद्यं दोषं आप प्राप्तवती यत्तस्य राज्ञः किल प्रसिद्धौ नलेति कोमलं मधुराक्षरं नाम संज्ञा न नासीत् शौर्य्यादिगुणशालिनमपि तं नलानुरागान्न वृतवतीति भावः ॥ ३२ ॥

भ्रूवल्लीति । अथानन्तरं विज्ञा पण्डिता एषा भैमी भ्रूवल्लिर्भ्रूलता वेल्लिता चालिता यत्र तादृशं आकृतिभङ्गं अङ्गमोटनमेव तस्य राज्ञः

Digitized by Google

राज्ञोऽपि तस्य तद्वाभजनतापवह्नि
चिह्नीबभूव मलिनच्छविभूमधूमः ॥ ३३ ॥
राजान्तराभिमुखमिन्दुमुखीमथैनां
यान्याजनाहृदयवेदितयैव निन्युः ।
अन्यानपेक्षितविधौ न खलु प्रधान
वाचां भवत्यवसरः सति भव्यभृत्ये ॥ ३४ ॥
ऊचे पुनर्भगवती नृपमन्यमस्यै
निर्दिश्य दृश्यतमतावमताश्विनेयं ।

चवनस्य अनादरस्य अस्वीकारस्य चिह्नं चिह्नं चकार भूहयवेपनेनाङ्ग भङ्गेन च तस्यास्वीकारं सूचयामासेत्यर्थः तथा तस्य राज्ञोऽपि मलिनच्छवेर्मलिनकान्तेर्याभूमा बाहुल्यं स एव धूमः तस्या भैम्या अलाभाज्जातो यस्तापः स एव दाहकत्वाद्वह्निस्तस्य चिह्नीबभूव अनुमापकोऽभूत् अन्यत्रापि धूमो वह्नेरनुमापको भवति। म्लानच्छविं दृष्ट्वा अनेन तस्य विरहज्वरोऽनुमित इत्यर्थः ॥ ३३ ॥

राजेति । अथानन्तरं यान्या वाहका जना एनां इन्दुमुखीं भैमीं हृदयवेदितयैव भैम्या आशयाभिज्ञतयैव अग्रे गच्छतेत्यादि भैमीवचनमनपेक्ष्यैव राजान्तराभिमुखं निन्युः प्रापयामासुः अर्थान्तरमुपन्यस्यति खलु यस्मात् अन्यस्य स्वामिनोऽनपेक्षितो विधिर्नियोगो येन तादृशे भव्यभृत्ये कुशलसेवके सति विद्यमाने प्रधानस्य स्वामिनो वाचां नियोगवचसां अवसरोऽवकाशो न भवति भव्यभृत्यो भङ्ग्यैव प्रभोराशयं बुद्ध्वा तन्नियोगमन्तरेणैव नियुज्यमानमाचरतीत्यर्थः तस्माद्यान्या भैम्या आशयं ज्ञात्वैव तामन्यत्र निन्युरिति भावः ॥ ३४ ॥

ऊचेइति । भगवती सरस्वती दृश्यतमतया अतिसुन्दरतया अवम

Digitized by Google

आलोक्यतामयमये कुलशीलशाल
शालीननाननमुदस्य निजास्यबिम्बं ॥ ३५ ॥
एतत्पुरःपठदपश्रमवन्दिवृन्द
वाग्डम्बरैरनवकाशमराम्बरेऽस्मिन् ।
उत्पत्तुमस्ति पदमेव न मत्पदाना
मर्थोऽपि नार्थपुनरुक्तिषु पातुकानां ॥ ३६ ॥
नम्यत्र वव्यदति विश्रुतनाम्नि शाक

तौ अवधातौ आश्विनेयौ अश्विनीकुमारौ येन तादृशं अन्यं रूपं यस्यै दमयन्त्यै गिर्हिंशत दर्शयित्वा पुनरुचे वक्ष्यमाणं उक्तवती अये भैमि त्वया शालीनतया लज्जया नतं नम्रीभूतं निजं स्वीयं आस्यबिम्बं मुखमण्डलं उदस्य ऊर्द्धीकृत्य कुलशीलाभ्यां शालत इत्येवंभूतोऽयं राजा आलोक्यतां लज्जां परित्यज्य अयं तावद्दृश्यतामित्यर्थः ॥ ३५ ॥

एतदिति ॥ हे भैमि एतस्य राज्ञः पुरोऽग्रे पठत् स्तुवत् तथा अपश्रमं यथार्थगुणवर्णनात् प्रयासशून्यं यत् वन्दिवृन्दं स्तुतिपाठकसमूहस्तस्य वाग्डम्बरैर्वचनविलासैः कृत्वा अनवकाशतरे अत्यन्तनिरवकाशेऽस्मिन्नम्बरे आकाशे मत्पदानां एतद्वर्णनसम्बन्धिमदुच्चरितसुप्तिङन्तानां पदानां उत्पत्तुं उदेतुं पदमेव अवकाश एव नास्ति आकाशाश्रितस्य हि शब्दस्यैतस्य निरवकाशत्वात् मद्वचनानामवकाशाभावः तथा अर्थपुनरुक्तिषु अभिधेयपौनरुक्त्येषु पातुकानां पतनशीलानां पुनरुक्तार्थप्रतिपादकानां मत्पदानां अर्थोऽपि नास्ति एतस्य वन्दिवृन्देन यावानर्थ उच्यते तावानर्थो मयापि वक्तव्यस्तस्मात् शब्दपौनरुक्त्यदोषो मद्वचनानामित्यर्थः एतद्वन्दिवचनं ममापि सम्मतमित्येनं वृणीष्वेति भावः ॥ ३६ ॥

द्वीपप्रशासिनि सुधीषु सुधीभवन्त्या ।
एतद्भुजाविरुदवन्दिजयानयापि
किं रागि राजनि गिराजनि नान्तरन्ते ॥३७॥
शाकः शुकच्छदसमच्छविपत्रमाल
भारी हरिष्यति न कस्तव तत्र चित्तं ।
यत्पल्लवौघपरिरम्भविजृम्भितेन
ख्याता जगत्सु हरितो हरितः स्फुरन्ति ॥३८॥

नन्वत्रेति । ननु हे भैमि ते तव आन्तरं चित्तं अत्र अस्मिन् हय हतिविश्रुतनाम्नि शाकद्वीपप्रशासिनि शाकद्वीपाधिपे राजनि एतद्भुजयोर्यद्विरुदं पौरुषप्रशस्तिस्तत्र ये वन्दिनः स्तुतिपाठकास्तेभ्योजा यत इति तादृश्या अनया गिरापि वाचापि किं रागि अनुरक्तं ना जनि न जातं अपि तु अनुरक्तीभवितुं युज्यते किम्भूतया गिरा सुधीषु पण्डितेषु सुधीभवन्त्या अमृतायमानया वन्दिवर्णितामेतस्य प्रशस्तिं श्रुत्वा अस्मिन्राजनि तव अनुरागो युज्यत इति भावः । गद्यपद्यमयी राजस्तुतिर्विरुदमुच्यत इति साहित्यदर्पणः ॥३७॥

शाक इति । तत्र द्वीपे शाकस्तरुस्तव चित्तं हरिष्यति त्वामनुरञ्जयिष्यति किम्भूतः शुकस्य कीरस्य छदाः पक्षास्तेषां समा सदृशी छवि र्दीप्तिर्यस्यास्तादृशी या पत्राणां पल्लवानां माला पंक्तिस्तां बिभर्त्तीति तादृशः स कः हरितो दिशः यस्य शाकवृक्षस्य पल्लवौघानां पत्रसमूहानां यत्परिरम्भणं सम्बन्धस्तस्य जृम्भितेन विलसितेन हरितो हरिद्वर्णाः सत्यः जगत्सु ख्याता अर्थात् हरिदिति यौगिकनाम्ना विख्याता भूत्वा स्फुरन्ति एतत्पत्रसम्बन्धेनैव दिशो हरित इति यौगिकनाम्न्यो जाता इत्यर्थः । माल भारीति क्वचित्तादाविष्ठकारेरिति क्लः ॥३८ ॥

Digitized by Google

स्पर्शेन तत्र किल तत्तरुपत्रजन्मा
यन्मारुतः कमपि सम्मदमादधाति।
कौतूहलं तदनुभूय विधेहि भूयः
श्रद्धां पराशरपुराणकथान्तरेऽपि ॥ ३९ ॥
क्षीरार्णवस्तव कटाक्षरुचिच्छटाना
मन्वेतु तत्र विकटायितमायताक्षि।

स्पर्शेनेति ॥ तत्र द्वीपे तस्य तरोः शाकस्य पत्राज्जन्म उत्पत्तिर्यस्य स तादृशो मारुतो वायुः स्पर्शेन कृत्वा किल प्रसिद्धौ कमपि अनिर्वचनीयं यत्सम्मदं हर्षं आदधाति जनयति हे भैमि त्वं तत्कौतूहलं सम्मदं अनुभूय प्रत्यक्षीकृत्य पराशरपुराणस्य विष्णुपुराणस्य कथान्तरेऽपि आख्यान विशेषेऽपि भूयः पुनः श्रद्धां आस्थां विधेहि कुरु। शाकस्तत्र महान् वृक्षः सिद्धगन्धर्वसेवितः। यत्पत्रवातसंस्पर्शादाह्लादो जायते परः इति विष्णुपुराणवचनात् तत्रत्यवायोस्तथाविधत्वं त्वया पूर्वं अनुभूतमेव अधुना तत्र गत्वा पुनरपि तदनुभवनीयमिति भूयःशब्दार्थः भूयसीं महतीं श्रद्धामिति वा ॥ ३९ ॥

क्षीरार्णव इति ॥ हे आयताक्षि विशाललोचने भैमि तत्र शाकद्वीपे क्षीरार्णवः क्षीरसमुद्रः वेलावन्यां तीरभूमौ या वनततिः काननपरम्परा तस्याः प्रतिबिम्बस्य चुम्बः सम्बन्धस्तेन किर्म्मीरितो नानावर्णीकृतो य ऊर्म्मिचयस्तरङ्गसमूहस्तस्य चारिमा सौन्दर्य्यं चापलं चञ्चलत्वञ्च ताभ्यां कृत्वा तव कटाक्षस्य रुचिच्छटाः कान्तिपरम्परास्तासां विकटायितं महत्त्वं सौन्दर्य्यं अन्वेतु अनुकरोतु क्षीरसमुद्रः स्वभावतः श्वेतः वनप्रतिबिम्ब सम्बन्धान्मध्ये नीलः वायुवशाच्चञ्चलश्च तव कटाक्षाधारचक्षुरपि परितः

Digitized by Google

वेलावनीवनततिप्रतिबिम्बमुग्ध
किर्म्मीरितोर्म्मिचयचारिमचापलाभ्यां ॥ ४० ॥

बालातपैः कृतकगैरिकतां कृता द्वि
स्तत्रोदयाचलशिलाः परिशीलयन्तु ।
त्वद्विभ्रमभ्रमणजश्रमवारिधारि
पादाङ्गुलीगलिततया नखलाक्षयापि ॥ ४१ ॥
नृणां करम्बितमुदामुदयन्मृगाङ्क
शृङ्गं व्रजत्वनघजङ्घि परिभ्रमन्त्याः ।

न्वितं मध्ये नीलं चञ्चलञ्च तस्मात् तत्सदृशौ भवतामित्यर्थः । चित्रटा कलवा राश्मां त्रिषूर्वविकरालयोरिति मेदिनी ॥ ४० ॥

बालातपैरिति ॥ हे भैमि तव शाकद्वीपे उदयाचलशिलाउदयपर्व्वतस्य प्रस्तरा बालातपैः उदयाचलस्थनवीनसूर्य्यकिरणैः तथा नखलाक्षयापि तव नखस्थितालक्तकेन च कृतां कृतकगैरिकतां कृत्रिमगैरिकधातुमत्तां द्विः प्रकारद्वयेन परिशीलयन्तु अनुभवन्तु किम्भूतया नखलाक्षया तव विभ्रमेण विलासेन यद्भ्रमणं वनविहारस्तस्माज्जायत इति तादृशं यत् श्रमवारि स्वेदजलं तद्धारिण्याः पादाङ्गुल्यग्रेभ्यो गलितया क्षरितया एतस्मिन् वृते उदयाचलकाननेऽपि विहरिष्यसीति भावः ॥ ४१ ॥

नृणामिति ॥ हे अनघजङ्घि सुन्दरजङ्घाशालिनि भैमि तव शाकद्वीपे प्रसिद्धे वा उदयाद्रिशिखरे उदयाचलशृङ्गे परिभ्रमन्त्या इतस्ततोऽवस्थानात्तव काश्मीरसम्भवस्य कुङ्कुमस्य समालम्भनेन विलेपनेन अभिरामं चारुतया मनोज्ञं आस्यं मुखं दृष्ट्वं सत् करम्बितमुदां सञ्जातहर्षाणां नृणां उदयन् यो मृगाङ्कश्चन्द्रस्तस्य शृङ्गं भ्रमं व्रजतु करोतु

Digitized by Google

तस्योदयाद्रिशिखरे तव हर्म्यमास्यं
काश्मीरसम्भवसमालभनाभिरामं ॥ ४२ ॥
एतेन ते विरहपावकमेत्य तावत्
कामं स्वनाम कलिताम्वयमन्वभावि ।
अङ्गीकरोषि यदि तत्तव नन्दनाद्यै
र्लब्धान्वयं स्वमपि नन्वयमातनोतु ॥ ४३ ॥
लक्ष्मीलतासमवलम्बभुजद्रुमेऽपि
वाग्देवतायतनमञ्जुमुखाम्बुजेऽपि ।

कुङ्कुमविलेपनेनारक्तं तव मुखं दृष्ट्वा किमयं चन्द्र उदित इति सर्व्वेषां हर्षो भविष्यति तस्मादेनं वृणीष्वेति भावः ॥ ४२ ॥

एतेनेति । हे भैमि एतेन राज्ञा काममत्यन्तं ते तव विरहपावकं विरहाग्निं तावत् प्रथमं एत्य प्राप्य स्वनाम हव्यहरिति निजसंज्ञां कलितान्वयं अनुगतार्थं अन्वभावि अनुभूतं हव्यं वस्तु यथा अग्निस्थमनुभवति तथायमपि कामाग्निस्थमनुभूतवान् तस्मात् हूयते असौ प्रक्षिप्यत इति व्युत्पत्तियुक्तमस्य हव्येति नामेत्यर्थः ननु भो भैमि अधुना त्वं यदि एनमङ्गीकरोषि वृणोषि तर्हि अयं राजा तव नन्दनाद्यैः पुत्रपौत्रादिभिः कृत्वा स्वमपि आत्मानमपि लब्धान्वयं लब्धसन्तानं आतनोतु करोतु अस्य नाम पूर्व्वं सान्वयं जातं अधुना तव प्राप्त्या आत्मापि सान्वयोभवत्विति शब्दच्छलेन अपिः सार्थकः अयं पूर्व्वावधि त्वय्यनुरक्तस्तस्मादेनं वृणीष्वेति भावः यदिशब्देन च स्वीकारस्य प्राप्तिकालमपि सूचितं ॥ ४३ ॥

लक्ष्मीति । लक्ष्मीरेव लता वल्ली तस्याः समवलम्ब आश्रयो भुजद्रुमो यस्य तादृशेऽपि अतिसम्पत्तिशालिन्यपि तथा वाग्देवतायाः

सामुत्र दूषणमजीगणदेकमेव
नार्थी बभूव मघवा यदमुष्य देवः ॥ ४४ ॥
लक्ष्मीविलासवसतेः सुमनःसु मुख्या
दस्मादिहाय भुवि लब्धगुणप्रसिद्धिं ।
स्थानान्तरं तदनु निन्युरिमां विमान
वाहाः पुनः सुरभितामिव गन्धवाहाः ॥ ४५ ॥
भूयस्ततोनिखिलवाङ्मयदेवता सा
हेमोपमेयतनुभासमभाषतैनां ।

सरस्वत्या आयतनं गृहरूपं मञ्जु मनोज्ञं मुखाम्बुजं मुखपद्मं यस्य तादृ शेऽपि अतिविद्यावत्यपि अमुत्र अस्मिन् इवे राजनि सा भैमी एकमेव दूषणं अजीगणत् गणयामास यत् मघवा इन्द्रोदेवः अमुष्य राज्ञोऽर्थी याचको न बभूव अयं धनेषु विद्यासु च गणद्य समानएव किन्तु इन्द्रोनअस्य याचकोजातः अस्य तु न आवदतीदमेवास्य दूषणं गणयित्वा भैमी वं न वृतवतीत्यर्थः ॥ ४४ ॥

लक्ष्मीति ॥ तदनु तदनन्तरं विमानवाहायानवाहका लक्ष्म्या विलास वसतेः क्रीडागृहात् तथा सुमनःसु पण्डितेषु मुख्यात् श्रेष्ठात् अस्मात् नृपात् आकृष्य भुवि पृथिव्यां लब्धा गुणैः सौन्दर्यादिभिः प्रसिद्धिः ख्या तिर्यया तादृशीं इमां भैमीं पुनः स्थानान्तरं राजान्तरसमीपं निन्युः प्रापयामासुः उपमिनोति गन्धवाहाः सुरभितामिव यथा गन्धवाहा वा यवः सुमनःसु पुष्पेषु मुख्यात् श्रेष्ठात् लक्ष्म्या विलासवसतेः पद्मात् आ कृष्य भुवि लब्धा गुणेषु चतुर्विंशतिप्रकारेषु रूपादिषु मध्ये प्रसिद्धि र्यया तादृशीं सुरभितां सौरभं स्थानान्तरं नयन्ति तथा निन्युः ॥ ४५ ॥
भूयइति ॥ ततोऽनन्तरं निखिलवाङ्मयानां समस्तशास्त्राणां देवता

Digitized by Google

एनं स्वबाहुबहुवारनिवारितारि
चित्ते कुरुष्व कुरुविन्दसकान्तिदन्ति ॥ ४६ ॥
क्रौञ्चस्य पश्य दयितं द्युतिमन्तमेतं
क्रौञ्चस्य चञ्चलदृगञ्चलविभ्रमेण ।
यन्मण्डले स किल मण्डलसन्निवेशः
पूरश्चकास्ति दधिमण्डपयःपयोधेः ॥ ४७ ॥

अधिष्ठात्री देवी सा सरस्वती हेमा देवाङ्गनाविशेषस्तया हेम्ना सुवर्णेन वा उपमेया तत्सदृशी तनुभाः शरीरकान्तिर्यस्यास्तादृशी एनां भैमीं भूयः पुनरपि अभाषत उक्तवती किमभाषतेत्याह हे कुरुविन्दसकान्ति दन्ति कुरुविन्दानि रत्नविशेषास्तैः सकान्तयः सदृशाश्छवयो दन्ता यस्यास्तत्सं हुधि अतिशुभ्रदन्तपंक्तिके भैमि स्वबाहुना निजभुजबलेन बहुवारं निवारिता अरयो येन तादृशं एनं सम्मुखवर्त्तिनं राजानं चित्ते कुरुष्व एनं वृणुष्वेत्यर्थः स्वबाहुनित्येनन शत्रुनिग्रहे परानपेक्षत्वादतिवीरत्वं सूचितं। कुरुविन्दं रत्नभेदे मुस्ताकुल्माषयोः पुमानितिमेदिनी ॥ ४६ ॥

द्वीपस्येति ॥ हे भैमि त्वं क्रौञ्चस्य द्वीपस्य दयितं पतिं द्युतिमन्तं द्युतिमन्नामानं अथच तेजस्विनं एतं राजानं चञ्चलो यो दृगञ्चलश्चक्षुःप्रान्तस्तस्य विभ्रमेण विलासेन पश्य कटाक्षेण निरीक्षस्वेत्यर्थः किल प्रसिद्धो यस्य रा ज्ञो मण्डले राज्ये क्रौञ्चद्वीपं परितो मण्डलोवर्त्तुलः सन्निवेशोऽवस्थानं यस्य तादृशः पाण्डुः शुभ्रः स प्रसिद्धो दधिमण्डपयोधेर्दधिमण्ड नामकसमुद्रस्य पूरः प्रवाहश्चकास्ति शोभते एतस्मिन् वृते तव दधिमण्डोदसमुद्रदर्शनं भविष्यतीत्यर्थः ॥ ४७ ॥

Digitized by Google

तत्राद्रिरस्ति भवदङ्घ्रिविहारयाची
क्रौञ्चः स्फुटिष्यति गुणानिव यस्त्वदीयान्।
हंसावलीकलकलप्रतिनादवाग्भिः
स्कन्देषुवृन्दविवरैर्विवरीतुकामः ॥ ४८ ॥

वैदर्भि दर्भदलपूजनयापि यस्य
गर्भे जनः पुनरुदेति न जातु मातुः।
तस्यार्चनां रचय तत्र मृगाङ्कमौले
सम्यक्तदैवतजनाभिजनः स देशः ॥ ४९ ॥

तत्रेति॥ तत्र द्वीपे क्रौञ्चोऽद्रिर्भवत्यास्तव अङ्घ्रिविहारयाची चरणविहारं प्रार्थयमानोऽस्ति यः हंसावलीनां हंसश्रेणीनां कलकलस्य कोलाहलस्य यः प्रतिनादः प्रतिध्वनिः स एव वाग्यत्र तादृशैर्मुखैरिव स्कन्देषुवृन्दानां कार्त्तिकेयबाणसमूहानां विवरैश्छिद्रैः कृत्वा त्वदीयान् गुणान् विवरीतुकाम इव वर्णयितुमना इव स्फुटिष्यति शोभिष्यते पूर्वं कार्त्तिकेयेन क्रौञ्चपर्वते बाणैश्छिद्राणि कृतानीति पुराणवार्त्ता अत एव क्रौञ्चदारण इति तस्य नाम ॥ ४८ ॥

वैदर्भीति। हे वैदर्भि भैमि यस्य दर्भदलेन कुशपत्रेण पूजनयापि जनो लोकः जातु कदाचिदपि मातुर्गर्भे पुनर्नोदेति नोत्पद्यते मुक्तो भवतीत्यर्थः त्वं तत्र क्रौञ्चद्वीपे तस्य मृगाङ्कमौलेः शिवस्य अर्चनां पूजनं रचय कुरु तत्र गत्वा केवलं त्वमेव तस्य पूजां न करिष्यसीत्याह यतः स देशः सम्यक् शिव एव दैवतं येषां तादृशा ये जनास्तेषामभिजन उत्पत्तिस्थानं तस्मात्तज्जनैः सार्द्धं तं पूजयेत्यर्थः यस्य कुशपत्रेण पूजनेऽपि मुक्तिर्जायते तस्य पुष्पादिना पूजने किं वाच्यमित्यर्थः। कुलेऽप्यभिजनो जन्मभूम्यामपीत्यमरः ॥ ४९ ॥

Digitized by Google

चूडाग्रचुम्बिमिहिरोदयशैलशील
स्तेनाः स्तनन्धयसुधाकरशेखरस्य।
तस्मिन् सुवर्णरसरूषणरम्यहर्म्य
भूभृद्घटाघटय हेमघटावतंसाः॥ ५०॥
तस्मिन्मलिम्लुचइव स्मरकेलिजन्म
घर्म्मोदबिन्दुमयमौक्तिकमण्डनं ते।
जालैर्म्मिलद्दधिमहोदधिपूरलोल
कल्लोलचामरमरुत्तरणि च्छिनत्तु॥ ५१॥

चूडाग्रेति। हे भैमि तस्मिन् द्वीपे स्तनन्धयोबालः सुधाकरश्चन्द्रः शेखरे मस्तके यस्य स तथा तस्य शिवस्य सुवर्णरसेन हेमद्रवेण यत् रूषणं विले पनं तेन रम्याणि यानि हर्म्याणि तान्येव भूभृतः पर्व्वतास्तेषां घटाः श्रेणीः घटय कारय किम्भूताः हेमघटाः स्वर्णकलसा अवतंसाः शिरोभूषणानि यासां ताः तथा चूडाग्रचुम्बी शृङ्गाग्रस्थायी मिहिरः सूर्य्यो यस्य तादृ शस्य उदयशैलस्य यत् शीलं स्वभावस्तस्य स्तेनाश्चौराः तत्तुल्या इत्यर्थः तत्र शिवप्रीत्यर्थं उदयाचलतुल्यान् प्रासादान् कारयेति भावः॥ ५०॥

तस्मिन्निति। हे तरुणि प्रादुर्भूतयौवने भैमि तस्मिन् द्वीपे दधिमहो दधेर्दधिमण्डसमुद्रस्य पूरे प्रवाहे लोलाश्चञ्चला ये कल्लोलास्तरङ्गास्तएव शुभ्रत्वाद्दीर्घत्वाच्च चामराणि तेषां मरुद्वायुर्जालैर्गवाक्षैर्मिलन् प्रविशन् सन् मलिम्लुचइव चौर इव ते तव स्मरकेलौ सुरते जन्म येषां तादृशाये घर्म्मोदबिन्दवः स्वेदजलकणास्तन्मयं मौक्तिकमण्डनं मुक्ताहारभूषणं छि नत्तु अपहरतु चौरोऽपि जालमार्गेण गृहं प्रविश्य मुक्ताहारं अपह रति अस्मिन् वृते दधिसमुद्रसम्पर्किशीतलवायुसम्पर्केण तव सुरतश्रमो न भविष्यतीत्यर्थः। चौरैकागारिकस्तेनदस्युतस्करमोषकाः। प्रतिरोधि परास्कन्दिपाटच्चरमलिम्लुचा इत्यमरः॥ ५१॥

Digitized by Google

एतद्यशो नवनवं खलु हंसवेशं
वेशान्तसन्तरणदूरगमक्रमेण।
अभ्यासमर्ज्जयति सन्तरितुं समुद्रान्
गन्तुञ्च निःश्रममितः सकलान् दिगन्तान् ॥ ५२ ॥
तस्मिन् गुणैरपि भृते गणनादरिद्रै-
स्तन्वी न सा हृदयबन्धमवाप भूपे।

एतदिति। हंसयोराजहंसतुरङ्गमविशेषयोरिव वेशो यस्य तादृशं एतस्य राज्ञो यशः नवं नवं प्रतिदिनं अपूर्व्वं सत् समुद्रान् सन्तरितुं तथा इतोऽस्मात् प्रदेशात् निःश्रमं अनायासं यथा तथा सकलान् दिगन्तान् दिक्प्रान्तान् गन्तुं च वेशान्तेऽल्पसरसि यत् सन्तरणं प्लवनं दूरे योगमो गमनं च तयोः क्रमेण परिपाट्या खलु निश्चयेनाभ्यासं अर्ज्जयति करोति यथा राजहंसो नद्यादिकं सन्तरितुं वेशान्तसन्तरणेनाभ्यासं करोति यथा च तुरङ्गमविशेषो दिगन्तं गन्तुं किञ्चित् किञ्चित् दूरगमनेनाभ्यासं करोति तथास्य यशो नवं नवं सत् अभ्यासं करोतीत्यर्थः प्रतिदिनवर्द्धमानयशोयुक्तोऽयमिति भावः। हंसः स्यान्मानसौकसि निर्लोभनृपविष्णुर्के परमात्मनि मत्सरे तुरङ्गमप्रभेदे चेति मेदिनी ॥ ५२ ॥

तस्मिन्निति। गणनादरिद्रैर्गणनाशून्यैरसंख्यैर्गुणैः सौन्दर्य्यादिभिर्भृतेऽपि पूर्णेऽपि तस्मिन् भूपे द्युतिमति सा तन्वी भैमी हृदयबन्धं मनोऽनुरागं नावाप न प्राप्तवती गुणवत्यपि कथं नानुरक्तेत्यत आह दैवे भाग्ये विरुध्यति प्रतिबन्धकतामाचरति सति हन्त खेदे पौरुषाणि पुरुषकारा निबन्धनतां कारणतां न वहन्ति तत्तत् कार्य्यं न जनयन्ति अपितु दैवसहकारेणैव वहन्तीत्यर्थः किम्भूतानि प्रयासेन प्रयत्नेन परुषाणि कर्कशानि यथा यथा प्रयासः क्रियते तथा तथा कार्य्यानुत्कर्ष

दैवे विरुन्धति निबन्धनतां वहन्ति
हन्त प्रयासपरुषाणि न पौरुषाणि ॥ ५३ ॥
ते निन्यिरे नृपतिमन्यमिमाममुष्मा
दंसावतंसशिविकांशभृतः पुमांसः ।
रत्नाकरादिव तुषारमयूखलेखां
लेखानुजीविपुरुषा गिरिशोत्तमाङ्गं ॥ ५४ ॥
एकैकमुद्गतगुणं च्युतदूषणञ्च
हित्वान्यमन्यमुपगत्य परित्यजन्तीं ।

पुरुषव्यापारा विरसा भवन्तीत्यर्थः गुणवानपि दैवप्रतिबन्धकतया न वृत इति भावः । अथ च वागुरादिगुणसमूहभृते स्थाने हरिण्यादि बन्धनं प्राप्नोति इयन्तु यन्न प्राप्नोति तदाश्चर्य्यमिति ध्वनिः ॥ ५३ ॥

ते इति ॥ अंसयोः स्कन्धयोरवतंसा भूषणीभूता ये शिविकाया या नस्य अंशास्तान् बिभ्रति धारयन्तीति तादृशास्ते पुमांसोयानवाहा इमां भैमीं अमुष्मात् नृपतेः सकाशात् अन्यं नृपतिं निन्यिरे प्रापया मासुः अत्रोपमिनोति लेखानां देवानां अनुजीविपुरुषाः सेवका जनाः लेखा एवानुजीविपुरुषा वा तुषारमयूखस्य चन्द्रस्य लेखां कलां रत्ना करादिव यथा रत्नाकरसकाशात् गिरिशस्य शिवस्य उत्तमाङ्गं मस्तकं निन्यिरे तथेत्यर्थः वाहकानां बहुत्वात् शिविकांशा इत्युक्तं ॥ ५४ ॥

एकैकमिति ॥ जगदर्चिते त्रिलोकपूजिते पादपद्मे यस्यास्तादृशी सरस्वती उद्गताः प्रकाशमाना गुणा यस्य तादृशं तथा च्युतदूषणं दोष रहितञ्च एकैकं एकमेकं राजानं हित्वा त्यक्त्वा अन्यं अन्यं राजानं उप गत्य प्राप्य परित्यजन्तीं एतां भैमीं जगाद वक्ष्यमाणमुवाच कामिव

Digitized by Google

एतां जगाद जगदर्चितपादपद्मा
पद्मामिवाच्युतभुजान्तरविच्युतांसां ॥ ५५ ॥
ईशः कुशेशयसनाभिशये कुशेन
द्वीपस्य लाञ्छिततनोर्यदि वाञ्छितस्ते ।
ज्योतिष्मता सममनेन वनीघनासु
तत्त्वं विनोदय घृतोदतटीषु चेतः ॥ ५६ ॥

अच्युतस्य नारायणस्य भुजान्तरात् वक्षःस्थलात् विच्युतोऽंसो यस्यास्तादृशीं पद्मां लक्ष्मीमिव सापि चापल्यात् गुणवन्तमपि दोषशून्यमपि जनं त्यक्त्वा अन्यं अन्यं प्राप्य परित्यजति अच्युतभुजान्तरेत्यनेन यथा लक्ष्मीर्नारायणं विना अन्यत्र स्थिरा न तथा इयमपि नलं विना अन्यत्र स्थिरा नेति सूचितं ॥ ५५ ॥

ईश इति । कुशेशयस्य पद्मस्य सनाभिः समानः शयो हस्तो यस्यास्तथा हे तादृशि भैमि कुशेन कुशस्तम्बेन लाञ्छिततनोश्चिह्नितशरीरस्य द्वीपस्य कुशद्वीपस्य ईशः प्रभुस्ते तव यदि वाञ्छितोऽभिलषितः तत्तदा त्वं वनीभिर्वनैर्घनासु निविडासु घृतोदस्य समुद्रस्य तटीषु ज्योतिष्मता ज्योतिष्मन्नाम्ना अथ च कान्तिमता अनेन राज्ञा समं चेतोमनो विनोदय हर्षय वनबाहुल्यात् निविडच्छायेषु घृतोदसमुद्रतटेषु अनेन सार्द्धं तव विहारे श्रमो न भविष्यति तदेनं वृणीष्वेति भावः। कुशेशयेति कौ पृथिव्यां शेते इति कुशं जलं तत्र शेते इति कुशेशयं पद्मं अकालवाचिनः शयवासवासिष्विति सप्तम्या अलुक् घृतोदेति क्षीरोदादिष्वेति संज्ञायां उदकस्योदादेशः । सहस्रपत्रं कमलं शतपत्रं कुशेशयमित्यमरः ॥ ५६ ॥

Digitized by Google

वातोर्म्मिदोलनचलद्दलमण्डलाग्र
भिन्नाभ्रमण्डलगलज्जलजातसेकः।
स्तम्बः कुशस्य भविताम्बरचुम्बिचूड
स्चित्राय तत्र तव नेत्रनिपीयमानः॥ ५७॥
पाथोधिमाथसमयोत्थितसिन्धुपुत्री
पत्पङ्कजार्पणपवित्रशिलासु तत्र।

वातोर्म्मीति। हे भैमि तत्र द्वीपे नेत्राभ्यां निपीयमानः सादरमालोक्यमानः कुशस्य स्तम्बो गुच्छस्तव चित्राय विस्मयाय भविता भविष्यति किम्भूतः अम्बरचुम्बिनी गगनतलस्पर्शिनी चूडा अग्रं यस्य तादृशः अतएव वातोर्म्मिभिर्वायुपरम्पराभिर्वातस्य उर्म्मिभिर्वेगैर्व्वा यद्दोलनं तेन चलन्ति चञ्चलानि यानि दलानि तान्येव मण्डलाग्राः खड्गास्तैर्भिन्नं विदारितं यत् अभ्राणां मेघानां मण्डलं समूहस्तस्माद्गलद्भिः क्षरद्भिर्जलैर्जातः सेकः सेचनं यस्य तादृशः अदृष्टपूर्व्वमेतादृशं कुशस्तम्बं दृष्ट्वा त्वं सविस्मया भविष्यसीत्यर्थः दलमण्डलं दलसमूहस्तस्य अग्रेणेति वा। ऊर्म्मिः स्त्रीपुंसयोर्वीच्यां प्रकाशे वेगभङ्गयोरिति मेदिनी कौक्षेयको मण्डलाग्रः करवालः कृपाणवदित्यमरः॥ ५७॥

पाथोधीति। हे इन्दुमुखि भैमि तत्र कुशद्वीपे मन्दरकन्दरासु मन्दरनामकपर्व्वतनदीषु पत्या सह विहारमयैर्विहारबहुलैर्विलासैः काम चेष्टितैः कृत्वा आनन्दं आवह धारय किम्भूतासु पाथोधिमाथसमये समुद्रमन्थनकाले उत्थिता या सिन्धुपुत्री लक्ष्मीस्तस्याः पत्पङ्कजार्पणेन पादपद्मारोपणेन पवित्राः शिला यासु तास्तथा तादृशीषु लक्ष्मीरिव त्वमपि

Digitized by Google

पत्या सहावह विहारमयैर्विलासै-
रानन्दमिन्दुमुखि मन्दरकन्दरासु ॥ ५८ ॥
आरोहणाय तव सज्ज इवास्ति तत्र
सोपानशोभिवपुरश्मवलिच्छटाभिः ।
भोगीन्द्रवेष्टशतघृष्टिकृताभिरब्धि-
क्षुब्धाचलः कनककेतकगात्रगात्रि ॥ ५९ ॥
मन्थानगः स भुजगप्रभुवेष्टघृष्टि-
लेखावलम्बवलनिर्झरवारिधारः ।

अधुना तत्पत्याः शिला अलंकुर्वित्यर्थः नलं वृते सति मन्दरपर्वत कन्दरायां तव विहारो भविष्यतीति भावः ॥ ५८ ॥

आरोहणायेति । हे कनककेतकगात्रगात्रि कनककेतकं स्वर्णकेतकं तस्य गात्रसदृशं गात्रं शरीरं यस्यास्तथाविधे अतिगौराङ्गि भैमि तत्र कुशद्वीपे अब्धेः समुद्रस्य क्षुब्धाचलो मन्थनपर्वतो मन्दरस्तव आरोहणाय सज्ज इव सन्नद्ध इव अस्ति किम्भूतः यतो भोगीन्द्रो मन्थनरज्जुभूतो वासुकिस्तेन कृतं यद्वेष्टशतं वेष्टनशतं तेन या घृष्टयो घर्षणानि ताभिः कृताभिर्जनिताभिरश्मवलिच्छटाभिः शिलाभङ्गिपरम्पराभिः कृता सोपानैरिव शोभि वपुः शरीरं यस्य तादृशः वासुकिघर्षणजनितशिलाभङ्गिपरम्परारूपसोपानैः कृत्वा त्वमनायासेन मन्दरमारुह्य विहर्तुं शक्ष्यसि तस्मात्तुच्छमन्दरारोहणाभावशङ्कां परित्यज्य एनं वृणीष्वेतिभावः ॥ ५९ ॥

मन्थानग इति ॥ हे भैमि स मन्था मन्थनकृत् नगः पर्वतो मन्दरस्तवैव योस्तव चक्षुषोः तस्य मन्दरस्यैव भरेण भारेण यन्त्रितानि आक्रान्तानि शीर्षाणि मस्तकानि यस्य तादृशो यः शेषोऽनन्तस्तस्य शेषाङ्गैर्मस्तकेतरावयवैर्वेष्टिता या तनुस्तस्याभ्रमं भ्रान्तिं आतनोतु जनयतु किम्भूतः भुजग

त्वन्नेत्रयोः स्वभरयन्त्रितशीर्षशेष
शेषाङ्कवेष्टिततनुभ्रममातनोतु ॥ ६० ॥
एतेन ते स्तनयुगेन सुरेभकुम्भौ
पाणिद्वयेन दिविषद्द्रुमपल्लवानि ।
आस्येन स स्मरतु नीरधिमन्थनोत्थं
स्वच्छन्दमिन्दुमपि सुन्दरि मन्दराद्रिः ॥६१॥
वेदैर्व्वचोभिरखिलैः कृतकीर्त्तिरत्ने
हेतुं विनैव धृतनित्यपरार्थयत्ने ।

प्रभुर्वासुकिस्तस्य वेष्टेन या दृष्टिर्वैर्षं तया कृतासु लेखासु वलयाकार प्रस्तरभङ्गिपरम्परासु वलक्षशुक्लन्त्यो धवलाः शुभ्रा निर्झरवारीणां धाराः प्रवाहाश्च तादृशः शेषस्य शुभ्रत्वात् वारिधाराणामपि धवल त्वात् लेखासु वर्णयितत्वाच्च भ्रमोभवितुं युज्यते शिरसि आक्रान्तः सर्पो ऽवशिष्टेनाङ्गेन आक्रमकर्त्तुं रङ्गानि वेष्टयतीति सर्पस्वभावः धवलेत्यत्र वहलेति क्वचित् पाठः ॥ ६० ॥

एतेनेति । हे सुन्दरि भैमि स मन्दराद्रिस्ते तव एतेन अतिमनोज्ञत या दृश्यमानेव स्तनयुगेन सुरेभस्य ऐरावतस्य कुम्भौ स्वच्छन्दं यथेच्छं स्मरतु तथा एतेन ते पाणिद्वयेन दिविषद्द्रुमस्य कल्पवृक्षस्य पल्लवानि स्वच्छन्दं स्मरतु तथा एतेन ते आस्येन मुखेन इन्दुमपि चन्द्रमपि स्वच्छ न्दं स्मरतु किम्भूतमेतत्सर्व्वं नीरधिमन्थनोत्थं समुद्रमन्थनादुत्थितं समु द्रमन्थनसमये एतत्सर्व्वमासीत् अधुनातु तत्तत्सदृशं तव स्तनयुगादिकं दृष्ट्वा संस्कारोद्बोधात् तत्सर्व्वं स्मरत्वित्यर्थः ऐरावतकुम्भादिवदतिसुन्दरं तस्याः स्तनाद्यङ्गमिति भावः अतएव सुन्दरीति सम्बोधनं ॥ ६१ ॥

वेदैरिति । तया भैम्या तस्मिन् ज्योतिष्मति महीभुजि राज्ञि अनु मतिः सम्मतिर्न भेजे न कृता उपमिमीते मीमांसयेव यथा पूर्व्वं मीमां

Digitized by Google

मीमांसयेव भगवत्यमृतांशुमौलौ
तस्मिन् महीभुजि तयानुमतिर्न भेजे ॥ ६२ ॥
तस्मादिमां नरपतेरपनीय तन्वीं
राजन्यमन्यमथ यान्यजनः स निन्ये ।

यथा अमृतांशुमौलौ चन्द्रकलायुतविग्रहवति भगवति ईश्वरे अनुमतिर्न भेजे देवानां मन्त्रमयत्वेन शरीराभावात् चन्द्रकलाकलितमस्तकः कश्चिदीश्वरो नास्तीति तन्मतं यद्वा भगवति जगत्कर्तृत्वे अनुमतिर्न भेजे जगच्च अनादि न तस्य ईश्वरः कर्त्तेति उक्तञ्च तन्मतं पुष्पदन्तेन किमीहः किंकाय इत्यादि निभृते महीभुजि अखिलैर्वेदैर्वेदतुल्यैः सत्यैर्वचोभिः कृत्वा कृता कीर्त्तिर्येन वेदैस्तेषां मध्ये रत्नमिवेति तादृशे सत्यवादि नामप्रगल्भे इत्यर्थः तथा हेतुं कारणं विनैव धृता नित्यं प्रतिदिन परार्थं परकार्य्ये यत्नीयेन तादृशे स्वोपकारमनपेक्ष्यैव विहितपरोपकारे इत्यर्थः निभृते ईश्वरे अखिलैर्वेदरूपैर्व्वचोभिः कृतकीर्त्तिरत्ने कृत कीर्त्तनेनात्मनि सकलवेदबोधिते इत्यर्थः तथा हेतुं विनैव धृतनित्यपरार्थयत्ने परमकारुणिके इत्यर्थः। भगवति अनुमतिर्वेदकर्तृत्वविषये सम्मतिर्न भेजे वेदस्य नित्यत्वादिति च व्याचक्षते ॥ ६२ ॥

तस्मादिति। अथानन्तरं स यान्यजनो वाहकलोकः स्त्रीभावेन स्त्रीस्वभावेन धावितपदां चालितचरणां गच्छन्तीति चरणचालनेन धावयन्तीं इमां तन्वीं भैमीं तस्मात् ज्योतिष्मतो नरपतेरपनीय आकृष्य अन्यं राजन्यं क्षत्रियं निन्ये प्रापयामास उपमिनोति अर्थीव अर्थी याचको यथा अविमृश्य दातुर्निर्द्धनत्वमविवेच्य कृतां याच्ञां विधनाद्दरिद्रा न्निमत्थं आकृष्य वित्तेन धनेन वित्तं ख्यातं वित्तं ख्यातं वित्तं धनं यस्य तादृशं

Digitized by Google

स्त्रीभावधावितपदामविमृश्य याञ्चा
मर्थी निवर्त्य विधनादिव वित्तवित्तं ॥ ६३ ॥
देवी पवित्रितचतुर्भुजवामभागा
वागालपत् पुनरिमां गरिमाभिरामां ।
अस्यारिनिष्कृपकृपाणसनाथपाणेः
पाणिग्रहादनुगृहाण गणं गुणानां ॥ ६४ ॥
द्वीपस्य शाल्मलइतिप्रथितस्य नाथः
पाथोधिना वलयितस्य सुराम्बुनाऽयं ।

वा अतिधनिनं निन्द्ये तथा विश्रुतां याञ्चां स्त्रीभावेन स्त्रीलिङ्गतया धावितं शोधितं पदं वाचकशब्दस्तं यस्यास्तादृशीं ॥ ६३ ॥

देवीति ॥ पवित्रितः शोभितश्चतुर्भुजस्य नारायणस्य वामभागो यया तादृशी वाग्रूपा देवी सरस्वती गरिम्णा कुलशीलसौन्दर्य्यादिगौरवेण अभिरामां मनोज्ञां इमां भैमीं पुनरालपत् उवाच किमालपदित्याह हे भैमि अरिषु शत्रुषु निष्कृपो निर्दयो यः कृपाणः खड्गस्तेन सनाथो युक्तः पाणिर्यस्य तादृशस्य अस्य नृपतेः पाणिग्रहात् परिणयात् त्वीयं गुणानां गणं समूहं अनुगृहाण समानगुणगणयुक्तस्यास्य लाभात्त्वीयं गुणगणं सफलयेत्यर्थः ॥ ६४ ॥

द्वीपस्येति ॥ सुरैव मद्यमेव अम्बु जलं यस्य तादृशेन पाथोधिना समुद्रेण वलयितस्य वेष्टितस्य शाल्मल इति नाम्ना प्रथितस्य ख्यातस्य नाथः पतिरयं तस्मात् हे तिलप्रसवनासिके तिलकुसुमसमाननासिके भैमि वपुष्मति वपुष्मामके अथ च प्रशस्तशरीरशालिनि अस्मिन् गुणाब्धौ गुणसमुद्रे त्वं किं न विस्मयसे अहो एतावद्गुणशाली सम्भवतीति विस्मयं न प्राप्नोषि किम्वा अस्मिन् रक्ता अनुरक्ता नासि न भवसि अपितु

Digitized by Google

तस्मिन् वपुष्मति न विस्मयसे गुणाब्धौ
रक्ता तिलप्रसवनासिकि नासि किम्वा ॥ ६५ ॥
विप्रे धयत्युदधिमेकतमं त्रसत्सु
यस्तेषु पञ्चसु बिभाय न सीधुसिन्धुः ।
तस्मिन्ननेन च निजालिजनेन च त्वं
सार्द्धं विधेहि मधुरा मधुपानकेलीः ॥ ६६ ॥
द्रोणः स तत्र वितरिष्यति भाग्यलभ्य
सौभाग्यकार्म्मणमयीमुपदां गिरिस्ते ।

अस्मिन् विस्मयो ऽनुरागश्च त्वया कर्त्तुं युज्यते अथ च वपुष्मति मूर्त्तिमति अब्धौ विस्मयो युज्यते ॥ ६५ ॥

विप्रे इति ॥ हे भैमि यः सीधुसिन्धुः सुरासमुद्रः विप्रे अगस्त्यमुनौ एकतमं उदधिं जलसमुद्रं धयति पिवति सति तेषु पञ्चसु क्षीरोदादिषु त्रसत्सुः अस्मानप्ययं पास्यतीति मत्वा बिभ्यत्सु सत्सु च न बिभाय सुराम यत्वेन ब्राह्मणस्यापेयत्वात् भयं न प्राप्तवान् तस्मिन् अव्यये सीधुसिन्धौ अनेन राज्ञा च निजस्य आलिजनेन सखीजनेन च सार्द्धं सह त्वं मधुरा रम्यामधुपानकेलीः सुरापानक्रीडा विधेहि कुरु एतस्मिन् वृते मधुपान क्रीडा तव सुलभा भविष्यतीति भावः ॥ ६६ ॥

द्रोण इति ॥ हे भैमि तत्र शाल्मलद्वीपे स प्रसिद्धो द्रोणो द्रोणना मा गिरिः पर्व्वतस्ते तुभ्यं भाग्येन शुभादृष्टेन लभ्यं प्राप्यं यत्सौभाग्यजनकं कार्म्मणं वशीकरणादिसाधनं मन्त्रौषधादिकं प्रकृते स्वामिवशीकरण साधनमौषधविशेषस्तन्मयीं उपदां तद्रूपमुपढौकनं वितरिष्यति दास्यति तथाविधानि औषधानि तत्र बहूनि विद्यन्ते इति विशेषणेनाह किम्भूतः औषधीनां वशीकरणादीनां दीप्तिभिः ज्वाला तस्य द्वीपस्य दीपइव स्थितः

तद्द्वीपदीप इव दीप्तिभिरोषधीनां
चूडामिलज्ज्वलदकज्जलदर्शनीयः ॥ ६७ ॥
तद्द्वीपलक्ष्म पृथुशाल्मलितूलजालैः
क्षौणीतले मृदुनि मारुतचारुकीर्णैः ।
लीलाविहारसमये चरणार्पणानि
योग्यानि ते सरससारसकोषमृद्वि ॥ ६८ ॥
एतद्गुणश्रवणकालविजृम्भमाण
तल्लोचनाम्बुजनिकोचनवञ्चितस्य ।

ओषध्योऽपि पर्वते रात्रौ ज्वलन्तीति प्रसिद्धिः दीपसाधर्म्यमाह पुनः किम्भूतः चूडायां शिखरे मिलन्तः संबध्नाज्जलदा मेघा एव कज्जलं तेन दर्शनीयः सुन्दरः दीपोऽपि चूडास्थितकज्जलेन दर्शनीयो भवति क्रौञ्च पर्वते हि बहुविधमौषधं वर्त्तते येन च पतिर्वशीभवति तस्मादत्रौषधेन वशीकृतस्त्वय्येवानुरक्तो भविष्यति तदेनं वृणीष्वेतिभावः । कार्म्मणं मन्त्रतन्त्रादियोजने कर्म्मठेऽपि चेति मेदिनी उपदा तूपढौकनमितिवचः । ६७ ।

तद्द्वीपेति । हे सरसं नूतनं यत्सारसं पद्मं तस्य कोषो मुकुलं संघातो वा तद्वन्मृदि कोमलाङ्घ्रि भैमि मारुतेन वायुना चारु सन्निवेशविशेषेण मनोहरं निबिडं वा यथा स्यात्तथा कीर्णैर्विक्षिप्तैः पातितैः तस्य द्वीपस्य लक्ष्म चिह्नभूतायः पृथुर्महान् शाल्मलिर्वृक्षस्तस्य तूलजालैः कार्पाससमूहैः कृत्वा मृदुनि कोमले क्षौणीतले ते तव लीलाविहारसमये सविलासगमनकाले चरणार्पणानि पादविन्यासा योग्यानि उचितानि भविष्यन्तीतिशेषः कोमलचरणार्पणं हि कोमलवस्तुन्येव युक्तं । ६८ ।

एतदिति । ते शिविकावाहका यानवाहका एतस्य राज्ञो गुणश्रवणकाले विजृम्भमाणं जायमानं यत् तस्या भैम्या लोचनार्पणस्य नयनप्रा

भावस्य चक्रुरुचितं शिबिकाभृतस्ते
तामेकतः क्षितिपतेरपरं नयन्तः ॥ ६९ ॥
तां भारती पुनरभाषत नन्वमुष्मिन्
काश्मीरपङ्कमिषलग्नजनानुरागे ।
श्रीखण्डलेपमयदिग्जयकीर्त्तिराजि
राजद्भुजे भज महीभुजि भैमि भावं ॥ ७० ॥
द्वीपं द्विपाधिपतिमन्दपदे प्रशास्ति
प्लक्षोपलक्षितमयं क्षितिपस्तदस्य ।

त्तस्य निरीक्षणं स्तम्भस्वरभङ्गादौ इङ्गं सङ्गोपनं तेन सूचितस्य गोपित स्य भावस्य भैम्या अभिप्रायस्य उचितं योग्यं चक्रुः किम्भूताः यतस्तां भैमीं एकत एकस्मादस्मात् क्षितिपतेरपरं क्षितिपतिं नयन्तः प्रापयन्तः इतोऽन्यत्र गच्छामीति तस्या योऽभिप्रायस्तदनुरूपमेवेदमिति भावः ॥६९॥

तामिति । भारती सरस्वती तां भैमीं पुनरभाषत उवाच किमभा षतेत्याह ननु हे भैमि अमुष्मिन् महीभुजि राज्ञि भावं अनुरागं भज प्राप्नुहि किम्भूते काश्मीरपङ्कस्य कुङ्कुमविलेपनस्य मिषेण व्याजेन लग्नावि र्भूतो जनानामनुरागो यस्मिन् तादृशे तथा श्रीखण्डलेपमयी चन्दन विलेपनरूपा या दिग्विजयकीर्त्तिराजिर्दिग्विजयजनितयशःपरम्परा तया राजन्तौ शोभमानौ भुजौ यस्य तादृशे अयमतिजनानुरक्तो दि ग्विजयी यशस्वी च तदस्मिन्ननुरक्ता भवेत्यर्थः अनुरागस्य लौहित्येन कीर्त्तेश्च शुभ्रत्वेन कविसमयख्यातत्वात् कुङ्कुमत्वं चन्दनत्वञ्च युक्तं ॥ ७० ॥

द्वीपमिति । हे द्विपाधिपतिवत् मत्तमातङ्गवत् मन्दं मन्दगमनं पदं चरणं यस्यास्तादृशि अलसगमने भैमि अयं क्षितिपो राजा प्लक्षोपलक्षि

मेधातिथेस्त्वमुरसि स्फुर हृष्टसौख्या
साक्षाद्यथैव कमला यमलार्जुनारेः ॥ ७१ ॥
अक्षे महीयसि महीवलयातपत्रे
तत्रेक्षिते खलु तवापि मतिर्भवित्री ।
खेलां विधातुमधिशाखविलम्बिदोला
लोलाखिलाङ्गजनताजनितानुरागे ॥ ७२ ॥

तं प्लक्षनामकवृक्षेण चिह्नितं द्वीपं प्रशास्ति पालयति तस्मात् त्वं मेधातिथेर्मेधातिथिनाम्नः अस्य च धार्य्यावहुश्रियुक्तस्य अस्य क्षितिपस्य उरसि वक्षसि साक्षात् प्रत्यक्षीभूय हृष्टसौख्या आलिङ्गनेन जनितसुखा सती तथैव स्फुर शोभस्व यथैव कमला लक्ष्मीर्यमलार्जुनारेः कृष्णस्य उरसि साक्षात् हृष्टसौख्या सती स्फुरति साक्षादित्यनेन लक्ष्मपक्षात् पूर्वं मत्साक्षात् स्फुरिता अधुनातु वरणेन साक्षात् स्फुरेति सूचितं । ७१ ।

अक्ष इति । हे भैमि तत्र द्वीपे महीवलयस्य भूमण्डलस्य आतपत्रे छत्ररूपे अतिदीर्घलम्बमाननिबिडशाखासमूहे महीयसि अतिबृहति अक्षे अक्षवृक्षे ईक्षिते दृष्टे सति खलु सम्भावनायां तवापि तत्र खेलां दोलाक्रीडां विधातुं कर्तुं मतिर्बुद्धिर्भवित्री भविष्यति किम्भूते अधिशाखं शाखासु विलम्बिन्यो लम्बमाना या दोला हिन्दोलास्ताभिर्लोलानि चञ्चलानि अखिलानि समस्तानि अङ्गानि यस्यास्तादृशी या जनता जनसमूहस्तया जनितोऽनुरागः क्रीडाभिलाषो यस्मिन् जनतया कृत्वा येन वा तादृशीं दोलायमानान् जनान् दृष्ट्वा तवापि तत्र खेलानुरागो भविष्यतीत्यर्थः । ७२ ।

Digitized by Google

पीत्वा तवाधरसुधां वसुधासुधांशु
र्न श्रद्दधातु रसमिक्षुरसोदवारां।
द्वीपस्य तस्य दधतां परिवेषवेषं
सोऽयं चमत्कृतचकोरचलाचलाक्षि ॥ ७३ ॥
सूरं न सौर इव नेन्दुमवीक्ष्य तस्मिन्
नश्नाति यस्तदितरत्रिदशानभिज्ञः।
तस्यैन्दवस्य भवदास्यनिरीक्षयैव
दर्शेऽश्नतोऽपि न भवत्ववकीर्णिभावः ॥ ७४ ॥

पीत्वेति। हे चमत्कृतचकोरचलाचलाक्षि चमत्कृतश्चकितो यश्चकोरस्तद्वच्चलाचले चञ्चले अक्षिणी यस्याः हे तादृशि भैमि सोऽयं वसुधासुधांशुः पृथिवीचन्द्रो राजा मेधातिथिस्तव अधरसुधां ओष्ठामृतं पीत्वा तस्य द्वीपस्य परिवेषवेषं वेष्टनाकारं दधतां इक्षुरसोदवारां इक्षुरसोदसमुद्रजलानां रसं आस्वादं न श्रद्दधातु न बहु मन्यतां तदपेक्षया त्वदधरामृतस्याधिकमधुरत्वात् अन्यत्र चकोरश्चन्द्रस्यामृतं पिबति अत्र तु चन्द्र एव चकोराख्यायास्तवाधरामृतं पिबतीत्याश्चर्य्यमिति चमत्कृतेत्यनेन सूचितं। ७३।

सूरमिति। सौर इव सूर्य्यभक्तो यथा सूरं सूर्य्यं अवीक्ष्य नाश्नाति तथा तस्मिन् द्वीपे इतरत्रिदशानभिज्ञश्चन्द्रेतरदेवानुपासकश्चन्द्रमात्रोपासको यो ना पुरुष इन्दुं चन्द्रं अवीक्ष्य अदृष्ट्वा नाश्नाति न भुंक्ते तस्यैन्दवस्य चन्द्रभक्तस्य दर्शे अमावास्यायां चन्द्रमदृष्ट्वा अश्नतोऽपि भुञ्जानस्यापि भवत्यास्तव आस्यस्य मुखस्य निरीक्षयैव दर्शनेनैव अवकीर्णिभावः क्षतव्रतत्वं न भवतु चन्द्रतुल्यं भवत्यामुखं दृष्ट्वैव भोजनात् चन्द्रदर्शनपूर्व्वकभोजनरूपव्रतभङ्गदोषो न भवत्वित्यर्थः शाकद्वीपे सर्व्वएव लोकाश्चन्द्रमेवोपासते सूर्य्यदर्शनपूर्व्वकमेव भोजनं सौराणां प्रसिद्धमित्युपमानं। अवकीर्णी क्षतव्रत इत्यमरः। ७४।

Digitized by Google

उत्सर्पिणी न किल तस्य तरङ्गिणी या
त्वन्नेत्रयोरहह तत्र विपाशि जाता।
नीराजनाय नवनीरजराजिरास्तां
तत्राञ्जसानुरज राजनि राजमाने ॥ ७५ ॥
एतद्यशोभिरखिलेऽम्बुनि सन्तु हंसा
दुग्धीकृते तदुभयव्यतिभेदमुग्धाः।

उत्सर्पिणीति। किल प्रसिद्धौ। तस्य द्वीपस्य या तरङ्गिणी विपाडिति नाम्नी नदी नोत्सर्पिणी उद्धतप्रवाहा न अतएव अहह आश्चर्यं तत्र तस्यां विपाशि विपाशायां नद्यां जाता नवा तत्कालं विकसिता नीरजानां पद्मानां राजिः श्रेणी त्वन्नेत्रयोस्तव चक्षुषोर्नीराजनाय निर्म्मञ्छनाय सुखातिशयजननाय वास्तां भवतु तस्मात् अत्रास्मिन् राजमाने शोभमाने राजनि मेधातिथौ त्वं अञ्जसा अकपटं अनुरज अनुरक्ता भव विपाशानद्यां उद्धतप्रवाहाभावादेव सदा कमलानि जायन्ते ततश्च तव नयननीराजनमविच्छिन्नं भविष्यतीति नोत्सर्पिणीत्यनेन सूचितं। द्वीपानधिकृत्य विष्णुपुराणे अवसर्पिणी नदी तेषु नचैवोत्सर्पिणी द्विजेति। विपाशा तु विपाट् स्त्रियामित्यमरः। अनुरजेति नलुक् सञ्ज स्वञ्जरञ्जदंशामिति नलुक्॥ ७५ ॥

एतदिति। हे भैमि एतस्य राज्ञो यशोभिः तद्दानजनितकीर्त्तिभिरखिले सकले अम्बुनि जले दुग्धीकृते सति हंसास्तदुभयस्य अम्बुदुग्धद्वयस्य व्यतिभेदे परस्परेण भिन्नत्वे मुग्धा मूढाः सन्तु भवन्तु हंसा हि परस्परमिश्रितयोरेव दुग्धजलयोर्व्यतिभेदं जानन्ति प्रकृते तु सर्व्वं जलं यशोभिर्दुग्धमेव जातं तस्मात् कृत्रिमदुग्धतात्त्विकदुग्धयोः कथं भेदं ज्ञातुं प्रभवन्त्वित्यर्थः तथा क्षीरे पदे पयस्यपि पयसि पदे च नानार्थे

Digitized by Google

क्षीरे पयस्यपि पदे द्वयवाचिभूयं
नानार्थकोषविषयोऽस्य मृषोद्यमस्तु ॥ ७६ ॥
ब्रूमः किमस्य नलमप्यलमाजुहूषोः
कीर्त्तीः सचैष च समादिशतः स्म कर्त्तुं ।
स्वद्वीपसीमसरिदीश्वरपूरपार
वेलावलाक्रमणविक्रममक्रमेण ॥ ७७ ॥

कोषस्य मेदिन्यादेर्विषयः प्रतिपाद्यं द्वयवाचिभूयं जलदुग्धोभयवाचकत्वं अद्य संप्रति एतद्यशोभिरखिलेऽम्बुनि दुग्धीकृते सति मृषोद्यं मिथ्यावाच्यं अस्तु भवतु अस्य त्वद्वरयशसा क्षीरनीरयोरेकत्वे कृते नीरस्यैवेतरा-भिधेयाभावात् कोषोक्तं क्षीरपयःपदयोर्द्व्यर्थवाचित्वमयुक्तमित्यर्थः अस्मादेनं वृणीष्वेतिभावः। क्षीरं दुग्धे जले इति पयः स्यात् क्षीरनीरयोरिति च मेदिनी ॥७६॥

ब्रूम इति । हे भैमि सर्वोत्कृष्टं नलमपि अलमत्यर्थं आजुहूषोः स्पर्द्धमानस्यास्य मेधातिथेरेवं किं ब्रूमश्चरित्रादिकं किं कथयामः अतोऽयं नलमपि स्पर्द्धते अतोऽस्य चरित्रादिकं वाक्पथातीतमित्यर्थः स्पर्द्धामेव ह स नलश्च एष मेधातिथिश्च उभौ कीर्त्तीः स्वयशांसि अक्रमेण युगपदेव स्वद्वीपयोर्जम्बुप्लक्षयोः सीमा मर्य्यादारूपो यः सरिदीश्वरो लवणसमुद्रस्तस्य यः पूरः प्रवाहस्तस्य पारे या वेला तीरं तस्यावलेन यत् आक्रमणं तत्र विक्रमं पराक्रमं कर्त्तुं समादिशतः स्म आदिष्टवन्तौ द्वयोरपि कीर्त्तयः समुद्रपारपर्य्यन्तं गता इत्यर्थः नलस्य कीर्त्तिर्यथा लवणसमुद्रस्य परपारपर्य्यन्तं गताऽन्यथा एतस्यापि स्वतटपारपर्य्यन्तमागता इति तेनास्य स्पर्द्धा तस्मात्तत्समानमर्य्यादमेनं वृणीष्वेति भावः अथ च नलस्पर्द्धया तस्मात्स्थूललक्ष्यमपि ह्रस्वितं आक्रान्तुमिच्छति नलात्क्रमत इति जगत्प्रत्ययस्यापि अल्पत्वं बोध्यं ॥ ७७ ॥

Digitized by Google

अम्भोजगर्भरुचिराथ विदर्भसुभ्रू
स्तं गर्भरूपमपि रूपजितत्रिलोकं ।
वैराग्यरूक्षमवलोकयति स्म भूपं
दृष्टिः पुरत्रयरिपोरिव पुष्पचापं ॥ ७८ ॥
ते तां ततोऽपि चक्षुर्जगदेकदीपा
दंशस्थलस्थितसमानविमानदण्डाः ।

अम्भोजेति ॥ अम्भोजगर्भवत्पद्ममध्यवत् रुचिरा मनोज्ञा अम्भोजगर्भस्य रुचिं दीप्तिं राति आदत्ते इति तादृशीति वा अतिगौराङ्गी विदर्भसुभ्रूर्भैमी अथानन्तरं रूपेण जिताखिललोका येन तादृशं गर्भरूपमपि युवानमपि तं भूपं मेधातिथिं वैराग्येण अननुरागेण रूक्षं परुषं यथा स्यात्तथा अवलोकयतिस्म दृष्टवती स्वप्रियनलस्पर्द्धिनं ज्ञात्वा क्रोधवशात्तं परुषेक्षणेन ददर्शेत्यर्थः उपमिनोति पुरत्रयरिपोः शिवस्य दृष्टिश्चक्षुः पुष्पचापं काममिव यथा अम्भोजगर्भरुचिरा क्रोधवशादारक्ता शिवस्य दृष्टिः रूपजितत्रिलोकं युवानं कामं वैराग्यरूक्षं अवलोकयतिस्म अतिसुन्दरेऽपि तस्मिन्ननुरक्ता नाभूदिति भावः । गर्भरूपः शिशौ यूनीतिविश्वः ॥ ७८ ॥

तइति ॥ अंशस्थलेषु स्कन्धदेशेषु स्थितः समानस्तुल्योनिम्नोन्नतत्वादिरहितोविमानदण्डोयेषां तादृशास्ते यानवाहकाजनाः खिलाज्जगदेकदीपाद द्वितीयलोकप्रदीपरूपादपि ततोमेधातिथेः सकाशात् तां भैमीं चक्षुः अन्यं प्रापयामासुः उपमिनोति सोत्कण्ठा उत्सुका या कैरववनी कुमुदवनी तस्याः सम्भृतप्ररोहाः पुष्पाङ्कुराश्चक्षुपुतेः सूर्यात् उदयिनीं उदयोन्मुखीं चन्द्रलेखामिव यथा सोत्कण्ठकैरववनीसम्भृतप्ररोहा दर्शं सूर्य

चण्डद्युतेरुदयिनोमिव चन्द्रलेखां
सोल्कपहकैरवनीधृक्तप्ररोहाः ॥ ७९ ॥
भूपेषु तेषु न मनागपि दत्तचित्ता
विस्मेरया वचनदेवतया तयाथ ।
वाणीगुणोदयतृणीकृतपाणिवीणा
निक्काणया पुनरभाणि मृगेक्षणा सा ॥८०॥
यन्मौलिरत्नमुदितासि स एव जम्बु
द्वीपस्तदर्थमिखितैर्युवभिर्विभाति ।

प्रविष्टां चन्द्रलेखां शुक्लपक्षे प्रतिपदादिक्रमेण सूर्य्यात् आकर्षन्ति तथे त्यर्थः प्रकाशकत्वात् सूर्य्योऽपि जम्बूद्वीपस्थः भैमी च उदयिनी सम्पत्तियुक्ता ॥ ७९ ॥

भूपेष्विति ॥ अथानन्तरं तया वचनदेवतया सरस्वत्या सा मृगेक्षणा भैमी पुनरभाणि वक्ष्यमाणमुक्ता किम्भूता सा तेषु भूपेषु द्वीपाधिपतिषु मनागपि ईषदपि न दत्तचित्ता न जातानुरागा किम्भूतया तया अत एव विस्मेरया विस्मयवत्या सहास्यया वा पुनः किम्भूतया वाण्याः स्व वचनस्य गुणोदयेन माधुर्य्यादिगुणसम्बन्धेन तृणीकृता जितः पाणिवी णायाः हस्तस्थितविपञ्च्यानिक्काणोध्वनिर्य्यया तथाभूतया ॥ ८० ॥

यन्मौलीति ॥ हे भैमि यस्य मौलिरत्नं शिरोरत्नं भूत्वा त्वं उदितासि उत्पन्नासि स एव जम्बुद्वीपस्तदर्थं मिलितैरेकत्रावस्थितै युवभिः कृत्वा विभाति विशेषेण शोभते उत्प्रेक्ष्यते नायं जम्बुद्वीपः किन्तु भवान्महादे वात् या भीतिर्भयं तया कम्पः कम्पनशीलः अतएव वक्रा दोलायितेन दोलनेन कृत्वा लुंठत्वा विच्छिद्य खात् आकाशात्पतितः कन्दर्पजोपाहक

Digitized by Google

दोलायितेन बहुना भवभीतिकम्प्रः
कन्दर्पलोक इव खात् पतितस्त्रुटित्वा ॥ ८१ ॥
विष्वग्वृतः परिजनैरयमन्तरीपै-
स्तेषामधीश इव राजति राजपुत्रि ।
हेमाद्रिणा कनकदण्डमयातपत्रः
कैलासरश्मिचयचामरचक्रचिह्नः ॥ ८२ ॥
एतत्तरुस्तरुणि राजति राजजम्बूः
स्थूलोपलानिव फलानि विमृश्य यस्याः ।

कामलोक इव अनयाः सर्व्वेऽपि युवानः कन्दर्पतुल्या इति भावः अन्य-
दपि कम्प्रं वस्तु बहुना दोलनेन त्रुटित्वा गगनात्पतति । ८१ ।

विष्वगिति । हे राजपुत्रि भैमि अयं जम्बुद्वीपस्तेषां शाकद्वीपादीनां
अधीश इव राजेव राजति शोभते राजचिह्नमेवाह किम्भूतः परिजनैः
सेवकरूपैरन्तरीपैः सिंहलद्वीपादिभिर्विष्वक् चतुर्दिक्षु वृतः वेष्टितः
तथा हेमाद्रिणा सुमेरुणा कनकदण्डमयं स्वर्णदण्डमयमातपत्रं वृहच्छत्रं
यस्य सः तथा कैलासस्य कैलासपर्व्वतस्य रश्मिचयोऽतिधवलकिरणस
मूह एव चामरचक्रचिह्नं चामरसमूहरूपं राजचिह्नं यस्य तादृशः
अन्योऽपि राजा परिजनैः सेव्यते स्वर्णदण्डातपत्रान्वितचामरचक्रचिह्नि-
तश्च भवति । ८२ ।

एतदिति । हे तरुणि युवति भैमि एतद्द्वीपस्य तरुश्चिह्नरूपोवृक्षो
राजजम्बूर्जम्बूभेदो राजति शोभते यस्या राजजम्ब्वाः स्थूलोपलानिव वृ-
हत्प्रस्तरानिव फलानि विमृश्य दृष्ट्वा सिद्धस्त्रियः प्रियं स्वामिनं इदं नि-
गदन्ति पृच्छन्ति इदं किं हे प्रिय दन्तियूथानि हस्तिसमूहाः केन यथा

Digitized by Google

सिद्धस्त्रियः प्रियमिदं निगदन्ति दन्ति-
यूथानि केन तदमादृदृक्षुः पर्येति ॥ ८३ ॥
जाम्बूनदं जगति विश्रुतिमेति मृत्स्ना
कृत्स्नापि सा तव रुचा विजितश्रि यस्याः ।
तज्जाम्बवद्रवभवास्य सुधाविधाम्बु
जम्बूः सरिद्वहति सीमनि कम्बुकण्ठि ॥ ८४ ॥
अस्मिन् जयन्ति जगतीपतयः सहस्र
मस्त्रास्रुसान्द्ररिपुतद्वनितेषु तेषु ।

तव जम्बूवृक्षं आवत्तेरिति हस्तितुल्यानि यस्याः फलानीति भावः । राज
जम्बूरिति जम्बूनां राजेति राजदन्तादित्वात् राजशब्दस्य प्राग्भावः ॥ ८३ ॥

जाम्बूनदमिति । हे कम्बुकण्ठि रेखात्रयाङ्कितग्रीवे भैमि यस्याः सा प्रसिद्धा कृत्स्नापि समस्तापि मृत्स्ना प्रशस्ता मृत्तिका जगति लोके तव रुचा विजितश्रि जितशोभं जम्बूनद्याहृदं जाम्बूनदं सुवर्णं भूत्वा विश्रुतिं प्रसिद्धिं एति प्राप्नोति सा जम्बूर्जम्बूनाम्नी सरिन्नदी अस्य द्वीपस्य सीमनि वहति किम्भूता तस्या जम्बा जाम्बवानि फलानि तेषां योऽसवोरसस्तस्माद्भवोयस्यास्तादृशी तथा सुधाविधं सुधातुल्यं अम्बु जलं यस्यास्तादृशी यन्मृत्तिका जाम्बूनदाख्यमुत्तमं सुवर्णं भवति सा जम्बूनदी अत्रैव द्वीपे वर्त्तत इत्यर्थः तथाच विष्णुपुराणे तीरभूस्तत्र संप्राप्य सुखवातविशोषिता जाम्बूनदाख्यं भवति सुवर्णं देवभूषणमिति अत्र पूर्वार्द्धे यच्छब्दश्रवणादुत्तरार्द्धे तच्छब्दस्यार्थत्वं केचित्तु मृत्स्नाविशेषणीभूतं सेति उत्तरार्द्धे योजयन्ति तन्न समीचीनं अत्यन्तव्यवहितयोजनारूपक्लिष्टत्वदोषापातात् । रेखात्रयाङ्कितग्रीवा कम्बुग्रीवेति कथ्यते इति हलायुधः ॥ ८४ ॥

अस्मिन्निति । हे रम्भोरु भैमि अस्मिन् जम्बूद्वीपे सहस्रं अनेके जगती

Digitized by Google

रम्भोरु चारु कतिचित्तव चित्तबन्धि
रूपान्निरूपय मुदाहमुदाहरामि ॥ ८५ ॥
प्रत्यर्थियौवतवतंसतमालमाला
न्मीलत्तमःप्रकरतस्करशौर्यसूर्ये ।
अस्मिन्नवन्तिनृपतौ गुणसन्ततीनां
विश्रान्तिधामनि मनो दमयन्ति किन्ते ॥ ८६ ॥

यत्तयोरांजानो जयन्ति सर्व्वोत्कर्षेण वर्त्तन्ते अतश्चुभ्यां रुधिरनयन जलाभ्यां यथाक्रमं सान्द्रा अतिशयं सिक्ता रिपवः शत्रवस्तद्वनितास्तेषां यश्च येकादृशेषु अतिशूरेषु तेषु जगतीपतिषु मध्ये चित्तबन्धिरूपान् मनोहारिसौन्दर्य्यान् कतिचित्कांश्चित् जगतीपतीन् अहं मुदा हर्षेण तव उदाहरामि वर्णयामि त्वं चारु यथा स्यात्तथा निरूपय अवधेहि मुदा निरूपयेति वा चित्तबन्धिरूपमितिपाठे क्रियाविशेषणं ॥ ८५ ॥

प्रत्यर्थीति ॥ हे दमयन्ति गुणसन्ततीनां सौन्दर्य्यादिगुणसमूहानां विश्रान्तिधामनि विश्रामस्थाने अस्मिन् अवन्तिदेशस्य नृपतौ ते तव मनः किं वर्त्ततइतिशेषः किम्भूते प्रत्यर्थिनां शत्रूणां यत् यौवतं युवति समूहस्तस्य वतंसः कर्णभूषणभूता या तमालमाला तमालदलसमूहः सैव उन्मीलतां उदयतां तमसां अन्धकाराणां प्रकरः समूहस्तस्य तस्करश्चौरो निरासकः शौर्य्यसूर्य्योवीरत्वरूपसूर्य्योयस्य तादृशे सूर्य्योयथा उन्मील तमःप्रकरं अपनयति तथास्य शौर्य्यमपि शत्रुपत्नीनां पतिविनाशनेन वैधव्यकरणात् कर्णभूषणतमालमालामपनयति अतिवीरे इत्यर्थः योषि तोहि प्रायेण वीरानुरागिण्योभवन्ति तस्मादस्मिंस्त्वमनुरक्तासीति मे प्र तिभाति तद्युक्तमिति भावः ॥ ८६ ॥

Digitized by Google

तस्यानुतीरवनवासितपस्विविप्रा
सिप्रा तवोर्म्मिभुजया जलकेलिकाले ।
आलिङ्गनानि दधती भविता वयस्या
हास्यानुबन्धिरमणीयसरोरुहास्या ॥ ८७ ॥
अस्याधिगम्य पुरमुज्जयिनीं भवानी
जागर्त्ति या सुभगयौवतमौलिमाला ।

तस्येति । हे भैमि तस्यावन्त्यां अनुतीरं तीरसमीपे वने वसन्तीत्येवं भूतास्तपस्विविप्रास्तापसद्विजा यस्यास्तादृशी तपस्विनामधिष्ठानेन पवित्रीत्यर्थः सिप्रा सिप्रानाम्नी नदी तव वयस्या सखी भविता भविष्यति सखीसाधर्म्यमेवाह किम्भूता जलकेलिकाले जलक्रीडासमये उर्म्मिभुजया तरङ्गरूपबाहुना तव आलिङ्गनानि दधती कुर्व्वती तथा हास्यस्य विकासस्यानुबन्धः सम्बन्धोऽस्यास्तीति तादृशं प्रफुल्लं यत् रमणीयं मनोज्ञं सरोरुहं पद्मं तदेव आस्यं मुखं यस्यास्तादृशी वयस्यापि सहास्यवदना भूत्वा केलिसमये बाहुना आलिङ्गति अस्मिन् वृते तव सिप्रानद्यां जलविहारो भविष्यतीति भावः ॥ ८७ ॥

अस्येति । हे मृगाक्षि भैमि सुभगं सौभाग्ययुक्तं यत् यौवतं युवतिवृन्दं तस्य मौलिमाला शिरोमालारूपा या भवानी पार्व्वती अस्य राज्ञ उज्जयिनीं उज्जयिनीनाम्नीं पुरं नगरीं अधिगम्य अधिष्ठाय जागर्त्ति स्फुरद्रूपा वर्त्तते त्वं तस्या भवान्याश्चिरं वरिवस्यया पूजया एतेन पत्या सह अर्द्धकायघटनाय शरीरार्द्धयोगाय क्षिप्यापि भविष्यसि भवानी यथा स्वयं शिवशरीरार्द्धभागिनी तथा चिरवरिवस्यया परितुष्टा सा शिव्यां त्वामपि त्वत्पतिशरीरार्द्धभागिनीं करिष्यति तस्मादेतद्वरणे

पत्यार्द्धकायघटनाय मृगाक्षि तस्याः
शिष्या भविष्यसि चिरं वरिवस्ययापि ॥८८॥
निःशङ्कमङ्कुरितता रतिवल्लभस्य
देवः स्वचन्द्रकिरणामृतसेचनेन ।
तत्रावलोक्य सुदृशां हृदयेषु रुद्र
स्तद्देहदाहफलमाह स किं न विद्मः ॥८९॥
आगःशतं विदधतोऽपि समृद्धकामा
नाधीयते परुषमक्षरमस्य वामाः ।

तव क्षणमपि वियोगो न भवेदिति भावः। अधिगंस्यसीत्यत्र अधिगम्यसि क्वचित् पाठः ॥ ८८ ॥

निःशङ्कमिति ॥ तत्रोज्जयिन्यां स देवो रुद्रः महाकालः स्वचन्द्रस्य निज चूडामणिभूतस्य चन्द्रस्य यत् किरणामृतं तस्य सेचनेन वर्षणेनेव सुदृशां तत्रत्यानां स्त्रीणां हृदयेषु मनःसु रतिवल्लभस्य कामस्य निःशङ्कं निर्भयं यथा स्यात्तथा अङ्कुरिततां प्रादुर्भावं अवलोक्य तस्य रतिवल्लभस्य यो देहदाहः शरीरभस्मीकरणं तस्य फलं प्रयोजनं किं आह कथयति तत् वयं न विद्मो न जानीमः तत्रत्यानां स्त्रीणां हृदयेषु कामप्रादुर्भावं दृष्ट्वा मया कामदेहदाहोऽव्यर्थ एव कृत इति तस्य बुद्धिर्भवतीत्यर्थः महाका लभीत्या उज्जयिन्यां कामप्रचारो विरल इत्याशङ्कां परित्यज्य एनं वृणीष्वेति भावः अवन्तिजा अतिकामुका इति प्रसिद्धिः आहेत्यत्र कापेति क्वचित्पाठः ॥ ८९ ॥

आगइति ॥ आगःशतं अपराधशतं विदधतोऽपि कुर्वतोऽपि अस्य राज्ञो वामाः स्त्रियः परुषं निष्ठुरमक्षरं नाधीयते न पठन्ति किम्भू ता यतः समृद्धकामा उन्मदमदनाः समृद्धकामत्वादेव अस्यापराधं नग

चान्द्री न तत्र हरमौलिशयालुरेका
नाध्यायहेतुतिथिकेतुरपैति लेखा ॥ ९० ॥
भूपं व्यलोकत न दूरतरानुरक्तं
सा कुण्डिनावनिपुरन्दरनन्दना तं ।
अन्यानुरागविरसेन विलोकनाद्धा
जानामि सम्यगविलोकनमेव रम्यं ॥ ९१ ॥

गच्छन्तीत्यर्थः अनध्याये हेतुत्वेन ख्याते तत्रोज्जयिन्यां अनध्यायहेतुतिथिः प्रतिपत् तस्य केतुश्चिह्नं चान्द्री चन्द्रसम्बन्धिनी एका कला हरमौला शयालुः शयाना सती नापैति तस्मान्नापगच्छति तत्रैव सदा वर्त्तते एकस्यां चन्द्रकलायां प्रतिपद्व्यवहारात् तस्याश्च तत्र शिवशिरसि सर्व्वदादर्शनात् प्रतिदिनं प्रतिपद्बुद्ध्या ताः किं पद्यमक्षरं नाधीयतइत्युत्प्रेक्षा अत्र प्रतिपत् मुख्या बोध्या एकचन्द्रकलात्मकत्वात् प्रतिपत्पाठघ्नीत्येतिव चनात् सर्व्वानध्यायापेक्षया प्रतिपदोमुख्यत्वात् सर्व्वास्वपि तिथिषु मुख्यप्रतिपद्बुद्धेरक्षरमपि न पठन्तीति युक्तमितिभावः । आगःप्रत चारित्वमेवास्य परित्यागे दोषः सूचितः ॥ ९० ॥

भूपमिति ॥ सा कुण्डिनावनिपुरन्दरस्य भीमस्य नन्दना पुत्री भमी दूरतरानुरक्तं अत्यनुरागिणमपि तं भूपं अवन्तिदेशाधिपं न व्यलोकत न ददर्श नत्वानुरक्तत्वात्तस्मिन्नानुरक्ता बभूवेत्यर्थः एतत् समीचीनमेव तया कृतमित्याह अन्यानुरागेण अन्यस्मिन्ननुरक्ततया विरसेन अध्य द्धया विलोकनाद्दर्शनापेक्षया सर्व्वथा अविलोकनमेव अदर्शनमेव वा रम्यं श्रेष्ठं सम्यक् समीचीनं जानामि यत्रानुरागोनास्ति तद्विलोकने नापि प्रयोजनं नास्तीत्यर्थः ॥ ९१ ॥

Digitized by Google

भैमीङ्गितानि शिविकामधरे वहन्तः
साक्षान्न यद्यपि कथञ्चन जानतेस्म ।
ऊहुस्तथाऽपि सविधस्थितसंमुखीन
भूपालभूषणमणिप्रतिविम्बितेन ॥ ९२ ॥
भैमीमवापयत यान्यजनस्तदन्यं
गङ्गामिव क्षितितलं रघुवंशदीपः ।

भैमीति । अधरे अधोभागे शिविकां वहन्तोजना भैम्या इङ्गितानि अन गुरागचिह्नानि कथञ्चन केनापि प्रकारेण साक्षात् प्रत्यक्षेण यद्यपि न जा नतेस्म न ज्ञातवन्तस्तथापि सविधस्थिताः ससमीपस्थिताः सम्मुखीनाः सम्मुखवर्त्तिनोये भूपाला राजानस्तेषां भूषणमणिषु अलङ्काररत्नेषु प्रति विम्बितेन प्रतिविम्बनेन हेतुना तानि ऊहुस्तर्कितवन्तः अनगुरागचि ह्नानि प्रतिविम्बवशाज्जानतेस्मेत्यर्थः प्रतिविम्बितेनेत्यत्र प्रतिविम्बिता नीति क्वचित् पाठस्तदा हेतुगर्भविशेषणं ऊहुरित्यत्र च जग्मुरिति क्वचित् पाठः ॥ ९२ ॥

भैमीमिति । यान्यजनोवाहकजनोभैमीं तस्मादवन्तीश्वरादन्यं राजानं अवापयत प्रापयामास उपमिनोति रघुवंशदीपो भगीरथोगङ्गां क्षि तितलमिव यथा भगीरथः स्वर्गाद्गङ्गां क्षितितलं अवापयत तथेत्यर्थः किम्भूतां भैमीं गङ्गाञ्च गाङ्गेयवत्पीतं हरिद्राभं कुचकुम्भयुगं यस्यास्तादृ शीं पक्षे गाङ्गेयेन भीष्मेण पीतं पानकर्म्मीकृतं कुचकुम्भयुगं यस्यास्तादृशीं तथा हारोमुक्तावली चूडा शिरोभूषणं बाहुभूषणं वा तयोः समागमवशे न विन्यासविशेषेण विभूषितामलङ्कृतां पक्षे हरस्येयं हारी या चूडा शि रोभागस्तस्यां समागमवशेन विभूषितां शोभमानां । चकारः शोभाधिक्य

Digitized by Google

गाङ्गेयपीनकुचकुम्भयुगाञ्च चारु
चूडासमागमवशेन विभूषिताञ्च ॥ ९३ ॥
तां मत्स्यलाञ्छनदराञ्चितचापभासा
नीराजितभ्रुवमभाषत भाषितेशा ।
ब्रीडाजडे किमपि सूचय चेतसा चेत्
क्रीडारसं वहसि गौडबिडौजसीह ॥ ९४ ॥
एतद्यशोभिरमलानि कुलानि भासां
तथ्यं तुषारकिरणस्य कृणीकृतानि ।

सूचकं । गाङ्गेयः स्यात् पुमान् भीष्मे क्लीबं स्वर्णकशेरुणोरिति मेदिनी
चूडा शिखायां वडभौ चूडा बाहुविभूषणे इतिविश्वः ॥ ९३ ॥

तामिति ॥ भाषितानां वाचां ईशा अधिष्ठात्री सरस्वती मत्स्यलाञ्छ
नेन कामेन दरमीषत् अञ्चितस्य आकृष्टस्य चापस्य धनुषो भासा दीप्त्या
नीराजिते निर्म्मञ्छिते आमोदीपिते भ्रुवौ यस्यास्तादृशीं तां भैमीं अभा
षत उवाच किमभाषतेत्याह हे ब्रीडाजडे लज्जया प्रागल्भ्यशून्ये भैमि
त्वं इह गौडबिडौजसि गौडेन्द्रे चेत् यदि चेतसा क्रीडारसं उपभोगाभि
लाषं वहसि धारयसि तर्हि किमपि कथमपि कटाक्षादिना सूचय मां
ज्ञापय यदि लज्जावशात् कथयितुं न शक्नोषि तर्हि कथमपि भङ्ग्या
सूचय ततोऽहमेतं वर्णयिष्यामीत्यर्थः ॥ ९४ ॥

एतदिति ॥ हे भैमि एतस्य गौडेन्द्रस्य यशोभिः कीर्त्तिभिस्तुषारकि
रणस्य चन्द्रस्य भासां किरणानां अमलानि निर्म्मलानि कुलानि समूहा
कृणीकृतानीति तथ्यं सत्यं ततस्तस्मादेव हेतोः दुग्धरिधेः सुधासमुद्रं
यत् अम्बु जलं तस्य सिन्धौ समुद्ररूपे तत्र तस्मिंश्चन्द्रे तेषां हरिणानामङ्कुर
वनी अङ्कुरवृन्दं तस्याः कवलाभिलाषात् ग्रासाभिलाषात् वसति इदं

स्थाने ततोवसति तत्र सुधाम्बुधिन्धौ
रत्नस्तदङ्कुरवनीकवलाभिलाषात् ॥ ९५ ॥
आलिङ्गितः कमलवत्करकल्पयाऽयं
श्यामः सुमेरुशिखयेव नवः पयोदः ।
कन्दर्पमूर्द्धरुचमण्डनचम्पकस्र
ग्दामत्वदङ्गरुचिकञ्चुकितस्तकास्तु ॥ ९६ ॥
एतेन सम्मुखमिलत्करिकुम्भमुक्ताः
कौक्षेयकाभिहतिभिर्व्विबभुर्विमुक्ताः ।

स्थाने युक्तं हरिर्योहि स्वादुजलरत्नाङ्कुरवङ्क्ते देशे वसति अयमतिवरां यच्छतीति भावः ॥ ९५ ॥

आलिङ्गितइति । हे भैमि त्वया आलिङ्गितोऽयं गौडेन्द्रः सुमेरोः शिखया स्वर्ण्णेव आलिङ्गितोनवः पयोदोनवीनोमेघ इव यकात्तु शोभतां विभूतोऽयं पयोदश्च कमलं सौभाग्यसूचकं पद्माकारचिह्नं तद्वान् करो हस्तोयस्य कमलवत्पद्मसदृशः करोयस्येति वा तादृशः पक्षे कमल वत्यः सजलाः करकावर्षोपला यस्य तादृशः तथा स्वभावाच्छ्यामः पक्षे सज लत्वाच्छ्यामः तथा कन्दर्पस्य ये मूर्द्धरुहाः केशास्तेषां मण्डनं भूषणभूतं यत् चम्पकस्रग्दाम चम्पकमालासमूहस्तद्वत् या तव अङ्गरुचिः शरीरकान्ति स्तया कञ्चुकितस्फुरितः पक्षे तादृशस्रग्दामवत् यस्त्वदङ्गं तद्वत् रुचिर्दीप्ति र्यस्यास्तादृशी विद्युत् तया कञ्चुकितः गौरश्यामयोः सम्बन्धोहि शोभाक रोभवतीत्येनं वृणीष्वेत्यर्थः ॥ कमलं सलिले ताम्रे जलजे व्योम्नि भेषजइति मेदिनी वर्षोपलस्तु करकेत्यमरः ॥९६ ॥

एतेनेति । हे भैमि एतेन राज्ञा कौक्षेयकस्य खड्गस्य अभिहतिभिः प्रहारैर्विमुक्ताः कुम्भस्थलेभ्यो भूमौ पातिताः सम्मुखमिलतां युद्धार्थं अभि

एतद्भुजोष्मभ्रमनिःसहतया विकीर्णाः
प्रस्वेदबिन्दव इवारिनरेन्द्रलक्ष्म्याः ॥ ९७ ॥
आश्चर्य्यमस्य ककुभामवधीनवाप
दाजानुगाद्भुजयुगादुदितः प्रतापः ।
व्यापत् सदाश्रयविसारितसप्ततन्तु
जन्मा चतुर्द्दश जगन्ति यशःपटश्च ॥ ९८ ॥

मुखमासन्नवतां करिणां कुम्भमुक्ताः कुम्भस्थलस्थितानि मुक्ताफलानि एतस्य राज्ञो भुजोष्मणो बाहुप्रतापस्य भ्रमणविषयेण निःसहतया सोढुमशक्तया अरिनरेन्द्राणां वैरिभूपानां लक्ष्म्या विकीर्णा विक्षिप्ताः प्रस्वेदबिन्दव इव घर्म्मजला इव विबभुः शोभन्ते स्म हस्तियोधितत्वादतिस्थूलत्वमिति भावः । ९७ ।

आश्चर्य्यमिति । यस्य राज्ञ आजानुगात् जानुपर्य्यन्तगामिनो भुजयुगात् उदित उत्पन्नः प्रतापः ककुभां दिशां अवधीन् प्रान्तान् अवापत् प्राप्तवान् एतदाश्चर्य्यं कार्य्याणां कारणगुणानुविधायित्वात् जानुमात्रपर्य्यन्तगामिनोऽतिक्षुद्रादपि बाहुयुगादुत्पन्नः प्रतापो यद्दिगन्तपर्य्यन्तं गतवान् तदाश्चर्य्यमित्यर्थः तथा सदाशयेन विशुद्धचित्तेन विसारिताः कृता ये सप्ततन्तवो यज्ञास्तेभ्यो जन्म यस्य तादृशोऽस्य यशःपटश्च यश एव शुक्लत्वात् पटश्च चतुर्द्दश जगन्ति भुवनानि व्यापत् व्याप्नोति स्म इदमपि आश्चर्य्यं अत्यन्तासम्भाव्यमानत्वात् अथ च सदा सर्व्वदा आश्रयेण हस्तेन विसारिता विस्तारिता ये सप्तसंख्यकास्तन्तवस्तज्जन्माऽपि पटो यच्चतुर्द्दश जगन्ति व्याप्तवान् तदाश्चर्य्यमित्यर्थः अतिप्रतापी यज्ञादिसत्कृत्यादिनाऽतियशस्वी चायमिति भावः । सप्ततन्तुर्मखः क्रतुरित्यमरः ॥ ९८ ॥

Digitized by Google

औदास्यसम्विदवलम्बितशून्यमुद्रा
मस्मिन् दृशोर्न्निपतितामवगम्य भैम्याः ।
स्वेनैव यान्यजनतान्यमजीगमत्तां
सुज्ञं प्रतीङ्गितविभावनमेव वाचः ॥ ९९ ॥

एतां कुमारनिपुणां पुनरप्यभाणी
द्वाणी सरोजमुखि निर्भरमारभस्व ।
अस्मिन्नसंकुचितपङ्कजसख्यभिज्ञा
निष्णातदृष्टिपरिरम्भविजृम्भणानि ॥ १०० ॥

औदास्येति ॥ यान्यजनता यानवाहकसमूहः अस्मिन् राजनि औदास्यसम्विदा उदासीनत्वबुद्ध्या अवलम्बिता धृता शून्यमुद्रा प्रेमराहित्यचिह्नं यत्र तादृशीं भैम्या दृशोश्चक्षुषोर्निपतितां नियतनं अवगम्य तस्य दर्पणादेः चात्वा स्वेनैव इतोऽन्यं प्रापयेति आज्ञां विना आत्मनैव तां भैमीं अन्यं राजानं अजीगमत् प्रापयामास आज्ञां विना कथमन्यत्र नीतेत्यर्थान्तरमुपन्यस्यति सुज्ञं चतुरं प्रति इङ्गितविभावनमेव भर्त्राचेष्टितप्रकाशनमेव वाचः नियोगवचनानि चतुरोहि नियोगवचनं विनैव इङ्गितद्वारा सर्व्वं प्रभुचेष्टितं जानातीत्यर्थः ॥ ९९ ॥

एतामिति ॥ वाणी सरस्वती कुमारी चासौ निपुणा चेति तां कोः पृथिव्या मारे पृथिवीकन्दर्परूपे नले निपुणां आसक्तां वा एतां भैमीं पुनरपि अभाणीत् उक्तवती किमभाणीदित्याह हे सरोजमुखि भैमि अस्मिन् राजनि असङ्कुचितस्य विकसितस्य पङ्कजस्य पद्मस्य सख्यभिज्ञायां साहद्याभ्यासे निष्णाता निपुणा या दृष्टिर्विकसितकमलतुल्यचक्षुरित्यर्थः तया परिरम्भविजृम्भणानि आलिङ्गनविलासान् निर्भरमतिशयेन आरभस्व कुरु एनं सादरमालोकयेत्यर्थः ॥ १०० ॥

Digitized by Google

प्रत्यर्थिपार्थिवपयोनिधिमाथमन्थ
पृथ्वीधरः पृथुरयं मथुराधिनाथः ।
अश्मश्रुजातमनुयाति न शर्व्वरीशः
श्यामाङ्ककर्व्वुरवपुर्वदनाञ्जमस्य ॥ १०१ ॥
बालेऽधराधरितनैकविधप्रवाले
पाशौ जगद्विजयकार्म्मणमस्य पश्य ।

प्रत्यर्थीति । हे भैमि अयं पृथुः पृथुनामा मथुराया अधिनाथः स्वामी किम्भूतः प्रत्यर्थिनः शत्रवोये पार्थिवा राजानस्तएव पयोनिधयः समुद्रास्तेषां माथे मथने मन्थपृथ्वीधरः मन्थाचलोमन्दरस्तद्रूपः अतिशूर इत्यर्थः । सौन्दर्य्यमपि वर्णयन्ति शर्व्वरीशश्चन्द्रः अश्मश्रुजातं अनुत्पन्नश्मश्रु केशरहितं अस्य राज्ञो वदनाञ्जं मुखपद्मं मुखचन्द्रं वा न अनुयाति नानुकरोति किम्भूतः यतः श्यामेन अङ्केन कलङ्केन कर्व्वुरं विचित्रं वपुर्यस्य तादृशः सकलङ्कश्चन्द्रः श्मश्रुरहिततन्मुखतुल्योन भवतीत्यर्थः अश्मश्रु जातमिति वयःसन्धौ वर्त्तमानत्वात् वरत्वयोग्य इति भावः न जातं श्मश्रु यस्मिन्नित्याहिताग्न्यादित्वात् आग्न्यादेरिति जातस्य परभावः अश्मश्रुजातं अनुत्पन्नश्मश्रुसमूहमिति केचित् ॥ १०१ ॥

बाले इति । अधरेण दन्तच्छदेन अधरितौ निर्जितौ नैकविधौ विविधौ प्रवालौ विद्रुमनवपल्लवौ यया हे तथाविधे बाले भैमि अस्य मथुराधिनाथस्य पाशौ वर्त्तमानं जगद्विजयस्य कार्म्मणं मन्त्रौषधं मणिं पश्य किम्भूतं मणिं ज्याघातजेन अनवरतधनुर्गुणाकर्षणजनितेन किणेन कलङ्कितचिह्नेन उपरज्य श्यामीभूय रिपुराजकस्य शत्रुनृपवृन्दस्य धूमकेतुतारायमाणं धूमकेतुनक्षत्रमिवाचरन्तं यथा धूमकेतुनक्षत्रमुदितं सत्प्रजा

Digitized by Google

ज्याघातजेन रिपुराजकधूमकातु
तारायमाणमुपरज्य मणिं किणेन ॥ १०२ ॥
एतद्भुजारणिसमुद्भवविक्रमाग्नि
चिह्नं धनुर्गुणकिणः खलु धूमलेखा ।
जातं यया रिपरिषन्मशकाथयाशु
विश्राणनाय रिपुदारदृगम्बुजेभ्यः ॥ १०३ ॥
श्यामीकृतां मृगमदैरिव माथुरीणां
धौतैः कलिन्दतनयामधिमध्यदेशं ।

च्चयसूचकं भवति तथास्य हस्तस्थितमपि मणिः धूमरूपां च्चयसूचकोभवतीत्यर्थः अतिशूरोऽयमिति भावः ॥ १०२ ॥

एतदिति । खलूत्प्रेक्षे धनुर्गुणकिणो धनुर्ज्यास्फालनजातकिणएव एतस्य राज्ञो भुजारणिरणिसदृशोऽयमपि मन्थनदारु तस्मात्समुद्भव उत्पत्तिर्यस्य तादृशोयो विक्रमरूपो ऽग्निस्तस्य चिह्नं ज्ञापिका धूमलेखा धूमराजिः न च किणः किन्तु पराक्रमाग्निधूमलेखैवेत्युत्प्रेक्षा धूमलेखात्वमेव द्रढयति अरिपरिषत् शत्रुसमूह एव मशकास्तेषामर्था निवृत्तिर्यया तादृशा यया धूमलेखया रिपुदारदृगम्बुजेभ्यः शत्रुपत्नीनयनपद्मेभ्योऽश्रुविश्राणनाय प्रतिबधात् वाष्पवितरणाय जातं भूतं अन्याऽपि धूमलेखा मशकान्निवर्त्तयति नयनानि च साश्रूणि करोति पूर्व्वोक्तएव भावः । जातमिति भावे क्तः अत्रार्थशब्दो निवृत्तिवचनः अर्थोऽभिधेयरैवस्तु प्रयोजननिवृत्तिष्वित्यमरः ॥ १०३ ॥

श्यामीकृतामिति । हे भैमि त्वं तत्र मथुरायां कलिन्दतनयां यमुनां भूमेः पृथिव्या रोमावलिमिव रोमराजीमिव विलोकयितासि प्रच्छसि किम्भूतां माथुरीणां मथुरावासिनीनां स्त्रीणां धौतैः क्षालितैर्मृगमदै

मध्याप्तकालियमहाह्रदनाभिशोभां
रोमावलीमिव विलोकयिताऽसि भूमेः॥१०४॥
गोवर्द्धनाचलकलापिचयप्रचार
निर्व्वासिताहिनि घने सुरभिप्रसूने ।
तस्मिन्ननेन सह निर्व्विशा निर्व्विशङ्कं
वृन्दावने वनविहारकुतूहलानि ॥ १०५ ॥
भावी करः करतलाङ्कुरकोरकोऽपि
तद्दल्लिपल्लवचये तव सौख्यलक्ष्यः ।

दिव कस्तूरिकाभिरिव श्यामीकृतां ननु स्वतः श्यामामित्युत्प्रेक्षा तथा अधिमध्यदेशं मध्यदेशे आप्ता लब्धा कालियस्य कालियनागस्य महाह्रदेन कृता नाभिशोभा यया तादृशीं रोमावल्यपि स्वतः श्यामापि स्मगम देरतिश्यामा तथा नाभ्या प्राप्तशोभा च भवति अनेन सह यमुनायां जलविहारं कुर्व्विति भावः ॥ १०४ ॥

गोवर्द्धनेति ॥ हे भैमि त्वं तस्मिन् प्रसिद्धे वृन्दं सुरतासक्तानां स्त्रीपुंसानां समूहं अवति वननैविध्याद्रोपयतीति यौगिकनामनि वृन्दावने मथुरायाः उपवनविशेषे अनेन राज्ञा सह निर्व्विशङ्कं सर्पादिभयशून्यं यथा तथा वनविहारकुतूहलानि वनक्रीडाकौतुकानि निर्व्विश उपभुङ्क्ष्व किम्भूते गोवर्द्धनाचलस्य गोवर्द्धनपर्व्वतस्य ये कलापिचयाम यूरसमूहास्तेषां प्रचारेण सञ्चरणेन निर्व्वासिता निष्काशिता अहयः सर्पायस्मात्तादृशे अतएव निर्व्विशङ्कं निर्व्विश तथा घने निविडच्छाये निविडत्वात् स्मरजनकत्वंदर्शनात्प्रकाररहिते वा तथा सुरभीणि सुगन्धीनि प्रसूनानि पुष्पाणि यत्र तादृशे कालियनागावासत्वात् सर्पवद्वने तत्र कथं विहरिष्यामीति शङ्कां परित्यज्य एनं वृणीष्वेति भावः ॥ १०५ ॥

भावीति ॥ हे भैमि तस्य वृन्दावनस्य वल्लिपल्लवचये लतापल्लवसमूह

Digitized by Google

अन्तस्त्वदास्यहतसारतुसारभानु
श्रीभानुकारिकरिदन्तजकङ्कणाङ्कः ॥१०६॥
तज्जः श्रमाम्बु सुरतान्तमुदा नितान्त
मुत्कण्टके स्तनयुगे तव सञ्चरिष्णुः।

मध्ये तव करः करयशाङ्कुरा नखाग्राण्येव कोरकाः कलिका यत्र तादृशो ऽपि रक्तत्वात् कोरकाकारनखयुक्तत्वाच्च किमयं कोरकयुक्तः पल्लवः किम्बा भैमीकर इति संशयविषयत्वयोग्योऽपीत्यर्थः सौख्येन अनायासे न कस्तोनिश्चेयो भावी भविष्यति किम्भूतः यतः अन्तर्म्मध्ये त्वदास्याय तव मुखनिर्म्माणार्थं विधात्रा हृतः सारोमध्यवर्त्तिश्रेष्ठभागोयस्य तादृ शोयस्तुसारभानुश्चन्द्रस्तस्य श्रीभामनुकरोति सदृशीकरोतीत्येवं भूतं यत् करिदन्तजं कङ्कणं हस्तिदन्तनिर्म्मितं करभूषणं तदेव अङ्कोऽसाधा रणचिह्नं यस्य तादृशः सर्व्वथा पल्लवसदृशोऽपि तव करः कङ्कणरूपेणा साधारणचिह्नेन भैमीकरएवायमित्यनायासेन ज्ञास्यत इत्यर्थः वृन्दावने नवपल्लवांश्छित्त्वा अनेन सह विहरिष्यसीति भावः॥१०६॥

तज्ज इति॥ हे भैमि तज्जोवृन्दावने जातः प्रभञ्जनजनो वायुलक्षणो जनः कुरङ्गमदेन मृगमदेन पङ्किलमपि कलुषमपि तव श्रमाम्बु सुर तायासजनितघर्म्मोदकं अम्बु निर्विचारं पाता पास्यति किम्भूतः सुर तस्य अन्ते अवसाने या मुद्धर्षस्तया नितान्तमत्यर्थं उत्कण्टके रोमाञ्चि ते तव स्तनयुगे सञ्चरिष्णुर्भ्रमणशीलः तथा खञ्जन् वृक्षैर्विघ्नात् मन्दी भवन् तथा पथिकः सर्व्वदा मार्गे स्थितः तथा पिपासुस्तृषितः अन्योऽपि मार्गः कण्टकितदेशे सञ्चरित्वा कण्टकवेधादिना खञ्जोभूत्वा पिपासुः सन् पङ्किलमपि जलं निर्विचारं पिबति अनेन सह विहारे कृतश्रमा त्वां भवतीं वृन्दावनवायुः सुखयिष्यतीति भावः॥ यद्यपि स्तनयुगे उत्क

खञ्जन् प्रभञ्जनजनः पथिकः पिपासुः
पाता कुरङ्गमदपङ्किलमप्यमङ्कं ॥ १०७ ॥
पूजाविधौ मखभुजामुपयोगिनो ये
विद्वत्कराः कमलकोमलकान्तिभाजः ।
लक्ष्मीमनेन दधतेऽनुदिनं वितीर्णै
स्ते हाटकैः स्फुटवराटकगौरगर्भाः ॥ १०८ ॥
वैरिश्रियं प्रति नियुद्धमनाप्नुवन् यः
किञ्चिन्न तृप्यति धरावलयैकवीरः ।

घटकालवर्णनं कामशास्त्रविरुद्धं तथापि द्वितीयार्थानुकूलतया तन्नात्य न्तदूषणमावहतीति बोध्यं ॥ १०७ ॥

पूजेति । हे भैमि कमलेन नलिन कोमलां निम्नलां कान्तिं भजन्त इति तादृशाः अथ च पद्मसदृशा ये विदुषां पण्डितानां कराहस्ता मख भुजां देवानां पूजाविधौ उपयोगिनस्तत्पराः विद्वांसो यैर्गिरन्तरं देवान् पूजयन्तीत्यर्थः ते कराः अनेन राज्ञा अनुदिनं प्रतिदिनं विती र्णैर्दत्तैर्हाटकैः सुवर्णैः कृत्वा लक्ष्मीं अङ्गुरीयकादिभूषणसम्पत्तिं शोभां वा दधते धारयन्ति किम्भूताः स्फुटवराटकवत् उत्फुल्लपद्मवीजकोषवत् गौरोगर्भोमध्यं येषां ते पद्मान्यपि देवपूजायामुपयोगं गच्छन्ति स्फुटे न वीजकोषेण गौरगर्भा भवन्ति लक्ष्मीञ्च धारयन्ति अतिवदान्योऽय मिति भावः ॥ १०८ ॥

वैरीति । हे भैमि धरावलये भूमण्डले एकवीरोऽद्वितीयशूरो यो राजा वैरिणां शत्रूणां श्रियं प्रति लक्षीकृत्य नियुद्धं बाहुयुद्धं नितरां युद्धं वा नाप्नुवन् नप्राप्नुवन् किञ्चित् न तृप्यति किमपि न तुष्यति युद्धमलब्ध्वैव वैरि

स त्वामवाप्य निपतन्मदनेषुवृन्द
स्यन्दीनि तृप्यतु मधूनि पिबन्निवायं ॥ १०९ ॥
तस्मादियं क्षितिपतिक्रमगम्यमान
मध्वानमैक्षत नृपादवतारिताक्षी ।
तद्भावबोधबुधतां निजचेष्टयैव
व्याचक्षते स्म शिविकानयने नियुक्ताः ॥११० ॥
भूयोऽपि भूपमपरं प्रति भारती तां
चक्षुःस्वमूरुचलचक्षुषमाचचक्षे ।

भिदंतां त्रियं लब्ध्वा युद्धाभावत्वात् न किंचिदपि तुष्यतीत्यर्थः स रा जा त्वां अवाप्य प्राप्य निपतन्तोये मदनेषवः कामवाणास्तेषां वृन्दं समूह स्तस्मात् स्यन्दन्ति पुष्पमयत्वात् चरन्तीत्येवंभूतानि मधूनि पुष्परसान् पिबन्निव तृप्यतु अतुल्यमदनयुद्धलाभात् तुष्यतु अन्योऽपि कश्चित् पूर्णमनुष्टोमधुपानेन तुष्यति अतिसुरतक्षममेनं वृणीष्वेति भावः ॥१०९॥

तस्मादिति । तस्मान्नृपात् मथुराधिपात् अवतारिते आकृष्टे अक्षिणी चक्षुषी यया तादृशी सती इयं भैमी क्षितिपतिषु राजसु क्रमेण गम्यमा नं अध्वानं पन्थानं ऐक्षत दृष्टवती अनन्तरञ्च शिविकानयने नियुक्ताः शिविकावाहका निजचेष्टयैव अन्यप्रापणरूपव्यापारेणैव तस्या भैम्या भावस्य अभिप्रायस्य नैनं वरिष्यामीत्येवं रूपस्य बोधे ज्ञाने बुधतां पण्डि ततां व्याचक्षते स्म प्रकाशयामासुः तामन्यं प्रापयामासुरितिभावः च न्योऽपि भावबोधेन निजपाण्डित्यं प्रकाशयति ॥ ११० ॥

भूयोऽपीति ॥ भारती सरस्वती अपरं भूपं राजानं प्रति अधीकृत्य च स्वम् विस्मयचमूरुसमं गलदचलं चपलं चक्षुर्यस्यास्तादृशीं तां भैमीं भूयोऽ

Digitized by Google

एतस्य काश्मिनृपतेस्त्वमवेक्ष्य लक्ष्मी
मक्ष्णोर्मुदं जनय खञ्जनमञ्जुनेत्रे ॥ १११ ॥
एतस्य सावनिभुजः कुलराजधानी
काशी भवोत्तरणधर्म्मतरिः स्मरारेः ।
यामागता दुरितपूरितचेतसोऽपि
पापं निरस्य चिरजं विरजीभवन्ति ॥ ११२ ॥
आलोक्य भाविविधिकर्तृकलोकदृष्टि
कष्टानि रोदिति पुरा कृपयैव रुद्रः ।

पि पुनरपि आचचक्षे उवाच किं तदित्याह हे खञ्जनवन्मञ्जुमनोहरं नेत्रं यस्यास्तथाविधे भैमि त्वं एतस्य काश्मिनृपतेः काशीराजस्य लक्ष्मीं सौन्दर्यं अवेक्ष्य दृष्ट्वा अक्ष्णोर्निजचक्षुषोर्मुदं हर्षं जनय कुरु अतिसुन्दरोऽयं दृश्यतामिति भावः । कृदिकारान्तोऽपि काशिशब्दोऽस्ति ॥ १११ ॥

एतस्येति । हे भैमि स्मरारेः शिवस्य तारकरूपस्य भवोत्तरणे संसारसमुद्रपारगमने धर्म्मतरिर्मूर्त्त्यानपेक्षत्वात् धर्म्मनौकारूपा सा काशी एतस्य अवनिभुजो राज्ञः कुलराजधानी वंशपरम्परावसतिस्थानं भवोत्तारकयोग्यत्वमेवास्या आह यां काशीं आगताः प्राप्ताजना दुरितपूरितचेतसोऽप्यतिपापात्मानोऽपि चिरजं चिरकालीनं पापं निरस्य परित्यज्य विरजीभवन्ति विगतरजोगुणाः सत्त्वनिष्ठा भवन्ति मोक्षं प्राप्नुवन्तीत्यर्थः अस्मिन्वृते मोक्षप्रदायां काश्यां तव वासो भविष्यतीति भावः ॥ ११२ ॥

आलोक्येति । रुद्रः भावीनि भविष्यन्ति विधिकर्तृकायालोकदृष्टेः कष्टानि दुःखानि आलोक्य विचार्य्य कृपयैव दययैव पुरा पूर्व्वस्मिन् काले

Digitized by Google

नामेच्छयेति मिषमात्रमधत्त यत्तां
संसारतारणतरीमसृजत् पुरीं सः ॥११२॥
वाराणसी निविशते न वसुन्धरायां
तत्र स्थितिर्मखभुजां भुवने निवासः ।

रोदितीति अरोदीत् लोकानां भाविदुःखं विचार्य्य दययैव रोदनात् तस्य रुद्र इति नाम जातमित्यर्थः तर्हि नामेच्छया रोदनाद्रुद्र इति पुराणप्रसिद्धस्य का गतिरित्यत आह नामेच्छयेति किमिति जातमात्रो रोदिषीति ब्रह्मणा पृष्टः सन् नामप्रार्थनया रोदिमीति यदुवाच इति एतत् मिषमात्रं व्याजमात्रं अधत्त धृतवान् वस्तुतो लोकानां भाविदुःखं विचार्य्य दययैव अरोदीत् न तु नामप्रार्थनयेत्यर्थः कथमेतदनुमितमित्याह यद्यस्मात् स रुद्रस्तां पुरीं काशीं संसारसागरतरीं भवसमुद्रतारणनौकां मुक्तिप्रदायिनीं असृजत् निर्म्मितवान् काश्यैवेदमनुमितमिति भावः। रोदितीति स्मायुक्तपुरायोगे भूतानद्यतने वा लुङ्घेति लट् ॥११२॥

वाराणसीति ॥ वाराणसी काशी वसुन्धरायां पृथिव्यां न निविशते न विद्यते तत्र वाराणस्यां लोकानां या स्थितिः सा मखभुजां देवानां भुवने स्वर्गे निवासः काशीवासः स्वर्गवास एवेत्यर्थः अतएव काश्याः स्वर्गरूपत्वादेव तस्या वाराणस्यास्तीर्थे मणिकर्णिकादौ वाराणसीरूपे तीर्थे वा मुक्तवपुषां परित्यक्तकलेवराणां मृतानां मुक्तिर्मोक्षः अन्यथा स्वर्गात् परमधिकं पदं कीदृक् मुक्तिभिन्नं मुदे आनन्दाय तु पुनरस्तु उत्पद्यतां अपितु मुक्तिभिन्नमन्यत्परं पदं नास्तीति मोक्ष एव तत्र मृतानां परम्पदमित्यर्थः भूम्यां तीर्थादौ मृतस्य यथा भूम्या अधिकं स्वर्गरूपपदं भवेत्तथा स्वर्गरू

तत्तीर्थमुक्तवपुषामत एव मुक्तिः
स्वर्गात्परं पदमुदेतु मुदे तु कीदृक् ॥११४॥
सायुज्यमृच्छति भवस्य भवाब्धियाद
स्तां पत्युरेव नगरीं नगराजपुत्र्याः ।
भूताभिधानपटुमद्यतनीमवाप्य
भीमोद्भवे भवतिभावमिवास्तिधातुः ॥११५॥
निविश्य निर्व्विरति काशिनिवासि भोगा
न्निर्म्माय नर्म्म च मिथोमिथुनं यथेच्छं ।

याता तस्यां मृतस्य तु स्वर्गादधिकं सुतरां मुक्तिपदाख्यं पदं भवितुं युज्य ते इति वाचनिकमपि काश्या मुक्तिदातृत्वं युक्त्यापि दृढीकृतं ॥ ११४ ॥

सायुज्यमिति । हे भीमोद्भवे भैमि भवः संसारएव अब्धिः समुद्रस्तस्य यादोजन्तुस्तां नगरीं काशीं एत्य प्राप्य नगराजपुत्र्याः पार्व्वत्याः पत्युर्भ वस्य शिवस्य सायुज्यं ऐक्यं ऋच्छति प्राप्नोति किम्भूतां नगरीं भूतस्य स त्यस्य तारकब्रह्मणोऽभिधाने उपदेशे पटुं समर्थां उपमिनोति अस्तिधा तुरिव यथा अस्तिधातुः असभुवीत्यस्धातुरद्यतनीं लुङ्प्रत्ययं अवाप्य प्राप्य भवतिभावं श्वादिर्येकिचाद्यादेरित्यनेन भूधातुत्वं ऋच्छति किम्भू तां अद्यतनीं भूतस्य भूतकालस्य अभिधाने पटुं अतीतकालार्थां काला यागां लुङ्प्रत्ययस्य अद्यतनीतिसंज्ञा ॥ ११५ ॥

निर्व्विश्येति । काश्यां साधु निवसतीत्येवंभूतं मिथुनं स्त्रीपुंसयुग्मं निर्व्विरति वैराग्यरहितं यथा तथा भोगान् स्रक्चन्दनादिविषयान् नि र्व्विश्य उपभुज्य तथा यथेच्छं यथाभिलाषं मिथोरहसि नर्म्मच विहारञ्च निर्म्माय कृत्वा पश्चतायां देहान्तसमये एकभावं ऐक्यं अयति प्राप्नोति

Digitized by Google

गौरीगिरीशघटनाधिकमकभावं
शर्म्मोर्म्मिकञ्चुकितमञ्चति पञ्चतायां ॥ ११६॥
न श्रद्दधासि यदि तन्मम मौनमस्तु
काश्या निजाप्ततमयैव तवानुभूत्या।
न स्यात्कनीयसितरा यदि नाम काश्या
राजन्वती मुदिरमण्डनधन्वना भूः ॥११७॥

किम्भूतं एकभावं गौरीगिरीशयोः पार्व्वतीपरमेश्वरयोर्घटना मेलनं ततोऽप्यधिकं उत्कृष्टं तयोर्द्दे द्वयं पृथगपि दृश्यते अस्य तु न तथा भवती त्याधिक्यं तथा शर्म्मोर्म्मिभिः सुखपरम्पराभिः कञ्चुकितं व्याप्तं मोक्षस्य आनन्दमयत्वात् पञ्चतायामित्यत्र निष्प्रपञ्चमिति क्वचित् पाठः निष्प्रपञ्चं प्रपञ्चात् संसारात् बहिर्भूतं एतस्मिन् मृते तव भोगमोक्षौ द्वावपि भवि ष्यतइति भावः ॥ ११६ ॥

नेति ॥ हे भैमि यदि त्वं न श्रद्दधासि काश्याः स्वर्गादप्याधिक्यवर्णनरूपे मम वचने प्रत्ययं न करोषि तर्हि मम मौनं अभाषणं अस्तु भवतु इतः परं नाहं काशीविषयं किमपि कथयिष्यामीत्यर्थः तर्हि तव मौनित्वे काशीमहिमानं का कथयिष्यतीत्यतआह मुदिरस्य मेघस्य मण्डनं अलङ्कारकं धनुर्यस्य सतथा तेन इन्द्रेण राजन्वती सौराज्यवती भूर मरावती यदि नाम काश्याः सकाशात् कनीयसितरा हीनतरा न स्यात् न भवेत् तर्हि निजया आत्मीयया आप्ततमया अतितरां हितया तवैव अनुभूत्या अनुभवेन त्वं काश्या कथनीया काशी स्वर्गादधिकेत्यस्मिन् विषये तवैव अनुभवः प्रमाणमित्यर्थः एतद्दर्शनं इन्द्रवरणापेक्षयापि स मीचीनमितिभावः। सुराज्ञि देशे राजन्वानिति घनजीमूतमुदिरजल मुग्धूमयोनय इत्यमरः ॥ ११७ ॥

Digitized by Google

स्नानाधिकाशि सुकृतान्यधिकाशि कुर्य्याः
कार्य्यं किमन्यकथनैरपि यत्र मृत्योः ।
एकं जनाय सततामयदानमन्य
द्वन्ये वहत्यमृतसत्रमवारितार्थि॥ ११८ ॥
भूभर्त्तुरस्य रतिरेधि मृगाक्षि मूर्त्ता
सोऽयं तवास्तु कुसुमायुध एव मूर्त्तः ।

स्नानेति । हे धन्ये सौभाग्यवति भैमि त्वं स्नानेन अधिकाशि उत्कृ ष्टासि अतिपवित्रतासि अतएव त्वं अधिकाशि काश्यां सुकृतानि पुण्यानि कुर्य्याः कुरु अन्येषां काशीगुणानां कथनैः किं अपितु न किमपि प्रयोजन मस्ति यत्र काश्यां मृत्योः सकाशात् जनाय सततं सर्व्वदा अभयदानं इतः परं युष्माकं भवभयं न भविष्यतीति अभयं ददत् एकं अमृतसत्रं मोक्ष लक्षणं सत्रं यज्ञोवहति वर्त्तते किम्भूतं अवारितार्थि अधिकारिनियमा भावात् अनिषिद्धा अर्थिनो याचकायत्र तादृशं क्षीणे पुण्ये मर्त्यलोकं विशन्तीत्यादिवचनात् स्वर्गादावपि मरणभयं विद्यते काश्यान्तु मरणोत्त रमुक्तिप्राप्तिनिश्चयात् कृतकृत्याः प्रतीक्षन्ते मृत्युं प्रियमिवातिथिमित्या दिवचनान्मृत्योरपेक्षितत्वाद्भयाभावः अमृतसत्रं अन्नसत्रं गङ्गारूपं वह तीति वा ॥ ११८ ॥

भूभर्त्तुरिति ॥ हे मृगाक्षि भैमि त्वं अस्य भूभर्त्तू राज्ञो मूर्त्ता साक्षाद्र तिः कामपत्नी एधि भव अथच मूर्त्ता शरीरिणी रतिः प्रीतिरेधि तथा सोऽयं राजा तव मूर्त्तः शरीरी कुसुमायुध एव कामदेवएव खलु भवतु त्वय्यस्य रतिबुद्धिर्भवतु अस्मिंश्च तव कामबुद्धिर्भवत्वित्यर्थः अथच मूर्त्तः कुसुमायुधः कामोद्दीपकानुरागोऽस्तु तथा विराद्धं कोपितं गिरिशं शिवं आराद्धुं सेवितुं सेवया तदीयं कोपमपाकर्त्तुं आशु शीघ्रं तत्र पुरि काश्यां

Digitized by Google

भातश्च ताविव युवां गिरिशं विराद्ध
माराद्भमाप्नु पुरि तत्र कृतावतारौ ॥११९॥
कामानुशासनशते सुतरामधीती
सोऽयं रहो नखपदैर्महतु स्तनौ ते ।
रुष्टाद्रिजाचरणकुङ्कुमपङ्करागसंकीर्णशङ्करशशांककलाङ्ककारैः ॥ १२० ॥
पृथ्वीशएष नुदतु त्वदनङ्गताप
मालिङ्ग्य कीर्त्तिचयचामरचारुचापः ।

कृतावतारौ अवतीर्णौ तौ रतिकामदेवाविव युवां भातश्च शोभतां यथा त्वं सुन्दरी तथायमपि सुन्दर इति भावः ॥ ११९ ॥

कामेति ॥ हे भैमि कामानुशासनानां कामशास्त्राणां वात्स्यायनादिप्रणीतानां शते समूहे सुतरामतितरां अधीती कृताध्ययनः सोऽयं राजा रहो नखपदैर्विहारे दत्तैर्नखक्षतैः कृत्वा ते तव स्तनौ कुचौ महतु पूजयतु किम्भूतैः रुष्टायाः प्रणयकुपिताया अद्रिजायाः पार्व्वत्याश्चरणयोः स्थितोयः कुङ्कुमपङ्करागः कुङ्कुमविलेपनोरिहित्यं तेन सङ्कीर्णा व्याप्ता या शङ्करपति तस्य शङ्करस्य शशाङ्ककला चन्द्रकला तस्या अङ्ककारैः प्रतिमल्लैस्तत्सदृशैरित्यर्थः सुरतपण्डितोऽयं त्वया सह नानाविधैर्बन्धैर्विहरिष्यतीति भावः । कामानुशासनशत इति अव्यहितेना क्तेनाकर्म्मण इति अधीती त्यस्य योगे कर्म्मणि सप्तमी अङ्ककारैरिति अङ्कं युद्धं कुर्व्वन्तीति कर्म्मण्यणिति अट् । अङ्कोरूपकभेदाङ्गचिह्नरेखाजिभूषणे इति मेदिनी आजियुद्धं ॥ १२० ॥

पृथ्वीशइति ॥ हे भैमि एष पृथ्वीशोराजा आलिङ्ग्य त्वदनङ्गतापं तव कामज्वरं नुदतु अपनयतु किम्भूतः कीर्त्तिचयएव जनकतया धनुषि वर्त्त

संग्रामसङ्गतविरोधिशिरोधिदण्ड
खण्डिक्षुरप्रशरसंप्रसरत्प्रतापः ॥ १२१ ॥
वक्षस्त्वदुग्रविरहादपि नास्य दीर्णं
वज्रायते पतनकुण्ठितशत्रुशस्त्रं ।

मार्गीयशःसमूहएव चामरं तेन चारु सुन्दरं चापं धनुर्यस्य तादृशः अति धनुर्द्धरस्य हि चापे चामरं तिष्ठति तथा संग्रामे युद्धे सङ्गतामिलिताये विरोधिनोवैरिणस्तेषां शिरोधिदण्डाः कन्धरादण्डास्तान् खण्डयितुं छेत्तुं शीलं येषां तादृशा ये क्षुरप्राः शराः क्षुरप्रास्त्रवाणास्तैः सम्यक् प्रसरन् व्याप्नुवन् वर्द्धमानः प्रतापोयस्य तादृशः अतिवीरोऽयमित्यर्थः स्त्रियश्च प्रायेण वीरानुरागिण्यो भवन्ति तस्मादेतदाश्लिङ्गनेनैव तवानङ्गतापः शाम्यतीतिभावः अथच विवृद्धप्रतापाश्लिङ्गनेन तापशान्तिराश्चर्यका रिणीति विरोधाभासः ॥ १२१ ॥

वक्षइति ॥ हे भैमि अस्य राज्ञोवक्षः वज्रायते वज्रं कुलिशमिवाच रति निष्ठूतं यतस्तव उग्रो दुःसहोयोविरहोवियोगस्तस्मादपि न दीर्णं न स्फुटितं तथा पतनेन कुण्ठितानि भग्नानि शत्रूणां शस्त्राणि यत्र ता दृशं कुलिशमपि दुःसहवह्नितापादितोऽपि दीर्णं न भवति पतनकुण्ठित शत्रुशस्त्रञ्च भवति अथच वज्रायते हीरकायते हीरकोऽपि वह्नितापादि ना न स्फुटति शस्त्राणि च कुण्ठयति यदुक्तं। पृथिव्यां यानि रत्नानि ये चान्ये लोहजातयः तानि वज्रेण लिख्यन्ते वज्रं नान्येन लिख्यत इति ॥ कर्कशमस्य वक्षःस्थलमितिभावः तथास्य भुजयोस्तत्कन्दकन्दलतया तदे व वज्रभूतवक्षएव कन्दोमूलं तस्य कन्दलौ नवाङ्कुरौ तयोर्भावस्तत्ता तया तेजोवह्निर्जनितः प्रताप।नलः अरिवधूनां शत्रुपत्नीनां नयनाम्बुनामिश्रवज्र जलेनापि न नमति न शाम्यति वज्रमूलविद्युदग्निरपि जलेन नशाम्यति

Digitized by Google

तत्कन्दकन्दलतया भुजयोन तेजो
वह्निर्नमत्यरिवधूनयनाम्बुनापि ॥ १२२ ॥
किं न द्रुमा जगति जाग्रति लक्षसंख्या
स्तुल्योपनीतपिककाकफलोपभोगाः ।
तुल्यस्तु कल्पविटपी फलसंप्रदानं
कुर्व्वन् स एष विबुधानमृतैकवृत्तीन् ॥ १२३ ॥

बलिवीरोऽयमिति भावः । कन्दलन्तु कपाले स्यादुपरागे नवाङ्कुरे इति विश्वः ॥ १२२ ॥

किमिति । तुल्यं समानं यथा तथा उपनीतोदत्तः पिकेभ्यः कोकिलेभ्यः काकेभ्यश्च फलैरुपभोगोयैस्तादृशा लक्षसंख्या बहवोद्रुमा वृक्षाआम्रादयो जगति भुवने किं न जाग्रति न विद्यन्ते अपितु जाग्रत्येव तु किन्तु अमृतैकवृत्तीन् सुधैकजीविनो विबुधान् देवान् फलानां संप्रदानं दानपात्रं कुर्व्वन् स एष कल्पविटपी कल्पवृक्षः तुल्यः स्तोतुमर्हः आम्रादयोवृक्षाहि पात्रापात्रमविविच्य यस्मै कस्मैचिदपि सामान्येन फलं ददतीति न ते स्तुत्याः कल्पवृक्षस्तु सुधाभोजिदेवेभ्य एव स्वफलं ददातीति स एव स्तुत्यइत्यर्थः अथच समासोक्त्या पृथिव्यां बहवोदातारो राजानः सन्ति किन्तु तेषां पात्रापात्रविवेचना नास्तीति न ते स्तुत्याः एष काशीराजस्तु अमृतैकवृत्तीन् यज्ञैकवृत्तीन् अयाचितमात्रवृत्तीन् वा मोक्षैकवृत्तीन् वा विबुधान् पण्डितान् दानपात्रं करोतीति एषएव कल्पवृक्षसदृशत्वात् तुल्यस्तस्मादयमेव त्वया वरणीय इति भावः॥ अमृतं यज्ञशेषेतु सुधामोक्षाप्ययाचिते इति हेमचन्द्रः ॥ १२३ ॥

Digitized by Google

अस्मै करं प्रवितरन्तु नृपा न कस्मा
द्दत्त्वैव नच यदभूत् प्रतिभूः कृपाणः ।
दैवाद्यदा प्रवितरन्ति न ते तदैव
नैदं कृपा निजकृपाणकरग्रहाय ॥ १२४ ॥
एतद्बलैः क्षणिकतामपि भूखुराग्र
सर्वायुषां रयवशाद्समापयद्भिः ।

अस्मा इति । नृपाः सर्व्वे राजानः अस्मै काश्मीरराजाय करं राजग्राह्य भागं कस्माद्धेतोर्न प्रवितरन्तु न ददतु अपितु ददत्येव यद्यस्मात् अस्य राज्ञः कृपाण एव खड्ग एव तत्र करादाने प्रतिभूर्लग्नकोऽभूत् अस्य कृपा णाद्भीताः सन्तः सर्व्व एव राजानोऽस्मै करं ददतीत्यर्थः यदा ते नृपा दैवात् कस्माच्चित् प्रतिबन्धकाद्धेतोः करं न प्रवितरन्ति न ददति तदैव तस्मिन् समय एव नतु विलम्बेन निजस्य कृपाणस्य करेण ग्रहाय धारणाय इद कृपा अस्य राज्ञः कृपा दया न भवति क्रुद्धः सन् खड्गबलेनाभिहत्य बले न करं गृह्णातीत्यर्थः अथच निजादात्मीयादपि कृपाणात् तत्सम्बन्धा प्रतिभुवः करस्य राजभिर्देयस्य बलेग्रहाय अस्य कृपा न भवति उत्त मर्णोहि अधमर्णेन दातुमशक्यं ऋणं प्रतिभुवो बलाद्गृह्णात्येव अतितेजस्वी चक्रवर्त्ती चायमिति तव वरणयोग्य इति भावः । इदङ्कृपेति षष्ठीसमासः ॥ १२४ ॥

एतद्बलैरिति ॥ एतस्य राज्ञो बलैः सैन्यरूपैर्वाहैरश्वैः सह सहस्र इन्द्रस्य योऽश्वो घोटकस्तस्य उच्चैःश्रवाख्यस्य गर्व्वः अहमेव वेगवानित्यात्मे गर्व्वा मीत्यहङ्कारोऽलुप्यत विनाशितः किम्भूतैः भुवः पृथिव्याः खुराग्रैर्व ये स्व

दृक्पेयकेवलनभःक्रमणप्रवाहै
र्वाहैरलुप्यत स यद्दृढगर्व्वगर्व्वः ॥ १२५ ॥
तद्दर्णनासमयएव समेतलोक
शोभावलोकनपरा तमसौ निरासे ।
मानी तया गुणविदा यदनादृतोऽसौ
तद्भूभृतां सदसि दुर्यशसेव मम्लौ ॥१२६ ॥

श्रांतस्तनूपाति यानि चायूंषि स्थितयस्तेषां चाक्षिपतामपि चणमात्रं भूम्या
मवस्थितिमपि रयवशादेनयशात् असमाप्यद्भिरसम्पूर्णां कुर्व्वद्भिः चण
मात्रमपि खुराग्रेण भूमीमस्पृशद्भिरित्यर्थः तथा दृग्भिर्जनानां चक्षुर्भिः
पेयाः सादरमवलोकनीयाः केवलं नभःक्रमणप्रवाहा आकाशगमनप
रम्पराश्येषां तादृशैः अतिवेगवत्तरैरित्यर्थः एतेनेन्द्रतुल्योऽयमिति भाव
॥ १२५ ॥

तद्वर्णनेति । असौ दमयन्ती तस्य काश्मीराजस्य वर्णनासमयएव समेताः
समागता ये लोका नृतनाराजानस्तेषां शोभायाअवलोकनपरा दर्शनास
क्ता सती तं काश्मीराजं निरासे निराचकार अन्यावलोकनेनैव तया तस्य
निराकरणं कृतमित्यर्थः मानी अभिमानवान् असौ काश्मीराजश्च यस्
मात् गुणविदा गुणज्ञया तया दमयन्त्या अनादृतोऽवज्ञातस्तस्मात्
भूभृतां राज्ञां सदसि सभायां स दुर्यशसेव अकीर्त्त्यैव मम्लौ म्लानो बभूव
अनादरकर्त्री भैमी तावद्गुणज्ञा नतु मूर्खा सोऽपि मानी नतु मानाप
मानसमानोमूर्खः अनादरश्च राजसभायां नतु मूर्खसभायां सुतरां तस्य
म्लानिरुचिता । निरासे इति वोपसर्गादूहास्यत्य इत्यात्मनेपदं ॥१२६

सानन्तानाप्य तेजःसखनिखिलमरुत्पार्थिवान्दिष्टभाज-
श्चित्तेनाशाजुषस्तान् सममसमगुणानञ्चती गूढ-
भावा ॥

अथ छन्दोऽन्तरेण सर्वश्लेषं सूचयति । सेति । शुभाङ्गी सुन्दरमुखाव-
यवा सा भैमी एकं पुरुषं नलं अनु लक्षीकृत्य भूयोऽतिशयेन तत्परीभूय
तद्गतचित्ता भूत्वा उपनिषदो ब्रह्माद्वैतप्रतिपादकश्रुतेरुपमा सादृश्यं य-
स्यास्तादृशी आसीत् भूयः पुनरपि वा पूर्वं हंसादिभ्यः श्रुत्वा तत्परा जातैव
अधुना सर्व्वानपि राज्ञोऽनलादपकृष्टान् मत्वा पुनरपि तत्परा बभूवेत्यर्थः
किम्भूतं पुरुषं पारेवाग्वर्त्तिरूपं वाचां पारे वर्त्तमानं रूपं यस्य तादृशं
वचनागोचरसौन्दर्य्यवन्तमित्यर्थः तथा चिदम्भोधिं ज्ञानसमुद्रं अतिज्ञा-
निनमित्यर्थः तथा निःसीमानन्दं भैमीलाभनिश्चयात् अपरिमितहर्षं
सा किम्भूता तान् पूर्व्वोक्तान् तेजःसखान् तेजस्विनो निखिलान् सम-
स्तान् मरुतो देवान् पार्थिवान् राज्ञश्च आप्य प्राप्य तेषां समीपं गत्वा मु-
ञ्चती किमपि दूषणमुद्भाव्य परित्यजन्ती यतो गूढभावा गूढाभिप्राया नल-
विषयमनुरागं गोपयन्ती तान् किम्भूतान् अनन्तान् संख्यातुमशक्यान्
तथा दिष्टभाजो भाग्यवतः यद्वा दिष्टं स्वयम्बरकालं भजन्ते इति तादृशान्
स्वयम्बरकाले समागतान् नतु विलम्बेनागतान् तथा चित्तेन मनसा समं
युगपत् आशाजुषः भैमीप्राप्त्यभिलाषिणः तथा असमगुणान् निरुपम-
सौन्दर्य्यादिगुणान् परस्परमतुल्यगुणान् वा उपनिषदपि सानन्तान्
अनन्तैर्नित्यैः सामान्यविशेषसमवायैः सह वर्त्तमानान् दिष्टभाजः कालस-
हितान् चित्तेन समं मनःसहितान् आशाजुषो दिक्सहितान् तान् प्रसि-
द्धान् आपएव आप्यं जलं तत्र तेजश्च खेनाकाशेन सह वर्त्तमानो निखिलः
समस्तो मरुद्वायुश्च पार्थिवाः पृथिवीसम्बन्धिनश्च ते तथा तान् तथा
असमं पञ्चसंख्यायोगित्वाद्विषमसंख्यं कर्म्म उत्क्षेपणादिकं तत्र गुणाश्च

Digitized by Google

पारे वाक्पथयातिरूपं पुरुषमनुचिदम्भोधिमेकं शुभाङ्गीनिः
सीमानन्दमासीदुपनिषदुपमा तत्परीभूय भूयः॥१२७॥

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यं।
शृङ्गारामृतशीतगावयमगादेकादशस्तन्महा काव्ये
ऽस्मिन् निषधेश्वरस्य चरिते सर्गो निसर्गोज्ज्वलः ॥१२८॥

रूपादयस्तेतथा तांश्च मुञ्चती अद्वैतप्रतिपादनेन निराकुर्व्वती तथा गूढभावा अतिगहनत्वाद्दुर्ज्ञेयाभिप्राया तथा शुभानि अङ्गानि शिक्षा कल्पादीनि यस्यास्तादृशी सा वाक्पथातीतस्वरूपं चिदम्भोधिं चिन्मयं निःसीमानन्दं परमानन्दस्वरूपं एकं अद्वितीयं पुरुषं परमात्मानं अधी कृत्य तत्परा तत्तात्पर्य्या भवति ॥ स्रग्धरावृत्तमिदं ॥ १२७ ॥

श्रीहर्षमिति॥ शृङ्गारः शृङ्गाराख्योरस एव अमृतं सुधा तस्य शीतगौ चन्द्ररूपे अयं एकादशः सर्गोऽगात् समाप्तः अन्यत् सर्व्वं पूर्ब्बवत्॥ १२८॥

इतिश्रीप्रेमचन्द्रन्यायरत्नविरचितायामन्वयबोधिकासमाख्यायां नैषध टीकायामेकादशः सर्गः समाप्तः॥

राढे गाढप्रतिष्ठः प्रथितपृथुयशाः शाकराढानिवासी विप्रः श्रीरामनारायण इतिविदितः सत्यवाक् संयतात्मा। तत्सूनुः सूनृतेनाखिलजनदयितः श्रीयुतः प्रेमचन्द्रश्चक्रे चक्रिप्रसादान्नलचरितमहाकाव्यपूर्व्वार्द्धं टीकां॥

समाप्तश्चायं पूर्ब्बभागः

॥ शुभमस्तु ॥

Digitized by Google

सानन्तानाप्य तेजःसखनिखिलमरुत्पार्थिवान्दिष्टभाज
श्चित्तेनाशाजुषस्तान् सममसमगुणानञ्चती गूढ
भावा ॥

अथच्छन्दोऽन्तरेण सर्गशेषं सूचयति । सेति । शुभाङ्गी सुन्दराङ्गी च वयवा सा भैमी एकं पुरुषं नलं अनु लक्षीकृत्य भूयोऽतिशयेन तत्परीभूय तद्गतचित्ता भूत्वा उपनिषदो ब्रह्माद्वैतप्रतिपादकश्रुतेरुपमा सादृश्यं यस्यास्तादृशी आसीत् भूयः पुनरपि वा पूर्व्वं हंसादिभ्यः श्रुत्वा तत्परा जातैव अधुना सर्व्वानपि राज्ञोऽनलादपकृष्टान् मत्वा पुनरपि तत्परा बभूवेत्यर्थः किम्भूतं पुरुषं पारेवाग्वर्त्तिरूपं वाचां पारे वर्त्तमानं रूपं यस्य तादृशं वचनागोचरसौन्दर्य्यवन्तमित्यर्थः तथा चिदम्भोधिं ज्ञानसमुद्रं अतिज्ञानिनमित्यर्थः तथा निःसीमानन्दं भैमीलाभनिश्चयात् अपरिमितहर्षं सा किम्भूता तान् पूर्व्वोक्तान् तेजःसखान् तेजस्विनो निखिलान् समस्तान् मरुतो देवान् पार्थिवान् राज्ञश्च आप्य प्राप्य तेषां समीपं गत्वा मुञ्चती किमपि दूषणमुद्भाव्य परित्यजन्ती यतो गूढभावा गूढाभिप्राया नलविषयमनुरागं गोपयन्ती तान् किम्भूतान् अनन्तान् संख्यातुमशक्यान् तथा दिष्टभाजो भाग्यवतः यद्वा दिष्टं स्वयम्वरकालं भजन्तीति तादृशान् स्वयम्वरकाले समागतान् नतु विलम्बेनागतान् तथा चित्तेन मनसा समं युगपत् आशाजुषः भैमीप्राप्त्यभिलाषिणः तथा असमगुणान् निरुपमसौन्दर्य्यादिगुणान् परस्परमतुल्यगुणान् वा उपनिषदपि सानन्तान् अनन्तैर्नित्यैः सामान्यविशेषसमवायैः सहवर्त्तमानान् दिष्टभाजः कालसहितान् चित्तेन समं मनःसहितान् आशाजुषो दिक्सहितान् तान् प्रसिद्धान् आप एव आप्यं जलं तच्च तेजश्च खेनाकाशेन सह वर्त्तमानो निखिलः समस्तो मरुद्वायुश्च पार्थिवाः पृथिवीसम्बन्धिनश्च ते तथा तान् तथा असमं पञ्चसंख्यायोगित्वाद्विषमसंख्यं कर्म्म उत्क्षेपणादिकं तच्च गुणाश्च

Digitized by Google

पारेवाग्वर्त्मिरूपं पुरुषमनुचिदम्भोधिमेकं शुभाङ्गी निः
सीमानन्दमासीदुपनिषदुपमा तत्परीभूय भूयः॥१२७॥

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यं।
शृङ्गारामृतशीतगावयमगादेकादशस्तन्महा काव्ये
ऽस्मिन् निषधेश्वरस्य चरिते सर्गो निसर्गोज्ज्वलः ॥१२८॥

रूपादयस्तेतथा तांश्च मुञ्चती अद्वैतप्रतिपादनेन निराकुर्व्वती तथा गूढभावा अतिगहनत्वाद्दुर्ज्ञेयाभिप्राया तथा शुभानि अङ्गानि शिक्षा कल्पादीनि यस्यास्तादृशी सा वाक्पथातीतस्वरूपं चिदम्भोधिं चिन्मयं निःसीमानन्दं परमानन्दस्वरूपं एकं अद्वितीयं पुरुषं परमात्मानं लब्धी भूय तत्परा तत्तात्पर्य्या भवति ॥ स्रग्धरावृत्तमिदं ॥ १२७ ॥

श्रीहर्षमिति॥ शृङ्गारः शृङ्गाराख्योरस एव अमृतं सुधा तस्य शीतगौ चन्द्ररूपे अयं एकादशः सर्गोऽगात् समाप्तः अन्यत् सर्व्वं पूर्व्ववत्॥ १२८॥

इतिश्रीप्रेमचन्द्रन्यायरत्नविरचितायामन्वयबोधिकासमाख्यायां नैषध टीकायामेकादशः सर्गः समाप्तः॥

राढे गाढप्रतिष्ठः प्रथितपृथुयशाः शाकराढानिवासी विप्रः श्रीरामना रायण इतिविदितः सत्यवाक् संयतात्मा। तत्सूनुः सूनृतेनाखिलजन दयितः श्रीयुतः प्रेमचन्द्रश्चक्रे चक्रिप्रसादान्नलचरितमहाकाव्यपूर्व्वार्द्धं टीकां॥

समाप्तश्चायं पूर्व्वभागः

॥ शुभमस्तु ॥

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Princeton University Library
32101 074217876
Digitized by Google

Digitized by Google